310

॥ अथ श्रीमद्भागवते सप्तमः स्कंधः प्रारभ्यते ॥

N. SESHAGIRI
Proprietor
S. S. KRISHNA
CRANGANORE
MERCHANT, S

श्रीवेदव्यासायनमः ॥ षष्ठस्कंधाभिधेतीर्थेस्नातःसप्तमनाम्न्यथ ॥ श्रीमद्भागवतेस्नातुंप्रयतेतत्त्वसंविदे १ सेवायेषामपवर्गगतिर्जगतामगस्तेश्रीमद्विष्ण्वंघ्रिसरोरुहयुगलेभ्रमंतःसंतःकुर्वंतुदयांमयिवि
जयध्वजतीर्थेनित्यानित्याभ्यस्तादितिजांघ्रितनुस्वतीर्थसुतीर्थे संततवेदांतपरिनिष्ठितानामपिश्रीनारायणपरमप्रसादमंतरेणानापादितसमीचीनज्ञानामृतकलानां क्वचित्क्वचिदसुरजनमोहायप्रदार्शी
तशुक्रशोणितसंपर्कादिभिरिवभगवतःप्रादुर्भावैस्तत्त्वेसंशयालूनांसतांविसंशयार्थं श्रीनृसिंहावतारस्तत्प्रसक्तयेनानाविधवर्णाश्रमाचारभेदविचारस्तत्पूजाप्रकारश्चनिरूप्यतेस्मिन्स्कंधे तदर्थंपरीक्षि
त्प्रश्नपूर्वकमुपोद्घातंरचयति समझते योभगवान्भूतानांयोग्यतातिरेकेणपक्षपरिग्रहशून्यःआत्माप्रियश्च तदेतत्प्रेयइतिश्रुतेः सत्तादिप्रदत्वात्तैरनुष्ठितसमर्चनादिसुकृतस्यसुखलक्षणफलदातृत्वे
नोपकर्तृत्वाच्चसुहृत् किमतइततत्राह स्वयमिति सस्वयंविषमइवेंद्रस्यार्थस्वप्रयोजनमंतरेणपरप्रयोजनार्थंकथंदैत्यानवधीदित्यन्वयः १ ननु सुरगणैःक्रियमाणस्यस्वप्रयोजनस्यसंभवादवधीदि
तिकिंनस्यादितितत्राह नहीति हिशब्दोहेत्वर्थः कुतोनास्तीत्यत्राह निःश्रेयसात्मनइति नित्यानिर्दुःखानंदस्वरूपस्यतादृशत्वंमुक्तस्याप्यस्तीतितत्राह साक्षादिति नित्यनिर्दुःखानंदानुभवस्वरूप
स्यपरप्राप्यप्रयोजनाभावान्मुक्तस्यतदभावात् नन्वसुरप्रद्वेषात्सुरहितंक्रियतइतितत्राह नैवेति विद्वेषस्यतत्तत्स्वरूपद्योतनायासुरेभ्यइतिपंचमी वृक्षात्पर्णंपतातिइतिवत्कादाचित्कत्वाभावान्नित्येद्वेषे
वधानुपपत्तिरन्यथावधस्यापिसंततानुवृत्तिःस्यादतोनोपपत्तिःस्यादितिभावः स्वाभिमवलक्षणभयात्तद्वधइति तत्राह नेति उद्वेगोभयलक्षणं कुतइत्यतउक्तं अगुणस्येति प्राकृतगुणसंबद्धस्यपुंसःतादृक्
स्वभावत्वाद्धरेस्तदभावान्निर्गुणश्चेतिश्रुतेः अनेननिःश्रेयसात्मनोपिगुणसंबंधेनजीववत्तथात्वंस्यादितिशंकापिनिरस्तेतिज्ञायते २ ३ प्रामाणिकत्वद्योतनाय प्रश्नंस्तौति साध्विति तत्रहरिचरितेभाग

राजोवाच ॥ समःप्रियःसुहृद्ब्रह्मन्भूतानांभगवान्स्वयम् ॥ इंद्रस्यार्थेकथंदैत्यानवधीद्विषमोयथा १ नह्यस्यार्थःसुरगणैःसाक्षान्निःश्रेयसात्मनः ॥ नैवा
सुरेभ्योविद्वेषोनोद्वेगश्चागुणस्यहि २ इतिनःसुमहाभागनारायणगुणान्प्रति ॥ संशयःसुमहान्जातस्तंभवांश्छेतुमर्हति ३ ॥ श्रीशुकउवाच ॥ साधु
पृष्टंमहाराजहरेश्चरितमद्भुतम् ॥ तद्भागवतमाहात्म्यंभगवद्भक्तिवर्धनम् ४गीयतेपरमंपुण्यमृषिभिर्नारदादिभिः ॥ नत्वाकृष्णायमुनयेकथयिष्येहरेःकथा
म् ५ निर्गुणोपिह्यजोव्यक्तोभगवान्प्रकृतेःपरः ॥ स्वमायागुणमाविश्यबाध्यबाधकतांगतः ६ सत्त्वंरजस्तमइतिप्रकृतेर्नात्मनोगुणाः ॥ नतेषांयु
गपद्राजन्ह्रासउन्नाहएवच ७

वतानांमाहात्म्यंभगवद्भक्तिवर्द्धनीमत्येननतन्माहात्म्यंभगवन्माहात्म्याविनाभूतमित्यवगंतव्यम् ४ प्रश्नप्रतिवचनंभगवदनुग्रहमंतरेणसुवचंनस्यादितिप्रकटनायभगवंतंप्रसाद्यवक्तव्यार्थंप्रतिजानीते न
त्वेति ५ हरेर्हेतृत्वधर्मोनघटतइतिवदन्लोकेष्वेकत्वादुतताद्विलक्षणत्वादितिवावदीषि समत्वादिधर्मोपन्यासानुपपत्तेर्नप्रथमः अघटितघटकशक्तिमत्त्वेनसर्वस्योपपत्तेर्द्वितीयोयुक्तएवेतिभावेनाह निर्गु
णइति अयंभावः भगवान्स्वमायागुणंस्वेच्छागुणमनुसृत्यस्वाधीनप्रकृतिगुणनिर्मितदेवासुरदेहंचाविश्यतत्रस्थित्वाबहिश्चनृसिंहादिप्रादुर्भावरूपेणासुरादिबाधकतामसुरादि बाध्यवस्तुषुनियामकत्वेन
स्थित्वाबाध्यतांगतोभवति किमत्रमानमितीर्यंशंका बाध्यादिस्थोहरिर्नित्यंबाध्यतादिगतेत्यापि गीयतेननुबाध्यत्वाद्यददोषयुतत्वतइतिभविष्यत्पर्ववचनेनपरिहर्तव्येति हिशब्देनलोकवत्तुलीला
कैवल्यामितिसूत्राल्लीलांप्रयोजयति निर्गुणत्वादिकंवैलक्षण्येलिंगमितिज्ञापनायप्रयुक्तं पुरुषाणांगुणदोषानुसारेणरक्षाद्यभावेनसमत्वादिकमपिनयुज्यतइतिप्रदर्शनायापिशब्दः तर्हिकुतोविविच्यनज्ञाय
तइत्यतोव्यक्तइति दधिस्थघृतवत्काष्ठेवह्निवच्चजनार्दनः देहेंद्रियासुजीवेभ्योविविच्यज्ञायतेनत्विति अतोविविच्यज्ञानंयुक्तम् ६ स्वमायागुणमाविश्येत्युक्तंविवृणोति सत्त्वमित्यादिना प्रकृतेः
स्वरूपभूताआत्मनःपरमात्मनोज्ञानादिवन्नस्वरूपभूताःकिंत्वधीनाः जीवस्याप्याभिमानादेवगुणानांभिन्नस्वभावत्वाद्युगपत्प्रवृत्त्यनुपपत्तेरित्यतःशक्तिप्रकटनप्रकारंदर्शयति नतेषामिति ह्रासोनुद्भूतत्व
मुन्नाहउद्भूतत्वं क्षयवृद्धिक्रमेणेतिपारिहारः ७

तंक्रमंविविनक्ति जयेति सत्वस्यजयकालेउन्नाहविषयेदेवर्षीन्भजन्नानाभातीत्यन्वयः रजसउन्नाहविषयेअसुरान्वर्द्धयन्तमसउन्नाहविषयेयक्षादीन्वर्द्धयन्नेवंगुणानांशक्तिंजृंभयतीत्यर्थः तत्रापीत्थंभावोस्तीत्याह तत्कालेति तत्तत्कालगुणमनुसृत्यवर्तमानः ८ इममर्थमनुभाविकंकरोति ज्योतिरादिरिति अयमर्थः ज्योतिरादीत्युत्तरायणादिकालादिगुणःकेषांचिन्फलानामुन्नाहंकेषांचिद्धा संकुर्वन्यथासत्वादिजयादिविषयेउन्नाहादिकालमनुवर्तमानोभातितथेति कथमव्यक्तत्वंहरेरितितत्राह संघाताादिति देहेंद्रियादिकार्यकारणसंघातान्नविविच्यतेपृथग्भूतोनज्ञायते अत्रापीदमेवोदाहरणं ज्योतिरादिघृतादिद्रव्यंदध्यादिभ्योमथनात्पूर्वंनविविच्यतेपृथग्भूतंनज्ञायतेनप्रतीयते तथात्मापीतिभावः तेजोसितंयेयाविधीयतेइतिश्रुतेः घृतस्यज्योतिःशब्दाभिधेयत्वंप्रामाणिकं दधिस्थघृतवत्काष्ठेव ह्निवच्चजनार्दनइत्यादेश्च ननुयादिकेनचिद्देहादिव्यतिरिक्तत्वेनायंज्ञायतेतर्हिदधिस्थघृतवदित्यादिनिदर्शयितुंशक्यं तदेवकुतइत्याह विदंतीति कवयःब्रह्मादयःशास्त्रेणमथित्वांततोनिर्णीयात्मस्थंदेहादि स्थमात्मानंविदंतिजानंतिकिंचांततश्चरमनाशेविदंतिलभंते लभनिष्पत्तावितिधातोःनितरांप्राप्नुवंतीत्यर्थःअनेनकवीनांज्ञानमस्मिन्नर्थेप्रमागमुक्तंभवति ९ देहादेर्विविक्तत्वेनज्ञानंकस्मान्नोत्पद्यतइतिआ शंक्यसृष्टशरीरेषुजीववत्प्रतिष्ठत्वान्नतद्विषयंज्ञानमित्यभिप्रेत्याह यदासिसृक्षुरिति यदापरत्मात्मनार्थेनिवासायपुरःशरीराणिसिसृक्षुःस्रष्टुमिच्छतितदागुणेषम्यन्यायेनस्वेच्छयानि यतोरजोगुणमुपादा यमहदहंकारपंचमहाभूतानिसृष्ट्वातैः पृथक्तत्तद्योग्यतानुसारेणशरीराणिसृजति यदाचेश्वरस्तासुविचित्रासुसुरनरतिर्यक्संज्ञितासुपुरीषुरिरंसुः जीवगतस्वादृष्टयोग्यतामनुसृत्यसुखादिकमुत्पाद्यतत्सा क्षित्वेनक्रीडितुमिच्छति तदास्थितिहेतुत्वात्सत्वगुणमुपादत्ते यदाशयिष्यमाणोयोगनिद्रांचिकीर्षतितदासौतमोगुणमीरयति तच्छक्तिमुज्जृंभयति १० किंचचरंतमतीतानागतवर्तमानभेदेनवर्त

जयकालेतुसत्वस्यदेवर्षीनरजसोऽसुरान् ॥ तमसोयक्षरक्षांसितत्कालानुगुणोभजन् ८ ज्योतिरादिरिवाभातिसंघातान्नविविच्यते ॥ विदंत्यात्मानमात्म स्थंमथित्वाकवयोंततः ९ यदासिसृक्षुःपुरआत्मनःपरोरजःसृजत्येषपृथक्स्वमायया ॥ सत्वंविचित्रासुरिरंसुरीश्वरःशयिष्यमाणस्तमईरयत्यसौ १० कालंचरंतंसृजतीशआश्रयःप्रधानपुंभ्यांनरदेवसत्यकृत् ॥ सतत्रतत्रोभयसिद्धिमाप्नुयाल्लिंगात्मनोलिंगगुणाश्चसंति ११

मानंकालंसृजतीत्यर्थः ईशआश्रयइत्येताभ्यांपदाभ्यांसर्जनसामर्थ्यंसूचयति अत्रप्रमाणमाह सत्यकृदिति सत्यंमीमांसाशास्त्रंतस्यकर्ता इदानींस्वसृष्टानामंतःशयनप्रकारमाह सतत्रेति तत्रतत्रदे हेषुस्थितं उभयसिद्धिंमहतिवस्तुनिमहत्परिमाणंमहासामर्थ्यप्रकटनमणुपरिमाणमणुसामर्थ्यंवाप्नुयात् अणोरणीयान्महतोमहीयानितिश्रुतेः अत्रेदंलिंगात्मनोलिंगगुणाश्चसंतीतिनिदर्शनं चशब्दएवार्थे यथा लिंगंशरीरस्यानीयंकाष्ठंव्याप्यतिष्ठन्नग्निर्लिंगात्मेत्युच्यतेतस्याग्नेर्लिंगस्यकाष्ठस्यगुणाः महत्त्वाणुत्वलक्षणाःसंति महतिकाष्ठेमहान् अणुनिकाष्ठेअणुराग्निरिति लिंगंशरीरेचिद्रेचसाधनेशेफ भस्मनीत्यभिधानं ननु सृष्टौप्रवर्तमानेश्वरस्यनिरपेक्षत्वात्स्वातंत्र्येणकिंचित्कारणापेक्षासंभवः तदनपेक्षत्वेमृद्दंडादेरिवशक्त्यभावेनकार्यसामग्र्यभावइतितत्राह लिंगात्मनइति लिंगात्मनःप्रधानादेः कारणस्य येलिंगगुणाःकार्यजनकशक्तिलक्षणाःसंतितेचालिंगात्मनःशरीरस्वामिनोहरेःसंतिविद्यमानास्तदधीनत्वादितिद्विरावृत्त्यायोजनीयं द्रव्यंकर्मचकालश्चेत्यादेः यद्वा लिंगस्यप्रधानादेर्गुणाःका र्योपादनशक्तिलक्षणाःलिंगात्मनःपूर्णद्वात्रिंशल्लक्षणस्वरूपस्यहरेःसंतितेषांस्वरूपाभिन्नत्वद्योतनायचशब्दः ऊर्णनाभिस्तुरीवेमादिविनास्वरूपभूतलीलयैवयथाजालंकरोति तथायमित्यर्थपरोवा प्रधा नसृष्टिर्ब्रह्मणोस्तु अवांतरसृष्टिरवांतरकारणात्स्यात् कुलालादेर्दृष्टत्वादित्यतोवाह सइति तत्रतत्रकार्यकारणेषुप्रतिस्विकेषुस्थित्वोभयसिद्धिंजगत्कारणस्यजनकत्वलक्षणंकार्यस्यजन्यत्वफलंप्रापयति उभयोःशक्त्योरेतदधीनत्वादित्याह लिंगात्मनइति लिंगात्मनोमृदादेर्लिंगगुणाःकार्यजननशक्तयःसंति तेचानेननियताइतिशेषः लिंगात्मनःकार्यस्ययेलिंगगुणाःपृथुबुध्नोदराकारादिलक्षणाः संतिते च तत्रतत्रान्वितोविष्णुस्तत्तच्छक्तिप्रबोधकइत्यादेः अनेनबाध्यबाधकतांगतइत्येतत्स्पष्टीकृतं तथाहि तत्रतत्रदेवासुरेषुउभयसिद्धिंजयपराजयलक्षणांकार्यसिद्धिंप्राप्नोति शिरस्त्राणवर्मादिलक्षणंवहतोभ

टस्ययेलिंगगुणाः शौर्यादिलक्षणाजयापजयौवातेचहर्षशोकादीनाः सत्वैबलंबलिनांचापरेषामित्यादेः अत्रसर्वस्यहर्षशोकादीनत्वदर्शनायप्रधानपुंभ्यांकार्यकारणाभ्यांकालंसृजतीत्यंगीकारे प्रधानपुरुषावंतरे
णकालसृष्टशक्तिर्हरेःप्रकटितास्यादित्यन्यथाप्रतीतिनिरासायाचार्यैस्ताभ्यांसहेतिव्याख्यातम् ११ नन्वत्रसाम्यगुणाधिकरणस्यहरेर्वैषम्याधिकरणत्वंकथमित्यस्यप्रश्नस्यपरिहारःकथं
स्फुटमायातइत्याशंक्य स्वतोदेवप्रियत्वमसुरप्रियत्वंमनुष्याणामुभयत्वमेवरूपत्वंतत्तद्योग्यतावतांतेषामन्यथातदतिलंघनेत्वदभिमतवैषम्यप्राप्तिसाम्यहानीस्यातामित्याशयवानाह यएषइति यएषहरिः
कालेकालविषयेपि ईशितृकालस्यापिप्रवर्तनसमर्थः प्रधानपुरुषयोरीशितृत्वंकिंवक्तव्यमित्यपिपदं सविष्णुः सुरानीकमिवास्थितंसत्वमेधयति सत्वस्यदेहादिकारणत्वात्सत्वगुणप्रधानान्देवान्स
मेधयतीत्यर्थः रजस्तमस्कान्रजस्तमःस्वभावान् तत्प्रत्यनीकान्तेषांसुराणांशत्रुभूतान् असुरान्प्रमिणोतिनिहंति मिनहिंसायामितिधातुः सुरप्रियइत्यनेनासुराणामप्रियोमनुष्याणामुभयात्मकः
स्वभावतइतिध्वनितं तदुक्तं स्वभावतःप्रियत्वात्तुसदादेवप्रियोहरिः अप्रियश्चासुराणांसस्वभावात्तूभयंनृणामिति सत्वमेधयतिइत्यनेनयासुखयोग्यता रजस्तमस्कानित्यनेनयावधयोग्यतायेचदेहें
द्रियादेःकारणभूतास्त्रयोगुणाः यश्चगुणानामुन्नाहकरःकालःयच्चतेषांत्रयाणांगुणानांपुण्यपापोभयलक्षणंकर्म . यच्चमूलकारणभूतंप्रकृतिपुरुषस्वरूपम् यच्चभक्त्यादिकमेतत्सर्वमवेक्ष्यदेवानांभक्त्या
दिगुणानितरेषांद्वेषादिदोषान्मनुष्याणामुभयात्मकमुत्पाद्यसुखासुखजयापजयजननमरणादिफलदातृत्वेनसमइत्युक्तं तदुक्तं देशकालौगुणांश्चैवभक्त्यादीनप्यवेक्ष्यतु योग्यतांचतथाकर्मसमइत्यभिधी
यते स्वतःप्रियोपिदेवानामुत्पाद्यैवगुणानिमान् इतरेषांतथादोषान्सुखदुःखददात्यजः उभयंतुमनुष्याणामतःसमइतीरितइति ननु सुरादिषुस्थितानांगुणदोषाणांतत्तत्कालीनत्वेनोत्तरकालेनाशसंभवे

**यएषराजन्नपिकालईशितासत्वंसुरानीकमिवेधयत्यजः॥ तत्प्रत्यनीकानसुरान्सुरप्रियोरजस्तमस्कान्प्रमिणोत्युरुश्रवाः १२सवापुनःस्वसृष्टस्यस्थितिरक्षानु
वृत्तये ॥ सत्वंसुरगणान्विष्णुरुपबृंहयतेमुहुः १३ अत्रैवोदाहृतःपूर्वमितिहासःसुरर्षिणा ॥ प्रीत्यामहाक्रतौराजन्पृच्छतेऽजातशत्रवे १४ दक्षामहाद्रु
तंराजाराजसूयेमहाक्रतौ ॥ वासुदेवेभगवतिसायुज्यंचेदिभूभुजः १५**

नानित्यत्वेनियमोनस्यादित्याशंक्य शास्त्रविहितत्वान्नियमोस्त्येवेत्याशयवानाह उरुश्रवाइति उरुबहुश्रूयतेइत्युरुश्रवाः शास्त्रंनियमप्रतिपादकं यस्यसतथा तदप्युक्तं अनादिनियताश्चैवगुणदोषाःसुरा
दिषु यथाक्रमंपुनश्चैवनियमाद्वर्द्धितास्तथा विष्णुनैवततोनित्यंविषमश्चजनार्दन इतिनियमाद्वर्द्धितास्तथेत्येतत्कुत्रप्रमाणीक्रियतेइत्यस्योरुश्रवाइत्यत्रेतिवक्तव्यं उरुवर्द्धनलक्षणश्रवोयस्यसतथेत्यर्थः ननुवै
षम्यंतदवस्थमेवाभूदितिचेन्न योग्यतानिमित्तत्वात्तदुक्तं नविष्णोर्विषमत्वंतुयोग्यतापेक्षयाक्वचिदिति हरेर्योग्यतानियत्यायत्आगच्छद्वैषम्यलक्षणमुरुश्रवस्तदातदस्तुविहितत्वादतउक्तं उरुश्रवाइति तद
प्युक्तं योग्यतायास्तन्नियत्याविषमत्वंभवेदिति नन्वेवंतर्हिकापिवैषम्यंनेत्यापन्नमितिचेदुच्यते शुभाशुभयोर्विपर्ययेशुभवतामशुभकर्मअशुभवतामसुराणांशुभकर्मानुसृतफलदानेसति विषमत्वंविष्णोर्दो
षायस्यादितियदतस्तत्तद्योग्यताबलविहितशुभाशुभोभयकर्मानुसारेण तत्तत्फलस्यविकर्मेंद्रियार्थेअशुभकर्मदैत्यबललक्षणरयदानेनेश्वरवैषम्यमित्यतउरुश्रवाइतिजयस्तंभकल्पनामहरेर्युक्तं इंद्रस्यार्थे
कथंदैत्यानवधीद्विषमोयंयेत्यादिप्रश्नपरिहारइतिसिद्धं विषमत्वंतुदोषायशुभाशुभविपर्यये अतस्तादृशवैषम्यंब्रह्मसूत्रेनिराकृतं शुभाशुभनियंतृत्वंनदोषागुणएवसः अतस्तदिष्टंकृष्णस्यब्रह्मसूत्रकृतोविभो
रितिवचनात् १२ सुरप्रियइत्येतद्विवृणोति सवाइति अयमर्थःसत्वंसत्वगुणसंपन्नान्मुहुरनुयुगमुपबृंहयतेसम्यक्प्रवर्द्धयति किंकारणमत्राह पुनरिति स्वेनसृष्टस्यजगतःपुनःपुनःस्थितिरक्षानुवृत्तयेस्थि
तिपालनयोःप्रवर्तनार्थं वाइत्यनेनसृष्ट्यादिह्यष्टकमपिहरेरेवेतिदर्शयति यदासिसृक्षुरित्यनेनयःप्रस्तुतस्तंसइतितच्छब्देनपरामृशति तत्रापीश्वरशब्देनरुद्रउपक्रांतइतिभ्रांतिनिवारणायविष्णुरिति यद्वा य
त्रक्वापिरुद्रादुत्सर्जनादिकंप्रतीयतेतदपितत्स्थहरिणेतिप्रकटनायविष्णुरिति १२ सुरप्रियइत्येतादितिहासेनदर्शयति अत्रेति सुरप्रियएवनासुरप्रियोहरिरिति अन्ययोगव्यवच्छेदार्थएवशब्दः १४ १५

१६ एकएवांतोनिर्णयएषामस्तीतिभक्तिरेवपुरुषार्थसाधनंनान्यत्कर्मादिकमितिनिर्णयवतांविष्णुरेवमुमुक्षुभिर्नेषेव्यइतिनिश्चयवतांवा १७ श्रीहरिर्निंदनंसतांकर्णशूलायमानमप्येतच्छ्रोतुंत
च्चित्रमित्याशयवानाह भगवन्निंदयेति १८ १९ श्वित्रःश्वेतकुष्ठः २० दुरवग्राह्यंदुर्ज्ञेयंधामस्वरूपंयस्यसतथातस्मिन् लयंसायुज्यलक्षणं ननु अत्युत्कटैःपुण्यपापैरिहैवफलमश्नुत इतिव
चनात् श्वित्रोनजातइत्यादिवाक्यं कथंसंगच्छतेभगद्वेषिणोपिबहुविधाः तत्रकेचिन्मरणानंतरंपापफलंभुंजते केचिदत्रैव तत्कुतइतिचेन्न नियमाद्भुज्यतेपुंभिर्धर्माधर्मफलंमृतौ कश्चिदत्रापिभुज्येततस्मा
न्नाधर्मभाचरेदितिवचनात् अनेनधर्मिणोपिव्याख्याताः धर्मीस्वर्गं विधर्मीनिरयमितिच अत्रकश्चिद्विशेषोप्यस्ति जयविजययोःसात्त्विकत्वेनभक्तत्वेनद्वारपालत्वेन हरेरतिप्रियत्वात्सनकादिशापादसु
रजन्मन्यपिकश्चिद्भक्त्यलोपात्द्वेषफलभोक्तुरन्यत्वाच्चद्वेषस्यपापिष्ठासुरत्वादनयोरुपचरितत्वाच्च अनेनस्वापराधनाशलक्षणानुग्रहपात्रत्वेनप्रतिज्ञातशपथत्वेनचहरेःसुरप्रियत्वंचाविशदमभूदितिरहस्यम्
२१ २२ २३ देहाद्यभिमानवतःस्तवनिंदनादिनामनःखेदहर्षादिसंभवेनक्रोधादिकंस्याद्धरेस्तदभावान्निंदनादिनाविशेषानुदयात्स्वतोनित्यतृप्तत्वेनपरमाप्यप्रयोजनाभावात्ततत्तद्योग्यतानुसा

तत्रासीनंसुऋषिंराजापांडुसुतःक्रतौ ॥ पप्रच्छविस्मितमनामुनीनांशृण्वतामिदम् १६ युधिष्ठिरउवाच ॥ अहोअत्यद्भुतंह्येतद्दुर्लभैकांतिनामपि ॥
वासुदेवेपरेतत्त्वेप्राप्तिश्चैद्यस्यविद्विषः १७ एतद्वेदितुमिच्छामःसर्वएववयंमुने ॥ भगवन्निंदयावेनोद्विजैस्तमसिपातितः १८ दमघोषसुतःपापआरभ्यक
लभाषणात् ॥ संप्रत्यमर्षीगोविंददंतवक्त्रश्चदुर्मतिः १९ शपतोरसकृद्विष्णुंयद्ब्रह्मपरमव्ययम् ॥ श्वित्रोनजातोजिह्वायांनांधंविविशतुस्तमः २० क
थंतस्मिन्भगवतिदुरवग्राह्यधामनि ॥ पश्यतांसर्वलोकानांलयमीयतुरंजसा २१ एतद्ब्राम्यतिमेबुद्धिर्दीपार्चिरिववायुना ॥ ब्रूह्येतदद्भुततमंभगवन्नत्र
कारणम्२२श्रीशुकउवाच ॥ राज्ञस्तद्वचआकर्ण्यनारदोभगवान्ऋषिः ॥ तुष्टःप्राहतमाभाष्यशृण्वत्याःसदसःकथाम् २३ ॥ नारदउवाच॥निंदनस्तवसत्कार
न्यक्कारार्थंकलेवरम् ॥ प्रधानपरयोराजन्नविवेकेनकल्पितम् २४ हिंसातदभिमानेनदंडपारुष्ययोरपि ॥ वैषम्यमिहभूतानांममाहमितिपार्थिव २५ यान्नि
बंधोभिमानोयंतद्वधात्प्राणिनांवधः ॥ तथानयस्यकैवल्यादभिमानोखिलात्मनः २६

रेण तत्तत्फलदातृत्वंयुक्तमित्यादिकंवक्तुमुपक्रमते निंदनेति निदनंदोषसंकीर्तनं स्तवःस्तुतिर्गुणलक्षणा सत्कारःकायिकपूजा न्यक्कारःकायिकावज्ञा तेषांनिंदनादीनां अर्थंविषयभूतंकलेवरंप्रधानप
रयोः प्रधानाद्देहेंद्रियाद्यात्मकात्परस्यजीवस्याविवेकनाभेदेनकल्पितंस्वताश्चिदानंदस्यप्रकृतेरनात्मनोभेदाग्रहादिदंजडशरीरंकृतमित्यर्थः २४ ततःकिंफलतीतित्राह हिंसेति तदभिमानेनदेहाभिमा
नेनभूतानामविवेकज्ञानिनांममाहमितीहदेहेहिंसाताडनादिलक्षणादंडपारुष्ययोर्निमित्तयोर्वैषम्यंविषमावस्थाफलतीत्यर्थः २५ ततश्चकिंतत्राह यान्निबंधइति ममाहमित्यभिमानोयन्निबंधः
यस्मिन्देहेनिबद्धः तद्वधात्तस्यदेहस्यवधाद्धिंसादिलक्षणात् प्राणिनांचेतनानांवधइत्युपचारःइतियत्तस्मान्निंदनादिकंदेहस्यैवफलतिनात्मनःतस्यनिष्फलमित्याशयःयथाजीवस्यममाहमितिदेहाभिमा
नादनर्थपरंपरा तथाहरेरपिदेहस्थत्वाविशेषात्साम्यात्किंनेत्याह तथेति अखिलात्मनोखंडस्वामिनोयस्यनतथाजीववद्देहाभिमानोनास्ति कुतःकैवल्यात्देहाद्यभावादेव ननुप्रकृत्यात्मकस्यदेहस्याभावो
हेतुःक्रियतेसच्चिदानंदात्मकदेहस्यवेत्येतयोरिदमेवोत्तरं प्रकृत्यात्मकदेहादेरभावात्प्रकृतिप्राकृतवैकृतमिश्रविरहितसच्चिदानंदात्मकदेहसद्भावात् सदेहःसुखगंधश्चेत्यादेः २६

परस्यपरमात्मनःइदमेषाहिंसाकेननिमित्तेनास्तीतिकल्प्यतेनिमित्ताभावान्नैमित्तिकाभावइत्यर्थः अन्यस्मिन्हिंसादिकर्तरिसतिहरेर्हिंसादिकमस्तीतिकल्पयितुंशक्यतेसचनास्तीत्याशयेनोक्तंअकर्तुरितित स्यान्य कर्तानविद्यतइत्यकर्तातस्याहिशब्देनयद्यस्यायुधादिनाप्रहर्तादृश्यतेतत्फलंछेदादिकंनास्तीत्याह अच्छेद्योयमदाह्योयमित्यादेः तत्सर्वंकथामित्यतउक्तं परस्येति लोकाविलक्षणस्य तर्ह्यंशून्यकल्प इत्यस्यापीदमुतरम् परस्यब्रह्मणः ब्रह्मविदाप्नोतिपरमितिश्रुतेः इदंहिंसेतिलिंगव्यत्ययोहिंसायाःकुत्सितत्वद्योतनायव्यत्ययोतिशयकुत्सनभेदेष्विति सूत्राज्ज्ञायते हरौहिंसाशंकाकुत्सितेत्यर्थः नास्यज रयैतज्जीर्यतेनवधेनास्यहन्यते एतत्सत्यंब्रह्मपरं नहन्यतेहन्यमानेशरीरेइत्यादेश्च अत्रैवंहरिस्वरूपेस्थितेस्वयोग्यानंदाविर्भावलक्षणमोक्षसाधनक्षमाक्षीणाभक्तिरेवद्वेषादिकमर्थवादलक्षणम् तत्तत्स्वभाव ज्ञापनार्थमुच्यतइत्याशयेनाह तस्मादिति यस्माज्जडशरीरेंद्रियाद्यभावेनहरेरहंममाभिमाननिमित्तोपद्रवोदूरतोनिवारितः तस्माद्वैरानुबंधादिनायोहरौमनोयुंज्यात्प्रयुंक्तेसकथंचित्पृथङ्नेक्षतेमनसस्तत्राभि निवेशेनहरेरन्यंनचिंतयतितमेवानुस्मरतीत्यन्वयः अनेनवैरादीनामेकतमेनापिहरौमनोयुंजानोवैरादिमानेवभवतीतितत्तद्वस्तुस्वभावात्तथोच्यतइतिज्ञातव्यं तदुदितमाचार्यैः कथंचिन्नेक्षतेपृथक्कृतत्रैव मनसोभिनिवेशेनतदन्यंनेक्षतेवैरादीनामेकतमेनापियोमनोयुंज्यात्सतदन्यन्नेक्षतइतिस्वभावकथनम् नन्वत्रसंयुंज्यादित्यस्यप्रथमप्राप्तंविध्यर्थंपरित्यज्यान्यार्थकल्पनायामश्रुतकल्पनास्यादिति चेन्न भक्त्या त्वनन्ययाशक्यअहमेवंविधोर्जुन यमेवैषवृणुतेतेनलभ्यः प्रियोहिज्ञानिनोत्यर्थमहंसचममप्रियः इत्यादिनाभक्तेरेवभगवत्प्रीतिजनकत्वोक्तेः अननुभूतिरवधुन्वानइत्याद्यनर्थश्रुतेश्च अतोनविध्यर्थोगीका रयोग्यः तदप्युक्तंनविधिरिति नकेवलंद्वेष्टुःस्वस्यैवानर्थोपितुतत्पितॄणामपि तदुक्तं कर्मणामनसावाचायोद्विष्याद्विष्णुमव्ययम् मज्जंतिपितरस्तस्यनरकेशाश्वतीः समाइति नन्वेकदाकृतद्वेषप्राप्तनरकोपभो

परस्येदमकर्तुर्हिंहिंसाकेनास्यकल्प्यते ॥ तस्माद्वैरानुबंधेननिर्वैरेणभयेनवा ॥ स्नेहात्कामेनवायुंज्यात्कथंचिन्नेक्षतेपृथक् २७ यथावैरानुबंधेनमर्त्य स्तन्मयतामियात् ॥ नतथाभक्तियोगेनइतिमेनिश्चितामतिः २८

गेनक्षीणदोषस्य पुनःशुद्धांतःकरणतयाभक्तिकरणयोग्ययोनिप्राप्तिःस्यादितितत्राह तानहंद्विषतःक्रूरान्संसारेषुनराधमान् क्षिपाम्यजस्रमशुभानासुरीष्वेवयोनिषु आसुरींयोनिमापन्नामूढाजन्मनिजन्म नि मामप्राप्यैवकौंतेयततोयांत्यधमांगतिमिति कीदृशोद्वेषइतितत्राह अवजानंतिमांमूढामानुषींतनुमाश्रितम् परंभावमजानंतोममभूतमहेश्वरमिति स्वर्गकामोयजेतेत्यादेःसत्कर्मणातेषांसद्गतिःस्या त्किन्नेत्याह मोघाशामोघकर्माणोमोघज्ञानाविचेतसः राक्षसीमासुरींचैवप्रकृतिंमोहिनींश्रिताइति ननु तर्हिहिरण्यकशिप्वादेर्दुरंताधादुत्थितिःकथमभूदितितत्राह यदाहिनंदयितामेत्वामविद्वांस्तेजऐ श्वरम् तस्मात्पितामेपूयेतदुरंताद्दुस्तरादघात् हिरण्यकशिपुश्चापिभगवान्नंदयातमः विविक्षुरत्यगात्सूनोःप्रह्लादस्यानुभावतइति नन्वेवंतर्हिभक्तद्वेषिणोःशापवराभ्यांविपर्ययःस्यात्किन्नेत्याह वरतोपि नमुच्यंतेद्वेषिणःशापतोपितु भक्तानैवनिपात्यंतेधर्माधर्मैस्तथेतरैरिति योग्यतायाबलवत्त्वादितिशेषःनन्वेवंचेत्पुनश्चानर्थआपन्नइतितत्राह अन्यावेशकृतंयत्तुतद्वराद्यैरपोह्यते तद्विरुद्धस्वभावानामन्य थानकथंचनेत्यादिहिरण्यकशिप्वाद्याविष्टासुरकृतपापंप्रह्लादादिभिःपरिहृतंनतुस्वतोसुरस्येत्यर्थः ॥ २७ ॥ कुतःस्वतोसुरस्यपापंनपरिहियतइत्याशंक्यद्वेषाभिनिविष्टमनस्कत्वेनतद्योग्यत्वेनभगव त्प्रेरितत्वेनाभीष्टनिवृत्तित्वेनतदात्मकत्वादित्याशयेनाह यथेति मर्त्यस्तमोयोग्योवैरानुबंधेननिरंतरवैरस्मरणेनतन्मयतांतत्तद्वेषविषयवस्तुनियथामनसोभिनिवेशंयात्प्राप्नोतितथाभक्तिलक्षणोपाये नभक्तिविषयेवस्तुनिमनोभिनिवेशंनकरोति अत्रांकप्रमाणमितितत्राह इतीति निश्चितामतिरित्यनेनसाक्षिलक्षणामतिर्गृह्यते भक्तियोगेनइतिइत्यत्रसंधिकार्याभावोद्वेषाभिनिवेशिनाम् बाहुल्यंभक्त्यभिनिवेशिनांकनीयस्त्वंचदर्शयितुम् कुतएतदवगतमितिचेन्न यथावैराभिनिवेशिनइत्याद्याचार्योक्तेः वैरिणांबाहुल्यंअन्येषांअल्पसंख्यात्वंकथमितिचेन्न हरिणाभक्तानांबाहुल्याकरणात्

एतदप्युक्तंकथमन्यथेत्यादि ततःकनीयसएवदेवाः ज्यायांसः असुरास्ततइतिच भक्त्याभिनिवेशिष्वपिकश्चिद्विशेषोस्तीतिज्ञापनायवासंध्यभावः ऋतेब्राह्मणमव्ययमित्युक्तेः असुराणांनित्यद्वेषाग्राहित्व प्रकटनायानुबंधनेति मागधाद्यायथानित्यंद्वेषादाग्रहिणोहरौ नतथाग्रहिणोभक्ताऋतेब्राह्मणमव्ययमित्युक्तेः २८ ननु तन्मयतामित्यस्यतादात्म्यार्थःकिंनस्यादितितत्राह कीटइति द्वेषणनिंदतश्चैत्य स्यकृष्णेनसायुज्यंकथमभूदितिप्रश्नस्यपरिहारःकथमागतइत्यतोवाह कीटइति यथापेशस्कृताभृंगेणकुड्येभित्तिमुपिरेरुद्धः कीटःश्यामनामाकृमिःतस्यभृंगस्यसरूपतांसमानाकारतांविंदते नतुतादात्म्यम् ततोभिन्नत्वेनदृश्यमानत्वात् कीदृशःयांतंउपर्यागत्यगभीरंनदंतंभृंगसंरंभभययोगेनईषत्कोपभययुक्तस्नेहेनात्मंसंददातीतिस्नेहेनस्वात्मानमाकृष्याङ्गिश्रातीतिकोपयुक्तभयेनचानुस्मरन् अत्रस्नेहस्यैवप्राधा न्यंप्राणधारणपोषणयोःसंततमिष्टत्वात् कोपभययोस्तात्कालिकत्वादप्राधान्यमित्यतोयोगस्यसंरंभभययोर्विशेषणतयोक्तःयोगस्यस्नेहार्थत्वम् प्रीतिस्नेहस्तथायोगःप्रेमबंधइतीर्यते इतिशब्दनिर्णये सिद्धम् २९ कृष्णेभगवत्येवंवैरेणयुक्तयाअनुचिंतयाभक्तिपूर्वंस्मृत्याधूतपाप्मानश्चैद्यादयःतंकृष्णमापुरित्यन्वयः अत्रसज्जीवानांशापादिनासुराविष्टानामेवमुक्तिःनकेवलानाम् तस्माच्चदाविष्टासुरावैरेण प्राप्तपाप्मानः असुर्यानामतेलोकाइतिश्रुते तंलोकसमुद्दापंप्रापुः संतोजयादयोनुचिंतयातंकृष्णमवापुरित्ययंविशेषोवैरयुक्तयाअनुचिंतयेत्याचार्योक्तापिशब्देनगर्हाभिधायिनाज्ञात व्यअनुचिंतेतितांप्रा हुर्भक्तिपूर्वानुयास्मृतिरितिवचनात् भक्तिपूर्वैवानुचिंतात्राभिप्रेतेतिज्ञातव्यम् अतोत्रचैद्यादीनांभक्तियुतत्वंप्रतिपाद्यतइत्युपगंतव्यम् अन्यथा कीटोदाहरणंनिरन्वितंस्यात् उदाहरणस्यापिभक्त्यर्थ त्वंकुतइतिचेन्न स्नेहादनंददातीतिस्वार्कर्षणभयेपिवा विद्यमानेप्यल्पकोपसंगतिस्नेहतस्तथा पेशस्कृद्रूपतांकीटोयथायातितथैवतत् चैद्यादयोसुरावेशाद्धरौद्वेषयुताअपि निजस्वभावयभाक्त्यानीताह

कीटःपेशस्कृतारुद्धःकुड्येयांतमनुस्मरन् ॥ संरंभभययोगेनविंदतेतत्स्वरूपताम् २९ एवंकृष्णेभगवतिमायामनुजईश्वरे ॥ वैरेणधूतपाप्मानस्तमा पुरनुचिंतया ३० कामात्स्नेहाद्भयाद्द्वेषाद्यथाभक्त्येश्वरेमनः ॥ आवेश्यतदघंहित्वाबहवस्तद्गतिंगताः ३१ गोप्यःकामाद्भयात्कंसोद्वेषाच्चैद्यादयोनृपाः ॥ संबंधाद्वृष्णयःस्नेहाद्यूयंभक्त्यावयंविभो ३२

रिसरूपताम् तथापिकरुणोविष्णुरन्यावेशाद्यादिद्विषन् हीयतेकिंममानेननित्यानंदस्वरूपिणः देहबंधयुतानांहिद्वेषिणाऽपकृतंभवेत् ममकोह्यपराध्येतानिर्दोषसुखरूपिणः अतोमय्यपराधस्तुस्वस्मि न्नेवनमेभवेत् अतोयद्यसुरावेशात्कृतमेतेनदुष्कृतम् अनादिभक्तोयस्मान्मेमोचयिष्येततस्त्वहम् इतिमत्वामोचयतिचैद्यादीनपिकेशवइतिवचनात् किंच निर्वैरेणेत्याद्युक्तमत्रानुसंधेयं तेनस्नेहाद्याय तनस्यदेहस्यनाशादिनाकीटस्योपद्रवाभावाद्धरेरप्युपद्रवाभावोनुमीयते तथापिकरुणोविष्णुरन्यावेशाद्यादिद्विषन् हीयतेकिंममानेननित्यानंदस्वरूपिणइत्यादिनाच ३० इतोपिभक्तिगर्भकामादिनै वभगवत्प्राप्तिरित्याह कामादिति कामादितितृतीयार्थेपंचमीकामादिभिरपिपथापथावत् भक्त्यासहैवकृष्णेमनआवेश्यद्वेषादिनायदघमापादितंतदघंहित्वातस्यकृष्णस्यगतिंलोकंगताइत्यन्वयः प्रथमतः कामादियुक्तयाभक्त्याहरौमनःआवेश्यपश्चाद्यथाभूतयाभक्त्याघंहित्वेत्यर्थः ३१ बहवइत्युक्तस्यविषयविभागमाह गोप्यइति कामात्कामयुक्तयाभक्त्या कंसःकंसाविष्टोभृगुःभययुक्तयाभक्त्या चैद्यादयः चैद्यादिस्थाजयादयःद्वेषयुक्तया वृष्णयःसंबंधोबंधुतातन्निमित्तया यूयंपांडवाः समतुलितबहुमानयुक्तया वयंशुकादिशब्दवाच्याःकेवलयाभक्त्याअत्रकश्चनविशेषः गोप्यःकामयुताभक्ताःकंसाविष्टः स्वयंभृगुः ज्ञेयोभययुतोभक्तश्चैद्यादिस्थाजयादयः विद्वेषसंयुताभक्तावृष्णयोबंधुसंयुताः बहुमानस्नेहसाम्यादेवाभक्ताःप्रकीर्तिताः स्नेहोपसर्जनादेवबहुमानान्मुनीश्वराः बहुमानोपिदेवानांऋषिभ्यो प्यधिकोमतः ब्रह्मर्वीद्रेंद्रकामादेरितरेषांयथाक्रममितिवचनादवगंतव्यः ३२

भक्त्यैवपुरुषार्थोनकेवलद्वेषेणेत्याशयवानाह कतमइति कामाद्युपसर्जनभक्तियोगानांपंचानांमध्येकतमोपिभक्तियोगोवेनस्यनास्ति असौकश्चनद्वेषात्मकएव यस्माद्भक्तियोगमंतरेणपुरुषार्थोनास्तितस्मात्केनापिप्रकारेणापादितेनोपायेनभक्तिलक्षणेनकृष्णेमनोनिवेशयेत्नद्वेषादिना उपायोभक्तिरुद्दिष्टोद्वेषाद्याअनुपायकाइत्यभिधानादतउपायोभक्तिरेव अतोभक्तिमंतरेणोपायोनास्तीत्यर्थः ३३ पेशस्कृतारुद्धइत्यत्रचैद्यादयःस्वतोभक्ताअसुरावेशाद्द्वेषिणइत्युक्तं तत्रहेतुमाह मातृष्वस्रेयइति पार्षदप्रवरत्वंस्वतोभक्तत्वे विप्रशापादसुराविष्टत्वंद्वेषित्वेहेतुः ॥ ३४ ॥ हरिदासान्हरिभक्तान् अभिमृशतिस्पृशतीतिहरिदासाभिमर्शनः हरेरेकांतिनांनियतभक्तानांभवउत्पत्तिः शरीरयोगलक्षणःस्वपदभ्रंशलक्षणःशापः अश्रद्धेयइवाभाति सयुक्तिकंनिरूपयितुंनक्षमामितिप्रतीयते ३५ तत्रकारणमाह देहेति देहाद्यभावश्चकुत्रत्यानामितितत्राह वैकुंठेति तेषांप्राकृतदेहाद्यभावेनजन्मादिकंकथंघटतइतिशंक्यतइत्यर्थः देहसंबंधःदेहयोगःतस्यसंबंधःनिमित्तभूतःशापएतच्छापनिमित्तं अनेनदेहयोगंतन्निमित्तशापं तन्निमित्तंच व्याख्यातुमर्हसीत्यर्थसमुदायोलक्ष्यतइत्यर्थः ३६ तदर्थजातंकुतोवगम्यतइति परिहारवचनादित्यतआदितोवक्ति एकदेति ३७ पंचषट्टायनाभाभाःपंचवर्षाःषड्वर्षाःअर्भाःअर्भकाःबालास्तद्वदाभादीप्रियैषांतेतथा तत्समानाइत्यर्थः शिशून्मत्वापुरप्रवेशकरणायवेषांतरमापन्नानित्याशंक्येत्यर्थः द्वाःस्थौद्वारिस्थौजयविजयौ तानूसनंदनादीन्प्रत्यषेधतां वेत्रविधाने

कतमोपिनवेनस्यपंचानांपूरुषंप्रति ॥ तस्मात्केनाप्युपायेनमनःकृष्णेनिवेशयेत् ३३ मातृष्वस्रेयोवश्चैद्योदंतवक्त्रश्चपार्थिव ॥ पार्षदप्रवरौविष्णोर्विप्रशापात्पदच्युतौ ३४ ॥ युधिष्ठिरउवाच ॥ कीदृशःकस्यवाशापोहरिदासाभिमर्शनः ॥ अश्रद्धेयइवाभातिहरेरेकांतिनांभवः ३५ देहेंद्रियासुहीनानां वैकुंठपुरवासिनाम् ॥ देहसंबंधसंबंधमेतदाख्यातुमर्हसि ३६ ॥ नारदउवाच ॥ एकदाब्रह्मणःपुत्राविष्णोर्लोकंयदृच्छया ॥ सनंदनादयोजग्मुश्चरंतोभुवनत्रयम् ३७ पंचषट्टायनाभाभाःपूर्वेषामपिपूर्वजाः ॥ दिग्वाससःशिशून्मत्वाद्वाःस्थौतान्प्रत्यषेधताम् ३८ अशपन्कुपिताएवंयुवांवासंनचार्हथः ॥ रजस्तमोभ्यांरहितेपादमूलेमधुद्विषः ३९ पापिष्ठामासुरींयोनिंबालिशौयातमाश्वतः ॥ एवंशप्तौस्वभुवनात्पतंतौतैःकृपालुभिः ४० प्रोक्तौपुनर्जन्मभिर्वांत्रिभिर्लोकायकल्पताम् ॥ जज्ञातेतौदितेःपुत्रौदैत्यदानववंदितौ ४१ हिरण्यकशिपुर्ज्येष्ठोहिरण्याक्षोनुजस्ततः ॥ हतोहिरण्यकशिपुर्हरिणासिंहरूपिणा ४२ हिरण्याक्षोधरोद्धारेविभ्रतासौकरंवपुः ॥ हिरण्यकशिपुःपुत्रंप्रल्हादंभगवत्प्रियम् ॥ जिघांसुरकरोन्नानायातनामृत्युहेतवे ४३ तंसर्वभूतात्मभूतंप्रशांतंसमदर्शनम् ॥ भगवत्तेजसास्पृष्टंनाशक्नोद्धंतुमुद्यमैः ४४ ततस्तौराक्षसौजातौकेशिन्यांविश्रवःसुतौ ॥ रावणःकुंभकर्णश्चसर्वलोकप्रतापिनौ ४५

नन्यवारयतामित्यन्वयः द्वाःस्थावित्युक्त्याजयविजययोःअधिकारस्थत्वंसूचयतितेनवैकुंठेअधिकारस्थिताःमुक्ताश्चेतिद्विविधाजनाःसंति तत्राधिकारस्थादेहादियोगित्वाद्वरशापयोग्याः पश्चान्नयोग्या इतिज्ञायते तदुक्तं अधिकारस्थिताश्चैवविमुक्ताश्चद्विधाजनाःविष्णुलोकस्थितास्तेषांवरशापादियोगिनःअधिकारस्थितामुक्तिंनियतंप्राप्नुवंतिच विमुक्त्यनंतरंतेषांवरशापादयोनतु देहेंद्रियासुयुक्ताश्चपूर्वं पश्चान्नतैर्युताः अप्यमीमानिभिस्तेषांदेवैःस्वात्मोत्तमैर्युताइति अनेनवैकुंठेमुक्तामुक्तस्थानद्वयमस्तीतिज्ञायते ३८ ३९ ४० ४१ ४२ नानायातनाः बहुविधतीव्रवेदनाकारणानि ४३ सर्वभूतात्मनिचराचरांतर्यामिणिहरावेवभूतंस्थितं ४४ नन्वासुरींयोनिंयातंइत्यर्यशापःआसुरयोनिप्राप्तिहेतुःतत्रजयविजययोःदित्यांजन्मतदनुगुणंकेशिन्यादिजन्मकथंयुज्यते राक्षसीमासुरींचैवप्रकृतिंमोहिनींश्रिताइतिभिन्नयोनित्वादितीमांमंदाशंकां हिरण्यकशिपुर्भूतमप्रमन्यतमृतौहरिं अतोभयानकोजातस्तत्रराजानमेवच मत्वाराजैवसंजातःकृष्णंचक्रादिलक्षणैः मृतिकालेहरिंचैवमत्वाभक्त्यैवकेवलं द्वास्थत्वंहरिमाविश्यप्रापैवमनुजोपितु इत्यनेनपरिहर्तव्यं यंयंवापिस्मरन्भावंत्यजत्यंतेकलेवरं तंतमेवैतिकौंतेयेत्यादेःसुरविरुद्धत्वमुभयोःसममित्यतोहरिद्वेषश्चसमइतिभावः ॥ ४५ ॥

४६ ४७ वैरानुबंधेनवैरयुक्तभक्त्यातीव्रेणात्युत्कटेनाच्युतसाम्यतांश्रीकृष्णस्वरूपप्रवेशलक्षणां हरेर्वैकुंठगमनानंतरंपार्षदौजयविजयाख्यमूलरूपेणैकीभूयहरेःपार्श्वंजग्मतुरित्यन्वयः अनुबंध स्तुभक्तिःस्याद्भंधःस्नेहउदाहृतइत्यभिधानादनुबंधशब्दस्यनैरंतर्यार्थोनुपपन्नइति ४८ दयितत्वं महात्मत्वंचप्रश्नस्यकारणं येनकेननिमित्तेन अच्युतेआत्मामनोयस्यसतथातस्मिन् ४९ ॥ इतिश्री भागवतेमहापुराणेसप्तमस्कंधेविजय०चितायांटीकायांप्रथमोध्यायः ॥ १ ॥ ॥ ७ ॥ ॥ हिरण्यकशिपुःस्वतोविष्णुभक्तोसुरावेशात्तद्द्वेषीत्ययंविवेकःतद्वचनेनज्ञातुंशक्यइत्येतदर्थमस्याध्यायस्यप्रारंभः तत्रप्रह्लादनात्रिपुत्रेद्वेषःकथंपितुरभूदित्यस्यप्रश्नस्यपरिहारंवक्तुमारभते भ्रातरीति १ हरिविषयरुषाभ्रातृविषयशुचा दशनच्छदओष्ठःचक्षुषोरोचिषायथाधूम्रंभवतितथापश्यन् २ भृकुट्या नीलशिरयायुक्तमुखः ३ हेपाक ४ ५ क्षुद्रैरल्पैःकपटिभिर्वा पार्ष्णिग्राहेणपृष्ठवेक्षकेणबालकेन देवानांदानवानांचसामान्यमधिदैवतंइत्यतःसमेनाप्युपधावनैःस्वोदर्चनैःविषयेण ६ त्यक्तस्वभावस्यत्य

तत्रापिराघवोभूत्वान्यहनच्छापमुक्तये ॥ रामवीर्यंश्रोष्यसित्वंमार्कंडेयमुखात्प्रभो ४६ तावद्यक्षत्रियौजातौमातृष्वस्रात्मजौतव ॥ अधुनाशापनिर्मुक्तौकृष्णचक्रहतांहसौ ४७ वैरानुबंधतीव्रेणध्यानेनाच्युतसाम्यताम् ॥ नीतौपुनर्हरेःपार्श्वंजग्मतुर्विष्णुपार्षदौ ४८ युधिष्ठिरउवाच ॥ विद्वेषोदयितेपुत्रेकथमासीन्महात्मनि ॥ ब्रूहिमेभगवन्येनप्रह्लादेप्यच्युतात्मनि ॥ ४९ ॥ इतिश्रीभागवतेमप्तमस्कंधेप्रथमोध्यायः ॥ १ ॥ नारदउवाच ॥ भ्रातर्यं वंविनिहतेहरिणाक्रोडमूर्तिना ॥ हिरण्यकशिपूराजन्पर्यतप्यद्रुषाशुचा १ आहचेदंरुषापूर्णःसंदष्टदशनच्छदः ॥ कोपोज्ज्वलाभ्यांचक्षुभ्यांनिरीक्षन्धूम्रंबरम् २ करालदंष्ट्रोग्रदृष्ट्यादुष्प्रेक्ष्यभ्रकुटीमुखः ॥ शूलमुद्यम्यसदसिदानवानिदमब्रवीत् ३ हिरण्यकशिपुरुवाच ॥ भोभोदानवदैतेयद्विमूर्द्धन्त्र्यक्ष शंबर ॥ शतबाहोहयग्रीवनमुचेपाकइल्वल४विप्रचित्तेममवचःपुलोमञ्छकुनादयः ॥ शृणुतानंतरंसर्वैःक्रियतामाशुमाचिरम् ५ सपत्नैर्घातितःक्षुद्रैर्भ्राता मेदयितःसुहृत् ॥ पार्ष्णिग्राहेणहरिणासमेनाप्युपधावनैः ६ तस्यत्यक्तस्वभावस्यवृणेर्मायावनौकसः ॥ भजंतंभजमानस्यबालस्येवास्थिरात्मनः ७ म च्छूलभिन्नग्रीवस्यभूरिणारुधिरेणवै ॥ युद्धप्रियंतर्पयिष्येभ्रातरंमेहतव्यथः ८ तस्मिन्कूटेहितेनष्टेकृंतमूलेवनस्पतौ ॥ विटपाइवशुष्यंतिविष्णुप्राणा दिवौकसः ९ तावद्यातभुवंयूयंब्रह्मक्षत्रसमेधिताम् ॥ मूदयध्वंतपोयज्ञस्वाध्यायव्रतदानकान् १० विष्णुर्द्विजक्रियामूलोयज्ञोधर्ममयःपुमान् ॥ देवर्षि पितृभूतानांधर्मस्यचपरायणम् ११

क्तसाम्यावस्थस्य ततएवास्माभिःघृणेःशोच्यस्य घृणिर्विभावसौसूर्यरश्मौशोच्येविघर्षणइत्यभिधानं भजंतंस्वात्मानंसेवमानंभजमानस्यप्रत्युपकारंकुर्वतः ७ ८ अंतर्दुष्टंदृश्यमानरमणी यंकूटंअस्थिरात्मनःकूटत्वादिभावदर्शनंमोहनार्थमासुरमतमुदीरितमितिज्ञातव्यं तदुक्तं विष्णुभक्तेश्चतज्ज्ञानादन्यतोमुक्तिवाचकाः विष्णोर्गुणाभासवाचःश्रीब्रह्मादेस्तथाक्रमात् विष्ण्वादिद्वेषि णश्चैवसुखवाचस्तथाखिलाः मोहनार्थाःसमुद्दिष्टायथार्थद्योतकास्तथेति ९ १० द्विजक्रियामूलःद्विजाश्चयज्ञादिक्रियाश्चमूलंयस्यसतथाभक्तिज्ञानादिमंतरेणकेवलंयागादिक्रियया प्रसन्नोभवतीतिएतदासुरंमतम् । विष्णुभक्तेश्चतज्ज्ञानादन्यतोमुक्तिवाचकाइत्येतदत्रापिप्रमाणम् । द्विजैःक्रियमाणं यागादिक्रियांमूलयतिप्रतिष्ठापयतिइतिद्विजक्रियामूलइत्येतद्देवमतं मूलप्रतिष्ठायामितिधातुः इ ज्यतइतियज्ञः धर्ममयः धर्मप्रधानः दानादिधर्मेणप्रसीदतीत्येतदप्यासुरमतं यथार्थद्योतकइतिवचनाद्धारकतमइत्यन्योर्थः परायणमुत्तमाश्रयमित्येतद्देवमतम् ११

संदीपयतदहत वृश्चतछिंदत १२ कदनं कदहिंसा याम् १३ गवामावासस्थानंव्रजः गोपालवसतिर्वा आश्रमोमुनिनिवासः आकरोरत्नाद्युत्पत्तिस्थानं खेटःनाट्यस्थानं खर्वटोवसनविक्रयस्यस्थानं घोषआभीरपल्लिः वणिग्भिरधिष्ठितंपत्तनम् १४ आजीव्यान्वृक्षान्नारिकेलक्रमुकान्पनसादीन् १५ विप्रकृतेविपरीतमपापादितेविनाशिते १६ १७ कटोदकंप्रेतमुद्दिश्यदीयमानमुदकम् १८ तन्मातरंतेषांमातरंनाम्नारुशद्भानुंदितिंजननींच श्लक्ष्णयागिराऽदमाहेत्यन्वयः १९ हेवधूःहेसहोदरभार्येहेपुत्राश्च परेणवधऐहिकामुष्मिकजनश्लाघ्योनभवतीतिकृत्वाशोकेउतात्रैवकंचित्कालंजीवानीतिअभीष्टहान्याप्राप्तः आहोस्वित्पितृमातृपुत्रभावस्यक्षणिकतेति तत्रप्रथमद्वितीयौप्रत्याह रिपोरिति २० तृतीयंमातरंएकांकदाक्षीकृत्याह भूतानामिति इहकर्मभुवि दैवेनविधिनान्यत्रहरिणावाएकत्रनीतानांसंमिलितानामुन्नीतानांपुत्रपौत्रादिसमृद्धिप्रापितानांभूतानामेकत्र संवासःसहवासः प्रपायांपानीयशालायामिवयथाऽध्रुवस्तथाऽनित्योभवतीत्यन्वयः प्रपापानीयशालास्यान्मंत्रशालाप्रतिश्रयइत्यभिधानम् २१ भूतानांसहवासोऽनित्यश्चेत्तर्हिकेनसहवासोनित्यइत्याशंक्यसर्वगतत्वाज्जीवस्यमनआदींद्रियाधारत्वाद्धरिणासहवासोनित्यः सतासौम्यतदासंपन्नोभवति

यत्रयत्रद्विजागावोवेदावर्णाश्रमाःक्रियाः ॥ तंतंजनपदंयातसंदीपयतवृश्चत १२ इतितेभर्तृनिर्देशमादायशिरसाहृताः ॥ तथाप्रजानांकदनंविदधुःकदनप्रियाः १३ पुरग्रामव्रजोद्यानक्षेत्रारामाश्रमाकरान् ॥ खेटखर्वटघोषांश्चददहुःपत्तनानिच १४ केचित्खनित्रैर्बिभिदुःसेतुप्राकरगोपुरान् ॥ आजीव्यांश्चिच्छिदुर्वृक्षान्केचित्परशुपाणयः १५ प्रादहञ्छरणान्येप्रजानांज्वलितोल्मुकैः ॥ एवंविप्रकृतेलोकेदैत्येंद्रानुचरैर्मुहुः १६ दिवंदेवाःपरित्यज्य भुविचेरुरलक्षिताः ॥ हिरण्यकशिपुर्भ्रातुःसंपरेतस्यदुःखितः १७ कृत्वाकटोदकादीनिभ्रातृपुत्रानसांत्वयत् ॥ शकुनिंशंबरंधृष्टंभूतसंतापनंवृकम् १८ कालनेमिंमहानाभंहरिश्मश्रुमथोत्कलम् ॥ तन्मातरंरुशद्भानुंदितिंचजननींगिरा ॥ श्लक्ष्णयादेशकालज्ञइदमाहजनेश्वर १९ हिरण्यकशिपुरुवाच ॥ अंबांबहेवधूःपुत्रावीरंमार्हथशोचितुम् ॥ रिपोरभिमुखेश्लाघ्यःशूराणांवधईप्सितः २० भूतानामिहसंवासःप्रपायामिवसुव्रते ॥ दैवेनैकत्रनीतानामुन्नीतानांतथाध्रुवः २१ नित्यआत्माऽव्ययःशुद्धःसर्ववित्सर्वगःपरः ॥ धत्तेसावात्मनोलिंगंमाययाविसृजन्गुणान् २२ यथांभसाप्रचलतातरवोपिचलाइव ॥ चक्षुषाभ्राम्यमाणेनदृश्यतेभ्रमतीवभूः २३

प्राज्ञेनात्मनान्वारूढउत्सर्जयतीत्यादिनासुप्तिमरणावस्थयोरपिसहास्थित्युक्तेरन्यदार्किंवक्तव्यमित्याशयेनदैवंमतमाह नित्यइति असौ हरिरात्मनोजविस्यमनआदींद्रियज्ञानंधत्ते तस्याधारभूतइत्यर्थः नित्यत्वादिकंस्वरूपत्वेनोच्यते । परइतिजीवव्यावर्तकं मायया स्वेच्छयावा सत्त्वयावा गुणान्शब्दादीन्विसृजन्ददानः संसारिणइवचिदचित्देहेनमनआदीनां नित्यसंबंधोयुज्यतइत्यतःसर्वगतइत्युक्तं प्रपायांप्राणिसहवासवत्परमात्मनोदेहसंबंधोनित्यइत्याशयेनासुरमतमप्यनेनोच्यते गुणान्विसृजन्बुभूषुरसावात्मापरमात्माआत्मनोभोगायतनंलिंगंकर्मज्ञानेंद्रियपंचवायुमनसांसमुदितरूपंशरीरंधत्ते मायेत्युक्त्याऽनित्योदेहसंबंधइति २२ इतोपिअविद्याबलाद्ब्रह्मैवसंसरतीत्येतदासुरंमतमित्याशयेनाह यथेति एवंगुणैर्भ्राम्यमाणेइतस्ततश्चंचलीक्रियमाणेमनस्यविकलःपुमान्पूर्णपुरुषःश्रीनारायणःतस्यजीवस्यसाम्यंदोषित्वंसंसारित्वंयातीतिप्रतीयते कथमिवलिंगवानिवजविइव मनोदोषैराभासेब्रह्मप्रतिबिंबेजीवेदूषितेतद्विषयज्ञानहीनेसतितन्महाभासिनोबिंबभूतस्यब्रह्मणो

१ आसुरमतंदर्शयति २ लिंगवानितेत्यत्रधत्तेसावात्मनोलिङ्गंपरब्रह्मणोलिङ्गाधारकत्वेनाधाराधेयभावत्वेनलिङ्गवत्त्वात्तदुच्यतइतिभातिअतःसप्रमाणमाह जीवइति ।

पिदुष्टत्वंकल्पयतीत्यर्थः नचैतदुपपत्तिमदित्याह अलिंगइति नीरूपं तस्मादघटितविद्याकल्पितमित्यर्थः अन्यत्रप्राकृतशरीररहितः कथमिव प्रचलितांमत्तातरवोपिप्रचलाइवदृश्यंते यथाजल संचलनाज्जलेप्रतिबिंबितवृक्षसंचलनात्तटस्थानिश्चलवृक्षसंचलनंकल्पयत्यज्ञस्तथेति नन्वत्रप्रतिबिंबितवृक्षचलनेनतटस्थवृक्षचलनकल्पनमुन्मत्तकल्पनमेव प्रत्यक्षणान्यथादृश्यमानत्वादित्युक्त्वादृष्टां तांतरमाह चक्षुषेति यथापरिभ्रमतःपुरुषस्यभ्राम्यमाणेनचक्षुषाभूभ्रमतीवदृश्यते असमःसमतामेतिभ्रांतिदृष्टयैवकेवलं जीवेनब्रह्मनसमंतत्त्वदृष्टयाकथंचन यथोदचालनादृक्षप्रतिबिंबमचालनात् तटस्थवृक्षचलनंकल्पयेदबुधोनरः तथामनसिजैर्दोषैराभासेदूषितेनरे आभासिनोब्रह्मणश्चदोषमज्ञःप्रकल्पयेत् आत्मनश्चक्षुषोर्भ्रांत्यायथापश्येद्भ्रमंभुवः तथैवस्वात्मनोदोषादोषवद्ब्रह्मपश्यतीत्येतत्प्र माणसिद्धत्वादुक्तएवार्थोनत्वितरः विष्णुर्द्विजक्रियामूलइत्यारभ्योच्यमानदैवमासुरंचेत्युभयमतज्ञापनाय विप्रयज्ञादिमूलंतुहरिरित्यासुरंमतं हरिरेवहिसर्वस्यमूलंसम्यङ्मतंनृपेत्येतद्वाक्यमाचार्यैर त्रोदाहृतमुपर्यप्यनुसंधानायचेति २३ २४ परमात्मानमेवंजानतःकिंफलंतत्राह एषइति अलिंगेप्राकृतदेहेंद्रियादिरहिते अतएवपरतंत्रत्वादिसर्वदोषरहितेपरमात्मनियालिंगभावनाप्राकृतदेहेंद्रियात्म

एवंगुणैर्भ्राम्यमाणेमनस्यविकलःपुमान् ॥ यातितत्साम्यतांभद्रेह्यलिंगोलिंगवानिव२४एषआत्मविपर्यासोह्यलिंगेलिंगभावना ॥ एवंप्रियाप्रियैर्योगोवि योगःकर्मसंसृतिः २५ संभवश्चविनाशश्चशोकश्चविविधःस्मृतः ॥ अविवेकश्चचिंताचविवेकस्मृतिरेवच २६ अत्राप्युदाहरंतीमामितिहासंपुरातनम् ॥ यमस्यप्रेतबंधूनांसंवादंतंनिबोधत २७ उशीनरेष्वभूद्राजासुयज्ञइतिविश्रुतः ॥ सपत्नैर्निहतोयुद्धेज्ञातयस्तमुपासत २८ विशीर्णरत्नकवचंविभ्रष्टाभरण स्रजम्॥शरनिर्भिन्नहृदयंशयानममृगाविलम् २९ विकीर्णकेशंस्तब्धाक्षंसंरंभादष्टदच्छदम् ॥ रजःकुंठमुखांभोजंछिन्नायुधभुजंमृधे ३० उशीनरेंद्रंविधि नातथाकृतंपतिंमहिष्यःप्रसमीक्ष्यदुःखिताः ॥ हताःस्मनाथेतिकरैरुरोभृशंघ्नंत्योमुहुस्तत्पदयोरुपापतन् ३१रुदंत्यउच्चैर्दयितांघ्रिपंकजंसिंचंत्यअस्रैःकुचकुं कुमारुणैः ॥ विस्रस्तकेशाभरणाशुचंनृणांमृजंत्यआक्रंदनयाविलेपिरे३२अहोविधात्राऽकरुणेननःप्रभुर्भवान्प्रणीतोधिगगोचरंदृशाम् ॥ उशीनराणामसिद्व त्तिदःपुराकृतोधुनायेनशुचांविवर्धनः ३३ त्वयाकृतज्ञेनवयंमहीपतेकथंविनास्यामसुहृत्तमेन ॥ तत्रानुयानंतववीरपादयोःशुश्रूषतीनांदिशयत्रयास्य सि ३४ एवंविलपतीनांवैपरिगृह्यमृतंपतिम् ॥ अनिच्छतीनांनिर्हारमर्कोस्तंसंन्यवर्तत ३५

त्वादिचिंता एषआत्मनःस्वस्यैवायोग्यस्यजनस्यविपर्यासस्तमःप्राप्तिलक्षणोनर्थोभवति इहापियथापरत्रतमोलक्षणोनर्थएवंप्रियाप्रियादियोगवियोगलक्षणापूर्वकर्मानुसारेणसंसृतिर्भवति २५ कीद शीतिविशेष्याह संभवइति अज्ञानपूर्तिपर्यंतंपुनःपुनःसंभवस्तस्मिन्सातिस्वरूपविनाशः विवेकस्मृतिः अविवेकिनएवाविवेकभ्रांतिः ज्ञानित्वभ्रांतिः असुरसिद्धांतनिष्ठितस्यहिरण्यकशिपोरेवंदैवसिद्धां तोपन्यासेनकथंस्वबंधुबोधनमितीयमाशंका अंतर्हिरण्यकादीनांभक्तिरस्त्येवकेशवे असुरावेशतस्त्वन्यान्हरिस्तोतॄन्द्विषंतिचेत्यनेनपरिहरणीयेति २६ पुत्रमित्रकलत्रादिभिःसहनिवासोदैवाधीन इतिमत्वाशोकोनकार्यइत्यस्मिन्नर्थेइतिहासलक्षणकथास्तीत्याह अत्रेति प्रेतबंधूनांकस्यचिन्मृतस्यज्ञातीनां २७ २८ असृगाविलंरुधिरक्षतम् २९ स्तब्धाक्षंनिश्चलनेत्रं रजःकुंठधूलिधूसरंमुखां बुजंयस्यसतथातं छिन्नायुधयुक्तौभुजौयस्यसतथातं ३० ३१ कुचकुंकुमधूलिभिररुणवर्णैराक्रंदनयाउच्चरोदनेननृणांशुचःशोकान्विसृजंत्यःकुर्वाणाविलेपिरे परिदेवनंचक्रुः ३२ नोदृशांचक्षुषा मगोचरमविषयंनीतःयेनविधिना ३३ स्यामसत्तांप्राप्नुमःतर्हिकिंकर्तव्यमत्राह तत्रेति यत्रयास्यसि तत्रपादयोरनुयानंदिश ३४ निर्हारंदाहम् ३५

हेत्यनेनकथांतरप्रसक्तिंसूचयतियमः ३६ माकुरुध्वंयूयंशोकं युष्मभ्यंसुयज्ञोदत्तइत्यादेरितितत्राह अहोइति लोकविधिंजन्ममरणादिप्रकारंविपश्यतामसीषांप्रेतबंधूनांविमोहअहोधिक् स्वयंसधर्माःजन्मादिसमानधर्माःअमीबंधवःयत्रयस्यमनुष्यदर्शनायोग्यात् स्वर्गनरकादन्यत्रोद्भवउत्पत्तिर्देहयोगलक्षणाभूत्तंतत्रतत् अस्मच्चक्षुरगोचरंस्वर्गादिकंगतंमनुष्यमनुशोचंतीतियत्तदपार्थंव्यर्थं गतानुगतिकत्वात् अदर्शनादिहायातःपुनश्चादर्शनंगतइतिवचनात् यत्रस्वर्गादेरुद्भवोयस्यसयत्रोद्भवस्तत्रगतंस्वर्गादिगतमितिवा अपार्थमनुशोचंतीतिवा सर्वस्यदैवाधीनत्वंस्वानुभवसिद्धमितिज्ञापयत्यहोइति यद्वा यत्रउत्पन्नंतत्रपृथिव्यांगतंमनुष्यशरीरंप्रतिव्यर्थंअनुशोचंतीति ३७ तस्मात्सर्वंदैवाधीनमितिमत्वा नशोकःकार्यइत्याशयेनाह अहोवयमिति पितृभ्यां मातापितृभ्यां अबलादुर्बलाः कुतश्चिताना स्तीतितत्राह सरक्षितेति योगर्भेऽस्मान्रक्षतिसभवानधुनाबहिर्गतान्रक्षिताहियस्मात्तस्मादितिशेषः ३८ नकेवलंरक्षिताऽपितुसृष्ट्यादिकर्तापीत्यतोनसंशयःकार्यइतिभावेनाह यइच्छयेति अत्रेच्छयेतीच्छाग्रहणेनसर्वत्रसृष्टिप्रसंगेमायाशब्दस्येच्छार्थोज्ञायतेहेअबलाःसृष्ट्यादिकर्तायतोअतःमरणलक्षणस्यनिग्रहस्यसंग्रहेपरिहारलक्षणे प्रभोःसमर्थस्यतस्येशितुश्चराचरं क्रीडनंलीलासाधनम् ३९ दैवाधीनंजगत्सर्वमित्युक्तेःकथमीश्वराधीनंचराचरमित्याशंक्यदिष्टदैवादिशब्देनसंस्तुतोच्युतइत्याशयेनाह पथीति भक्तायाभीष्टंदिशतीति दिष्टशब्दवाच्योमुकुंदःतेनरक्षितंतेनविहतं अस्यानेनहतः

तत्रहप्रेतबंधूनामाश्रुत्यपरिदेवनम् ॥ आहतान्बालकोभूत्वायमःस्वयमुपागतः ३६ ॥ यमउवाच ॥ अहोअमीषांवयसाधिकानांविपश्यतांलोकविधिं विमोहः ॥ यत्रोद्भवस्तत्रगतंमनुष्यंस्वयंसधर्माअनुशोचंत्यपार्थम् ३७ अहोवयंधन्यतमायदत्रत्यक्तापितृभ्यांनाविचिंतयामः ॥ अभक्ष्यमाणाअबलावृकादिभिःसरक्षितारक्षतियोहिगर्भे ३८ यइच्छयेशःसृजतीदमव्ययोयएवरक्षत्यवलुंपतेयः ॥ तस्याबलाःक्रीडनमाहुरीशितुश्चराचरंनिग्रहसंग्रहेप्रभोः ३९ पथिच्युतंतिष्ठतिदिष्टरक्षितंगृहेस्थितंतद्विहतंविनश्यति ॥ जीवत्यनाथोपितदीक्षितोवनेगृहेपिगुप्तोस्यहतोनजीवति ४० भूतानितैस्तैर्निजयोनिकर्मभिर्भवंतिकालेनभवंतिसर्वशः ॥ नतत्रहात्माप्रकृतावपिस्थितस्तस्यागुणैरन्यतमोनिबध्यते ४१ इदंशरीरंपुरुषस्यमोहजंयथापृथग्भौतिकमीयतेगृहम् ॥ तथोदकैःपार्थिवतैजसैर्जनःकालेनजातोविकृतोविनश्यति ४२

सकाशाद्वा ४० सृष्ट्यादिकंकुर्वन्नात्मातत्तत्प्राणिकर्माण्युल्लंघ्यकरोत्युततदनुसारेणेतितत्राह भूतानीति निजयोनिकर्माभिःस्वजातिविहितकर्मभिःभूतानिविहितकालेभवंतिनभवंतीत्यात्मप्रेरितैरितिशेषः द्रव्यंकर्मचकालश्चेत्यादेः कालशब्दवाच्यपरयात्माधिकरणतयासृष्ट्यादिकमाहुर्वंतीतिवा ननु जीवात्मनोरुभयोरपिदेहास्थितेःकस्यसंसारबंधाभावइतिसुहृद्भावेनपृच्छंतमाह नतत्रेति तत्रतयोर्जीवपरयोरन्यतमआत्माप्रकृतौप्रकृतिनिर्मितशरीरेस्थितोपितस्याःप्रकृतेर्गुणैः सत्त्वादिभिर्ननिबध्यते हकिल सत्त्वंसुखेसंजयतिरजःकर्मणिभारत ज्ञानमावृत्यतुतमःप्रमादेसंजयंत्युतेत्यादिवाक्योक्तबंधोनास्तीत्यर्थः हेत्यनेन तुच्छचेनाभ्वपिहितंयदासीत्तपसस्तन्महिनाजायतैकं इतिवाक्यंसूचयति सुविरुद्धस्वरूपत्वाज्जीवादन्यतमोहरिरित्यतोहरेरन्यतमत्वंप्रामाणिकमेव परमात्मानबध्यतेऽन्यतमोबध्यतेइत्येतदुत्तरश्लोकेनपुनरुक्तंस्यादित्यन्यथाव्याख्यातमाचार्यैरन्यतमआत्मापरमात्मेति ४१ परमात्मनोबंधाभाववचनेनजीवात्मनोर्योभेदःअर्थादाप्तःसकेनप्रकारेणेत्याशंक्याह इदंशरीरमिति पुरुषस्यसंसारिणोमोहेनान्यथाज्ञानेन मुहवैचित्येइतिधातोः विपरीतज्ञानजंयस्मात्तस्मादात्मनोभिन्नमितिज्ञातव्यं तथाहि भौतिकंभूतविकृतैर्वृक्षैर्विरचितंगृहं गृहस्थात्पृथग्भिन्नमीयतेयथा

१ तथाचकालइतिसप्तम्याअधिकरणत्वमितिसूचितम्

विनश्यतिचतथोदकैःपार्थिवतैजसैः परमाणुभिःकालनाम्नाहारिणाचोदितैर्विकृतोविकारंप्राप्नोजातोजन्यतइतिजनोदेहोविनश्यति स्वकारणावस्थितिमाप्नोतीतियस्मात्तस्माज्जीवाद्विन्नइतिनिश्चीयत नित्योनित्यानामितिश्रुतेः जीवस्यानित्यत्वात् ४२ तदेवदृष्टांतांतरेणस्पष्टयति यथेति यद्वा ननुजीवस्यशरीराद्भेदोस्तु तस्यनश्वरत्वात्परमात्मनाजीवस्याभेदःकिंनस्यादितिमंदाशंकांपरिहरति य थेति दारुणुस्थितोवह्निर्दारुभ्योभिन्नस्तद्गुणैस्तेषुनसज्जतेयथादेहिनांदेहगतोवायुर्देहात्पृथक्स्थितस्तद्गुणैश्चनलिप्यते यथासर्वगतंनभःसर्वस्माद्विन्नंज्ञायतेसर्ववस्तुगुणैश्चनलिप्यतेयथा तथाज्ञानानं दादिसर्वगुणाश्रयःपरःपरमात्मासर्वेषांजंतूनांगुणभूतंभोगायतनंशरीरमाश्रयोयस्यसः सर्वगुणाश्रयःसर्वजीवदेहगतःपरोविलक्षणोभिन्नइतियावत् जीवादितिशेषः प्रकृतत्वाज्जीवगुणैर्नलिप्यतइति । देहाद्भेदस्यप्रकृतत्वात्सएवात्रोच्यतइति किंनस्यादितीर्यशंका देहदारुगतोप्रागवह्निसर्वगतंनभः देहादिभ्योयथाभिन्नानलिप्यंतेचतद्गुणैः तथाजीवगतोविष्णुर्जीवाद्विन्नोनतद्गुणैरितिवाक्येनपरिहर्त व्या अत्रायंफलितार्थःभगवन्माहात्म्यकथनेनसर्वस्यतद्वशत्वात् सएवभजनीयोनशोकेनप्रयोजनमिति ४३ किंच भवच्छोकयोग्यस्यसुयज्ञस्यदृश्यमानत्वात्तंप्रतिशोकोनकार्यइतिगूढाक्षेपंकरोति सुयज्ञइति हेमूढाःयमनुशोचथायंसुयज्ञःशेतेनिद्रांकरोति ननुनमृतःननुचस्याद्धिरोधादित्यभिधानात् शेतएवलोकांतरंनगतइतिवा प्रश्नावधारणानुज्ञानुनयामंत्रणेनान्वित्याभिधानात्अवधार णार्थोननुशब्दः श्रोत्रादींद्रियव्यापारादर्शनादिनामरणानुमानात्कथंनमृतइत्याक्षिप्यतइतितत्राह यःश्रोतेति इहसुयज्ञशरीरेयःश्रोतायश्चानुवक्तासपरमात्माकर्हिचित्कदाचिदपिनदृश्यतेतस्यसूक्ष्म स्वभावत्वात् तदव्यक्तमाहहीतिसूत्राच्च तस्यैवश्रोतृत्वादिकंकुतइतिचेन्न नान्योतोस्तिद्रष्टा नान्योतोस्तिश्रोतेत्यादेः ४४ ननु सुयज्ञशरीरस्थस्यमुख्यप्राणस्यश्रोतृत्वादिसंभवात् कथंतदन्ययो

यथानलोदारुषुभिन्नईयतेयथानिलोदेहगतःपृथक्स्थितः ॥ यथानभःसर्वगतंनसज्जतेतथागुणैःसर्वगुणाश्रयःपरः४३ सुयज्ञोनन्वयंशेतेमूढायमनुशोचथ॥ यःश्रोतायोनुवक्तेहनसदृश्येतकर्हिचित् ४४ नश्रोतानानुवक्तायंमुख्योप्यत्रमहानसुः ॥ यस्त्विहेंद्रियवानात्मासचान्यःप्राणदेहयोः ४५ भूतेंद्रियमनो लिंगान्देहानुच्चावचान्विभुः ॥ भजत्युत्सृजतिह्यान्यस्तन्नापिस्वेनतेजसा ४६

गव्यवच्छेदःक्रियतइतितत्राह नश्रोतेति अत्रसुयज्ञदेहेश्वासोच्छ्वासादिलक्षणेनमुख्येव्यज्यमानत्वान्मुख्योयोमहानसुःमुख्यप्राणःसोपिस्वतोनश्रोतानानुवक्ताच तस्यवाङ्मनसिसंपद्यतेमनःप्राणेषा णस्तेजसितेजःपरस्यांदेवतायामितिश्रुतेरन्ययोगव्यवच्छेदोयुक्तइति ननुतर्हिसुयज्ञनाम्नोजीवस्यश्रोतृत्वादिकमासीत्प्राक्तदिदानींन तस्मान्मृतइतिप्राचीनशंकाशेषंकैमुत्यन्यायेनपरिहरति यस्त्विति तुशब्देननेत्यनुकृष्यते इहसुयज्ञेत्युपलक्षणम् जीवराशिर्देहयईंद्रियवान्यश्चप्राणदेहयोरन्यःसजीवात्माश्रोतुंवक्तुंचनशक्यइतिकिंवक्तव्यम् एतद्वागमवष्टभ्यविधारयामीतिश्रुतेः सर्वशक्तिमतोपिप्राण स्यस्वतःश्रोतृत्वाद्ययुक्तेरुक्तत्वात्तस्मात्सुयज्ञंप्रतिशोकेनकिंप्रयोजनं तस्माज्जीवतामपिश्रोतृत्वाद्यनुपपत्तेःप्रामाणिकत्वेनमृतोयमित्यस्यलक्षणांतरंवक्ति अन्यइत्यनेनहरेर्माहात्म्यातिशयःप्रकटितइ तिसूचितम् नकेवलंप्राणदेहयोरन्यःकिंतुपूर्णश्रोतृत्वादिगुणयुक्ताद्धरेश्चान्यइतिचशब्दार्थः ४५ हरेर्देहास्थितिसद्भावेनतस्मादप्यन्यइतिचवक्तुंयुक्तम् तत्कुतइतितत्राह भूतेंद्रियेति भूतेंद्रियमनांसिलिंगरू पंयेषांतेतथातानुच्चावचान्सुरनरतिर्यगात्मनउत्तममध्यमाधमान्देहान्भजति पश्चादुत्सृजतिहियस्मात्तस्मादन्यइतिवक्तुंयुक्तम् स्पष्टंचाह अन्यइति देहयोगवियोगभाजोजीवादितिशेषः लिंगंस्वरूप मुद्दिष्टंलिंगज्ञापकमेवचेतिवचनाल्लिंगशब्दस्यस्वरूपार्थोयुक्तःयदिदेहभजनोत्सर्जनेहरेस्तर्हिजीवात्कोविशेषइतितत्राह तच्चेति परिच्छिन्नविषयेभजनोत्सर्जनेव्याप्तस्यविष्णोःकथंघटेतेत्यतोवाह तच्चेति ततश्चशब्देनजीवस्यपारतंत्र्येणेविविशेषमाह अपिशब्देनरूपांतरेणेत्युपपत्तिमाह अत्रजीवपरमात्मनोर्भेदस्यतयोरुभयोर्देहादेर्भेदस्यच हरेरेवमुख्यश्रोतृत्वादेश्चप्रकरणावांतरभेदस्यचज्ञापनायाचार्यै

पूर्वापरभावेनेंद्रियवान्जीवइत्यादिव्याख्यातं ननु जीवस्यप्राणदेहयोरन्यत्वेमरणेदेहनाशान्मुक्तौतदभावाद्विषयभोगाभावइत्याशंकापरिहारायोक्तमाचार्यैः अन्योजीवोचितोदेहस्तद्भशोदेहउच्यतेइति । जडदेहादन्यत्वंनस्वरूपभूतादुच्यतइत्यर्थः अचितोजडात् इंद्रियत्वंचामुख्यंतेषामवशत्वादाभिमानादेव तद्द्वयंपश्यामीत्यभिमानोस्येत्यादेः तर्हिचक्षुरादीनिकस्याधीनानिइत्यतःप्राणाधीनानीतिद्योतयितुं चक्षुराद्यामनोजीवइत्यादेःप्राणेपिपर्याप्तमित्युक्तं तस्यापिज्ञातृगंतृत्वंनस्वतःशक्यतेकचिदिति यस्तस्यज्ञातृगंतृत्वदातासभगवानित्याद्यपिसूचितं यःश्रोतेत्यत्रप्रमाणंज्ञाताचमंताचेत्यादि ज्ञानादिदानंतस्यान्यइत्येतदन्वितिसूचितं सर्वस्यज्ञानदोहरिरित्येतन्नसदृश्येतेत्यनेनसूचितं स्वविषयज्ञानदातेतिचेतिदृश्यइत्यर्थः भूतेंद्रियमनइत्यादिनाविष्णुरुच्यते नजीवइत्यत्रमानंसदेहान्भजतइत्यादिना ४६ नन्वयंजीवःकियंतंकालंदेहान्वितोभवतिइतिचोद्यंपरिहरति यावदिति यावंतंकालमन्नमयप्राणमयमनोमयलक्षणेषुलिंगेषुअन्वितोभवति आत्मापरमात्मातावंतंकालंकर्मभिर्निरांबंधनंयस्यसतथाजीवः येषुदेहेषुअन्वितोभवति हिशब्दाद्धरिर्यदात्रिविधदेहानुत्सृजति तदास्वयमप्युत्सृजतीतिग्राह्यं अत्रायंविशेषः यदापरमात्मादेहंसर्वात्मनोत्सृजति तदायमपिसर्वात्मना तदनुग्रहेणोत्सृज्यसंसारान्मुक्तोभवतिनचेदनेनसहदेहांतरंभजतीति तस्मादचानेनरूपांतरेणकृतदेहोत्सर्जनत्वादनेनापिसुयज्ञेनतदाचरितमितिदेहोत्सर्जनलक्षणमरणस्यपराधीनत्वेनापरिहार्यत्वान्नशोकेनप्रयोजनमितिभावः यावद्देहान्वितोविष्णुस्तावज्जीवइत्येतदत्रमानं यदोत्सृजतिदेहंसहरिःसर्वात्मनाविभुरितिच ननु परमात्माजीवाभिन्नःसन् देहान्भजत्युत्सृजतीत्युच्यतेइतीकिंन स्यात् कल्पनालाघवादेकमेवब्रह्माज्ञानात्संसरतिमुच्यतइत्यंगीकाराच्चेतितत्राह ततइति तस्माद्धरेर्जीवोविपर्ययोविरुद्धःपर्ययःनिश्चयोयस्यसतथा विरुद्धलक्षणइत्यर्थःअतिभिन्नस्वरूपोतौजीवेशा

यावल्लिंगान्वितोह्यात्मातावत्कर्मनिबंधनः ॥ ततोविपर्ययःक्लेशोमायायोगोनुवर्तते ४७ वितथाभिनिवेशोयंयद्गुणेष्वर्थदृग्वचः ॥ यथामनोरथःस्वप्नःसर्वमैंद्रियकंमृषा ४८

वेकदेहगौइत्यादेः अतोब्रह्मणोज्ञानकल्पनमप्रामाणिकमितिभावः देहाभिमानीत्वेकोत्रनमानीमानदःपरइत्येतद्भेदोपपादकं इतोपिभिन्नइत्याह क्लेशइति नानाक्लेशाधिकरणत्वादभिन्नइत्यर्थः विपर्ययस्तावत् क्लेशादयश्चास्येत्यादेःक्लेशफलमाह मायेति ४७ कोयंमायायोगोनामयेनासौक्लेशफलःस्यादितितत्राह वितथेति गुणेषुशब्दादिषुअर्थदृग्वचः प्रयोजनदर्शनंतद्वाचकंवचनंचस्वर्गेलोकेनभयंकिंचनास्तीत्यादिलक्षणंयत् अयंवितथाभिनिवेशः मिथ्याग्रहः भ्रांतिज्ञानमित्यर्थः क्लेशपरिजिहीर्षयाशब्दादिष्विंद्रियप्रवर्तनंतत्फलमित्युपचारः वचनाद्धिवितथाभिनिवेशोभवति गुणेष्वर्थदर्शनस्यापितथाभिनिवेशित्वंसदृष्टांतमाह यथेति सप्तसुप्रथमेतिसूत्रात् मनोरथेकल्पितंराज्यंस्वप्नेदृष्टंरत्नंयथामृषावृथा तथासर्वमैंद्रियप्रवर्तनंमृषासदसद्विलक्षणमित्यर्थं वृथेंद्रियवृत्तयइत्येतद्विरुणद्धि इंद्रियाद्यभिमानेनतद्वान्जीवउदीर्यते अतन्मानाद्धरिःप्रोक्तस्त्वदेहोनिंद्रियस्तथा जीवानाभिमतेदेहेनविष्णुर्जीवतिस्थितः अतस्त्वदेहउद्दिष्टःपरमात्मासनातनइत्येतज्जीवपरयोर्भेदस्यजीवस्येंद्रियवत्वमौपचारिकमित्यस्यचोपपादनेप्रमाणं जीवस्येंद्रियवत्वमुपचरितंचेत्कस्यतन्मुख्यमित्याशंका लेपाभिमानीजीवस्तुस्वरूपानुभवीनच मुक्तेःप्राक्तेनमान्युक्तोनमानीविष्णुरुच्यते सर्वमेतिपश्यन्नप्यलेपाभिमतिर्यतः सम्यक्स्वरूपानुभवात्स्वतंत्रत्वाददोषतः इत्यनेनपरिहर्तव्या स्वानधीनेवस्तुनिस्वाधीनताबुद्धिर्लेपाभिमानः सोस्यास्तीत्येतादृशदोषोवितथाभिनिवेशइत्युच्यते हरेर्जीवदेहेंद्रियादिषुस्वाधीनेषुस्वाधीनताबुद्धिर्लेपाभिमानः सगुणोयथार्थज्ञानलक्षणः तस्माद्धरेर्देहेंद्रियादौस्वामित्वेनतद्भत्वंमुख्यं तत्राविवेकग्रहणंकर्मनिबंधनं ततोविपर्ययइत्यादिलक्षणैर्जीवोऽनीदृशःश्रीनारायणइतिस्मर्तव्यम् ४८

त्युत्तमपदत्वाद्धिरण्यकशिपुरचीक्लपत् तदुक्तं भवायश्रेयसेचैवनकश्चित्तदपेक्षते मधुकैटभयोश्चैवहिरण्यादेस्तथैवच नान्योब्रह्मपदंवांछत्पूजून्योग्यान्विनाकचित् ततःश्रेयांसिवांछंतिनतुतत्पदमाप्तयेइ
ति भवोवृद्धिःसमुद्दिष्टाश्रेयोमोक्षउदाहृतः वृद्धस्यनपुनर्हासोभूतिरित्येवकथ्यतइतिशब्दानिर्णये दिविस्थातुंनशक्नुमइत्यतोहिरण्यकशिपुनाब्रह्मपदावाप्तयेसकामंतपसिस्थितमितिज्ञायते यःसकामं
तपआचरतितस्यतपसातल्लोकेस्थितिर्नघटतेसंतप्तकटाहांतःस्थितिवच्चस्तुनिष्कामंतपःकरोतितेनसुखावाप्तिःस्यात् तदुक्तं सकामंतुतपःक्रूरंलोकानांक्षोभकृद्भवेत् इतरच्छांतयेसर्वलोकानांभवतिध्रुव
मिति ब्रह्माणमभजत्ब्रह्मपदार्थंसहिरण्यकइतिच १४ १५ कीचकैरनिलोद्भूतत्वेनस्वनद्वेणुभिःपिपीलिकाभिर्व्याप्तत्वात्क्वचिच्छरीरावयवैर्भेदसाक्वचित्त्वचाक्वचिच्छोणितेनचयुक्तं १६ तपं
तमित्यनेनापितपसःक्रूरत्वमाह भासावितंतं अहोदैत्यानामयोग्येवस्तुनिप्रयत्नातिशयइत्यालोच्यहसन्मंदस्मितंकुर्वन्हंसवाहनोब्रह्मा विष्णुपद्मासनावुक्तौपंडितैर्हंसवाहनावित्याभिधानम् १७ ॥
॥ १८ हृदोहृदयस्यसारंदार्ढ्यं दंशाः सूचीमुखाःशूकाः तेतवअस्थिष्वेवशेरतेइतिपस्मात्तस्मादद्भुतम् १९ इतोप्यद्भुतमित्याह नेतदिति निरंबुर्जलपानरहितः निर्निश्चयनिषेधयोरित्यमरः

इतिविज्ञापितोदेवैर्भगवानात्मभूर्नृप ॥ परीतोभृगुदक्षाद्यैर्ययौदैत्येश्वराश्रमम् १५ तंददर्शप्रतिच्छन्नंवल्मीकतृणकीचकैः ॥ पिपीलिकाभिराकीर्णंमेद
त्वङ्मांसशोणितम् १६ तपंतंतपसालोकान्यथाभावितंरविम् ॥ विलक्ष्यविस्मितःप्राहहंसस्तंहंसवाहनः ॥ १७ ॥ ब्रह्मोवाच ॥ उत्तिष्ठोत्तिष्ठभद्रंते
तपःसिद्धोसिकाश्यप ॥ वरदोहमनुप्राप्तोव्रियतामीप्सितोवरः १८ अद्राक्षमहमेतत्तेहृत्सारंमहदद्भुतम् ॥ दंशभक्षितदेहस्यप्राणाह्यस्थिषुशेरते १९ नैतत्पू
र्वेषयश्चक्रुर्नकरिष्यंतिचापरे ॥ निरंबुर्धारयेत्प्राणान्कोवैदिव्यसमाःशतम् २० व्यवसायेनतेनेनोदुष्करेणमनस्विभिः ॥ तपोनिष्टनभवताजितोऽहंदि
तिनंदन २१ ततस्तआशिषःसर्वाददाम्यसुरपुंगव ॥ मर्त्यस्यतेह्यमर्त्यस्यदर्शनंनचनिष्फलम् २२ ॥ नारदउवाच ॥ इत्युक्त्वादिभवोदेवोभक्षितांगं
पिपीलिकैः ॥ कमंडलुजलेनोक्षद्दिव्येनामोघराधसा २३ सतत्कीचकवल्मीकात्सहओजोबलान्वितः ॥ सर्वावयवसंपन्नोवज्रसंहननोयुवा ॥ उत्थित
स्तप्तहेमाभोविभावसुरिवैधसः २४ सनिरीक्ष्यांबरेदेवंहंसवाहनमास्थितम् ॥ ननामशिरसाभूमौतद्दर्शनमहोत्सवः २५ उत्थायप्रांजलिःप्रह्वईक्षमाणो
दृशाविभुम् ॥ हर्षाश्रुपुलकोद्भेदोगिरागद्गदयागृणत् २६ ॥ हिरण्यकशिपुरुवाच ॥ कल्पांतेकालसृष्टेनयोंघेनतमसावृतम् ॥ अभिव्यनक्तिजगदिदंस्व
यंज्योतिःस्वरोचिषा २७

स्युरेवंतुपुनर्वैवेत्यवधारणवाचकाइत्यभिधानाद्वाइत्यनेनादिव्यशतसमास्वेकापिकिंचिदूनानभवतीत्याह २० इनःसमर्थः तेनव्यवसायेन अमनस्विभिर्मनोबलरहितैः दुष्करेणदुःसाधनेनाजितावे
शीकृतः पराभूतंवशस्थंचजितमित्युच्यतेबुधैरितिशब्दनिर्णये २१ ददामिदास्यामीतीच्छामि मर्त्यस्यमरणशीलमनुष्यशरीरंप्राप्तस्यतेतव अमर्त्यस्यजरामरणशून्यस्यदेवस्यममदर्शनमभूद्धिय
स्मात्तस्मान्निष्फलंनैव २२ आदेर्हरेर्भवोजन्मयस्यसतथाविष्णुभूरित्यर्थः सर्वस्यादौभवतीतिवाऔक्षत्प्रोक्षितवान् दिव्यत्वमाह अमेघेति २३ एधसःइंधनात् २४ २५ ग्रह्वः
प्रवणः २६ मिश्रामिश्रभेदेनद्विविधास्तुतिर्वर्तते तत्राहिरण्यकशिपुमिश्रयापरोक्षात्मगतयास्तुत्यादेवतातृप्तिर्भवतीतिताहश्यास्तौति कल्पांतइत्यादिना अत्रयेचतुर्मुखस्यासंभावितागुणास्तेतदंत
र्यामिण्येककार्यत्वेनैकस्थानास्थितेसर्वोत्तमेहरौयोज्याः तद्योग्यास्तत्रयोज्याःनचैतावतास्तुतेर्भिन्नाधिकरणत्वमापन्नंतस्यतदधीनत्वेननित्योपसंह्रियमाणगुणांतर्भूतत्वेनतच्छ्रवणस्मरणाभ्यामंतःकरण

स्योल्लाससंभवात् तदुक्तं प्रायस्तुस्तुतिशब्देषुमिश्रावाचोहरिंविना केचिज्जीवगुणास्तत्रतन्नियंतुर्हरेःपरे एकस्यानेककार्यत्वाद्विष्णोःप्राधान्यतस्तथा जीवस्यतदधीनत्वान्नभिन्नाधिकृतंवचइति प्रल यकालप्रवर्तकेनहरिणासृष्टेनांधेनतमसा दुर्गाभिमन्यमानेनावृतमिदंजगदभिव्यनक्अभिव्यक्तंकृतवान् स्वरोचिषास्वसामर्थ्येन २७ एतदेवविवृणोति आत्मनेति आत्मनाक्षोभितयात्रिवृता त्रिगु णात्मिकया तेजोबन्नात्मिकयावाप्रकृत्याचेदंजगत्सर्जनादिक्रियाविशिष्टंकरोति तस्मैनमइत्यन्वयः रजःसत्त्वतमोधान्नइत्यनेनसृष्ट्यादौरजआदिगुणानांप्राधान्यंसूचयति परायमहतइत्यनेनअ णोरणीयान्महतोमहीयानितिश्रुतिसिद्धोभयविधानंसंस्मारयति दृश्यविषययानयास्तुत्याकिंस्यादितिनाश्रद्धेयं तथाहि आत्मनापरमात्मनाप्रेरितोवाउपादानभूतयाप्रकृत्यारजःप्रधानयेदंसृजति स त्वप्रधानयाजातैर्मन्वादिभिरिदमवति तमःप्रधानयाजातेनरुद्रेणसंहराति तस्मैमहतेमहत्तत्त्वाभिमानिने परायरुद्राच्छ्रेष्ठायभगवतेनमः २८ आद्यायपुरुषरूपेणजगदादौव्यक्ताय अन्यत्रादिकर्ताश्रीना नारायणस्तस्माज्जातायबीजायव्यंजकायफलरूपायेतिवा जगदुत्पत्तौबीजशक्तियुक्तायवा ज्ञानविज्ञानेएवमूर्तिर्विग्रहोयस्यसतथातस्मै अन्यत्रज्ञानविज्ञानयोरुपदेष्टृविग्रहाय प्राणेंद्रियमनोबुद्धिलक्षणै र्विकारैःसप्तदशकैर्व्यक्तिमीयुषे ब्रह्मांडांतर्विराट्पुरुषतयेतिशेषः उभयत्रसमम् २९ मुख्येनप्राणेनसहत्वंस्थावरजंगमात्मकस्येशिषेप्रवर्तकोसि चित्तस्यचित्तिःस्मरणशक्तिप्रदःसाक्षीवामहाभूतानां गुणानांशब्दादीनामाशयस्यांतःकरणस्यप्रवर्तकः पुनर्वचनंदैनंदिनप्रवृत्त्यर्थं ३० त्रय्यातन्वा प्रतिमास्थानीयेनवेदत्रयेणचातुर्होत्रारूयमंत्रप्रकाश्येचतुर्होत्रंतद्विषययाविद्ययाचसप्ततंतून्सप्तक्रतून्वि

आत्मनात्रिवृताचेदंसृजत्यवतिलुंपति ॥ रजःसत्त्वतमोधाम्नेपरायमहतेनमः २८ नमआद्यायबीजायज्ञानविज्ञानमूर्तये ॥ प्राणेंद्रियमनोबुद्धिविकारै र्व्यक्तिमीयुषे २९ त्वमीशिषेजगतस्तस्थुषश्चप्राणेनमुख्येनपतिःप्रजानाम् ॥ चित्तस्यचित्तिर्मनइंद्रियाणांपतिर्महाभूतगुणाशयेशः ३० त्वंसप्ततंतून्वि ततोषितन्वात्रय्याचतुर्होत्रकविद्ययाच ॥ त्वमेकआत्मात्मवतामनादिरनंतपारःकविरव्ययात्मा ३१ त्वमेवकालोऽनिमिषोजनानामायुर्लवाद्यावयवैःक्षि णोषि ॥ कूटस्थआत्मापरमेष्ठ्यजोमहान्त्वंजीवलोकस्यचजीवआत्मा ३२ त्वत्तःपरंनापरमप्यनेजदेजच्चकिंचिव्द्यतिरिक्तमस्ति ॥ विद्याकालास्तेतनव श्चसर्वाहिरण्यगर्भासिबृहत्त्रिपृष्ठः ३३

तनोषिविस्तृत्यकरोषिद्रव्यमंत्राक्रियादेवतास्थत्वेनबाहिरुपदेष्टृत्वेनकर्तृत्वेनकारयितृत्वेनशब्देज्यास्तुतिप्रायश्चित्तादिरूपयाच अग्निमीळेपुरोहितंयज्ञस्यदेवमृत्विजं होतारंरत्नधातमामित्यादिश्रुतेः य ज्ञःसवोध्वरोयागःसप्ततंतुर्मखःक्रतुरिति अत्मवतामात्मज्ञानिनांश्रेष्ठः आत्माश्रेष्ठस्वरूपेचजीवेज्ञातरिकेशवे वायौदेहेस्वयंस्वांतेनवसुप्रोच्यतेबुधैः अनादिःकारणशून्यः पुरातनोवा अनंतपारऽप्रमे योऽव्ययेहरावात्मामनोयस्यसतथा नभारतीमेंगमृषोपलक्ष्यतइत्यादेरन्यत्राव्ययानांमुक्तानामात्मास्वामी असंसार्यव्ययोमुक्तआचिरानंदउच्यते ३१ अनिमिषइत्यनेननित्यंजाग्रत्स्वभावउच्यते कूटस्थोनिर्विकारः आत्माव्याप्तःपरमेष्ठीसर्वोत्तमः महानज ब्रह्मणोप्यधिकइत्यनेनसर्वोत्तमत्वंनिर्णयति अन्यत्रआत्जातोतएवमहानव्यवधानेनतत्पुत्रत्वात् जीवलोकस्यजीवराशेर्जीवःप्राणधा रकः जीवप्राणइतिधातोः कथंधत्तइत्यतउक्तं आत्मेति इष्टादानादिकर्ता अवसंतर्पणइतिधातोरवतिरूपोयंशब्दःसामान्यविशेषाभ्यांयोजनीयः ३२ इदानींभगवत्येवसंभाव्यमानैर्विशेष णैर्विशिष्टंतदंतर्यामिणमभिष्टौति त्वत्तइति परमतीतमपरमेष्यदपिवर्तमानंयत्किंचिदनेजत्स्थावरमेजज्जंगमंचवस्तुतत्सर्वंत्वत्तोव्यतिरिक्तंनास्ति त्वयैवांतर्बहिश्चव्याप्तत्वात् त्वामंतरेणस्वातंत्र्येणस्थितं नास्तीत्यर्थः अंतर्बहिश्चतत्सर्वंव्याप्यनारायणःस्वयमितिश्रुतेः सर्वंखल्विदंब्रह्मेति चपरावरेषुयस्माच्चंव्यप्तोविष्णुःसनातनः तस्मान्नव्यातिरिक्तत्वमित्याहुर्वेदवादिनइत्यतस्त्वत्तोभिन्नंनास्तिकिंतुत्व

मेवेत्यर्थोनघटतइत्यतउक्तएवार्थःज्ञानंवेदादिविद्ययैव तदवाप्तिरपितस्यास्त्वत्तनावाश्रितत्वात्त्वदनुग्रहमंतरेणसुशकानस्यादित्यभिप्रेत्याह विद्येति विद्याश्चकलाश्चविद्याकलाःपरविद्यापरविद्येतितेतनवः तववपुषिस्थितत्वात्तथोच्यंते कलाःचतुःषष्टिलक्षणावाविद्याकलावेदांगानीत्यन्यथाप्रतीतिनिरासायाचार्यैर्विद्याश्चकलाश्चेतिविशेषितं एतस्मिन्नर्थे महाविद्याःकलाश्चेत्वत्तनावाश्रितायतः विद्यातनुरितिप्राहुरतस्त्वांतत्त्ववेदिनइतिमानंचोदाहरति तस्मादयमेवार्थइति इदंचमाहात्म्यंहरेरेवयुक्तमित्याह हिरण्यगर्भइति हिरण्यमंडंगर्भेउदरेपस्यमतथागर्भीकृतानंतब्रह्मांडत्वात्तन्नामतवैवयुक्तं हिरण्यकोशंरजसापरीवृतमितिश्रुतेः हिरण्मयब्रह्मांडोदराभिव्यक्तत्वाद्धातन्नामासि निर्गुणस्यहरेरेतेगुणाःकथंसंभवेयुरत्राह बृहदिति गुणपूर्तित्वाद्बृहद्ब्रह्म अथकस्मादुच्यतेब्रह्मेति बृहंतोह्यस्मिन्गुणाइतिश्रुतेः ननुतर्हीदंशबलंकिंनस्यादत्राह त्रिपृष्ठइति जाग्रदाद्यवस्थाअतिक्रम्यस्थितत्वात्त्रिपृष्ठइत्युच्यते त्रयाणांलोकानांपृष्ठेवर्तमानइत्यपव्याख्याननिरासायतुरीयइत्याचख्युराचार्याइति चतुर्मुखादप्यधिकंविष्णुंजानताहिरण्यकशिपुना तदंतर्यामियोग्यगुणैरयंब्रह्मानस्तूयते किंत्वंतर्यामीस्तूयतइतिज्ञापनाय तदुक्तं ब्रह्मणोप्यधिकंविष्णुंजानन्नपिहिरण्यकः ब्रह्माणंतद्गुणैःस्तौतितद्ग विष्णुविवक्षयेति बृहच्चासिमहत्तत्त्वात्मकंचासीत्येकदेशीयैरितिव्याख्यातं तत्संप्रदायज्ञैर्हरेर्महत्तत्त्वात्मकमेवंगुणत्वेनसंगच्छतइतिनिरूप्य ब्रह्माणंतद्गुणैःस्तौति तद्गविष्णुविवक्षयेत्युक्तत्वात् नचतद्वचापित्वेनतदात्मकत्वमुच्यतइतिवाच्यं तर्ह्यपंव्याख्याता चतुर्मुखस्यतदभिमानित्वेनघटतां तस्याप्युक्तदोषानिस्तारादिति ३३ ज्ञानानंदादिलक्षणगुणमूर्तेनिरूपयति व्यक्तमिति हिरण्यगर्भइत्यनेनब्रह्मांडस्यशरीरस्थानीयत्वंसूचितंतत्रतिष्ठन्गुणान्हरिःसुखलक्षणान्भुंक्तेनतुदेवदत्तवद्दुःखलक्षणानित्यतोवाह व्यक्तमिति पारमेष्ठ्येधामनिवैकुंठादिस्थानेसत्यलोकेवास्वरूपभूतेमहिम्निवास्थि

व्यक्तंविभोरथूलमिदंशरीरंयेनेंद्रियप्राणमनोगुणांस्त्वम् ॥ भुंक्तेस्थितोधामनिपारमेष्ठ्येअव्यक्तआत्मापुरुषःपुराणः ३४ अनंताव्यक्तरूपेणयेनेदमखिलं ततम् ॥ चिदचिच्छक्तियुक्तायतस्मैभगवतेनमः ३५ यदिदास्यस्यभिमतान्वरान्मेवरदोत्तम ॥ भूतेभ्यस्त्वद्विसृष्टेभ्योमृत्युर्मांभून्ममप्रभो ३६

तःपुराणःपुरुषस्त्वांयेनशरीरेणेंद्रियप्राणमनसांगुणान्विषयानेवभुंक्ते नतुदुःखलक्षणान् कुतएतदत्राहात्मेति एषह्यानंदमादत्तेतआत्मेतीतिश्रुतेः आनंदस्वभावत्वात्तद्भोतद्विषयज्ञानंकथंनोत्पद्यतइति तत्राह अव्यक्तइति तदव्यक्तमाहहीतिसूत्रात्हेविभोतदिदंव्यक्तंब्रह्मांडलक्षणंतवस्थूलशरीरमाचक्षतइतिशेषः यद्वाऽनेनब्रह्माणमेवतद्योग्यैर्विशेषणैःस्तौति तथाहि पुरंशरीरमणतीतिपुराणः आत्मेत्यभिधानादात्माचतुर्मुखः अवतारेणव्यक्तिर्नास्तीत्यव्यक्तःजगत्सृष्ट्याद्यैश्वर्यलक्षणान् गुणान् इतरत्स्पष्टम् ३४ स्थावरजंगमारूपंजगत्त्वद्व्यतिरिक्तंनास्तित्वयाव्याप्तत्वादित्यर्थतोव्याप्तिरुक्ता तदिदंकीदृशेनरूपेणव्याप्तमितिमंदाशंकापरिहारायस्पष्टमाह अनंतेति अनेनपरिच्छिन्नस्यसर्वस्यापरिच्छिन्नाद्धरेर्बाहिष्ठ्युक्तिविरुद्धमित्युक्तंभवति तमआसीत्तमसागूळहमग्रेइतिश्रुतेः प्रकृत्याव्याप्तत्वप्रतीतेःकथंहरेरेवेतिविशिष्योक्तिर्घटतइतितत्राह चिदचिदितिशक्तिपदस्यद्विरावृत्तिःकर्तव्या शक्यत्वाच्छक्तयोभार्याइतिवचनात् उभयविधायाशक्तिःप्रकृतिस्तस्याःयाकार्येषुशक्तिस्तस्याअपिभगवच्छक्त्यविनाभूतत्वात्तद्व्याप्तिरतस्त्रियतेत्यतएवयुक्तायेत्युक्तं नचानेनगुणभूतत्वंहरेरितिवाच्यं शिष्येणोपाध्याय आगतइत्यत्रोपाध्यायप्राधान्यवदुपपत्तेः ननुलोकेप्रतिवस्त्वेकनियतत्वादर्शनात् चिदचिदात्मकप्रपंचेकस्यचित्तदनियतत्वसंभवेनस्वातंत्र्येणसर्वव्याप्तत्वंहरेःकथंयुज्यतइत्यतोवाह चिदचिदिति द्रव्यंकर्मचकालश्चेत्यादेः परमाणुमात्रवस्तुनोपिभगवदनियतत्वासंभवात् एतादृशी शक्तिरस्यास्तीतिकुतइत्यतउक्तं भगवतइति उक्तार्थंपदं भूयिष्ठांतेनमउक्तिविधेयेतिवाक्यार्थंस्मरताहिरण्यकेननमइत्युक्तं तदुक्तेःफलाधिकत्वात् ३५ किंबहुनोक्तेनत्वदभीष्टंवदेत्याशंकितआह यदीति विविधत्वेनसृष्टेभ्यः ३६

अन्यस्मादपिकालात्अथवाभावादवयवविशिष्टात्भूतेभ्यइत्युक्तेप्यन्येभ्यःकिमित्यतोविशिनष्टि ननरैरिति ३७ व्यसुभिर्विगतप्राणैःपाषाणादिभिः असुमद्भिर्ग्राहादिभिःऐकपत्यंऐकाधिपत्यम् ३८ महिमानंवृणइतिशेषः आत्मनस्तवयोमहिमासयथानरिष्यतिननश्यतितथाममममहिमास्तुयोमहिमायथाकर्हिचित्नरिष्यतितथात्मनोममममहिमाननश्यत्विति चोति ३९ इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेविजयध्वजकृतटीकायांतृतीयोध्यायः ३ ॥ ७ ॥ वरदानादिनासंभूतंलवणाब्धिजलवृद्धिह्रासवत् क्षणिकंभगवदभक्तैश्वर्यंश्रीनारायणप्रसादाविर्भूतमनंतकालीनंशाश्वतंस्यात्तदेवापाद्यंबुभूर्षुभिरित्यादितात्पर्यनिरूप्यतेकतिपयेष्वध्यायेषु तत्रहिरण्यकशिपवेब्रह्मवरप्रदानप्रकारंतेनास्यसर्वविजयप्रकारंचनिरूपयति एवंवृतइत्यादिना अथशब्देननकेवलंब्रह्मणोवरदानमेवोच्यतअपितुहिरण्यकशिपुविषयाकथासाकल्येनकथ्यतइतिसूचयति १ ममसकाशाद्यदपिदुर्लभान्अंततोदुःखप्रापकान् दुरशोभनदुःखयोरितियादवः २ भगवान्पूज्यःअत्रप्रतिक्षणंदृष्टश्रुतविस्म

नांतर्बहिर्दिवानक्तमन्यस्मादपिचायुधैः ॥ नभूभौनांबरेमृत्युर्ननरैर्नमृगैरपि ३७ व्यसुभिर्वाऽसुमद्भिर्वासुरासुरमहोरगैः ॥ अप्रतिद्वंद्वतायुद्धेऐकपत्यंचदेहिनाम् ३८ सर्वेषांलोकपालानांमहिमानंतथात्मनः ॥ तपोयोगप्रभावेनयोनरिष्यतिकर्हिचित् ३९ इतिश्रीभागवतेसप्तमस्कंधेतृतीयोध्यायः ॥३॥ नारदउवाच ॥ एवंवृतःशतधृतिर्हिरण्यकशिपोरथ ॥ प्रादात्ततपसाप्रीतोवरांस्तस्यसुदुर्लभान् १ ब्रह्मोवाच ॥ तातेमेदुर्लभाःपुंसोयान्वृणीषेवरान्मम ॥ तथापिवितराम्यंगवरान्यदपिदुर्लभान् २ ततोजगामभगवानमोघानुग्रहोविभुः ॥ पूजितोऽसुरवर्येणस्तूयमानःप्रजेश्वरैः ३ एवंलब्धवरोदैत्योबिभ्रद्वेममयंवपुः ॥ भगवत्यकरोद्वेषंभ्रातुर्वधमनुस्मरन् ४ सविजित्यदिशःसर्वालोकांश्चत्रीन्महासुरः ॥ देवासुरमनुष्येंद्रान्गंधर्वगरुडोरगान् ५ सिद्धचारणविद्याध्रान्ऋषीन्पितृपतीन्मनून् ॥ यक्षरक्षःपिशाचेशान्प्रेतभूतपतीनपि ६ सर्वसत्त्वपतीन्जित्वावशमानीयविश्वजित् ॥ जहारलोकपालानांस्थानानिसहतेजसा ७ देवोद्यानश्रियाजुष्टमध्यास्तेस्मत्रिविष्टपम् ॥ महेंद्रभवनंसाक्षान्निर्मितंविश्वकर्मणा ८ त्रैलोक्यलक्ष्म्यायतनमध्युवासाखिलर्द्धिमत् ॥ यत्रविद्रुमसोपानामहामारकताभुवः ९ यत्रस्फटिककुड्यानिवैदूर्यस्तंभपंक्तयः ॥ यत्रचित्रवितानानिपद्मरागासनानिच १० पयःफेननिभाःशय्यामुक्तादामपरिच्छदाः ॥ कूजद्भिर्नूपुरैर्देव्यःशब्दयंत्यइतस्ततः ॥ रत्नस्थलेषुपश्यंतिसुदतीःसुंदरंमुखम् ११ तस्मिन्महेंद्रभवनेमहासुरोमहाबलोनिर्जितलोकएकराट् ॥ रेमेभिवंद्याघ्रियुगःसुरादिभिःप्रतापितैरूर्जितचंडशासनः १२

रणशीलानांमंदानांस्फुरणार्थंकृतव्याख्यानांपदानांपुनरापितथावचनंनंदोषायतदर्थंहीदंप्रवृत्तामिति अमोघानुग्रहःयोग्यानामितिशेषः ॥ ३ ॥ समग्रैश्वर्यादिगुणरत्नाकरेपरद्वेषमकरोदसुरावेशाज्जयांशत्वेनस्वतोभक्तोपीतितात्पर्यं तदुक्तम् स्वतोभक्ताहिरण्याद्याःपरावेशाद्धरौद्विषइति परोरिपरमात्मनोरित्यभिधानादत्रपरःशत्रुरसुरः तदावेशादित्यर्थः ४ ५ ६ सर्वसत्त्वपतीन्सिंहादीन् बलश्रेष्ठान्वार्किंबहुनाविश्वंचराचरंविजितवानिति तेजसाप्रभावेनसहजहार ७ त्रिविष्टपंस्वर्गं स्वर्गेत्रीणिस्थानानिसंततोपिश्रेष्ठमहेंद्रभवनममरावतीनामतत्स्थानापेक्षयासाक्षात्तुरीयमित्युच्यते साक्षात्प्रत्यक्षतुर्ययोरित्यभिधानात् अतएवाखिलर्द्धिमदित्युक्तम् साक्षात्प्रत्यक्षमध्युवासेत्यनेनवासंगमयितव्यम् त्रीणिविष्टपानिस्थानानिसकलसमृद्धिमंत्यस्मिन्निति त्रिविष्टपशब्दार्थपर्यालोचनयायमर्थःसंपद्यते त्रिदिवपदरयाप्ययमेवार्थः अन्यथात्रिशब्दस्यगतिर्वक्तव्येति ८ सोपानमारोहावरोहलक्षणंकुट्टिमम् ९ वितानमुपरिपिधानवस्त्रम् १० सुदतीःप्रशस्तदंतपंक्तयःस्त्रियः ११ १२

त्रिभिरादित्यवसुरुद्रैर्मरुदादिदेवानामेष्वंतर्भावविवक्षयात्रिधाभिन्नैः तदुक्तं आदित्यावसवोरुद्रास्त्रिविधाहिसुरायनः मरुतश्चैवविश्वेचसाध्याश्चैवचतद्गताः अतस्त्रयइतिप्रोक्ताश्चत्वारोमानुषाःस्मृताःउपायनं ददुःसर्वेविनादेवान्हिरण्यकेइतिवचनात् नत्रब्रह्मविष्णुमहेश्वरैरित्यर्थोग्राह्यः किंचात्रेदंतात्पर्यं तथाहि द्विविधादेवायज्ञभागभुजस्तद्भुजइति तत्रप्रथमोत्रिधाभिन्नाजातिभिन्नत्वान्मंत्रेणाह्वानेसमूहेनागम नाच्च चरमेषुमुरशब्दमात्रंवर्तते तदंतेवासिवद्वर्तमानाः अयज्ञभागेष्वापितुमुरशब्दःप्रयुज्यते यज्ञभागभुजस्त्वेवत्रयइत्यभिशब्दिताइतिवचनादयंविशेषःकल्प्यतइति इतोप्यत्रत्रित्वसंख्ययादित्याद यउच्यंतइत्यंगीकर्तव्यं दैत्यस्यदेवोपास्यत्वेदेवानांसदासद्यशोभाजामयशःस्यात्तदनुपपन्नं प्रमाणविरोधात्तदितरेषांउभयभाक्त्वमितीश्वरक्षयमिदमिति यत्रक्षयशःस्थानमन्येषामितिकेशवः सर्वत्रापिदु

तमंगमत्तंमधुनोरुगंधिनाविवृत्ततास्राक्षमशेषधिष्ण्यपाः ॥ उपामतोपायनपाणिभिर्विनाऋत्विभिस्तपोयोगबलौजसांपदम् १३ जगुर्महेंद्रासनभोजसास्थितंविश्वावसुस्तुंबुरुरस्मदादयः ॥ गंधर्वसिद्धाऋषयोऽस्तुवन्मुहुर्विद्याधराअप्सरसश्चपांडव १४ सएववर्णाश्रमिभिःक्रतुभिर्भूरिदक्षिणैः ॥ इज्यमानोहविर्भागानग्रहीत्स्वेनतेजसा १५ अकृष्टपच्यातस्यासीत्सप्तद्वीपवतीमही ॥ तथाकामदुवाद्यौश्चनानाश्चर्यपदंनभः १६ रत्नाकराश्चरत्नानितत्पत्न्यश्चोहुरूर्मिभिः ॥ क्षारसीधुघृतक्षौद्रदधिक्षीरामृतोदकाः १७ शैलाद्रोणीभिराक्रीडंसर्वर्तुषुगुणान्द्रुमाः ॥ दधारलोकपालानामेकएवपृथग्गुणान् १८ सइत्थंनिर्जितककुबेकराड्विषयान्प्रियान् ॥ यथोपजोषंभुंजानोनातृप्यदजितेंद्रियः १९ एवमैश्वर्यमत्तस्यदृप्तस्योच्छास्त्रवर्तिनः ॥ कालोमहान्व्यतीयायब्रह्मशापमुपेयुषः२० तस्योग्रदंडसंविग्नाःसर्वेलोकाःसपालकाः ॥ अन्यत्राऽलब्धशरणाःशरणंययुरच्युतम् २१ तस्यैनमोस्तुकाष्ठायैयत्रात्माहरिरीश्वरः ॥ यद्गत्वान निवर्तंतेशांताःसंन्यासिनोमलाः २२ इतितेसंयतात्मानःसमाहितधियोमलाः ॥ उपतस्थुर्हृषीकेशंविनिद्रावायुभोजनाः २३ ओंनमोभगवतेमहापुरुषायमहात्मने ॥ विशुद्धानुभवानंदसंदोहायययतोऽभयम् २४ तेषामाविरभूद्वाणीअरूपामेघनिःस्वना ॥ संनादयंतीककुभःसाधूनामभयंकरी २५ माभैष्टविबुधश्रेष्ठाःसर्वेषांभद्रमस्तुवः ॥ मदर्शनंहिभूतानांसर्वश्रेयोपपत्तये २६ ज्ञातमेतस्यदौरात्म्यंदैतेयापसदस्ययत् ॥ तस्यशांतिंकरिष्यामिकालस्तावत्प्रतीक्षताम् २७ यदावेदेषुदेवेषुगोषुविप्रेषुसाधुषु ॥ धर्मेमयिचविद्वेषःसवाआशुविनश्यति २८ निर्वैरायप्रशांतायस्वसुतायमहात्मने ॥ प्रह्लादाययदाद्रुह्येद्धनिष्येपिवरोर्जितम् २९ ॥ नारदउवाच ॥ इत्युक्तालोकगुरुणातंप्रणम्यदिवौकसः ॥ न्यवर्तंतगतोद्वेगामेनिरेचासुरंहतम् ३० तस्यदैत्यपतेःपुत्राश्चत्वारःपरमाद्भुताः ॥ प्रह्लादोभून्महांस्तेषांगुणैर्महदुपासकः ॥ ब्रह्मण्यःशीलसंपन्नःसत्यसंधोजितेंद्रियः ३१ आत्मवत्सर्वभूतानामेकःप्रियसुहृत्तमः ॥ दासवत्सन्नतार्यांघ्रिःपितृवद्दीनवत्सलः ३२

देवानामित्यन्यान्पूजयेत्कचित्

इत्युक्तेश्चयोगःसन्नहनइत्यभिधानादणिमादिनानोपायस्थानीभूतः १३ १४ १५ अकृष्टपच्याउल्लेखनमंतरेणसस्यादिपरिपाकोपेता १६ तत्पत्न्यःतेषांसमुद्राणांपत्न्योनद्यः क्षारंलवणम् १७ १८ यथोपजोषंयथासुखम् १९ २० २१ २२ २३ यतोयस्माद्धरेर्भयंभवतितस्माद्यति २४ अरूपाअशरीरिणी २५ मदर्शनंमद्विषयज्ञानम् २६ २७ यस्यवेदादिषुविद्वेषःसआशुसाधनसामग्र्याम् २८ २९ ३० ३१ आत्मवत्परमात्मवत् अन्येषांहरिसाम्यंतुकिंचित्साम्यमुदीरितं सम्यक्साम्यंतुमत्स्यादेरितिशास्त्रस्यनिश्चयइतिवचनादत्रहरिसाम्यकथनंतात्पर्यादवगंतव्यम् ३२

मानस्तंभविवर्जितः अभिमाननिमित्तस्तंभदोषरहितः ३३ गुणेषुशब्दादिषु शरीरस्यदांतत्वमुपवासादिना रहितासुरःअसुरस्वभावकर्मरहितःजात्यासुरः ३४ यथाभगवतीश्वरइत्यत्राप्यन्ये षांहरिसाम्यंतुकिंचित्साम्यमुदीरितमित्यादिप्रमाणमित्यत्रापिज्ञातव्यमिति ३५ प्रतिमानंदृष्टांतं ३६ ३७ कृष्णाख्योग्रहस्तेनवशीकृतमनाः ३८ अनुसंदधेसस्मार ३९ ४० तद्भावनायुक्तः तस्यश्रीनारायणस्यध्यानोपेतःतन्मयस्तत्प्रधानः ४१ स्पर्शेषुविषयेषुस्पृहारहितः अस्पंदप्राणःप्राणचेष्टारहितः आनंदसालिलेनसंतोषाश्रुजलेननिमित्तेनकिंचित्निमीलितनेत्रः ४२ अ किंचनानांमहतांसतांसेवालक्षणसंगेनमाप्तया ४३ अघंमरणलक्षणंव्यसनम् ४४ विद्वेषोदयितेपुत्रेकथमासीन्महात्मनि इतिस्वपृष्टंकथांतरासक्तयानारदेनापरिहृतंजानन्राजायुधिष्ठिरःपुनर

भ्रातृवत्सदृशेस्निग्धोगुरुष्वीश्वरभावनः ॥ विद्यार्थरूपजन्माद्यैर्मानस्तंभविवर्जितः ३३ नोद्विग्नचित्तोव्यसनेषुनिस्पृहःश्रुतेषुदृष्टेषुगुणेष्ववस्तुदृक् ॥ दांतेंद्रियप्राणशरीरधीःसदाप्रशांतकामोरहितासुरोसुरः ३४ यस्मिन्महागुणाराजन्गृह्यंतेकविभिर्मुहुः ॥ नतेधुनाभिधीयंतेयथाभगवतीश्वरे ३५ यंसाधुगाथासदसिरिपवोपिसुरानृप ॥ प्रतिमानंप्रकुर्वंतिकिमुतान्येभवादृशाः ३६ गुणैरलमसंख्येयैर्माहात्म्यंतस्यमूच्यते ॥ वासुदेवेभगवतियस्यनैसर्गिकीरतिः ३७ न्यस्तक्रीडनकोबालोजडवत्तन्मनाःसदा ॥ कृष्णग्रहगृहीतात्मानवेदजगदीदृशम् ३८ आसीनःपर्यटन्नश्नञ्छयानःप्रपिबन्ब्रुव न् ॥ नानुसंदधएतानिगोविंदपरिरंभितः ३९ क्वचिद्रोदितिगोविंदचिंताचंचलचेतनः ॥ क्वचिद्धसतितच्चिंताह्लादउद्गायतिक्वचित् ४० नदतिक्वचिदुत्कंठोविलज्जोनृत्यतिक्वचित् ॥ क्वचित्तद्भावनायुक्तस्तन्मयोनुचकारह ४१ क्वचिदुत्पुलकस्तूष्णीमशेषस्पर्शनिस्पृहः ॥ अस्पंदप्राणआनंदसलिला मीलितेक्षणः ४२ सउत्तमश्लोकपदारविंदयोर्निषेवयाकिंचनसंगलब्धया ॥ तन्वन्परांनिर्वृतिमात्मनोमुहुर्दुःसंगहीनःस्वमनःशमंव्यधात् ४३ तस्मि न्महाभागवतेमहाभागेमहात्मनि ॥ हिरण्यकशिपूराजन्नकरोदघमात्मजे ४४ युधिष्ठिरउवाच ॥ देवर्षएतदिच्छामोवेदितुंतवसुव्रत ॥ यदात्मजा यशुद्धायपिताधात्साधवेअघम् ४५ पुत्रान्विप्रतिकूलांश्चपितरःपुत्रवत्सलाः ॥ उपालभंतेशिक्षार्थंनैवाघमपरेयथा ॥ किमुतानुवशान्साधून्तादृशान् गुरुदेवतान् ४६ एतत्कौतूहलंब्रह्मन्नस्माकंविधमप्रभो ॥ पितुःपुत्रायद्वेषोमरणायप्रयोजितः ॥ ४७ ॥ ॥ इतिश्रीभागवतेसप्तमस्कंधेचतुर्थो ध्यायः ४ ॥ ॥ ७ ॥ ॥ नारदउवाच ॥ पौरोहित्यायभगवान्वृतःकाव्यःकिलासुरैः ॥ शंडामर्कौसुतौतस्यदैत्यराजगृहांतिके १ तौराज्ञाप्रापितंबा लंप्रह्लादंनयकोविदम् ॥ पाठयामासतुःपाठ्यानन्यांश्चासुरबालकान् २

पिजानन्नकरोदघमात्मजइतिप्रसक्तंश्रुत्वातदेवपृच्छतिदेवर्षइति पुत्रस्यमरणकारणमासुरकर्म नतुशास्त्रीयमितिज्ञापनायसाधवेअघमितिसंहिताकार्यनकृतम् ४५ अपरेशत्रवः ४६ विधम परिहर पुत्रायप्र योजितोविद्वेषः पितुर्मरणायाभूदितियत्तस्मात्कौतूहलमिति ॥ ४७ ॥ इति०भागवतेम०सप्तमस्कंधेवि०टी०चतुर्थोध्यायः ॥ ४ ॥ हिरण्यकशिपुप्रह्लादसंवादच्छलेनभक्तिस्वरूपंहरेर्नैरतिशयस्वातंत्र्यं चनिरूपयत्यस्मिन्नध्याये काव्यःशुक्रःशंडश्चमर्कश्चशंडामर्कौतस्यशुक्रस्यदैत्यराजगृहांतिकेन्यवसतामितिशेषः १ राज्ञाहिरण्यकशिपुना २

अपाठस्यविशेषणभूतेनहेत्यनेनसूचितंहेतुमाह नेति असाधुत्वेकिंकारणमत्राह स्वरूपेवि स्वातंत्र्यात्त्वइतिप्रोक्तइत्यतःस्वस्यस्वतंत्रस्यहरेरुपस्यासत्त्वंशून्यत्वंगृह्णातीतिनिराकारोहरिरितियःपक्षःसआश्रयोयस्यतत्तथा निराकारपक्षविषयत्वादित्यर्थः प्रपंचस्वरूपस्यासद्रूपःशून्यत्वप्रतिपादकःशून्यवादः सआश्रयोयस्यतत्तथा अद्वैतविषयत्वादित्यर्थइतिवा जीवपरस्वरूपयोरसत्पृथगभावं गृह्णातीति स्वरूपासद्रूपःजीवपरमात्मानावभिन्नाविति यःसिद्धांतःसआश्रयोयस्यतत्तथा अद्वैतविषयत्वादित्यर्थइतिवास्वरूपासद्रूपः औत्पत्तिकदुराग्रहोऽवैष्णवपक्षपातःसआश्रयोयस्यतत्तथा वैष्णवसिद्धांतविरुद्धत्वादित्यर्थइतिवा विन्यासभेदएवायंतात्पर्यतस्त्वेकएवेति ॥ ३ ॥ ४ ॥ हेअसुरवर्यअसद्रूपाद्विषयाभिनिवेशात्समुद्विग्नधियांपरवशीकृतबुद्धीनां देहिनांतत्साधुसंसारनिर्मूलसाधनंमन्यइत्यन्वयः किंतदितितत्राह हित्वेति आत्मपातंस्वस्यनिरयपातंअंधमज्ञानंयत्तत्स्यकूपंनिधानस्थानंगृहंहित्वावनंसज्जनसंगमलक्षणंगतः ५ सज्जनशिक्षार्थंप्रह्लादेनतत्त्वमुक्तंनतुतंग्राहयितुं तस्यासुरावेशेनदुराग्रहगृहीतत्वात्तत्फलमाह श्रुत्वेति परिहासःफलंपरबुद्धिभिःप्रतिपक्षबुद्धिभिः परपक्षसमीहिताःपूर्वपक्षविषयत्वेनप्रवृत्ताः ६ पुत्रस्नेहेनाभिमतोयंनहासःकिंत्वनभिमतएवेत्यभिप्रेत्याह सम्यगिति विधार्यतामवधार्यतांविष्णुपक्षःप्रतिच्छन्नोपेषांतेतथातैर्विष्णुसिद्धांतमभिगृह्य स्थितैरित्यर्थः ७ अवशवशीकरणायचत्वारउपायाविहितास्तत्राद्विजातीनांसामोपायएवश्रेयानितिदर्शयितुंपरकृतबुद्धिभेदंचज्ञातुंतत्रापियोग्यानांभगवत्तत्त्वविषयज्ञाननिश्चयायचदैत्यभयाच्चदैत्ययाजकाःप्रह्लादमपृच्छन्नित्याह गृहमिति सामभिर्वचनैः८ तुभ्यंतवयोबुद्धिविपर्ययएव बालान्वयस्यान्अतिक्रम्य कुतोभूदितिशेषः बालानांबुद्धि

यत्तत्रगुरुणाप्रोक्तंशुश्रुवेनपपाठह ॥ नसाधुमेनेमनसास्वरूपासद्ग्रहाश्रयम् ३ एकदासुरराट्पुत्रमंकमारोप्यपांडव ॥ पप्रच्छकथ्यतांवत्समन्यतेसाधुयद्भवान् ४ ॥ प्रह्लादउवाच ॥ तत्साधुमन्येऽसुरवर्यदेहिनांसदासमुद्विग्नधियामसद्ग्रहात् ॥ हित्वात्मपातंगृहमंधकूपंवनंगतोयद्धरिमाश्रयेत ५ ॥ नारदउवाच ॥ श्रुत्वापुत्रगिरोदैत्यःपरपक्षसमीहिताः ॥ जहासबुद्धिर्बालानांभिद्यतेपरबुद्धिभिः ६ सम्यग्विधार्यतांबालोगुरुगेहेद्विजातिभिः ॥ विष्णुपक्षप्रतिच्छन्नैर्नभिद्येतास्यधीर्यथा ७ गृहमानीतमाहूयप्रह्लादंदैत्ययाजकाः ॥ प्रशस्यश्लक्ष्णयावाचासमपृच्छंतसामभिः ८ वत्सप्रह्लादभद्रंतेसत्यंकथयमामृषा ॥ बालानतिकुतस्तुभ्यमेषबुद्धिविपर्ययः ९ बुद्धिभेदःपरकृतउताहोतेस्वतोऽभवेत् ॥ भण्यतांश्रोतुकामानांगुरूणांकुलनंदन १० ॥ प्रह्लादउवाच ॥ परःस्वश्चेत्यसद्ग्राहःपुंसांयन्मायययाकृतः ॥ विमोहितधियांदृष्टस्तस्मैभगवतेनमः ११ सयदानुगतःपुंसांपशुबुद्धिर्विभिद्यते ॥ अन्यएषतथान्योहमितिदेहगतासती १२

मतिक्रम्यैषबुद्धिभेदःकुतःकस्मात्तुभ्यंरोचितइतिवा ९ एतदेवविवृण्वंति बुद्धिभेदइति अस्माकंतत्त्वमेववक्तव्यंत्वयेत्यतोगुरूणामिति १० उत्तरंवक्ति परइति पुंसांयोयंपरस्वात्मेत्यसद्ग्राहः एकमेवाद्वितीयमितिश्रुतेः परमार्थवस्तुनएकत्वेप्रामाणिकेसिद्धेतत्रश्रीनारायणमंतरेणपरविषयकर्तृत्वंस्वविषयकर्तृत्वमितिभेदः स्वातंत्र्यकल्पनालक्षणमन्यथाज्ञानं एषयस्येश्वरस्येच्छयाकृतःकल्पितः सर्वकर्तृत्वात्तस्यतस्मैभगवतेमहामहिम्नेनमइत्यन्वयः तत्प्रत्यक्षमित्याह विमोहितधियामिति दृष्टःप्रत्यक्षस्तस्मात्तादृशीबुद्धिर्भवादृशैर्नकार्येतिशेषः विमोहितेत्यनेनापीश्वरकर्तृत्वंज्ञायते ११ यन्मायययेत्युक्तंस्पष्टंदर्शयति सयदेति सभगवान्यदापुंसांस्वात्मपरबुद्धिजनकत्वेनानुगतोऽनुकूलोभवति तदापशुबुद्धिरज्ञबुद्धिर्विभिद्यते तत्कथमित्यतउक्तं अन्यइति एषदेवदत्तोन्यःस्वतंत्रोऽहमन्यःस्वतंत्रइति किमस्याधिकरणमितितत्राह देहगतेति अतएवासती वृत्तिज्ञानत्वेनमोक्षानुपयोगित्वात् अन्योसावन्योहमस्मीतिनसवेद यथापशुरितिश्रुतिप्रतीकेनानेनश्लोकेनजीवपरयोर्भेदंनिषिध्यचिदैक्यंविधीयतइतीममर्थंविधायार्थांतरकल्पनायांकिंप्रमाणमितीयमाशंकास्वातंत्र्येणान्यसद्भावनिषेधाय श्रुतिस्त्वियं अन्योसावन्योहमितिपश्यन्नज्ञइतिस्मह आत्मानमंतर्यमयेदितिभेदंस्वरूपतः आहतद्ब्रह्मणोधीनाभिन्नाजीवाःसदैवतुस्वरूपसत्ताकर्तृत्वंभोगोमोक्षस्तथैवच मुक्तस्यावस्थितिश्चैवसर्वंविष्णोर्वशेसदेत्यनेनपरिहृतेतिज्ञातव्यं १२

ननुयदिजीवपरौमिथोभिन्नौतर्हिकिमिति घटपटभेदज्ञानवत्तद्विषयज्ञानंनोत्पद्यतइत्याशंक्यप्रतियोगिज्ञानस्यदुःसाध्यत्वादित्यभिप्रेत्याह सएषइतियःस्वस्वकर्मानुसारेणस्वस्वयोग्यज्ञानमुत्पादयति सएषआत्मापरमात्मास्वपरेत्यबुद्धिभिःयथार्थज्ञानविरोधिज्ञानवद्भिःपुरुषैर्दुरन्वयंदुर्ज्ञानमनुक्रमणंतत्तद्योग्यतानुसारेणप्रवर्तनंयस्यसतथादुर्ज्ञेयचेष्टइत्यर्थः निरुच्यतेनिश्चीयते ननुवेदाहमेतंपुरुषंमहांतमादित्यवर्णमितिश्रुतेः ब्रह्मादेस्तद्विषयज्ञानश्रवणात्कथंप्रतियोगिज्ञानस्यदुःसाध्यत्वमित्यतआह मुह्यंतीति ब्रह्मादीनांभगवद्विषयज्ञानंदुःसाध्यंकिंन्वितरेषामित्यतोवाह हि शब्दोप्यर्थेहेतौवा वेदवादेकोविदाः ब्रह्मादयोपियद्वर्त्मनियत्रस्वरूपविषयेमुह्यंतियस्मात्तस्मात्सएषदुरन्वयानुक्रमणइतिनिरुच्यते अनेनहरेरनुग्रहमंतरेणतद्विषयज्ञानंनोत्पद्यते तस्मिन्सतितत्स्यात् यमेवैषवृणुतेतेनलभ्यइतिश्रुतेरन्वयव्यतिरेकौदर्शितावित्युक्तंभवति ननु त्वदुक्तयैवत्वद्बुद्धिभेदजनकःकश्चित्स्यात्सकइतिविचार्यत इतितत्राह एषइति मुह्यंतीत्येतदत्राप्यनुकूल्यतेयद्वर्त्मनिमुह्यंत्येष हरिर्ममर्तिभिनात्तिविषयीकरोति सर्वस्यस्ववशत्वंस्वस्यानन्याधीनत्वंस्वप्रसादान्मोक्षादिसकलपुरुषार्थप्राप्तिरित्यादिबुद्धिंजनयतीतिभावः । तदुक्तं आहतब्रह्मणोधीनाभिन्नाजीवाःसदैवत्वित्यादि ॥

सएषआत्मास्वपरेत्यबुद्धिभिर्दुरन्वयानुक्रमणोनिरुच्यते ॥ मुह्यंतियद्वर्त्मनिवेदवादिनोब्रह्मादयोद्वेषभिनत्तिमेमतिम् १३ यथाभ्राम्यत्ययोब्रह्मन्स्वयमाकर्षसन्निधौ ॥ तथामेभिद्यतेचेतश्चक्रपाणौयदृच्छया ॥ १४ ॥ नारदउवाच ॥ एतावद्ब्राह्मणायोक्त्वाविराममहामतिः ॥ तंनिर्भर्त्स्यार्थकुपितःसुदीनोराजसेवकः १५ आनीयतामरेवेत्रमस्माकमयशस्कृतः ॥ कुलांगारस्यदुर्बुद्धेश्चतुर्थोऽस्योदितोदमः १६ दैतेयचंदनवनेजातोयंकंटकद्रुमः ॥ तन्मूलोन्मूलपरशोर्विष्णोर्नालायितोर्भकः १७ इतितंविविधोपायैर्भीषयंस्तर्जनादिभिः ॥ प्राह्लादंग्राहयामासत्रिवर्गस्योपपादनम् १८ ततएनंगुरुर्ज्ञात्वा ज्ञातज्ञेयचतुष्टयम् ॥ दैत्येंद्रंदर्शयामासमातृमृष्टमलंकृतम् १९ पादयोःपतितंबालंप्रतिनंद्याशिषासुरः ॥ परिष्वज्यचिरंदोर्भ्यांपरमामापनिर्वृतिम् २० आरोप्यांकमवघ्रायमूर्ध्न्यश्रुकलांबुभिः ॥ आसिंचन्विकसद्वक्त्रमिदमाहयुधिष्ठिर २१ प्रह्लादानूच्यतांतातस्वधीतंकिंचिदुत्तमम् ॥ कालेनैतावतायुष्मन्यदशिक्षद्गुरोर्भवान् २२

१३ एतदर्थंसदृष्टांतमाह यथेति यथाकर्षस्यायस्कांतस्यसन्निधौसत्ययःस्वयंभ्राम्यति स्वात्मानमुद्दिश्यगमनशक्तिंकरोति तदितिशेषः तथा मेचेतोयदृच्छयातदिच्छयाचक्रपाणौभिद्यतेतद्विषयीकरणशक्तिक्रियते अयोगमनशक्तिवच्चेतनस्यापिनैसर्गिकीतिभावः एतेनसर्वेहर्यधीनमित्युक्तंभवतिएतेनहवावपयोमंडभवति एतस्यवाक्षरस्यप्रशासनेगार्गिप्राच्योन्योनद्यःस्यंदंतेयआत्मानमंतर्यमयोदीतिभेदस्वरूपआहेत्यादिश्रुतिस्मृतिभ्यांविशेषेणचराचरस्यसर्वस्यश्रीहर्यधीनप्रवृत्त्यवगमात्पश्यन्नज्ञइत्यनेनपशुबुद्धिरबुद्धिभिरित्येतत्पदद्वयाभिप्रायोदर्शितः १४ सुदीनःवाचाशिक्षायांक्षीणोऽशक्तइत्यर्थःराजसेवकइत्यनेनभेदज्ञानासामर्थ्यंचसूचितं उभयोरपिचित्तसाध्यत्वात् १५ अयशस्कृतोदुष्कीर्तिकरस्यास्यचतुर्थोदमोदंडसंज्ञइति उदितइत्यर्थः १६ उन्मूलयतीत्युन्मूलःसचासौपरशुश्चोन्मूलपरशुस्तत्स्वदैतेयचंदनवनस्यमूलंतन्मूलोन्मूलपरशुस्तस्यनालायितःमंडपवत्तन्वानः १७ त्रिवर्गस्योपपादनंशास्त्रम् १८ ज्ञातंज्ञेयानांधर्मादिपुरुषार्थानांचतुष्टयंयेनसतथातं ज्ञातंज्ञेयसाधनचतुष्टयंवा मातृमृष्टंशरीरमलत्यागेनस्नानंकारितम् १९ २० २१ सुष्ठुअधीतंपठितम् २२

नियंतृत्वेनात्मानमयिस्थितोभगवानितिनितरांवेदनंज्ञानमात्मनिवेदनं मुक्तस्यापिमर्मांतस्थोनियंतैवहरिःसदा इतिज्ञानंसमुद्दिष्टंसम्यगात्मनिवेदनमितिएतदात्मसमर्पणंनार्थःकिंतूक्तएवार्थः इत्युक्तप्रकारेणश्रवणादिभिर्नवभिर्लक्ष्यते असंभवव्यभिचारपरिहारेणज्ञायतइति २३ नवलक्षणाविष्णौभक्तिर्यस्मिन्शास्त्रेर्पितामतिपादितापुंसासाभगवत्युत्तमश्लोकेअद्धानिर्व्याजेनाक्रियतेचेद्यदिताहं तदधीतंशास्त्रमुत्तमंमन्यनोन्यदित्यन्वयः नवश्रवणादीनिलक्षणानिंचिह्नानियस्यांसातथा २४ २५ तेत्वया २६ साधुत्वेनवृतस्यगुरोर्दुर्मतेइतिसंबोध्यानिंदनंकथंघटतइतितत्राह संतीति गुरोरप्यवलिप्तस्यकार्याकार्यमजानतः उत्पथंप्रतिपन्नस्यकार्यमवतिशासनमितिवाक्यंहिशब्देनस्मारयति पातकिनांपापफलत्वेनरोगउदेतियथा तथातेषामघमपराधलक्षणंव्यसनंप्रकाशतइत्यन्वयः २७ लोकेसंत्वसाधवःनाहंतादृशःयतस्त्वत्पुत्रोनमयाचरितंनापिपरेणपठत्यतइत्याह नमदिति तर्हिकस्मादियंमतिरभूदितितत्राह नैसर्गिकीति तदातास्मिन्पक्षेममात्मनःस्वरूपाभिमानोमयाग्राहितेयंमतिरितिकस्तस्मात्कोपंसंहरेति २८ पुत्रापकुध्यन्नाह गुरुणेति गुरुमुखीगुरुमुखादुत्पन्नेयंमतिः २९ सत्येवमन्मतिः त्वन्मतिरेवासतीतिपितरंकटाक्षीकृत्यपरिहरति मतिरिति परतोगुर्वादिबोधनप्रयत्नेनस्वतःस्वप्रयत्नेन तत्रानिमित्तमाह गृहेति वनादिनिवासमंतरेणगृहएवावस्थानलक्षणंव्रतंयेषांतेतथातेषां ननु कुटुंबीशुचौदेशेस्वाध्यायमधीयानइतिश्रुवेर्गृहस्थानामपिश्रेयःप्राप्त्युपपत्तेरितितत्राहअदां

प्रह्लादउवाच ॥ श्रवणंकीर्तनंविष्णोःस्मरणंपादसेवनम् ॥ अर्चनंवंदनंदास्यंसख्यमात्मनिवेदनम् २३ इतिपुंसार्पिताविष्णौभक्तिश्चेन्नवलक्षणा ॥ क्रियेतभगवत्यद्धातन्मन्येऽधीतमुत्तमम् २४ ॥ नारदउवाच ॥ निशम्यैतत्सुतवचोहिरण्यकशिपुस्तदा ॥ गुरुपुत्रमुवाचेदंरुषाप्रस्फुरिताधरः२५ ॥ हिरण्यकशिपुरुवाच ॥ ब्रह्मबंधोकिमेतत्तेविपक्षंश्रयतासता ॥ असारंग्राहितोबालोमामनादृत्यदुर्मते २६ संतित्यसाधवोलोकेदुर्भित्राश्छद्मवेषिणः ॥ तेषामुदेत्यघंकालेरोगःपातकिनामिव २७ ॥ गुरुपुत्रउवाच ॥ नमत्प्रणीतंनपरप्रणीतंसुतोवदत्येषतवेंद्रशत्रो ॥ नैसर्गिकीयंमतिरस्यराजन्नियच्छमन्युंक्रुतदात्ममानः २८ ॥ नारदउवाच ॥ गुरुणैवंप्रतिप्रोक्तोभूयआहासुरःसुतम् ॥ नचेद्गुरुमुखीयंतेकुतोभद्रासतीमतिः २९ प्रह्लादउवाच ॥ मतिर्नकृष्णेपरतःस्वतोपिवामिथोविपद्येतगृहव्रतानाम् ॥ अदांतगोभिर्विशतांतमिस्रंपुनःपुनश्चर्वितचर्वणानाम् ३० नतेविदुःस्वार्थगतिंहिविष्णुंदुराशयायेबहिरर्थभावाः ॥ अंधायथांधैरुपनीयमानावाचीशतंत्यामुरुदाम्निबद्धाः ३१

तेति अदांतानामिंद्रियनिग्रहरहितानांपुरुषाणांगोभिर्वाग्भिस्ताभिस्तंनरकसुखकल्पंविषयसुखंविशतांभुंजानानां तत्रापिनूतना पूर्वभोगोनास्तीत्यभिप्रेत्याह पुनरिति पुनःपुनर्भुक्तविषयानेवभुंजानानाभित्यर्थःअदांतगोभिराशिक्षिताभिर्वाग्भिर्वेदगताभिस्तमिस्रमतत्त्वार्थविषयमज्ञानं अन्यथाज्ञानंचविशतांगाहमानानांनतत्रापियत्नोस्तीत्याह पुनरितिवा ३० एतदेवस्पष्टमाह नतइतिदुष्टेषुप्रतीतिसुंदरेषुपरिणामविषयेष्वाशयोयेषांतेतथातत्रहेतुमाह बहिरिति बहिरर्थेषुमुखतःप्रतीयमानार्थेष्वेवभावस्तात्पर्यार्थेनिश्चयोयेषांतेतथा श्रुतितात्पर्यार्थानभिज्ञाइत्यर्थः एतेस्वार्थगतिंपुरुषार्थस्वरूपंस्वभक्तप्रयोजनसाधकंवाकृष्णंनविदुरित्यन्वयः अत्रकारणमाहवाचीति ईशतंत्यामीशस्यवेदवाग्लक्षणतंत्यांब्राह्मणादिबहुनामाख्यलक्षणनामदाम्निबद्धाः अत्रोदाहरणमाह अंधाइति अंधैरज्ञैःरुपनीयमानाःउपदिश्यमानकर्ममार्गाअंधाअज्ञाउपदिष्टान्यमार्गंयथानविदुस्तथेति अनेनांधैर्नवनीयमानायथांधाइतिस्मृतिंस्मारयंति ३१

नन्वेवंतर्हिगृहव्रतानांमुक्तयुपायःकइत्याह नैषामिति यावदेषांगृहव्रतानांमतिर्महीयसांनिष्किंचनानांसंन्यासिनांपादरजोभिषेकंनवृणीत तावंतंकालमुरुक्रमस्यांघ्रिंनस्पृशतिनविषयीकरोति उरुक्रम स्यांघ्रिस्पर्शस्यकिंफलमत्राह अनर्थेति यस्यहरेरंघ्रिस्पर्शोत्थफलमनर्थापगमःसंसारनिवृतिः अथवानर्थापगमोयस्मात्पादरजोभिषेकादुत्थितः प्रकाशितोभवतितम् ३२ कषायीकृतलोचनःरक्तने त्रः ३३ ३४ पितृव्यस्यहिरण्याक्षस्यहंतुः असावसमंजसःप्रल्हादः विष्णोःकिंवासाधुकरिष्यति ३५ कथमसमंजसोभूत्तत्राह सौहृदमिति ३६ परःशत्रुरप्यवश्यंद्वेषणापिहितकृच्चेत्सएवसु तःयथाऔषधंतिक्तत्वेनहरीतकीमनुष्याणांमातेवाहितकारिणीतिवचनात् स्वदेहजोपिसुतोपि अहितोऽपकारीचेत्तंछिंद्यादामयवत् किंचात्मनःस्वस्ययदहितमंगंसर्पदष्टंतच्छिंद्यात्तदेवविशिनष्टि यद्विवर्ज नादिति शेषमंगंसुखंजीवतीत्यन्वयः ३७ संभोगोभोजनम् ३८ ३९ भैरवंनादमुद्दिश्य ४० अनिर्देश्यत्वादिगुणशालिनिहरौयुक्तात्मनिप्रयोजितमनस्केप्रह्लादे अपुण्यस्येवपापिनइवतत्क्रियाः तेषांनै

नैषांमतिस्तावदुरुक्रमांघ्रिंस्पृशत्यनर्थापगमोयदर्थः ॥ महीयसांपादरजोभिषेकंनिष्किंचनानांनवृणीतयावत् ३२ नारदउवाच ॥ इत्युक्त्वोपरतंपुत्रंहि रण्यकशिपूरुषा ॥ अंधीकृतात्मास्वोत्संगान्निरस्यतमहीतले ॥ आहामर्षरुषाविष्टःकषायीकृतलोचनः ३३ ॥ हिरण्यकशिपुरुवाच ॥ वध्यतामाश्वयं वध्योनिःसारयतनैर्ऋताः ॥ अयंमेभ्रातृहाशोच्योहित्वास्वान्सुहृदोऽधमः ३४ पितृव्यहंतुःपादौयोविष्णोर्दासवदर्चति ॥ विष्णोर्वासाध्वसौकिंनुकरि ष्यत्यसमंजसः ३५ सौहृदंदुस्त्यजंपित्रोरत्यजत्पंचहायनः ३६ परोप्यवश्यंहितकृद्यथौषधंस्वदेहजोप्यामयवत्सुतोऽहितः ॥ छिंद्यात्तदंगंयदुतात्म नोहितंशेषंसुखंजीवतियद्विसर्जनात् ३७ सर्वैरुपायैर्हंतव्यःसंभोगशयनाशनैः ॥ सुहृल्लिंगधरःशत्रुर्मुनेर्दुष्टमिवेंद्रियम् ३८ नैर्ऋतास्तेसमुद्दिष्टाभ र्त्रीवैशूलपाणयः ॥ तिग्मदंष्ट्राःकरालास्यास्ताम्रश्मश्रुशिरोरुहाः ३९ नदंतोभैरवंनादंछिंधिभिंधीतिवादिनः ॥ आसीनंचाहनञ्छूलैःप्रह्लादंसर्वमर्मसु ४० परेब्रह्मण्यनिर्देश्येभगवत्यखिलात्मनि ॥ युक्तात्मन्यफलाआसन्नपुण्यस्येवतत्क्रियाः ४१ प्रयासेऽपहतेतस्मिन्दैत्येंद्रःपरिशंकितः ॥ चकारत द्वधोपायान्निर्बंधेनयुधिष्ठिर ४२ दिग्गजैर्दंदशूकेंद्रैरभिचारावपातनैः ॥ मायाभिःसन्निरोधैश्चगरदान्नैरभोजनैः ४३ हिमवाय्वग्निसलिलैःपर्वताक्रमणैरपि नशशाकयदाहंतुमपापमसुरःसुतम् ४४ चिंतांदीर्घतमांप्राप्तस्तत्कर्तुंनाभ्यपद्यत ॥ एषमेबह्वसाधूक्तोवधोपायाश्चनिर्मिताः ४५ तैस्तैर्द्रोहैरसद्धर्मैर्मुक्तःस्वैनैवतेजसा ॥ वर्तमानोऽविदूरेवैबालोप्यजडधीरयम् ॥ नाविस्मरतिमेऽनार्यंशुनःशेपइवप्रभुः ४६ अप्रमेयानुभावोयमकुतश्चिद्भयोमरः ॥ नू नमेतद्विरोधेनमृत्युर्मेभवितानवा ४७ इतिचिंतयाकिंचिन्म्लानश्रियमधोमुखम् ॥ शंडामर्कावौशनसौविविक्तइतिहोचतुः ४८ जितंत्वयैकेनजग त्त्रयंभ्रुवोर्विजृंभणत्रस्तसमस्तधिष्ण्यपम् ॥ नतस्यचिंत्यंतवनाथचक्ष्महेनवैशिशूनांगुणदोषयोःपदम् ४९ ऋतानांताडनादिक्रियाः ४१ ४२ वधोपायमाह

दिग्गजैरित्यादिना अवपातनंगिरिशृंगादधःपातनं सन्निरोधैरनिर्गमगर्तगृहेनिक्षिप्यपीडनैः पर्वताक्रमणैःपर्वतारोहणैः उपरिपर्वतपातनैर्वा ४३ ४४ तत्कर्तुंहननंकर्तुं ४५ असद्धर्मैरसतांयोग्यैः अविदूरेसमीपेविदूरेवावर्तमानोऽजडधीःपटुतरबुद्धिःअनार्यंमूर्खकर्म अन्याय्यमितिपाठेनयशास्त्रविरुद्धंमह्यमरंशतंदत्ताहमेनंविशासिष्यामीत्याद्यजीगर्तकृतंकर्मशुनःशेपेनयथासोद्धंतथेति ४६ ४७ इतिवक्ष्यमाणप्रकारहेत्युच्यमानेथेतात्पर्यातिशयंवाक्ति ४८ धिष्ण्यपाश्चंद्रादित्यादयः लोकपालावा चक्ष्महे पश्यामःशिशूनांप्रेक्षायांशयनशीलानांबुद्धिविकाशरहितानांवा तत्करणंगुणदोषयोःपदमा स्पदंनवैहिगुणदोषग्रहणबुद्धिविकासाभावादित्यर्थः शिशूनांगुणदोषयोःपदंनास्तीतिवा ४९

तर्हिकापरबुद्धिरित्यत्रोच्यते इममिति तुनाधुनेयमेवबुद्धिरितिविशिनष्टि किंपंतंकालमेवमितितत्राह यावदितितावदितिशेषः ततश्चकिंतत्राह बुद्धिश्चेति पापजननीचवयसाकालविशेषंविशिष्टेनापुर्ल
क्षणेनार्याणांसेवयास्यादितिशेषः ५० ५१ ५२ यथाद्वंद्वारामोपवर्णितां रागद्वेषादिव्यापृतबुद्धिभिर्व्याख्यातां ५३ यदाचार्योध्यापनात्परावृत्तउपरतः गृहमेधीयकर्मस्वग्निहोत्रादिलक्षणेषुव्यापृतो
वा तत्रतदाकृतक्षणैःकृतावसरैःवयस्यैर्बालकैःसउपहूतःक्रीडार्थमितिशेषः सोक्षिन्नुभद्राक्षुमताःसोचिन्नुसर्वा सैषदाशरथीरामइत्यादिपुद्रष्टव्योपंप्रयोगः ५४ अथागतःसन् तस्यांक्रियायांनिष्ठामिच्छां
विद्वांस्त्वेषांवयस्यानांनिष्ठांस्वस्मिन्स्नेहविशेषंवा ५५ द्वंद्वारामैरित्तैर्वचनैरीहितैःप्रवृत्तिभिश्चनदूषितधियः ५६ सएषोसुःसएवप्राणइतिश्रुतेः मुख्यप्राणेरमतइत्यसुरः ५७ ॥ इतिश्रीभागवतेमहापुरा
णेविजयध्वजकृ०टीकायांपंचमोध्यायः ॥ ५ ॥ मुकुंदचरणारविंदनिरंतरसेवैवेहामुत्रानश्वरानंदनिदानंनान्यदतःसैवबुभूषुभिरनुदिनंकर्तव्येतिविधीयतेस्मिन्नध्याये तत्रप्रह्लादोबालकान्किमाहेत्याशं
क्याहहंतेतिबालानुकंपायांवाक्यारंभेवा तद्वचःश्रवणात्किंफलंस्यादितितत्राह वइति वःसर्वतःसर्वस्मात् शिवंसुखंस्यादितिशेषः कीदृशंवचइत्यतोवाह वइति शिवंशुभंमंगलं ननुकस्मान्मंगलमितितत्राह
वयस्यानिति संसारविरक्तिजनकत्वेनपुरुषार्थहेतुत्वान्मंगलमित्यर्थः अनेनाधुनास्माकंबाल्यमुत्तरत्रश्रेयःसंपादनायप्रयतामहइत्याशानिरस्तेतिज्ञायते यतोस्मदायुःकृतांतविलुलितंतस्मात्क्रीडासक्त

इमंतुपाशैर्वरुणस्यबद्धानिधेहिभीतोनपलायतेयथा ॥ बुद्धिश्चपुंसोवयसार्यसेवयायावद्गुरुर्भार्गवआगमिष्यति ५० तथेतिगुरुपुत्रोक्तमनुज्ञायेदमब्रवीत् ॥
धर्माह्यस्योपदेष्टव्याराज्ञांयेगृहमेधिनाम् ५१ धर्ममर्थंचकामंचनितरांचानुपूर्वशः ॥ प्रह्लादायोचतूराजन्प्रश्रितावनतायच ५२ यथात्रिवर्गंगुरुभिरात्मने
उपशिक्षितम् ॥नसाधुमेनेतच्छिक्षांद्वंद्वारामोपवर्णिताम्५३यदाचार्यःपरावृत्तोगृहमेधीयकर्मसु ॥ वयस्यैर्बालकैस्तत्रसोपहूतःकृतक्षणैः५४अथतान्श्लक्ष्ण
यावाचाप्रत्याहूयमहाबुधः ॥ उवाचविद्वांस्तन्निष्ठांकृपयाप्रहसन्निव ५५ तेतुतद्गौरवाःसर्वेत्यक्तक्रीडापरिच्छदाः ॥ बालानदूषितधियोद्वंद्वारामेरितेहितैः
५६ पर्युपासतराजेंद्रतन्न्यस्तहृदयेक्षणाः ॥ तानाहकरुणोमैत्रोमहाभागवतोसुरः ५७ ॥ इतिश्रीभागवतेसप्तमस्कंधेपंचमोध्यायः ॥ ५ ॥ ॥ प्रह्लादउ
वाच ॥ हंतार्भकामेशृणुतवचोवःसर्वतःशिवम् ॥ वयस्यान्पश्यतमृतान्क्रीडांधामाप्रमाद्यथ १ नपुराविवशंबालाआत्मनोर्थेप्रियैषिणः ॥ गुरुक्तम
पिनग्राह्यंयदनर्थैर्थकल्पनम् २ यदुक्तयानप्रबुध्येतसुप्तस्त्वज्ञाननिद्रया ॥ नश्रद्दध्यान्मतंतस्ययथांधोह्यंधनायकः ३

त्वेनयुष्मद्धितविमर्शप्रमादोनकार्यइत्याह क्रीडांधाइति १ ननुबालानांक्रीडांधत्वंस्वभावइतितत्राहनेति इतःपुरातनाबालाअंतःकरणंक्रीडायांविवशंनकुर्वंतीतिशेषः तर्हिकिंकारंवर्तंतइतितत्राह आत्मनइ
तिअर्थेजन्मप्रभृतिआत्मनोर्थे आत्मनःप्रियैषिणःपरमात्मनःज्ञानेच्छवःमोक्षलक्षणप्रियेच्छवोवा आत्मनःप्रियैषिणःस्वप्रबोधनमाकांक्षमाणाआबाल्यात्प्रवर्तंतइतिवा नन्वस्माभिरपिशंडामर्कभ्यांगुरुभ्या
मुपदिष्टत्रिवर्गविषयशास्त्रश्रवणश्रेयसिप्रवर्त्यते तत्रगुर्ववसरप्रतीक्षणायेयंक्रीडेतितत्राह गुरूक्तमिति कुतोनग्राह्यमितितत्राह यदनर्थइति संसारहेतुत्वादनर्थेत्रिवर्गलक्षणेश्रेयस्यर्थकल्पनंयत्तस्मादितिशे
षः त्रैविद्यामांसोमपाःपूतपापायज्ञैरिष्ट्वास्वर्गातिंप्रार्थयंतइत्यादेः इष्टापूर्तंमन्यमानावरिष्ठंनान्यच्छ्रेयोवेदयंतेप्रमूढाइत्यादेश्च २ ननुगुरूक्तेर्यथार्थत्वेनज्ञानहेतुत्वोपपत्तेःकथंतदनर्थैर्थकल्पनमितितत्राह यदु
क्तयेति अज्ञानलक्षणनिद्रयासुप्तस्त्रिवर्गविषयलक्षणमाग्रहलक्षणेयथार्थज्ञानविरोधित्वादज्ञाननामनतुज्ञानमात्राभावःसुप्तस्यापिगुरूक्तयाप्रबोधोहिप्रयोजनंसनोत्पद्यतेचेत्तदुपदेशेनकिंप्रयोजनंप्रत्युततदनु
ष्ठानेनानर्थएवस्यादितिभावः अतःफलितमाह नेति अत्रोदाहरणमाह यथेति अंधोनायकोनेतायस्यसतथा हिशब्देनोभयोरप्यंधत्वान्मार्गज्ञानंनोत्पद्यतेयथातथात्रापित्यस्माच्छ्रद्धानकार्या ॥ ३ ॥

ननुसमूलघातमघ्नंतःपरान्नोद्यंतिभूभृतः निक्षिप्योदर्चिषंकक्षेशेरतेतेभिमारुतं आपत्सुमित्रंजानीयात्पुत्रमुत्तरजन्मनि यउदास्तेस्वकार्येषुसनेंद्योयत्नतोनरइत्यादिनीतिशास्त्रं शत्रुमित्रोदासलक्षणज्ञा
पकंहितकारित्वादित्याभ्यांनोबोध्येततन्मतंकथंनश्रद्दध्यादित्युच्यतइतितत्राह कइतियःशत्रुःसआत्मनोममपक्षेकः नकोपीत्यादियोज्यं त्वत्पक्षेशत्रुत्वाद्यभावेप्यस्मत्पक्षेरयुरितितत्राह भवत्स्विति भवत्पक्षे
पिकेश्त्रादयःस्युर्नकेप्यतोनयैर्नीतिशास्त्रश्रवणजनितैर्नीतिभिःकिंफलंस्यान्नकिमपीत्यर्थः नीतिभिरापत्परिहारःसंपत्प्राप्तिश्चस्यातामितितत्राह दैवमिति सर्वोत्कृष्टत्वात्श्रीनारायणएवसंपद्विपदाश्रयोन
नीतिमांस्तस्यान्वयव्यतिरेकाभावात् अस्मत्पित्रादौदर्शनात् आत्मनोदेहस्ययःशत्रुादिस्तस्यभवत्सुस्थितैर्नयैःकिंस्यादपरिहार्यत्वान्मरणादिकंप्राप्यतएव कामादिकमज्ञानसंभवंज्ञानमंतरेणननयमात्रेण
परिहियतइति शेषंपूर्ववत् ४ ननुतर्हिमाभूच्छास्त्र्यंनीतिशास्त्रं प्रवृत्तिलक्षणधर्मशास्त्रमभ्यसनीयंश्रेयोहेतुत्वादत्राह यइति यआत्मानंपरमात्मानमुद्दिश्यधर्मकामंधर्मेच्छांनाहिंस्याच्चाहिनास्तिनत्यजति किं
चानुतिष्ठतिसोतिदुर्लभःप्रशांतात्माकोटिष्वपिमहान्मतःस्वोक्तेअवशीकृतेंद्रियग्रामस्यभगवद्विषयनिवृत्तलक्षणधर्मेच्छाकथंस्यादितितत्राह स्वजनइति स्वेनसहजन्यतइति स्वजनइंद्रियग्रामस्तास्मिन्वि
षयेवशोनभवति वशीकृतेंद्रियग्रामइत्यर्थः यद्वा पुत्रमित्रादिलक्षणेस्वजनेवशोनस्वानुष्ठानानुकूलपुत्रादिकइत्यर्थःअतएवमुक्तांध्यःउज्झितांधस्वभावःनन्वैहिकामुष्मिकफलाकांक्षायांनिवृत्तिधर्ममनुतिष्ठतः
कथंतत्फलावाप्तिःस्यादत्राह पुनरिति पुनश्चार्थेनिवृत्तिधर्ममनुतिष्ठञ्छ्रीलोकयोरिहलोकपरलोकयोर्हेतुश्चभवति पुनर्निवृत्तिधर्मानुष्ठानानंतरंवा प्रवृत्तिनिवृत्तिधर्मयोरनुष्ठात्रोःपुनर्भेदोस्तिपूर्वस्यततः पा
तोस्ति इमंलोकंहीनतरंवाविशंति क्षीणेपुण्येमर्त्यलोकंविशंतीत्यादेः अन्यस्यज्ञानसामग्रींसंपाद्यततःपुनरंतेवैकुंठलोकप्राप्तिश्चस्यात् सएवास्माज्जीवघनात्परात्परंपुरिशयंपुरुषमीक्षतेयंयंलोकंमनसासं

कःशत्रुःकउदासीनःकिंमित्रंचेहआत्मनः ॥ भवत्स्वपिनयैःकिंस्याद्दैवंसंपद्विपत्पदम् ४ योनहिंस्याद्धर्मकाममात्मानंस्वजनेवशः ॥ पुनःश्रीलोकयोर्हेतुः
समुक्तांध्योतिदुर्लभः ५ कौमारआचरेत्प्राज्ञोधर्मान्भागवतानिह ॥ दुर्लभंमानुषंजन्मतदप्यध्रुवमर्थदम् ६ यदाहिपुरुषस्येहविष्णोःपादोपसर्पणम् ॥
यदेषसर्वभूतानांप्रियआत्मेश्वरःसुहृत् ॥ ७ ॥ ॥ विभातिविशुद्धसत्त्वःकामयतेयांश्चकामान्तंतंलोकंजयतेतांश्चकामांस्तस्मादात्मज्ञंह्यर्चयेद्भूतिकामइत्यादेः पुनरग्रथमेभे
दइत्यमरः यद्वात्मानंधर्मयुक्तःकामोयस्यसतथातंवानरंनहिंस्यान्नपीडयति स्वात्मानंप्रवृत्तिधर्मकांक्ष्येणपीडितंनकरोतिसोतिदुर्लभःधर्मधारकेहरौकामोयस्यसतथा निवृत्तिधर्मनिरतइत्यर्थःतंनाधःपात
यतीतिवा सज्जनसेवानिरतत्वेनतद्वशश्चश्रियऐहिक्याःसंपदःस्वतःसंपन्नायालोकस्यज्ञानस्यापरोक्षलक्षणस्यचपात्रंवा अत्रप्रवृत्तिनिवृत्तिलक्षणौधर्मावनुष्ठायतत्फलानिच्छत्त्वेनभगवद्भक्तिमनिशंकुर्वाणः
पुरुषउत्तमइतितात्पर्यं ५ नन्वस्तुनिवृत्तिधर्मानुष्ठानस्यश्रेयःसाधनत्वं तस्यनेदानीमवसरःवार्धकेकर्तव्याविनाभूतत्वात् बाल्येविद्यांनिषेवेतयौवनेदारसंग्रहं स्थाविर्येमोक्षमातिष्ठेत्सर्वदाधर्ममाचरेदिति
स्मृतेरितितत्राह कौमारइति सर्वदेतिविशेषणाद्विद्याभ्यासकालेपिमोक्षधर्मानुष्ठानंकर्तव्यमितिनतस्यस्मृतिविरोधः नानायोनिषुकायोनिःश्रेयःसाधनमितितत्राह दुर्लभमिति यन्मानुषंजन्मतदपितदेवा
र्थदंज्ञानादिप्रयोजनप्रदं अतएवबहुपुण्यसाधनत्वाद्दुर्लभं तर्हिचिरकालस्यापिकिंनेत्याह अध्रुवमिति सस्यमिवमर्त्यःपच्यतेसस्यमिवजायते पुनःअपिसर्वंजीवितमल्पत्वमेवेत्यादिश्रुतेःअध्रुवमपिमानुषंय
ज्जन्मसुदुर्लभंतत्राप्यर्थदंदुर्लभतरं एतद्धिदुर्लभतरंलोकेजन्मयदीदृशमितिश्रुतेः ६ ननुकथंकारंपुरुषार्थप्रदंतत् अन्यथातद्वतांसर्वेषामपिपुरुषार्थःस्यान्नचासौसंभवति अदर्शनादश्रवणाच्चेत्याशंक्यचिकि
त्सामाह यदाहीति इहमानुषे यदायदिवभूषोःपुरुषस्यविष्णोःपादोपसर्पणंसंभवति तर्ह्यर्थदं यावत्सेवापरेतत्त्वेतावत्सुखविशेषतेति एतद्धिशब्देनसूचयति अतोमानुषीयोनिरेवनिःश्रेयसःकारणंनान्या
असंगत्वाद्भेदानर्हत्वेनान्यासां अतःकौमारवयआरभ्यभगवत्सेवाकर्तव्येतिभावः ननुश्रीहरिसेवामंतरेणान्यसेवाअर्थदाकिंनस्यादितितत्राह यदेषइति सर्वभूतप्रियत्वादिगुणयुक्तएषइति यत्त
स्मादेतत्सेवैवपुरुषार्थदा नान्यसेवा तदेतत्प्रेयइतिश्रुतेः एषसर्वेश्वरइतिच ७

इतोपिभगवत्सेवालक्षणनिवृत्तिधर्मानुष्ठानमेवकर्तव्यं नप्रवृत्तिधर्मसेवनं विषयसुखसौलभ्यायतदनुष्ठानमितिनोच्यते तदंतरेणापितल्लभ्यते यथादुःखमित्याह सुखमिति सर्वत्रनरकादावपिसुखस्यानंतरंदुःखंदुःखस्यानंतरंसुखमितिस्मृतेः दैवात्प्रारब्धकर्मप्रेरकात् ८ अतश्चकिमितितत्राह तदिति तस्मात्तत्प्रयासंऐंद्रियसुखप्राप्तयेप्रवृत्तिधर्मकरणेबहुक्लेशोनविधेयः कुतोनविधेयइतितत्राह आयासेति परंकेवलमायासेनायुषोव्ययःक्षयएवावशिष्यतइतिशेषः प्रवृत्तिधर्मानुष्ठानस्यदुःखासंभिन्नप्रदेशोदेशत्वात्तत्कथंदुःखकल्पत्वेननिंद्यतइतितत्राह नतथेति मुकुंदचरणांबुजंभजन्यथाक्षेमंविंदतेप्रवृत्तिधर्मानुष्ठायी नतथानश्वरंसुखंलभतइत्यन्वयः पुत्राह्येतेअहढायज्ञरूपाइतिश्रुतेः ९ तस्मादिदमेवकर्तव्यमितितत्राह ततइति चशब्दोपद्यदभीष्टंतत्प्राप्तयइत्याह ॥ इतोपिबाल्यएवमुक्तयेप्रयतेतेत्याह शरीरमिति पौरुषंपुरुषस्यावद्यमानंपुष्कलंपुष्टमंधपंगुत्वाद्यवयववैकल्यविधुरमित्यर्थः विपद्येत मरणलक्षणविपत्तिंप्राप्नोति ततःप्रागेवयतेतेतिशेषः १० शतायुर्वैपुरुषइतिवचनात् शतायुःशरीरस्थितेर्नैश्चित्यात्तदंतरालकालेऽनेकश्रेयःसमर्जनोपपत्तेःबाल्यएवनिवृत्तिलक्षणश्रेयसेयतनीयमितिनियमोनापेक्षितइत्याशंक्यगर्भवासमारभ्यशतायुःपर्यंतंस्वतःपरतोवाशरीरस्थनाशदर्शनान्नतत्स्थितिनिश्चयःशाश्वतः अस्तुवाकस्यचित्तथापिनश्रेयोपत्नोदरीदृश्यते अन्यव्यापारायासग्रस्तत्वेनदिनमेलनलक्षितवत्सराणांक्षयाद्येवं नलक्षवर्षायुषेणापिमुकुंदचरणारविंदसेवालक्षण

सुखमैंद्रियकंदैत्यादेहयोगेनदेहिनाम् ॥ सर्वत्रलभ्यतेदैवाद्यथादुःखमयत्नतः ८ तत्प्रयासोनकर्तव्योआयासायुर्व्ययःपरम् ॥ नतथाविंदतेक्षेमंमुकुंदचरणांबुजम् ९ ततोयतेतकुशलःक्षेमायनयमाश्रितः ॥ शरीरंपौरुषंयावन्नविपद्येतपुष्कलम् १० पुंसोवर्षशतंह्यायुस्तदर्धंचाजितात्मनः ॥ निष्फलंयदसौरात्र्यांशेतेंधंप्रापितस्तमः ११ मुग्धस्यबाल्यकौमारैःक्रीडतोयातिविंशतिः ॥ जरयाग्रस्तदेहस्ययात्यकल्पस्यविंशतिः १२ दुरापूरेणकामेनमोहेनचबलीयसा ॥ शेषंगृहेषुसक्तस्यप्रमत्तस्यापयातिहि १३ पश्यध्वंमतिवैषम्यंज्ञातीनांनःकुटुंबिनाम् ॥ श्रेयोविघातादायासादीहतामनुसंसृतिम् १४ कोगृहेषुपुमान्सक्तआत्मानमजितेंद्रियः ॥ स्नेहपाशैर्दृढैर्बद्धमुत्सहेतविमोचितुम् १५ कोन्वर्थतृष्णांविसृजेत्प्राणेभ्योपिगरीयसीम् ॥ यंक्रीणात्यसुभिःप्रेष्ठैस्तस्करःसेवकोवणिक् १६ कथंप्रियायाअनुकंपितायाःसंगंरहस्यंरुचिरांश्चमंत्रान् ॥ सुहृत्सुतस्नेहवशःशिशूनांकलाक्षराणामनुरक्तचित्तः १७ प्रत्ताःस्मरंस्ताडुहितृर्हृदय्याभ्रातॄन्स्वसॄर्वापितरौचदीनौ ॥ गृहान्मनोज्ञानरुचिरच्छदांश्चवृत्तीश्चकुल्याःपशुभृत्यवर्गान् १८

श्रेयःसंपादनंसुशकमित्याह पुंसइति ११ १२ दुरापूरेणनशक्यपूरणेन हिशब्दोहेतौ १३ निद्रादिकमंतरेणावशिष्टकालांतरालेपिश्रेयोविघ्नहेतुरस्तीत्याह पश्यध्वमिति कलहलक्षणंमतिवैषम्यं अनुसंसृतिमित्यनेनैकोपिक्षणोनावशिष्यतइतिसूचयति १४ नन्वस्माकंश्रेयइच्छानास्तिचेदनंतेपुचेतनेपुकस्यचित्सास्यादवसरमापद्येतेतितत्राह कइति १५ ननुप्रवृत्तिधर्मेणमाभूच्छ्रेयोर्थेनतत्स्यादतोमुकुंदपादसेवाकुतोनियुज्यतइतितत्राह कोन्विति, योर्थस्तदर्थतृष्णां अर्थान्वेषणवैतृष्णयैवार्जितस्यव्ययेलिप्सयाऽर्थेनसुकृतंसाधयेतिबोधिते साधयिष्यामीतिकंठोपरिगद्गदनिगदेनैवकालोयातीतिपुरुषायुषेणापिवित्तेनसुकृतार्जनंदवीयइतिवित्तव्ययमंतरेणकायक्लेशेनैवश्रीहरिचरणनिषेवणंजन्मसफलंकरोतीतिभावः तत्रदृशेनप्रमाणयति तस्करादयोमृताअप्यर्थं तृष्णांनमुंचंतीत्येतदुपलक्षणं परितःप्रत्येकमलंनानाजीवानांवर्तते १६ ननुभूदर्थाच्छ्रेयःकामादस्त्वित्याशंक्यकीदृशोसौभगवद्भक्तिकामोविषयकामोवानद्वितीयः अभिध्यायन्वर्गरतिप्रमोदानतिदीर्घजीवितेकोरमेतेत्यादिशास्त्रनिंदितत्वान्नाद्यः विषयविरक्त्यातत्त्यागेनभाव्यं तस्यदुःसाधनत्वादित्याह कथमिति रहस्यंरहसिभवंसंगंमैथुनलक्षणंकथंत्यजेतेत्युत्तरेणान्वयः मंत्रादिगृहीतानांसल्लापानांरसेनेतिशेषः १७ प्रत्तादत्ताः हृदय्याः हृदयप्रियाःरुचिरच्छदान्रुचिरपरिकरान् कुल्याःकुलपरंपरयासमागताःवृत्तीर्जीवनकरीः १८

कोशस्थःकोशकारीकीटः एतदेवस्पष्टयन्नि औपस्थ्यमिति १९ यदितिङ्कप्रंनिजमात्मीयमायुर्यस्यसतथा शास्त्रविहितमर्थंश्रेयोलक्षणंनबुध्यते स्वकुटुंबेभार्यादौरामःक्रीडायस्यसतथानानिर्विद्यतेविरक्तोनभवति २० परवित्तहर्तुश्चोरादेरिहदेहात्प्रेत्ययत्पूर्वमर्जितमथाप्यनंतरमपित्तच्चतदेवदुष्कर्महरते नयतीत्यन्वयःपरलोकेपिविषयेष्वलंबुद्धिर्नास्तीतिभावः २१ अनुक्तविशेषप्रदर्शनायकथितमेवार्थंविशिनष्टि विद्वानिति स्वलोकायस्वङ्कप्रमोक्षायस्वयोग्यज्ञानायवा तत्रहेतुमाह यदिति नकेवलंमोक्षायकल्पतइतिप्रत्युतानर्थंचाप्नोति तमइति विमूढोविपरीतज्ञानीयथातमःप्रतिपद्यते तथायमित्यन्वयः २२ श्रीनारायणानुग्रहमंतरेणविद्वत्ताप्यकिंचित्करीत्याह यतइति शास्त्रगुरूपदेशेनविद्वान्संसारस्यानित्यतामितिशेषः दीनंस्वात्मानंविमोचितुमलंसमर्थोनेतियतोतइतिशेषः यदिजीवराशौकश्चिदस्तीत्यभिमानस्तर्हिकुत्रकस्मिन्देशेकुत्रकस्मिन्कालेनकस्मिंश्चिदित्यर्थः कुतोत्राह वामदृशामिति अयंपुरुषोवामदृशांविहारार्थंनिर्मितक्रीडामृगइतियत्कथमयंतथाभूदितितत्राह निगडइति आसामीक्षिसर्गःकटाक्षमोक्षोयस्यनिगडःशृंखलायितः तस्मात्सइतिशेषः २३ एतावंतंदैत्यान्कटाक्षीकृत्योक्तंप्रगटयन्मथितार्थमाह ततइति नन्वेवंतर्हिसंसारमोक्षस्यदौर्घट्यमापादितामितिशंकामाभूत्यद्यर्थितो

त्यजेतकोशस्थइवेहमानःकर्माणिलोभादवितृप्तकामः ॥ औपस्थ्यजैह्वंबहुमन्यमानःकथंविरज्येतदुरंतमोहः १९ कुटुंबपोषायचयन्निजायुर्नबुध्यतेर्थं विहितंप्रमत्तः ॥ सर्वत्रतापत्रयदुःखितात्मानिर्विद्यतेनस्वकुटुंबरामः २० वित्तेषुनित्याभिनिविष्टचेताविद्वांश्चदोषंपरवित्तहर्तुः ॥ प्रेत्येहवाथाप्यजितेंद्रियस्तदशांतकामोहरतेकुटुंबी २१ विद्वानपीत्थंदनुजाःकुटुंबंपुष्णन्स्वलोकायनकल्पतेवै ॥ यत्स्वीयपारक्यविभिन्नभावस्तमःप्रपद्येतयथाविमूढः ॥ २२ यतोनकश्चिक्वचकुत्रविद्वान्दीनंस्वमात्मानमलंसमर्थः ॥ विमोचितुंवामदृशांविहारक्रीडामृगोयंनिगडोक्षिसर्गः २३ ततोविदूरात्परिहृत्यदैत्यादैत्येषुसंगंविषयात्मकेषु ॥ उपेतनारायणमादिदेवंसमुक्तसंगैरिषितोपवर्गः २४ नह्यच्युतंप्रीणयतोबह्वायासोसुरात्मजाः ॥ आत्मत्वात्सर्वभूतानांसिद्धत्वादिहसर्वतः २५ परावरेषुभूतेषुब्रह्मांतःस्थावरादिषु ॥ भौतिकेषुविकारेषुभूतेष्वयमहत्सुच २६ गुणेषुगुणसाम्येचगुणव्यतिकरेतथा ॥ एकएवपरोह्यात्माभगवानीश्वरोव्ययः २७ प्रत्यगात्मस्वरूपेणकालरूपेणचस्वयम् ॥ व्याप्यव्यापकनिर्देश्योह्यनिर्देश्योविकल्पितः २८ केवलानुभवानंदस्वरूपःपरमेश्वरः ॥ माययांतर्हितैश्वर्यईडचतेगुणसर्गया २९ तस्मात्सर्वेषुभूतेषुदयांकुरुतसौहृदम् ॥ भावमासुरमुन्मुच्यतयातुष्यत्यधोक्षजः ३०

स्तितर्ह्युपायंवदामीत्यतोवाह ततइति यतोधर्मार्थकामैर्ब्रह्मार्पणबुद्धिचिकित्सारहितैःसंसारमोक्षोनसेत्स्यति ततोदैत्येषुसंगंदूरात्परिहृत्य नारायणंशरणमुपेतयातेत्यन्वयः सोपवर्गोमुक्तसंगैःपुरुषैरिषितआप्तोभवति इषुगताविति धातोः २४ नेदंदुःसाध्यमित्याह नहीति सर्वभूतानामात्मत्वात्तत्प्रेष्ठत्वात्सर्वत्रव्याप्तत्वेनसुलभत्वाद्वा २५ नारायणस्यसेव्यत्वेहेतुगर्भविशेषणमाह परावरेष्विति २६ गुणसाम्येप्रलयेगुणव्यतिकरेसृष्टौ २७ व्याप्तिप्रकारमाह प्रत्यगात्मेति सर्वपदार्थानामंतःप्रत्यगात्मस्वरूपेणांतर्यामिरूपेणबहिःकालरूपेणव्याप्तेनब्रह्मापरपर्यायेण एवमेकएवव्याप्यव्यापकनिर्देश्योविकल्पितोविविधकल्पः अंतर्यामीप्रत्यगात्माव्याप्तःकालोहरिःस्मृत्रइतिवाक्यसिद्धोयमर्थः घटइवनिर्देश्योनेतिनिर्देश्यरूपः २८ अचिंत्यमव्यपदेश्यमैकात्म्यप्रत्ययसारमितिश्रुतिनिरूपितइत्याह केवलेति सर्वत्रसिद्धश्चेत्किमितिनदृश्यतइतितत्राह माययेति मायया प्रकृत्या तमसागूढमग्रेइतिश्रुतेःसत्त्वादिगुणैःसर्गःसृष्टिर्यस्याःसातथातया २९ यतःसर्वभूतानिभगवन्निवासस्थानानितस्माच्चयाभूतदयया आसुरंभावंद्वेषं विष्णोर्गृहत्वाद्भूतेषुदयाकार्यांविजानतेतिस्मृतेः मद्द्विषंतोभ्यसूयकाइति ३०

भगवत्तुष्ट्याकिंप्रयोजनमितितत्राह तुष्टइति येअनुसिद्धाः जन्मप्रभृतिप्राप्तास्तैर्गुणव्यतिकरैर्विषयसुखैर्हरेश्चरणयोःसारंजुषांगुणलक्षणमकरंदंसेवमानानांतद्गुणांश्चोपगायतांगायमानानांनोस्माकंकांक्षितेनागुणेनान्यैर्वाछितेनमोक्षेणकिं अपक्वभक्तिलभ्यमुक्तेर्भक्तेः परमानंदस्वरूपत्वात्तत्रापिसुखाधिक्यहेतुत्वात्सुतरांधर्मादिभिः सुतमंगुणव्यतिकरैः फलंनास्तीतिकिमुवक्तव्यं मोक्षेसुखमनाकांक्षमाणस्ययथासुखाधिक्यंभवतियथामोक्षगतंसुखंकांक्षमाणस्यसुखंपूर्णनलभ्यतइत्यभिप्रायेणकांक्षितेनेतिविशेषणं कांक्षतोमोक्षगमापिसुखमाकांक्षतोयथेतिवचनात् ३१ ननुशास्त्रविहितानांधर्मादीनांकथं कारंसाफल्यंभवतीत्याशंकांपरिहरन्नाह धर्मेति धर्मार्थकामइतिनामभिर्योयस्त्रिवर्गः शास्त्रविहितस्तस्यैक्षाज्ञानमनुष्ठानंचयात्रयीत्रयोवेदास्तेषांशब्दतोर्थतश्च ज्ञानं यौनयदमौ नीतिर्दंडशास्त्रे तयोरीक्षातात्पर्यज्ञानं याचविविधावार्तारूपिवाणिज्यादिलक्षणातदीक्षाप्रयोगज्ञानंवाऋग्वेदोयजुर्वेदः सामवेदोऽथर्वणश्चतुर्थइत्यारभ्यसर्ववेदयजनंविद्येत्यनेनयदुक्तं तस्यसर्वस्यानुकर्षणार्थश्चकारः यदेतदुक्तं तदेतदखिलंपरमपुरुषस्यस्वात्मपूर्वकसमर्पणमर्पितुमुद्दिष्टंभवतितर्हिनिगमस्यऋग्वेदादिसकलशास्त्रपठितस्यसत्यंयथार्थफलमितिमन्येइत्यन्वयः ३२ नेदंस्वमनीषोत्थंकिंतुसंप्रदायतः प्राप्तत्वाच्छ्रद्धेयमित्याह ज्ञानमिति नरसखोनंतसखः अनेनाविशेषणेनसनकादिभ्यउपदिष्टमिदमितिज्ञापितं किलशब्देनपुरातनत्वेनग्राह्यत्वंदर्शयति ज्ञानाधिकारिणआह एकांतिनामिति ३३ तवकुतःप्राप्तमेतदत्रा

तुष्टेचतत्रकिमलभ्यमनंतआद्येकिंतैर्गुणव्यतिकरैरिहयेऽनुसिद्धाः ॥ धर्मादिभिःकिमगुणेनचकांक्षितेनसारंजुषांचरणयोरुपगायतांनः ३१ धर्मार्थकामइतियोविहितस्त्रिवर्गईक्षात्रयीनयदमौविविधाचवार्ता ॥ मन्येतदेतदखिलंनिगमस्यसत्यंस्वात्मार्पणंस्वसुहृदःपरमस्यपुंसः ३२ ज्ञानंतदेतदखिलंदुरवापमाहनारायणोनरसखःकिलनारदाय ॥ एकांतिनांभगवतस्तदकिंचनानांपादारविंदरजसाप्लुतदेहिनांस्याद् ३३ श्रुतमेतन्मयापूर्वंज्ञानंविज्ञानसंयुतम् ॥ धर्मंभागवतंशुद्धंनारदाद्देवदर्शनाद् ३४ ॥ दैत्यपुत्राऊचुः ॥ प्रह्लादत्वंवयंचापिनर्तेन्यंविद्महेगुरुम् ॥ एताभ्यांगुरुपुत्राभ्यांबालानामपिहीश्वरः ३५ बालस्यांतःपुरस्थस्यमहत्संगोदुरन्वयः ॥ छिंधिनःसंशयंसौम्यस्याद्येद्विसंभकारणम् ३६ ॥ इतिश्रीभागवतेसप्तमस्कंधेषष्ठोऽध्यायः ॥ ६ ॥ नारदउवाच ॥ एवंदैत्यसुतैःपृष्टोमहाभागवतोऽसुरः ॥ उवाचस्मयमानस्तान्स्मरन्मदनुशासनम् १ ॥ प्रह्लादउवाच ॥ पितरिप्रस्थितेस्माकंतपसेमंदराचलम् ॥ युद्धोद्योगंपरंचक्रुर्विबुधादानवान्प्रति २ पिपीलिकैरहिरिवदिष्ट्यालोकोपतापनः ॥ पापेनपापोभक्षीतिवादिनोवासवादयः ३ तेषामतिबलोद्योगंनिशम्यासुरयूथपाः ॥ वध्यमानासुरैर्भीतादुद्रुवुःसर्वतोदिशम् ४

ह श्रुतमिति ३४ एतस्मिन्नवसरेदैत्यपुत्राःप्रह्लादकथितार्थशंकयातंपृच्छंतीत्याह प्रह्लादेति एताभ्यांगुरुपुत्राभ्यांशंडामर्काभ्यामृतेनान्यंगुरुंविद्महेयस्मात्किंचविज्ञानंचेश्वरविषयंविवक्षितंतदुपाधिनापिबालानामक्षराभ्यासनिरतानामस्माकमीश्वरोनकांक्षितइतियस्मात् अन्यगुर्वभावेपीश्वरउपदेष्टास्यादतोवाह बालानामिति बालानामीश्वरोस्त्यपिंकिंनास्तिप्रतिपत्त्यभावात् ३५ कस्मिंश्चिदवसरेदेशांतरेन्यगुरुसंगतिःकिंनस्यादितितत्राह बालस्येति तस्मादुत्पन्नंन संशयंजहीत्यन्वयः तत्रकृत्यमाहुरित्याह स्यादिति ३६ ॥ इतिसप्तमेविज०टी०षष्ठोध्यायः ॥ ६ ॥ श्रुतेषुसत्सुसाधनानांभक्तेरेवप्राधान्यंहरेर्मुख्यप्रसादजनकत्वाद्भक्तिरेवपुरुषेणापाद्येत्यादिकंनिरूप्यतेस्मिन्नध्याये भक्तिप्रतिपादनात्मकत्वादस्यशास्त्रस्यपुनःपुनस्तत्प्रतिपादनान्नपुनरुक्तिशंकाकार्या तत्रदैत्यपुत्रैःपृष्टःप्रह्लादःकिंचकारेतियुधिष्ठिरशंकान्वितस्तांपरिहरन्नारदआह नारदइति नारदस्यममानुशासनम् १ २ अहिःसर्पःपिपीलिकैर्यथाभक्ष्यते तथालोकोपतापनः पापोहिरण्यकशिपुः स्वपापेनाभक्षिनष्टप्रायोभूत्दिष्ट्यासुखमस्तुलोकार्थमितिब्रुवाणाः दिष्ट्याशमुपतोपंचेत्यमरः ३ ४

५ व्यलुंपन्जयकांक्षिणोजितयुद्धाः असुरजयेनप्रकाशमानावा ६ ७ तवोपभोक्तुंयोग्यानभवतीत्याह परपरिग्रहामिति ८ सुरद्विषोहिरण्यकशिपोर्वीर्यरेतोलक्षणम् अस्यायावत्प्रसवः तावन्ममवशेआस्यताम् पश्चादहंमोक्ष्ये व्रतःपूर्वकस्मान्नमुंचसीतितत्राह अर्थपदवीमिति ९ अनयाप्रसूतःपुत्रोहंतुंत्वयानशक्यतइत्याह नत्वयेति संस्थांमरणम् कुतोत्राह अनंतेति १० अनंतप्रियः श्रीनारायणो अस्यभक्त्याअनंतस्यहरेःप्रियाबहुमानलक्षणाभक्तिरनंतप्रियाभक्तिस्तयावा ११ तावदत्रोष्यता मित्याह यावदिति १२ अंत्यंतिके १३ अंतर्वत्नीगर्भिणी १४ गर्भक्षेमामिच्छामसवं चेत्युभयम् ईश्वरोवरप्रदानसमर्थःनारदाच्छ्रुतमित्यनेननारदस्ययद्गुरुत्वमभिप्रेतमेवंविधमित्याह धर्मस्येति धर्मस्यहरेर्भागवतसंज्ञस्यवा तत्त्वंतदुभयविधज्ञानंचयद्गर्भस्थंमामुद्दिश्यमात्रेउपदिष्टम् १५ तदुभयंतयोःकालस्यातिक्रांतत्वात् स्त्रीत्वात्शब्दादिविषयलौल्याच्चमातुस्तिरोहितमभूदित्यन्वयः अणुरेषधर्मइतिश्रुतेः धर्मोहरिस्ततस्तवकिमभूदितितत्राह ऋषिणेति ॥ १६ ॥ ततोस्माकम्

कलत्रपुत्रवित्ताप्तान्गृहान्पशुपरिच्छदान् ॥ नावेक्षमाणास्त्वरिताःसर्वेप्राणपरीप्सवः ५ व्यलुंपन्राजशिबिरममराजयकांक्षिणः ॥ इंद्रस्तुराजमहिषीं मातरंममचाग्रहीत् ६ नीयमानांभयोद्विग्नांरुदंतींकुररीमिव ॥ यदृच्छयागतस्तत्रदेवर्षिर्ददृशेपथि ७ प्राहैनांसुरपतेनेतुमर्हस्यनागसीम् ॥ मुंचमुंचमहाभागसतींपरपरिग्रहम् ८ इंद्रउवाच ॥ आस्तेऽस्याजठरेवीर्यमविषह्यंसुरद्विषः ॥ आस्यतांयावत्प्रसवंमोक्ष्येऽर्थपदवींगतः ९ नारदउवाच ॥ अयं निष्किल्बिषःसाक्षान्महाभागवतोमहान् ॥ त्वयानप्राप्यतेसंस्थामनंतानुचरोबली १० इत्युक्तस्तांविहायेंद्रोदेवर्षेर्मानयन्वचः ॥ अनंतप्रियभक्त्यैनां परिक्रम्यदिवंययौ ११ ततोनोमातरमृषिःसमानीयनिजाश्रमम् ॥ आश्वास्याहोष्यतांवत्सेयावत्तेभर्तुरागमः १२ तथेत्यवात्सीद्देवर्षेरंतिकाप्यकुतोभया ॥ यावद्दैत्यपतिर्घोरात्तपसोन्यवर्तत १३ ऋषिंपर्यचरत्तत्रभक्त्यापरमयासती ॥ अंतर्वत्नीस्वगर्भस्यक्षेमायेच्छाप्रसूतये १४ ऋषिःकारुणिकस्तस्याः प्रादादुभयमीश्वरः ॥ धर्मस्यतत्त्वंज्ञानंचमामप्युद्दिश्यनिर्मलम् १५ तत्तुकालस्यदीर्घत्वात्स्त्रीत्वान्मातुस्तिरोदधे ॥ ऋषिणानुगृहीतंमांनाधुनाप्य जहात्स्मृतिः १७ भवतामपिभूयान्मेयदिश्रद्दधतेवचः ॥ वैशारदीधीःश्रद्धातःस्त्रीबालानांचमेयथा १७ जन्माद्याःषडिमेभावादृष्टादेहस्यनात्मनः ॥ फ लानामिववृक्षस्यकालेनेश्वरमूर्तिना १८

किंप्रयोजनमितितत्राह भवतामपीति यथामेवैशारदीधीःभगवद्विषयज्ञानमभूत्तत्तथातर्हिभवतामपिभूयादित्यन्वयः नकेवलंयुष्माकमेवस्त्रीणांबालानांचश्रद्धातस्तत्स्यादित्याह श्रद्धातइति यदिस्त्रीबालानांश्रद्धास्यादतस्तर्हितेषामिति १७ प्रह्लादस्तेषांस्ववचसिश्रद्धामुत्पाद्यनारदोक्तंज्ञानमुपदिशति जन्माद्याइति जातःकंसवधार्थायभूभारहरणायच जनितोतविष्णोरित्यादिषुहरेर्जन्मादि कंप्रतीयते तत्रजन्मादिमतोहरेरितरवद्बुर्भगशरीरस्थस्यतच्छरीरयोग्यभोगप्राप्त्याव्याकुलचित्तस्यसर्वसमर्पणानुगुणफलदानंकथंघटतइत्यादिशंकादैत्यपुत्रचित्तस्थांपरिहरन्नित्यतोवाह जन्माद्याइति इमेषड्वाजन्मास्तिवृद्धिपरिणामापक्षयविनाशाख्यविकारादेहस्यदृष्टाःप्रत्यक्षेणप्रमिताआत्मनःपरमात्मनोनसंतीत्यन्वयः षड्विकाराःशरीरस्यनविष्णोस्तद्वतस्यत्वित्यनेननिरस्तत्वात्दृष्टाइत्युक्तं स्पष्टयति फलानामिति वसंताद्यवयवविशेषेणकालेनवृक्षस्यचूतादिफलानांजन्मादिकंदृश्यते यथावृक्षस्यकालाधीनत्वंतथादेहस्येश्वराधीनत्वमितिज्ञापनायेश्वरमूर्तिनेत्युक्तम् देवदत्तस्यसर्वमिदंमदधीनमि

१ यद्यपिपरिग्रहशब्दः परिवारेरूढः पुंल्लिङ्गश्च स्त्रीवाचीनभवति । तथापिपरिवारे प्रथमगृहीत्वात्तच्छब्दवाच्यत्वंसाधु । महिषीचसुतोभ्रातामातुलःश्यालकस्तथा ॥ मंत्रीदूताश्वसेनाचसर्वएतेपरिग्रहाइतिवररुचिः ॥

तिमिथ्याज्ञाननिरासायोक्तमिदंतात्पर्यमितिज्ञातव्यं नदुक्तं तदधीनंशरीरंचज्ञात्वातन्ममतांत्यजेदिति १८ क्षेत्रज्ञ पुरुषोह्यात्मासंसारीचेतनोमतइत्युक्तेरात्माजीवः किंनस्यादित्यतस्तन्निवर्तकलक्षणमाह आत्मेति परैरव्याप्यादिदोषरहितैरेतैर्द्वादशभिरात्मनोहरेर्लक्षणैःस्वरूपभूतैरुपेतइतिविद्वानहंममेत्यतद्भावमतत्त्वंमोहजमज्ञानजंदेहादौत्यजेदित्यन्वयः नित्यःस्वरूपतोविनाशरहितः अवयवादिव्ययोनास्तीत्यव्ययःप्रकृतिनिर्मितशरीरासत्त्वेनविद्यारागादिदोषविधुरत्वाच्छुद्धः एकोमुख्यःमुख्यत्वंहरेरेवस्वरूपज्ञानेनक्षेत्राख्यशरीरज्ञातृत्वात्सक्षेत्रज्ञः आश्रयउपजीव्यः अविक्रियःस्वतःपरतोवापरिणामरहितः स्वमात्मानंस्वयमेवद्रक्ष्यतिपश्यतीतिस्वदृक् तद्ब्रह्मवेदाहंब्रह्मास्मीतिश्रुतिवश्योपराधीनःस्वतंत्रइतियावत्वशंयापयतिसर्वमितिवा व्यापकोंतर्बहिरितिशेषः आकाशोनीलिमोदेतिश्रुतेः भूताकाशस्यपरिच्छिन्नत्वादव्याकृतस्यचित्प्रकृत्यात्मकत्वेनभगवदनुगृहीतत्वेनतस्याव्यापकत्वमुचरितमनेनेतिभवत्येवव्यापकः अप्राकृतत्वादसंगी असंगोह्ययंपुरुषइतिश्रुतेः अनावृतोज्ञानाद्यावरणरहितः एवंविधलक्षणोपेतस्यविष्णोःसर्वहेतुत्वाच्छरीरस्यतदधीनत्वेनतस्मिन्देहेममतांत्यजेदित्यर्थः १९ २० हरेर्देहादिभ्योविविक्तत्वेनज्ञानोत्पत्तिप्रकारंवक्ति हेममिति यथाहेमकारोग्रावसुक्षेत्रेषुनिकषाश्मसुस्थानेषु हेमकारःक्षेत्रेषुहेमवत्सुपाषाणेषुवा योगैर्हेमावाप्युपायैःकषणाध्मानादिपरीक्षालक्षणैर्हेमप्राप्नुयादित्यन्वयः नसर्वस्यसुज्ञकमित्यतउक्तं तदभिज्ञइति तथामुमुक्षुःपुरुषआत्मयोगैरौत्पत्तिकभक्त्याद्युपायैःदेहेषुक्षेत्रेषुसम्यगालोच्यविविच्यब्रह्मगतिंलभेत देहादिभ्योवैलक्षण्येनब्रह्मविषयज्ञानमाप्नोतीत्यन्वयः कोसावधिकारीत्यतउक्तं अध्यात्मविदिति तरतिशोकमात्मविदितिश्रुतेः आत्मानमधिकृत्य

आत्मानित्योऽव्ययःशुद्धएकःक्षेत्रज्ञआश्रयः ॥ अविक्रियःस्वदृग्वश्योव्यापकोऽसंग्यनावृतः १९ एतैर्द्वादशभिर्विद्वानात्मनोलक्षणैःपरैः ॥ अहंममेत्यतद्भावंदेहादौमोहजंत्यजेत् २० हेमंयथाग्रावसुहेमकारःक्षेत्रेषुयोगैस्तदभिज्ञआप्नुयात् ॥ क्षेत्रेषुदेहेषुतथात्मयोगैरध्यात्मविद्ब्रह्मगतिंलभेत २१ अष्टौप्रकृतयःप्रोक्तास्त्रयएवाहितद्गुणाः ॥ विकाराःषोडशाचार्यैःपुमानेकःसमन्वयात् २२ देहस्तुसर्वसंघातोजगत्तस्थुरितिद्विधा ॥ अत्रैवमृग्यःपुरुषोनेतिनेतीत्यतत्त्यजन् २३

वर्तमानंवेदांगशास्त्रमध्यात्मंतद्वेत्तिसम्यग्जानातीतिसात्त्विकादिस्वभावोध्यात्मंतद्वेत्तीतिवा महाभूतादिर्वाध्यात्मंतद्वेत्तीतिअध्यात्मवित् २१ कानिमहाभूतादीनीतितत्राह अष्टाविति मूलप्रकृतिर्महदादयःसप्तैवमष्टौप्रकृतयः सत्त्वादिगुणानांप्रकृतावंतर्भावसंभवेनाष्टत्वंयुक्तमितिभावेनाह त्रयएवेति तस्याःप्रकृतेर्गुणास्तद्गुणाः प्रकृतिजत्वाद्विकाराश्चतद्ग्रहणेनगृहीताइतिनाष्टत्वासंभवइत्याशयेनाह विकाराइति मनसासहैकादशेंद्रियाणिशब्दादिविषयाश्चेतिविकाराःषोडशेतिपूर्वाचार्यैःसंख्याताइतिशेषःहरिरेष्वनुगत्तत्वेनविकारसंभवादेतैःसहकिंनपठितइतितत्राह पुमानिनि समन्वयादितिल्यब्लोपेपंचमीसमन्वयमनुगतंप्राप्येकःपुमान्नारायणएवकेवलंशुद्धइत्यतोविकारेषुनपठितइत्यर्थःअत्रेदंतात्पर्यमवगंतव्यं तथाहि अभिमन्यमानजडापेक्षया पुमान्जीवःपंचविंशोभिमानचेतनाविवक्षयाविष्णुःषड्विंशइतिसम्यगन्वयान्नियंतृत्वेन अनुगतिज्ञानाज्ज्ञेयइति तदुक्तं अभिमान्यपेक्षयाविष्णुःपंचविंशइतिस्मृतः जडव्यपेक्षयाजीवः सम्यगूज्ञेयोहरिःस्मृतइति यद्वाकाशादिपंचभूतानिसत्त्वादित्रयोगुणाइत्यष्टौप्रकृतयः तत्रमूलप्रकृतिमहदहंकाराणामाकाशादिष्वनुगतत्वेनपृथग्ग्रहणंनक्रियते गुणानांतदात्मकत्वेनगुणग्रहणेनतद्ग्रहणोपपत्तेः शेषंपूर्ववत् २२ तत्त्वसंख्याकथनेनप्रकृतेकिमायातमितितत्राह देहस्त्विति सर्वेषांप्रकृतितत्कार्याणांसंघातःसमूहःतन्निर्मितइत्यर्थः तत्त्वेभ्योयतदभिमानिभ्योविविच्यपरमात्माज्ञातव्यइत्यभिप्रायेणतत्त्वसंख्यानंकृतमितीममर्थंदर्शयति तुशब्देनदेहशब्देनप्रपंचोविवक्षितइतिकृत्वातदेहंविभजति जगदिति जगच्छब्दोद्विरावृत्त्याव्याख्येयः तथाहि जगत्समस्तंजगज्जंभमंतस्थुस्थावरमितिद्विधाविभक्तं किंचातइत्यतआह अत्रेति तत्तत्त्वाद्ब्रह्मतत्त्वभवतीत्यतत्प्रकृत्यादिकंत्यजन् हित्वास्वतः सर्वदाभिन्नइत्यर्थः पुरुषःपूर्णःषड्गुणोत्रैवदेहलक्षणेप्रपंचेमृग्योन्वेषणीयोविचार्योज्ञातव्यइतियावत् शतृप्रत्ययेनसदाप्रकृत्यादित्यागोनकादाचित्कइतिच

१ शरीरेष्वितिमुद्रितपुस्तके ।

सूचयति तत्रकिंप्रमाणमितितत्राह नेति सएषनेतिनेतीत्यात्मेतिश्रुतिःप्रमाणमित्यर्थः योतत्त्यजंस्तद्वपुस्त्यजंस्तेनेतिवाअतत्त्यजतीत्यतत्त्यकृतेनातत्त्यजेतिवापाठः २३ कयायुक्त्यामृग्यतइतितत्राह अन्वयेति अन्वययुक्तव्यातिरेकेणयत्रयत्रजगत्तत्रततत्रब्रह्मेत्यन्वयः यत्रयत्रब्रह्मनतत्रतत्रजगत्परिच्छिन्नत्वादिव्यतिरेकलक्षणयुक्त्याऽऽकाशवत्जगदन्वितत्वेनयदेतदसंगलक्षणपृथक्त्वेनवेतियुक्त्यानिश्चितेन विवेकेनागतेनयुक्तेनात्मनामनसा ननु व्याप्तिग्राहकप्रमाणाभावेनाभासत्वान्वयान्निर्णयोनस्यादितितत्राह सर्गेति अत्रसर्गस्थानाम्यांसंहारादिकमुपलक्ष्यतेनसहितात्वरायैस्तेअसत्वरास्तैःसर्वैश्वराघोषवंतोबलवंतोवक्तव्याइंद्रोबलंददातीतिसर्वऊष्माणोग्रस्ताअनिरस्तावेवृतावक्तव्याःप्रजापतेरात्मानंपरिददातीतिसर्वैस्पर्शैरशेनानभिनिहितावक्तव्या मृत्योरात्मानंपरिहरणीयेतिश्रुतेः विमृशद्भिःविचारंकुर्वद्भिःकोनआत्माकिंब्रह्मेत्यादिश्रुतेः सर्गस्थानादिविषयैः समाम्नायैर्निर्दोषगुणोपेतैर्वेदैः यतोवाइमानिभूतानिजायंतेयेनजातानिजीवंतीत्यादिलक्षणैरंतर्बहिश्चतत्सर्वव्याप्यनारायणःस्थितइत्यादिकैश्चानुगृहीतव्या २४ विमृश्यनिर्णयप्रकारंदर्शयति बुद्धेरिति सत्त्वबुद्ध्यादिशब्दैस्तुजीवोपिक्विचिदीर्यते इतिवचनाद्बुद्धेर्जीवस्यजागरणाद्यावृत्तयोऽवस्थास्तायेनपरमात्मनाप्रेरितेनजीवेनानुभूयंते जाग्रदाद्याःकर्मचैवसुखदुःखेचतस्यहीतिवचनात्सपरःपुरुषोध्यक्षोजाग्रदादेःपरोद्रष्टासुखनित्योहरिःस्मृतइतिवचनात्सोध्यक्षोजाग्रदादिनाधिगतेंद्रियसुखदुःखपरोजीवःपरोविश्वादिविग्रहाद्धेरन्यइत्युत्तरार्द्धस्यार्थभेदोज्ञातव्यः एवशब्देनकालादिकंव्यावर्तयति २५ कार्यकारणबद्धौतावित्येतेविश्वतैजसौ प्राज्ञःकारणबद्धास्त्वितिवचनाद्विश्वादिविग्रहान्नारायणादन्यत्वंजीवस्य कथंजीवधर्माक्रांतत्वात्तस्येतितत्राह एभिरिति बुद्धीनांजीवानांभेदस्तारतम्यलक्षणोयैर्ज्ञाप्यतेतैर्जीवतारतम्यज्ञापकैरतएवपर्यस्तैरेकत्रसमस्तैरेभिस्त्रिवर्णैस्त्रिधावर्णैर्वर्णनंयेषांतेतथातैर्जाग्रदादि

अन्वयव्यतिरेकेणविवेकेनागतात्मना ॥ सर्गस्थानसमाम्नायैर्विमृशद्भिरसत्वरैः २४ बुद्धेर्जागरणंस्वप्नःसुषुप्तिरितिवृत्तयः ॥ तायेनैवानुभूयंतेसोऽध्यक्षः पुरुषःपरः ॥ २५ एभिस्त्रिवर्णैःपर्यस्तैर्बुद्धिभेदैःक्रियोद्भवैः ॥ सरूपमात्मनोधत्तेगंधैर्वायुरिवान्वयात् २६ एतद्द्वारोहिसंसारोगुणकर्मनिबंधनः ॥ अज्ञान मूलोऽपार्थोपिपुंसःस्वप्नइवाप्यते २७

भिस्त्रयोवर्णाः शुक्लकृष्णपीतलक्षणायेषांतैतैः सत्त्वादिगुणैर्वा सपरमात्माऽज्ञजनदृष्ट्यात्मनोजीवस्यसरूपंरूपेणसमानरूपंकार्यादिबद्धंधत्तइतिदृश्यते नतुप्राज्ञजनदृष्ट्यातदृष्ट्याज्ञानानंदादिसमानंरूपंधृत्वातत्स्वरूपंधत्तइति सजीवेनसहस्थानात्तत्स्वरूपःप्रदृश्यतइतिस्मृतेः अन्वयादक्षिणाक्ष्यादिष्वनुगतत्वात्कीदृशैः क्रियोद्भवैःक्रियायाउद्भवोयेभ्योगुणेभ्यस्तेतथातैः शुक्लसत्त्वजन्यंजागरणं पीतरजोजन्यंस्वप्नं कृष्णतमोजन्यासुप्तिःकर्माण्येवंविधानि अजामेकांलोहितशुक्लकृष्णामितिश्रुतेः कुत्रायंव्यहारोदृष्टइति तत्राह गंधैरितियथागंधैरन्वयात्सौरभ्यादिगंधसंपर्कात् सुगंधोदुर्गंधोमिश्रगंधोवायुरितिव्यवह्रियतेनतावतातादात्म्यंवायोस्तथात्वेसर्वदातथास्यात् नचैवं तस्माद्विन्नएववायुस्तथाहीररपि यथागंधयुतोनिलइतिच तत्सृष्ट्वातदेवानुप्राविशत् तदनुप्रविश्यसच्चत्यच्चाभवदितिश्रुतेः देहाख्यप्रपंचसंपर्कोस्त्येवहरेरितिभावः ॥ २६ ॥ अभेददर्शनेबाधकमाह एतद्वारइति इदमभेददर्शनंद्वारंयस्यसंसारस्यसतथापुंसःसंसारःप्राप्यतेहियस्मात् अदृष्टैर्जीवपरयोर्भेदस्याप्रोतिसंसृतिमितिवचनात् अभेददर्शनेकारणमाह गुणेति अभेददर्शनजनकत्वेनगुणकर्मणोःसंसारनिमित्तत्वमाह तस्येति विशेषकर्मणःकारणमज्ञानंतद्वारासंसारइत्याशयेनाह अज्ञानेति अज्ञाननिमित्तकर्मपरंपरयामुग्धमनसःपुंसोऽभेदनिश्चयादंततस्तमएवशरणमित्याशयेनाह अपार्थइति अपगतनिवृत्तिस्तमसइतिशेषः अर्थःस्याद्विषयेमोक्षेशब्दवाच्येप्रयोजने व्यवहारेधनेशास्त्रेवस्तुहेतुनिवृत्तिष्वित्यभिधानात् मशकार्थेधूमइतिप्रयोगाच्च अभेदनिश्चयाद्यातितमोनात्यस्त्यत्रसंशयइतिस्मृतेः अपिशब्देननित्यदुःखभूयिष्ठतमःप्राप्तिंसूचयति दुःखरूपोपिसंसारोबुद्धिपूर्वमवाप्यतइतिसंसारस्तमः इंद्रियार्थसंनिकर्षादर्थोपलब्धिर्जाग्रत्जाग्रदनुभवसंस्कारोपस्थापितविषयाभासोपलब्धिः स्वप्नः उपरतस्वस्ववृत्तींद्रियाविषयज्ञानं सुप्तिः अत्रजाग्रद्दृष्टश्रुतपदार्थसंस्कारकृतःस्वप्नःस्वाशिरश्छेदनादिलक्षणोदुःखादिहेतुर्यथातथाजाग्रदापिराजाहंवदतोनर्थपरंपरादाष्टंवज्जीवपरयोरभेदंजानतःपुंसइहामुत्रदुःखबाहुल्यहे

रित्यर्थः यथास्वप्नेशिरश्छेदंस्वयंकृत्वात्मनोवशः ततोदुःखमवाप्येततथाजागरितेपितु जानन्नप्यात्मनोदुःखमवशस्सुप्रवर्ततइतिस्मृतौदर्शनात् २७ अर्थक्रियाकारित्वात्नस्वप्नादेर्मिथ्यात्वमित्याह मनोमयत्वादिति मनसानिर्मितकर्मनिमित्तत्वादनित्यत्वाभिप्रायेणस्वप्नजाग्रतोस्साम्यं अन्यथा शोकमोहभयप्रदाइत्येतदसंबद्धंस्यात् नचशुक्तिरजतादिकंवलयकरणादियोग्यम् २८ २९ विपक्षेबाधकमुक्त्वा विपर्ययेपर्यवसानच्छलेनसंसारबीजानिहरणोपायमाह तस्मादिति यस्मात्पुंसोगुणकर्मनिर्मितोभेददर्शनद्वारःसंसारस्तस्मादभेदनिमित्तत्रिगुणमयकर्मबीजभर्जनोपायोभवद्भिःकर्तव्य इत्यन्वयः नन्वग्निष्टोमादिकमंतरेणकर्मणांबीजभूतस्यलिंगशरिरस्यहननोपायःकोसौयमनियमादिलक्षणश्चित्तस्योभयत्रसाधारणत्वेनानंतरंगत्वात् अतआपाकनिक्षिप्तामघटदहनयोगइवाहत्यतत्साधनं वक्तव्यमितितत्राह प्रवाहइति धियःप्रवाहस्यसजातीयविजातीयप्रत्ययानंतरिततयाविषयीकरणनिपुणोपासनालक्षणस्य उरुद्रंपातिरक्षतीत्युपः उपोधिकचइतिसूत्रादुपः सर्वाधिकोवापरमेश्वरस्तस्मिन्रमणंनिरंतरश्रीनारायणचरणसरसिजसंचिंतनलक्षणोपासनात् सएवेत्यभिप्रायः ३० धियःप्रवाहस्यांतरंगसाधनमाह तत्रेति भगवतेत्यनेनग्राह्यत्वेआश्रमूलत्वंदर्शयति अन्यथा

मनोमयत्वात्सर्वार्थाःस्वप्नजागरयोःसमाः॥ दृष्टानर्थानपिध्यातुःशोकमोहभयप्रदाः २८ परस्यनिर्गुणस्यापिगुणसंगाज्जनिर्मृतिः ॥ व्यक्तंजन्माप्ययप्रोक्तंशयानस्येवनस्वतः ॥ हरिसंचिंतयासर्वेप्रयांतिपरमंपदम् २९ तस्माद्भवद्भिःकर्तव्यःकर्मणांत्रिगुणात्मनाम् ॥ बीजनिर्हरणेयोगःप्रवाहोपरमोधियः ३० तत्रोपायसहस्राणामयंभगवतोदितः ॥ यदीश्वरेभगवतिभक्तिःस्यान्नान्यथारतिः ३१ गुरुशुश्रूषयाभक्त्यासर्वलाभार्पणेनच ॥ संगेनसाधुभक्तानामीश्वराराधनेनच ३२ श्रद्धयातत्कथायांचकीर्तनैर्गुणकर्मणाम् ॥ तत्पदांबुरुहध्यानात्तल्लिंगेक्षार्हणादिभिः ३३ हरिःसर्वेषुभूतेषुभगवानास्तईश्वरः ॥ इतिभूतानिमनसाकामैस्तैःसाधुमानयेत् ३४ एवंनिर्जितषड्वर्गैःक्रियतेभक्तिरीश्वरे ॥ वासुदेवेभगवतियायासंलभतेरतिम् ३५ निशम्यकर्माणिगुणानतुल्यान्वीर्याणिलीलातनुभिःकृतानि ॥ यदातिहर्षोत्पुलकाश्रुगद्गदःप्रोत्कंठउद्गायतिरौतिनृत्यति ३६ यदाग्रहग्रस्तइवक्वचिद्धसत्याक्रंदतेध्यायतिवंदतेजनम् ॥ मुहुःश्वसन्वक्तिहरेजगत्पतेनारायणेत्यात्मगतिर्गतत्रपः ३७ तदापुमान्मुक्तसमस्तबंधनस्तद्भावभावानुकृताशयाकृतिः ॥ निर्दग्धबीजानुशयोमहीयसाभक्तिप्रयोगेणसमेत्यधोक्षजम् ३८

बाधकमाह नेति ॥ ३१ ॥ भक्त्यागुरुशुश्रूषया यस्यदेवेपराभक्तिर्यथादेवेतथागुराविति श्रुतेः सर्वलाभार्पणेनहराविति शेषः ब्रह्मार्पणंब्रह्महविरित्यादेः साधुभक्तानां नावैष्णवायदातव्यंनोदधिबिंदुनेतंडुलमित्यादेर्नियतभगवद्भक्तानांसेवालक्षणप्रसंगेन महत्सेवांद्वारमाहुर्विमुक्तेरित्यादेः ईश्वराराधनेनपंचरात्रोक्तेनपंचकालीनभगवत्पूजयापंचकालपरायणं पंचकालैकमनसामित्यादेः ३२ तत्कथायांश्रद्धया पानेनतेदेवकथासुधायामित्यादेः गुणकर्मणांसंकीर्तनैः कलौसंकीर्त्यकेशवमित्यादेः विभयविस्मंडध्यानविधानार्थं तत्पदांबुरुहध्यानादिति संचिंतयेद्भगवतश्चरणारविंदमित्यादेः तस्यहरेर्लिंगंप्रतिमातस्येक्षादर्शनं अर्हणंपूजनं आदिशब्देनप्रदक्षिणादिगृह्यते बर्हायितेतेनयनेनराणामित्यादेः ३३ हरिःसर्वेषुभूतेष्वित्यादिनाहरिरेवपूज्योनतुभूतानियोग्यतातिरेकेणेतीदमेवकथ्यते ईश्वरोजीवकलयाप्रविष्टइत्यादेर्वा ३४ ययाभक्त्याहरौरतिमुपासनांलभतेतयास्वरूपानंदानुभवलक्षणांरतिंलभतइतिपरंपरायायोज्यम् ३५ सृष्टचादीनिकर्माणि कंसवधादीनिवीर्याणि उद्गानादिकंनसर्वभक्तसाधारणं तदुक्तं केचिद्रुक्ताःप्रनृत्यंतिगायंतिचयथेप्सितं केचित्तूष्णींभजंत्येवकेचिच्चोभयकारिणइति ३६ ३७ एतदेवाह तद्भावेति तस्यभावेयथास्वरूपेभावोभक्तिस्तस्यानुकृतेनुकूलत्वेनप्रकटितआशयाकृतीअंतःकरणाकारौयस्यसतथा कश्चिदुद्गानेनांतराभक्तिंप्रकटयति कश्चिद्रोदनाश्रुपातकरणेन कश्चिन्नर्तनेनकश्चित्तूष्णींभजनेनेति तस्यब्रह्मणोभावोलीलातनवोभावोभक्तिस्तयारंधिताभिप्रायाकारइतिवास्थानाभिप्रायआशयइतिवा निर्दग्धंकर्मबीजंयस्यसतथा सचानुशयोंतःकरणंयस्यसतथा अनुशयःसंसारोवा ३८

भक्त्यनंतरंभगवत्कथानिर्वाणसुखजनीत्याह अधोक्षजेति अधोक्षजालापंसंसृतिचक्रशातनंनाशनंतद्धरिविषयकथाकथनंब्रह्मनिर्वाणसुखंब्रह्मणोनुग्रहात्प्राप्यमुक्तिसुखंविदुरितियत्ततोदेहहृदये स्थितंजीवंहृदिस्थितमीश्वरंभंजध्वमित्यन्वयः योयंबहिर्वापुरुषादाकाशोयोवैयंवावसयोयमंतः पुरुषआकाशोयोवैसोंतःपुरुषआकाशोयंवावसयोयमंतर्हृदयआकाशइतिश्रुतेः हृदीश्वरंमनःप्रेरक त्वेनतत्स्वामिनंसाहसर्वमनोवृत्तिप्रेरकःसमुदाहृतइतिवाक्याद्वा ३९ भगवदुपासनंदवीयस्त्वेनबहुपाथेयसाध्यत्वेनभागीरथीयात्रावत् दुःसाधनंकिंनेत्याह कोतिप्रयासइति अस्यात्मनोजीवस्यस्वेस्वा धीनेहृदिछिद्रवदाकाशवत्सतःस्थितस्यहरेरुपासनेकोतिप्रयासःनकोपिसर्वगतत्वेनसमीपस्थत्वात् तद्दूरेतदंतिकइतिश्रुतेःअशेषदेहिनांसामान्यतःसाधारणत्वेनहृदिस्थितत्वेनसख्युःतस्माद्विषयोपपाद नैःकिंशास्त्रैरितिशेषः ४० भक्तेरंतरंगसाधनवैराग्यमेवेत्याशयेनाह रायइति ४१ विहितयज्ञसाध्यत्वेनस्वर्गादेर्नित्यत्वंसंभाव्यमितिनित्याह एवमिति एवंमर्त्यलोकवन्ननिर्मलःप्राकृतत्वात् नदृष्टंश्रुतंदूषणं यस्यसतथातं सहचरीभूतवैराग्येणैकयामुख्ययाआत्मलब्धयेस्वरूपानंदानुभवलक्षणमुक्तिप्राप्त्यर्थमात्मनोदेहादेर्विविच्यस्वरूपज्ञानलक्षणलाभायवा ४२ भगवदनर्पणबुद्ध्यानुष्ठितयज्ञादिकर्मानर्थानर्थहेतु रित्याशयेनाह यदर्थमिति यजेतेत्यादिविध्यंगानि विपर्यासंदुःखं अमोघंसदातनत्वेनाबध्यं ४३ एतदेवविवृणोति सुखायेति ब्रह्मार्पणलक्षणेनकरणमनीहा तदुक्तं अप्रयत्नेनकरणमनीहाप्रोच्यतेबुधैरिति

अधोक्षजालापमिहाशुभात्मनःशरीरिणःसंसृतिचक्रशातनम् ॥ तद्ब्रह्मनिर्वाणसुखंविदुर्बुधास्ततोभजध्वंहृदयेहृदीश्वरम् ३९ कोतिप्रयासोसुरबालकाह रेरुपासनेस्वेहृदिछिद्रवत्सतः ॥ अस्यात्मनःसख्युरशेषदेहिनांसामान्यतःकिंविषयोपपादनैः ४० रायःकलत्रंपशवःसुतादयोगृहामहीकुंजरकोशभूत यः ॥ सर्वार्थकामाःक्षणभंगुरायुषःकुर्वंतिमर्त्यस्यकियत्प्रियंचलाः ४१ एवंहिलोकाःक्रतुभिःकृताअमीक्षयिष्णवःसातिशयाननिर्मलाः ॥ तस्माददृष्ट श्रुतदूषणंपरंभक्त्यैकयेशंभजतात्मलब्धये ४२ यदर्थमिहकर्माणिविध्यंगान्यसकृन्नरः ॥ करोत्यतोविपर्यासममोघंविंदतेफलम् ४३ सुखायदुःखमोक्षा यसंकल्पइहकर्मणः ॥ सदाप्नोतीहयादुःखमनीहायासुखोन्नतिम् ४४ कामान्कामयतेकाम्यान्यदर्थइहपूरुषः ॥ सवैदेहस्तुपारक्योभंगुरोयात्युपैतिच ४५ किमुव्यवहितापत्यदारागारधनादयः ॥ राज्यकोशगजामात्यभृत्याप्तममतास्पदाः ४६ किमेतैरात्मनस्तुच्छैःसहदेहेननश्वरैः ॥ अनर्थैरर्थसंका शैर्नित्यानंदमहोदधेः ४७ निरूप्यतामिहस्वार्थःकियान्देहभृतोऽसुराः ॥ निषेकादिष्ववस्थासुक्लिश्यमानस्यकर्मभिः ४८ कर्माण्यारभतेदेहीदेहेनात्मा नुवर्तिना ॥ कर्मभिस्तनुतेदेहमुभयंत्वविवेकतः ४९ तस्मादर्थाश्चकामाश्चधर्माश्चयदपाश्रयाः ॥ भजतानिहयात्मानमनीहंहरिमीश्वरम् ५०

४४ शाश्वतसुखानुभवकामंविहायशरीरेसुखकामंप्रयतमानोविमूढत्वेनातिहास्योबुधैरित्याशयेनाह कामानिति काम्यान्कामान्विषयान्यदर्थंयस्यशरीरस्यार्थे पारक्यस्तुश्वसृगालादेर्विचमानोनस्वकीयः व्यवहिताःशरीरमपेक्ष्यदूरस्थाः ४५ ४६ ननु विषयभोगार्थंश्रीनारायणोपिविग्रहंगृह्णातीतिकेचित्तत्राह किमेतैरिति आत्मनोहरेः तस्मात्स्वताश्चिदानंदस्वरूपस्यजीवात्मनोभौतिकादिनाकिं नकिमपि कृत्यमित्यतोवाह किमेतैरिते ४७ विचारासहत्वान्नदेहादिनाप्रयोजनमित्याह निरूप्यतामिति निषेकादिषुगर्भाधानादिष्ववस्थासु कर्मभिःक्लिश्यमानस्यदेहभृतः कियान्स्वार्थइतिनिरूप्यतामित्य न्वयः ४८ संसारस्यप्रवाहरूपेणनित्यत्वान्नहरेर्ज्ञानमंतरेणनिवृत्तिःस्यादित्याशयेनाह कर्माणीति आत्मानुवर्तिनापरमात्माधीनेन कर्मदेहश्चेत्युभयमविवेकतोज्ञानात् ४९ नन्वीश्वरसेवायां भक्तिरेवप्रयोजिकाचेन्नार्थादिनाप्रयोजनमित्याशंकांपरिहरन्नुपसंहरति तस्मादिति अर्थादेर्हरिविषयत्वेसाफल्यंभवतीत्यर्थः ननु प्रतीतंचेष्टाराहित्यमनीहशब्दार्थंपरित्यज्यान्यार्थकल्पनेकिंप्रमाणं उ क्तंहिप्रमाणमितिचेन्न तस्यबह्वर्थवाचित्वेनस्वाभिप्रेतार्थसंदेहात्करणंकारणेकार्यसाधनेनुव्रतादिष्वित्युक्तेरितितत्राह अनीहमिति श्रमसाध्यक्रियाराहित्यादनीहामित्यस्योक्तएवार्थः अप्रयत्नेनेतिविशेष णाच्चश्रमसाध्यक्रियाराहित्यमेवोच्यते स्पष्टार्थोच्चारणाभेदध्यानपद्मासनादिषु व्रतबंधेनाट्यभेदेगीतकेकर्मणींद्रियइत्युत्तरवाक्येकर्मण्यापिप्रयोगाच्च ५०

हरेरेवभजनेकारणमाह सर्वेषामिति व्यंजकत्वाद्धि जंगतइतिशेषः व्यंजनाज्जगतोविष्णुर्वीर्जनंपरिणामतइतिवचनान्नबीजशब्दस्यविकारार्थः अप्रयत्ननात आवाक्रयःस्वहग्वश्यइतस्वात्तः ५१ ५२
भूतानामुत्पत्त्यादिनाभक्त्यभावेजातिविशेषोवृत्तादिविशेषोप्यकिंचित्करइत्याह नालमिति वृत्तमाचारः वृत्तंस्वरूपेचरितइतिपादवः ५३ ५४ आत्मौपम्येनात्मस्नेहवत्स्नेहेन ५५ वेदांतादिशा
स्त्रानधिकारित्वेनपापजीवत्वं नतुपापकरणात् अच्युततांच्युतिवर्जनंमोक्षंगताःसंतिहियस्मात्तस्मान्मुकुंदभक्तिरेवसंपाद्या ५६ तात्पर्यात्पुनरेतदेवाहिकरणंश्रेयइत्याह एतावानिति तस्यहरेःसर्वसत्ताप्रदत्वे
नावस्थितेरीक्षणंदर्शनंज्ञानमिति यदीयंभक्तिरिति ५७ इतिश्रीभागवतेमहापुराणेसप्तमेस्कंधेवि०टी०सप्तमोध्यायः ॥७॥ वैराग्याद्यंगोपांगरुचिरभक्तिसुंदरीसुंदरावयवसन्निवेशलक्षणपरमपुरुषार्थकरणंय
दुत्तरचरितमित्येतन्निदर्शयितुंनरसिंहावतारोनिरूप्यतेस्मिन्नध्याये तत्रदैत्यसुतैः प्रह्लादवर्णितंश्रुत्वाकिंकृतमितियुधिष्ठिरस्यमानसींशंकांपरिहरति अथेति निरवद्यत्वान्निर्दोषत्वात् १ एकांतेहरौसम्यक्
स्थितामैक्येस्थितामभिन्नविषयामितिवा यथायथावत्साकल्येन यथातैस्तेनोक्तंगृहीतंतथेतिवा २ तनयस्यानयंस्वसिद्धांतविरुद्धसिद्धांतं ३ पापेनपापसाधनेन ४ ५ यमक्षयंयमगृहं ६ कस्यबलंयस्य

सर्वेषामपिभूतानांहरिरात्मेश्वरःप्रियः ॥ भूतैर्महद्भिःस्वकृतैःकृतानांबीजसंज्ञितः ५१ देवोऽसुरोमनुष्योवायक्षोगंधर्वएवच ॥ भजन्मुकुंदचरणंस्वस्ति
मान्स्याद्यथावयम् ५२ नालंद्विजत्वंदेवत्वमृषित्वंवासुरात्मजाः ॥ प्रीणनायमुकुंदस्यनवृत्तंनबहुज्ञता ५३ नदानंनतपोनेज्यानशौचंनव्रतानिच ॥
प्रीयतेऽमलयाभक्त्याहरिरन्यद्विडंबनम् ५४ ततोहरौभगवतिभक्तिंकुरुतदानवाः ॥ आत्मौपम्येनसर्वत्रसर्वभूतात्मनीश्वरे ५५ दैतेयायक्षरक्षांसिस्त्रियः
शूद्राव्रजौकसः ॥ खगामृगाःपापजीवाःसंतिह्यच्युततांगताः ५६ एतावानेवलोकेस्मिन्पुंसांस्वार्थःपरःस्मृतः ॥ एकांतभक्तिर्गोविंदेयत्सर्वत्रतदीक्षणम् ॥
५७ इतिश्रीभागवतेसप्तमस्कंधेसप्तमोध्यायः ७ ॥ नारदउवाच ॥ अथदैत्यसुताःसर्वेश्रुत्वातदनुवर्णितम् ॥ जगृहुर्निरवद्यत्वान्नैवगुर्वनुशिक्षितम् १ अ
थाचार्यसुतस्तेषांबुद्धिमेकांतसंस्थिताम् ॥ आलक्ष्यभीतस्त्वरितोराज्ञआवेदयद्यथा २ श्रुत्वातदप्रियंदैत्योदुःसहंतनयानयम् ॥ कोपावेशचलद्भ्रात्रः
पुत्रंहंतुंमनोदधे ३ क्षिप्त्वापरुषयावाचाप्रह्लादमतदर्हणम् ॥ आहेक्षमाणःपापेनतिरश्चीनेनचक्षुषा ४ प्रश्रयावनतंदांतंबद्धांजलिमवस्थितम् ॥ सर्पःपदा
हतइवश्वसन्प्रकृतिदारुणः ५ हेदुर्विनीतमंदात्मन्कुलभेदकराधम ॥ स्तब्धंमच्छासनोद्वृत्तंनेष्येत्वाद्ययमक्षयम् ६ क्षुद्रस्ययस्यकंपंतेत्रयोलोकाःसहेश्व
राः ॥ तस्यमेऽभिहितंमूढशासनंकिंबलोत्यगाः ७ ॥ प्रह्लादउवाच ॥ नकेवलंमेभवतश्चराजन्सर्वेबलंबालिनांचापरेषाम् ॥ परावरेऽमीस्थिरजंगमायेब्र
ह्मादयोयेनवशंप्रणीताः ८ सईश्वरःकालउरुक्रमोसावोजःसहःसत्त्वबलेंद्रियात्मा ॥ सएवविश्वंपरमःस्वशक्तिभिःसृजत्यवत्यत्तिगुणत्रयेशः ९ जह्यासुरंभा
वमिमंस्वभावतःसमंमनोधत्स्वनसंतिविद्विषः ॥ ऋतेजितादात्मनउत्पथस्थितात्तद्विद्धयनंतस्यमहत्समर्हणम् १० सकिंबलः मद्बलमनादृत्यतवबलभूतःकइत्यर्थः ७

किंबलमित्यस्योत्तरमाह नकेवलमिति वेत्यनेनबलमानंदओजश्चसहोज्ञानमनाकुलमितिश्रुतिंसूचयति पराश्चावराश्चपरावरे एतदेवविशदयति स्थिरजंगमाइत्यादिना ८ ननुस्थाणुमन्येमपद्यतेशरीरत्वा
यदेहिनामितिश्रुतेः शिवंबलंवदंतिकेचित् कालाद्भवंतिभूतानिमन्यंतेकालंचितकाइत्यतः कालमथकथमयंनिर्णयः परमात्मबलमितितत्राह सइति ९ कुतोनसंतिविद्विषइतितत्राह ऋतेइति उत्पथस्थिता
त्तत्त्वमार्गविरुद्धमार्गेनिरतादजितात् अवशीकृतादात्मनोमनआदींद्रियग्रामादृते शुद्धमनआदिनाविचार्यमाणेशत्रवोनसंतीत्यर्थः ननु तर्हीदं युद्धोद्यमंपरंचक्रूर्विबुधादानवान्प्रतीत्यादिकथंसंगच्छतइत्याशं
क्यपथायोग्यतादर्शनलक्षणंसमत्वंकर्तव्यं अन्यथा शास्त्रविरोधइतिभावेनोक्तसमत्वफलमाह तद्विद्धीति तत्तद्योग्यतानुसारेणतन्मनोधारणंहरेःसमर्हणंविद्धीत्यन्वयः नैतदल्पंवितु महदित्याह महदिति १०

एतदेवविशदयति दस्यूनिति एकेभवादृशाःपुरंशरीरंलुंपतःषड्दस्यून्षडिंद्रियारूपचोरानाविजित्य दशदिशःस्वेनजिताइतिमन्यंतइत्यन्वयः आंतरशत्रुजयंविना कुतोबाह्यशत्रुजयइतिभावेनाह जितोति परेबाह्यशत्रवः यद्वा एकेमादृशाः षडिंद्रियजयोनास्तिचेत् बाह्यशत्रुविषयादशदिशःसुष्ठुजिताइतिमन्यंते शेषंपूर्ववत् ११ असुरावेशोदधिमग्नत्वात्पुत्रोक्तंत्वंनतस्यश्रोत्रविवरगतमभूत्प्रत्युतार्चिष्मत्याज्यहोमवदभूदितिभावेनोत्तरमवतारयति व्यक्तमिति अतिमात्रंवक्तव्यांशादाधिक्यंविकत्थसेऽबद्धंभाषसे विप्लुवामंडूकप्लुतिवदसंगताः १२ यदित्वदुक्तंयुक्तंस्यात्तर्हितथाप्रतीयेत तस्मादसंबद्धमितिभावेनाह यस्त्वयेति १३ अस्येदंफालितमित्याह सोहमिति गोपायेतरक्षेत १४ यदिंद्रियंजयस्वेतिवचःनहार्दमसंभावितत्वात्तत्राह एवमिति १५ स्तंभभंगेनाधेयपातेनसभ्यानांशरीरचूर्णनादिव्यथासंभावितेत्याशंक्यभगवत्सन्निधानबलाद्वज्रनिष्ठुरस्तंभोत्थनिर्ह्रादोभूदित्याह तदैवेतिअस्फुटत्अभिनत् स्वधिष्ण्योपगतंस्वकीयत्वेनाभिमतंसत्यलोकंप्राप्तंस्वधामाप्ययंस्वलोकनाशं १६ तदाहिरण्यकशिपुःकिंकृतवानितितदवस्थामाह अभिक्रमन्निति पुत्रमभिक्रमन् पदविक्षेपंकुर्वन्तस्यनिर्ह्रादस्यपदंविषयंकर्तृभूतंनददर्शेत्यन्वयः येननादेन अनेनाहिरण्यकाशेपोर्हृदयसारातिशयोदार्शितइति

दस्यून्पुरंषण्णविजित्यलुंपतोमन्यंतएकेस्वजितादिशोदश ॥ जितात्मनोज्ञस्यसमस्यदेहिनांसाधोःस्वमोहप्रभवाःकुतोपरे ११ ॥ हिरण्यकशिपुरुवाच ॥ व्यक्तंत्वंमर्तुकामोसियेतिमात्रंविकत्थसे ॥ मुमूर्षूणांहिमंदात्मन्ननुस्युर्विप्लवागिरः १२ यस्त्वयामंदभाग्योक्तोमदन्योजगदीश्वरः ॥ क्वासौयदिससर्वत्र कस्मात्स्तंभेनदृश्यते १३ सोहंविकत्थमानस्यशिरःकायाद्धरामिते ॥ गोपायेतहरिस्त्वाद्ययस्तेशरणमीप्सितः १४ ॥ नारदउवाच ॥ एवंदुरुक्तैर्मुहुरर्दयन्रुषासुतंमहाभागवतंमहासुरः ॥ खड्गंप्रगृह्योत्पतितोवरासनात्स्तंभंतताडातिबलःस्वमुष्टिना १५ तदैवतस्मिन्निनदोतिभीषणोबभूवयेनांडकटाहमस्फुटत् ॥ यंवैस्वधिष्ण्योपगतंह्यजादयःश्रुत्वास्वधामाप्ययमंगमेनिरे १६ अभिक्रमन्पुत्रवधेप्सुरोजसानिशम्यनिर्ह्रादमपूर्वमद्भुतम् ॥ अंतःसभायांनददर्शतत्पदंवितत्रसुर्येनसुरारियूथपाः १७ सत्यंविधातुंनिजभृत्यभाषितंव्याप्तिंचभूतेष्वखिलेषुचात्मनः ॥ अदृश्यतात्यद्भुतरूपमुद्वहन्स्तंभेसभायांनमृगंनमानुषम् १८ ससत्त्वमेवंपरितोविपश्यन्स्तंभस्यमध्यादनुनिर्जिहानम् ॥ नायंमृगोनापिनरोविचित्रमहोकिमेतन्नृमृगेंद्ररूपम् १९ मीमांसमानस्यसमुत्थितोग्रतोन्नृसिंहरूपस्तदलंभयानकम् ॥ प्रतप्तचामीकरचंडलोचनंस्फुरत्सटाकेसरजृंभिताननम् २० करालदंष्ट्रंकरवालचंचलक्षुरांतजिह्वंभ्रकुटीमुखोल्बणम् ॥ स्तब्धोर्ध्वकर्णंगिरिकंदराद्भुतव्यात्तास्यनासंहनुभेदभीषणम् २१

ज्ञायते १७ आकाशविशेषगुणस्यशब्दस्यचेतनाश्रयत्वेनदर्शनात् किमिदमितिमीमांसमानेषुसत्सुतदाश्रयोप्यदर्शि इत्याह सत्यंविधातुमिति रूपंविशिनष्टि नमृगमितिनाभावान्यविरोधेष्वितिवचनात्न मृगंकेवलंमृगस्यविद्यमानंनभवति नमानुषंमानुषस्यविद्यमानंन किंतुतयोःसमाहारलक्षणम् १८ एवंविधंसत्त्वंप्राणविशिष्टंरूपमुद्वहंस्तस्याग्रतोग्रेसमुत्थितोऽदृश्यतेत्यन्वयः किंविशिष्टस्यस्तंभस्यमध्यान्निर्जिहानमुत्तिष्ठमानमेतन्नृमृगेंद्ररूपंकिमितिमीमांसमानस्यविचारंकुर्वतोहिरण्यकशिपोः तद्रूपंविशिनष्टि तदलमित्यादिना चामीकरंसुवर्णंसटाकेसरैःकर्णगतरोमविशेषलक्षणांतर्दलैर्जृंभितंविकसितमाननंयस्यसतथा १९ २० करालाःक्रूरादंष्ट्रायस्यसतथाकरवालवत्चंद्रहासवच्चंचलंक्षुरांतःक्षुरधारातद्वात्स्थिताजिह्वायस्यतत्तथा भ्रकुट्यामुखेनपूर्वभागेनोल्बणंक्रूरं स्तब्धौदृढौऊर्ध्वीकृतौचकर्णौयस्यतत्तथा तद्गिरिकंदरवत् अद्भुतंव्यात्तंचास्यंनासापुटंचयस्यतत्तथा तत्हनुभेदेनविदीर्णकपोलेनभीषणंभयजनकम् २१

ग्रीवाचोरुचवक्षःस्थलंचतानितथा अदीर्घाणिपीवराणिग्रीवोरुवक्षःस्थलानियस्यतत्तथातत् चंद्रोहेमाभ्रहिमांशौनाचंद्रकंरोचिषेपिवेत्यभिधानात् चंद्रांशुवर्णवद्गौरैररुणैस्तनूरुहैः छुरितंव्याप्तम् पीतेरुणेसितेगौरइत्याभिधानम् विष्वक्प्राप्तैर्भुजानीकशतैर्युक्तम् बहुत्वापेक्षयानीकेत्युक्तम् २२ निजमात्मीयनित्ययोरित्यमरः निजान्यात्मीयानिनखापेक्षयेतराणिचक्रादीनियानितैरायुधप्रवेकैरायुधमुख्यैर्विद्रावितादैत्यदानवायेनतत्तथोक्तंतत् यद्वा निजंसहजंनखलक्षणमायुधम् इतराणिपृथक्स्थितानिचक्रादीनीतिमेदिनीसारिणानिसर्गशत्रुणाहारिणाअनेनरूपेणप्रायेणममायंवधःस्मृतोनिरूपितःकिं स्मृतोवधोयंकिमितिवा कीदृशस्यमेपुत्रवधेसमुद्यतस्य पुत्रहंतुर्योवधःशास्त्रेषुस्मृतोविहितः सोयमद्यप्राप्तःकिंचेति २३ एवंविमृश्यबंधान्निवृत्तःकिंनेत्याह एवमिति कमभ्यपतदित्यतउक्तम् नृसिंहंप्रतीति दैत्यकुंजरोदैत्येंद्रः निदर्शनमाह अलक्षितइति अलक्षितःसाहसिकः पतंगमःशलभः २४ द्विसप्तलोकैकारेःकेवलंतुच्छीकरणंभगवद्भक्तिवैशद्यान्नतत्त्वतइतिनेत्याह नतदिति सत्त्वधामनिबलज्ञानसमाहारमूर्तौपराक्रममूर्तौवाजगदादौतमःपानंपुरुषरूपेण अनेनजगदावरकंतमःपानतोहरेरसुरभस्मीकरणंकिमितिदर्शितम् अथोलोकंविडंबयतोहरेरसुरेणसहसमरप्रकारंवर्णयतिततइति २५ तस्यगदाशिक्षालाघवंवक्ति सतस्येति हस्तोत्कलितःहस्ताद्गलितउत्प्लुतोवा २६ तस्यहरेर्विडंबनम् अजानतामसुराणांनिरूपणप्रकारंवक्ति असाध्विति हतौजसः भ्रष्टावष्टंभाइवघनेनच्छदाच्छादनंयेषांतेतथा मेघच्छाया

दिविस्पृशत्कायमदीर्घपीवरग्रीवोरुवक्षःस्थलमल्पमध्यमम् ॥ चंद्रांशुगौरैश्छुरितंतनूरुहैर्विष्वग्भुजानीकशतैर्नखायुधम् २२ दुरासदंसर्वनिजेतरायुधप्रवेकविद्रावितदैत्यदानवम् ॥ प्रायेणमेऽयंहरिणौरसारिणावधःस्मृतोऽनेनसमुद्यतस्यकिम् २३ एवंब्रुवंस्त्वभ्यपतद्गदायुधोनदन्नृसिंहंप्रतिदैत्यकुंजरः ॥ अलक्षितोऽग्रौपतितःपतंगमोयथानृसिंहौजसिसोऽसुरस्तथा२४नतद्विचित्रंखलुसत्त्वधामनिस्वतेजसायोनुपुरापिबत्तमः ॥ ततोभिपद्याभ्यहनन्महासुरोरुषानृसिंहंगदयोरुवेगया २५ तंविक्रमंतंसगदंगदाधरोमहोरगंतार्क्ष्यसुतोयथाग्रहीत् ॥ सतस्यहस्तोत्कलितस्तदासुरोविक्रिडितोयद्वदहिर्गरुत्मतः २६ असाध्वमन्यंतहतौजसोऽमराघनच्छदाभारतसर्वधिष्ण्यपाः ॥ तंमन्यमानोनिजवीर्यशंकितंयद्वस्तमुक्तोनृहरिंमहासुरः २७ पुनस्तमासज्जतखड्गचर्मणीप्रगृह्यवेगेनगतश्रमोमृधे ॥ तंश्येनवेगंशतचंद्रवर्त्मभिश्चरंतमच्छिद्रमुपर्यधोहरिः २८ कृत्वाट्टहासंखरमुत्स्वनोल्बणंनिमीलिताक्षंजगृहेमहाजवः ॥ विष्वक्स्फुरंतंग्रहणातुरंहरिर्व्यालोयथाखुंकुलिशाक्षतत्वचम् २९ द्वार्यूरवापात्यददारलीलयानखैर्यथाहिंगरुडोमहाविषम् ॥ संरंभदुष्प्रेक्ष्यकरालලोचनोव्यात्ताननांतंविलिहन्स्वजिह्वया ३०

यांविलीनाइवलुप्तोपमेयम् सर्वधिष्ण्यपाःसर्वनक्षत्रपयतःचंद्रादयोमराःतदसाध्वमन्यंतेत्यन्वयः तत्रहेतुस्तंमन्यमानइति नृहरेर्हंस्तमुक्तोसुरः तंनृहरिंनिजवीर्यआत्मपराक्रमेशंकितंमन्यमानोभूदीतियत्तदिति २७ हरेर्हस्तमुक्तोसुरःपराद्रवत् उताभ्यपतदितिसंशयोमाभूदित्याह पुनस्तमिति आसज्जतसक्तोभूद्युद्धायसन्नद्धोभूदित्यर्थःशतचंद्रवर्मभिश्छतचंद्रवर्मभ्यांखड्गचर्मणीतिप्रकृतत्वात् भद्रंकर्णेभिःशृणुयामदेवाइत्यादिश्रुतेः ॥ छांदसाभिप्रायेणार्यंप्रयोगःसंभाव्यतेच परिभ्रमणेशिक्षाप्रकर्षद्रष्टृणांद्वेएवबहूनीवदृश्यंतइत्यतोवाबहुवचनंयुज्यते अच्छिद्रंनिरवकाशमितिक्रियाविशेषणेनैतदेवसूचयति असुरवीर्यमाशंकमानोहरिःकिमकरोदितितत्राह हरिरिति २८ विष्वक्परितःस्फुरंतंभ्रमंतमित्यनेनापिशिक्षोत्कर्षंध्वनयति हरिःपुनर्ग्रहणेनातुरमकरोदितिशेषः अनेनातुरस्वरंलक्षयति तत्रदृष्टांतमाह व्यालइति व्यालःसर्पःखननशीलत्वादाखुः २९ ब्रह्मवररक्षणार्थमाह द्वारीति द्वार्यधस्तिरश्चीनदारुणिस्थित्वाउरावंके उत्तानतयापात्यअत्रापिहस्तत्वंछांदसम् संरंभेणद्वेषादात्यंतिककोपेन दुष्प्रेक्ष्येकरालेलोचनेयस्य व्यात्ताननांतंविवृतवदनस्याधरोष्ठम् ३०

असृक्वसयारुधिरांबदुनाक्तेरूषिते अतएवारुणकेसराननेयस्यसतथोक्तःसहरिःसिंहः नकेवलमेनमेवहतवान्किंतुतदनुचरानासुरानित्याह नखांकुरेति ३१ अहन्हतवान्नखशस्त्रपाणिभिर्नखैःशस्त्रैः पाणिभिश्चहरेर्दोर्दंडानांयूथानुपथान् निकराकृष्टान् तदवसरविक्रमंवक्ति सटावधूताइति ३२ दिगिभादिग्गजामदंजहुस्त्यक्तवंतःप्रोत्सर्पतप्रोदसर्पत उद्गतेत्यर्थः ३३ सभावस्थानंतस्यवक्ति ततइति संभृततेजसराशीकृततेजसम् अलक्षितंनकेनापिदृष्टम् ३४ नन्वयंजयःकेनापिनलक्षितःतदंकुरव्यक्त्यदर्शनादित्याशक्य पुरुषकोपोपशमनंस्त्रीणामेव,सुशकमितिभावेनसुरस्त्रीपुष्पवर्षप्रकारमाह निशम्येति लोकत्रयस्यमस्तकज्वरंशिरोरोगायमाणम् महर्षातिरेकेणोत्कलितंविकासितमाननंयासांतास्तथाताः ३५ सुरस्त्रीवृष्टपुष्पसौरभ्याघ्राणेनकिंचिच्छांतकोपत्वादस्माकमप्ययमवसरइतिमत्वानानादेवानांनभसिविमानावलिसांकुल्यप्रकारंवक्ति तदेति ३६ सुराणामानकादुंदुभयः ३७ चंडक्षुब्धानांचित्ताह्लादकरीस्तुतिरेवेतिभावेनब्रह्मादीनामुपक्रममाह तदुपव्रज्येति येपूर्वमुपगंतुंतत्रासतेब्रह्माद

असृग्वसाक्तारुणकेसराननोयथांत्रमालीद्विपहत्ययाहरिः ॥ नखांकुरोत्पाटितहृत्सरोरुहंविसृज्यतस्यानुचरानुदायुधान् ३१ अहन्समंतान्नखशस्त्र
पाणिभिर्दोर्दंडयूथानुपथान्सहस्रशः ॥ सटावधूताजलदाःपरापतन्ग्रहाश्चतद्दृष्टिविनष्टरोचिषः ३२ अंभोधयश्चासहताविचुक्षुभुर्निर्ह्रादभीतादिगिभाज
हुर्दिशः ॥ द्यौस्तत्सटाक्षिप्तविमानसंकुलाप्रोत्सर्पतक्ष्माचपदातिपीडिता ३३ शैलाःसमुत्पेतुरमुष्यरंहसातत्तेजसाखंककुभोनरेजिरे ॥ ततःसभायामुपविष्ट
मुत्तमेनृपासनेसंभृततेजसंविभुम् ॥ अलक्षितंमैरवमत्यमर्षणंप्रचंडवक्त्रंनबभाजकश्चन ३४ निशम्यलोकत्रयमस्तकज्वरंतमादिदैत्यंहरिणाहतंमृधे ॥ प्र
हर्षवेगोत्कलिताननामुहुःप्रसूनवर्षैर्ववृषुःसुरस्त्रियः ३५ तदाविमानावलिमिर्नभस्थलंदिदृक्षतांसंकुलमासनाकिनाम् ३६ सुरानकादुंदुभयोहिजघ्निरेगंध
र्वमुख्यानृतुजगुःस्त्रियः ३७ तदुपव्रज्यविबुधाब्रह्मेंद्रगिरिशादयः ॥ ऋषयःपितरःसिद्धाविद्याधरमहोरगाः ३८ मनवःप्रजानांपतयोगंधर्वा
प्सरचारणाः ॥ यक्षाःकिंपुरुषास्तातवेतालाःसहकिन्नराः ३९ तेविष्णुपार्षदाःसर्वेसुनंदकुमुदादयः ॥ मूर्ध्निबद्धांजलिपुटाआसीनंतीव्रतेजसम् ॥ ई
डिरेनरशार्दूलंनातिदूरचराःपृथक् ४० ॥ ब्रह्मोवाच ॥ नतोस्म्यनंतायदुरंतशक्तयेविचित्रवीर्यायपवित्रकर्मणे ॥ विश्वस्यसर्गस्थितिसंयमान्गुणैःस्वलील
यासंदधतेऽव्ययात्मने ४१ रुद्रउवाच ॥ कोपकालोयुगांतस्तेहतोयमसुरोल्पकः ॥ तत्सुतंपाह्यनुसृतंभक्तंतेभक्तवत्सल ४२ इंद्रउवाच ॥ प्रत्यानीताःपरम
भवतात्रायतानःस्वभवगादैत्याक्रांतंहृदयकमलंत्वद्गृहंप्रत्यबोधि ॥ कालग्रस्तंकियदिदमहोनाथशुश्रूषतांतेमुक्तिस्तेषांनाहिबहुमतानारसिंहापरैःकिम् ४३

यस्तंपृथगीडिरइत्यन्वयः ३८ नातिदूरचराःकिंचित्समीपवर्तिनः ३९ ४०, तत्रपृथक्हरिपृथक्लक्षणस्तुतिप्रकारंब्रूते नतोस्मीति गुणैःसत्त्वादिभिःस्वलीलयास्वरूपभूतलीलया अव्ययात्मनेनित्यदेहाय ४१ येनायमसुरोहतःसकोपकालोयुगांतोयुगावसानोचितो नेदानीमत्यल्पासुरहनने तस्मात्कोपंसंहृत्यानुसृतंशरणंप्राप्तंतस्यसुतंप्रह्लादंरक्षेत्यन्वयः ४२ हेपरम नत्रायतारक्षताभवतादैत्यहृतायज्ञेषुस्वभागाअस्मद्योग्यहविर्भागाःप्रत्यानीताइत्यन्वयः तपोबलेनदैत्येनाक्रांतंनिमीलितंचतवगृहंतववासयोग्यंहृदयकमलंप्रत्यबोधिविकसितमस्माकं भवतेतिशेषः विरक्तिभक्तिभ्यामेववशीकर्तुंयोग्योनान्येनेत्याशयेनाह कालेति नाथयदिदंस्वर्गादिस्थानंकालग्रस्तंकियत्सुखजनकंनकिमपीतिमत्वाभजति तेशुश्रूषतांत्वांसेवमानानांतेषांकरगतामुक्तिरपिबहुमतानहियस्मात्तस्मात् हेनारसिंहतेषांभक्तानांअपरैर्धर्मादिभिःप्राप्तैःकिमित्यन्वयः ४३

हेआदिपुरुषत्वंयदात्मतेजआत्मनोहरेर्ज्ञानलक्षणंतेजस्तपोनोस्माकंपरमश्रेयसेआत्थ येनतपसाआलोचनरूपेणमहिम्नेदंसमस्तमात्मगतंव्यार्षं हेशरण्यपाल अमुनादैत्येनविप्रलुप्तंनष्टंतत्तपोज गद्रक्षार्थंगृहीतवपुषानरसिंहात्मना पुनरप्यस्मान्प्रतिकटाक्षमन्वमंस्थाउद्धरिष्यामीतिशेषः तपआलोचनइतिधातोः यस्यज्ञानमयंतपइतिश्रुतेश्च भगवज्ज्ञानसाहश्यादस्यात्मतेजइत्यभेदवचनंयु ज्यते विप्रलोपस्तिरोधानंनस्वरूपनाशः ४४ योभवान्नखविदीर्णवपान्नखविदारितान्त्रात्तस्यदैत्यस्योदरादाच्छंत् ऋच्छगतावितिधातोः श्राद्धान्यस्माकमगमयदित्यन्वयः ४५ योगसिद्धामाणि माद्यष्टैश्वर्यलक्षणांगतियोगःपवनविजयःतपःकायक्लेशलक्षणंतयोर्बलेन नानाविधोदर्पोयस्यसतथा ४६ पृथक्जगद्विलक्षणस्यहरेर्धारणयाऽखंडोपासनयानुरुद्धांलब्धांविद्यामंतर्धानलक्षणाम् ४७ आसांस्त्रीणामर्थेदत्तानंद ४८ निदेशकारिणआज्ञाकारिणः ४९ हेपरेशत्वयाभिसृष्टापेनदैत्येननिषिद्धावयंप्रजाःनसृजामोवेसदैत्यस्त्वयैवतुइदानींभिन्नवक्षाःशेते तथायमवतारोजगन्मंगलं

॥ ऋषयऊचुः ॥ त्वंनस्तपःपरममात्थयदात्मतेजोयेनेदमादिपुरुषात्मगतंससर्ज ॥ तद्विप्रलुप्तममुनाद्यशरण्यपालरक्षागृहीतवपुषापुनरन्वमंस्थाः ४४ ॥ पितरऊचुः ॥ श्राद्धानिनोधिबुभुजेप्रमभंतनूजैर्दत्तानितीर्थसमयेपितिलान्सहाद्भिः ॥ तस्योदरान्नखविदीर्णवपाद्यआर्च्छत्तस्मैनमोभगवतेऽखिलक र्मगोप्त्रे ४५ ॥ सिद्धाऊचुः ॥ योनोगतियोगसिद्धामसाधुरहार्षीद्योगतपोबलेन ॥ नानादर्पंतंनखैर्निर्ददारतस्मैतुभ्यंप्रणताःस्मोनृसिंह ४६ ॥ विद्या धराऊचुः ॥ विद्यांपृथग्धारणयानुरुद्धांन्यषेधदज्ञोबलदृप्तवीर्यः ॥ सयेनसंख्येपशुवद्धतस्तंमहानृसिंहंप्रणताःस्मनित्यम् ४७ ॥ नागाऊचुः ॥ येनपा पेनरत्नानिस्त्रीरत्नानिहृतानिनः ॥ तद्वक्षःपाटनेनासांदत्तानंदनमोस्तुते ४८ ॥ मनवऊचुः ॥ मनवोवयंतवनिदेशकारिणोदितिजेनदेवपरिभूतसेतवः ॥ भवताखलःसउपसंहृतःप्रभोकरवामतेकिमनुशाधिकिंकरान् ४९ ॥ प्रजापतयऊचुः ॥ प्रजेशावयंतेपरेशाभिसृष्टानयेनप्रजावैसृजामोनिषिद्धाः ॥ सए षत्वयाभिन्नवक्षास्तुशेतेजगन्मंगलंसत्त्वमूर्तेऽवतारः ५० गंधर्वाऊचुः ॥ वयंविभोतेनटनाट्यगायकायेनात्मसाद्वीर्यबलौजसाकृताः ॥ सएषनीतोभवता दशामिमांकिमुत्पथस्थःकुशलायकल्पते ५१ ॥ चारणाऊचुः ॥ हरेतवांघ्रिपंकजंभवापवर्गमाश्रिताः ॥ यएषसाधुहृच्छयस्त्वयासुरःसमापितः ५२ ॥ यक्षाऊचुः ॥ वयमनुचरमुख्याःकर्मभिस्तेमनोज्ञैस्तइहदितिसुतेनप्रापितावाहकत्वम् ॥ अनुजनपरितापंतत्कृतंजानतातेनरहरउपनीतःपंचतांपंचविं श ५३ किंपुरुषाऊचुः ॥ वयंकिंपुरुषास्त्वंतुमहापुरुषईश्वरः ॥ अयंकुपुरुषोनष्टोधिक्कृतःसाधुभिर्यतः ५४ ॥ वेताळाऊचुः ॥ सभासुसत्रेषुतवामलंय शोगीत्वासपर्यांमहतींलभामहे ॥ यस्तांव्यनैषीद्दृशमेषुदुर्जनोदिष्ट्याहतस्तेभगवन्यथामयः ५५ ॥ किन्नराऊचुः ॥ वयमीशकिन्नरगणास्तवानुगा दितिजेनविष्टिममुनानुकारिताः ॥ भवताहरेसवृजिनोऽवसादितोनरसिंहनाथविभवायनोभव ५६

जगतिशुभसारभूतः जगतोमंगलमुद्दिश्यगृहीतोवा ५० नटोनटनंकथाबंधवचनं नाट्यंशृंगारादिभावदर्शनं एतयोर्गायकाःएतदुक्तं नटनंतुकथाबंधंनाट्यकं भावदर्शनमिति वीर्यबलौजसायेना त्मसात् आत्माधीनाःकृताः कल्पतेसमर्थोभवति ५१ साधूनृहरंतीतिसाधुहृतःसज्जनारयस्तेषांशयआश्रयःसाधूनांहृदयंश्रयतितापदत्वेनेतिवा समापितोविनाशंगमितः भवस्यापवर्गस्यत्यागो यस्मात्तत्तथातद्भवात्संसारान्मोक्षोयस्मात्तत्तथेतिवा ५२ पंचतांविनाशं हेपंचविंशचतुर्विंशानांमध्यइतिशेषः ५३ किंपुरुषाःपुरुषाभासाः ५४ सत्रेषुसभासुसत्रकारिणः दिष्ट्यासुखंकर्तु ५५ वेत्रनहीन तयाक्रियमाणंकर्मविष्टिवृजिनंदुःखंकरोतीतिवृजिनःकर्त्रर्थःप्रत्ययः सअपसादितोऽपहत्यनाशितः विभवायसंसारान्मुक्तये ५६

हरिनरयोर्नृसिंहनरयोरूपंविधिकरोभूत्यःकिंविप्रशापादसुरयोनिमाप्तस्य ५७ इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेवि०टी०अष्टमोध्यायः ॥८॥ अत्रापिभक्तमाहात्म्यमेवप्रकटयति ब्रह्मादिदेवतास्तुत्यनंतरं कथंकथाप्रसंगइतिश्रोतुरांतरीशंकांपरिहर्तुमाह एवमिति एवंस्तुवंतोपि उपेतुंसमीपंगंतुं मन्युसंग्रहंकोपसारभूतं मनअवबोधनइतिधातुः ज्ञानसारंप्रत्ययसारमितिश्रुतेः ज्ञानिविवक्षयैतत् ननु तर्हिक थंसमीपंगंतुंनाशकन्नित्युच्यत इतिचेदज्ञेयत्वज्ञापनायेतितात्पर्यं नतत्रचक्षुर्गच्छतिनवाग्गच्छति तेभ्योहप्रादुर्बभूव तन्नव्यजानतेत्यादिश्रुतेरेतदेवदर्शयति सुदुरासदमिति सुखेनविषयीकर्तुमशक्यम् १ एतदेवविवृणोति साक्षादिति सरस्वत्यादिव्यावृत्त्यर्थंसाक्षादिति अदृष्टाश्रुतपूर्वत्वादन्यैःसाधारणैर्जनैरितिशेषः द्वावेतौनित्यमुक्तावित्यादेः तर्हिनोपेयायशंकितेत्येतत्कथंघटतीतिचेत्मयापीश्वरः प रिच्छेद्योनभवतिकिंत्वन्यैरिवज्ञापनायासुरजनमोहनायेतिवा अदृष्टाश्रुतपूर्वत्वादन्यैःसाधारणैर्जनैः नृसिंहशंकितेवश्रीर्लोकमोहायनोययावितिवाक्यासिद्धम् २ ममेदानींप्रह्लादेवात्सल्यातिश योस्तिभक्तानांमत्सेवातिशयफलाधिकार्थमिति भगवन्मनोज्ञापनायब्रह्मणाप्रह्लादःप्रेषितइत्याशयेनाह प्रह्लादमितिअयमपिलक्ष्मीकांतसमीपागमनेहेतुरन्यथाप्रह्लादेवात्सल्यातिशयोनप्रकटितःस्यात्तदु क्तं प्रह्लादेचैववात्सल्यंदर्शनायहरेरपि ज्ञात्वामनस्तदाब्रह्माप्रह्लादंप्रेषयत्तदेति प्रकृष्टोह्लादोनिर्वृतिर्यस्यसतथाइत्यनेनप्रह्लादशब्दनिरुक्तिःसूचिता लक्ष्म्यादिवत्सलतांहित्वाप्रह्लादेतत्करणाद्धरेर्वैषम्यबु

॥ विष्णुपार्षदाऊचुः ॥ अद्यैतद्धरिनररूपमद्भुतंतेदृष्टंनःशरणदसर्वलोकशर्म ॥ सोयंतेविधिकरईशविप्रशापात्तस्येदंनिधनमनुग्रहायविद्मः ५७ इति श्रीभागवतेमहापुराणेसप्तमस्कंधेऽष्टमोध्यायः ॥ ८ ॥ ९ ॥ नारदउवाच ॥ एवंसुरादयःसर्वेब्रह्मरुद्रपुरस्सराः ॥ नोपेतुमशकन्मन्युसंग्रहंसुदुरास दम् १ साक्षाच्छ्रीःप्रेषितादेवैर्दृष्ट्वातन्महदद्भुतम् ॥ अदृष्टाश्रुतपूर्वत्वात्सानोपेयायशंकिता २ प्रह्लादंप्रेषयामासब्रह्मावस्थितमंतिके ॥ तातप्रशमयोपै हिस्वपित्रेकुपितंप्रभुम् ३ तथेतिशनकैराजन्महाभागवतोर्भकः ॥ उपेत्यभुविकायेननमाविधृतांजलिः ४ स्वपादमूलेपतितंतमर्भकंविलोक्यदेवःकृ पयापरिप्लुतः ॥ उत्थाप्यतच्छीष्ण्यदधात्करांबुजंकालाहिनिर्दष्टधियांकृताभयम् ५ सतत्करस्पर्शधुताखिलाशुभःसपद्यमिव्यक्तपरात्मदर्शनः ॥ तत्पा दपद्मंहृदिनिर्वृतोदधौहृष्यत्तनुःक्लिन्नहृदश्रुलोचनः ६ अस्तौषीद्धरिमेकाग्रमनसासुसमाहितः ॥ प्रेमगद्गदयावाचातन्नयस्तहृदयेक्षणः ७ ॥ प्रह्लादउवा च ॥ ब्रह्मादयःसुरगणामुनयोथसिद्धाःसत्त्वैकतानमतयोवचसांप्रवाहैः ॥ नांतंपरस्यपरतोप्यधुनापियांतिकिंतोष्टुमर्हतिसमेहरिरुग्रजातेः ८

द्धिर्नाशंकनीया असुरजनमोहनार्थोपपत्तेरुक्तंच एकत्रैकस्यवात्सल्यंविशेषादर्शयेद्धरिः अवरस्यापिमोहायेतिभक्तयादिदाननैवकरोतिकिंतुवात्सल्यानुसारेणेत्याभिप्रायेणदर्शितं क्रमेणैवापिवत्सलइत्युक्तं उपेहिउपेत्य ३ ४ नृहरेःप्रह्लादेवात्सल्यातिशयंदर्शयति स्वपादमूलेइति ब्रह्मादिकरांबुजेभ्योहरेःकरांबुजंविशिनष्टि कालाहीति कालाख्याहिनानिर्दष्टाग्रस्ताधीर्येषांतेतथातेषाम् ५ इतरकरस्पर्शवै शिष्ट्यदर्शनायेशकरस्पर्शफलाभिव्यक्तिंवक्ति सतत्करइति सभगवत्करस्पर्शविधूतसमस्तपापत्वात्तत्क्षणएवसम्यगंकुरितपरमात्मज्ञानः अभिव्यक्तंपरस्यहरेरात्मनः ससारिणश्चदर्शनं स्वरूपविषयज्ञानंय स्यसतथेतिवाक्लिन्नहृद्भक्तिलक्षणामृतजलेनार्द्रीकृतांतःकरणोऽश्रुणायुक्तलोचनेयस्यसतथा ६ तत्त्वज्ञानमस्योत्पन्नमित्यर्थोकचिद्भमित्यतस्ततरतुत्याव्यज्यतइतिभावेनदर्शयति अस्तौषीदिति ७ सत्त्वेनित्याविर्भूतबलज्ञानसमाहारएकएवनान्यइतिवितानमतिर्विस्तृतबुद्धिर्येषांतेसत्त्वैकतानमतयः यद्वा सत्त्वेहरावेवनियतबुद्धयः अधुनापरतःपरस्ययस्यांतंनापिनैवयांति सहरिरुग्रजातेरसुरजाते र्मेतोष्टुंस्तोतुमर्हतिकिमित्यन्वयः नतेविष्णाविति श्रुतेः ८

भक्तपाननुभक्तयैव यूथपायगजेंद्राय सेनानेतरिनागेंद्रेयूथनाथःप्रकीर्तितइत्यभिधानं अनेनधनादिकमपिभक्तयुपबृंहितंसफलमित्युक्तंभवति ९ इतोपिभक्तिरेवहरेःप्रसादेप्रधानसाधनामित्याह विप्रादिति द्विषड्गुणाद्बादशगुणाएतैर्युक्तात् ज्ञानंचसत्यंचदमःशमश्चअमात्सर्यंह्रीस्तितिक्षानसूया दानंचयज्ञश्चतपःश्रुतंचमहाव्रतंद्वादशब्राह्मणस्य एतेभ्यःप्रवरोद्बादशेभ्यःसर्वामपीमांपृथिवींप्रशिष्यात् त्रिभिर्द्वाभ्यामेकतोवाविशिष्टोनास्यसमोस्तीतिवेदितव्यइत्येतेभक्तिमतएवसंभवंतिनान्यस्यकचित्संभवेप्यंततोनतेभ्योर्थःस्यात् अनेवंविन्महत्पुण्यंकर्मकरोति बद्धास्यांततःक्षीयतएवेतिश्रुतेः तस्माद्भक्तिरेवप्रयोजिकेतितात्पर्यं सकलंमनआदिकंपुनातिविषयोपरक्तंमलंनिरस्यदर्पणवत्स्वच्छंकरोतिजगत्पुनातीतिवा यस्तुविज्ञानवान्भवतियुक्तेनमनसासदा तस्येंद्रियाणिवश्यानिसदश्वाइवसारथेरितिश्रुतेःअन्यत्रबाधकमाह नात्विति भूरिमानोहंकर्तेत्यभिमंतानैवपुनातीत्यन्वयः समर्थमन्यसेयच्चकुंतीपुत्रंवृकोदरं तन्मिथ्याहिनमेकृत्स्नंप्रभावंवेत्थभारत मत्समोहिगदायुद्धेपृथिव्यांनास्तिभारत नासीत्कचिदतिक्रांतोभविताचानकश्चनेत्यादिभारतेदुर्योधनोक्ताहंकारप्रतीतेरेवंविधोभूरिमानइत्यर्थः नाविरतोदुश्चरितान्नाशतोनासमाहितः नाशांतमानसोवापिप्रज्ञानेनैवमाप्नुयादितिश्रुतेः शमोदमस्तपः शौचंक्षांत्यार्जवविरक्तता ज्ञानविज्ञानसंतोषाःसंत्याज्येपिद्विषड्गुणाइतिकेचित् सत्यंदमस्तपःशौचंसंतोषोह्रीःक्षमार्जवं ज्ञानंशमोदयाध्यानंविप्रस्यैतेद्विषड्गुणाइतिकेचित् असंप्रदायज्ञैरुक्तत्वादत्रनग्राह्यमेतन्मतद्वयमिति १० ननुश्वपचंवरिष्ठमितीदमसंभावितंवर्णहीनत्वेनतत्कृतसपर्यास्वीकारानुपपत्तेर्नार्हंतथाग्नियजमानहविर्वितानैरित्यादावन्यथाकथनाच्चेतितत्राह नैवेति अयंप्रभुरविदुषोज्ञानोपदेशानधिकारिणः पूर्वचीर्णपुण्यनिचयास्तज्ज्ञानेनयथार्थतत्त्वज्ञानिनोवर्णहीनाज्जनान्मानंपूजांवृणीतेस्वीकरोति इतियत्तदात्मनोर्थेअप्राप्तप्राप्तयेनैवेत्यन्वयः कुतइत्यतउक्तं निजेति निजलाभेननित्यानंदेन

मन्येधनाभिजनरूपतपःश्रुतौजस्तेजःप्रभावबलपौरुषबुद्धियोगाः ॥ नाराधनायहिभवंतिपरस्यपुंसोभक्त्यातुतोषभगवान्नयूथपाय ९ विप्राद्विषड्गुणयुतादरविंदनाभपादारविंदविमुखाच्छ्वपचंवरिष्ठम् ॥ मन्येतदर्पितमनोवचनात्मगेहप्राणःपुनातिसकलंनतुभूरिमानः १० नैवात्मनःप्रभुरयंनिजलाभपूर्णोमानंजनादविदुषःकरुणोवृणीते ॥ यद्यज्जनोभगवतेविदधीतमानंतच्चात्मनेप्रतिमुखस्यथामुखश्रीः ११

पूर्णइति हेतुगर्भविशेषणं कोह्येवान्यात्पोवैभूमातत्सुस्वामित्यादिश्रुतेःननुस्वार्थाभावेसपर्यास्वीकारेकिंकारणमितितत्राह करुणइति करुणयतीतिकरुणः देवस्यैषस्वभावोयं यमेवैषवृणुतेइत्यादिश्रुतेःकर्मणःक्षणभंगुरत्वात् कृपयातत्फलप्रदानायतत्स्वीकारोपचारइतितात्पर्यं विद्वद्भिःक्रियमाणं मानंस्वार्थमपिकिंनस्यादित्याशंक्यविशेषमाह यद्यदिति विद्वदविद्वद्भेदमंतरेणसमानोजनःभगवतेयद्यन्मानंविदधीततत्तदात्मनेचस्वप्रयोजनायैवेत्युपगंतव्यं अत्रदृष्टांतमाह प्रतिमुखस्येति तथालंकृतमुखश्रीर्दर्पणादौप्रतिफलितस्यप्रतिबिंबलक्षणमुखस्यस्वालंकारमंतरेणश्रीर्लभ्यतेतथास्वबिंबभूतपरमात्मनोनिर्दोषगुणराशिध्यानलक्षणमानेनतत्प्रतिबिंबत्वात्स्वस्यापिनिर्दोषसुखलक्षणश्रीर्लभ्यतइत्यर्थः अनेनब्रह्मादिजीवराशिरत्यंततुच्छीभूतइतिसूचितं श्वपचादपिकष्टत्वंब्रह्मेशानादयःसुराइत्यादेः अयंतुनरसिंहआत्मनएवनप्रभुःकिंतुसर्वस्याप्यतोखंडैश्वर्यत्वात् चक्रवर्तीकरमिवाविदुषोजनान्मानंवृणीते अनेनाविद्वज्जनमानांगीकारोव्याख्यातःस्वतःसिद्धत्वात्ननुजनपदार्थादानादिनाराज्ञःस्वप्रयोजनोपलब्धिवदीश्वरस्यापितथास्यात्किनेत्याह निजेति ननून्मत्तःकिमीश्वरइतितत्राह करुणइति कस्यार्थेमानकरणमितितत्राह यद्यदिति कथमिवयथामुखस्यमुख्यस्यस्वामिनोराज्ञोमानलक्षणाश्रीःप्रतिमुखस्यराजमुखमनुवर्तमानस्यजनपदस्यपरोपद्रवराहित्येनधनधान्यादिसमृद्धिलक्षणाश्रीर्भवति तथाहरिविषयाक्रियमाणामानश्रीरनुरक्तजनस्य संसारशृंखलान्मोक्षलक्षणाश्रीर्भवतीत्यर्थः। बलमानंदओजश्चेत्यादेः । ननु-हरेर्जन्मादिमत्त्वेनविशेषमाहात्म्यायोगात्देवदत्तवदतोयुक्तंविप्रादितरजनपरिग्रहीतत्वमितितत्राह नैवेति अयंनृसिंहआत्मनोदेहात्प्रभुःप्रभूतउत्पन्नोनैवकिंतुस्तंभात् दृष्ट्वा

दितिशेषःअदेहस्यजननायोगाद् जननवदेवविषयसुखानुभवोपपत्तेरतःकथंहरेर्विषयानुभूतिरितितत्राह निजेति सत्यंपरतश्चेत्प्राप्तिर्नार्यंतथा निजोलाभोयस्यसतथा स्वतःसिद्धानुभवश्चपू र्णोव्याप्तश्च नहिव्याप्तस्यपरिच्छिन्नगर्भवासादिकंयुज्यते । प्रादेशमात्रंपुरुषमित्यादौपरिच्छेदप्रतीतेरितिचेत् तस्यांतेसुषिरंसूक्ष्ममितिश्रुतेराकाशवदुपपत्तेरुपाधिकल्पनायामनवस्थादिदोषापत्तेरतः स्वभृत्यभाषितंसत्यंकर्तुंस्वस्यसर्वत्रव्याप्तिंदर्शयितुमितरत्रजातवद्दर्शनमसुरजनमोहार्थमित्यादिज्ञातव्यं स्वभृत्यभाषितस्यसत्यकरणायेत्येतत्कथमवगतमितितत्राह मानमिति अविदुषःस्वरूपाज्ञा निनोस्माज्जनान्मानंवृणीतेनकेवलमस्मज्जनार्तिंकतुसर्वस्मादपियोग्यादित्याशयेनाह यद्यदिति शेषंपूर्ववत् श्वपचोपिभक्तएववरीयान्नाभक्तस्तस्यद्वेषित्वेनदंभार्थत्वेनविहितपूजायाअस्वीकारादित्य तोबाह नेति अयंहरिरविदुषोनित्याज्ञानिनोसुरजनादात्मनः स्वस्यमानं लोकेदंभाभिप्रायेणकृतपूजांनैववृणीते प्रत्युतानर्थंचकरोतीत्याह करुणइति कृविक्षेपइतिधातोः असुरजननिरसनशीलत्वादं धंतमएवप्रापयतीत्यर्थः परापूर्वेषामितिश्रुतेः तस्मादसुरजनकृतसपर्यानर्थजननीत्याशयेनाह यद्यदिति आत्मनेअनर्थायेतिशेषः यथामुखश्रीःप्रधानभटयोग्यश्रीः प्रतिमुखस्याल्पस्यप्रतिभटस्या नर्थायमरणलक्षणायस्यादितिशेषः ११ तस्माद्भक्तिरेवप्रयोजिकेत्याह तस्मादिति यस्मादचिंत्यमहिमत्वात्सर्वात्मनेश्वरस्यस्वरूपंस्तोतुंनशक्नोमितस्माद्विगतविक्लवोनिर्धूतचापल्योहंयथामनीषंभ क्त्यागृणामीत्यन्वयः स्तुतेःफलमाह नीचइति अजयाप्रकृत्यानीचगुणविसर्गसंसारमनुप्रविष्टंपुमान्येनानुवर्णितेनगुणसंकीर्तनेनपूयेतशुद्धोभवतिहियस्मात्तेनसंसारमोक्षोभवतीत्यर्थः १२ यथामनी

तस्मादहंविगतविक्लवईश्वरस्यसर्वात्मनानहिगृणामियथामनीषम् ॥ नीचोऽजयागुणविसर्गमनुप्रविष्टःपूयेतयेनहिपुमाननुवर्णितेन १२ सर्वेह्यमीवि धिकरास्तवसत्त्वधाम्नोब्रह्मादयोवयमिवेशनचोद्विजंतः ॥ क्षेमायभूतयउतात्मसुखायवास्यविक्रीडितंभगवतोरुचिरावतारैः १३ तद्यच्छमन्युमसुरश्वह तस्त्वयाद्यमोदेतसाधुरपिवृश्चिकसर्पहत्या ॥ लोकाश्चनिर्वृतिमिताःप्रतियांतुसर्वेरूपंनृसिंहविभवायजनाःस्मरंति १४

षंगृणामित्युक्तंविवृणोति सर्वइति अमीवयंब्रह्मादयश्चसर्वेसत्त्वधाम्नस्तवाविधिकराहि विष्णोस्तिष्ठंति प्रादेशाविधर्मणीतिश्रुतेः तत्रविशेषोस्ति यथावयंउद्विजंतस्तथाब्रह्मादयोनैवोद्विजंतः प्रधानभक्तत्वा त्कुतएतत्तद्वयंविज्ञापयतइतितत्राह क्षेमायेति अस्यहरेरुचिरावतारैःविक्रीडितं अस्यजगतःक्षेमाद्यनेकप्रयोजनायस्यादितियदनेनास्मन्निधनेनास्माकमुद्वेगोब्रह्मादिरक्षणेनतेषामनुद्वेगश्चज्ञायतइत्य र्थः १३ अथैवंकर्तव्यमित्याह तद्यच्छेति अद्यत्वयासुरोहतश्चयस्मात्तस्मान्मथनातिकलुषीकरोतिज्ञानमिति मन्युःकोपः इतरेषामेवंविधो हरेस्तुस्वेदाधरस्फुरणादिविडंबनलक्षणादिस्तंयच्छसंह रप्रसन्नभावंदर्शयेत्यर्थः मन्युंचत्वद्विषयंज्ञानंचयच्छानुगृहाणेत्यर्थः मनुअवबोधनइतिधातोरितिवा त्वद्विषयंपूजालक्षणंयज्ञमितिवा मन्युःकोपेक्रतौयुद्धइत्यभिधानं सज्जनानंदाकांक्षापिभगवत्प्र सादकरीत्याशयेनाह मोदेतेति वृश्चिकसर्पलक्षणासुरहननेन साधुः सज्जनोपिमोदेतसाधुरपिमोदेतेतिवायोगविभागः वृश्चिकसर्पलक्षणासुरहत्यानिर्वृतिमानंदमिताः प्राप्ताः सर्वेलोकाः प्रतियांतु स्वगृहमितिशेषःगत्वाकिंकुर्वंतीतितत्राह रूपमिति हेनृसिंहजनाःतवनृसिंहाकारंरूपंदुरितनिवृत्तिलक्षणायविभवायस्मरंतीत्यन्वयः साधुरहिंसापरोपिवृश्चिकादिहत्यामोदेत किंपुनःसर्वलोकोपद्रव कृत्असुरहत्यातोवाह मोदेतेति हत्यामितिपाठेसाधुः शास्त्रतत्त्वज्ञोदुष्टवृश्चिकादिहत्यांयथामोदेततथाहमपिभगवद्द्वेषित्वेनदुष्टत्वात्पितृहत्यांमोदइत्यभिप्रेत्यतोवाह मोदेतेति नृसिंहेतिसंबोधनंना मकरणाभिप्रायेणेतिज्ञातव्यं १४

पूर्वमज्ञातनामत्वादितितवकोपाकुलरूपदर्शनाद्वीत्यालोकस्यस्मरणंनसंभाव्यतइतिच्छमनंकर्तव्यमित्युक्तं तन्ममज्ञाततत्त्वस्यविषयोनभवति ममभयंसंसारचक्रादित्याह नाहमिति भयानकस्य तेतवरूपान्नबिभेमीत्यन्वयः कीदृशात् जिह्मेवक्रेअग्नियुक्तेनेत्रेयस्यतत्तथा जिह्मयाभ्रुकुट्याभसौयस्यतत्तथाउग्रेदंष्ट्रेयस्यतत्तथा जिह्माग्निनेत्रंचजिह्माभ्रुकुटीरभसंचउग्रदंष्ट्रंचतत्तथा तस्मादांत्रमेवस्रक् मालायस्यतत्तथा तस्मात्क्षतजेनरुधिरेणसिक्ताः केसरापस्यतत्तथा शंकुवत्स्थूणवत्स्तब्धौकर्णौयस्यतत्तथा क्षतजकेसरंचशंकुकर्णंचतत्तथा त स्मात् निर्ह्रादेनभीतादिगिभादिग्गजायस्यतत्तथातस्मात् अरिभिंदिनस्वाग्राणियस्यतत्तथा तस्मात्अरीन्भिन्दंतीत्यरिभिंदिनस्वानामग्राणि दुःसहंचोग्रंचसंसारचक्रंचयत्तेनसहकदनात् हिंसालक्षणाच्छुद्धादुश्चरमसत्यकाम भीतानांअपवर्गभीतिजनकसंसारनाशनं अरणंशरणं समियांयामि १५ १६ देवादियोनौसुखसंभवात्तस्मात्संसारचक्रात्कथंबिभेषीतितत्राह यस्मादिति देवादिसकलयोनिषुप्रियस्यवियोगोऽप्रियस्यसंयोगः तयोर्जन्मयस्यसतथा सचशोकाग्नि स्तेनप्रियादिवियोगादिनाजन्मनाच यःशोकाग्निस्तेनवा दह्यमानोहंयत्दुःखपरिहारलक्षणंऔषधकर्मतदपिदुःखरूपमितिमत्वा अतद्विया नतद्वीरतद्धीस्तयादुःखपरिहारोप धान्नानेनभ्रमामि कुत्रगतेनकेनौ षधेनवामेसुखंस्यादित्यनवस्थितिंप्राप्तोस्मीति यस्मात्तस्मादिदमेवसंसारनाशनमितिमत्वाभवंतंप्रार्थये किंतत्राह वदेति तवदास्यलक्षणंयोगमौषधंवदानुग्रहाणेत्यन्वयः १७ मदु पासनाद्युपायमंतरेणदास्य

नाहंबिभेम्यजिततेतिभयानकस्यजिह्माग्निनेत्रभ्रुकुटीरभसोग्रदंष्ट्रात् ॥ आंत्रस्रजःक्षतजकेसरशंकुकर्णान्निर्ह्रादभीतदिगिभादरिभिन्नस्वाग्रात् ॥ १५ ॥ त्रस्तोस्म्यहंकृपणवत्सलदुःसहोग्रसंसारचक्रकदनात्कृशतांप्रणीतः ॥ बद्धःस्वकर्मभिरुशत्तमतेंघ्रिमूलंभीतापवर्गमरणंसमियांकदानु १६ यस्मात्प्रिया प्रियवियोगसयोगजन्मशोकाग्निनासकलयोनिषुदह्यमानः ॥ दुःखौषधंतदपिदुःखमतद्धियाहंभूमन्भ्रमामिवदमेतवदास्ययोगम् १७ सोहंप्रियस्यसुहृदः परदेवतायालीलाकथास्तवनृसिंहविरिंचगीताः ॥ अंजस्तराम्यनुगृणन्गुणविप्रमुक्तोदुर्गाणितेपदयुगालयहंससंगः १८ बालस्यचेहशरणंपितरौनृसिंह आर्तस्यचागदमुदन्वतिमज्जतोनौः ॥ तप्तस्यतर्पणविधिर्यदिहांजसेष्टस्तद्वत्प्रभोतनुभृतांत्वदुपासकानाम् १९ यस्मिन्यतोयर्हिचयेनयस्ययस्मैयथायमुत यस्त्वपरःपरोवा ॥ भावंकरोतिविकरोतिपृथक्स्वभावःसंचोदितस्तदखिलंभवतःस्वरूपम् २०

मात्रेणतवाकिंस्यादित्याशंक्य बहुप्रयत्नसाध्यामुपासनामंतरेणोपायोस्तीत्याह । सोहमिति गुणमयसंसाराद्विप्रमुक्तःपादयुगलमेवालयमाश्रयोयेषांतेतथा तेचहंसानिःसंगाःपरमहंसास्तेषांसंगःसेवालक्ष णोयस्यसतथा । दुर्गाणिकलत्रादीनिनरकाणिवा १८ नृसिंहआर्तस्येत्यनेनसंध्यकरणेनदृष्टांतदार्ष्टांतिकयोर्महद्वैलक्षण्यमस्तीतिज्ञापनायाज्ञानजनबुद्ध्यवतारायचेतिज्ञातव्यं निदाघतप्तस्यजलादि नातर्पणविधिराप्यायनलक्षणपरिहारः ज्वराद्यभिभूतस्यज्वरादिपरिहारप्रकारोयत् इष्टः इष्टसाधनंच १९ ब्रह्माद्यन्यतमइष्टःकिंनस्यादित्याशंक्यकर्तृत्वाद्यभिमतस्यब्रह्मादेःसत्तायाअपियदायदधीनत्वं प्रामाणिकं तदासर्वस्माद्वरेरिष्टत्वंकिंवक्तव्यमितिभावेनाह यस्मिन्निति अपरःकुलालादिर्यःपरोब्रह्मादिर्वायस्मिन्नधिष्ठानेस्थित्वायतोमृदादेर्यर्हियस्मिन्काले येनचक्रसलिलादिना यस्यादृष्टादेःसहायेनयस्मैज लाहरणाद्यर्थं यथाविधिनाघटंभावंघटादिपदार्थं करोतिविकरोतिसामान्यतोविशेषतोवा कीदृशःपृथक्स्वभावःकार्याद्विलक्षणस्वरूपःसंचोदितस्त्वादृशेनपुरुषेणप्रेरितः तदखिलंकार्यकारणलक्षणंसर्वंभवतः स्वरूपंचत्वदधीनसत्तात्मकमित्यन्वयः कर्तृकर्मक्रियादीनांसत्तावृत्तिस्तथैवच विष्ण्वधीनंयतःसर्वंसर्वरूपस्तदुच्यतइतिवचनान्नाभेदोत्रेतिबोद्धव्यम् २०

संसारचक्रंभक्त्याजानितश्रीहरिप्रसादंविनादुस्तरंप्रसादश्चानिगृहीतमनसांदुःसाध्योमनोमयत्वात्संसारचक्रस्यातःसएवसंपाद्यइत्याशयेनसंसारस्वरूपांनिरूपयति मायेति चित्प्रकृत्याभिमतमायाप्रकृति रुदितगुणानुमतेनोद्भूतरजआदिगुणानुसारिणाकालेनप्रेरितेनादृष्टेनचसहकारिणापुंसोजीवस्य कर्ममयंनानाविकारकोशमतएवबलीयोनिगृहीतुमशक्यंछंदोमयंसंकल्पविकल्पलक्षणेच्छात्मकंयन्मनः सृजति हेअज तन्मनोमूलंसंसारचक्रंत्वदन्यस्त्वदनुग्रहरहितःपुरुषःकोतितरेत् नकोपीत्यन्वयः केवलात्पारिकरोपेतस्यबलाधिक्यंस्यादित्यभिप्रायेणाह अजयेति अजयाप्रकृत्यार्पिताःकल्पिताभिन्नवर्ति नामनसासहषोडशेंद्रियाणिपंचप्राणाएवारादलस्थानीयायस्यतत्तथातत् २१ मनएवमनुष्याणांकारणंबंधमोक्षयोरितिश्रुतेः सम्यक्नियुक्तंमुक्तिनिमित्तंचत्वदनुग्रहेणस्यादित्याशयेनाह सत्वमिति यस्त्वंस्वधाम्नानित्यंविजिताआत्मनोदेहस्यगुणाजननादिलक्षणाधर्माजीवस्यवादुःखादिलक्षणायेनसतथा यश्चकलयति जानातिसर्वमितिकालो वशीकृतास्वसमवेताविसृज्यस्यसुरनरादिनाना विधस्यजगतोविसर्गशक्तिर्विविधसृष्टिर्यस्मिन्सतथा हेईश्वर सत्वंषोडशारेसंसारचक्रेलिंगशरीरेवा अजयाविसृष्टमुत्पन्नमतएवदुःखेनानिष्पीड्यमानं तत्परिहारायशरणंप्रपन्नंमांततोपकर्षउत्तर विभो समुद्धरणसमर्थ २२ त्वयाकस्मात्स्वर्गाद्यैश्वर्यनेष्यतइत्याशंक्यतस्यनश्वरत्वादित्याशयेनाह दृष्टाइति अखिलानांधिष्ण्यपानामिंद्रादीनांविभवोहिरण्यलक्षणोर्थः अस्मत्पितुर्हिरण्यकशिपोःकुपितहासो

मायामनःसृजतिकर्ममयंबलीयःकालेनचोदितगुणानुमतेनपुंसः ॥ छंदोमयंयदजयार्पितषोडशारंसंसारचक्रमजकोतितरेत्त्वदन्यः २१ सत्वंहिनित्यवि
जितात्मगुणःस्वधाम्नाकालोवशीकृतविसृज्यविसर्गशक्तिः ॥ चक्रेविसृष्टमजयेश्वरषोडशारेनिष्पीड्यमानमुपकर्षविभोप्रपन्नम् २२ दृष्टामयादिविविभो
खिलधिष्ण्यपानामायुःश्रियोविभवइच्छतियान्जनोयम् ॥ येस्मत्पितुःकुपितहासविजृंभितभ्रूविस्फूर्जितेनलुलिताःसतुतेनिरस्तः २३ तस्मादमूस्त
नुभृतामहमाशिषोज्ञआयुःश्रियंविभवमैंद्रियमाविरिंचात् ॥ नेच्छामितेविलुलिताउरुविक्रमेणकालात्मनोपनयमांनिजभृत्यपार्श्वम् २४ कुत्राशिषःश्रु
तिसुखामृगतृष्णरूपाःक्वेदंकलेवरमशेरुषजांविरोहम् ॥ निर्विद्यतेनतुजनोयदपीहविद्वान्कामानलंमधुलवैःशमयन्दुरापैः २५ क्वाहंरजःप्रभवईशतमोधि
केस्मिन्जातःसुरेतरकुलेक्वतवानुकंपा ॥ नब्रह्मणोनतुभवस्यनवैरमायायन्मेर्पितःशिरसिपद्मकरप्रसादः २६

दुर्हासस्तेनविजृंभितयोःस्फुरितलक्षणयोर्भ्रुवोर्विस्फूर्जितेनविकासाविशेषेणलुलिताविनाशिताःसतुहिरण्यकशिपुरपितेत्वया २३ यस्मात्क्षणभंगुरास्तस्मात्त्वंअनित्याइतिजानन्नैंद्रियश्रोत्रादींद्रियभोग योग्यमिंद्रियस्यविद्यमानंवा आविरिंचात्विरिंचपर्यंतं । निजभृत्यानांमुक्तानांपार्श्वं २४ इतोपिसंसारसुखंहेयमित्याह कुत्रेति श्रुतिकर्णसुखंयंतीतिश्रुतिसुखाः मृगतृष्णरूपाऊष्मोदकसदृशाः अशेषाणांरुजांरोगाणांविशेषेणरोहोयस्मात्तत्तथा दुरापैर्मधुलवैरुदबिंदुकल्पैः सुखलेशैः कामाग्निंशमयन्शांतिंकर्तुमिच्छन्यदपिपर्यायेणकलेवरंविषयसुखंचेत्युभयंनश्वरंविद्वानयंजनः इहोभयस्मि न्नपिनतुनिर्विद्यते निर्वेदंनैवप्राप्नोतीत्यन्वयः २५ हरेर्भक्तवात्सल्यंप्रकटयन् प्रह्लादस्तत्त्वज्ञानविधुरइवायोग्यजनमोहायाह क्वाहमिति हेईश्वरतमोगुणप्रचुररजोगुणोत्पत्तिहेतौअस्मिन्सुरेतरकुलेअसु रकुलेजातोहंक्व । भक्तानुग्रहलक्षणातवानुकंपाक्व । मिथोविरुद्धस्वभावत्वात् । किंचोच्चमत्रेतितत्राह । नब्रह्मणइति । निरंतरसेवामेदुरत्वेनेतरस्मादधिकोदयोपीदानींरमादीनांशिरसिनार्पितोममाशी रसितवपद्मकरःपद्मोदरप्रभावत्पाणिनिधानलक्षणः प्रसादोर्पितइतियत्तस्माच्चित्रंतवचरितमित्यर्थः । श्रीर्ब्रह्म ब्राह्मीर्वीद्राहित्रिकंवत्स्त्रीपुरुषुताः । तदन्येचक्रमात्सर्वेसदामुक्तौसतावपि । हरिभक्तौचत ज्ज्ञानेसुखेचनियमेनतु परतःस्वतःकर्मतोवानकथंचित्तदन्यथेतिवचनादुक्तएवार्थइति २६

सेवाधिक्यमेवफलाधिक्येकारणंनत्वभिजात्यादिकमित्यभिप्रेत्याह नैषेति यथाजंतोर्यापरावरमतिस्तथैषाभवतोनस्यान्नतुकुतआत्मसुहृदः तदेतत्प्रेयइतिश्रुतेः लोकेयद्यप्याभिजात्यादिकंपरावरत्वे निमित्तंतथापिलोकविलक्षणमहिमत्वात्भवतःप्रसादः जगतःसंसेवयासेवानुगुणः फलाधिक्योदयःस्यात् यावत्सेवापरेतत्त्वेतावत्सुखविशेषतेतिस्मृतेः परावरत्वंचसेवानिमित्तं शुचीनांश्रीमतांगेहेयोग भ्रष्टोभिजायतेइतिवचनात् २७ नन्वेवंसेवानुरूपफलोदयेशास्त्रीयेसिद्धेत्वंकिंकरोषीतित्राह एवमिति फलोदयस्यसेवानुविधापित्वात्सोहंतवभृत्यसेवांकथंनुविसृजेममहितरूपत्वादित्यतस्तद त्यागेकारणमाह । एवंजनमिति । प्रभवाहिकूपेजन्मारूयसर्पविषकलिलसंसारगर्ते पतितं कामाःविषयास्तानाभिकामयतइतिकामाभिकामस्तंजनमनुतस्यजनस्यप्रकर्षेणसंगःजन्मलक्षणस्तस्मात्मप तन् आत्मसात्कृत्वात्मीयेष्वेकइतिबुद्धिंकृत्वासुरऋषिणागृहीतोनुगृहीतोयःसोहमिवियस्मात्तस्मादितिशेषः २८ स्वभृत्यभावितवृतंकर्तुं स्तंभादभूदितियत्सूचितंपूर्वत्र तदिदानींस्पष्टमाह मत्प्राणे ति मत्प्राणरक्षणंममपितुर्धंचस्वभृत्यनारदऋषिवाक्यंचअसद्विधित्सुःस्वड्गंप्रगृह्यहिरण्यकशिपुर्यदिमदपरईश्वरोस्तिसत्वामवतुस्यतवकंशिरोहरामीतियदवोचत्तच्चऋतंविधातुं अयमवतारइतिमन्य इत्यन्वयः २९ भूविजृंभणविभ्रांशितेंद्राद्यैश्वर्यस्यमत्पितुर्हननमस्माकंचित्रंचेदपि नतच्चित्रंतस्यजगत्येकत्वात् जगच्चत्वत्सृष्टंत्वत्प्रविष्टंत्वदधीनसत्ताकमतःस्तंभादाविर्भावोपियुक्तइत्याह एकइति अयमर्थः एतज्जगत्त्वमेवनान्यः कुतः एकःप्रधानः प्राधान्यंचकुतोवगम्यतइतितत्राह । अमुष्यइति । अमुष्यजगतआद्यंतयोःउत्पत्तेःपूर्वविनाशादूर्ध्वंचमध्यतस्थितिकालेचत्वमेवावस्यासिसान्नै

नैषापरावरमतिर्भवतोननुस्याज्जंतोर्यथात्मसुहृदोजगतस्तथापि ॥ संसेवयासुरतरोरिवतेप्रसादःसेवानुरूपउदयेनपरावरत्वम् २७ एवंजनंनिपतितंप्रभ वाहिकूपेकामाभिकाममनुयःप्रपतन्प्रसंगात् ॥ कृत्वात्मसात्सुरर्षिणाभगवन्गृहीतःसोहंकथंनुविसृजेतवभृत्यसेवाम् २८ मत्प्राणरक्षणमनंतपितुर्व धंचमन्येस्वभृत्यऋषिवाक्यमृतंविधातुम् ॥ स्वड्गंप्रगृह्ययदवोचदसद्विधित्सुस्त्वामीश्वरोमदपरोऽवतुकंहरामि २९ एकस्त्वमेवजगदेतदमुष्ययत्त्वमाद्यंत योःपृथगवस्यसिमध्यतश्च ॥ सृष्ट्वागुणव्यतिकरंनिजमाययेदंनानेवतैरवसितस्तदनुप्रविष्टः ३० त्वंवाइदंसदसदीशभवांस्ततोन्योमायायदात्मपरबुद्धिरि यंह्यपार्था ॥ यद्यस्यजन्मनिधनंस्थितिरीक्षणंचतद्वैतदेवखलुकालवदुष्टितर्वोः ३१

तिनिर्णीतोसिशास्त्रतइतियस्मात् ननुजगतस्त्वद्विकारत्वेनतद्विवर्तत्वेनवात्वदवसानंपुक्तमत्राह । पृथगिति । भिन्नत्वेनेत्यर्थः पुनःसृष्टिकालेनिजमाययास्वसामर्थ्येनस्वाधीनयाचिदचित्प्रकृत्याचे दंगुणव्यतिकरंजगत्सृष्ट्वातदनुप्रविष्टस्त्वंतार्भिन्नैःपदार्थैर्नानैवभिन्नइवननुभिन्नइत्यवासितोसीतियत्तस्माच्च । प्रतिदृशमिवनैकधार्कमेकमितिस्वोक्तेः इंद्रोमायाभिःपुरुरूपईयतइतिश्रुतेश्च नेहना नास्तिकिंचनेत्यादिश्रुत्यानानात्वस्यनिषिद्धत्वात्नानेवानुविधावतीत्यादिनानर्थहेतुत्वाच्चभेददृष्टेः ३० हरेर्जगदन्यत्वस्यस्पष्टमप्रतीतेःतदर्थंपूर्वपद्योक्तंविशदयति । त्वंवाइति । हेईश इदंसदसच्च राचरलक्षणंजगत्तत्त्वं । सत्तायाअपित्वदधीनत्वादयंव्यपदेशोनतादात्म्यात् । तत्त्वतस्तदात्मत्वंकिंनस्यादितितत्राह भवानिति ततोजगतोभवानन्योपिस्वतोभिन्नोपीत्यर्थः मत्स्वातंत्र्यवज्जगत्स्वा तंत्र्यमपिकिंनस्यादुभयोर्भेदोपिदृढतरःस्यादितितत्राह मायेति आत्मेत्युपलक्षणं आत्मानात्मलक्षणस्यप्रपंचस्यपरत्वबुद्धिःस्वातंत्र्यज्ञानंयत्सेयंमायाऽविद्यमाना कुतइतितत्राह अपार्थेति। श्रीनारायणस्य तवस्वातंत्र्यज्ञानंयथापुरुषार्थसाधनंतथान्यस्यस्वातंत्र्यज्ञानमनर्थहेतुरिति उभयंहिशब्देनसिद्धमितिदर्शयति स्वतंत्रजीवात्मकत्वात्स्वतंत्रंजगदित्यतोवाह मायेति आत्मनोजीवस्यपरत्वबुद्धिः जीवस्य परमैक्येपरमात्मनायज्जन्मादिकंक्रियतेतदनेनापिकर्तव्यम् । तदनुभवविरुद्धमतोयद्यदधीनंजन्मादिकंतद्वस्तुतदेवेतिप्राधान्यविवक्षया अभेदव्यपदेशोपपत्तेरितिप्रकारांतरेणतद्वृतिमाह यद्यस्येति

अपमर्थःयस्यजगतोजन्मादिकंयच्चदधीनंतज्जगत्तत्तदेवेत्युच्यतेइतियत्तस्माज्जगत्त्वमेवेत्यर्थः। अस्मिन्नर्थेदृष्टांतमाह। खल्विति उष्टितर्वोःवृक्षदाहवृक्षयोःकालवत् कालाधीनत्ववत् एतदेवाचार्यैःसम्यग्विवृतंयथावृक्षश्चवृक्षदाहकश्चदैवकालाधीनत्वादैवंकालश्चेत्युच्यते एवंचत्वदधीनत्वात्सर्वस्यसर्वमित्युच्यतेस्वतस्तद्विनोपीति। उषदाहइतिधातुः। अत्रखलुशब्दःसाक्षादैक्यनिषेधेवर्तते अलंखल्वोःप्रतिषेधयोःपाचांक्त्वेतिसूत्रात् अलमैक्यकथानिष्टत्वमित्यर्थः यएषआदित्येपुरुषोदृश्यतेसोहमस्मि सएवाहमस्मि यएषचंद्रमसि पुरुषोदृश्यतेसोहमस्मीत्यादिश्रुतौ स्वस्यान्यस्यपरमात्मत्वोपदेशःप्रतीयते अतःकथंभेदःकथ्यतेइत्यतोवाह मायेति आत्माहंचपरोन्यश्चपरश्चपरमेश्वरएवेतियाबुद्धिरियमपार्थामायाभ्रांतिस्तस्मात्तदधीनत्वात्तदंतर्यामित्वेनस्थितत्वाच्चसोहमस्मीत्युच्यतेनतुतद्रूपत्वादेतदप्याचार्यैरुक्तंअहंचान्यश्चपरमेश्वरएवेत्यपार्थाभ्रांतिस्तदधीनत्वात्सइत्युच्यते नस्वरूपत्वादित्यर्थःइतिईक्षणंज्ञानम् ३१ सत्वमाद्यंतयोरित्यत्रांतश्रीहरिरवशिष्यतेइत्युक्तं तंप्रकारंदर्शयति न्यस्येति विलयांबुमध्येइदंजगदात्मनिस्वोदरेन्यस्यशेषासनोभूत्वातुर्यस्थितोजाग्रदाद्यवस्थाप्रवृत्तिशून्यमूर्तौस्थितस्त्वंतमःप्रकृतिंगुणान्सत्त्वादींश्चात्मनियुंक्तेननु प्रकृतिंपुरुषंचैवप्रविश्यपुरुषोत्तमः क्षोभयामासेत्यादौ प्रतीतप्रवृत्तिशून्योऽभूदित्यन्वयः निजसुखेत्यादिनातुरीयस्वभावंदर्शयति वीतनिद्रोनिरस्ताज्ञानः ३२ सृष्टेःप्रागित्युक्तंदर्शयति तस्येति यस्यतुरीयस्यास्यजगत्कारणस्यचकश्चिद्विशेषोनास्तीतिद्योतनायैवकारः आत्मनिदेहेजठरेगूढंनिलीनमिदंजगज्जगदात्मकंमहाब्जंयस्यतवनाभेरभूत्तदब्जंतस्यैवतेवपुःसन्निधानविषयत्वात्। प्रतिमास्थानीयम् । कीदृशंस्वरूपंभूतसृष्टिकालशक्त्यासंचोदितंसृष्टयेप्रेरितं कटाक्षीकृतंकीदृशस्यास्यप्रकृतिधर्मिणः प्रकृतिप्रेरकधर्मवतः प्रलयोदकेऽनंताख्यशयनादुत्थाय विरमन्समाप्तिंकुर्वन् समाधिर्योगनिद्रालक्षणोयस्यसतथातस्य कथमिव वटवत् वटलक्षणोंकु

न्यस्येदमात्मनिजगद्विलयांबुमध्येशेषासनोनिजसुखानुभवोनिरीहः ॥ योगेनमीलितदृगात्मनिवीतनिद्रस्तुर्यस्थितोननुतमोनुगुणांश्चयुंक्ते ३२ तस्यैवतेवपुरिदंनिजकालशक्त्यासंचोदितंप्रकृतिधर्मिणआत्मगूढम् ॥ अंभस्यनंतशयनाद्विरमत्समाधेर्नाभेरभूत्स्वकणिकावटवन्महाब्जम् ३३ तत्संभवःकविरतोन्यदपश्यमानस्त्वांबीजमात्मनिततंसबहिर्विचिन्वन् ॥ नाविंददब्दशतमप्सुनिमज्जमानोजातेंकुरेकथमिहोपलभेतबीजम् ३४

रोयथास्वकणिकात् उत्पत्स्यमानकणिकात् कणिकाख्यवटबीजादित्यर्थःनन्वयंविषमोदृष्टांतस्तथाहि कणिकानाम वटबीजविकारोहिवटाख्यांकुरः नचायंप्रकृतेसंभवति निर्विकारोक्षरःशुद्धइतिवचनादुच्यते स्वकणिकादितिलिंगव्यत्ययेनकश्चिद्विशेषोविज्ञापते कोयमितिचेदुच्यते कणिकानामादृश्यादेवतासर्वस्थावरबीजानामभिमानिन्यपिवटाश्वत्थबीजयोर्विशेषतः संनिहितातस्तत्तद्बीजेभ्यस्तदंकुरव्यंजनात्तत्प्रागपितत्रस्थित्वाजातेत्युच्यतेयथातथाश्रीहरेरपिप्रकृत्यादिस्वामित्वेनचतत्संनिहितत्वेनचस्थितस्तत्कार्येष्वनुविष्टत्वेनजातइत्युच्यते आत्मनआकाशःसंभूतइत्यादौश्रुतत्वात्तत्चापिवटबीजाद्वटांकुरस्यसाक्षादुत्पत्तिर्वटवृक्षिणश्चेतनस्यचेतनाभिमानादुत्पत्तिः उभयाभिमानिन्यादेवतायाअभिव्यंजकत्वेनाऽभिव्यक्तिस्तथायथायोग्यंसत्त्वतमोमिश्ररजोगुणान्जगदात्मनःपश्यस्यसाक्षादुद्भवः पद्मिनोहिरण्यगर्भस्याभिमानजननंहरेः पुरुषांतरेणाविर्भावइत्यादिकमिति स्थावराणांतुसर्वेषांदेवतायाभिमानिनी विशेषाद्वटबीजेचअश्वत्थेचव्यवस्थिता अदृश्याकणिकानामसावृक्षाद्व्यंजयत्यपि अतोबीजमितिप्रोक्तासाजातेप्यंकुरेस्थिता एवंहरिःकारणेषुस्थितःकार्यजनेरनु कार्याण्यनुप्रविष्टःसन्प्रथमंतत्रदृश्यतइत्यनेनोक्तविशेषोविज्ञायतइतिनकापिशंकाकार्येति तस्मादृष्टांतदार्ष्टांतिकयोरुपपत्तिरस्तीतियुक्तएवदृष्टांतः ३३ तत्रविरिंचस्यलोकपद्मलक्षणदेहाभिमानोत्पत्तिपूर्वंकंहरेर्वटबीजाभिमानिदेवतावदृश्यत्वंप्रकटयंस्तस्यमीमांसामाह तत्संभवइतिपद्मस्यप्रकृत्यात्मकत्वेनतस्मात्पद्मात्संभवोजननंयस्यसतथा लोकात्मकत्वेनतस्मिन्देहस्थानीयेऽभिमानसंभवोयस्यसतथा उभयोरप्यत्रविवक्षितत्वात् अतोजादन्यद्वस्तुनपश्यन्पद्मेनिमज्जमानोनि

मज्यमूलंविचिन्वन्लोकेबीजादंकुरेजातेनष्टंबीजमिवपृथिव्यांकथमुपलभेत पुरुषइति वंचितांदर्शयन्नेवंविधःकविर्ब्रह्मात्मनिस्वास्मिन्ब्जांतस्तस्माद्ब्रह्मविततंव्यंजकत्वाद्बीजदेवतावत् बीजसं ज्ञत्वान्नाविंदन्नोपलब्धवानित्यन्वयः ३४ आत्मापरमात्मायोनिःकारणंयस्यसतथा तुशब्देनैकस्यहरेर्बहुधाजन्मास्तीतिविशेषंदर्शयति सएवब्रह्माअब्दशतसंज्ञितेनकालेनविरिंचत्याविविधपृथिव्या द्याधाराणामनुत्पन्नत्वादस्यकेनचिदाधारेणभवितव्यंलौकिकेबीजनाशवत्नाशायोगात् सन्नपिनदृश्यतेकुतूहलमेतादिति अतिविस्मितोब्जमाश्रितस्तपेतिद्व्यक्षरंश्रुतवान् तपसाहंद्रष्टुंशक्तइत्य नेनोक्तमभिजानन् तीव्रेणतपसापरिशुद्धांतःकरणोभूतेंद्रियाशयेजगतिविततंत्वामात्मनिस्वस्मिन् स्थितंददर्शेत्यन्वयः कथमिव भुविव्याप्तमतिसूक्ष्मंगधंगंधाख्यदेवतास्वरूपंयथापश्यातियोगीतथेत्यर्थः गंधाख्यादेवतायद्वत्पृथिव्यांव्याप्यतिष्ठति एवंव्याप्तंजगद्विष्णुंब्रह्मात्मस्थंददर्शेहेतिवाक्यम् गंधशब्देनदेवताकथनंयुक्तमितिभावः ३५ यथासूक्ष्मरूपंदृष्ट्वामुमुदे तथाविराड्रूपमपि तयोरीषदपि विशेषाभवादित्याह एवमिति अनेनब्रह्मांडशरीरीब्रह्मा पातालमेतस्यहिपादमूलमित्याद्युक्तम् यद्रूपमपश्यत्तदेवपश्यजोपीतिज्ञातव्यम् आत्मयोनिरितिविशेषणान्मायामयंज्ञानरूपम् अनिर्वाच्याविद्यामा यानामेतिकिंनस्यादित्यत्राह सदिति आनंदादिलक्षणसमुदायरूपम् अथकस्मादुच्यतेसदितिसंतोह्यस्मिन्नानंदओजोबलमितिस्पष्टश्रुतेः सन्निवेशश्चयःस्तोमःसमुदायोगणःस्मृतइत्यभिधानम् आनं

सत्वात्मयोनिरतिविस्मितआश्रितोब्जंकालेनतीव्रतपसापरिशुद्धभावः ॥ त्वामात्मनीशभुविगंधमिवातिसूक्ष्मंभूतेंद्रियाशयमयेवितंददर्श ३५ एवंस हस्रवदनांघ्रिशिरःकरोरुनासास्यकर्णनयनाभरणायुधाढ्यम् ॥ मायामयंसदुपलक्षणसन्निवेशंदृष्ट्वामहापुरुषमापमुदंविरिंचः ३६ तस्मैभवान्हयशि रस्तनुवंचबिभ्रद्वेददुहावतिबलौमधुकैटभाख्यौ ॥ हत्वानयच्छ्रुतिगणांश्चरजस्तमश्चसत्त्वंतवप्रियतमांतनुमामनंति ३७ इत्थंनृतिर्यगृषिदेवझषावतारैर्लो कान्विभावयसिहंसिजगत्प्रतीपान् ॥ धर्ममहापुरुषपासियुगानुवृत्तंछन्नःकलौयदभवस्त्रियुगोथसत्वम् ३८ नैतन्मनस्तवकथासुविकुंठनाथसंप्रीयतेदुरि तदुष्टमसाधुतीव्रम् ॥ कामातुरंहर्षशोकभयेषणार्तंतस्मिन्कथंतवगतिंविमृशामिदीनः ३९ जिह्वैकतोऽच्युतविकर्षतिमाऽवितृप्ताशिश्नोन्यतस्त्वगुदरंश्रव णंकुतश्चित् ॥ घ्राणोन्यतश्चपलदृक्क्वचकर्मशक्तिर्बह्वयःसपत्न्यइवगेहपतिंलुनंति ४० एवंस्वकर्मपतितंभववैतरण्यामन्योन्यजन्ममरणाशनिभीतभीतम् ॥ पश्यञ्जनंस्वपरविग्रहवैरमैत्रंहंतेतिपारमतिपीपृहिमूढसत्त्वम् ४१

दादिलक्षणानांसन्निवेशोयस्मिन्सतथातम् गुणगुणिनोरभेदात्स्वरूपत्वंसिध्यति विज्ञानमानंदंब्रह्मेतिश्रुतेःलक्षणत्वज्ञापनायादिशब्देनज्ञानग्रहणम् ३६ रजस्तमःस्वभावावतिबलौवेददुहौमधुकै टभाख्यौहत्वाश्रुतिगणाननयत् आनीयास्मैविरिंचायावोचदितिशेषेणान्वयः अनेनैतत्सिद्धमभूदित्याह सत्वमिति ३७ चतुष्पदधर्मंपासि यस्त्वंकलौछन्नोऽभवइतियस्मात्तस्मात्सत्वांत्रियुगइतिरूयातः ३८ एवंहरेर्भक्तवात्सल्यंविज्ञाप्यस्वार्शक्तिंविज्ञापयति नैतदिति यदेतन्मनस्तवकथासुनसंप्रीयतेतस्मिन्मनसितवगतिंकथंविमृशामीत्यन्वयः ईषणंवित्तादीनामितिशेषः ३९ मनःसमाधानाभावा दन्येंद्रियाण्यपिमत्पुरुषार्थविरुद्धानीत्याह जिह्वेति स्पर्द्धाभाषणशीलत्वाज्जिह्वा दुःसंगेनपुण्यश्लथनशीलत्वात्शिश्नः त्वचसंपर्कइतिधातोःदुःसंपर्कशीलत्वात्त्वक् उदात्ककुदंनमयतीत्युदरम् कर्म शक्तिरित्यनेनकर्मेंद्रियाणिवागादीनिलक्षयति गेहपतिं देहस्वामिनम् अन्यत्रगृहपतिम् ४० स्वैःपरैश्चसहविग्रहलक्षणंवैरंविरुद्धाचरणं मैत्रंचयस्यतथातं जनंपश्यन्ततस्तमसाभवस्यपारमतिपीपृ हिअतिपारंगमयमूढसत्त्वंमूढमाणिनमसुरजातित्वात् तिर्यग्जातित्वात्तामसमिवस्थितंगजेंद्रंपारंनीत्वायथाऽपालयस्तथापारंचभापय्यमांपालयेतिवा ४१

ममसंसारपारनेतृत्वंतवदुःशकंनेत्याह कइति हेअत्रअन्यमातृरहितभगवन् ममसंसारोत्तारणेतेतवकोनुप्रयासोनकोपि अत्रजीवराशौवा । कुतोनप्रयासइतितत्राह अस्येति अस्यजगतोभवोजन्म संभवःस्थापनेनसंभावनंलोपःसंहारोयेषांहेतोःकरणस्यास्यजगतउत्तारणेतवप्रयासोनास्तिममोत्तारणेकोन्वितिवा कुतइतितत्राह भवेति भवस्यसंसारस्यसंभवउत्पत्तिस्तस्यनाशहेतोस्तवकिंप्रकृतइत्याशंक्यास्मद्वात्सल्यमंतरेणनकिमपिप्रयोजनंतवेत्याह मूढेष्विति गजेंद्रकल्पार्तजनबंधोमूढेष्वस्मासुयोमहदनुग्रहस्तेनतवकिंप्रयोजनंनकिमपीत्यर्थः ननुप्रयोजनाभावेकिमर्थंतथाकरणमित्याशंक्य स्वभावइत्याशयेनाह प्रियेति प्रियजनानुसेवमानस्त्वमितियत् सतवस्वभावइतिशेषः ४२ संसारभीरूणांसंसारवैतरण्युत्तरणोपायःकइत्याशंक्यनिरंतरवेदांतशास्त्रश्रवणमननादिर्येषामस्तितेषांतद्र यंनास्ति अन्यथा नकदापितउत्तरणमित्याशयेनाह नैवेति त्वत्तीर्थत्वद्विषयंवेदांतशास्त्रंतस्यगायनंश्रुत्वामत्वाव्याख्यानंव्याख्यापनंचतदेवमहामृतंयत्तेनमत्तंहृष्टंविवशंवाचित्तंयस्यसतथा एवं विधोहंसंसारवैतरण्यानैवोद्विजे । नबिभेमि एवशब्देनत्वत्तीर्थसेवाभावेसंसारकदनाद्भिभेमितत्संभवेनेत्ययोगव्यवच्छेदःक्रियते अनेनासंगतंप्रहादस्तवनमित्येतदपिपरिहृतं सत्स्वन्यत्रततोदयेतिवचनात् । इदंचभक्तिलक्षणमितिप्रकटयन्नाह शोचइति तेत्वत्तइंद्रियार्थेभ्योविषयेभ्योमायासुखंप्राकृतमस्वरूपंसुखंयत्तदर्थभरंकुटुंबभारम् ४३ स्वेतरेषुक्रियमाणाकृपास्वाश्रितेष्वेवकर्तव्या देवादिभिःक्रियमाणत्वादित्यभिप्रेत्याह प्रायेणेति देवामुनयश्चविजनेनैकांतस्थलेनसाधनेनसहिताःकाष्ठमौनादिव्रतंचरंति कीदृशाःस्वकीयानांजनानांविमुक्तिःस्यादितिस्वविमुक्ति

कोन्वत्रतेऽखिलगुरोभगवन्प्रयासउत्तारणेस्यभवसंभवलोपहेतोः ॥ मूढेषुवैमहदनुग्रहआर्तबंधोर्किंतेनतेप्रियजननानुसेवमानः ४२ नैवोद्विजेभवदुरत्ययवैतरण्यास्त्वत्तीर्थगायनमहामृतमत्तचित्तः ॥ शोचेनुतंविमुखचेतसइंद्रियार्थमायासुखायभरमुद्वहतोविमूढान् ४३ प्रायेणदेवमुनयःस्वविमुक्तिकामामौनंचरंतिविजनेनपरार्थनिष्ठाः ॥ नैतान्विहायकृपणान्विमुमुक्षएकोनान्यंत्वदस्यशरणंभ्रमतोनुपश्ये ४४ यन्मैथुनादिगृहमेधिसुखंहितुच्छंकंडूयनेनकरयोरिवदुःखदुःखम् ॥ तृप्यंतिदेहकृपणाबहुदुःखभाजःकंडूतिवन्मनसिजंविषहेतधीरः ४५ मौनव्रतश्रुततपोध्ययनस्वधर्मव्याख्यारहोजपसमाधय आपवर्ग्याः ॥ प्रायःपरंपुरुषतेत्वजितेंद्रियाणांवार्ताभवंत्यपिनवात्रतुदांभिकानाम् ४६

कामाः समहतांस्वभावइत्याह परेति परप्रयोजनतात्पर्यापेतादेवेषुतात्त्विकैर्विशेषतोमुनिषुकैश्चिदेवेतिविशेषप्रकाशनायप्रायेणेति तदुक्तं आश्रितेषुकृपाकार्याविशेषात्तात्त्विकैःसुरैः मुनिभिश्चतथाकैश्चित्कैश्चित्कार्याखिलेष्वपि तथापितात्त्विकसुराःकृपाविषयतांगताः एतएवविमुच्यंतेतदन्येनकथंचनेति यतोदेवादयोप्याश्रितेषुकृपांकुर्वति अतोहमप्याश्रितानेतान्कृपणान्कृपाविषयान्विहायएको नविमुमुक्षेत्वमेकोमत्प्रसादेनमुक्तोभव अन्येन्येनवर्त्मनामुक्ताःसंत्वितितत्राह नान्यमिति स्वकर्मणानानायोनिषुभ्रमतोमामाश्रितजनस्यानुकूलंत्वदन्यंशरणंनानुपश्येइत्यन्वयः ४४ सुखानुभवार्थहिमोक्षाकांक्षातच्छब्दादिविषयेभ्योपिस्यादतोऽजागलस्तनायितमोक्षसुखायकोवाप्रेक्षावान्महाप्रयत्नंकुर्यादुन्मत्तमंतरेणेतितत्राह यन्मैथुनादीति मैथुनादिगृहस्थसुखंयत्तल्लब्ध्वा देहकृपणादेहमात्रपोषणपरायणास्तृप्यंतिनान्येप्रेक्षावंतइतिशेषः । तदपिनसुलभमित्याह बहुदुःखेति तत्रबुद्धिमतैवंकार्यमित्याह कुंडूतिवदिति मनसिजंकामम् ४५ मुमुक्षुभिःप्रथमतइंद्रियजयएवसमर्थनीयोन्यथामुक्तिसाधनानामपिमौनादीनांलोकेजीवनोपायमात्रत्वंभवतीत्याह मौनेति आपवर्ग्यामुक्तिहेतवःप्रायःसम्यग्भक्त्यानुष्ठिताइतिशेषः हेपुरुषपरंनचेत्तएवाजितेंद्रियाणांपुंसांवार्तास्तत्कालजीवनमात्रोपायाभवंत्युत अपिसंभावनामात्रंनतुमुख्यतइत्यर्थः लोकमोहनार्थंमौनादिकमनुतिष्ठतांदांभिकानांतदपिनसेत्स्यतीत्याह अत्रजीवलोकेवा यथाअजितेंद्रियाणांजीवनमात्रोपायोनतथादांभिकानांभवंतीति वाविकल्पोपमानयोत्यभिधानं नवाभवंतीत्येकंवाक्यमितिवा ४६

---

१ जीवनमात्रोपायानां तथेति पाठान्तरम् ।

मौनादीनांक्लेशसाध्यत्वेनासर्वाधिकारिकत्वात् सर्वाधिकारिकोपासनाविषयंनिरूपयति रूपेइति इमेसदसतीकार्यकारणेतवरूपे त्वद्रूपत्वात्त्वत्सन्निधानयोग्ये अत्रप्रमाणमाह वेदेति द्वावेवब्रह्मणो रूपेइत्यादौकार्यकारणत्वंकिंविकारभावेनानेमित्तनैमित्तिकभावेन वेत्याशंक्य पथायोग्यमित्यूहनीयमित्यत्रदृष्टांतमाह बीजेति व्याख्यातमेतत्विज्ञानमानंदंब्रह्मेतिवत् वेददृष्टेचेत्किंसाक्षाद्रूपेइतिने त्याह नचेति अन्यद्विलक्षणंज्ञानानंदादिलक्षणंनैव । कुतोत्राह अरूपकस्येति प्राकृतरूपाभावादित्यर्थःमहतांप्रत्यक्षंचात्रप्रमाणमित्याह युक्ताइति भक्तियोगेनोभयत्ररूपद्वये युक्ताउपासनालक्षणध्या नेनेतिशेषः युक्तायोगिनः उभयत्रसन्निहितंत्वांपश्यंतीतिवा दर्शनप्रकारमाह वह्निमिति योगेनमथनाद्युपायेन अन्ययोगंनिवारयति नान्यतइति भक्तियोगादन्यतोन्येनेति ॥ साक्षात्स्वरूपादन्यत्प्रा कृतंरूपंनैव अरूपमक्षरंब्रह्मेतिश्रुतेः अतोनसाक्षाद्रूपेइतेवायोजना साक्षात्स्वरूपापेक्षयास्वरूपादन्यद्रूपंनेत्याचार्यविवरणमत्रप्रमाणं ४७ केतेकार्यकारणेइत्यतस्तन्नामनिर्देशः तत्सत्ताप्रदत्वेनतद्रूप त्वेतद्रूपत्वाभिप्रायइत्याशयेनाह त्वमिति चिदनुग्रहश्चेतनस्तन्मनसावचसानिरुक्तं नत्वदन्यत् त्वांविनाऽवृत्तिमन्नास्ति सगुणःसंसारीशौक्ल्यादिगुणयुक्तोवा विगुणोमुक्तउत्पन्नानंतरक्षणविशिष्टपदा र्थोवा ४८ पृथिव्यादिमहत्तत्त्वांतंपदार्थजातंकार्यकारणात्मनाद्वित्वेनक्रोडीकृतं भगवद्रूपंततोभिन्नमित्युक्तं इदानींतदवस्थितपरमात्मानंतदभिमानिनोदेवाअपिसाकल्येन नजानंतीत्येवंविधानंतमाहा त्म्यांबुराशिरितिनिश्चित्य तमुपासतेसंतइत्याह नेति गुणाःसत्त्वादिगुणाभिमानिनः गुणिनागुणविकाराः सहदेवमर्त्याइत्यत्रदेवशब्देनपृथग्विग्रहवंतइंद्रादयोगृह्यंते सुधियोनिश्चितशास्त्रार्थाः शब्दाद्वे

रूपेइमेसदसतीतववेददृष्टेबीजांकुराविवनचान्यदरूपकस्य ॥ युक्ताःसमक्षमुभयत्रविचिन्वतेत्वांयोगेनवह्निमिवदारुषुनान्यतःस्यात् ४७ त्वंवायुरग्निरव निर्वियदंबुमात्राःप्राणेंद्रियाणिहृदयंचिदनुग्रहश्च ॥ सर्वेत्वमेवसगुणोविगुणश्चभूमन्नान्यत्त्वदस्त्यपिमनोवचसानिरुक्तम् ४८ नैतेगुणानगुणिनोमहदादयो येसर्वेमनःप्रभृतयःसहदेवमर्त्याः ॥ आद्यंतवंतउरुगायविदंतिहित्वाएवंविमृश्यसुधियोविरमंतिशब्दात् ४९ तत्त्वेमनोदर्शनेदृगपिस्तुतौचवाक्कर्मणिह्यपि करौश्रवणंकथायाम् ॥ संसेवयात्वयिविनेतिषडंगयाकिंभक्तिंजनःपरमहंसगतौलभेत ५० ॥ नारदउवाच ॥ एतावद्वर्णितगुणोभक्त्याभक्तेर्निर्गुणः ॥ प्रह्लादंप्रणतंप्रीतोगतमन्युरभाषत ५१ ॥ श्रीभगवानुवाच ॥ प्रह्लादभद्रभद्रंतेप्रीतोहंतेसुरोत्तम ॥ वरंवृणीष्वाभिमतंकामपूरोस्म्यहंनृणाम् ५२

दादिशब्दराशिप्रमाणादेतेआद्यंतवंतस्त्वांनविदंतीत्येवंविमृश्यविचार्योपास्यतत्प्रसादेनसंदृश्यविरमंतिसंसारादितिशेषः यद्वाचानभ्युदितमित्यादिश्रुतेः शब्दाद्विरमंतीत्यत्रशब्दत्यागोनार्थः किंतु वेदेननिर्णीततत्त्वस्यतत्त्वेनिरंतरस्यंदमानबुद्धिजलराशेःपुंसोहरिगुणानुस्मरणायासोनास्तीतिवा ४९ श्रीनारायणप्रसादएवपुरुषार्थसाधनमित्युक्तं तस्यभक्तिज्ञाने तयोश्चषडंगोपासनासाध्यंध्यानंवि नानान्यदन्यथानस्यादित्याशयेनाह तत्त्वइति हिशब्देनान्यथाजीवञ्छवइत्याह ॥ अपिशब्दात् पादौतवक्षेत्रानुगमनेनियोज्याविति ग्राह्यं एवंषडंगयासेवयाविनाजनोमुमुक्षुःपरमहंसानांगतावाश्रयभू तेत्वयिभक्तिज्ञानंचलभेतकिं साधनांतराभावान्नाप्नोतीत्यन्वयः भक्तिज्ञानयोर्हेतुहेतुमद्भावादेकग्रहणेनद्वयोर्ग्रहणंयुज्यतइतिभावः परापूर्वेषांसख्यावृणक्तीतिश्रुतेः ५० हरेरसुरेषुप्रद्वेषाशयात्प्रह्लादस्या पितज्जातित्वेनतत्स्तुत्याकोपोपशमःस्यात्किं । प्रत्युताक्षेपकरत्वेनाग्नौशुष्केंधनप्रक्षेपणवज्ज्वलनायस्यादितितत्राह एतावदिति योग्यतानुकूल्येनभक्त्याभक्तेनेतिविशेषणद्वयेनशंकानिरस्ते तिज्ञातव्यं जातित्वमप्रयोजकंभक्तिरेवेतिसूचनेनदेववदत्तवदुन्मत्तोनभवतिभगवानितिसिद्धं ५१ मन्युशांतेःकिंगमकमितितत्राह प्रह्लादेति वरदानसामर्थ्येहेतुमाह कामपूरइति नृणां भक्तानामितिशेषः ५२

मत्प्रसादएवदर्शनेकारणमित्याह मामिति मामप्रीणतोऽप्रीणयतः मद्दर्शनफलंचपांथदर्शनवन्नेत्याह दृष्ट्वेति ५३ यतोनतप्राह्यैव्यातस्माद्धीराधवंमांप्रीणंतिप्रीणयंति केनसर्वभावेनपूर्णभक्त्या माधवइत्यस्यार्थो मंगलदेवतापतिरित्यभिप्रायेणाह सर्वेषामिति सर्वेषामविशेषेणयायाअभिलषिताआशिषस्तासांतासामाशिषांपतिंपातृत्वेनदातारमित्यर्थः ५४ प्रह्लादोपिसामान्यभक्तोनभवति किंतुभक्तोत्तमइतिप्रकटनायभगवताविप्रलुब्धोपितान्वरान्नैच्छदित्याह एवमिति एकांतित्वान्नैसर्गिकभक्तत्वात् ५५ इतिश्रीभागवतेमहापुराणेसप्तमस्कंधे वि०टी०नवमोध्यायः ॥ ९ ॥ ७ ॥ अस्मिन्नध्यायेभक्तस्यैवपुरुषार्थोनद्वेषेणेत्येतत्प्रतिपादनंपुनःपुनर्भक्तेःप्राधान्यज्ञापनायान्यदासुरमोहनायेतितात्पर्यं वरानिच्छन्प्रह्लादोहरिंकिंप्रत्युवाचेतिहार्दयुधिष्ठिरप्रश्नंपरिहरन्नारदस्तत्रवक्तीत्याह नारद इति वयसार्भकोनतुज्ञानेनेत्येताद्विशेषप्रकाशनायहेतिविशेषणं हिहेतावित्यमरः १ ज्ञातसर्वेंद्रियवृत्तित्वाद्हृषीकेशेनत्वयामन्मनोगतंज्ञातमितियदतोमनःपरीक्षणार्थेएतैर्मनःप्रलोभनंनकुर्वितिप्रार्थ यतइत्याशयेनाह मामेति । गुरुवचनमज्ञातेष्टबोधकत्वेनप्रमाणंस्यादिदंस्वभावतएवाज्ञातेष्टबोधकत्वाद्व्यर्थमिवप्रतिभातीत्याशयवानाह उत्पत्त्येति आसक्तमितिलोकवृत्तांतप्रदर्शनपरम् । प्रह्लादस्यार्भकावस्थामारभ्यविष्णुधर्मैकनिष्ठत्वात् यतोविषयसंगिनामनर्थपरंपराहृश्यतेतत्तस्माद्विषण्णः । विषयिणोविषयासिद्धयातात्कालिकप्रसूतनिर्वेदवन्नायंनिर्वेदइत्याह मुमुक्षुरिति अनेनप्रह्लादस्याधिकारलक्षणसामग्रीविद्यतइतिदर्शितम् २ ननुभगवद्वाक्यंकापिविप्रलंभकंनभवतिअजस्यावक्रचेतसइतिश्रुतेः भवतातथैवमोच्यते तथाचभगवद्वाक्यस्याविश्वसनीयत्वंस्यादितितत्राह भृत्योति

मामप्रीणतआयुष्मन्दर्शनंदुर्लभंहिमे ॥ दृष्ट्वामांनपुनर्जंतुरात्मानंतप्तुमर्हति ५३ प्रीणंतिह्यथमांधीराःसर्वभावेनमाधवम् ॥ श्रेयस्कामामहाभागाःसर्वे षामाशिषांपतिम् ५४ ॥ नारदउवाच ॥ एवंप्रलोभ्यमानोपिवरैर्लोकप्रलोभनैः॥ एकांतित्वाद्भगवतिनैच्छत्तानसुरोत्तमः ५५ इतिश्रीभागवतेसप्तमस्कं धेप्रल्हादस्तुतिर्नामनवमोध्यायः ॥ ९ ॥ नारदउवाच ॥ भक्तियोगस्यतत्सर्वमंतरायतयार्भकः ॥ मन्यमानोहृषीकेशंस्मयमानउवाचह १ ॥ प्रह्लादउवाच ॥ मामाप्रलोभयोत्पत्त्यासक्तंकामेषुतैर्वरैः ॥ तत्संगभीतोनिर्विण्णोमुमुक्षुस्त्वामुपाश्रितः २ भृत्यलक्षणजिज्ञासुर्भक्तंकामेषुचोदयात् ॥ भवान्सं सारबीजेषुहृदयग्रंथिषुप्रभो ३ नान्यथातेखिलगुरोर्घटतेकरुणात्मनः ॥ नष्टदृष्टेस्तमस्यंधेत्वंपारःपारदर्शिनः ४ यस्तआशिषआशास्तेनसभृत्यःसवै वणिक् ॥ सवैस्वामीसवैभृत्योगुणलुब्धौनकामुकौ ५ आशासानोनवैभृत्यःस्वामिन्याशिषआत्मनः ॥ नस्वामीभृत्यतःस्वाम्यमिच्छन्योरातिचाशिषः ६

चोदयात् चोदयति धियोयोनःप्रचोदयादितिश्रुतेः ३ वंचनार्थमेवतथोच्यतइतिकिंनस्यादत्राह नान्यथेति अखिलगुरुत्वान्यथानुपपत्त्यानवंचनंयुक्तमित्यर्थः इतोपिभृत्यलक्षणजिज्ञासैवप्रयोज नंत्वद्वचनस्यान्यथातवेष्टजनघातकत्वदोषापत्तिःस्यात् सानिर्दोषत्वेननयुक्तेत्याशयवानाह नष्टेति नकेवलमितरगुरुवन्मार्गमात्रप्रदर्शकःकिंतुगम्यंचातोविप्रलोभनंनयुक्तमतोवाह नष्टेति पारदर्शि नःपारंचांतंद्रष्टुमिच्छतः ४ ननुमत्प्राप्तिकामायाशीर्दानवचनमस्तुनामप्रलोभनं तत्कामुकस्याभीष्टदानावचनेऽनाकांक्षिताभिधानंस्यादितितत्राह यस्तइति तेतवसकाशात् आशिषःसंपदःसे वायाः तर्हिसकइतितत्राह सइतिवनषणसंभक्तावितिधातोः संभजनंविक्रेयंद्रव्यंप्रसार्यदानलक्षणं तत्कर्तावणिग्वै । हिअर्थेचाकेचित्सुकृतकरणलक्षणदानेनभवादृशाज्जनात्पुण्यलक्षणफलादानंकरोतीति यस्मात्तस्माद्वणिगित्यर्थः आशास्तेइच्छति अनेनफलदस्यस्वामित्वंचविघटितंभवतीतिदर्शितंतर्हिकयोःस्वामिभृत्यभावइतितत्राह सवाइति लुभगार्ध्यइतिधातोः भक्त्यादिगुणोद्रेकाकांक्षिणौगुणलु ब्धौमिथःफलानिनकामुकौ, ५ ननूभयोःफलकामित्वेकोदोषइतितत्राह आशासानइति स्वामिनिसमवेताआशिषआत्मनःस्वस्याशासानोयःसभृत्योनवैनैव किंतुप्रतिभटएव वरदानादिनाभृत्यात्स्व स्यस्वामित्वमिच्छन्नूपोभृत्यायाशिषोरातिददातिसस्वामीनच । कल्पितस्वामित्वेनतच्छब्दस्यमुख्यार्थालाभात् ६

अहंत्वकामस्त्वद्भक्तस्त्वंचस्वाम्यनपाश्रयः ॥ नान्यथेहावयोरर्थोराजसेवकयोरिव ७ यदिरासीशमेकामान्वरांस्त्वंवरदर्षभ ॥ कामानांहृद्यसंरोहंभवत
रतुवृणेवरम् ८ इंद्रियाणिमनःप्राणाआत्माधर्मोधृतिर्मतिः ॥ ह्रीःश्रीस्तेजःस्मृतिःसत्यंयेषांनश्यंतिजन्मना ९ विमुंचतियदाकामान्मानवोमनसिस्थितान् ॥
तर्ह्येवपुंडरीकाक्षनभवायावकल्पते ॥ नारदेनोपदिष्टंमेतवमंत्रमिमंस्मरे १० ओंनमोभगवतेतुभ्यंपुरुषायमहात्मने ॥ हरयेद्भुतसिंहायब्रह्मणेपरमात्मा
ने ११ ॥ श्रीनृसिंहउवाच ॥ नैकांतिनोमेमयिजात्विहाशिषआशासतेऽमुत्रतथाभवादृशाः ॥ तथापिमन्वंतरमेतदत्रदैत्येश्वराणामनुभुंक्ष्वभोगान्
१२ कथामदीयाजुषमाणःप्रियास्त्वमावेश्यमामात्मानिसंतमेकम् ॥ सर्वेषुभूतेष्वधियज्ञमीशंयजस्वयोगेनचकर्महिन्वन् १३ भोगेनपुण्यंकुशलेनपा
पंकलेवरंकालजवेनहित्वा ॥ कीर्तिविशुद्धांसुरलोकगीतांवितायमामेष्यसिमुक्तबंधः १४ यएतत्कीर्तयेन्मह्यंत्वयागीतमिदंनरः ॥ त्वांचमांचस्मरन्का
लेकर्मबंधाद्विमुच्यते १५ ॥ प्रह्लादउवाच ॥ वरंवरयएतत्तेवरदेशान्महेश्वर ॥ यदनिंदत्पितामेत्वामविद्वांस्तेजऐश्वरम् १६ बद्धामर्षाशयःसाक्षात्स
र्वलोगुरुंप्रभुम् ॥ भ्रातृहेतिमृषादृष्टिस्त्वद्भक्तेमयिचाघवान् १७

त्यतोमहात्मनइति कोसावित्यतोहरयइति हरिशब्दस्यानेकार्थत्वादत्रकइत्यतोऽद्भुतेति तिर्यक्प्राणिनात्वयाकिंस्यादित्यतोब्रह्मणेइति अस्याप्यनेकार्थत्वादत्रकइत्यतःपरमात्मनइति ११ अहं
त्वकामइत्येकांतभक्तलक्षणंयत्त्वयोक्तंतत्सत्यंतथापिमदाज्ञाकारिणस्तवपुण्याभिवृद्धिःस्यादतएतत्कर्तव्यमित्याह नैकांतिनइति किंतादितित्राह तथापीति १२ ननु कर्दमजलस्नानानिच्छयाब्धे
तावंतंकालंमयाकंठशोषणमकारि तदरण्यरोदनवद्व्यर्थमभूयतस्त्वंतत्रैवस्नाहीत्युपदिशस्यतस्त्वदाज्ञानुल्लंघ्यात्त्वमेवजानासीतिशंकारोगनिर्मूलनायसुखसाध्यमौषधंविधास्यामीत्याशयवानाह क
थाइति बहुवचनेनसर्वावतारादिकथाउपलक्षयति भूतेष्वित्युपलक्षणंचरुपुरोडशादिष्वपियज्ञमूर्तिसन्निहितइतियोगेनभक्तियुक्तध्यानेनहिन्वन्नाशयन् १३ नन्वेतावतामर्मकिं कालांतरभाविनीत्वत्प्रा
प्तिःस्यादेवेत्याह भोगेनेति मुक्तावनभिमतंपुण्यंभोगेनक्षपयित्वाप्रायश्चित्तादिकुशलकर्मणापापंनिर्मूलयित्वा वितायविस्तृत्य १४ मयातवोक्तयोगकरणाशक्तस्यानायाससाध्ययोगमुपदिशामी
त्युपसंहरति यइति यद्भक्तमुद्दिश्य मुक्तकाले १५ अभिमतमित्युक्तत्वादिमंत्वदभिमतंवरंवृणेइत्याह वरमिति वेसकाशात्अनेनवासुस्वीकर्तृभावसंबंधोस्तीतिज्ञायते १६ १७

शुद्धयर्थसाधनांतरानुष्ठानेनापेक्षितमित्याह पूतइति १८ नकेवलमयमेवपितापूतःकिंतुजन्मांतरेपिविद्यमानाः पितरःपूताःस्युरित्याशयवानाह त्रिःसप्तभिरिति॥ साविशुद्धिर्मत्कटाक्षपात्रीभूतत्वज्ज न्मनेत्याहयत्साधोस्यति १९ एतन्न्यायमन्यत्रातिदिशति यत्रेति कीकटाइतिपाठेआभीराइत्यर्थः २० ननुत्वद्भक्तानामेवंविधमाहात्म्यंकस्मादित्याशंक्यतपोवृद्धिक्षयहेतुहिंसाद्यभावादित्याह सर्वा त्मनेति। सर्वात्मनायदपिकिंचनक्ककलासादिकमपि तस्मात्प्राणभूतःप्राणंनविच्छेद्यादपिक्ककलासस्योतिश्रुतेः तत्रनिमित्तमाह मद्भावेनेतिईश्वरोजीवकलयाप्रविष्टइतिवचनात् सर्वत्रसमभावःसत्तास्ती विभावोभावनानिरंतरानुस्मरणंतेनगतस्पृहाः नष्टस्पर्द्धाः। हिंसायाःकारणंनिमित्ताभावान्नैमित्तिकाभावइत्यर्थः २१ इहलोकेयेमद्भक्ताःपुरुषाभवंतिविद्यंतेतेनहिंसंतीत्यन्वयः मद्भक्तेष्वपितवावि शेषोस्तीत्याहभवानिति प्रतिरूपधृक्दृष्टांतस्थलभूतःखलुशब्देनकांश्चिन्निषिध्यावशिष्टानांसर्वेषामित्यर्थोगृह्यतेतेनयावत्तावदित्यर्थः। ऋतेतुतान्विकान्देवान्नारदादींस्तथैवच प्रह्लादादुत्तमःकोनुविष्णुभक्ते जगत्त्रयइतिवचनात् निषेधवाक्यालंकारजिज्ञासानुनयेस्वित्यभिधानम् २२ मीत्पताभगवद्द्वेषीतिमत्वातत्प्रेतकार्याणिनकरोमीतिमतिर्माभूत् श्रौतंस्मार्तंनलंघयेदितितिवचनात् मदाज्ञयातान्यपि

तस्मात्पितामेपूयेतदुरंताद्दुस्तरादघात् ॥ पूतस्तेपांगसंदृष्टस्तदाकृपणवत्सल १८ श्रीभगवानुवाच ॥ त्रिःसप्तभिःपितापूतःपित्रभिःसहतेनघ ॥ य त्साधोस्यकुलेजातोभवान्वैकुलपावनः १९ यत्रयत्रचमद्भक्ताःप्रशांताःसमदर्शिनः ॥ साधवःसमुदाचारास्तेपूयंत्यपिकीकटान् २० सर्वात्मनानहिंसं तिभूतग्रामेषुकिंचन ॥ उच्चावचेषुदैत्येंद्रमद्भावेनगतस्पृहाः २१ भवंतिपुरुषालोकेमद्भक्तास्त्वामनुव्रताः ॥ भवान्मेखलुभक्तानांसर्वेषांप्रतिरूपधृक् २२ कुरु तेप्रेतकार्याणिपितुःपूतस्यसर्वशः ॥ मदंगस्पर्शनेनांगलोकान्यास्यतिसुप्रजाः २३ पित्र्यंचस्थानमातिष्ठयथोक्तंब्रह्मवादिभिः ॥ मय्यावेश्यमनस्तात कुरुकर्माणिमत्परः २४॥ नारदउवाच ॥ प्रह्लादोपितथाचक्रेपितुर्यत्सांपरायिकम् ॥ यथाहभगवान्राजन्नभिषिक्तोद्विजोत्तमैः ॥ प्रह्लादस्तुतथाकार्षीद्रा ज्यंनिहतकंटकम् २५ प्रसादसुमुखंदृष्ट्वाब्रह्मानरहरिंहरिम् ॥ स्तुत्वावाग्भिःपवित्राभिःप्राहदेवादिभिर्वृतः २६ ॥ ब्रह्मोवाच ॥ देवदेवाखिलाध्यक्षभू तभावनपूर्वज ॥ दिष्ट्यातेनिहतःपापोलोकसंतापनोसुरः २७ योसौलब्धवरोमत्तोनवध्योममसृष्टिभिः॥ तपोयोगबलोन्नद्धःसमस्तनिगमानहन् २८ दि ष्ट्यास्यतनयःसाधुर्महाभागवतोर्भकः ॥ त्वयाविमोचितोमृत्योर्दिष्ट्यात्रातस्त्वयाधुना २९

कर्तव्यानि नावैष्णवायदातव्यंनोदीर्बंदुनतंडुलमित्येतदसंबोधीवषयत्वेनसावकाशीमत्याशेपनाह मदंगेति सुप्रजाःसुपुत्रः २३ पितृमेधंकृत्वाविरज्यवनंनव्रज किंतुराज्यंकुर्वित्याह पित्र्यमितिराज्यं कुर्वन्पितृवल्लोकोपद्रवंनकुरु किंतुब्रह्मवायुक्तधर्मेणेत्याह यथोक्तमिति नतावतापूर्यतेऽन्यच्चावश्यकमित्याह मयीति कर्माणिसामादिविषयाणिपूजादीनिवा २४ भगवदाज्ञातुल्लंघनेनभगवत्प्रीतिः स्यादितद्कृत्वातदाज्ञाकरणप्रकारमाह ॥ नारदइति ॥ सांपरायिकंमारणौर्द्धदैहिकम् २५ तत्रागतेषुदेवेष्वेकतमेनापिसल्लोहरेरभूत्वा आद्येकेन द्वितायदैत्येभ्यएषांकोविशेषः किंचसेव्यसेवकादिभा वाभावेनब्रह्मविद्याधिकारोप्युत्पादितःस्यादित्याशंकांपरिहरति प्रसादेति देवादिभिर्वृतइत्यनेनतैरपिस्वछंदवचनंकृतमितिज्ञातव्यम् २६ दिष्ट्यासुखमभूत् २७ ममसकाशात्सृष्टंसर्जनमेषामस्ति तेसृष्टिनस्तैर्मयासृष्टैरित्यर्थः २८ दिष्ट्यासज्जनसुखहेतुतः अधुनातस्मैदिष्ट्यासुखलक्षणोवरोदत्तइतिशेषः २९

अनेनचपुरानकेवलंदैत्यहननमेवप्रयोजनंकिंत्वन्यच्चास्तीत्याह एतदिति ३० एवंस्तुतोभगवान्कमनुग्रहमकार्षीत्तेषामितितत्राह श्रीभगवानिति निसर्गतःक्रूराणां अमृतंपयः देवान्नेसलिलेक्षीरत्वमृतंना विमुक्तिगइति अत्रहिरण्यकशिपुमंतरेणान्येषांनदातव्यइत्याज्ञाक्रियते नत्वस्पृहे । यथाहिरण्यकस्यादादंतःस्थितहरीरितइत्यादिनास्वप्रेरितत्त्वावगमादिति ३१ मद्भृत्यानामपियोग्यप्रत्यक्षत्वेहरेरुप र्युपरिव्यवहारेणध्यायंतिदेवमनुष्याइतिश्रुतेः देवस्वभावोपःसविहितः स्यादितिमत्वा तद्रक्षणार्थं तद्विग्रहेणादृष्टोभूदित्याह नारदइति सर्वभूतानामदृश्यइत्यनेनभक्तानुकंपित्वंप्रदर्शितम् ३२ अनंतरं प्रह्लादेनब्रह्मादयोदेवाःसत्कृताउतात्मनोभगवदनुग्रहपात्रत्वेनाहंभावेनधिकृताः आद्येवैष्णवाचारःप्रवर्तितःस्यात्द्वितीयेभगवच्छिक्षणंगजस्नानवत्स्यादितितत्राह ततइति भगवतःकलालेशायेषुतेतथा भगवतोभिन्नांशावा ३३ भगवच्चित्तज्ञेनब्रह्मणावेदमन्वग्राहीत्याह ततइति अनेनभक्तेनभगवद्भक्तेषुयथायोग्यंप्रेमकर्तव्यमितिशास्त्राचारोदर्शितः ३४ प्रह्लादवरदानानंतरंभगवतास्वाचारत्वेनयददर्शन मकारितदस्माभिरप्यनुष्ठेयमितिकृत्वा ब्रह्माद्याअपिस्वगृहान्ययुरित्याह प्रतिनंद्येति ३५ इदानींविशंकलितोक्तमर्थंनिक्षिप्योपसंहरति एवमिति हृदिस्थितेनवैरभावेनहेतुनाहरिणाहतौ ३६ ३७ प्राक्तन

एतद्वपुस्तेभगवन्ध्यायतःप्रयतात्मनः ॥ सर्वतोगोप्तृसंत्रासान्मृत्योरपिजिघांसतः ३० ॥ श्रीभगवानुवाच ॥ मैवंविधोसुराणांतेप्रदेयःपद्मसंभव ॥ वरः क्रूरनिसर्गाणामहीनाममृतंयथा ३१ ॥ नारदउवाच ॥ इत्युक्त्वाभगवान्राजन्ततश्चांतर्दधेहरिः ॥ अदृश्यःसर्वभूतानांपूजितःपरमेष्ठिना ३२ ततःसंपू ज्यविधिवद्ववंदेपरमेष्ठिनम् ॥ भवंप्रजापतीन्देवान्प्रह्लादोभगवत्कलाः ३३ ततःकाव्यादिभिःसार्द्धंमुनिभिःकमलासनः ॥ दैत्यानांदानवानांचप्रह्लादमक रोत्पतिम् ३४ प्रतिनंद्यततोदेवाःप्रयुज्यपरमाशिषः ॥ स्वधामानिययूराजन्ब्रह्माद्याःप्रतिपूजिताः ३५ एवंतौपार्षदौविष्णोःपुत्रत्वंप्रापितौदितेः ॥ हृ दिस्थितेनहरिणावैरभावेनतौहतौ ३६ पुनस्तौपूर्वशापेनराक्षसौतौबभूवतुः ॥ कुंभकर्णदशग्रीवौहतौतौरामविक्रमैः ३७ शयानौयुधिनिर्भिन्नहृदयौराम सायकैः ॥ तच्चित्तौजहतुर्देहंयथाप्राक्तनजन्मनि ३८ ताविहाद्यपुनर्जातौशिशुपालकरूषजौ ॥ हरौवैरानुबंधेनपश्यतस्तेसमीयतुः ३९ एनःपूर्वकृतं यत्तद्राजानःकृष्णवैरिणः ॥ जह्रुस्तेतेतदात्मानःकीटाःपेशस्कृतोयथा ४०

जन्मनिजयविजयशब्दवाच्यौ

पूर्वजन्मनियथासच्चित्तौतथात्रापीतिशेषः हिरण्यकशिपुर्हिरण्याक्षाख्योपूर्वजन्मनियथातथेतिवा ३८ वैरानुबंधेनवैरोपसर्जनेनानुबंधेनस्नेहेनसमीयतुर्हरिमितिशेषः तत्रासुरौतमईयतुरित्यनुसंधेयं सम्यक् भक्त्यैवश्रीहरिप्राप्तिः तदभावेनतमएवेतिद्योतनायसमित्युपसर्गः मधुकैटभौभक्त्यभावादूरौभगवतोमृतौ तमएवक्रमादाप्तौभक्त्याचैद्योहरियौइतिवचनात् ३९ अन्येषामपिसद्भावादेतदुपलक्षणा र्थमुक्तमित्यभिप्रेत्याह एनइति अत्रापिवैरानुबंधेनेत्यनुवर्तते येराजानः पौंड्रकादिशब्दवाच्यास्तेष्वसुरदेहेष्वात्माहंपविशेषोयेषांतेतथा तत्रापितस्मिन्कृष्णेआत्माचित्तंयेषांतेतथा तदनुष्ठितपुण्यफ लस्वीकारार्थंतत्राविष्टास्तद्भक्ताइत्यर्थः तेभक्त्यैवयत्पूर्वकृततत्संबंधाप्राप्तमेनःपापंतज्जहुः तद्धित्वाहर्याज्ञाकरणप्राप्तपुण्यप्रचयेनतंहरिमीयुः तएवकृष्णवैरिणोनादिकालमारभ्यभगवद्द्वेषिणःकृष्णाश्च तामसाश्चवैरिणःवैरिरूपिणोराजानोराजसाः तमःप्रकृतयोदैत्याः तदात्मानोद्वेषरूपिणःतेजन्मप्रभृतिचीर्णयदेनः तेनपापेनवैरानुबंधेननिरंतरवैरिचित्तयापूर्वकृतंब्रह्मणापूर्वब्रह्मांतमोजहु र्जग्मुरित्यन्वयः ओहाङ्गतावितिधातुः इतिसखेकहास्तन्यस्यसमुकुलंसुरंप्रवेकेहास्ते(?)इतिप्रयोगश्च अंतेभक्त्यादिसाधनसामग्र्यनंतरं । इतरत्रद्वेषपूर्त्यनंतरमित्यत्रतस्यतावदेवचिरामितिश्रुतेः अने

र्वविन्महत्पुण्यंकर्मकरांतितद्वास्यांततःक्षीयतइत्यादेश्च। कीटाःपेशस्कृतश्चिंतनयापेशस्कृताकारमाप्नुवंति नतुतदात्मत्वं अत्रप्रमाणं पौंड्रकेनरकेचैवशाल्वेकंसेचरुक्मिणि आविष्टास्तेहरेर्भक्तास्तद्भक्त्याह रिमीयिरे असुरास्तुस्वयंतेतुमहातमसिपातिताइतिवाक्यम् ४० अत्रापितारतम्यमस्तीत्याह यथेति भिदांविशेषं भेदोविशेषेदलनइत्यभिधानं अभिदामसंप्रज्ञातसमाध्यवस्थांयपुरितिवा साम्यंनिर्दोषत्वा दिचतुर्भुजलक्षणं अन्यथाकीटाःपेशस्कृतोध्यानेनकेचनपेशस्कृतोभवंति नतुसएवपृथग्दृश्यमानत्वादित्ययंदृष्टांतोनर्थःस्यादिति ४१ ग्रंथाधिकभयादुपसंहरति आख्यातमिति अतश्चैवादयो दमघोषसुतादीनामित्यादिबहुवारोक्तिर्भक्तेरनादिकालसंबंधित्वद्योतनार्था अन्यथावेनादीनामित्याद्युक्तिरपिस्यात् ४२ श्रद्धाजननायस्तौति एषेति ब्रह्मण्यदेवस्यरामस्य चशब्दान्नरसिंहस्य यत्र कथायाम् ४३ भक्त्यादिकमेवमुक्तिसाधनंनद्वेषादिकमित्येतदत्रप्रतिपाद्यतेइत्युपसंहरति प्रह्लादस्येति भक्त्यादिलक्षणोधर्मश्चात्रकथितइत्यन्वयः ४४ येनभक्त्यादिलक्षणधर्मेणहरिमितरेभ्यो व्यावर्तयति सर्गेति अव्यत्ययोयथास्थितत्वम् ४५ आत्मानमधिकृत्यवर्तमानमिंद्रियादिस्वरूपंचकथितमस्मिन्नाख्यानइत्याहुः तदुपाख्यानइति अत्रैवंपार्षदोविष्णोरित्यावृतानुकथनंचभक्त्यादि

यथायथाभागवताभक्त्यापरमयाभिदाम् ॥ नृपाश्चैद्यादयःसाम्यंहरेस्तच्चिंतयाययुः ४१ आख्यातंसर्वमेतत्तेयन्मांत्वंपरिपृष्टवान् ॥ दमघोषसुतादीनां हरेःसाम्यमपिद्विषाम् ४२ एषाब्रह्मण्यदेवस्यकृष्णस्यचमहात्मनः ॥ अवतारकथापुण्यावधोयत्रादिदैत्ययोः ४३ प्रह्लादस्यानुचरितंमहाभागवतस्य च ॥ भक्तिर्ज्ञानंविरक्तिश्चयाथात्म्यंचास्यवैहरेः ४४ सर्गस्थित्यप्ययेशस्यगुणकर्मानुवर्णनम् ॥ परावरेषांस्थानानांकालेनाव्यत्ययोमहान् ४५ ध र्मोभागवतानाचभगवान्येनगम्यते ॥ आख्यानेस्मिन्समाख्यातमाध्यात्मिकमशेषतः ४६ यएतत्पुण्यमाख्यानंविष्णोर्वीर्योपबृंहितम् ॥ कीर्तयेच्छ्र द्धयाश्रुत्वाकर्मपाशैर्विमुच्यते ४७ एतद्यआद्यपुरुषस्यमृगेंद्रलीलांदैत्येंद्रयूथपवधंप्रयतःपठेत ॥ दैत्यात्मजस्यचसतांप्रवरस्यपुण्यंश्रुत्वानुभावमकुतोभ यमेतिलोकम् ४८ यूयंनृलोकेबतभूरिभागालोकंपुनानामुनयोभियांति ॥ एषांगृहानावसतीतिसाक्षाद्गूढंपरंब्रह्ममनुष्यलिंगम् ४९ सवाअयंब्रह्ममह द्विमृग्यंकैवल्यनिर्वाणसुखानुभूतिः ॥ प्रियःसुहृद्वःखलुमातुलेयआत्मार्हणीयोविधिकृद्गुरुश्च ५०

कंमुक्तिसाधनंनद्वेषादिकमितिज्ञापनाय येनभागवतधर्मेणैवभगवान्गम्यतेनद्वेषादिनेतिशेषः भक्तिर्ज्ञानंविरक्तिश्चनवकंश्रवणादिकं धर्मोभागवतःप्रोक्तस्तद्भक्तेषुतथानवेतिवचनात् भागवतधर्मेणैवश्रीह रिर्गम्यतइति कथमुच्यते भक्त्यादिनाविनेतीयमाशंकापरिहृता भक्त्यादेर्धर्मशब्दवाच्यत्वात् श्रवणंकीर्तनंविष्णोरित्यादिश्रवणादिनवकम् ४६ अधुनाख्यानकीर्तनादिनायत्पुण्यंतदाह यइति ४७ सामान्यतउक्तंविवृणोति एतदिति ४८ ननुप्रह्लादानुभवस्यात्युत्तमत्ववर्णनेनयुधिष्ठिरादीनांततोऽत्रमत्वंप्रतीयतइतिमंदाशंकांपरिहरति यूयमिति मुनयएतानिति यथातीत्यवर्तयंति बत विस्मये खेदानुकंपासंतोषविस्मयामंत्रणेबतेति ४९ ननुपरब्रह्मणिमुक्तिगाइत्यतःपरब्रह्मशब्देनविष्णुत्वनिश्चयःकथमितितत्राह सवाइति कैवल्येनानासक्तत्वेनयन्निर्वाणसुखमशरीरसुखं तस्यानुभूतिर नुभवोयस्यसतथा अनन्ययोग्यस्वरूपानंदमनुभवतीत्यर्थःअनेनविष्णुत्वंनिरणायि विधिकृदाज्ञाकारी गुरुर्हितोपदेष्टा ५०

ननुदुर्ज्ञेयरूपत्वंहिविष्णुलिंगंनहिसुज्ञेयमणुर्द्वेषआत्मासइतिश्रुते स्वरूपानंदानुभवित्वंसापुज्यभाजोप्यस्त्यतःकथंनिर्णयइतितत्राह नयस्येति ५१ इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेविज०कृतटीकायां दशमोध्यायः॥ १०॥ अस्मिन्नध्यायेहरौभक्तिविधानार्थंरुद्रमाहात्म्यकथनव्याजेनतन्माहात्म्यंप्रतिपाद्यते अधुनातत्रैकोरुद्रोनाद्वितीयोवतस्थइत्यादिश्रुतेः प्रतीयमानरुद्रस्याद्वितीयार्थत्वंप्रतिपाद्यमानैर्जनैर्भेदाद्रव्यव्ययेनपूज्यमानस्येशानःसर्वविद्यानामीश्वरःसर्वभूतानामित्यादिमंत्रैःस्तूयमानस्यसतःरुद्रस्यासुरावेशात्संशयोबभूव इदंसर्वंभगवदधीनंनवेति तत्रदयालुर्भक्तवत्सलःश्रीनारायणोरुद्रस्यतंसं शयमपाचक्र कथंकेनेतितत्राह तएषइति सभगवान्नृसिंहात्मनाब्रह्मदत्तवरेणदप्तहिरण्यकशिपुपुरःसरासुरजातिंनिर्मूलयित्वाप्रह्लादादिभक्तसमुदायस्यानुग्रहीतासएषयुष्मद्बंधुभूतःश्रीकृष्णःपुराकल्पविशेषे देवस्य। हरेःस्तुतिध्यानादिकंकुर्वाणस्य। रुद्रस्यरोदनाच्चगतततल्लक्षणस्यातएवतन्नाम्नःशिवस्यानंतमायिनानेकशतसहस्रमायावताऽतएवार्थादल्पेनमयेनवक्ष्यमाणप्रतीकारंकृत्वातस्यरुद्रस्यभगवद्भक्त प्रधानइत्यादियशोवितततंत्रिपुरनाशनेनव्याप्तमकरोदात्मनोतिशयस्वामित्वेनतदनुग्राहकत्वेनचविमलमकृतेत्यन्वयः १ नापृष्टःकस्यचिद्भूयादितिवचनात्प्रसक्तंप्रमेयंविस्तृत्यश्रोतुंराजापृच्छति कस्मिन्कर्म

नयस्यसाक्षाद्भवपद्मजादिभीरूपंधियावस्तुतयोपवर्णितम् ॥ मौनेनभक्त्योपशमेनपूजितःप्रसीदतामेषमसात्वतांपतिः ५१ इतिश्रीभागवतेमहापुराणे सप्तमस्कंधेदशमोध्यायः॥ १० ॥ नारदउवाच ॥ सएषभगवान्राजन्व्यतनोद्वितंयशः ॥ पुरारुद्रस्यदेवस्यमयेनानंतमायिना १॥ राजोवाच ॥ क स्मिन्कर्मणिदेवस्ययशोभूज्जगदीशितुः ॥ यथाचोपचिताकीर्तिःकृष्णेनानेनकथ्यताम् २ ॥ नारदउवाच ॥ निर्जिताअसुरादेवैर्युध्यनेनोपबृंहितैः॥ मा यिनांपरमाचार्यंमयंशरणमाययुः ३ सनिर्ममेपुरस्तिस्रोहैमरौप्यायसीर्विभुः ॥ दुर्लक्ष्यापायसंयोगादुर्वितर्क्यपरिच्छदाः ४ ताभिस्तेऽसुरसेनान्योलोकांस्त्रीन्सेश्वरान्नृप ॥ स्मरंतोनाशयांचक्रुःपूर्ववैरमलक्षिताः ५ ततस्तेसेश्वरालोकाउपासाद्येश्वरंततः ॥ त्राहिनस्तावकान्देववविनष्टांस्त्रिपुरालयैः ६ अथा नुगृह्यभगवान्माभैष्टेतिसुरान्विभुः ॥ शरंधनुषिसंधायपुर्यामस्त्रंव्यमुंचत ७ ततोग्निवर्णाइषवउत्पेतुःसूर्यमंडलात् ॥ यथामयूखसंदोहानादृश्यंतपुरोयतः ८ तैःसृष्टाव्यसवःसर्वेनिपेतुस्त्रिपुरौकसः ॥ तानानीयमहायोगैर्मयःकूपरसेऽक्षिपत् ॥ ९ ॥ सिद्धामृतरसस्पृष्टावज्रसारामहौजसः ॥ उत्तस्थुर्मेघदलनाद्विद्युताइववह्नयः ॥ १० ॥

णीति कस्मिन्कर्मणिमयोविपरीतं

चकार येनेशितुर्देवस्ययशोभूत् साचकीर्तिःकृष्णेनयथायथमुपचिता प्रचिता सकथाविशेषोममकथ्यतामित्यन्वयः २ नारदः प्रश्नंपरिहरति निर्जिताइति अनेनहरिणोपबृंहितैःअन्यसहायेनासुराजि ताइत्येतद्देवानांनदोषायविष्णवेक्षणस्यस्वतःसिद्धत्वाद्देवानांसापेक्षंनतुदोषाय यत्रसिद्धमपेक्षितमितिवचनात् ३ मयेनत्रिपुरनिर्माणकर्मविपरीतंकृतमित्याह सनिर्ममइति सतिस्रः दुर्लक्ष्योदुर्ज्ञेयोऽपायसंयोगोनाशसंबंधोतःप्रवेशसंबंधोयासांतास्तथातएवादृश्यबहुतरायुधादिपरिकराः ४ असुरसेनान्यः असुरसेनानायकाः ५ सेश्वराःसहरयः अत्रापिविष्णुसहितदेवानांरुद्रापेक्षित्वंनदोषायत्रिपुरहननंरुद्रे णकार्यमितिहरिणाकृप्तत्वात् इंद्रादिभिर्वा ६ विभुःशिवः माभैष्टेत्युक्ता पुर्यामित्येकवचनंजातिविवक्षया ७ ततोधनुषोमयूखसंदोहारश्मिराशयः यतोयैः शरैः पुरःपुराणि ८ सृष्टास्तप्ताव्यसवःगतप्रा णाः इदंचमयेनकृतंविपरीतमित्याशयवानाह तानिति ९ सिद्धामृतरसोमृतसंजीवनरसः तस्मिन्स्पृष्टाःस्नाताःवैद्युताःविद्युत्संबंधिनः चशब्देनजलादिना यथानाशोनास्ति तथैषामितिसूचयति १०

कथंकृष्णेनोपचिताकीर्तिरितीमंप्रश्नंपरिहर्तुमाह विलोक्येति ११ कोसावितितत्राह वत्सइति हिशब्देनविष्णुर्ब्रह्माणमपेक्षतेइतिनदोषायेतितत्संकल्पकारित्वेनासिद्धत्वादितिसूचयति कालेमध्यंदिने ग्रंथांतरसिद्धत्वाद्धिशब्देनभगवन्मायायास्तन्मायातोऽपरिमितमाहात्म्यमस्तीतिसूचयति ॥ १२ ॥ स्वकृतापराधप्रहाणायस्वस्यभगवद्भक्तिप्रकटनायचमयस्तद्विषयज्ञानंचमयास्तीत्याभिप्रायेणाह तदिति तदैत्यवधोपायकरणं किंचित्कालमसुराणांजयदायिनीमिदानींदेवानामितिदैवगतिम् १३ किंजगदितितत्राह देवइति आत्मनःस्वस्यअन्यस्यदेवदत्तस्यचेतिद्वयोर्दैवेनविष्णुनादिष्टं क्लप्तंव्यपोहितुं अन्यथाकर्तुं इहजीवराशौदेवोसुरोन्योवाकश्चनेश्वरःसमर्थोनास्तीत्यतस्तूष्णींभावएववरीयानित्यर्थः १४ ननुसिद्धरसपानंव्यर्थमिवप्रतिभाति त्रिपुराणामनाशादित्याशंक्यतन्नाशसाधनमाह अथेति अथदैत्यजीवसाधनरसनाशानंतरंस्वाभिःशक्तिभिःभूम्यादिभिःशंभोःप्राधानिकंयुद्धसाधनंरथादिकंव्यधादित्यन्वयः । धर्मादिबलोपेतत्वात् अभेद्याभिः १५ किंतत्प्राधानिकमिति

विलोक्यभग्नसंकल्पंविमनस्कंवृषध्वजम् ॥ तदायंभगवान्विष्णुस्तस्योपायमकल्पयत् ११ वत्सआसीत्तदाब्रह्मास्वयंविष्णुरयंहिगौः ॥ प्रविश्यत्रिपुरंकालेरसकूपामृतंपपौ ॥ तेऽसुराह्यपिपश्यंतोनान्यषेधन्विमोहिताः १२ तद्विज्ञायमहायोगीरसपालानिदंजगौ ॥ स्मरन्विशोकःशोकार्तान्स्मरन्दैगवतींचताम् १३ देवोसुरोनरोन्योवानेश्वरोस्तीहकश्चन ॥ आत्मनोन्यस्यवादिष्टंदैवेनापोहितुंद्वयोः १४अथासौशक्तिभिःस्वाभिःशंभोःप्राधानिकंव्यधात् ॥ धर्मज्ञानविरक्त्यादितपोविद्याक्रियादिभिः १५ रथंसूतंध्वजंवाहंधनुर्वर्मशरादियत् ॥ सन्नद्धोरथमास्थायसशरंधनुराददे १६ शरंधनुषिसंधायमुहूर्तेऽभिजितीश्वरः भगवत्तेजसाशुप्तोददाहत्रिपुरंनृप १७ दिविदुंदुभयोनेदुर्विमानशतसंकुले ॥ देवर्षिपितृसिद्धेशाजयेतिकुसुमोत्करैः १८ अवाकिरञ्जगुर्हृष्टाननृतुश्चाप्सरोगणाः ॥ एवंदग्ध्वापुरस्तिस्रोभगवान्पुरहानृप १९ ब्रह्मादिभिःस्तूयमानःस्वधामप्रत्यपद्यत २० एवंविधान्यस्यहरेःस्वमायया विडंबमानस्यनृलोकमात्मनः ॥ वीर्याणिगीतान्यृषिभिर्जगद्गुरोर्लोकान्पुनानान्यपरंवदामिकिम् २१ इतिश्रीभागवतेम०सप्तमस्कंधेएकादशोध्यायः ११ ॥ ७ ॥ श्रीशुकउवाच ॥ श्रुत्वेहितंसाधुसभासभाजितंमहत्तमाग्र्यउरुक्रमात्मनः ॥ युधिष्ठिरोदैत्यपतेर्मुदान्वितःपप्रच्छभूयस्तनयंस्वयंभुवः १ युधिष्ठिरउवाच ॥ भगवञ्छ्रोतुमिच्छामिनृणांधर्मंसनातनम् ॥ वर्णाश्रमाचारयुतंयत्पुमान्विंदतेपरम् २ भवान्प्रजापतेःसाक्षादात्मजःपरमेष्ठिनः ॥ सुतानांसंमतोब्रह्मंस्तपोज्ञानसमाधिभिः ३ नारायणपराविप्राधर्मंगुह्यंयथाविदुः ॥ करुणाःसाधवःशांतास्त्वद्विधानतथापरे ४

तदाहरथमिति भगवतोहरेस्तेजसागुप्तोरक्षितः १६ १७ यशोवितातिप्रकारमाह दिवीति जयेत्युक्त्वाजगुरित्यनेनयशोवितातिर्ज्ञायते १८ १९ ब्रह्मादिभिर्ब्रह्मोत्पन्नैःसनकादिभिः इमारुद्रायास्थिरधन्विनेगिरःक्षिप्रेषवइत्यादिवेदवाक्यैर्वा २० शंभोःपुरदहनमाहात्म्यंयत्तत् श्रीनारायणैकनिष्ठमित्याशयेनोपसंहरति एवंविधानीति अपरंभगवच्चरितंतद्वदेतिशेषः अपरमन्यद्भस्त्वेवंविधमाहात्म्योपेतंकिंवदामिनकिमपीतिवा २१ ॥ इतिश्रीभागवतेसप्तमस्कंधेविज०कृ०टी०एकादशोध्यायः ११ ॥ भगवद्भक्त्यायथावद्वीतवर्णाश्रमाचाराचरणेनसुमुत्पन्नापरोक्षज्ञानेनप्रसन्नोहरिः स्वस्वयोग्यांभुक्तिंददातीत्येतदर्थमुत्तरेषामध्यायानामारंभः तत्रवर्णाश्रमधर्मान्श्रोतुकामोयुधिष्ठिरोनारदंपृच्छतीत्याह श्रुत्वेति महत्तमानामग्र्यस्यश्रेष्ठस्यउरुक्रमेहरावात्मामनोयस्यसतथातस्य दैत्यपतेः प्रह्लादस्य ईहितंचरितंसाधुसभासुसभाजितंसंभावितं महत्तमानांब्रह्मादीनां उत्तमस्यदैत्यानामपिपत्युरुरुक्रमात्मनोनरसिंहस्येतिवा १ धर्मंविशिनष्टि वर्णेति वर्णाश्रमाचारयुतं युमिश्रणइतिधातुः २ ३ ४

५ पुरुषार्थोपयोगित्वाद्भक्तुमिच्छामीत्याह यावतीर्येति दाक्षायण्यांनाम्नामूर्तौ धर्मतोधर्मप्रवर्तनार्थं स्यादध्यधिकैश्वरइत्यभिधानादीश्वरतपआदिश्यबदरिकाश्रमआस्तइत्यन्वयः बदरिकाश्रमेत पोध्यास्तइतिवा ६ तत्रानुष्ठानधर्मविषयेज्ञातेत्रिप्रवृत्तिःस्यादधिकारिणामितितमाह धर्ममूलमिति धर्ममूलंधर्मविषयः सर्ववेदमयःसर्ववेदप्रतिपाद्येषुप्रधानः अनेनरुद्रादयोनिवृत्ताइतिज्ञातव्यं नकेवलंधर्मविषयएव तत्प्रतिष्ठापकश्चेत्यतोधर्ममूलमित्यत्रप्रमाणंसर्ववेदमयइतिप्रमाणांतरंचास्तीत्याह स्मृतिरिति प्रमाणमितिशेषः भगवत्प्रसादहेतुत्वात्प्रमाणमित्याह येनेति अनेनभगवत्त त्त्वज्ञैःस्मृतोधर्मोनकपिलादिभिरित्युक्तंभवति ७ विषयंनिरूप्यसर्वसाधारणंसर्वधर्मसाधनमाह सत्यमिति सत्यादिचतुष्टयमंतरंगंतितिक्षादिकमुपांगमितिज्ञातव्यम् ८ ग्राम्येहोपरमःविषयभोगे च्छानिवृत्तिःविषयविपर्ययेहेक्षाप्राणिनांस्वतएवनिषिद्धकर्मचेष्टाईहातस्याःपर्यालोचनंमोक्षविपरीतप्रवृत्तिदर्शनंवा मौनंमंत्रार्थचिंतनं प्रलापवर्जनंवा आत्मविमर्शनमात्मविचारः ९ तेषुनृषुआत्म देवतावुद्धिःपरमात्मास्थितइतिज्ञानं सुतरामित्यनेननृषुविशेषतःकर्तव्यमितिसूचयति अहिंसासत्यमस्तेयंशौचंमिंद्रियसंयमः दमःक्षमार्जवंदानंसर्वेषांधर्मसाधनमितिस्मृतत्वादेषांधर्मांगत्वं नतुधर्म त्वमितिज्ञातव्यम् १० ननुतर्हिकोयंधर्मोनामेत्याशंक्यसर्वसाधारणंधर्ममाह श्रवणमिति महतांपागतिःस्थितिस्तस्याःसेवा संगतेःसेवेतिवा । दास्यात्मसमर्पणयोरेकार्थत्वात् कथंपृथग्ग्रह

नारदउवाच ॥ नत्वाभगवतेऽजायलोकानांधर्महेतवे ॥ वक्ष्येसनातनंधर्मंनारायणमुखाद्युतम् ५ यावतीर्यात्मनोंशेनदाक्षायण्यांतुधर्मतः ॥ लोका नांस्वस्तयेध्यास्तेतपोबदरिकाश्रमे ६ धर्ममूलंहिभगवान्सर्ववेदमयोहरिः ॥ स्मृतिश्चतद्विदांराजन्येनचात्माप्रसीदति ७ सत्यंदयातपःशौचंतितिक्षे क्ष्याशमोदमः ॥ अहिंसाब्रह्मचर्यंचत्यागःस्वाध्यायआर्जवम् ८ संतोषःसमदृक्सेवाग्राम्येहोपरमःशनैः ॥ नृणांविपर्ययेहेक्षामौनमात्मविमर्शनम् ९ अन्नाद्यादेःसंविभागोभूतेभ्यश्चयथार्हतः ॥ तेष्वात्मदेवतावुद्धिःसुतरांनृषुपांडव १० श्रवणंकीर्तनंचास्यस्मरणंमहतांगतेः ॥ सेवेज्यावनतिःसख्यंदास्य मात्मसमर्पणम् ११ नृणामयंपरोधर्मःसर्वेषांसमुदाहृतः ॥ त्रिंशल्लक्षणसंयुक्तःसर्वात्मायेनतुष्यति १२ संस्कारायद्यविच्छिन्नाःसद्विजोवैदिकादयः ॥ इज्याध्ययनदानानिविहितानिद्विजन्मनाम् १३

णंकृतमित्याशंका अनाद्यनंतकालेषुमुक्तौसंसारएवच मयिस्थश्चोदयत्येकोविष्णुर्मांसर्वदैवतु इतिसंप्रीतिकंज्ञानंविद्यादात्मसमर्पणं बहिश्चेश्वरदासत्वंदास्यमित्युच्यतेबुधैरित्यनेनपरिहरणीया अनाद्य नंतकालंमयिस्थित्वाविष्णुःसर्वत्रमांप्रेरयतीतिप्रीतिपूर्वकज्ञानमात्मसमर्पणं । प्रतिमादिसन्निहितभगवद्दासत्वज्ञानंदास्यम् ११ तारतम्यज्ञानार्थंब्रह्मादिविषयश्रवणादिरपिधर्मःस्यादतोविशिष्यो च्यतइत्यतउक्तं परइति एषमेसर्वधर्माणांधर्मोधिकतमोमतइतिवचनात्समुदाहृतइति समीचीनत्वंकुतोत्राह त्रिंशल्लक्षणेति अनंतलक्षणस्यहरेस्त्रिंशल्लक्षणयुक्तत्वं तथापिपुरुषाकारोभक्तानांत्वंप काशसइतिवचनात् भक्तप्रकाश्याकारविषयविवक्षया सप्तपादश्चतुर्हस्तइत्यादिशास्त्रेषुपुरुषलक्षणस्यनिरूपितत्वात् । इदंचभक्तिप्रचयायप्रोक्तमितिज्ञापयते अनेनभगवत्तोषकरोधर्मोनान्यइत्युक्तंभव ति १२ एवंधर्मस्वरूपंनिरूप्यतदधिकारिणंनिरूपयति संस्काराइति निषेकादिश्मशानांतायेसंस्कारास्तेयस्याविच्छिन्नाअखंडिताःसाद्विजःसएवाधिकार्यत्रेतिशेषः अविच्छेदत्वेनकर्तव्यत्वेको हेतुरितितत्राह वैदिकेति वेदप्रतिपाद्यत्वेनप्रमाणिकत्वेनकर्तव्याइत्यर्थः नन्विदंद्विजमात्रसामान्यंकिमेत्याह आदयइति स्त्रीणांब्राह्मणजातित्वेपिमंत्रेणाक्रियाएताइतियदतःशिष्टाचारत्वेनसंग्रहीतत्वात् इदंवैदिकत्वेपिकर्तव्यत्वंनतुस्त्रीणांवैदिकसंस्काराभावेयागानधिकारित्वमित्यस्येदमेवोत्तरं वैदिकादयइतिवैदिकाअवैदिकाश्चसंतीत्यर्थः तदुक्तं निषेकाद्याःश्मशानांता स्तेषांवैमंत्रतःक्रियाः गर्भाधान

मृतौपुंसवनंचस्यंदनात्पुरा षष्ठेष्टमेवासीमंतोमासतोजातकर्मच अहन्येकादशेनामचतुर्थेमासिनिष्क्रमः षष्ठेन्नप्राशनंमासेचूडाकार्यायथाकुलं एवमेनःशमंयातिबीजगर्भसमुद्भवं तूष्णीमेताःक्रियाःस्त्रीणांविवाहस्तुसमंत्रकइत्यादि तांपूषञ्छिवतमामेरयस्वयस्यांबीजंमनुष्यावपंति यानऊरूउशतीविश्रयातेयस्यामुशंतःप्रहरामशेपं उपोयमेरामृश्यमामेदभ्राणिमन्यथा सर्वाहमस्मिरोमशागंधारीणामिवांबिकाइत्यादिसंस्कारमंत्राः ब्राह्मणाःक्षत्रियावैश्याःशूद्राश्चत्वारोवर्णास्तेषां आद्यास्त्रयोद्विजाः तेषांसाधारणंधर्ममाह इज्येति ब्रह्मक्षत्रियविट्शूद्रावर्णास्त्वाद्यास्त्रयोद्विजाइतिस्मृतेः इज्याध्यापनदानानिविप्रस्यक्षत्रियस्यचेत्यादेः १३ एतान्यपिद्विजमात्रस्यनकिंतुविशिष्टानामित्याशयेनाह जन्मेति जन्मनाकर्मणावावदातानांकारीर्यायजेतवृष्टिकामःमलवद्वाससानसंवदेदित्यादिवेदोदिताःक्रियाश्चविहिताइत्याह क्रियाइति । विशेषधर्ममाह विप्रस्येति अध्यापनयाजनप्रतिग्रहाः ततोब्राह्मणादन्यस्यक्षत्रियादेरप्रतिग्रहः प्रतिग्रहाधिकोविप्रोयाजनाध्यापनेतथेतिवचनात् १४ प्रतिग्रहादिनापिप्रवृत्तिमभिप्रेत्यराजादिवृत्तिमाह राज्ञइति आदिशब्देनन्यायवोदंडाद्यागतंधनंगृह्यतेप्रजागोप्तुरित्यनेनप्रजागुण्यैवततोधनमाहर्तव्यं अन्यथादुष्कृतमेवादत्तइतिसूचयति वाशब्देनदेवाग्रह्यंते देववि

जन्मकर्मावदातानांक्रियाश्चनिगमोदिताः ॥ विप्रस्याध्यपनादीनिततोन्यस्याप्रतिग्रहः १४ राज्ञोवृत्तिःप्रजागोप्तुरविप्राद्बलकरादिभिः ॥ वैश्यस्तुवार्तावृत्तिःस्यान्नित्यंब्रह्मकुलानुगः १५ शूद्रस्यद्विजशुश्रूषावृत्तिश्चस्वामिनोभवेत् ॥ वार्तांविचित्रशालीनंयायावर्यंशिलोंछनम् १६ विप्रवृत्तिश्चतुर्धेयंश्रेयसीचोत्तरोत्तरा ॥ जघन्योनोत्तमांवृत्तिमनापदिभजेन्नरः १७ ऋतेराजन्यमापत्सुसर्वेषामपिसर्वशः ॥ ऋतामृताभ्यांजीवेतमृतेनप्रमृतेनवा १८ सत्यानृताभ्यांजीवेतनश्ववृत्त्याकथंचन ॥ ऋतमुंछशिलंप्रोक्तममृतंयदयाचितम् १९ मृतंतुनित्ययाच्ञास्यात्प्रमृतंकर्षणंस्मृतम् ॥ सत्यानृतंतुवाणिज्यंश्ववृत्तिर्नीचसेवनम् २० वर्जयेत्तांसदाविप्रोराजन्यश्चजुगुप्सिताम् ॥ सर्ववेदमयोविप्रःसर्वदेवमयोनृपः २१ शमोदमस्तपःशौचंसंतोषःक्षांतिरार्जवम् ॥ दानंदयाच्युतात्मत्वंसत्यंचब्रह्मलक्षणम् २२ शौर्यंवीर्यंधृतिस्तेजस्त्यागआत्मजयःक्षमा ॥ ब्रह्मण्यताप्रसादश्चरक्षाचक्षत्रलक्षणम् २३ देवगुर्वार्यगोभक्तिस्त्रिवर्गपरितोषणम् ॥ आस्तिक्यमुद्यमोनित्यंनैपुण्यंवैश्यलक्षणम् २४

प्रोर्बेनेत्यर्थः दंडार्हविप्रमंतरेणचेति वार्ताकृषिगोरक्षवाणिज्यलक्षणा १५ स्वामिनःसकाशाज्जीवनंचेतिशेषः भृत्यानांस्वामिनः ऽशुश्रूषाचवृत्तिरितिवाविप्रवृत्तिंकंठोक्त्याह वार्तेति अत्रवार्तादिकमापदीतिग्राह्यं १६ विप्रानुज्ञयाक्षत्रियवैश्ययोस्तत्त्वविज्ञापनंधर्मइत्युच्यते तदभावेशूद्रस्यकथमितितत्राह जघन्यइति जघन्योनरःशूद्रोनापदितत्सद्भावेउत्तमांवृत्तितत्त्वज्ञानलक्षणांनभजेन्नकुर्यादित्यन्वयः आपदितदभावेतदनुज्ञयाकुर्यादित्यतोनापदीतिविशेषणंपालनादिवृत्तिंवा ननुवर्णहीनस्यकथमित्यस्येदमेवोत्तरं जघन्योवर्णहीनोनापद्यप्युत्तमांवृत्तिंनभजेत् वर्णेष्वन्येषुवर्णस्तुनज्ञानीस्यात्कथंचनेतिश्रुतिः १७ राजानंविनासर्वेषांविप्रादीनामापद्युक्तसर्ववृत्तिभिर्जीवनेदोषोनास्तीत्याह ऋतेराजन्यमिति १८ ऋतादीनामप्रतीतार्थत्वाद्व्याचष्टे ऋतमित्यादिना १९ कर्षणंकृषिः २० श्ववृत्तिवर्जनेहेतुमाह सर्वेति सर्वादेवतावेदविदिब्राह्मणेवसंतीतिश्रुतेः नाविष्णुःपृथिवीपतिरित्यादेश्च २१ विप्रादीनांविविच्यज्ञानेप्रथमंलक्षणमाह शमइत्यादिनाऽच्युतात्मत्वमच्युतमनस्कत्वम् २२ त्यागोदातव्येमुक्तहस्तता आत्मजयोमनोजयः २३ त्रिवर्गैर्धर्मार्थकामैः ईश्वरपरितोषणं त्रयोवर्गायेषांतेत्रिवर्गाः तेषांद्रव्यादिनापरितोषणम् २४

शूद्रस्यांततःसकृत्स्पृष्टाभिरद्भिराचमनलक्षणंशौचम् हरकंठतालुगाभिस्तुयथासंख्यंद्विजातयः शुध्येरन्स्त्रीचशूद्रश्चसकृत्स्पृष्टाभिरंततइतिवचनात्। केशश्मश्रुनखाद्यधारणंमौंडचेन २५ स्त्रीणांसामान्यलक्षणमाह स्त्रीणामिति अनुकूलतोक्तकारित्वम् यत्रानुकूल्यंदंपत्योस्त्रिवर्गस्तत्रवर्धते स्त्रीभिर्भर्तृवधःकार्यमेषधर्मःपरंस्त्रियः इतिवचनात् तद्बंधुषुभर्तृबंधुषु भागिनेयादिषु तद्व्रतधारणंपातिव्रत्यम् तस्ययद्व्रतंतदेवाम्यात्रतामितिवा २६ गृहमंडनवर्तनैर्गृहालंकारकरणैः २७ कामैर्विषयैः २८ अलोलुपाअयोग्याभिलाषरहिता अपतितंब्रह्महत्यादिपातकरहितम् २९ अस्मिन्पत्यौहरिः सन्निहितइतियाबुद्धिः सहरिभावः हरिरस्मिन्स्थितइतिस्त्रीणांभर्तरिभावना शिष्याणांचगुरौनित्यंशूद्राणांब्राह्मणादिषु भृत्यानांस्वामिनितथाहरिभावइतीरितइतिवचनान्नतयोरैक्यार्थः हर्यात्मनाहरेर्विशेषसन्निधानवतापत्यासह ३० क्षत्रियाद्विप्रस्त्रीसूतानांविप्रात्क्षत्रियस्त्रीजातानांक्षत्रियाद्वैश्यस्त्रीसूतानांवैश्याच्छूद्रस्त्रीसूतानामित्येवंजातानांकावृत्तिरितितत्राह वृत्तिरिति येषांजातिविशेषाः अंबष्ठनिषादपारशवादिनाम्नाज्ञातव्याः। तदुक्तम्। विप्रान्मूर्द्धावसिक्तास्त्रीराज्ञोवंष्ठविशोंगनेत्यादि अध्ययनमंतरेणांबष्ठादीनांसंस्कारादिकंतत्कुलानुकूल्येन। तेषांगुणमाह अचौराणामिति यस्ययस्याविहितंतत्करणंचोर्यंतद्रहितम् शूद्राद्ब्राह्मण्यांजाताअंत्यजाःरजकादिसप्तकारवस्ततोजाताअंतेवसायिनःपुल्कसमतंगादयः येषांतत्कुलविहितएवधर्मः ब्राह्मण्यांक्षत्रियात्सूतोवैश्याद्वैदेहि

शूद्रस्यअंततःशौचंसेवास्वामिन्यमायया ॥ अमंत्रयज्ञोह्यस्तेयंमौंज्यंगोविप्ररक्षणम् २५ स्त्रीणांतुपतिदेवानांतच्छुश्रूषानुकूलता ॥ तद्बंधुष्वनुवृत्तिश्च नित्यंतद्व्रतधारणम् २६ संमार्जनोपलेपाभ्यांगृहमंडनवर्तनैः ॥ स्वयंचमंडितानित्यंपरिमृष्टपरिच्छदा २७ कामैरुच्चावचैःसाध्वीप्रश्रयेणदमेनच ॥ वाक्यैःसत्यैःप्रियैःप्रेम्णाकालेकालेभजेत्पतिम् २८ संतुष्टालोलुपादक्षाधर्मज्ञाप्रियसत्यवाक् ॥ अप्रमत्ताशुचिःस्निग्धापतिंत्वपतितंभजेत् २९ यापतिं हरिभावेनभजेच्छ्रीरिवतत्परा ॥ हर्यात्मनाहरेर्लोकेपत्याश्रीरिवमोदते ३० वृत्तिःसंकरजातीनांततत्कुलकृताभवेत् ॥ अचौराणामपापानामंत्यजांतेव सायिनाम् ३१ प्रायःस्वभावविहितोनृणांधर्मोयुगेयुगे ॥ वेददृग्भिःस्मृतोराजन्प्रेत्यचेहचशर्मकृत् ३२ वृत्त्यास्वभावकृतयावर्तमानःस्वकर्मणि ॥ हि त्वास्वभावजंकर्मशनैर्निर्गुणतामियात् ३३

कस्तथा शूद्राज्जातस्तुचांडालःसर्ववर्णविगर्हितइतिच ३१ तत्तद्वर्णैस्तत्तत्स्वभावेनानुष्ठितस्यधर्मस्यफलमाह प्रायइति सात्त्विकादिस्वभावानुसारेणब्राह्मणानांविहितः अत्रप्रमाणमाह वेदेति स्मृतो ग्रंथस्वरूपेणकृतः। प्रेत्यपरलोके नाश्रमःकारणंधर्मेक्रियमाणोभवेद्धिसः। अतोयदात्मनःपथ्यंपरस्यनतदाचरेत्। सर्वधर्मान्परित्यज्यमामेकंशरणंव्रजेत्यादिवचनात्। भक्त्युपबृंहितस्यधर्मस्यापेक्षिता शेषपुरुषार्थहेतुत्वं नकेवलस्येत्यभिप्रायेणप्रायइत्युक्तम् तत्रतत्तद्विशेषणवर्णनेग्रंथबाहुल्यंस्यादित्युपरम्यते ३२ नकेवलमनेनधर्मेणस्वर्गादिप्राप्तिरपितुभक्त्यादिसाधनपूर्णेनमुक्तिरपिस्यादित्याह वृ त्त्येति स्वभावेनस्वात्मनाकृतयाप्रेरितया सात्त्विकादिस्वभावपूर्णयावा । वृत्त्याजडलक्षणयाभक्त्यावा। योग्यतयास्वविहितकर्मणिवर्तमानःपुरुषः शनैःशनैर्बहूनांजन्मनामंते स्वभावजंकर्मपुण्यपा पलक्षणंमुक्त्वानिर्गुणतांमुक्तिम् । यदेवविद्ययाकरोतिश्रद्दयोपनिषदातदेववीर्यवत्तरंभवतीतिश्रुतेः ज्ञानपूर्वकमनुष्ठितोनित्यानंदाविर्भावलक्षणपुरुषार्थस्यहेतुः यदप्यनेवंविन्महत्पुण्यंकर्मकरोति तद्धा स्यांततःक्षीयतएवेतिश्रुतेःतत्रज्ञानपूर्वकंभगवद्भक्तप्रद्वेषोपरक्तःप्रबुद्धोधर्मोनित्यदुःखाविर्भावलक्षणपुरुषार्थस्य त्रैविद्यामांसोमपाःपूतपापायज्ञैरिष्ट्वास्वर्गतिंप्रार्थयंतइत्यादिनित्यंप्रार्थनादिगुणोपर क्तोनित्यसत्त्वगुणनिमित्तसुखलक्षणस्येत्यादि ३३

ननुसगुणोधर्मःसगुणपुरुषार्थहेतुर्भवत्वनुकूलत्वान्निर्गुणपुरुषार्थस्यकथंविरुद्धत्वादित्याशंक्यमनोहिपुरुषार्थकारणंतद्विषयोपरक्तं । दुःखोदर्कविषयसुखायस्यात्तदेवविषयाणांक्षणभंगुरात्वंदुःखोदर्कार्णां दुःसाधनत्वंचेतयावैराग्यानलभर्जितंपुनस्तदंकुरीभावासमर्थं । भगवच्चरणारविंदभक्तिसलिलसिक्तंचेत्तज्ज्ञानांकुरीकरणनिदानंभवतीत्येतमर्थंसदृष्टांतमाह ॥ उप्यमानमिति ॥ यथाबीजैरुप्यमानं पुनःमेदुरसाधनहीनंक्षेत्रंकेदारलक्षणंनिर्वीर्यतांसस्यजननशक्तिराहित्यमेति तदेवस्फुटयति पुनरिति सूत्यैउत्पत्त्यै । नकेवलमुत्पादनासमर्थींकिंतुबीजनाशहेतुश्च ३४ एवं यथा कामाशयं कामाशाविभ्रमं चित्तं । विषयसेवासमयेदुःखस्यतदभावेसुखस्यचस्मरणसमर्थमनःकामानांविषयाणामतिसेवयाक्षयरोगादिहेतुभूतया । द्रव्यादिनाशकारणानित्यसुखायविरज्येत विरक्तंभवति असारतांबुद्धिंप्राप्नोतिइदंचयोग्यानामेव । नायोग्यानामिति ॥ किंचिद्विषयसेवयाकिंस्यादितितत्राह । यथेति । कामानांविदुषिःकिंचित्सेवितैः मनोयथावत्पुरुषार्थहेतुतया नविरज्यते विरक्तंनभवति । पुनःतृष्णातिशयःस्यात् । कथमिव । सुखकांतिहेतुत्वात्कामःआज्यंतद्विदुषिर्यथाअग्निर्वर्धते । तथेतिभावः ॥ ३५ ॥ नन्वत्रवर्णादिज्ञानं । यथातारतम्यतत्पूजापितद्योग्यस्यनिःश्रेयसी । यस्यए तदभावे तद्धितकरणाद्यभीष्टासिद्धिःस्यादितितत्राह । यस्येति । यस्यब्राह्मणादेःब्राह्मणत्वादिव्यंजकम् शमदमादिलक्षणम् प्रोक्तंशास्त्रतइतिशेषः । तल्लक्षणम् यद्यन्यत्रव्यक्तंदृश्येत । अपिशब्देनाव्या

उप्यमानंमुहुःक्षेत्रंस्वयंनिर्वीर्यतामियात् ॥ नकल्पतेपुनःसूत्यैउप्तंबीजंचनश्यति ३४ एवंकामाशयंचित्तंकामानामतिसेवया ॥ विरज्येतयथाराजन्नाग्निवत्कामबिंदुभिः ३५ यस्ययल्लक्षणंप्रोक्तंपुंसोवर्णाभिव्यंजकम् ॥ यद्यन्यत्रापिदृश्येततत्तेनैवविनिर्दिशेत् ३६ ॥ ॥ इतिश्रीभागवतेमहापुराणे सप्तमस्कंधेद्वादशोध्यायः ॥ १२ ॥ ७ ॥ ॥ नारदउवाच ॥ ब्रह्मचारीगुरुकुलेवसेद्दांतोगुरोर्हितम् ॥ आचरन्दासवन्नीचोगुरौसुदृढसौहृदः १ सायंप्रातरुपासीतगुर्वग्न्यर्कसुरोत्तमान् ॥ संध्येउभेचयतवाग्जपन्ब्रह्मसमाहितः २ छंदांस्यधीयेतगुरोराहूतश्चसुयंत्रितः ॥ उपक्रमेवसानेचचरणौशिरसा नमेत् ३ मेखलाजिनवासांसिजटादंडकमंडलून् ॥ बिभृयादुपवीतंचदर्भपाणिर्यथोदितम् ४ सायंप्रातश्चरेद्भैक्ष्यंगुरवे तन्निवेदयेत् ॥ भुंजीतयद्यनुज्ञातोनोचेदुपवसेत्क्वचित् ५ सुशीलोमितभुग्दक्षःश्रद्दधानोजितेंद्रियः ॥ यावदर्थंव्यवहरेत्स्त्रीषुस्त्रीनिर्जितेषुच ६ वर्जयेत्प्रमदागाथामगृहस्थोबृहद्व्रतः ॥ इंद्रियाणिप्रमाथीनिहरंत्यपियतेर्मनः ७ केशप्रसाधनोन्मर्दस्नपनाभ्यंजनादिकम् ॥ गुरुस्त्रीभिर्युवतिभिःकारयेन्नात्मनोयुवा ८

ष्यादिदोषाभावंसूचयति ॥ तर्हीतरलक्षणेनैव तद्वस्तु ब्राह्मणादिकमितिनिर्दिशेत् उपदिशेत् गोःकिंलक्षणमितिपृष्टः सास्नादिमान्गौरितिउपदिशतियदातदापुच्छवत्त्वशृंगवत्त्वादिव्याभिचार्यविहाय यंगोपिंडंसास्नादिमंतंपश्यति । तदेयंगौरितियथाप्रत्येति । तत्प्रयुक्तंव्यवहारंकरोति । आप्तायोपदिशतिच । तथात्रापि विरक्तिबलभक्तिरेव ब्राह्मणादेःमुक्तिसाधनंलक्षणमितिसकलशास्त्रतात्पर्यार्थः । ततःसैवबुभूषुभिः संपादनीयेतिभावः ३६ ॥ ॥ इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेविज०कृ०टी०द्वादशोध्यायः ॥ १२ ॥ ७ ॥ ॥ नीचःश्रयितःहितंहिताचरणं ॥ मनोवाक्कायकर्मभिरितिशेषः १ २ ३ ४ क्वचिदपराधेसति । एकान्नादनवर्जनार्थमुपवसेदित्युक्तम् ५ स्वार्थमात्रसिद्धिः तन्मात्रंयावदिति ६ बृहद्व्रतोब्रह्मचारी स्यादिव्यवहारवर्जननिमित्तमाह इंद्रियाणीति निर्जितेंद्रियग्रामोयतिः । येनिर्जितेंद्रियग्रामायतिनोयतयश्चतेइत्यभिधानात् ७ प्रसाधनंसंस्करणं मधुमांसोच्छुनोच्छिष्टंशुष्कस्त्रीप्राणिहिंसनं भास्करालोकनाशीलपरिवादांश्चवर्जयेत् इहरण्या ख्यानंनकर्तव्यम् ८

कुतोनकार्यमत्राह नन्विति अन्यदा व्यवहारयोग्यसमये ९ ननु बंधनिवृत्यर्थंभगवदर्पणबुद्ध्याधर्मोनुष्ठेयइतिविधीयते तस्यापिव्यात्वेनस्वतएवनिवृत्युपपत्तेर्नतद्विधानमत्रावश्यकमित्याशंक्येश्वर
कल्पितस्यामिथ्यात्वासंभवेन यद्बुद्ध्यापस्यशृंखलाबंधस्तस्यतत्प्रसादेनतन्निवृत्तिवदीश्वरप्रसादजनकधर्मग्रामोविधेयोन्यथाबंधानुपपत्तिरित्याशयवांस्तत्रेश्वरकल्पितत्वमाह कल्पयेदिति यावंतं
कालमीश्वरआत्मनोजीवस्यज्ञानलक्षणरहितंज्ञानवदवभासमानमिदमाभासमज्ञानंकल्पयेत्तावंतंकालंद्वैतमयथार्थज्ञाननिवृत्तिरमेत्यापगच्छेत् ततोऽज्ञानादस्यविपर्ययोबंधोनुवर्ततेइतिशेषः तदुक्तं बेहु
त्वेनैववस्तूनांयथार्थज्ञानमुच्यते अद्वैतज्ञानमित्येवद्वैतज्ञानंतदन्यथा यथाज्ञानंतथावस्तुयथावस्तुतथामतिः । नेवज्ञानार्थयोर्भेदस्ततएकत्ववेदनमितिच । ननु वर्णादेर्विहितोधर्मग्रामःकियंत
कालमनुष्ठेयो बहुसमयसाध्यत्वेदुःखप्रयासत्वेनाशक्तयविरक्तयानधिकारिकःस्यादित्याशंक्याह कल्पयेदिति यावदीश्वरइदमाभासंमिथ्याभूतंजगत्कल्पयेत् तावद्वैतंवर्णाश्रमादिधर्मलक्षणंनविर
मेत् नापगच्छेत् ततोधिष्ठानंज्ञानंस्यात्ततोविहितधर्मग्रामस्यविपर्ययोनिवृत्तिरित्ययमर्थो हिशब्दसूचितया सत्यसृष्टावशक्ताहिमायासृष्टिंवितन्वतइतिस्मृत्याविरुद्धत्वेना नुपपन्नः ईश्वरइत्यनेनसत्य
सृष्टिसामर्थ्यंसूचयति तात्पर्येणविधानंचानुपपन्नंपतउक्तएवार्थः १० नन्वयंधर्मोब्रह्मचारिणोभवेदुतान्यस्यापिसंभवति नाद्यः अतिव्याप्तेः नद्वितीयः । पृथग्विधानानुपपत्तिरित्यतोतिदेशन्या

**नन्वग्निःप्रमदानामघृतकुंभःपुमान्यतः ॥ सुतामपिरहोजह्यादन्यदायावदर्थकृत् ९ कल्पयेदात्मनोयावदाभासमिदमीश्वरः ॥ द्वैतंतावन्नविरमेत्ततोह्य
स्यविपर्ययः १० एतच्चान्यद्गृहस्थस्यसमाम्नातंयतेरपि ॥ गुरुवृत्तिर्विकल्पेनगृहस्थस्यर्तुगामिनः ११ अंजनाभ्यंजनोन्मर्दरुग्यवलेपामिषंमधु ॥
स्रग्गंधलेपालंकारांस्त्यजेयुर्येधृतव्रताः १२ उषित्वैवंगुरुकुलेद्विजोधीत्यावबुध्यच ॥ त्रयीसांगोपनिषदंयावदर्थंयथाबलम् १३ दत्त्वावरमनुज्ञातोगु
रोःकामंयदीश्वरः ॥ गृहंवनंवाप्रविशेत्प्रव्रजेत्तत्रवावसेत् १४ अग्नौगुरावात्मनिचसर्वभूतेष्वधोक्षजम् ॥ भूतैःस्वधामभिःपश्येदप्रविष्टंप्रविष्टवत् १५**

येनयथासंभवमन्यस्यापीत्याह । एतदिति । अन्यद्वक्ष्यमाणं । नकेवलंगृहस्थस्यैवकिंतुयतेरपीत्याह यतेरपीति यथासंभवमित्युक्तंविवृणोति गुरुवृत्तिरिति गुरुवृत्तिर्गुरौवासः ब्रह्मचर्यभिक्षा
वृत्तिरित्येतत्सर्वंगृहस्थस्यानिवर्ततइत्यर्थः विकल्पेनव्यवस्थितविकल्पेनोदितानुदितहोमवदित्यर्थः कुतोनिवर्ततइतितत्राह ऋतुगामिनइति ११ पंचयज्ञाद्याचरणायासेनकालयापनंकुर्वतोगृहस्थ
स्यापिव्रतधारणेब्रह्मचारिवदभ्यंजनादिकंवर्जनीयमित्याह अंजनेति अवलेपंदर्प १२ अवबुध्य अर्थविचारंकृत्वा तत्त्वंज्ञात्वा १३ गार्हस्थ्यधर्मस्यवानप्रस्थधर्मस्यपतिधर्मस्यचानुष्ठानेनसमर्थश्चेदे
ष्वभीष्टंकुर्यादित्याह यदीति नैष्ठिकोब्रह्मचारीतुवसेदाचार्यसन्निधौ तदभावेस्यतनयेपत्न्यांवैश्वानरेपिचेतिवचनात् एतादृशस्यगुरौवासोनुज्ञायते अन्यस्यगुरोराज्ञयादूरंगत्वागृहाश्रमइति त
दुक्तं गुरोराज्ञानुरोधेनदूरस्थोवागृहीभवेदितिचेति १४ भगवदर्पणबुद्ध्याग्न्यादौक्रियमाणंकर्मतस्यबुद्ध्याकर्तव्यंनतुतदैक्यबुद्धेत्याशयेनाह अग्नाविति सगुरुर्यःक्रियाःकृत्वावेदमस्मैददातिच
उपनीयवदेद्वेदमाचार्यःसउदाहृतः एकदेशउपाध्यायऋत्विग्यज्ञकृदुच्यते एतेमान्यायथापूर्वमेभ्योमातागरीयसीतिवचनात् गुरुशब्देन सर्वएतेविवक्ष्यंतेस्वधामभिरावासस्थानभूतैरप्रविष्टंसर्वगतंम
विष्टवत्स्थितं अनुरूपवंतं । अप्रविष्टःसर्वगतःप्रविष्टस्त्वनुरूपवान् एवंद्विरूपोभगवान्हरिरेकोजनार्दनइतिवचनात् १५

---

१ वस्तूनांबहुत्वेन । यथार्थज्ञानमेवाद्वैतज्ञानमित्युच्यते । वस्तूनामैक्येनायथार्थज्ञानम् नचैतद्विरुद्धं । अद्वैतज्ञानस्यैववस्त्वैक्यज्ञानत्वेनवक्ष्यत्वादित्याशंक्यतद्धटयति । यथेति । ज्ञानार्थयोः साहश्यलक्षण
मैक्यमादायाद्वैतज्ञानंभेदज्ञानमित्युच्यते । नतुवस्त्वैक्यविषयंज्ञानम् ।

एवमाकारेणक्रियमाणस्यकर्मणःफलमाह एवंविधइति १६ ब्रह्मचारिवानप्रस्थनियमानांकृच्छ्रसाध्यत्वेनसाम्यात्प्रथमाश्रमधर्मैकथनानंतरंवानप्रस्थधर्मानाह वानप्रस्थस्येति ऋषेःसर्वज्ञस्य लोकंवैकुंठं त्वमग्रेप्रथमोअंगिराऋषिरितिश्रुतेः ऋषिर्हरौतापसेचज्ञानवत्यपिकीर्तितइति १७ कृष्टपच्यंकर्षणादिनापक्वंव्रीह्यन्नं अकालतोविहितकालमुल्लंघ्य आममग्न्यादिनानाप्नपाकं आमलकादि १८ वन्यैर्देवव्रीह्यादिभिः कालचोदितान्तत्तत्कालविहितान् १९ अग्न्यर्थमग्निरक्षार्थं उटजंपर्णशालां शरणंगृहं अभ्यदाहिमादिकंश्रयेत आतपनमातपः २० अग्निपरिच्छदादर्भादयः २१ नविपद्येताक्लिष्टोनभवेत् ॥ २२ ॥ अकल्पोऽसमर्थः आन्वीक्षिक्यां आत्मविचारलक्षणायां अनशनमशनत्यागः तत्राशक्तौमासेगतेपक्षेवादिवसेवाश्नीयादित्यादिकमादिपदेनगृहीतं यथाह याज्ञत्वल्क्यः । पक्षेगतेवाप्राश्नीयान्मासेवाहनिचागतइति २३ म्रियमाणेनपुरुषेणाध्यात्मंकार्यकारणजातं यत्तत्रेदंकार्यमेतस्मिन्कारणेविलीयतइतिध्यानंकर्तव्यमित्यभिप्रायेणाह कारणेष्विति संघातंकार्यजातं न्यासोज्ञानपूर्वकंध्यानंकार्यस्यकारणलयज्ञानमात्रंविलापनमितिवचनात् २४ यथार्हतइत्युक्तंविवृणोति खेखानीति खेआकाशेखानिशरीरावच्छिन्नाकाशानि श्वासंशरी

एवंविधोब्रह्मचारीवानप्रस्थोयतिर्गृही ॥ परंविंदतिविज्ञानंपरंब्रह्माधिगच्छति १६ वानप्रस्थस्यवक्ष्यामिनियमान्मुनिसंमतान् ॥ यानातिष्ठन्मुनिर्गच्छेद्दषिलोकमिहांजसा १७ नकृष्टपच्यमश्नीयादकृष्टंवाप्यकालतः ॥ अग्निपक्वमथामंवाअर्कपक्वमुताहरेत् १८ वन्यैश्चरुपुरोडाशान्निर्वपेत्कालचोदितान् ॥ लब्धेनयेनचान्नेनपुराणंतुपरित्यजेत् १९ अग्न्यर्थमेवशरणमुटजंवाद्रिकंदरम् ॥ श्रयेताहिमवाय्वग्निवर्षार्कातपनात्स्वयम् २० केशरोमनखश्मश्रुमलानिजटिलोदधत् ॥ कमंडल्वजिनेदंडवल्कलाग्निपरिच्छदान् २१ चरेद्वनेद्वादशाद्वानष्टौवाचतुरोमुनिः ॥ द्वावेकंवायथाबुद्धिर्नविपद्येतकृच्छ्रतः २२ यदाऽकल्पःस्वक्रियायांव्याधिभिर्जरयाथवा ॥ आन्वीक्षिक्यांचविद्यायांकुर्यादनशनादिकम् २३ आत्मन्यग्नीन्समारोप्यसंन्यस्याहंममात्मताम् ॥ कारणेषुन्यसेत्सम्यक्संघातंतुयथार्हतः २४ खेखानिवायौनिःश्वासांस्तेजस्यूष्माणमात्मवान् ॥ अप्स्वसृक्श्लेष्मपूयानिक्षितौशेषंयथोद्भवम् २५ वाचमग्नौसवक्तव्यमिंद्रेशिल्पंकरावपि ॥ पदानिगतिभिर्विष्णौरत्योपस्थंप्रजापतौ ॥ मृत्यौपायुंविसर्गंचयथास्थानंविनिर्दिशेत् २६ दिक्षुश्रोत्रंसनादेनस्पर्शेनाध्यात्मनित्वचम् ॥ रूपाणिचक्षुषाराजन्ज्योतिष्यभिनिवेशयेत् २७ अप्सुप्रवेशयेज्जिह्वांघ्रेयैर्घ्राणंक्षितौन्यसेत् ॥ मनोमनोरथैश्चंद्रेबुद्धिंबोध्यैःकवौपरे २८ कर्माण्यध्यात्मनारुद्रेयदहंसंमताःक्रियाः ॥ सत्त्वेनचित्तंक्षेत्रज्ञेगुणैर्वैकारिकंपरे २९

स्वापुबाह्यवायौ शारीरमूष्माणंकारणतेजासि आत्मवान्परमात्मज्ञानवान् वशीकृतमनावा श्लेष्मपूयासृक्कार्याण्यप्सुलीयंतइतिचिंतयेत् शेषंगंधंक्षितौ । नन्वाकाशादेर्लघवादीनामुत्पत्तेःकथमियतामेवलयश्चिंत्यतइतितत्राह यथोद्भवमिति आकाशाल्लाघवंसौक्ष्म्यंशब्दंश्रोत्रंतथाबलं वायोस्तुप्रेरणाचेष्टाव्यूहनंसौक्ष्म्यमेवच अग्नेस्तुदर्शनंशक्तिरौष्ण्यंरूपप्रकाशकं रसेभ्योरसनंशैत्यंस्नेहक्लेदनमार्दवं भूमेर्गंधस्तथाघ्राणंगौरवंमूर्तिरेवचेतिवचनात् उत्पत्त्यनुसारेणलयश्चिंतनीयइत्यर्थः २५ इदानींवागादींद्रियाणां अभ्यादिदेवताधीनत्वमपिचिंतनीयमित्याह । वाचमिति । सवक्तव्यमितिक्रियाविशेषणं प्रजापतौदक्षे यथास्थानमित्यनेनाभिमानिनामभिमन्यमानानांतत्तदुत्पत्तिकारणमनुमृत्येत्युच्यते २६ सनादेनश्रोतव्येनसह त्वचंत्वगिंद्रियंस्पर्शेनसहवायाविति शेषः ज्योतिष्यादित्येनिवेशयेत् निविशतीतिचिंतयेत् २७ जिह्वांरसनेनेतिशेषः परेकवौबृहस्पतौ उशनसोपिकविशब्दवाच्यत्वात्तद्व्यावृत्त्यर्थंपरइति २८ अध्यात्मनाहंकारेणसहकर्माणिरुद्रे तत्रहेतुर्यदहमितिक्रियायत्

अहंसंमताअहंकारादुत्पन्नत्वेनसंमताइतियत्तस्मादितिशेषः सत्वेनसाधुपुण्यकर्मणासहचित्तंक्षेत्रज्ञंहिरण्यगर्भेनिवेश्य एतल्लक्ष णंविलयंरमृत्वावैकारिकनामानंहिरण्यगर्भगुणैःसहक्षेत्रज्ञारूपेपरेपरमा त्मनिलक्ष्मीद्वारालयमार्गंचिंतयेत् चित्तंहिरण्यगर्भंतुविलाप्यपरमात्माने क्षेत्रज्ञारूपेलापयेच्ततोनान्यत्स्मरेदुधइतिचात्रमानं २९ इदानीमवादीनांलयप्रकारंनिरूपयति अस्त्विति तत्रनभःकूटस्थे वैकारिकतैजसतामसकूटरूपेऽहंकारतत्त्वे । तदहंकारतत्त्वं महति महत्तत्त्वे । तन्महत्तत्त्वमव्यक्ते । तदव्यक्तमक्षरेहरौविलयप्रकारंस्मरेत् । जडस्यस्वकारणैक्यमभिमानिनोजीवस्यप्रवेशलक्षणं तत्तत्कार्यस्थहिरण्यगर्भस्योत्तररूपेणैक्यंहिरण्यगर्भस्थहरेरप्युत्तरोत्तररूपैकीकरणमितिलयभेदंतुशब्दोज्ञापयति ३० इतिशब्दोलयसमाप्तिसूचकः कूटस्थोक्षरउच्यतइतिवचनात् अक्षरनाम्न्यां चित्प्रकृतौस्थित्वाऽक्षरलक्षणनित्यत्वहेतुत्वादक्षरनामत्वेनस्थितमात्मानंपरमात्मानंचिन्मात्रमवशेषितंसृष्ट्यादिव्यापारोदासीनंज्ञात्वाऽद्वयोहरिव्यतिरिक्तवस्तुस्वातंत्र्यस्मरणरहितोथकृत्याद्विरमेदित्य न्वयः । कृत्याद्विरमोक्तिरत्रकथमित्याह दग्धयोनिरिति दग्धायोनिरिंधनलक्षणायेनसतथा यथाग्नेरिंधनदहनात्परंकृत्यंनास्ति तथाश्रीनारायणोपासकस्यसविकासंतत्त्वज्ञानात्परंकृत्यंनेतिभावः । नहरिंस्मरतःकृत्यंदग्धेंधनहुताशवदितिवचनात् ३१ ॥ ॥ इतिश्रीभागवतेम०वि०टी०त्रयोदशोध्यायः ॥ १३ ॥ ७ ॥ ॥ क्रमप्राप्तंयतिधर्मंनिरूपयति कल्पइति एवमुक्तंकृच्छ्रंसोढुंकल्पः अप्यर्थस्तुशब्दस्तर्हिपारिव्रज्यसंन्यस्यमहींचरेदित्यन्वयः । देहमात्रावशेषितइत्यनेनपव्रजनंविशिनष्टि अधीतवेदोजयकृत्पुत्राद्यानंददोग्निमान् शक्त्याचयज्ञैकृन्मोक्षमनःकुर्यात्तुनान्यथेतिनियमंतुश ब्देनवारयति यदहरेवविरजेत्तदहरेवप्रव्रजेदितिविशेषविधानात् ब्रह्मचारिणोपि तुर्याश्रमग्रहणोपपत्तेरतएवकल्पइत्युक्तं कामक्रोधादिसहजशत्रुजयसमर्थइत्यर्थः उपनीयगुरुःशिष्यंमहाव्याहृतिपू

अप्स्वक्षितिमपोज्योतिष्यदोवायौनभस्यमुम् ॥ कूटस्थेतत्त्वमहतितदव्यक्तेऽक्षरेतुतत् ३० इत्यक्षरतयात्मानंचिन्मात्रमवशेषितम् ॥ ज्ञात्वाद्वयोथविर मेद्दग्धयोनिरिवानलः ३१ इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेत्रयोदशोध्यायः ॥ १३ ॥ नारदउवाच ॥ कल्पस्त्वेवंपरिव्रज्यदेहमात्रावशेषितः॥ ग्रामैकरात्रविधिनानिरपेक्षश्चरेन्महीम् १ बिभृयाद्यद्यसौवासःकौपीनाच्छादनंपरम् ॥ त्यक्तंनलिंगदंडाभ्यामन्यत्किंचिदनापदि २ एकएवचरेद्भिक्षुरा त्मारामोऽनपाश्रयः ॥ सर्वभूतसुहृच्छांतोनारायणपरायणः ३ पश्येदात्मन्यदोविश्वंपरेसदसतोद्वये ॥ आत्मानंचपरंब्रह्मसर्वत्रसदसन्मये ४

र्वकं वेदमध्यापयेत्पश्चाच्छौचाचारांश्चशिक्षयेदितिवचनात् ब्रह्मचारिणोध्ययनप्रारंभेगृहीतवेदत्वंयुज्यतइतिवासंन्यासाश्रमश्चतुर्द्धाभिद्यते कुटीचकोबहुदकोहंसःपरमहंसइति तत्रपरमहंसधर्मः कथ्यतइत्यर्थद्योतकोवातुशब्दोनिरपेक्षः अलोलुपः १ देहमात्रावशेषितइत्यस्यापवादमाह बिभृयादिति यद्यसौभिक्षुरप्युत्सृत्यकृंवासःपरंपश्चात्यतिनिषिद्धलक्षणंबिभृयाद्धर्तुमिच्छेत्त र्हिकौपीनलक्षणमाच्छादनंबिभृयादथवाकौपीनंशीतातपनिवारकमेकमाच्छादनंचबिभृयात्परंनाबिभृयादित्यर्थः शीतातपनिवारार्थमेकमाच्छादनंयतेः कौपीनात्परमित्याहुरेकेनान्याद्विनावपुरितिवचनात् कौपीनाच्छादनंचेत्येकवद्भावः नन्वयंयतिरितिकेनज्ञातुंशक्यतेतत्राह नालिंगेति लिंगदंडाभ्यांविनाकिंचित्नाबिभृयात् लिंगंचकक्षंखादिमुद्राधारगं कमंडल्वादिकंवा सर्वभूतहितःशांताश्चिदंडीसक मंडलुरितिवचनात् वाक्कायचेतसांयमनंत्रिदंडित्वं लिंगदंडाभ्यामितिविशेषणादेकएवतुलक्षणोदंडोन्यथापरमहंसत्वंनस्यात् दंडोवाग्देहचेतसामितिवक्ष्यति २ अनपाश्रयः ग्रामाद्यावासवि धुरः यथाहयाज्ञवल्क्यः एकारामःपरिव्रज्यभैक्षार्थंग्राममाश्रयेत् अप्रमत्तश्चरेद्भैक्ष्यंसायाह्नेतुपलक्षितइतिवचनात् ३ नारायणपरत्वंदर्शयति पश्येदिति अदोविश्वमात्मनिपश्येत् तदाधारत्वे नस्थितमितिशेषःआत्मनीतिजीवःकिंनस्यादितितत्राह परइति सदसतःपरेउत्कर्षवत्त्वेनविकल्पात्सर्वनामसंज्ञानास्ति जीवस्यसंसारित्वेनानुत्कृष्टत्वान्नैतादृशोन्योस्तीत्याह अद्वयइति नैतावता पूर्णतइत्याह आत्मानंचेति सर्वंब्रह्मसदसन्मयेजगतिअवस्थितमात्मानंपरंब्रह्मपश्येदीदृशंनामचिंतनं ४

सुप्तप्रबोधयोःसुप्तिजाग्रतोःसंधौअरुणोदयकालेशयनप्रारंभकालेचात्मन.स्वस्यगतिं सतासौम्यतयासंपन्नोभवति अतःप्रबोधोस्मादित्यादिप्रमाणबलात्परमात्माधीनलक्षणांस्थितिंहरेश्चस्वातंत्र्यलक्ष णंपश्यन्बंधंमोक्षंमायामात्रमयंहरेरिच्छयानिर्मितंत्रातंपश्यन्वस्तुतः स्वातंत्र्येणनान्याधीनत्वेनपश्येत् ५ मृत्युंध्रुवमितिनाभिनंदेत् । स्वजीवितंवाऽध्रुवमिति तर्हिकथंनिश्चयइतितत्राह कालमि ति भूतानांप्रभवाप्ययंकालाख्यभगवदधीनंप्रतीक्षेत किंबहुनासर्वंभगवदधीनमितिपश्येत् ६ जीविकांचेतनादिलक्षणां वेदवादप्रतीत्यतर्कान्वैशेषिकादिशास्त्रनिष्ठितान् अप्रयोजकंपक्षंसिद्धांतं नाप्रयोजनपक्षीस्यान्नवृथाशिष्यबंधकृत् नचोदासीनशास्त्राणिनाविरुद्धानिवाभ्यसेत् ७ नव्याख्ययोपजीवेतननिषिद्धान्समाचरेत् एवंभूतोयतिर्यातितदेकशरणोहरिरितिनिर्णीतमानं बहून्ग्रंथान्वै ष्णवाभासान्मोक्षविरुद्धान्वात्स्यायनादीन्ज्योतिःशास्त्रादीन् व्याख्ययोपजीवनंनकुर्यात् आरंभान्निषिद्धान्कृष्यादीन् ८ कृष्यादिनोत्पन्नद्रव्येणदानादिधर्मसंपादनोपपत्तेःकथमारंभान्नारभेतेत्यु च्यतइतितत्राह नयतेरिति प्रायोयतेराश्रमोधर्महेतुर्नभवति किंतु निरंतरोपासनयाज्ञानहेतुः ज्ञानाधिकारेप्रवृत्तस्यकर्माधिकारप्रवृत्तिरधःपातहेतुःस्यात् ईश्वराज्ञोल्लंघनदोषापातात् समेब्रह्मणि चित्तंसततस्मरणसमर्थमंतःकरणंयस्यसतथातस्यैवंविधस्ययतेः आश्रमलक्षणदंडादिसाधारणंनचावश्यकमित्याह बिभृयादिति यदाहयाज्ञवल्क्यः नाश्रमःकारणंधर्मेक्रियमाणोभवेद्धिसः अतोयदा

सुप्तप्रबोधयोःसंधावात्मनोगतिमात्मदृक् ॥ पश्यन्बंधंचमोक्षंचमायामात्रंचवस्तुतः ५ नाभिनंदेद्ध्रुवंमृत्युमध्रुवंवास्वजीवितम् ॥ कालंपरंप्रतीक्षेतभू तानांप्रभवाप्ययम् ६ नासच्छास्त्रेषुसज्जेतनोपजीवेतजीविकाम् ॥ अतिवादांस्त्यजेत्तर्कान्पक्षंकंचिन्नसंश्रयेत् ७ नशिष्याननुबध्नीतग्रंथान्नैवाभ्यसेद्बहू न् ॥ नव्याख्यामुपजीवेतनारंभान्नारभेत्क्वचित् ८ नयतेराश्रमःप्रायोधर्महेतुर्महात्मनः ॥ शांतस्यसमचित्तस्यबिभृयादुतवात्यजेत् ९ अव्यक्तलिंगो व्यक्तार्थोमनीष्युन्मत्तबालवत् ॥ कविर्मूकवदात्मानमदृश्योदर्शयेन्नृणाम् १० अत्राप्युदाहरंतीममितिहासंपुरातनम् ॥ प्रह्लादस्यचसंवादंमुनेराजगर स्यच ११ तंशयानंधरोपस्थेकावेर्यांसह्यसानुनि ॥ रजस्वलैस्तनूदेशैर्निगूढामलतेजसम् १२ ददर्शलोकान्विचरन्लोकतत्त्वविवित्सया ॥ वृतोमात्यैः कतिपयैःप्रह्लादोभगवत्प्रियः १३ कर्मणाकृतिभिर्वाचालिंगैर्वर्णाश्रमादिभिः ॥ नाविंदतजनोयंवैसोसाविति नचेतिच १४ तंनत्वाभ्यर्च्यविधिवत्पाद योःशिरसास्पृशन् ॥ विवित्सुरिदमप्राक्षीन्महाभागवतोसुरः १५ ॥ प्रह्लादउवाच ॥ बिभर्षिकायंपीवानंसोद्यमोभोगवान्यथा ॥ वित्तंनैवाद्यभवतो भोगोवित्तवतामिह १६ भोगिनांखलुदेहोयंपीवाभवतिनान्यथा १७

त्मनःपथ्यंपरस्यनतदाचरेत् ९ बाह्यलिंगाभावेप्यांतरंलिंगमस्तीत्याह अव्यक्तेति अव्यक्तंजनेनाज्ञातंमानसंलक्ष्मलिंगंयस्यसतथा विद्यातपआदिभिरप्रकटितस्वरूपोवा तर्ह्यस्यांकिवक्तव्यमत्राह व्यक्तार्थइति अपरोक्षीकृतभगवत्स्वरूपलक्षणपुरुषार्थः अनेनलिंगादिदंडधारणमेवंविधस्यनावश्यकमन्यस्येत्युक्तंभवति मनीषीनिरंतरमननशीलः अव्यक्तस्वरूपंदर्शयति अदृश्यः प्राक् तजनाज्ञेयः कविरतिक्रांतदर्शी १० अत्रापरोक्षज्ञानायत्याचारे । इतिहासशब्दार्थमाह पुरातनमिति आजगरस्यअजगरव्रतधारिणः ११ सह्यसानुनिसह्याख्यपर्वततटे कावेर्याकावेर्यु त्पत्तिक्षेत्रे तनूदेशैःशरीरावयवैः १२ विवित्सयावेदितुमिच्छया १३ सएवदेवदत्तोसौनवेतिनाविंदत नज्ञातवान् १४ १५ भोगवान्संपन्नः ननुपरिणममानस्यदेहस्यपीनत्वविशेषःपरिणा मोपिकस्माच्चित्स्यान्मादिरासेव्यस्येवाकिमत्रचोद्यमत्राह वित्तमिति सत्यंकृष्याद्युद्योगवतोदेहिनोव्रीह्यादिवित्तंभवतीहलोकेतद्वतांभोगःखलु भोगिनामयंदेहःपीनोभवति हेत्वंतरंनास्ती

प्रकृतेपितथास्यादितित्राह नतइति अर्थोवित्तं यतोवित्तात्पीवेति यत्तस्मात् ततविस्मयोजायते लोकेनिमित्तांतराभावेसतिपीनत्वंभोगित्वेनदृष्टं अत्रभोगित्वंनदृश्यतेपीनत्वंतुदृश्यते तस्मि न्निमित्तांतरमस्ति तदस्माकंश्रोतुंक्षमंचेद्वदेत्यन्वयः १८ इतोपिनिमित्तांतरेणभाव्यमन्यथाकवित्वादयोभोगिगुणानस्युरित्याह कविरिति नचेत्तर्हि वेदाननुभवसि अन्नमयंहिसौम्यमनआपो मयःप्राणस्तेजोमयीवागितिश्रुतेः यःकंटकैर्वितुदतिचंदनैर्यश्चलिंपति अकृष्टापरिकृष्टश्चसमस्तस्यचतस्यचेतिश्रुतेः सर्वस्यसमः नद्वेक्षिनद्वेषंकरोषिनापि स्तुतिंकरोषि अनेनसमत्वंविवृतं १९ इतर त्रविरक्तयाश्रीनारायणचरणारविंदस्मरणमकरंदपानमेवपीनत्वेनिमित्तमितिपरिहारमभिप्रेत्यप्रह्लादंप्रतिब्रुतेइत्याह नारदइति २० ज्ञानिन्श्वेकोभवानिदंवेदेत्यन्वयः इदमितिकिंकेनसाधनेननवेदअत्रा ह वेदेति भवानध्यात्मचक्षुषापरमात्मानुग्रहोत्पन्नज्ञाननेनृणामीहोपरमयोःप्रवृत्तिनिवृत्तिलक्षणयोर्मार्गयोःपदंनिश्चितंविषयस्थानंवेदेतिशेषः २१ देहिनामज्ञानसंभवात्तेष्वेकत्वात्ममापितद्विषयं ज्ञानंनास्तीतिकिंनस्यादित्याशंक्यसत्यंविशेषोस्तितवेत्याह यस्येति हृद्गतत्वंसामान्यमितिमत्वाश्लिष्टइत्युक्तं केवलयाफलानामाकांक्षया ध्वांतमज्ञानलक्षणं अन्यत्रांधकारमज्ञानं तत्त्वाप्रतिप त्तौकारणत्वेनदृष्टंयतस्तवनास्ति तस्माद्भवान्जानातीत्यर्थः २२ यद्यपिवक्तव्यांशोनास्त्यथापीदमप्राक्षीदित्येकविषयप्रश्नःकृतःपरिहारेप्रश्नानित्याद्यनेकविषयःकथमयंसंगच्छतइतिचेत् निरुद्य मस्यवित्तंकथं निर्वित्तस्यभोगःकथमभोगिनःपीनत्वंकथमितिप्रश्नानामपिबहुत्वात् इदमित्यस्याव्ययत्वेनजातिविशेषत्वेनचोपपत्तेः । तवप्रश्नान्ब्रूमहत्यनेनतदनुवादःक्रियतेउत्तरपरिहारः । ना

नतेशयानस्यनिरुद्यमस्यब्रह्मन्निहार्थोयतएवभोगाः ॥ अभोगिनोयंतवविप्रदेहःपीवायतस्तद्वदनःक्षमंचेत् १८ कविःकल्पोनिपुणश्चित्रप्रियक थःसमः ॥ लोकस्यकुर्वतःकर्मशेषेनद्वेक्षिनौषिवा १९ ॥ नारदउवाच ॥ सइत्थंदैत्यपतिनापरिपृष्टोमहामुनिः ॥ स्मयमानस्तमभ्याहतद्वागमृतयंत्रितः २० ॥ ब्राह्मणउवाच ॥ वेदेदमसुरश्रेष्ठभवान्नन्वार्यसंमतः ॥ ईहोपरमयोर्नृणांपदमध्यात्मचक्षुषा २१ यस्यनारायणोदेवोभगवान्हृद्गतःसदा ॥ भक्त्या केवलयाश्लिष्टोधुनोतिध्वांतमर्कवत् २२ अथापिब्रूमहेप्रश्नांस्तवराजन्यथाश्रुतम् ॥ संभाषणीयोहिभवानात्मनःशुद्धिमिच्छता २३ तृष्णयाभववाहिन्याग्राम्यकामैरपूर्णया ॥ कर्माणिकार्यमाणोहंनानायोनिषुयोजितः २४ यदृच्छयालोकमिमंप्रापितःकर्मभिर्भ्रमन् ॥ स्वर्गापवर्गयोर्द्वारंतिरश्चांपुनरस्य च २५ अत्रापिदंपतीनांचसुखायान्यापनुत्तये ॥ कर्माणिकुर्वतांदृष्ट्वानिवृत्तोस्मिविपर्ययम् २६

द्योऽदर्शनात् द्वितीयोपितद्वाचकपदप्रयोगाभावादनुपपन्नः तवप्रश्नानुद्दिश्यपरिहारान्ब्रूमहइतिपक्षोपिगौरवादयुक्तइतिचेदुच्यते ब्रूञ्व्यक्तायांवाचीतिधातोर्व्यक्तिर्नामस्पष्टीकरणंतस्यपरिहारार्थोप पत्तेः यथाश्रुतमित्यनेनापिस्पष्टीकरणप्रतीतेरिति ननुयदज्ञातज्ञापकंतदेवोपादेयं नचेदंतथा । प्रह्लादस्यभगवदनुग्रहेणज्ञाताशेषार्थत्वादतःकस्मैस्पष्टीक्रियतइत्याशंक्यतदज्ञातमस्माभिर्नवोच्यते किंतुमहत्संभाषणलक्षणार्थसेवयांतःकरणशुद्धिःस्यादितिमत्वास्पष्टीक्रियतइत्याह संभाषणीयइति अनेनब्रूमहइत्यात्मनेपदार्थोविवृतइतिज्ञायते २३ निवृत्तिमार्गएवसंसारोन्मूलनहेतुरितिवक्तुं प्रवृ त्तिमार्गस्तुनानादुःखहेतुत्वेनहेयःप्रेक्षावतेत्येतत्स्वानुभवसिद्धमित्याह तृष्णयेति भववाहिन्यानदीवद्वर्तमानयासंसारापादिकयावा इतरनदीनामृतुभेदेनपूर्त्यपूर्त्तीस्यातां नास्याःकदापिपूर्तिरित्याह ग्राम्येति २४ यदृच्छयादैवेच्छया लोकंशरीरंयस्माल्लोकात्प्रेत्येतिश्रुतेः नकेवलंस्वर्गादेर्द्वारंकिंतुतिर्यगादिजन्मनोपिकारणमित्याह तिरश्चामिति अस्यमनुष्यशरीरस्यापिद्वारमितिशेषः २५ कृष्ण द्युद्योगवतोवित्तंस्यादित्यादिनायदुक्तंसुखंस्यादितितत्परिहरति अत्रापीति अत्रापिमनुष्यशरीरेपिदंपतीनांविपर्ययंदुःखंदृष्ट्वानिवृत्तिमार्गमाश्रितोस्मीत्यन्वयः अन्यापनुत्तयेसुखादन्यस्यदुःखस्यनि रासाय । सुखायकर्माणिकरोतिलोकोनतैःसुखंनान्यदुपारमंवेतिस्वोक्तेः २६

कर्मणोनिवृत्तस्यदुःखस्यनिरासायसुखावाप्तौकिमंतरंगमित्याशंक्ययदि सुखंस्वरूपद्विद्वैतर्हितत्प्राप्तौयत्नःकर्तव्योनचैवंस्वरूपत्वात् सुखस्यतद्व्यक्तौस्वरूपाच्छादकसर्वनिषिद्धकर्मनिवृत्त्याविर्भूतभगव
त्प्रसादएवमुख्यनिमित्तमित्याह सुखमिति बलमानंदओजश्चसहोज्ञानमनाकुलम् स्वरूपाण्येवतुजीवस्यव्यज्यंतेपरमाद्वैभोरित्यादिहिशब्देनदर्शयति अस्यात्मनोजीवस्यस्वरूपभूतंयत्सुखंतत्सर्वेहोपरतेः
प्रसन्नात्सर्वापूर्णेहाचेष्टायस्यससर्वेहः । कोह्येवान्यादितिश्रुतेः । उपाऽधिकाऽत्युद्रिक्तारतिरानंदोयस्यसउपरतिःयदेषआकाशआनंदोनस्यादितिश्रुतेःसर्वेहश्चउपरतिश्चसर्वेहोपरातिस्तस्माद्धरेराविर्भवतीति
शेषः उपोधिकइतिसूत्रात् ततःकिंतत्राह मनःसंस्पर्शजानिति मनोधिष्ठितेंद्रियाणांविषयैः संस्पर्शनात्संबंधात् । जाताश्छस्तान्स्त्रगादिभोगान्नसंविशेत्नसेवेत । बुद्धिमानितिशेषः २७ एतदंगी
कारावरुद्धस्यबाधकमाह इतीति । आत्मनइत्येतदुक्तमित्येवंतत्रसिद्धमितिशेषःइतिशब्दःप्रकारवचनः । तत्रपुमान्संतंसदातनंस्वार्थपुरुषार्थविस्मृत्याऽसतिभगवत्प्रसादेननिवर्तमाने द्वैतेऽन्यथाज्ञाने
विषये । विचित्रांसुरनरादिनानायोनिविषयांघोरांसंसृतिमाप्नोतीत्यन्वयः २८ स्वतृष्णायाअनिवृत्तकत्वात्संसारस्यघोरत्वमितीममर्थसदृष्टांतमाह जलमिति । तदुद्भवैर्जलोद्भवैः शैवलादिभिरज्ञोज्ञानर
हितोऽजितेंद्रियोमृगतृष्णांसूर्यमरीचिसंपृक्तसलिलंयथोपधावेत्तथा स्वतःस्वतंत्राद्धरेरन्यत्रदेवदत्तादावर्थदृक्पुरुषार्थदर्शी २९ ननुपुरुषार्थसाधनत्वेनजातैर्देहादिभिरनुष्ठिताः क्रियाःसुखादिहेतवःस्युरि

सुखमस्यात्मनोरूपंसर्वेहोपरतेर्हियत् ॥ मनःसंस्पर्शजान्दृक्षाभोगाञ्छस्तान्नसंविशेत् २७ इत्येतदात्मनःस्वार्थसंतंविस्मृत्यवैपुमान् ॥ विचित्रामसति
द्वैतेघोरामाप्नोतिसंसृतिम् २८ जलंतदुद्भवैश्छन्नंहित्वाज्ञोजलकाम्यया ॥ मृगतृष्णामुपाधावेत्तथान्यत्रार्थदृक्सतः २९ देहादिभिर्दैवतंत्रैरात्मनःसुख
मीहतः ॥ दुःखात्ययंवानीशस्यक्रियामोघाःकृताकृताः ३० आध्यात्मिकादिभिर्दुःखैरविरक्तस्यकर्हिचित् ॥ मर्त्यस्यकृच्छ्रोपनतैरर्थैःकामैःक्रिये
तकिम् ३१ पश्यामिधनिनांक्लेशंलुब्धानामजितात्मनाम् ॥ भयादलब्धनिद्राणांसर्वतोपिविशंकिनाम् ३२ राजतश्चोरतःशत्रोःस्वजनात्पशुपक्षितः ॥
अर्थिभ्यःकालतःस्वस्मान्नित्यंप्राणार्थवद्भयम् ३३ शोकमोहभयक्रोधारागक्लैब्यश्रमादयः ॥ यन्मूलाःस्युर्नृणांजह्यात्स्पृहांप्राणार्थयोर्बुधः ३४ मधुका
रमहासर्पोलोकेस्मिन्नोगुरूत्तमौ ॥ वैराग्यंपरितोषंचप्राप्तायच्छिक्षयावयम् ३५

त्याशंक्य भगवदर्पणबुद्धिचिकित्साराहित्याव्यर्थाइत्यात्याह देहादिभिरिति । यायाः कृताकृताः क्रियास्तास्ताः सर्वाअपिमोघाः तत्रहेतुगर्भविशेषणम् अनीशस्येशविरुद्धस्य ३० इतोपिवित्तापाद
नेनप्रयतनीयम् आध्यात्मिकादिक्लेशग्राहगृहीतत्वेनडुंडुभग्रस्तमंडूकवत्सम्मूढशारीरबलाभावात् कृतांतपाशबद्धगलस्यपुरुषस्यपुरतोनिहितक्षीरासववद्व्यर्थचित्तामित्याह आध्यात्मिकादिभिरिति
कामैः शब्दादिविषयैः ३१ कस्यचिददृष्टबलादुपार्जितवित्तस्यसमृद्धशारीरबलस्यापिलोभाभिभूतमनस्कत्वेनापिभोगोदुर्घटइत्याह । पश्यामीति ३९ प्राणार्थवद्भयम् अर्थवतः प्राणभयंभवतिप्राणव
तोर्थवतश्चेतिवा ३३ ननुसर्वानर्थशमनेकिंकारणमित्याशंक्यस्पृहासर्वापदोनिदानमतस्तत्त्यागएवप्रथमतःकारणमित्याह शोकेति । यास्पृहामूलंयेषांतेतथाप्राणेऽर्थेचस्पृहा । वैष्णवासिद्धांतेताद्वि
रोधिनोजनात् प्राणसंकटेप्राप्तप्राणरक्षणेस्पृहापिनकार्याकिमुतार्थइतिप्रदर्शनायप्राणग्रहणम् ३४ वित्तवतःप्राणभयंवित्तस्पृहयाशोकादिकंस्यादित्याशुक्तमर्थमधुकराजगरदृष्टांतेनबोधयति मधुकरेति।
गुरूत्तमाद्याशिक्षासाऽऽभ्यामेवाप्तेतिगुरूत्तमावित्यूचे ३५

१ सर्वानर्थाशमनेइतिपाठान्तरंतदाऽष्टहेत्यन्वयः २ वैष्णवानाम् तत्सिद्धान्त विरोधिजनादित्यर्थः

यथाचतंमधुव्रतंहत्वान्योमधुहरति तथा वित्तापादकंहत्वाकृच्छ्रादजितंराजाद्यन्यतमोहरेत्मधुव्रतस्थितिंदृष्ट्वासर्वकामेभ्योविरागःशिक्षितः ३६ उदरपोषणप्रयत्नशून्योनीहः । नोचेच्चदृच्छयाऽप्राप्तंचेन्महाहिरजगरः ३७ भूरिगुणोपेतंकस्मिंश्चिदिवाह्नचेवभुक्त्वानक्तंभुंजेकस्मिंश्चिदिनेनक्तंअभुक्त्वाह्निभुंजे ३८ ३९ क्षौमंदुकूलमित्यादिकमेकस्मिञ्जन्मनिबहुजन्मनिचेतियथायोग्यमंगीकर्तव्यं दैवलब्धेनभुंजेइतिदिष्टभुक् । क्षौमाद्याच्छादनंगजाद्यभिश्चरणंक्षत्रजन्मनि प्रासादादिशयनम् । भूपृष्ठशयनंचपश्वादिजन्मनि । भस्मादौशयनंश्वानादिजन्मनि बाल्येचअजिनादि अजिनाद्याच्छादनमृष्यादिजन्मनि अस्मिन्जन्मनि जन्मांतरेवा । दिग्वासाःदिगंबरः ४० ४१ ४२ सत्त्वादिगुणस्वभावेनविषमंसात्त्विकराजसतामसभेदभिन्नंसर्वेभ्योभयंमत्तइतियतिधर्मत्वात्भूतानांभद्रमेवाशासे तत्रापिभगवत्स्वामित्वंनविस्मरामीत्याह आशासइति उतेत्याशासइत्यनुवर्तते जगतएकएवस्वामीतिभावमैकात्म्यं उताशासेकस्मिन्विषयेमहात्मनिभगवद्विषयइत्यर्थः ४३ तुर्याश्रमस्थेनविहितोपासनानंतरमिदंचकर्तव्यंब्रह्मप्राप्तिमार्गत्वादित्याह । विकल्पमिति । विकल्पंजगच्चित्तमनोवृत्त्याभिमानिविन्यसेज्जुहुयात् । जगच्चित्ताख्याग्न्याधीनमितिचिंतयेत् । चित्तमग्निमर्थेषुभ्रममाणे

विरागःसर्वकामेभ्यःशिक्षितोमेमधुव्रतात् ॥ कृच्छ्राप्तंमधुतद्वित्तंहत्वाप्यन्योहरेत्पतिम् ३६ अनीहःपरितुष्टात्मायदृच्छोपनतादहम् ॥ नोचेच्छयैव ह्यहानिमहाहिरिवसत्त्ववान् ॥ ३७ ॥ क्वचिदल्पंक्वचिद्भूरिभुंजेन्नसाध्वसाधुवा ॥ क्वचिद्भूरिगुणोपेतंगुणहीनमुतक्वचित् ॥ ३८॥ श्रद्धयोपहृतंक्वापिक दाचिन्मानवार्जितम् ॥ भुंजेभुक्त्वाथकस्मिंश्चिद्दिवानक्तंयदृच्छया ३९ क्षौमंदुकूलमजिनंचीरंवल्कलमेववा ॥ वसेन्यदपिसंप्राप्तंदिष्टभुक्तुष्टधीरहम् ४० क्वचिच्छयेधरोपस्थेतृणपर्णाश्मभस्मसु ॥ क्वचित्प्रासादपर्यंकेकाशिपौवापरेच्छया ॥ ४१ ॥ क्वचित्स्नातोनुलिप्तांगःसुवासाःस्रगलंकृतः ॥ रथेभाश्वैश्वर नृक्वापिदिग्वासाग्रहवत्क्वचित् ॥ ४२ ॥ नाहंनिंदेचनस्तौमिस्वभावविषमंजनम् ॥ एतेषांश्रेयआशासेउतैकात्म्यंमहात्मनि ॥ ४३ विकल्पंजुहुयाच्चि त्तेतन्मनस्यर्थविभ्रमे ॥ मनोवैकारिकेहुत्वामायायांवैजुहोत्यमुम् ॥ ४४ ॥ आत्मानुभूतौतांमायांजुहुयात्सत्यदृङ्मुनिः ॥ ततोनिरीहोविरमेत्स्वानु भूत्यात्मनिस्थितः ॥ ४५ ॥ स्वात्मवृत्तंमयेत्थंतेसुगुप्तमनुवर्णितम् ॥ व्यपेतंलोकशास्त्राभ्यांभवान्ह्यहिभगवत्प्रियः ४६

भगवत्युपाधावमानेमनसिमनोनामेंद्राधीनतयातिष्ठतीतिचिंतयेत् । मनइंद्रंवैकारिकेरुद्रेहुत्वासांचैत्यामुरुद्रंमायायांप्रकृतिविकारेमहत्तत्त्वेविरिंचेसांचैत्यतांमायांतांविरिंचंवात्मानुभूतौचित्प्रकृतौजुहुया त्चिंतयेत् । चित्ताख्याग्नेरधीनंहिजगदेतद्विचिंतयेत् । मनोनामेंद्रवशगमग्निंवप्रतिचिंतयेदितिवावाक्यात्सर्वमवगंतव्यं अत्रजडकार्यस्यजडकारणात्मकत्वं चेतनस्यचेतनाधीनत्वं चिंतनीयमि त्यर्थः । तामात्मानुभूतौस्वानुभूतेर्लक्ष्म्याआत्मनिस्वामिनिपत्यौनिरंतरंचिंतयेत् ततोमुनिरनंतरंकृतकृत्यः वेत्तावेद्यस्यसर्वस्यमुनिःसद्भिरुदाहृतः इत्युक्तमालावचनात् । किंचसत्यंसाधुगुणंपूर्ण विष्णुंपश्यतीतिसत्यदृक् स्वानंदानुभवात्मनिस्वमाहिम्निस्थितः । महिम्निस्वेमहीयतइतिववनात् । स्वरूपानंदज्ञानात्मनिब्रह्मणिस्थितइतिवा निरीहोनिषिद्धचेष्टारहितोविरमेत् कृत्यादितिशेषः ४४ ४५ मतिपादितमर्थंनिगमयति स्वात्मेति मयास्वात्मनोममवृत्तंतुभ्यमनुवर्णितमित्यन्वयः । स्वात्मनोजीवस्यवापरमात्मनोवा । कीदृशं मुक्ततोलोकशास्त्राभ्यांव्यपेतंरहितं । आंतरतोविपरी तत्वेनप्राप्तंशास्त्रसिद्धत्वाच्छास्त्रीयमित्यर्थः । अशास्त्रीयत्वान्मुक्ततःशास्त्रावेतामिदंविदुः । शास्त्रनिर्णयगम्यत्वाच्छास्त्रीयमभिधीयतइतिवचनादुक्तएवार्थः । इदंसिद्धमित्यभिप्रेत्याह भवानिति ४६

१ तुर्यावस्थेनेति पाठान्तरम् २ मुक्ततः आपाततः अशास्त्रीयत्वात् शास्त्रेणाप्रतीतत्वात् शास्त्रव्यपेतम् । शास्त्रनिर्णयगम्यत्वाच्छास्त्रीयमेवेतिभावः । दी ०

ततःप्रह्लादेनांकेकृतमित्यतस्तद्गमनमाह नारदइति पारमहंस्यंपरमहंसानांनिवृत्तिमार्गेस्थानांविद्यमानम् ४७ इतिश्रीभागवतेम०सप्तमस्कंधेवि०टी०चतुर्दशोध्यायः ॥ १४ ॥ सर्ववर्णाश्रमाणांगृहाश्रममू लत्वात्सूचीकटाहन्यायेनवर्णाद्याश्रमधर्मनिरूप्यगृहाश्रमधर्मनिरूपयत्यस्मिन्नध्याये । तत्र नापृष्टःकस्यचिद्बूयादितिन्यायात् युधिष्ठिरःपृच्छतीत्याह । युधिष्ठिरइति । एतांपदवीमन्याश्रमविषयां विधि नाप्रकारेण १ नैष्कर्म्यं मोक्षसाधनत्वम् २ गृहोचिताःक्रियाः पंचयज्ञलक्षणाः । पंचयज्ञप्रसिद्धयर्थंविद्यांचाध्यात्मिकींजपेत् बलिकर्मस्वधाहोमस्वाध्यायातिथिसत्क्रियाः । भूतपित्रमरब्रह्ममनुष्याणांम हामखाइतियाज्ञवल्क्यः । वासुदेवार्पणंकुर्वन्निति शेषः ३ उपशांतजनेननसंन्यासिजनेनाहतंकामितम् ४ स्वप्नंदृष्ट्वोत्थितःस्वप्नदृष्टपदार्थसंगंयथाजहाति तथाजायादिसंगंमुंचेदित्यन्वयः ५ यावद र्थोयावद्देहयात्राप्रयोजनोदेहादावुपासीनोवातिष्ठमानस्तत्रदेहादौरक्तवत्स्निग्धवन्नरतांनरत्वंन्यसेत्यजेत् । यतिर्भवेदित्यर्थः ६ ७ अंतरिक्षंद्यावापृथिव्योर्मध्यभवमच्युतेननिर्मितंयद्वित्तमुपयुंजीरन् लोकाइतिशेषः । तत्सर्वंजानन्स्वकीयमितिनस्वीकुर्यात् ८ यावदर्थइत्युक्तंविवृणोति । यावदिति जठरंयावदन्नंभ्रियेतगृह्णाति तावदन्नंस्वत्वंस्वकीयमितिस्वीकुर्यात् । ततोधिकादानेदंडयोग्यमि

नारदउवाच ॥ धर्मंपारमहंस्यंवैमुनेःश्रुत्वासुरेश्वरः ॥ पूजयित्वाततःप्रीतआमंत्र्यप्रययौगृहान् ॥ ४७ ॥ इति श्रीभागवतेमहापुराणेसप्तमस्कंधेचतुर्दशो ध्यायः ॥ १४ ॥ युधिष्ठिरउवाच ॥ गृहस्थएतांपदवींविधिनायेनचांजसा ॥ यायाद्देवऋषेब्रूहिमादृशोगृहमूढधीः ॥ १ ॥ नारदउवाच ॥ साधुपृष्टंमहा भागलोकानामनुगृह्णता ॥ तत्त्वेनतदहंवक्ष्यैनैष्कर्म्यंयेनकर्मणाम् ॥ २ ॥ गृहेष्वेवस्थितोराजन्क्रियाःकुर्वन्गृहोचिताः ॥ वासुदेवार्पणंसाक्षादुपासीतम हामुनीन् ॥ ३ ॥ शृण्वन्भगवतोभीक्ष्णमवतारकथामृतम् ॥ श्रद्दधानोयथाकालमुपशांतजनादृतम् ४ तत्संगाच्छनकैःसंगमात्मजायात्मजादिषु ॥ विमुंचेन्मुंचमानेषुस्वयंस्वप्नवदुत्थितः ५ यावदर्थमुपासीनोदेहेगेहेचपंडितः ॥ विरक्तोरक्तवत्तत्रनृलोकेनरतांन्यसेत् ६ ज्ञातयःपितरौपुत्राभ्रा तरःसुहृदोपरे ॥ यद्वदंतियदिच्छंतिअनुमोदेतनिर्ममः ७ दिव्यंभौमंचांतरिक्षंवित्तमच्युतनिर्मितम् ॥ तत्सर्वमुपयुंजीरन्नस्वीकुर्यात्स्वतोबुधः ८ याव द्भ्रियेतजठरंतावत्स्वत्वंहिदेहिनाम् ॥ अधिकंयोभिमन्येतसस्तेनोदंडमर्हति ९ नृगोखराश्वमर्काखुसरीसृपविमक्षिकान् ॥ आत्मनःपुत्रवत्पश्येत्तैरेषा मंतरंकियत् १० त्रिवर्गेनातिकृच्छ्रेणभजेतगृहमेध्यपि ॥ यथादेशंयथाकालंयावद्दैवोपपादितम् ११ आश्वभ्योतेवसायिभ्यःकामान्संविभजेद्यथा ॥ आन्वैतान्महतोदाराञ्शृणांसत्त्वग्रहेहोयतः १२ जह्याद्यदर्थेस्वान्प्राणान्हन्याद्वापितरंगुरुम् ॥ तस्यांस्त्रत्वंस्त्रियांजह्याद्यस्तेनह्यजितोजितः १३

त्याह अधिकमिति ९ आखुभुक्वृषदंशश्चमार्जारोमर्कउच्यतइत्यभिधानं । वयःपक्षिणः अंतरंभेदः कियान्नकोपिपराधीनत्वाविशेषात् १० अतिकृच्छ्रेणशास्त्राविहितमार्गेणशूद्रप्रतिग्रहादिलक्षणेन गृह मेधीगृहस्थः । अपिसर्वाश्रयत्वेपिदैवोपपादितंयवादिव्रीहिजातमयाचितोपपन्नंवा ११ कर्मांगंचेद्दारग्रहणंप्रयोजनंनंनग्राम्यभोगः तथात्वेतदाशापूरणस्यदुःसाध्यत्वेनतत्प्रयत्नेमहान्दोषआपद्येत त दभिप्रायेणाह । आन्वेति । यदर्थंयेषामर्थेकामपूरणार्थंस्वप्राणान्जह्यात्पितरंवागुरुंवाहन्यात्तद्विरोधेसतीतिशेषः किंच यतोयेभ्योनृणांसत्त्वग्रहोसत्त्वगुणग्राहोधैर्यनिग्रहोभवतीतिशेषः तानेतान्म हतोदारानान्वाकामान्यथायोग्यंसंविभज्यश्रेयसेघटेतेतिषः १२ यद्यंगनाप्राणाद्यपहारिणीतर्हितयाश्रेयसेघटनंकथमित्याशंक्याह तस्यामिति सत्त्वग्रहइत्यादिकमुत्तरत्रापिसंबध्यते अजितोपि यस्याःसत्वग्रहस्तस्यांस्त्रियांतेनसत्वेनजितोवशंगतःसपुमांस्तस्यांस्त्रियांसत्त्वंजह्यादित्यन्वयः प्रदिस्वात्मानमुज्झ्यसावर्ततेतर्हितस्यास्त्यागएववरीयानिति। इममर्थंहिशब्देनदर्शयति । हताधिकारांमलि

नांपिंडमात्रोपजीविनीम् । परिभूतामधःशय्यांवासयेद्व्यभिचारिणीमितिच यत्रानुकूल्यंदंपत्योस्त्रिवर्गस्तस्यवर्धते मृतेजीवतिवापत्यौयानान्यपुरुगच्छ ति । सहकीर्तिमवाप्नोतिमोदतेचामयासह स्त्रीमभवृ वचःकार्यमेषधर्मःपरःस्त्रियइतिच १३ ग्राम्यधर्मेणशरीरमेवानित्यंक्षणिकंभयग्रस्तंभयमुपजायते । ननुनित्यमतश्चानित्यदुःखंशरीरंचकृमिविड्भस्मावसायिनवरमनेनाकाशशरीरब्रह्मज्ञानंदुरुत्पादमेतत्करु णामंतरेणातोदुःखहेतुत्वादुश्चरित्रस्त्रीत्यागएवश्रेयानित्याशयवानाह ॥ कृमीति । तदीपदेहेनाकिंयमागारतिर्यस्याःसानथा । आत्मापरमात्मा । अत्रात्माजीवःकिंनस्याच्छरीरप्रसंगादित्यतउक्तम् नभश्छदिरिति । नभसश्छदिराच्छादनंयस्यसतथा नभोव्याप्यावस्थितइत्यर्थः । आकाशशरीरंब्रह्मेतिश्रुतेः । अणुर्ह्येषआत्मायंवाएतेसनीतःपुण्यंचपापंचेतिश्रुतेर्जीवस्याणुपरिमाणत्वेनसिद्धत्वात् १४ यजदेवपूजासंगतिकरणदानेष्वितिधातोः यज्ञोनारायणाख्यदेवपूजातत्करणावशेषितैः सिद्धैर्ज्ञानसाधनयोग्यैरर्थैः स्ववृत्तिदेहयात्रालक्षणांकल्पयेत् । तत्रापिशेषेऽवशिष्टवस्तुनिस्वत्वंस्वकीयत्वंत्यजे द्यःसप्राज्ञोमहतांसंन्यासिनांपदवीमाप्नोतीत्यन्वयः १५ देवादियागेयुतदंतर्यामित्वेनततोभिन्नत्वेनभगवत्पूजेत्रविधेयेत्याशयेनाह । देवानिति १६ योहयदास्ययज्ञाधिकारोस्तियदावासर्वायज्ञसंपदः स्युस्तदावैतानिकविधिनाग्निहोत्रविधिनावायजेदित्यन्वयः १७ ननुमुख्यंहोमादिकरणंभगवत्प्रीतिजनकंकिंतत्राह नहीति १८ उपसंहारमुखेनोक्तार्थंनिर्धारयति । तस्मादिति ब्राह्मणआननंयस्यसतथातं

कृमिविड्भस्मनिष्ठांतंक्वेदंतुच्छंकलेवरम् ॥ क्वतदीयरतिर्भार्याक्वायमात्मानभश्छदिः १४ सिद्धैर्यज्ञावशिष्टार्थैःकल्पयेद्वृत्तिमात्मनः ॥ शेषेस्वत्वंत्यजेत्प्राज्ञः पदवींमहतामियात् १५ देवानृषीन्नृभूतानिपितॄनात्मानमन्वहम् ॥ स्ववृत्त्यागतवित्तेनयजेतपुरुषंपृथक् १६ यर्ह्यात्मनोधिकारोस्तिसर्वाःस्युर्यज्ञ संपदः ॥ वैतानिकेनविधिनाअग्निहोत्रादिनायजेत् १७ नह्यग्निमुखतोयंवैभगवान्सर्वयज्ञभुक् ॥ इज्येतहविषाराजन्यथाविप्रमुखेहुतैः १८ तस्माद्ब्रा ह्मणदेवेषुमर्त्यादिषुयथार्हतः ॥ तैस्तैःकामैर्यजेच्चैनंक्षेत्रज्ञंब्राह्मणाननम् १९ कुर्यादपरपक्षीयंमासिप्रोष्ठपदेद्विजः ॥ श्राद्धंपित्रोर्यथावित्तंतद्बंधूनांचवित्त वान् २० अयनेविषुवेकुह्वांव्यतीपातेदिनक्षये ॥ चंद्रादित्योपरागेचद्वादश्यांश्रवणेषुच २१ तृतीयायांशुक्लपक्षेनवम्यामथकार्तिके ॥ चतसृष्वप्यष्ट कासुहेमंतेशिशिरेतथा २२ माघेचसितसप्तम्यांमघाराकासमागमे ॥ राकायानुमत्यावामासर्क्षाणियुतान्यपि २३ द्वादश्यामनुराधास्याच्छ्रवणस्ति स्रउत्तराः ॥ तिसृष्वेकादशीचासुजन्मर्क्षंसौम्ययोगयुक् २४ तएतेश्रेयसःकालान्नृणांश्रेयोविवर्धनाः ॥ कुर्यात्सर्वात्मनैतेषुश्रेयोऽमोघंतदायुषः २५

१९ननुयज्ञसंभारेसतिविशिष्टफलप्रदःकालःकइतितत्राह कुर्यादिति । प्रोष्ठपदेकन्याख्येसिंहमासामावास्यामारभ्यकन्यामावास्यापर्यंते । तत्राप्यपरपक्षीयकालेश्राद्धंकुर्यादित्युपर्यप्यन्वेतव्यम् तद्बंधूनांपितृमातृबंधूनांपितामहमातामहादीनाम् २० अयनेउत्तरदक्षिणसंज्ञे । विषुवेसंवत्सरांतसंक्रमणे । कुह्वाममावास्यायांश्रवणेषुश्रवणादित्रिषु । चशब्दात्सप्तम्यादित्रिषुत्रयोदश्यांच । तदुक्तम्स प्तम्यादित्रयंचैवतथाचैवत्रयोदशी । चतस्रस्त्वष्टकाःप्रोक्ताःसर्वपक्षाद्विशेषतइति २१ वृश्चिकमासामावास्यामारभ्यमकरमासामावास्यापर्यंतःकालोहेमंतः तदुपरिकालःशिशिरःहेमंतेशिशिरेचैवनित्यश्राद्धे गुणोत्तरमितिवचनात् अयमपिविशिष्टकालः २२ राकापौर्णमासीमघापौर्णमास्योःसंगमे शशिनिसिनीवालीस्यात्दृष्टेनष्टेकुहूरमावास्या अनुमतिरूनेराकासंपूर्णेपौर्णमासीचेतिहला युधःराकयानुमत्यायुतानिमासनक्षत्राणि २३ यास्तिस्रःश्रवणादितारास्तासुतारानुप्राप्तैकादशीपुण्यकालोऽत्रश्राद्धकरणंचविकल्पः । एकादश्यांश्राद्धकरणस्यानिषिद्धत्वान्नवैष्णवसिद्धांतिनस्तदाचरं तित्रैविद्याश्चरंतिचवा यथैकादशीपुण्यदिनम् अत्रक्रियमाणंकर्मसफलंतथातिसृष्वपितारास्वितिवा जन्मनक्षत्रंश्राद्धकालइतिशेषः । सौम्ययोगयुक्मृगशिरसंबंधियुक्तंदिनंच २४ २५

२६ २७ २८ सत्पात्रंविशिनष्टि विश्वमिति यस्मिन्देशेभागवतस्तस्मिंश्चराचरंसर्वजगदस्तीतिज्ञातव्यं यतिर्यस्यगृहेभुंक्तेतत्रभुंक्तेहरिःस्वयं हरिर्यस्यगृहेभुंक्तेतत्रभुंक्तेजगत्त्रयमितिवचनात् २९ अर्चाशालग्रामादिप्रतिमा पुराणेषुभागवतादिषु विश्रुताः ३० कृष्णावेण्यादयश्चक्षेत्राणि पुरुषोत्तमादीनि अर्हैःपूज्यैरगस्त्यादिभिराश्रितान्यधिष्ठितानि ३१ फल्गुनंस्थानंहरपुरंकन्यातीर्थवा। कन्यापुरंफल्गुनंस्यात्स्थानंहरपुरंचतदित्यभिधानं वाराणसीपुरीकांची ३२ ३३ हरेरर्चाश्रिताः हरिक्षेत्रादयः पुनर्वचनंसर्वस्मात्तेषांश्रैष्ठ्यद्योतनाय ३४ एतदेशानिषेवणेनाकिंविशेषफलमितित्राह धर्मइति कृष्णातरंगसंभूतपवनस्पर्शमात्रतः निर्धूतपातकाःसर्वेजनाविष्णुपदंययुरित्यादिशास्त्रेषुसहस्राधिकफलोदयत्वेनोदितः पात्रेष्वपितारतम्यमास्तितत्रमुख्यपात्रंहरिरित्याह पात्रमिति पात्रतारतम्यवित्तमैःकविभिःपात्रंवनिरुक्तं वैमुख्यत्वेननिर्णीतंहीत्यन्वयः ३५ किंतदित्यतउक्तं हरिरिति चराचरंयन्मयंयत्स्वामिकंयद्वश्यांसर्वंयस्मात्तस्माद्धरिरेवमुख्यंपात्रमित्यन्वयः इदंभवतोपिसिद्धमित्याह देवेति ब्रह्मात्मजादिषुसत्सुदेवाश्चऋषयश्चदेवर्षयस्तएवार्हतःपूजायोग्यायेष्वपिसत्सुतत्रतत्रयज्ञशालायामच्युतोगुणतोवयतःस्वरूपतश्चच्युतिरहि तत्वात्श्रीनारायणोग्रपूजायां

येषुस्नानंजपोहोमोव्रतंदेवद्विजार्चनम् ॥ पितृदेवनृभूतेभ्योयद्दत्तंतच्चनश्वरम् २६ संस्कारकालोजायायाअपत्यस्यात्मनस्तथा ॥ प्रेतसंस्थामृताहःसुकर्मण्यभ्युदयेनृप २७ अथदेशान्प्रवक्ष्यामिधर्मादिश्रेयआवहान् ॥ सर्वैपुण्यतमोदेशःसत्पात्रंयत्रलभ्यते २८ विश्वंभागवतोयत्रजगदेतच्चराचरम् ॥ यत्रहब्राह्मणकुलंतपोविद्यादयान्वितम् २९ यत्रयत्रहरेरर्चासदेशःश्रेयसांपदम् ॥ यत्रगंगादयोनद्यःपुराणेषुचविश्रुताः ३० सरांसिपुष्करादीनिक्षेत्राण्यर्हाश्रिताण्युत ॥ कुरुक्षेत्रंगयाशिरःप्रयागःपुलहाश्रमः ३१ नैमिषंफल्गुनंसेतुःप्रभासोथकुशस्थली ॥ वाराणसीमधुपुरीपंपाबिंदुसरस्तथा ३२ नारायणाश्रमोनंदासीतारामाश्रमादयः ॥ सर्वेकुलाचलाराजन्महेंद्रमलयादयः ३३ एतेपुण्यतमादेशाहरेरर्चाश्रिताःपुनः ॥ एतान्देशान्निषेवेतश्रेयस्कामोह्यभीक्ष्णशः ३४ धर्मोह्यत्रोदितःपुंसांसहस्राधिफलोदयः ॥ पात्रंचात्रनिरुक्तंवैकविभिःपात्रवित्तमैः ३५ हरिरेवैकउर्वीशयन्मयंचचराचरम् ॥ देवर्ष्यर्हत्सुवैसत्सुतत्रब्रह्मात्मजादिषु ॥ राजन्यदग्रपूजायांमतःपात्रतयाच्युतः ३६ जीवराशिभिराकीर्णंअंडकोशांघ्रिपोमहान् ॥ तन्मूलत्वादच्युतेज्यासर्वजीवात्मतर्पणम् ३७ पुराण्यनेनसृष्टानिनृतिर्यगृषिदेवताः ॥ शेतेजीवेनरूपेणपुरेषुपुरुषोह्यसौ ३८ तेष्वीशोभगवान्राजंस्तारतम्येनवर्तते ॥ तस्मात्पात्रंहिपुरुषोयावानात्मायथेयते ३९

पात्रतयामतस्त्वयाज्ञातइतियदतोमुख्यपात्रंहरिरित्यवधारणायुक्ता ३६ किंचप्रत्येकंपूजापिनविधेयाभगवत्पूजयातत्तृप्तिसंभवात्तन्मूलत्वात्तेषां तरुमूलनिषेचनंशाखानामिवेतिमुख्यवैष्णवसिद्धांतमाह जीवराशिभिरिति ३७ ननुमुख्यपात्रालाभेविहितकर्मानुष्ठानविषयाभावेनताद्धिधानंव्यर्थमित्याशंक्यतत्तद्योग्यपात्रंवक्तुंकंचनसृष्टिप्रकारमाह पुराणीति अनेनदयालुनाहरिणानृतिर्यगादिसंज्ञितानिपुराणिशरीराणिसृष्टानीत्यन्वयः ततःकिंतत्राह शेतइति श्रीहरिरेषु पुरेषुभोगायतनेषुजीवेनरूपेणस्वप्रतिबिंबेनसहशेतेइतियत्तस्मादसौपुरुषइत्युच्यते जीवोपितन्नामेतिशेषः पुरिशयनात्पुरुषइतिश्रुतिर्हिशब्देनसूचयति ३८ ईशोभगवांस्तेषुपुरेषुस्थितःपुरुषनामसुजीवेषुचतारतम्येनतत्तद्गुणादिगुणतारतम्यानुसारेणसन्निधानतारतम्येनवर्ततइति यस्मात्तस्मात्तत्तद्योग्यानुसारेणपुरुषोजीवराशिश्चपात्रं। तदंतर्यामिहरिस्मरणपूर्वकमितिशेषः अत्रसन्निधानतारतम्यमेवहरेर्नतुस्वरूपतारतम्यं तदुक्तं ब्रह्मादिस्थावरांतेषुनाविशेषोहरेःक्वचित् । व्यक्तिपात्रविशेषेणतारतम्यंवदंतिचेत्यत्रापीत्थंभावमाह यावानिति पुरुषेतुस्थितआत्मायावान् महिम्नायथायेनप्रकारेणज्ञायते तदानुकूल्येनजीवराशिःपात्रमित्यर्थः ३९

हरिप्रतिमापूजायाः पुरुषास्थितपुरुषनाम्नोहरेः पूजासम्यक्फलवतीत्याशयेनाह दृष्ट्वेति कविभिस्तेषांनृणांमिथआत्मनोहरेरवज्ञांदृष्ट्वात्रेतायांसपर्या क्रियायैहरेरर्चाकृतापस्मात् ४० ततःकेचित्संश्रद्धयासपर्ययाअर्चायांहरिमुपासतेयेतेषांपुरुषास्थितहरिद्विषां सोपासैहिकफलमंतरेणपरमपुरुषार्थप्रदानभवतीत्यन्वयः ४१ मुख्यपात्रमाह पुरुषेष्विति । कीदृशोब्राह्मणोमुख्यंपात्रामित्यत तस्तद्विशिनष्टि तपसेति । तनुंप्रतिमास्थानं अत्र शिलावत्प्रतिमाःसंतोविप्राद्याश्चहरेःस्मृताइतिवचनात् विप्रादिमात्रंहरिशिलास्थानीयंनकिंतुतपआदिगुणविशिष्टब्राह्मणकुलं अन्यथाहरेरवैषासापुरुषार्थप्रदानस्यादितितदुपासांविनिंद्यसुपात्रंब्राह्मणंविदुरितिकथनंव्यर्थंस्यादतएवब्रह्मणतीतिब्राह्मणइतितत्पदंप्रायोजि ४२ ४३ इतिश्रीभागवतेमहापुराणेविजयध्वजटीकायांपंचदशोध्यायः ॥१५॥ कर्ममार्गोज्ञानमार्गश्चकार्याणांकारणेपुलयःप्रवेशलक्षणंचतत्साधनंचप्रपंचस्वरूपंचनिरूपयत्यस्मिन्नध्याये तत्रप्रथमतोब्राह्मणादपिज्ञाननिष्ठमुत्तमंपात्रं दैवोपलब्धेनद्रव्येणैवनित्यनैमित्तिकक्रियाकरणं धर्माधर्मविवेकश्चकथ्यते । तत्रब्राह्मणान्विवेचयति कर्मेति । कर्मनिष्ठागृहस्थाः तपोनिष्ठावानप्रस्थाः स्वाध्यायनिष्ठाब्रह्मचारिणः प्रवचननिष्ठाः कुटीचकाः बहूदकाश्च योगानिष्ठा हंसाः ज्ञाननिष्ठाः परमहंसाः १ तत्रसंततेरानंत्यंमुक्तिंचेच्छताज्ञाननिष्ठायपरमहंसायकव्यानिपितृभ्योदीयमानान्यन्नानिदातव्यानीतिविधिरित्यन्वयः दैवेकर्मणिचतस्माइतिशेषः तदभावेपरमहंसाभावेइतरेभ्योहंसादिभ्यः

दृष्ट्वातेषांमिथोनृणामवज्ञामात्मनोनृप ॥ त्रेतादिषुहरेरर्चाक्रियायैकविभिःकृता ४० ततोर्चायांहरिंकेचिच्छ्रद्धयाचसपर्यया ॥ उपासतेऽपासाहिनार्थदापुरुषद्विषाम् ४१ पुरुषेष्वपिराजेंद्रसुपात्रंब्राह्मणंविदुः ॥ तपसाविद्ययातुष्ट्याधत्तेवेदंहरेस्तनुम् ४२ नन्वस्यब्राह्मणाराजन्कृष्णस्यजगदात्मनः ॥ पुनंतःपादरजसात्रिलोकींदैवतंमहत् ४३ इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेपंचदशोध्यायः ॥ १५ ॥ ॥ नारदउवाच ॥ कर्मनिष्ठाद्विजाःकेचित्तपोनिष्ठानृपाःपरे ॥ स्वाध्यायेन्येप्रवचनेअन्येचज्ञानयोगयोः १ ज्ञाननिष्ठायदेयानिकव्यान्यानंत्यमिच्छता ॥ दैवेचतदभावेस्यादितरेभ्योयथार्हतः २ द्वौदैवेपित्र्यकार्येत्रीनेकैकमुभयत्रवा ॥ भोजयेत्सुसमृद्धोपिश्राद्धेकुर्यान्नविस्तरम् ३ देशकालोचितश्रद्धाद्रव्यपात्रार्हणानिच ॥ सम्यग्भवंतिनैतानि विस्तरात्स्वजनार्पणात् ४ देशेकालेचसंप्राप्तमुत्पन्नंहरिदैवतम् ॥ श्रद्धयाविधिवत्पात्रेन्यस्तंकामधुगक्षयम् ५ देवर्षिपितृभूतेभ्यआत्मनेस्वजनायच ॥ अन्नंसंविभजन्पश्येत्सर्वतःपुरुषात्मकम् ६ नदद्यादामिषंश्राद्धेनचाद्याद्धर्मतत्त्ववित् ॥ मुनीनांस्यात्परापीतिर्यथानपशुहिंसया ७

श्राद्धादिदानंस्यात् तत्रापियथार्हतः यथायोग्यं २ अत्रभोक्तुःसंख्यानियमानाह द्वाविति ३ कुतोविस्तारोनकर्तव्यइतितत्राह देशेति स्वजनार्पणात्आत्मीयार्पणलक्षणात् 'विस्तारादेतानिदेशकालोचितश्राद्धादीनिसम्यग्नभवंतीतियत्तस्माद्विस्तारंनकुर्यादितिपूर्वेणान्वयः ४ ५ ६ यतेःश्राद्धभोजनेमुख्याधिकारित्वेमांसविधानंकथमुपपद्यतइतितदपवादत्वेनविधत्ते नदद्यादिति शास्त्रांतरविधिमोहितेनकेनाचित्कामपरिमोक्षणेनमस्करिणानभोक्तव्यामितिविधत्ते । नचेति । नचश्राद्धभंगइत्याह धर्मेति विनामांसेनमधुनाविनादक्षिणयाशिशा अक्षयंभवतिश्राद्धंयतिपुश्राद्धभोजिषु ग्रामेवानगरेरण्येज्ञाताभिक्षुर्वसेच्चादि तमंतरेणयच्छ्राद्धंतदासुरमथोभवेदित्यादिस्मृतेः तद्विधायकशास्त्रमासुरजनमोहनार्थत्वेनदेशकालविशेषविषयत्वेनवायोजनीयं । आमिषाभावेभोक्तुः सौहित्याभावेनपितॄणां सौहित्यंनस्यादितितत्राह मुनीनामिति मुनीनांसंयमिनांयथामांसानदनेनपरापीतिःसौहित्यंस्यात्तथापशुहिंसयाजातमांसेननस्यात् । यथामुनीनांपितॄणांयतिभोजनेनपरापीतिस्तथापशुहिंसाजातामिषभोजनेननस्यादितिद्विरावृत्त्यायोजनीयं । वाचांयमेयसर्वज्ञमुनिशब्दःपितॄष्वपिइत्यभिधानं मुनीनांसर्वज्ञानांदेवानांयथापरमाप्रीतिः तथापशुहिंसालक्षणेनयागेननेतिवा ७

श्राद्धेचतुर्थीश्रम्येवपूज्यइतिनियमः प्रायिकःतद्धर्मोयस्यास्तिसोपिमान्यइत्याशयेनाह नैतादृशइति सद्धर्ममिच्छतांनृणांभूतेषुमनोवाक्कायकर्मजस्यदंडस्यन्यासः संत्यागो यः एतादृशोधर्मः परोन्यो नास्ति अयमेवमुख्योधर्मः तस्मादेतादृशधर्मोपिश्राद्धेमान्यइत्याशयः । वेणुभिर्नभवेद्यतिरितिवक्ष्यति नकेवलंपश्वालंभनलक्षणोंहिंसाभावान्मुनीनांप्रीतिजनकोपितुमनआदिनाक्रियमाणदंडलक्षण हिंसाभावोपीत्यतोवाह नेति ८ श्राद्धादिकर्मग्रामोयत्यादिपात्रमुद्दिश्यकर्तव्यमित्यभिहितं अधुनापरमभागवतास्तदपिनकुर्वंतीत्याशयेनाह एकइति सर्वधर्मान्परित्यज्यमामेकंशरणंव्रजेतिशि क्षिताः एकेभगवदेकार्पितदेहयात्राज्ञानिनः कर्ममयान्श्राद्धादियज्ञानात्मसंयमनेमनःसंयमनाग्नौजुह्वतिमानसयागंकुर्वंतीत्यन्वयः आत्मसंयमनंविशिनष्टि ज्ञानेति ज्ञानेंधनदीपितेयज्ञवित्तमाः मानसयज्ञप्रयोगपटवः अनीहाइतिहेतुगर्भविशेषणं निवृत्तमार्गप्रवृत्तत्वादित्यर्थः ॥ ९ ॥ ननुद्रव्ययज्ञैसंत्यज्यज्ञानयज्ञकरणेकिकारणमित्याशंक्यभूतभयजनकहेतुत्वेननिरयहेतुरयमित्याशये नाह द्रव्येति एषद्रव्ययज्ञकारिसमुदायो मामांहन्यादितिभूतानिबिभ्यतीत्यन्वयः । अग्नीषोमीयंपशुमालभेतेतिविहित्वात्तदुक्तं कुर्वतोदृष्ट्याकथंभयंस्यादित्यतउक्तमतज्ज्ञइति विध्यभिप्रायमजानन् ब्रह्मार्पणंब्रह्महविरित्यादिविहितविधेरभिप्रायः अतएवाकरुणइत्युक्तं एतादृशोसुरदेश्यइत्याशयेनोक्तमसृग्विति नीहारेणप्रावृताजल्प्याचासृपउक्थशासश्चरंतीतिश्रुतिर्हीत्यनेनगृह्यते ध्रुवमित्ययंशब्दः श्रीहरिविमुखस्यानर्थनिश्चाययंति असुन्वंतंसमंजहिदूणाशंयोनतेमयइतिश्रुतेः तेमयस्त्वत्प्रधानकः दूणाशंदुर्नाशंअसुन्वंतंसुन्वद्विरोधिनं अन्यथासुन्वंतंवा पराचिच्छीर्षाबृजुस्तइंद्रायज्वानोयज्वभिः

नैतादृशःपरोधर्मोनृणांसद्धर्ममिच्छताम् ॥ न्यासोदंडस्यभूतेषुमनोवाक्कायजस्ययः ८ एकेकर्ममयान्यज्ञान्ज्ञानिनोयज्ञवित्तमाः ॥ आत्मसंयमनेऽनीहाजुह्व तिज्ञानदीपिते ९ द्रव्ययज्ञैर्यक्ष्यमाणंदृष्ट्वाभूतानिबिभ्यति ॥ एषमाकरुणोहन्यादतज्ज्ञोह्यसृतृप्ध्रुवम् १० तस्माद्दैवोपपन्नेनमुन्यन्नैनैवधर्मवित् ॥ संतुष्टोहरहःकुर्यान्नित्यनैमित्तिकाःक्रियाः ११ विधर्मःपरधर्मश्चआभासउपमाछलः ॥ अधर्मशाखाःपंचेमाधर्मज्ञोऽधर्मवत्त्यजेत् १२ धर्मबाधोविधर्मः स्यात्परधर्मोऽन्यचोदितः ॥ उपधर्मस्तुपाखंडोदंभोवाधर्ममिच्छलः १३ यस्त्विच्छयाकृतःपुंभिराभासोह्याश्रमःपृथक् ॥ स्वभावविहितोधर्मःकल्प्यतेस्योपशांतये १४ धर्मार्थमपिनेहेतयात्रार्थंवाऽधनोधनम् ॥ अनीहानीहमानस्यमहाहेरिववृत्तिदा १५

स्पर्द्धमानाइतिश्रुतेः १० ननुतर्हिनित्यनैमित्तिकेकुर्यात्प्रत्यवायजिहासयेतिविधानंव्यर्थमितितदुपायमाह तस्मादिति दैवोपपन्नेनअयाचितादिविधिनाप्राप्तेननीवारादिनातदभावेउत्पन्नेनफल शाकादिना ११ धर्मविच्चंनामतत्प्रतिपक्षधर्मभेदलक्षणेज्ञातेशुद्धंस्यादित्यतस्तच्छाखाआह विधर्मइति १२ अधर्मवद्विधर्मादीनांस्वरूपंदर्शयति धर्मेति अधर्मवद्धर्मपीडनंविधर्मः अन्य स्यक्षत्रियादेश्चोदितोविहितोधर्मोब्राह्मणेनानुष्ठीयमानःपरधर्मः दंभेनाक्रियमाणोधर्मोदंभः सचोपधर्मइत्युच्यते धर्मशब्दार्थमिच्छतांधारकोहिधर्मस्तमर्थमिनत्तीतिसच्छलधर्मइत्युच्यते १३ पुंभिः काम्यफलेच्छयाकृतोयोधर्मःसआभासइत्युच्यतेहिशब्दः इयानेषांभेदइत्याह धर्मप्रतिपक्षभेदस्वरूपमुक्त्वाधर्मप्रयोजनमाह आश्रमइति हिशब्दउत्तरत्रापिसंबध्यते तेनवर्णलक्षयति योब्राह्मणा दिवर्णोयश्चब्रह्मचर्याद्याश्रमः अत्रतत्तत्स्वभावानुसारेणभगवदर्पणबुद्ध्यापृथक्पृथग्विहितोयोधर्मःसजीवस्योपशांतयेसंसारनिर्मूलनायकल्प्यते समर्थ्यतेशास्त्रेष्वितिशेषः स्वभावपदसामर्थ्या त्सात्त्विकोधर्मोमुक्तिहेतुर्नान्यः राजसतामसःस्वर्गनरकादिहेतुः धर्मोभवत्यधर्मोपिकृतोभक्तैस्तवाच्युत पाषंभवतिधर्मोपियोनभक्तैःकृतोहरेरितिवचनात् अस्यजीवस्योपशांतये मोक्षायेतिवा १४ ननुनिष्कर्मणापुरुषेणधर्मकरणंदुःसाध्यं अर्थाभावात्तस्मादधनेनतदर्थकृष्यादिकंकर्मकर्तव्यमितितत्राह धर्मार्थमिति तर्हिदेहादियात्रार्थंकर्मकर्तव्यं अन्यथातन्नाशेनपुरुषार्थानुदयइतितत्राह यात्रार्थमिति नन्वेववेत्कथंदेहयात्रासिद्धिरितितत्राह अनीहेति अत्रानीहास्वदेहपोषणायासनिवृत्तिः महाहेरजगरस्य १५

निरंतरंभगवदुपासनामृतपायिनोनीहापरमानंदकारणमित्याह संतुष्टस्येति यदृच्छयासंतुष्टस्ययत्सुखं । कामलोभेन कामभोगेच्छयार्थेहयाधनयाचनप्रवृत्त्याचादिशोधावतः पुंसःकुतःकस्मात्कर्मण स्तत्सुखंलभ्यतइत्यन्वयः १६ दुस्त्यजेषुविषयेषुसर्वतोदिशंजाग्रत्सुनिष्कर्मणःकथंसुखमुपलभ्यतइतितत्राह सदेति यस्त्वात्मरतिरेवस्यादात्मतृप्तश्चमानवइत्यादेः एतमर्थनिदर्शयति शर्करेति शि वंसुखमाप्नोतीतिशेषः शर्कराःपाषाणशकलानि १७ अन्नाद्यर्जनायासाभावेपिप्राणधारणार्थंपानीयादिप्रयत्नःस्यादेवआपोमयःप्राणइतिश्रुतेः इतितत्राह संतुष्टइति केनवायेनकेनापिप्रयत्न मंतरेणोपनतेनद्रव्येणलोकविलक्षणेनपरमात्मनावासंतुष्टः विषयालंबुद्धिमान् वारिणापिनवर्तेतेत्यन्वयः । ननु सर्वात्मनासर्वनिषेधस्यकोभिप्रायइत्याशंक्यकिंचिदभ्यनुज्ञातेमहान्दोषःस्याज्जलस्यं दनवत् विधिंविनास्वतंत्रवज्जनस्यकार्पण्यदर्शनाच्चेत्याह औपस्थ्येति । गृहंपालयतेसौगृहपालःसारमेयस्तद्वच्चरति । कृशःकाणःखंजःश्रवणरहितःपुच्छविकलोव्रणीपूयाक्तिन्नःकृमिकुलशतैरावृततनुः क्षुधाक्रांतोजीर्णोन्नपिवरकपालार्पितगलःशुनीमन्वेतिश्वाहतमपिचहंत्येवमदनइत्यादेः १८ उक्तार्थानंगीकारेबाधकमाह असंतुष्टस्येति । तेजः शापानुग्रहशक्तिःरेतोलक्षणंवा । विद्याशास्त्रविषय ज्ञानंमनोत्थमखंडंशास्त्रानुपोक्षि दीपज्वालानिभमवकीर्यतेविक्षिप्यते शिलानिक्षिप्तपांसुपिंडवन्नश्यतीत्यर्थः । कृविक्षेपइतिधातोः वृषभविषाणाहतसेतुवत् सुडागमाभावश्छांदसः अवकीर्णीक्षतत्र तः इत्यभिधानं असंतुष्टस्य विषयानलंबुद्धेः १९ अत्रानलंबुद्धिर्द्वैधाविषयाणामुपर्युपरिभोगतृष्णैकाद्वितीयाविश्रांतविश्राणनेतत्पर्याप्तंभवतीत्यतोनव्ययामिकिंतुराशीकरोमीत्याकांक्षातत्रप्रथमा

संतुष्टस्यनिरीहस्यस्वात्मारामस्ययत्सुखम् ॥ कुतस्तत्कामलोभेनधावतोर्थेहयादिशः १६ सदासंतुष्टमनसःसर्वाःशिवमयादिशः ॥ शर्कराकंटकादिभ्यो यथोपानत्पदःशिवम् १७ संतुष्टःकेनवाराजन्नवर्तेतापिवारिणा ॥ औपस्थ्यजैह्वकार्पण्याद्गृहपालायतेजनः १८ असंतुष्टस्यविप्रस्यतेजोविद्यातपो यशः ॥ स्रवंतींद्रियलौल्येनज्ञानंचैवावकीर्यते १९ कामस्यांतंहिक्षुत्तृड्भ्यांक्रोधस्यैतत्फलोदयात् ॥ जनोयातिनलोभस्यजित्वाभुक्त्वादिशोभुवः २० पंडिताबहवोराजन्बहुज्ञाःसंशयच्छिदः ॥ सदसस्पतयोप्येकेअसंतोषात्पतंत्यधः २१

याअलाभेकामः क्रोधश्च तयोरुभयोःशांतिरनायाससाध्या द्वितीयायालोभापरपर्यायानाशोदुःसाध्यइत्याह कामस्येति जनोंकुरिताभ्यांक्षुत्तृड्भ्यांकामस्योपस्थादिविषयतृष्णापरपर्यायस्यांतंना शंयाति । कुतइत्यतउक्तंहीति । विषयाविनिवर्तंतेनिराहारस्यदेहिनः इतिस्मृतेःप्रसिद्धेः । एतत्फलोदयात् एतयोः क्षुत्तृषोरशनपानलक्षणभोगाभ्यांतृप्तिलक्षणफलोत्पत्तेः तदलाभोत्पन्नस्यक्रो धस्यचशांतिंयाति दिशोजित्वाभुवोभुक्त्वापि लोभस्यांतंपागाद्युपाधिनात्यक्तव्ययेच्छालक्षणं नयातीत्यन्वयः २० ननुबहुत्यागेनत्यक्तव्ययेनस्वयंनष्टःस्यात् । अल्पसारस्तुयोमोहाद्विस्तारंकर्तुमिच्छ ति सत्यिनश्यतिदुर्मेधानारिकेलांबुकंयथेतिवचनात् तस्माल्लोभोमहान्गुणोदेहयात्राहेतुत्वादित्याह पंडिताइति पांडित्यंनामसभाकंपादिदोषराहित्यं तत्पूर्वस्यापिकिंनस्यादित्यतउक्तंबहुज्ञाइति । सार्वज्ञंघटदीपप्रभावन्नेत्याह संशयच्छिदइति । एवंविधंधर्मवंतःकइतितत्राह सदसस्पतयइति । एतादृशाश्चकेचनेत्याह एकइति । एवंविधाअपि असंतोषाल्लोभादधःकीटादियोनौपतंतीतियस्मात्तस्मा दवैष्णवविषयएवलोभोगुणोनतुवैष्णवविषयइतिभावः । एकेअसंतोषादिति संधिकार्याभावोयादितर्हीतिपदद्वयाध्याहारसूचनार्थः । यद्येवंविधाअसंतोषाद्यथायोग्यंयथालब्धद्रव्यंयथापात्रंननियुंजते दर्ह्यधःपतंतीत्यभ्युपगमसिद्धांतोयं । नकेवलमसंतुष्टस्यविद्यादिनाशोपित्वधःपातःस्यादित्यतोवाह पंडिताइति २१

इदानींकामादिजयोपायमाह असंकल्पादिति अत्रसंकल्पोपिद्विविधः पुण्यपापविषयश्चेति अत्रासंकल्पात्पापविरुद्धपुण्यविषयादित्यर्थः कामान्निषिद्धान् क्रोधःकामितालाभकारणकः कारण नाशेनकार्यनाशइत्यर्थः अनर्थकार्यस्यलोभस्यनाशः केनेतितत्राह अर्थेति अर्थेषुराजादिनिमित्तानर्थदर्शनेनासद्बुद्ध्यानश्वरफलहेतुरातिनिरीक्षणेनचतत्त्वावमर्शनात्तत्त्वज्ञानाद्भयंवैष्णवसिद्धांतसंचलनं भीभयसंचलनयोरितिधातुः २२ शोकमोहौदेहगतांतःकरणस्यैवनान्यस्य स्वतश्चिदानंदस्वरूपस्यासंभवात् इत्यादिकया । आन्वीक्षिक्याअनुकूलतर्कोपेतव्याप्तिज्ञानेन । आत्मन्यविद्यमान महिमारोपोदंभः महतांप्रावण्यादिगुणाकाराणांआत्मस्तुतिलज्जितानांपुरुषाणां निरंतरनिषेवयासद्गुणाभ्यासलक्षणयायोगांतरायान् भगवदुपासनाविघ्नान्मौनेनसंभाषणवर्जनेनजयेदितिशेषः कामाद्य नहियाकामादिनिषिद्धेच्छाराहित्येन विवादलक्षणांहिंसांजयतइत्यन्वयः २३ भूतजंभौतिकंदुःखमुन्मादादिकंवा कृपयामंत्रौषधसामर्थ्येन कृपूसामर्थ्यइतिधातुः । अनुक्रोशलक्षणगुणेनवा दैवमा धिदैविकंदुःखंसमाधिनेंद्रादिदेवताध्यानेन । यस्यैदेवतायैहविर्गृहीतंस्यात्तांध्यायेद्वषट्करिष्यन् । कारीर्यायजेतवृष्टिकामइतिश्रुतेः । अनावृष्ट्यादिदुःखंजह्यात् क्षीरसागरतरंगसीकराक्षुतश्रीनाराय णध्यानेनवा । आत्मजमाध्यात्मिकंदुःखं । योगवीर्येणअष्टांगसामर्थ्येनपवनवशीकरणेनेत्यर्थः । सत्त्वनिषेवयासात्त्विकपुरुषनिषेवया । निद्रामज्ञानम् २४ सत्त्वगुणेनरजस्तमसी । उपशमेनभगवन्निष्ठ

असंकल्पाज्जयेत्कामंक्रोधंकामविवर्जनात् ॥ अर्थानर्थेक्षयालोभंभयंतत्त्वावमर्शनात् २२ आन्वीक्षिक्याशोकमोहौदंभंमहदुपाश्रयात् ॥ योगांतरा यान्मौनेनहिंसांकामाद्यनीहया २३ कृपयाभूतजंदुःखंदैवंजह्यात्समाधिना ॥ आत्मजंयोगवीर्येणनिद्रांसत्त्वनिषेवया २४ रजस्तमश्चसत्त्वेन सत्त्वंचोपशमेनच ॥ एतत्सर्वंगुरौभक्त्यापुरुषोमनसाजयेत् २५ यस्यसाक्षाद्भगवतिज्ञानदीपप्रदेगुरौ ॥ अभिसंधिःश्रुतस्तस्यसर्वंकुंजरशौचवत् २६ एषवैभगवान्साक्षात्प्रधानपुरुषेश्वरः ॥ योगेश्वरैर्विमृग्यांघ्रिर्लोकोयंमन्यतेनरम् २७ षड्वर्गसंयमैकांताःसर्वानिगमचोदनाः ॥ तदंतायदिनोयोगमावहेयुः श्रमावहाः २८ यथावार्तादयोविद्याःपुंसःस्वार्थेनबिभ्रति ॥ अनर्थायभवेयुश्चपूर्तामिष्टंतयाऽमतः २९

यासर्वत्रापिभगवद्भक्तिरेवप्रयोजिकेत्याशयेनाह एतदिति २५ विपक्षेबाधकमाह यस्येति । अभिसंधिरतिक्रमणं भक्त्यनुसंधानराहित्यं अवज्ञेतियावत् २६ कथमवज्ञाप्रकारइतितत्राह एषइति । एषएवंविधमाहात्म्योपेतोलोकोयंनरंसुखदुःखभोक्तारंमन्यतइत्येवमवज्ञाप्रकारइत्यर्थः २७ ननुहरेःप्रकृतिनिलीनत्वेननरत्वंसंभाव्यते तुच्छत्वेनान्वपिहितंयदासीत्प्रकृतौलीनःसंसार मेतिसच्चत्यच्चाभवदितिश्रुतेः । इतितत्राह षड्वर्गेति सर्वानिगमचोदनाःसंध्यामुपासीतेत्यादिवेदविधयोपिहरौभक्तियागंनकुर्युः तर्हिश्रमावहाःक्लेशहेतवएवेत्यन्वयः आवहंतिचेत्कथंकारमित्यत उक्तं षडिति । षडिंद्रियाणांसंयमोविषयादाहृत्यहर्येकविषयीकरणलक्षणः तस्मिन्नेवैकांतोनिश्चयेनतात्पर्यायासांताः । तथान्यत्तात्पर्यंकिन्नस्यादितितत्राह तदंताइति । तस्यभक्तियोगस्यांतोनिर्णयो यासांतास्तथा । यथा । षड्वर्गसंयमैकांताःसर्वानिगमचोदनाः । तदंतानिगमायदियोगंनोआवहेयुरितिवा २८ इष्टापूर्तादिनापुरुषस्यपुरुषार्थसंभवेनतद्विधायिवेदःपूर्णार्थोलभतइत्यतोवेदस्यश्रमावह त्वंकथमत्राह यथेति । यस्यपुंसोयावार्तादयोविद्यास्ताअर्थेनबिभ्रति प्रत्युतानर्थायभवेयुश्चतथाऽसतस्तस्यपूर्तमिष्टंचार्थेनविधत्तइत्यन्वयः । पूर्तादेरनित्यफलहेतुत्वेननिंदितत्वात् । तदर्थविधायित्ववेद स्यजुगुप्सितम् । अतस्तद्विधानेश्रमावहत्वंप्रकटमित्यर्थः । इष्टापूर्तंमन्यमानावरिष्ठमित्यादिश्रुतेः २९

यदिनोयोगमित्यत्रयोगशब्देनध्यानंचोच्यतेतदातद्ध्यानम् । ध्येयेमनोनिधायोपासनापरपर्यायंभवेत्तत्रजलचरस्येवानवस्थानस्यमनसोजयेनसफलंस्यादतस्तदुपायमाह यश्चित्तेति यश्चित्तविजयेच्छुः स्यात्सओमितिमंत्रमुच्चार्यतस्मिन्नासीतेत्यन्वयःतद्विजयोपायमाह निःसंगइति । निःसंगत्वंकथमत्राह निष्परिग्रहइतितत्फलमेकइति । एकस्यापिस्वजनरहितस्यजनतामध्यस्थितस्य नानावार्ताश्रवणे नविक्षिप्तस्यपुंसोमनोजयःकथमुदपद्यतइत्यतउक्तम् विविक्ते एतदपिगृहस्थस्यनघटइत्यतउक्तम् भिक्षुरिति तस्याप्यशनचिंतयाद्वितीयापेक्षयोक्तंनयुक्तमित्यतउक्तम् भैक्ष्येति भैक्ष्यमपिबहुसंपन्नंनयोगोपयोगिस्यादित्यतउक्तम् मितेति ३० ऋज्वंगःसमीकृतकापशिरोग्रीवः ३१ ३२ उपाहृत्यहृदिस्थितेहरौ ३३ इंधनरहितोवह्निर्यथानिर्वाणंनाशंयाति तथाचित्तंप्राकृतंनाशमेति अप्राकृतंस्वरूपभूतंशरीराभिमानरहितंब्रह्मयातीत्यन्वयः बाणंशरीरंसंप्रोक्तंबाणोबालिसुतेशरइत्यभिधानम् निर्वाणममृतमक्षरंब्रह्मेत्यभिधानम् ३४ एवंविपचीकृतब्रह्मणोऽप्राकृतस्यचित्तस्यस्वभावफलमाह कामादिभिरितियच्चित्तंकामादिभिरनाविद्धत्वात् प्रशांताखिलवृत्तित्वाच्च ब्रह्मपूर्णसुखरूपंस्पृष्टंविषयीकुर्वत् तत्कर्हिचित्ततोनोत्तिष्ठेततोन्यत्रनगच्छतीत्यर्थः ३५ ननुकस्यचिच्चेतोन्यत्रगच्छतिचेत्किंदूषणमित्याशंक्यतस्यपापकरणत्वेनसर्वहास्यत्वंदूषणमित्याशयेनाह यःप्रव्रज्येति त्रिवर्गावपनाद्धर्मार्थकामबीजानामावपनक्षेत्रभूतात् तान्कामादीन् । यदासेवेततर्हीतिशेषः ३६ एवंविधाअसुरजात

यश्चित्तविजयेच्छुःस्यान्निःसंगोनिष्परिग्रहः ॥ एकोविविक्तशरणोभिक्षुर्भैक्ष्यमिताशनः ३० शुचौदेशेसमेराजन्नास्थाप्यासनमात्मनः ॥ स्थिरंसुखंसमंतस्मिन्नासीतर्ज्वंगओमिति ३१ प्राणापानौसन्निरुंध्यात्पूरकुंभकरेचकैः ॥ यावन्मनस्त्यजेत्कामान्स्वनासाग्रनिरीक्षणः ३२ यतोयतोनिःसरतिमनःकामहतंभ्रमत् ॥ ततस्ततउपाहृत्यहृदिरुंध्याच्छनैर्बुधः ३३ एवमभ्यसतश्चित्तंकालेनाल्पीयसामुनेः ॥ अविषण्णंचनिर्वाणंयात्यनिंधनवह्निवत् ३४ कामादिभिरनाविद्धंप्रशांताखिलवृत्तियत् ॥ चित्तंब्रह्मसुखस्पृष्टंनैवोत्तिष्ठतकर्हिचित् ३५ यःप्रव्रज्यगृहात्पूर्वंत्रिवर्गावपनात्पुनः ॥ यदासेवेततान्भिक्षुःसपापोनिरपत्रपः ३६ यस्यदेहःस्मृतोनात्मामर्त्योविट्कृमिभस्मवत् ॥ तमेवस्वात्मसात्कृत्वाश्लाघयंतित्यसत्तमाः ३७ गृहस्थस्यक्रियात्यागोव्रतत्यागोबटोरपि ॥ तपस्विनोग्रामसेवाभिक्षोरिंद्रियलौल्यता ३८ आश्रमापसदाह्येतेखल्वाश्रमविडंबिनः ॥ देवमायाविमूढांस्तानुपेक्षेतानुकंपया ३९ आत्मानंचेद्विजानीयादेवंज्ञानधृताशयः ॥ किमिच्छन्कस्यवाहेतोर्देहंपुष्णातिलंपटः ४०

यइत्याभिप्रायेणाह यस्येति यस्यदेहिनः । अनात्मादेहोविट्कृमिभस्मवत्स्मृतः तस्यतमेवदेहंतत्सदृशमेवभोगायतनंस्वात्मसात्कृत्वाहमेवात्मेतिकृत्वायेदेहंश्लाघयंतितेऽसत्तमाअसुराइत्यन्वयः आत्मैवमहीयानूइतिश्रुतिर्हिशब्देनसूचयतियैःस्वदेहइतिपाठे यैर्मर्त्यैरनात्मास्वदेहोविट्कृमिभस्मवत्स्मृतः तेतमेवस्वात्मसात्कृत्वाश्लाघयंतितर्हिअसत्तमाइत्यन्वयः ३७ नकेवलंयतेराश्रमत्यागेदूषणमपितुगृहस्थानामपिस्वधर्मत्यागेदोषःस्यादित्याह गृहस्थस्येति यत्पादेःकस्यकस्यधर्मत्यागेदोषःस्यादित्यतोवाह गृहस्थस्येति वटोर्ब्रह्मचारिणःयदिगृहस्थादीनांक्रियात्यागादयःसंतितर्ह्येते आश्रमापसदाहीत्यन्वयः ३८ नन्वेतावतापिफलंस्यात्किञ्चेत्याह खल्विति आश्रमान्विडंबयंतिअनुकुर्वंतीत्याश्रमविडंबिनःखलु आश्रमफलाहेतुत्वादित्यर्थः निषेधवाक्यालंकारादौखलुशब्दप्रयोगात् नचैतेपुण्याशयामान्याइत्याह देवेति अतोभगवन्माहिमेति भगवद्विषयैवानुकंपाप्रेमविशेषः ३९ यतःस्वधर्मत्यागीनिंद्योतोविहितातिरेकेणदेहपोषोनयुक्तइत्याह आत्मानमिति विवेकज्ञानेनधृताशयःवशीकृतांतःकरणःपुरुषःआत्मानंस्वस्वरूपंपरमात्मानंचविजानीयात् चेत्तर्हिसार्किमुस्वामिच्छन्कस्यहेतोःसुखस्यार्थेवालंपटोरागींद्रियलोलुपोभूत्वादेहंपुष्णातीत्यन्वयः सुखार्थीवात्यजोद्विद्यांविद्यार्थीवासुखंत्यजेदितिवचनात् ४०

नन्वयंदेहो हेयश्चेत्किमनेनार्थइत्याशंक्यमहाप्रयोजनमस्त्येवंकृतंचेदित्याशयेनाह । आहुरिति । अभीषुंप्रग्रहं । इंद्रियेशंश्रोत्रादींद्रियनेतारम् । मात्राःविषयाः धिषणाबुद्धिः ईशस्यधामगृहस्थानीयं सत्त्वमंतःकरणविशेषम् ४१ दशप्राणंप्राणदशकम्अक्षमाहुरितिसर्वत्रयोज्यं । प्राणापानव्यानोदानसमाननागकूर्मकृकलदेवदत्तधनंजयनामानोदशप्राणाः । अधर्मधर्मौपापपुण्यलक्षणेचक्रेशकटपद स्थानीयेअभिमानमहंकारलक्षणंजीवंरथिनंपठंतीत्यन्वयः शरंतुजीवमित्यत्रतुशब्देनैतत्प्रवृत्तिविशेषभेदंसूचयति नतुस्वरूपभेदं प्रणवोधनुःशरोह्यात्मेतिश्रुतेः । अथदेवरथस्तस्यवाग्बुद्धिरितिचपरंब ह्म ४२ अस्यरथिनोजेतव्यानाह रागइत्यादिना अपूज्येपूज्यबुद्धिस्तुमानःसद्भिरुदाहृतइति मानोभिमानोवज्ञेचपरिमाणेचपूजनइतिच अभिमानोर्थादिदंपैशुन्यंप्रणयहिंसयोरितिच मायाकैतवंरा गादयआंतरीयाःशत्रवः । बाह्याःशत्रवः सहोदरादयः । आदिशब्देनदुंदुभ्यादयः सुग्रीववाल्यादयः । तेसर्वेशत्रवोरागादयउपायेनपरिहर्तव्याइतिशेषः ४३ ४४ एवंवर्णनोपयोगमाह यावदिति नृकायरथंमनुष्यशरीराख्यरथंरथगताविधातोर्ज्ञानसाधनत्वात्तच्छब्दशब्दितम् । यावदात्मवशोपकल्पंस्ववशत्वेनकल्पितंधत्ते । तावद्गरिष्ठचरणार्चनयामहापुरुषश्रीपादपूजनेननिशातंधौतं ज्ञाना सिंदधदच्युतोबलंयस्यसतथा अक्षारितंबलंयस्यसतथेतिवाअस्तशत्रुः निरस्तरागादिशत्रुः स्वाराज्येनेश्वरेणदृष्टेनतुष्टोविषयालंबुद्धिमानुपशांतः पूर्वस्मादाधिक्येनोपात्तभगवन्निष्ठः पुरुषःइदंसंसाराख्यंहे

आहुःशरीररथमिंद्रियाणिहयानभीषुंमनइंद्रियेशम् ॥ वर्त्मानिमात्राधिषणांचमूतंसत्त्वंबृहद्बंधुरमीशधाम ४१ अक्षंदशप्राणमधर्मधर्मौचक्रेभिमानं रथिनंचजीवम् ॥ धनुर्हितस्यप्रणवंपठंतिशरंतुजीवंपरमेवलक्ष्यम् ४२ रागोद्वेषश्चलोभश्चशोकमोहौभयंमदः ॥ मानोभिमानोसूयाचमायाहिंसाचमत्सरः ४३ रजःप्रमादःक्षुन्निद्राशत्रवस्त्वेवमादयः ॥ रजस्तमःप्रकृतयःसत्त्वप्रकृतयःक्वचित् ४४ यावन्नृकायरथमात्मवशोपकल्पंधत्तेगरिष्ठचरणार्चनयानिशातम् ज्ञानासिमच्युतबलंदधदस्तशत्रुःस्वाराज्यतुष्ट उपशांतइदंविजह्यात् ४५ नो चेत्प्रमत्तमसदिंद्रियवाजिसूतानीत्वोत्पथंविषयदस्युषुनिक्षिपंति ॥ तेदस्यवः सहयसूतमसुंतमोंधेसंसारकूपउरुमृत्युभयेक्षिपंति ४६ प्रवृत्तंचनिवृत्तंचद्विविधंकर्मवैदिकम् ॥ आवर्ततेप्रवृत्तेननिवृत्तेनाश्नुतेमृतम् ४७ हिंस्रंद्रव्यमयं काम्यमग्निहोत्राद्यशांतिदम् ॥ दर्शश्चपूर्णमासश्चचातुर्मास्यःपशुःपुनः ४८ एतादिष्टंप्रवृत्ताख्यंहुतंप्रहुतमेवच ॥ पूर्तंसुरालयारामकूपाजीव्यादिल क्षणम् ४९

यत्वेनसर्पानिर्मोकवत्क्षिप्तंवस्तुजह्यादित्यन्वयः ४५ इतोन्यथास्यमुक्तिरेवनसेत्स्यतीत्याह । नोचेदिति नोचेदिंद्रियग्राममात्मवशंकृत्वाज्ञानासिनासंसारानुच्छेदः शब्दादिविषयाभिलाषश्चेद्यदितर्हि असंतोषिवाइंद्रियहयबुद्धिसूताः । प्रमत्तंरागांधीभूतचक्षुषमसुंरथिनं उत्पथमशास्त्रमार्गेनीत्वा शब्दादिविषयलक्षणेषुदस्युषुदुःस्वाकारेषुचौरेषुनिक्षिपंति तेविषयचौराःसहयसूतं इंद्रियबुद्धिसूतमिमंरथमु रुमृत्युभयेतमोलक्षणाज्ञानांधेचक्षुरविषयेसंसारकूपेक्षिपंतीत्यन्वयः ४६ ननुस्वर्गकामोयजेतेत्यादिशक्यार्थश्रवणसमनंतरं तदुक्तकर्मणिप्रवर्तमानंदुष्प्रापापारसंसारकूपेपातयंतीतिकथमुच्यते । त स्यापिवैदिकत्वेनांगीकार्यत्वादन्यस्यसर्वधर्मपरित्यागस्यावैदिकस्यापिसारोच्छेदकत्वंचकथंसर्वधर्मान्परित्यज्येतिस्मृतेरितितत्राह प्रवृत्तंचेति चःसमुच्चये द्विविधमित्यनेनात्यंताभिन्नाविषयत्वंदर्शयति यद्यप्यनेवंविन्महापुण्यंकर्मकरोति तद्धास्यांततःक्षीयते नारायणोसौपरमोविचिंत्यइत्यादिनावैदिकत्वाच्च ४७ कीदृशंतत्प्रवृत्तंयेनानुष्ठितेनपुनरावृत्तिःस्यादितितत्राह हिंस्रमित्यादिना अश्वत्थादि द्रव्यच्छेदनात्मकत्वाद्धिंस्रमशांतिदंमुक्तिविपरीतफलप्रदम् ४८ हुतंवैश्वदेवं । प्रहुतंहुत्वाबलिहरणमेतद्द्वयमिष्टम् । सुरालयादिविपाकांताःपूर्तम् । आजीव्याःसर्वसेव्याःकुट्टिममूलाविस्तृतशाखातरवः४९

द्रव्यमूष्मविपाकः पुरोडाशादिद्रव्यजनितापूर्वफलम् । धूमइत्यादिनाधूमादिशब्दवाच्यादेवताश्चात्रगृह्यंतइतिज्ञातव्यम् । अपक्षयःकृष्णपक्षः । सोमश्चंद्रः । पर्वदर्शशब्देनतत्प्रयुक्तकर्मविशेषोत्रतुतदभिमानिदेवाउच्यंते । अनेनमार्गेणगतस्यगतिप्रकारमाह ओषधीति । पितृयानंगतः अंबुवृष्ट्यादिद्वारेणभुवंप्राप्तः ओषध्यादिर्भवति ५० अन्नरूपेणपितरंप्रविश्यरेतोरूपेणमातरंचेतिपुनःपुनर्भवतीतिपुनर्भवः स्यादितिशेषः । नकेवलमोषध्यादिभावोस्यकिंतुधूमादिभावोप्यस्तीतिभावेनोक्तंविशदयति एकैकस्येति अत्रानुपूर्व्यात्क्रमात् अथइमेग्रामइष्टापूर्तेदत्तमित्युपासतेतेधूममभिसंभवंतीत्युपक्रम्ययोयोह्यन्नमत्तियोरेतःसिंचतितद्रूपएवभवत्यंते अनेनायमर्थः प्रपंच्यते ५१ अत्रचतइहरमणीयचरणाभ्याशेहयत्तरमणीयांयोनिमापद्येरन् ब्राह्मणयोनिंवाइत्यादेरभिप्रायंदर्शयति निषेकादीति । निषेकोरेतःसेकः अनेनापिपुनर्भवइत्यस्यभावोविवृतइतिज्ञायते देवयानापरपर्यायार्चिरादिमार्गाभिमानिदेवचक्रंवक्ष्यंस्तन्मार्गगतावित्थंभूतसाधनमाह इंद्रियेष्विति । क्रियायज्ञान् क्रियात्मकयज्ञाभिमानिदेवान् । ज्ञानंदीपयंतिजनयंतीतिज्ञानदीपानि ज्ञानमेवदीपोयेषांतानि । तथातेष्विंद्रियेष्विंद्रियाभिमानिदेवेषुजुह्वति । हवनंनामतत्तद्भशत्वेनस्मरणं तदुक्तं यज्ञाभिमानिनोदेवान्स्मरंतींद्रियमानिनं वशगांस्तान्मनोमानिसुरेंद्रस्यवशेस्थितान् वेदात्मिकायाःपार्वत्यास्तंतांरुद्रवशेस्थितां वर्णत्रयात्मकंरुद्रंशेपेतुप्रणवात्मके बिंदुरूपेसरस्वत्यांतंतांतस्यांपुनर्न्यसेत् मूलस्थनादरूपायांतांवायौतंजनार्दने प्रकृत्यामथवाप्राणंतामेवपुरुषोत्तमइति ५२ इंद्रियाणितदभिमानिदेवान्मनसिमनोभिमानिरुद्रशेतानेवंपूर्ववत्स्मरंतीतिशेषः । विशिष्टाकारपराक्रमलक्षणंकर्मास्यास्तीतिवैकारिकंमनोभिमानिनमिंद्रंवाचिवेदाभिमानिन्यांपार्वत्यांतामुमांवर्णसमाम्नायेपदवर्णस्वरक्रमाणांसम्यगाम्नायःसंप्रदायोनन्यथापाठलक्षणोयस्मिन्सतथा अकारोकारमकाराणांत्रयाणांवर्णानांस

द्रव्यमूष्मविपाकश्चधूमोरात्रिरपक्षयः ॥ अयनंदक्षिणंसोमोदर्शओषधिवीरुधः ५० अन्नंरेतइतिक्ष्मेशपितृयानंपुनर्भवः ॥ एकैकस्यानु पूर्व्याच्चभूत्वाभूत्वेहजायते ५१ निषेकादिश्मशानांतैःसंस्कारैःसंस्कृतोद्विजः ॥ इंद्रियेषुक्रियायज्ञान्ज्ञानदीपेषुजुह्वति ५२ इंद्रियाणिमनस्येवंवाचिवैकारिकंमनः ॥ तांतुवर्णसमाम्नायेतमोंकारेस्वरेन्यसेत् ५३ ओंकारंबिंदुनादेतुतंतुप्राणेमहत्यमुम् ॥ अग्निःसूर्योदिवावायुःशुक्लोराकोत्तरःस्वराट् ५४ विश्वोथतैजसःप्राज्ञस्तुर्यआत्मासमन्वयः ॥ देवयानमिदंप्राहुर्भूत्वाभूत्वानुपूर्वशः ५५

माम्नायोमेलनंयस्मिन् । ओंकारेसतथातस्मिन्तदभिमानिनिरुद्रेस्थितामितिशेषः तुशब्देनभार्याभर्तृभावंपूर्वस्माद्विशिनष्टि । तंरुद्रमोंकाराभिमानिनिस्वंपरमात्मानंरमयतीतिस्वरःशेषः तस्मिन्स्थितंन्यसेत्मनस्तद्विषयंकरोति ५३ तमोंकारंशेषेबिंदुनादेबिंदुनादरूपसरस्वत्यांतदाधारत्वेनास्थितं तुशब्देनपूर्वपोरेकत्रत्वमत्रस्वस्वामिभावंसूचयति तांबिंदुरूपांमूलाधारस्थनादरूपायांप्रकृतिनाम्न्यांसरस्वत्यामेकीभूय स्थितिशब्देनतयोरेकत्वंदर्शयति तंतांनादरूपां प्राणेप्रकृष्टानंदरूपेवायौस्थितां अत्रापितुनाभार्याभर्तृभावमाह अमुंवायुंमहतिजनार्दनेस्थितंस्मरेत् अथवा प्राणनामानंवायुंमहतिप्रधानेप्रकृतिशब्दवाच्येस्थितं अमुमक्षरंप्रकृतिनामानंमहतिपुरुषोत्तमेस्थितमितिमहतिशब्दोद्विरावृत्त्याव्याख्येयः एतत्सर्वं बिंदुरूपसरस्वत्यांतंतांतस्यांपुनर्न्यसेत् इत्यादिपूर्वोक्तेनमानेनसविस्तरमुक्तम् । इदानीमर्चिरादिमार्गेदेहादुत्क्रांतस्यज्ञानिनःप्राप्यान्देवानाह अग्निरिति । दिवादिवसाभिमानी शुक्लःशुक्लपक्षाभिमानी राकापूर्णमास्यभिमाननी उत्तरमुत्तरायणाभिमानिनी स्वराडिंद्रः ५४ अत्रनकेवलमग्न्यादयएवप्राप्याअपितुविश्वाद्याअनिरुद्धाद्याभगवतोमूर्तिविशेषाश्चप्राप्याइत्याशयेनाह विश्वइति । अथशब्देनानिरुद्धादेग्रहणं तेषामुभयेषांविष्णुरूपत्वंसूचयति विश्वाद्याअनिरुद्धाद्यास्तेद्विधासंप्रकीर्तिताः विष्णुरूपास्तदन्येचतान्सर्वान्यातिमोक्षगइत्युक्तेःकिंचान्येचदिवस्पुत्रास्तन्निकटवर्तिनः संतितेप्यथशब्देनसूचिताः । तदन्येचदिवस्पुत्राःसर्वेचद्युसमीपगाः तेदिवंप्रापयंत्येनंसवायुंसहरिंपृथक् विश्वादिरूपंतुर्यश्चवासुदेवश्चनापरइत्युक्तेः गतिक्रमोप्यनेनज्ञातव्यः । नपरंविश्वादिकमेवाप्तव्यंकिंतुतन्मूलरूपोहरिराप्तव्यइत्याह आत्मेति । आत्माविश्वादिरूपोहरिःसम्यगन्वीयतेऽनेन

ज्ञानेनेतिसमन्वयः तदुक्तं सहरिंपृथग्विश्वादिरूपमिति वासुदेवोतुर्यादन्योनेत्याह तुर्यइति । तुर्यआत्मावासुदेवः । अतसातत्यगमनइतिधातोः सततगमनंव्याप्तिः यश्चास्यसततोभावइतिश्रुतेः सर्वत्रवसनशीलत्वात् क्रीडारूपत्वात् जपाकुसुमाद्युपाध्यनाविद्धस्फटिकवन्निर्मलज्ञानरूपत्वाद्वासुदेवः शुद्धस्फटिकसंकाशंवासुदेवंनिरंजनमितिस्मृतिः ऐकात्म्यप्रत्ययंसारंप्रपंचोपशमंशिवं अद्वैतंतुर्यमन्यंतेसआत्मासविज्ञेयइतिस्मृतेः तुर्यश्चवासुदेव श्चनापरइतिच । किंच मार्गस्थानांसर्वेषांदेवानामपिरमात्मनिसमन्वयोस्तीतिज्ञापनायसमन्वयइत्युक्तं । एतस्यनामनिर्देशाद्देवयानामिति संवत्सरोवैप्रजापतिस्तस्यायनेदक्षिणंचोत्तरंचेत्यारभ्यएतस्मान्नपुनरावर्ततइत्येषनिरोधइत्यंतंवेदांताःप्राहुरित्यन्वयः । अस्यफमाह भूत्वेति । अनुपूर्वशः क्रमेणोपर्युपरिसुखादिभिराधिक्योभूत्वात्मस्थोमुक्तोननिवर्ततइत्यन्वयः ५५ कुतःआत्मयाजीपरमात्मपूजकत्वात् । पुनरावृत्तीच्छापितस्यनास्तीतिभावेनाह उपशांतात्मेति पूर्णानंदस्वरूपःधूमादिमार्गवदस्यापिपुनरावृत्तिभीरस्तिकिमित्यतोभूत्वेति । ननु किमेतज्ज्ञानेनप्रयोजनं येनावश्यंवक्तव्यतामियादितितत्राह यएतइति जनस्थोदेहस्थः तच्चइत्थंविदुर्यत्रमरण्येश्रद्धातपइत्युपासतेतेधिषमभिसंभवंतीत्यादिनाशास्त्रेणनकेवलंमोहंप्राप्नोतिनीचांगतिमपिनयातीत्यतोपीत्युक्तं । भक्तिमान्मार्गविन्नैवनीचांगतिमवाप्नुयादितिस्मृतेः ५६ जाग्रदाद्यवस्थाप्रवर्तकविश्वादीनूकल्पितानतिक्रम्यप्रपंचोपशमंतुर्यात्माभूत्वानिर्द्वंद्वआस्तेइतिकोचिद्व्याचक्षतेतन्मतदूषणायाह आदाविति आदावुत्पत्तिकालेमुक्तिकालेचयज्जनानाशंजननंविनाशंच । जनीप्रादुर्भावइत्यस्मात्पचाद्यचिअजादित्वात्टापिकृतेजनेतिरूपंसिध्यति । वध्यघातकभावोमार्जारमूषकवत् । यच्चबहिरंतर्विद्यमानं । परावरमुत्तमाधमं भूतंभविष्यद्वा । यच्चज्ञानादिकं । सर्वस्यग्लापकत्वात्ग्लानिजनकत्वात्तमः । प्रकृतिर्ज्योतिस्तदवभासकः स्वप्रकाशश्चयस्तदेतत्सर्वंस्व

आत्मयाज्युपशांतात्माह्यात्मस्थोनानिवर्तते ॥ यएतेपितृदेवानामयनेदेवनिर्मिते ॥ शास्त्रेणचक्षुषावेदजनस्थोपिनमुह्यति ५६ आदावंतेजनानाशंबहिरंतःपरावरम् ॥ ज्ञानंज्ञेयंवचोवाच्यंतमोज्योतिश्चसत्स्वयम् ५७ अबाधितोपिह्याभासोयथावस्तुतयास्मृतः ॥ दुर्घटत्वादींद्रियकंतद्वदर्थविकल्पितम् ५८

यंतुर्यात्माश्रीहरिस्तत्सत्तायाअपितदधीनत्वात्सइत्युच्यतेनतुतदात्मकत्वात् पुरुषएवेदंसर्वंमितिश्रुतेः । आदौयथातदधीनत्वंतथांतेपिश्रीनारायणाधीनत्वमित्यतोवाह आदाविति उक्तार्थः श्लोकः । निरुपमचरितापराधीनत्वंहरेरेवनमुक्तस्यापीत्यतोवाह आदाविति आदावंतेउत्पत्तेःप्रागूर्ध्वं अयंपरमात्मावर्ततइतिशेषः । कथंकारमत्राह जनेति जनकत्वेननाशकत्वेनेत्यादिरूपेणसर्वकर्तृत्वस्वातंत्र्येणतच्छब्दवाच्यत्वंहरेरप्युक्तं तमःशब्दस्यग्लापकत्वादितिणिच्प्रत्ययांतत्वेनविवरणादयमर्थोज्ञायतइति ५७ ननुसत्तायास्तदधीनत्वंप्रामाणिकंचेत्ब्रह्मत्वेनोक्तिर्घटेत ततःकात्रयुक्तिरित्याशंक्योपपादयति अबाधितइति प्राकृतवैकृतलक्षणकार्येषुविशिष्टकांतिमत्तयाभासतेविद्योततइत्याभासोदेहः प्रतिबिंबलक्षणोयथावस्तुतया । वसनाद्वासयेद्वस्तुनित्याप्रतिहतत्वतइतिस्मृतेर्वस्तुपरमात्मातत्त्वेनस्मृतः । इदंहिविश्वंभगवानिवेतरः इंद्रोमायाभिरित्यादिना । ननुदेहस्यसच्चेतत्सत्तायाभगवदधीनत्वेनतद्वत्कुंयुक्तंतस्यदग्धपटाभासवदर्थक्रियानर्हत्वादितितत्राह अबाधितइति शुक्तिकायांप्रतिभासितंरजतंवलयकरणाद्यर्थक्रियानर्हत्वेननेदंरजतमितिबाधितंस्याद्यथानतथायंबाधितः । हानोपादानाद्यर्थक्रियायोग्यत्वात् । अपिशब्दोत्रस्वातंत्र्यशंकांसूचयति । हिशब्देनप्रत्यक्षसिद्धत्वेनदग्धपटाभासवैलक्षण्यंदर्शयति । तद्वत्तथैंद्रियकंमिंद्रियविषयंघटपटादिकं । अर्थशब्दोभावप्रधानः अर्थत्वेनार्थक्रियारूपंप्रयोजनतयाकल्पितंसमर्थितं । परमात्मनेतिशेषः । कर्तृकर्मक्रियादीनांसत्तावृत्तिस्तथैवचविष्ण्वधीनंयतइतिवचनादर्थक्रियासामर्थ्यस्यभगवदधीनत्वेनसर्वंखल्विदंब्रह्मेतिसर्वस्यतत्त्वंयुक्तमितिभावः । एवमनंगीकारेबाधकमाह दुर्घटत्वादिति ईश्वरान्येनकर्तुमशक्यत्वात् ५८

दुर्घटत्वमेवदर्शयति क्षित्यादीनामिति क्षित्यादीनामर्थानांपदार्थानां कतमापिछाया कतमोपिप्रकारो विचार्यमाणेसतिनघटतइतिशेषः । छायारीतिःप्रकाशश्चभावश्चेत्यभिधीयतेइत्यभिधानंइहकाय प्रपंचे हिशब्दोहेत्वर्थः निर्द्धारणार्थवाचिनातमप्प्रत्ययेनकस्यापिप्रकारस्यासंभवोक्तेः परमेश्वरकल्पितत्वेनेतत्कार्यंसत् इतिवक्तुंयुक्तं । प्रकारभाव मुपपादयति नसंघातइति । पर मेश्वरकल्पनामंतरेणकार्यंभवतीतिवदन्प्रष्टव्योभवति क्षितिलक्षणंकार्यंकेवलमपांपुंजः तद्विकारोवा तद्व्यतिरेकेणोत्पन्नंवा वृक्षद्वयसंयोगवदुभयोःसंयोगमात्रंवा । नप्रथमइत्याह नेति अयंसं घातोन । असंभवात् । क्षितेःकठिनावयवारब्धत्वात्केवलमपांद्रवत्वेनतत्कार्यंपर्वतादीनांमज्जनापत्त्याक्षितेःस्वरूपलयप्राप्तेः आधाराभावेनसर्वप्राणिप्राणनाशप्रसंगात् । नद्वितीयइत्याह विका रइति अत्रनञ्रोऽध्याहारःकर्तव्यःअपांविकारोपिनोपपद्यते । कालुष्यादिलक्षणविकारमात्रेणक्षितित्वानुपपत्तेः । नतृतीयइत्याह । नपृथगिति । अद्रव्यःक्षितेःपृथक्स्थित्यदर्शनात् नापिचतुर्थ इत्याह । नान्वितइति सहावस्थानमात्रेणकार्योत्पत्त्यदर्शनात् । क्षित्यादीनामर्थानांपदार्थानांमध्येकस्यापिछायाकतमोपिभावः पदार्थःकार्यजननशक्तिमान्नघटते । विचारासहत्वात् । तथाहि अ द्रव्यःपृथिवीतिश्रूयते तत्रप्रस्तुतात्मशक्तिमंतरेणकेवलानामपांपृथिवीजनकत्वंकथमितिवा । शेषंपूर्ववत् ५९ ननुविश्लिष्टानांपदार्थानामन्योन्यंमहत्कार्योत्पत्तावसामर्थ्यमस्तु । संश्लिष्टानांनेयमनुपप त्तिरित्याशंक्यश्रीनारायणकटाक्षबीजमंतरेणावयवावयविनोरप्यनुपपत्तिःस्यादेवेत्याह धातवइति धातवःक्षित्यादिप्रपंचभूतादिपदार्थाः । तन्मात्रावयवैर्विना । गंधादिव्यतिरेकेण । सुरभिगंधवती पृथिवीशुक्लभास्वरंसलिलमित्यादिव्यावर्तकधर्माभावेस्वरूपाभावप्राप्तिरेवस्यादित्यर्थःअवयवित्वादिति । नह्यवयविनोऽवयवाभावेअवयविव्यवहारोयुक्तस्तस्मात् चशब्दएवार्थेसमुच्चयार्थेवा प्रत्यक्षसि द्धत्वादवयवित्वाच्चेति अयंनिर्णयःकुत्रदृष्टइतितत्राह असतीति इवयथा आसमंतात्सन्नावयवाःसर्वात्मनातंतुलक्षणाः अवयवानष्टापदितर्ह्यसदवयविनितंतुरहितेपटेपटव्यवहारोपिनष्टइतिशेषः तंतुव्य

क्षित्यादीनामिहार्थानांछायानकतमापिहि ॥ नसंघातोविकारोपिनपृथङ्नान्वितोपिवा ५९ धातवोऽवयवित्वाच्चतन्मात्रावयवैर्विना ॥ नस्युर्द्व्यस त्यवयविन्यासन्नावयवाइव ६० स्यात्सादृश्यभ्रमस्तावद्विकल्पेसतिवस्तुनः ॥ जाग्रत्स्वप्नौयथास्वप्नेतथाविधिनिषेधता ६१

तिरेकेणपटाभावात् । यथावयवाभावेऽवयवीनास्तितथा अवयविनिनिवृत्तेऽवयवाअपिनिवृताःस्युरित्यतोवाह आसन्नावयवाअपि नष्टाःस्युरित्यर्थः यथाऽऽसन्नावयवाआतानवितानावयवत्वसंसर्ग प्राप्तास्तंतुलक्षणाअवयवाःप्रागसत्यवयविनिपटेपटव्यवहारंनजनयंति तथागंधाद्यवयवाः प्रागसत्सुक्षित्यादिषु पश्चात्क्षित्यादिव्यहारंनजनयंतीत्यतस्तदभावेतदभावःस्पष्टइत्यन्वयव्यविरेकौदर्शिता वितिज्ञातव्यमिति । एवंदुर्घटत्वेनाविद्याकल्पितप्रपंचस्याविद्याबाधानंतरमनुवृत्तस्यापिनवस्तुतत्वमितिकल्पनमनुपपन्नं विश्वंसत्यंमघवानायुवोरिदापश्चनप्रमिनंतिव्रतंवां यद्धियुक्त्याविरुध्येततदीशक्र तमेवहीतिश्रुतिस्मृतिप्रासिद्धांयुक्तिंहिशब्देनदर्शयति । असत्यस्यावयविन्यासन्नावयवानचेतिकेचित्पठंति । अयमर्थःगंधावयव्यतिरेकेणपृथिव्याद्यवयविनोनस्युश्चेत्किंनश्छन्नमितितत्राह असतीति क्षित्यामवयविन्यसतिगंधाद्यवयवाएवनासन्नित्यन्वयः अवयवाभावेऽवयव्यभावेनकारणाभावापत्त्यासर्वासत्त्वप्रसंगलक्षणोच्छेदइतिभावः ६० नन्ववयवावयविनोःसादृश्यमात्रेणतस्यायमवयवइति व्यवहारस्तस्मात्तद्व्यतिरेकेणसोपिनास्तीतिकथमापद्यतइतितत्राह स्यादिति सत्यंसादृश्यभ्रमःस्यात्तावत्कस्मिन्सतीत्यतत्राह विकल्पइतिवस्तुनोविकल्पेभेदेसतीत्यन्वयः यथापट्टणादिषुरूप्यमवलो क्यतत्संस्कारवतःसहस्रकिरणसंपर्केणचकाशमानंकापिशुक्तिकाशकलंसंदृश्यद्वयोःसादृश्यमात्रादिदंरजतमितिभ्रमोदृश्यतेतथाक्षित्यादेर्गंधादेर्भेदेवस्तुसादृश्यमात्रेणव्यवहारःस्यात् नचात्रभेदोयुज्यते स्वरूपहानेरतोवयवाभावेऽवयव्यभावआपद्यतेस्वरूपत्वादितिभावः । पटस्यप्रत्येकंतंतुनाभेदेपिसमुदायरूपेणाभेदादुक्तंयुक्तमिति । नन्ववयविपदार्थसद्भावेइयंचिंता । सएवनास्ति । परमाणवएवपुं जीभूय कार्यंजनयंतीत्यंगीकार्यत्वात्प्रतिक्षणंविनाशाच्च अभेदग्राहिप्रत्यभिज्ञायाश्चसंस्कारजनितसादृश्यमात्रविषयतयाभ्रांतित्वादित्यतोवाह । स्यादिति वस्तुनोभेदेसतितदुक्तंसत्यंस्यात्तदेवनास्ति

एकत्वस्यसाक्षिप्रत्यक्षेणानुभूयमानत्वात् साक्षिणोभ्रांतित्वेनसर्वस्यविनाशसाधकस्यापिव्याप्तिग्राहकप्रमाणप्रामाण्यस्यसाम्यात्परमाणुपुंजपक्षेपिनिगदितदोषानिस्तारात् परमाणुभिर्विनापुंजाभावेनस्व
रूपेनस्यादतोदुर्घटघटकेनकेनचिद्भवितव्यं सचादृष्टकर्मणोश्चेतनाश्रयत्वेनपृथक्सामर्थ्याभावाच्चेतनएवभवेत् चेतनसामान्यस्यहिताकरणादिनापारतंत्र्यप्रतीतेर्नित्यवयवत्वेनप्रवृत्त्यनुपपत्तेश्चतत्प्रवर्तकत्वे
नाघटितघटकत्वेनमाहात्म्याकरपरमचेतनपरिकल्पनयैवशरीरपदार्थोपादानभूतपृथिव्यादियोगोदृश्यतइतिसिद्धं । कार्यकारणवस्तूनांविशेषोनानिरूपितः तथापीशेच्छयैवासौदृश्यतेनियतोपिचे
तिस्मृतेः एतादृशोविशेषः कुत्रदृष्टइतितत्राह जाग्रदिति यथास्वप्नेजाग्रदिदमयंस्वप्नइतिविशेषइश्वरेच्छयादृश्यते यएषस्वप्नान्दर्शयतीतिश्रुतेः नतत्रस्थानरथयोगानपथानोभवंति । अथरथान्
रथयोगान्पथः सृजतइत्यादेःस्वप्नेप्रतीयमानंसर्वमीश्वरेच्छाकर्तृकामितिज्ञायते तथाविधिनिषेधविशेषोपीश्वरकल्पनयैवप्रवर्ततइत्याह तयेति अग्निष्टोमेनस्वर्गकामोयजेतेत्यादिमहाविधित्वं अरुण
यापिंगाक्ष्यैकहायिन्यागवासोमंक्रीणातीत्याद्यवांतरविधित्वं । तथाब्राह्मणोनहंतव्यइत्यादिमहानिषेधत्वं । नमृषावदेदित्याद्यवांतरनिषेधत्वंवेश्वरेच्छाकृतमित्यन्वयः सइदंसर्वमसृजतेत्यादेः संको
चेकारणाभावान्मुख्यार्थएवांगीकर्तव्यः । अत्रततद्विशेषस्यपरमेश्वरकृतत्वनिश्चयायामिथ्याभूतजाग्रत्स्वप्नग्रहणंनतुतद्वत्स्वप्नस्यापिमिथ्यात्वनिश्चयाय । तस्यार्थक्रियाकारित्वेनसत्यत्वनिश्चयात् । अनन
सर्वस्यमिथ्यात्वेरज्जुसर्पस्यमिथ्यात्वंरज्जुखंडंसत्यमितीयंव्यवस्थाकुतइत्याशंक्यमिथ्याभूतस्वप्नेपिजाग्रत्स्वप्नव्यवहारवत् व्यवहारमात्रमत्रचेत्यादिश्रुत्योच्यतइति ६१ एवंसर्वस्मादात्मनउपका
रकत्वेनश्रेष्ठत्वाद्येनविनातत्प्रसादोनभवेद्यस्मिन्सतिसंजाघटीतिभगवति तत्समर्पणसमयेतंभावनाप्रकारंदर्शयति । भावेति मुनिःशास्त्रतत्त्वज्ञानी आत्मनः भावाद्वैतंक्रियाद्वैतंतथाद्रव्याद्वैतंचैववर्त

**भावाद्वैतंक्रियाद्वैतंद्रव्याद्वैतंतथात्मनः ॥ वर्तयन्स्वानुभूत्येहन्स्वप्नान्धुनुतेमुनिः ६२ कार्यकारणवस्त्वैक्यदर्शनंपटतंतुवत् ॥ अवस्तुत्वाद्विकल्पस्य
भावाद्वैतंतदुच्यते ६३ यद्ब्रह्मणिपरेसाक्षात्सर्वकर्मसमर्पणम् ॥ मनोवाक्तनुभिःपार्थक्रियाद्वैतंतदुच्यते ६४ आत्मजायासुतादीनामन्येषांसर्वदेहिनाम् ॥
यत्स्वार्थकामयोरैक्यंद्रव्याद्वैतंतदुच्यते ६५ यद्यस्यवानिषिद्धंस्याद्येनयत्रयतोनृप ॥ सतेनेहेतकर्माणिनरोनान्यैरनापदि ६६**

यन् स्मरणंकुर्वन्स्वानुभूत्याविर्भूतस्वरूपज्ञानेन । इहजगतिसतस्त्रीन्स्वप्नान् जाग्रदाद्यवस्थानुभवनिमित्ताज्ञानशब्दवाच्यानर्थान्धुनुतेनिरस्यतीत्यन्वयः ६२ किंतद्भावाद्वैतादिकंयेनतदवश्यमनु
ध्येयमितितदाह । कार्यकारणेति । महदादिकार्येषुप्रकृतितद्गुणाख्यकारणेषुचस्थितस्यवस्तुनोनित्याप्रतिहतस्यहरेरेकत्वदर्शनम् । तत्कथमिवपटतंतुवत् पटस्यतंतूनांचाभेदलक्षणैकत्वंयथाप्रामा
णिकंतथेत्यर्थः । प्रकृतिंपुरुषंचैवप्रविश्यपुरुषोत्तमइत्यादेः । मृद्घटइतिसामानाधिकरण्येनकार्यकारणयोरभेदोक्त्याश्रीहरिसंबंधाप्रतीतेःप्रकृतासंगतंस्यान्नित्यदर्शनंचैकत्वप्रदर्शनपरमित्युक्तएवार्थः ।
प्रतीतार्थंपरित्यज्याप्रतीतार्थकथनेकिंकारणमत्राह अवस्तुत्वादिति घटादिप्रपंचस्यानित्यत्वेनप्रतिहतत्वात्स्वतएवकार्योत्पादनसामर्थ्याभावादस्तुत्वादसामर्थ्यत्वाद्विशिष्टत्वान्मिलितत्वात्कार्यज
ननशक्त्यभावाद्वा इदंचभगवन्माहात्म्यप्रकटनं गणंयुगपदाविशदितिस्वोक्तेःकार्यकारणानुविष्टानांभगवद्रूपाणामत्यैक्यमेकत्वं तत्सृष्ट्वातदेवानुप्राविशत् समाधिगेतास्मिन्विधूतभेदमोहइत्यादिश्रुति
स्मृतिभिरुच्यतइतिज्ञानपूर्वकमुपासनंकार्यमितिशेषः ६३ नऋतेत्वत्क्रियतेकिंचनारेमहामर्कमघवंश्चित्रमर्चेति क्रियाद्वैतम् ६४ आत्मजायादीनामन्येषांचदेवदत्तादीनांभगवदधीनत्वदर्शनंयच्चा
र्थकामयोरैक्यंभगवद्विषयत्वदर्शनंतत्सर्वंद्रव्याद्वैतं मन्येतदर्पितमनोवचनात्मगेहप्राणःपुनातीत्यादिनोच्यतइत्यन्वयः अनेनजीवस्यश्रीहरिणाद्वैतमुच्यते तत्रैवचाद्वैतशब्दार्थग्रहणं नतुस्वरूपैक्य
मितिशिक्षाग्राह्येतिज्ञापयतइति ६५ उपासनाप्रकारंनिरूप्याधुनार्चनादिप्रकारंदर्शयति यद्यस्येति यस्यपुरुषस्ययेनद्रव्येणयत्रयस्मिन्देशेकालेवायतोयस्मादुपात्तमनिषिद्धंश्रुतिस्मृतिलोकविहितं
सनरस्तेनतस्मिन्देशेकालेवातस्मात्पुरुषादाप्तेनकर्माणिपूजालक्षणानीहेतकुर्यात् अन्यैर्निषिद्धैर्नकुर्यादित्यन्वयः नन्वेतंतर्ह्यापद्युपरमएवप्राप्तइतितत्राह अनापदीति ६६

एतैरन्यैश्चवेदोक्तैर्वर्तमानःस्वकर्मभिः ॥ गृहेप्यस्यगतिंयायाद्राजंस्तद्भक्तिभाङ्नरः ६७ यथाहियूयंनृपदेवदुस्त्यजादापद्रणादुत्तरितानुप्रभो ॥ यत्पा
दपंकेरुहसेवयाभवानहार्षीन्निर्जितदिग्गजःक्रतुः ६८ अहंपुराभवंकश्चिद्गंधर्वउपबर्हणः ॥ नाम्नातीतेमहाकल्पेगंधर्वाणांसुसंमतः ६९ रूपपेशलमाधु
र्यसौगंध्यप्रियदर्शनः ॥ स्त्रीणांप्रियतमोनित्यंमत्तस्तत्पुरलंपटः ७० एकदादेवसत्रेतुगंधर्वाप्सरसांगणाः ॥ उपहूताविश्वसृग्भिर्हरिगाथोपगायने ७१
अगायंस्तद्विदित्वाहंस्त्रीभिःपरिवृतोगतः ॥ ज्ञात्वाविश्वसृजस्तन्मेहेलनंशेपुरोजसा ७२ याहित्वंशूद्रतामाशुनष्टश्रीःकृतहेलनः ॥ तावद्यास्यामहंजज्ञेत
त्रापिब्रह्मवादिनाम् ॥ शुश्रूषयानुसंगेनप्राप्तोहंब्रह्मपुत्रताम् ७३ धर्मस्तेगृहमेधीयोवर्णितःपापनाशनः ॥ गृहस्थोयेनपदवीमंजसान्यासिनामियात् ७४
यूयंनृलोकेबतभूरिभागालोकंपुनानामुनयोभियांति ॥ येषांगृहानावसतीतिसाक्षाद्गूढंपरंब्रह्ममनुष्यलिंगम् ७५ सवाअयंब्रह्ममहद्विमृग्यंकैवल्यनिर्वा
णसुखानुभूतिः ॥ प्रियःसुहृद्वःखलुमातुलेयआत्मार्हणीयोविधिकृद्गुरुश्च ७६ नयस्यसाक्षाद्भवपद्मजादिभीरूपंधियावस्तुतयोपवर्णितम् ॥ मौनेनभ
क्त्योपशमेनपूजितःप्रसीदतामेषसतांसात्वतांपतिः ७७ ॥ श्रीशुकउवाच ॥ इतिदेवर्षिणाप्रोक्तंनिशम्यभरतर्षभः ॥ पूजयामाससुप्रीतःकृष्णंचप्रेमविह्वलः ७८
कृष्णपार्थावुपामंत्र्यपूजितःप्रययौमुनिः ॥ श्रुत्वाकृष्णंपरंब्रह्मपार्थःपरमविस्मितः ७९ इतिदाक्षायणीनांतेपृथवंशाःप्रकीर्तिताः ॥ देवासुरमनुष्याद्या
लोकायत्रचराचराः ॥ ८० ॥ इतिश्रीभागवतेमहापुराणेपारमहंस्यांसंहितायांसप्तमस्कंधेषोडशोध्यायः ॥१६॥ समाप्तोयंस्कंधः ॥ श्रीकृष्णार्पणमस्तु ॥

---

१ ब्रह्मणश्चतुर्मुखस्य शतवर्षपरिमितःकालः परइत्युच्यते । कालंपरं स्वमनुभूय परः स्वयंभूरित्युक्तेः । महाकल्पश्चोच्यते ।

॥ इति श्रीमद्भागवते सप्तमः स्कंधः समाप्तः ॥

॥ अथ श्रीमद्भागवते अष्टमःस्कंधः प्रारभ्यते ॥

श्रीवेदव्यासायनमः । अस्ताविश्रुतिमस्तकेनमनुनास्वायंभुवेनापियोयेनाराक्षिजगत्त्रयंचमुनिभिःस्वात्मानुविद्धात्मभिः ॥ येनामोविगजाधिपःक्रकचवच्चक्रेणनक्राननात्क्षीरांभोधिरमंथियेनधृतभूःसोयंहरिःपातुनः ॥ १ ॥ येनाधारिगिरिःपपेचविबुधैर्येनामृतंप्रेरितैर्येनातापिसुरद्विषांचहृदयंशर्वोप्यमोहिस्त्रिया ॥ येनामायिजगंत्यबंधिचबलिर्येनाप्यदायिश्रुतिर्धात्रेयेननिहत्यमत्स्यवपुषादैत्यंतमीडेहरिम् ॥ २ ॥ सप्तमस्कंधवाराशौनिमज्योन्मज्यशुद्धधीः ॥ अष्टमस्कंधसद्याख्यामृतंपातुमुपक्रमे ॥ ३ ॥ अत्रापिहरिभक्तिरेवभगवन्मनःकर्षणनिपुणोतिविधातुमनंतोपनिषदर्थभूतस्यहरेर्जगद्रक्षणादिमाहात्म्यं निरूप्यते तत्रापिविमलतरमुरुमथनदुरितहरचरितामृतपानाप्यायितप्राणोविस्मृतानशनक्लेशःपरीक्षिच्छुकमच्युतकथानुवादपूर्वकमभिलषितात्यंतश्रोतव्यकथांप्रार्थयते । राजेति । अन्यान् स्वायंभुवव्यतिरिक्तान् १ तत्रापितत्प्रसंगेविशेषकथापिवक्तव्येत्याह यत्रेति महीयसःमहत्तमस्यहरेः २ ३ अस्मिन्वैवस्वतांतरेस्वायंभुवप्रभृतिवैवस्वतांताःसप्तमनवोव्यतीतप्रायाउच्यंते अत्रसप्तसुआद्यःकथितइत्यन्वयः ४ अत्रापिशतरूपापतिपालनादिविषयमनुदितंयज्ञमूर्तिचरितंवक्तुमाह आकूत्यामिति ५ कपिलस्यहरेःकृतंचरितं पुरातृतीयस्कंधे ६ ७ सुनंदायांत्रिधाभिन्नायांविष्णुपद्यांएतस्यांअन्वाहस्तुतिरूपामुपनिषदमाह ८ कीदृशीत्यतोर्थतस्तामुपलक्षयति येनेति अयमादित्योयेनहरिणाप्रेरितोविश्वंतपतेप्रकाशयति विश्वस्यवीर्यंयेवी

राजोवाच ॥ स्वायंभुवस्येहमनोर्वंशोयंविस्तराच्छ्रुतः ॥ यत्रविश्वसृजांसर्गोमनून्यान्वदस्वनः १ यत्रधर्माहिविविधाश्चतुर्वर्णाश्रिताःशुभाः ॥ मन्वंतरेहरेर्जन्मकर्माणिचमहीयसः २ गृणंतिकवयोब्रह्मन्तानिनोवदशृण्वताम् ॥ यद्यस्मिन्नंतरेब्रह्मन्भगवान्विश्वभावनः ॥ कृतवान्कुरुतेकर्ताह्यतीतेऽनागतेद्यवा ३ ऋषिरुवाच ॥ मनवोऽस्मिन्व्यतीताःषट्कल्पेस्वायंभुवादयः ॥ आद्यस्तेकथितोयत्रदेवादीनांचसंभवः ४ आकूत्यांदेवहूत्यांचदुहित्रोस्तस्यवैमनोः ॥ धर्मज्ञानोपदेशार्थंभगवान्पुत्रतांगतः ५ कृतंपुराभगवतःकपिलस्यानुवर्णितम् ॥ आख्यास्येभगवान्यज्ञोयच्चकारकुरूद्वह ६ विरक्तःकामभोगेषुशतरूपापतिःप्रभुः ॥ विसृज्यराज्यंतपसेसभार्योवनमाविशत् ७ सुनंदायांवर्षशतंपदैकेनभुवंस्पृशन् ॥ तप्यमानस्तपोघोरमिदमाहसभारत ८ मनुरुवाच ॥ येनायंतपतेविश्वंविश्ववीर्येणयतस्तपः ॥ योजागर्तिशयानेस्मिन्नायंतंवेदवेदसः ९ आत्मावास्यमिदंविश्वंयज्जगत्यांजगन्मनः ॥ तेनत्यक्तेनभुंजीथामागृधःकस्यचिद्धनम् १०

र्यप्रदंतपोयतोभवति अस्मिन्सूर्येशयानेनिद्रामाचरतिसतियोहरिर्जागर्तिअयंसूर्यस्तंहरिंनवेदस हरिस्तमादित्यंवेदेत्यन्वयः भयात्तपतिसूर्यःभीषोदेतिसूर्यइतिश्रुतेः योनवेदेतिवेदेतिच अनेन आप्राद्यावापृथिवीअंतरिक्षंइत्यादिश्रुतिप्रतीतसर्वाधिपत्यादित्यस्यश्रीहर्यधीनत्ववर्णनेननिरतिशयमाहात्म्ययुक्तंहरेरितिज्ञातव्यं अयंजीवोयेननियतोविश्वंसुखदुःखादिकंतपतेअनुभवति तपआलोचनइतिधातुःआलोचनंज्ञानंसएवानुभवः स्वाद्वत्त्यनश्नन्नन्योअभिचाकशीतीतिश्रुतेः । हरिर्नियतअनुभवतीतिकुतइतितत्राह विश्ववीर्यमिति विश्वस्यवीर्यभूतंतपोनुभवोयस्माद्भवति एषह्येवआनंदयतीतिश्रुतेः आनंदयतिसुखयतिजीवमितिशेषः तस्मादित्यर्थः अस्मिन्जीवेशयानेसति सतासौम्येतिश्रुतेः योजागार्ति ननिद्रांनैवचस्वप्नंतुर्येपश्यंतिनिश्चिताइतिश्रुतेः तस्मादेनंस्वपितीत्याचक्षतइतिच अयंजीवस्तंनवेदनतत्रचक्षुर्गच्छतिनवाक्वागच्छतिनमनोनविद्मोनविजानीमइतिश्रुतेः सहरिःसर्ववेद यःसर्वज्ञइतिश्रुतेः इतिवा ९ नराजादिवत्सूर्यप्रेरकत्वंहरेःकिंतु तदंतस्थितत्वेनापीत्यभिप्रेत्याह आत्मेति इदंसूर्यादिविश्वंआत्मनईशस्यावास्यंआवासयोग्यंस्वसृष्टत्वात् इदमित्यनेनाकियत्कवलीक्रियतइतितत्राह यज्जगत्यामिति जगत्यांप्रकृतौयज्जगत्स्थावरजंगमलक्षणं प्रकृतावित्युक्त्योत्पन्नमनु

त्पन्नंचयत्सर्वंस्वव्यतिरिक्तंकवलीक्रियते प्रकृतिरावासयोग्येतिकैमुत्यन्यायेनसिद्धा प्रकृतिपुरुषंचेतिवचनाच्च अस्त्वावासयोग्यत्वंततःकिंतत्राह मनइति हेमनःयतइदमीशस्यविद्यमानंतेनकारणेनतेनश
नत्यक्तेनदत्तेनधनेनभुंजीथाःस्वीकुरुशरीरयात्रामितिशेषःयतस्त्वंतदधीनसत्ताकअतएवंनकुर्वित्याह मागृधइति कस्यपरमानंदरूपस्यहरेश्चिदानंदस्वरूपज्ञानलक्षणंधनंमागृधः तेनैक्यमाप्रवानीत्याकांक्षां
नकुर्वतोनर्थहेतुत्वादित्यर्थःभगवतादत्तंकस्यचिद्धनंमदीयमितिश्रद्धांनकुर्वितिवा ईशावास्यमितिश्रुतिः १० ननुकिमस्यलक्षणंयेनतत्सद्भावेनेदंतदावास्यंस्यादितित्राह यत्रेतिस्वप्रसादमंतरेणाज्ञे
यत्वंसर्वज्ञत्वंनित्याविनष्टचक्षुष्ट्वंचतस्यैवलक्षणंमुख्यं अदृश्येनात्म्येनिरुक्तेनिलयनेभ्रष्टप्रतिष्ठांविंदते यच्चक्षुर्नपश्यतियेनचक्षूंषिपश्यतीतिश्रुतेः नारिष्यतिननश्यति सुपर्णपूर्णानंदंउपधावतभजत
११ लक्षणांतरमाह यस्येति परइत्युपलक्षणं अपरोपिररोपिचअत्रपरापरवस्तुनोःस्वातंत्र्यंनिषिद्ध्यते नतुशून्यत्वंतदृतंमहद्ब्रह्मेत्यर्थः । तदेवतंतदुसत्यमाहुःइतिश्रुतिः १२ इदंचब्रह्मलक्षण
मित्याह सविश्वेति आत्मशक्त्याआत्मभायंयाप्रकृत्यास्यजगतोजन्मादिधत्ते यश्चतांप्रकृतिंविद्ययादस्यनिरस्यनिरीहःसृष्ट्यादिशून्यआस्तेसत्रब्रह्मनामापरमात्मेत्यन्वयःप्रलयेविश्वंकायेयस्यविश्व
कायःउदरांतर्गतप्रपंचइत्यर्थः सृष्टौविश्वमेवकायःशरीरंयस्यसतथाप्रतिमास्थानीयप्रपंचइत्यर्थः अतःपुरुहूतःपुरूणिबहूनिहुतानिनामानियस्यसतथासर्वनामासर्वकर्मेतिश्रुतिः सर्वनामवाच्यत्वेहेतुरी
शइति तत्तच्छब्दप्रवृत्तिनिमित्तसामर्थ्योपेतइत्यर्थः नैतदौपचारिकमित्यभिप्रेत्याह सत्यमिति तत्तन्नामवाच्यतत्तत्साधुगुणसद्भावेसामर्थ्यमिदमस्तीतिवक्तुमुचितंसएवकर्थामत्यतोवाह सत्यमिति साधु

**यन्नपश्यंतिपश्यंतंचक्षुर्यस्यनरिष्यति ॥ तंभूतनिलयंदेवंसुपर्णमुपधावत ११ यस्याद्यंतौनमध्यंचस्वःपरोनांतरंबहिः ॥ विश्वस्यामूनियद्यस्माद्विश्वं
चतदृतंमहत् १२ सविश्वकायःपुरुहूतईशःऋत्यंपरंज्योतिरजःपुराणः ॥ धत्तेऽस्यजन्माद्यजयात्मशक्त्यातांविद्ययोदस्यनिरीहआस्ते १३ अथाग्र
ऋषयःकर्माणिहंतेकर्महंतवे ॥ ईहमानोहिपुरुषःप्रायोनीहांप्रपद्यते १४ ईहतेभगवानीशोनाहितत्रविषज्जते ॥ आत्मलाभेनपूर्णार्थोनावसीदंतियेनुत
म् १५ तमीहमानंनिरहंकृतंबुधैर्निराशिषंपूर्णमनन्यचोदितम् ॥ तच्छिक्षयंतंनिजवर्त्ममूढान्प्रभुंप्रपद्येखिलधर्मभावनम् १६ श्रीशुकउवाच ॥ इतिमं
त्रोपनिषदंव्याहरंतंसमाहितम् ॥ दृष्ट्वासुरायातुधानाजग्धुमभ्यद्रवन्क्रुधा १७ तांस्तथावसितान्वीक्ष्ययज्ञःसर्वगतोहरिः ॥ यामैःपरिवृतोदेवैर्हत्वा
शासत्त्रिविष्टपम् १८ स्वारोचिषोद्वितीयस्तुमनुरग्नेःसुतोभवत् ॥ द्युमत्सुषेणरोचिष्मत्प्रमुखास्तस्यचात्मजाः १९**

गुणपुर्णइदंचलक्षणांतरंपरंज्योतिरिति । परंज्योतीरूपंसंपद्यतेइतिश्रुत्यामुक्तप्राप्यत्वंमुच्यतेतदेवानेनोच्यतेइति परंज्योतिः सूर्याद्यन्यतमःकिंनस्यादित्यतोजःपुराणइति १३ एवंसिद्धेवस्तुनि
तत्साधनज्ञानेसाधनमाह अथेति यतोज्ञानप्रतिबंधकेदुष्कर्माणिसतिसर्वदुःसाधनंस्यात् इत्यथलोकसंग्रहार्थंऋषयोग्रेकर्महंतवेदुष्कर्मपरिहारायायागादिकर्माणीहंतेकुर्वंतीतिविज्ञायज्ञानार्थीपुरुषईह
मानः कर्मकुर्वाणोविधूतदुष्कर्मानीहांनिवृत्तिपदवींप्राप्यप्रायोबहुलंज्ञानंप्रपद्यतइत्यन्वयः कश्चित्फलार्थीअन्यथाभिभवतीतिप्रायइत्युक्तंअनेनकुर्वन्नेवेहकर्माणीतिश्रुतिर्गृहीताआचार्यकुलाद्वेदमधीत्ययथाविधानंगुरोःकर्माणिरतिविशेषेणसमावृत्य कुटुंबीशुचौदेशेस्वाध्यायमधीयानोधार्मिकोविदधदात्मानिसर्वेंद्रियाणिसंयतिष्ठाप्याहिंसन्सर्वभूतान्यन्यत्तीर्थेभ्यःसखल्वेवंवेदंवर्तयन्यावदायुषमिति श्रुति
र्हिंशब्देनगृहीता ॥ १४ ॥ नकेवलमृषयएवलोकसंग्रहार्थंकर्माण्याचरंति अपितुश्रीहरिरपीतिभावेनआह ईहतेइति कर्मानभिषंगेकैमुत्यन्यायमाह नावसीदंतीति येतमनुवर्ततेतेपिनावसीदंती
तिकिमुतश्रीहरिरित्यन्वयः १५ पुरुषेणफलानिच्छताकर्मकर्तव्यमात्मविदेतिभावेनस्तौतीत्याह तमीहमानमिति बुधैरीहमानंनिजवर्त्ममूढांस्तत्कर्मशिक्षयंतंप्रभुंप्रपद्यइत्यन्वयः १६ मंत्रवर्णेनयु
क्तोपनिषदम् १७ १८ तस्यस्वारोचिषस्य १९

नाभ्रारोचनः २० नाभ्राविभुः २१ तस्यविभोः २२ २३ २४ २५ सत्यजितेंद्रेणस्तुतः २६ २७ २८ २९ आहुतः आहूतः ३० ३१ ३२ हेविप्राःइतिसूतःशौनकादीन्संबोधयति ३३ इतिश्रीमहा
भागवतेअष्टमस्कंधेवि०कृ०टी०प्रथमोध्यायः ॥ १ ॥ ॥ अत्रशरण्येपुशश्वदप्रतिहतशरण्यःश्रीभगवानेवेतिदर्शनायगजेंद्रविषयइतिहासःकथ्यते । क्षीरोदेन क्षीरसमुद्रेण पर्यक्परिवृतः १ रौप्या
यसाहिरण्मयैःरजतायोहेममयैस्त्रिभिःशृंगैःपयोनिधिंदिशश्चरोचयन्विद्योतयन् २ अन्यैर्नानाधातुमयैःशृंगैश्चरोचयान्नितिशेषः ३ निर्णिज्यमानांधिःप्रक्षाल्यमानप्रस्थंतपर्वतःशुभैरन्याश्मनाविद्धै

तत्रेंद्रोरोचनश्चासीद्देवाश्चतुषितादयः ॥ ओजस्तंभादयःसप्तऋषयोब्रह्मवादिनः २० ऋषेस्तुवेदशिरसस्तुषितानामपत्न्यभूत् ॥ तस्यांजज्ञेततोदेवोवि
भुरित्यभिविश्रुतः २१ अष्टाशीतिसहस्राणिमुनयोयेधृतव्रताः ॥ अन्वशिक्षन्व्रतंतस्यकौमारब्रह्मचारिणः २२ तृतीयउत्तमोनामप्रियव्रतसुतोमनुः ॥
पवनःसृंजयोयज्ञहोत्राद्यास्तत्सुताःनृप २३ वसिष्ठतनयाःसप्तऋषयःप्रमदादयः ॥ सत्यावेदश्रुताभद्रादेवाइंद्रस्तुसत्यजित् २४ धर्मस्यसूनृतायांतुभग
वान्पुरुषोत्तमः ॥ सत्यसेनइतिख्यातोजातःसत्यव्रतैःसह २५ सोनृतव्रतदुःशीलानसतोयक्षराक्षसान् ॥ भूतद्रुहोभूतगणांस्त्ववधीत्सत्यजित्स्तुतः २६
चतुर्थउत्तमभ्रातामनुर्नाम्राचतापसः ॥ वृषःख्यातिर्नरःकेतुरित्याद्यादशतत्सुताः २७ सत्यकाहरयोवीरादेवास्त्रिशिखईश्वरः ॥ ज्योतिर्धामादयःसप्तऋ
षयस्तापसेंतरे २८ देवावैधृतयोनामविधृतेस्तनयानृप ॥ नष्टाःकालेनयैर्वेदाविधृताःस्वेनतेजसा २९ तत्रापिजज्ञेभगवान्हरिण्यांहारिमेधसः ॥ ह
रिरित्याहृतोयेनगजेंद्रोमोचितोग्रहात् ३० ॥ राजोवाच ॥ बादरायणएतत्तेश्रोतुमिच्छामहेवयम् ॥ हरिर्यथागजपतिंग्राहग्रस्तममूमुचत् ३१ तत्क
थाःसुमहापुण्याधन्याःस्वस्त्ययनःशुभाः ॥ यत्रयत्रोत्तमश्लोकोभगवान्गीयतेहरिः ३२ ॥ सूतउवाच ॥ परीक्षितैवंसतुबादरायणिःप्रायोपविष्टेनकथासुचो
दितः ॥ उवाचविप्राःप्रतिनंद्यपार्थिवंमुदामुनीनांसदसिस्मृशृण्वताम् ३३ इतिश्रीभागवतेअष्टमस्कंधेप्रथमोध्यायः ॥ १ ॥ श्रीशुकउवाच ॥ आ
सीद्गिरिवरोराजन्त्रिकूटइतिविश्रुतः ॥ क्षीरोदेनावृतःश्रीमान्योजनायुतमुच्छ्रितः १ तावताविस्तृतःपर्यक्त्रिभिःशृंगैःपयोनिधिम् ॥ दिशश्चरोचय
न्नारतेरौप्यायसहिरण्मयैः २ अन्यैश्चककुभःसर्वारत्नधातुविचित्रितैः ॥ नानाद्रुमलतागुल्मैर्निर्घोषैर्निर्झरांभसाम् ३ सदानिर्णिज्यमानांघ्रिःसमंतात्प
यऊर्मिभिः ॥ करोतिश्यामलांभूमिंशुभ्रैर्मरकताश्मभिः ४ सिद्धचारणगंधर्वविद्याधरमहोरगैः ॥ किन्नरैरप्सरोभिश्चक्रीडद्भिर्जुष्टकंदरः ५ यत्रसंगीतसन्ना
दैर्नदद्गुहममर्षया ॥ अभिगर्जंतिहरयःश्लाघिनःपरशंकया ६ नानारण्यपशुव्रातसंकुलद्रोण्यलंकृतः ॥ चित्रद्रुमसुरोद्यानकलकंठविहंगमः ७ सरित्स
रोभिरच्छोदैःपुलिनैर्मणिवालुकैः ॥ देवस्त्रीमज्जनामोदसौरभाक्तानिलैर्युतः ८

र्मरकताश्मभिरिंद्रनीलरत्नैर्भूमिश्यामलांनीलांकरोतीति ४ यश्चसिद्धादिभिर्नित्यंनिषेवितगुहः ५ किन्नरादिसंगीतसन्नादैःनदद्गुहंप्रतिध्वनितगुहंस्थलमभ्युद्दिश्यप्रतिगजशंकयामर्षयाअसह्यमानबु
द्ध्याश्लाघिनःप्रशस्याहरयः सिंहाः गर्जंति ६ चित्राद्रुमायेषुतथातानिचसुराणामुद्यानानिचित्रद्रुमसुरोद्यानानितेषु कलकंठाख्याःविहंगमायत्रसतथा ७ अच्छोदैर्निर्मलजलैर्मणिलक्षणानि
वालुकानियेषुतानितथातैः । देवस्त्रीणांमज्जनादुत्पन्नोयआमोदःतस्मादुद्भूतंयत्सौरभंपरिमललक्षणंतनाक्ताभावितानिलायैस्ते । आमोदोत्थःपरिमलइत्यमरः ८

आक्रीडंक्रीडारंगम् ९ चूतोंगनाप्रियः । प्रियालःस्फुटोनामवृक्षः । द्रुमिलदेशभवःचूतोवाआम्रःपिकोदरोमार्कंदनामासचूतः । आम्रातकःआम्रवृक्षः । सालःसजावशपः । आरष्टावृहत्पत्रः [illegible]
शेषः । किंशुकःपलाशः १० ११ १२ पिचुमंदःन्हस्वपत्रःरोमशनामावा । सरलःजीरवृक्षःगुरगुलुर्वा १३ १४ १५ १६ १७ अशोकःसितरक्तपुष्पभेदेनाद्वेविधः । कुरबकःकुटजः । कुब्जकंभ्रम
रीपुष्पंस्वर्णःकृतमालः१८ कमलात्पृथक् शतपत्रं जालंमुकुलिकालता अलंडुमःसविज्ञेयोनित्यपुष्पफलोद्रुमइत्यभिधानं । तस्मिन्नुद्यानेसरोवरोस्तीत्यन्वयःतत्रोद्यानेतत्सरोवराभ्याशमाद्रवादित्यन्वयः

तस्यद्रोण्यांभगवतोवरुणस्यमहात्मनः ॥ उद्यानमृतुमन्नामआक्रीडंसुरयोषिताम् ९ सर्वतोलंकृतंदिव्यैर्नित्यपुष्पफलद्रुमैः ॥ मंदारैःपारिजातैश्चपाटला
शोकचंपकैः १० चूतैःप्रियालैःपनसैराम्रैराम्रातकैरपि ॥ क्रमुकैर्नारिकेलैश्चखर्जूरैर्बीजपूरकैः ११ मधुकैःसालतालैश्चतमालैरसनार्जुनैः ॥ अरिष्टोदुंबर
प्लक्षैर्वटैःकिंशुकचंदनैः १२ पिचुमंदैःकोविदारैःसरलैःसुरदारुभिः ॥ द्राक्षेक्षुरंभाजंबूभिर्बदर्यक्षाभयामलैः १३ बिल्वैःकपित्थैर्जंबीरैर्वृतोभल्लातकादिभिः॥
तस्मिन्सरःसुविपुलंलसत्कांचनपंकजम् १४ कुमुदोत्पलकल्हारशतपत्रश्रियोर्जितम् ॥ मत्तषट्पदनिर्जुष्टंशकुंतैःकलनिस्वनैः १५ हंसकारंडवाकीर्णंच
क्राह्वैःसारसैरपि ॥ जलकुक्कुटकोयष्टिदात्यूहकुलकूजितम् १६ मत्स्यकच्छपसंचारचलत्पद्मरजःपयः ॥ कदंबवेतसरलनीपवंजुलकैर्वृतम् १७ कुंदैःकुर
बकाशोकैःशिरीषैःकुटजेंगुदैः ॥ कुब्जकैःस्वर्णयूथीभिर्नागपुन्नागजातिभिः १८ मल्लिकाशतपत्रैश्चमाधवीजालकादिभिः ॥ शोभितंतीरजैश्चान्यैर्नित्यर्तु
भिरलंद्रुमैः १९ तत्रैकदाताद्रिरिकाननाश्रयःकरेणुभिर्वारणयूथपश्चरन् ॥ सकंटकंकीचकवेणुवेत्रवद्विशालगुल्मंप्ररुजन्वनस्पतीन् २० यद्गंधमा
त्राद्धयोगजेंद्राव्याघ्रादयोव्यालमृगाःसखड्गाः॥ महोरगाश्चापिभयाद्रवंतिसगौरकृष्णाःशलभाश्चमर्यः २१ वृषावराहामहिषर्क्षशल्यागोपुच्छशालावृकम
र्कटाश्च ॥ अन्येचक्षुद्राहरिणाःशशादयश्चरंत्यभीतायदनुग्रहेण २२ सघर्मतप्तःकरिभिःकरेणुभिर्वृतोमदच्युत्कलभैरनुद्रुतः ॥ गिरिंगरिम्णापरितःप्रकंपय
न्निषेव्यमाणोलिकुलैर्मदाशनैः २३ सरोनिलंपंकजरेणुरूषितंजिघ्रन्नदूरान्मदविह्वलेक्षणः ॥ वृतश्चयूथेनतृषार्दितेनतत्सरोवराभ्याशमथागमद्भृतम् २४
विगाह्यतस्मिन्नमृतांबुनिर्मलंहेमारविंदोत्पलरेणुवासितम् ॥ पपौनिकामंनिजपुष्करोद्धृतमात्मानमद्भिःस्नपयन्गतक्लमः २५ तंतत्रकश्चिन्नृपदैवचोदितो
ग्राहोबलीयांश्चरणेरुषाग्रहीत् ॥ यदृच्छयैवंव्यसनंगतोगजोयथाबलंसोतिबलेविचक्रमे २६ तथातुरंयूथपतिंकरेणवोविकृष्यमाणंतरसाबलीयसा ॥
विचुक्रुशुर्दीनधियोपरेगजाःपार्ष्णिग्रहास्तारयितुंनचाशकन् २७ नियुध्यतोरेवमिभेंद्रनक्रयोर्विकर्षतोरंतरतोबहिर्मिथः ॥ समाःसहस्रंव्यगमन्महीपते
सप्राणयोश्चित्रममंसतामराः २८

१९ सकंटकंविशालगुल्मं वनस्पतींश्चप्ररुजन् २० हरिप्रभृतिमर्कटांताःयस्यगंधमात्रात्अद्भुतभयात्द्रवंतीत्यन्वयःखड्गोमृगविशेषःव्यालमृगःसर्पाकारोमृगः । उक्तेभ्योन्येन्हस्वक्षुद्राहरिणादयोमृ
गविशेषायदनुग्रहेणाभीताश्चरंतिसिंहादिभयराहित्यात् २१ २२ २३ सरःसंबंधिवायुं २४ २५ हेनृप पादाकांतिनिमित्तरुषायथाबलंयथाशक्ति विचक्रमेविक्रमंकृतवान् २६ २७ २८

इंद्रियादीनामवसादनप्राप्तावुत्तंभनशक्तिःसहः प्राणशक्तिर्बलं शरीरसामर्थ्यमोजः २९ अपारयन्पारंगंतुमशक्तः ३० कर्मलक्षणपाशेनग्राहेणरुद्धः उपद्रवंप्राप्तःविधातुर्दैवान्मोक्षितुम् ३१कश्चनलोकविलक्षणः यईशः बलिनोंतकाख्यसर्पाद्भीतंप्रपन्नंप्रपाति यस्यभयान्मृत्युरंतकोदुर्गावाप्रधावति । मृत्युर्धावतिपंचमइतिश्रुतेःतमीशमरणंशरणमीमहिप्राप्तुमइत्यन्वयः ३२ ॥ ॥ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेवि०कृ०टी०द्वितीयोध्यायः ॥२॥ ध्यानपूर्वकस्तुत्याप्रसन्नाद्धेरगजेंद्रस्यग्राहापदोमोक्षोयथाभूत्तथासंसारग्राहादपिमोक्षोभगवत्प्रसादेनस्यादितिप्रदर्शनायतन्मोक्षप्रकारोनिरूप्यतेस्मिन्नध्याये । किंप्रकारोगजेंद्रःशरणमयासीदितितंप्रकारंदर्शयितुमाह एवमिति । जाप्यंमंत्रंतिर्यग्योनेरनधिकारिणएतदसंभावितमितितत्राह प्रागिति १ एतच्चिदानंदात्मकंचेतनजातंयतोयस्मादेवाप्ताभीष्टंतस्माइति हिशब्देनपुरुषादिविशेषणानांपरात्परंपुरुशयंपुरुषमीक्षतइतिश्रुतिसिद्धंदर्शयति २ मंत्रोक्तविशेषणविवरणपूर्वकंध्यानमाह यस्मिन्निति ।इदंजगद्यास्मिन्हरौप्रतीयतेयत्प्रयंतीतिश्रुतेः । इदंयतोयस्माच्चैवजायतेयतोवाइमानिभूतानीतिश्रुतेः । चशब्देनान्यस्मादुत्पादंनिवारयति । इदंयेनब्रह्मणाप्रवर्ततेयेनजातंजीवतीतिश्रुतेः । इदंविश्वंयःस्वयंप्राप्तसत्तादिकः सर्वंखल्विदमितिश्रुतेःननुयःस्वयमित्यनेनतादात्म्यंकिंनस्यादितितत्राह अस्मादिति । अस्मात्प्रत्यक्षप्रपंचात्परस्मात्परोक्षान्मुक्तप्रपंचाच्चपरउत्तमोयस्तंस्वयंभुवंस्वतएवप्राप्तसत्ताकंशरणंप्रपद्यइत्यन्वयः । उत्पन्नस्या

ततोगजेंद्रस्यसहोबलौजसांकालेनदीर्घेणमहानभूव्ययः ॥ विकृष्यमाणस्यजलेऽवसीदतोविपर्ययोभूत्सकलंजलौकसाम् २९ इत्थंगजेंद्रःसयदापसंकटं प्राणस्यदेहीविवशोयदृच्छया ॥ अपारयन्नात्मविमोक्षणेचिरंदध्याविमांबुद्धिमथाभ्यपद्यत ३० नमामिमेज्ञातयआतुरंगजाःकुतःकरिण्यःप्रभवंतिमोचितुम् ॥ ग्राहेणपाशेनविधातुरावृतोप्यहंचतंयामिपरंपरायणम् ३१ यःकश्चनेशोबलिनोंतकोरगात्प्रचंडवेगादभिधावतोभृशम् ॥ भीतंप्रपन्नंपरिपातियद्भयान्मृत्युःप्रधावत्यरणंतमीमहि ३२ इतिश्रीभागवतेअष्टमस्कंधेद्वितीयोध्यायः ॥ २ ॥ श्रीशुकउवाच ॥ एवंव्यवसितोबुद्ध्यासमाधायमनोहृदि ॥ जजापपरमंजाप्यंप्राग्जन्मन्यनुशिक्षितम् १ ॥ गजेंद्रउवाच ॥ ॐनमोभगवतेतस्मैयतएतच्चिदात्मकम् ॥ पुरुषायादिबीजायपरेशायचधीमहि २ यस्मिन्निदंयतश्चेदंयेनेदंयइदंस्वयम् ॥ योस्मात्परस्माच्चपरस्तंप्रपद्येस्वयंभुवम् ३ यःस्वात्मनीदंनिजमाययार्पितंक्वचिद्विभातंक्वचतत्तिरोहितम् ॥ अविद्धदृक्साक्ष्युभयंतदीक्षतेसआत्ममूलोऽवतुमांपरात्परः ४ कालेनपंचत्वमितेषुकृत्स्नशोलोकेषुलीनेषुचसर्वहेतुषु ॥ तमस्तदासीद्गहनंगभीरंयस्तस्यपारेऽभिविराजतेविभुः ५

पियत्सत्ताहरेस्तत्सइतीर्यते । हरेर्विश्वंभिन्नमपिपरमोसौयतोविभुरितिवचनान्नतादात्म्यमत्रोच्यते । किमुततःप्राप्तसत्ताकंजगादिति ३ पूर्वोक्तार्थभेदस्पष्टीकरणायविवृणोति यःस्वात्मनीति । योभवान्क्वचिज्जाग्रतिविभातंक्वचसुषुप्तौतिरोहितंअप्रकाशितंतदुभयंतादिदंजगत्निजमाययास्वेच्छयास्वात्मनिस्वोदरेअर्पितमीक्षतइत्यन्वयः । ननुशरीरेस्थित्वाईक्षतेचेज्जीववल्लघुप्रज्ञानत्वेनेक्षणायोगःस्यादितितत्राह अविद्धदृगिति । तर्हिकथमीक्षतइतितत्राह साक्षीति । समामवत्वित्यन्वयः । आत्मास्वयमेवमूलंकारणंप्रतिष्ठाचसत्तावांस्तथाअनेनस्वयंभूशब्दोविवृतः स्वेमहिम्नीतिश्रुतेःअक्षरात्परतःपरइतिचक्वचिच्चतुर्मुखादौविभातंक्वचास्मदादौतिरोहितंइतिवा ४ परात्परत्वंस्पष्टयन्दुर्ज्ञेयत्वमाह कालेनेत्यादिश्लोकद्वयेन लोकेषुपृथिव्यादिभूतकार्येषुसाकल्येनपंचत्वंपृथिव्यादिपंचभूतात्मतामितेषुसर्वहेतुषुपृथिव्यादिसर्वकारणेषुचशब्दान्महदादिषुलीनेषुस्वस्वकारणतामाप्तेषुसत्सुयत्तद्गहनंदुर्ज्ञेयंगंभीरंअतएवागाधंतमआसीत्योविभुःतस्यतमसः पारेतमःसंपर्करहितदेशेऽभिविराजते स्वतोनेत्याह कालेनेति कालनाम्नाहरिणा ५

देवादयोयस्यपदंनविदुरितियदत पुनःकोजंतुःतत्पदंगंतुंईरितुंवकुर्महतीत्यन्वयः । हनुमदाद्याकृतिभिः तत्तदाकारानुसारेणविचेष्टमानस्यनेऽस्यस्वरूपंयथानज्ञायतेतथेति सदुरत्ययानुक्रमणोदुर्ज्ञेयप रिक्रमणोहरिर्मामवत्वित्यन्वयः ६ हरेरेवंविधस्वरूपसद्भावेमानमाह दिदृक्षवइतिअव्रणमश्न तंअलोकव्रतंलोकैःकर्तुमशक्यंमृष्टयादिव्रतंयस्यसनथातम् ७ देवदत्तवज्जन्माद्यभावाद्दुर्ज्ञेयत्वंयुक्त मित्यभिप्रेत्याह नविद्यतइति । आमघटादिश्यामादिगुणवन्नश्वरगुणोनास्तिदोषःकुतएव । शब्देनानिरनिष्ठोनिरवद्यइतिश्रुतिमूचयति । सत्वादिनिमित्तदोषश्चनास्तीतिवादोषोनास्त्येव गुणयुक्तदोषश्च नास्तीतिवा । यद्यपिदेवदत्तस्येवहरेर्जन्मादिकंनास्तितथापिस्वमायायास्वमहिम्नास्वेच्छयावालोकस्यतदाश्रयप्राणिनांचसंभवायसुखादिप्राप्तिलक्षगजननायतानिजन्मादीनिसर्जनादिकालमनुसृत्यऋ च्छतिप्राप्नोतीत्यन्वयः । लोकत्रयसंभवायेतिकेचित्पठंति ८ अनंतरातीतश्लोकोक्तार्थविवरणपूर्वकंयच्छब्दविशिष्टंतच्छब्दावच्छिन्नंवचनमति तस्माइति ९ अरूपायेत्युक्तंविवृणोति नमआत्मेति आत्मप्रदीपायस्वतःप्रकाशाय आत्मनःजीवस्यस्वरूपज्ञापनप्रकाशायवा १० अरूपप्राप्तिसाधनज्ञानंतत्सद्भावेज्ञानिप्राप्यत्वलक्षगंमानमित्यभिप्रायेणनमाति सत्वेनेति । विपश्चितांसत्वेनज्ञाने

नयस्यदेवाऋषयःपदंविदुर्जंतुःपुनःकोर्हतिगंतुमीरितुम् ॥ यथानटस्याकृतिभिर्विचेष्टतोदुरत्ययानुक्रमणःसमावतु ६ दिदृक्षवोयस्यपदंसुमंगलंविमुक्त संगामुनयःसुसाधवः ॥ चरंत्यलोकव्रतमव्रणंवनेसर्वात्मभूतःसुहृदःसमेगतिः ७ नविद्यतेयस्यचजन्मकर्मवाननामरूपेगुणदोषएववा ॥ तथापिलोकस्यच संभवायःस्वमायायातान्यनुकालमृच्छति ८ तस्मैनमःपरेशायब्रह्मणेनंतशक्तये ॥ अरूपायोरुरूपायनमआश्चर्यकर्मणे ९ नमआत्मप्रदीपायसाक्षिणेपर मात्मने ॥ नमोगिरांविदूरायमनसश्चेतसामपि १० सत्वेनप्रतिलभ्यायनैष्कर्म्येणविपश्चिताम् ॥ नमःकैवल्यनाथायनिर्वाणसुखसंविदे ११ नमःशांताय घोरायमूढायगुणकर्मणे ॥ निर्विशेषायसाम्यायनमोज्ञानघनायच १२ क्षेत्रज्ञायनमस्तुभ्यंसर्वाध्यक्षायसाक्षिणे ॥ पुरुषायात्ममूलायमूलप्रकृतयेनमः १३ सर्वेंद्रियगुणद्रष्ट्रेसर्वप्रत्ययहेतवे ॥ असत्याच्चविमुक्तायमदाभासायतेनमः १४ नमोनमस्तेखिलकारणायनारायणायार्तिविनाशनाय ॥ सर्वागमाम्ना यमहार्णवायनमोपवर्गायपरायणाय १५ गुणारणिच्छन्नचिदुष्मपायतत्क्षोभविस्फूर्जितमानसाय ॥ युक्तात्मभिःस्वहृदयेपरिभावितायज्ञानात्म नेभगवतेनमईश्वराय १६ ॥

नप्रतिलभ्यायप्राप्याय बलज्ञानसमाहारः सत्वंकेवलमेवचेत्यभिधानम्नैष्कर्म्येणनिवृत्तिधर्मलक्षणेन ११ उरुरूपायेत्युक्तरूपविशिष्टंतात्पर्यादरूपविशिष्टं चनमति शांतायेत्यनेनसत्त्वप्रवर्तकवासुदेवादिरूपंलक्षयतिघोरायेत्यनेनरजःप्रवर्तकजामदग्न्यादिरूपम्। मूढायेत्यनेनतमःप्रवर्तकवराहादिरूपम् । गुणकर्मणइत्यनेनतत्तद्योनिविशिष्टगुणकर्मवते । ज्ञानघ नायेत्यनेनारूपस्यशून्यत्वंनिवारयति सत्वेनेत्याद्युक्तविशेषणसमुच्चयार्थश्चकारः ॥ १२ ॥ रूप्यरूपित्वेननिरूप्यमाणस्यहरेर्मिथोनकोपिविशेषोस्तीतिज्ञापयितुमुभययोग्य विशेषणविशिष्टत्वेननमति क्षेत्रज्ञायेति सर्वाध्यक्षायसर्वस्वामिने आत्मैवमूलंयस्यतथातस्मैआत्मनांमूलायवा १३ साक्षिशब्दविवरणपूर्वकमस्मदादिज्ञानेहेतुत्वेनास्मदादिप्रपंचाद्विभिन्नमाति सर्वेति । असत्यादस्वतंत्रात्प्रपं चाद्विमुक्तायसन्निर्दोषोआभासोदेहोयस्यसतथातस्मै । सत्देहःसुखगंधश्चेत्यादेःअतेनप्राकृतरूपंनास्तीत्युक्तंभवति । सत्ताभासःप्रकाशोयस्यसतथातस्माइतिवा परंज्योतिरुपसंपद्यतेइतिश्रुतेः १४ अखिलकारणत्वादिविशिष्टत्वेनोक्तःकइत्याशंक्यश्रीनारायणएवनान्यइतितन्नामनिर्देशपूर्वकंपूर्वोक्तानुक्तविशेषणविशिष्टत्वेननमति नमोनमइति । सर्वैरागमैः पंचरात्रादिभिः आम्नायैर्ऋगादि भिर्वेदैश्चसमुदाय १५ सर्वप्रत्ययहेतवइत्येतद्विशेषगंविवृण्वन्नाह गुणेति । गुणारणिच्छन्नसत्वादिगुणलक्षणकाष्ठच्छन्नंचिदुष्मज्ञानाख्यंज्योतिर्यैतत्गातिरक्षतीतिसःतस्मै । बलमानंदओजश्चेत्यादेः

अन्यथातद्रक्षणकथनंव्यर्थंस्यात् । शांतायइत्यादिनायहुणलुब्धत्वंतत्विडंबनमात्रमित्यभिप्रेत्याह तत्क्षोभेति । तत्क्षोभेगुणविक्षोभेपि विस्फूर्जितंसमुच्छ्वसितंमानसंयस्यसतथातस्मै । गुणशक्त्युद्रेकावस्थायामपिमनोविकाररहितायेत्यर्थः स्वतंत्रोपिभक्तवश्योभवतीत्याह युक्तात्मभिरिति । वशीकृतमनआदींद्रियैःपुरुषैः । ज्ञानघनायेत्यनेनज्ञानंकिस्वरूपमुतभिन्नमुच्यतइतिविकल्पावकाशोनास्तीत्याह ज्ञानेति । नकेवलंज्ञानंगुणोस्यअन्येपिसंतीत्याशेनाह भगवतइति । गुणानांगुणिनोभेदेविज्ञानमानंदंब्रह्मेतिव्यवहारानुपपत्तिरित्याशंक्योभयविधव्यवहारघटकत्वशक्तियोगोस्यास्तीत्याशयेनाह ईश्वरायेति १६ मोक्षादिसर्वपुरुषार्थवाप्तिरप्यस्मादेवस्यात्तदर्थमन्यसेवानकार्येत्याशयेनाह यमिति । यंभजंतेतत्प्रसादादिष्टांगतिमाप्नुवंतीत्यन्वयः । नन्ववांतरपुत्राद्याशाप्राप्तयेन्यसेवापेक्षितेतितत्राह किंचेति । पुत्राद्याशिषोपिप्राप्नुवंतीतिशेषः । मोक्षंददातीतिननिराकारलक्षणंकिंत्वनाद्यंतकालीनंसाकारंददातीत्याह रातीति । रातिददाति । मयोक्तस्वाशीष्विषयमेवाशीःप्रार्थयतइत्याह करोत्विति १७ आशीःप्रार्थनंअल्पभक्तलक्षणंयतएकांतभक्तैस्तन्नक्रियतइत्याह एकांतिनइति । येएकांतिनस्तेयस्यसकाशात्कंचनपदार्थनवांछंतितंपरेशंईडइत्यन्वयः । एकांतिनइत्यस्यविवरणंभगवत्प्रधानाइति अनाकांक्षणेनिमित्तमाह यच्चरितमिति १८ अक्षरात्संभवतीहविश्वं एतस्यवाअक्षरस्यब्रह्मविदाप्नोति । परंपरात्परंपरमः पराद्धर्यः । अव्यक्तमचलंशांतम् । अध्यात्मयोगेनसुनिष्ठितेनमत्वादेवंशोकमोहौजहाति विमेकर्णापतयतः । सूक्ष्मात् सूक्ष्मतरंप्रपद्येतद्दूरेतद्वर्दंतिकेइत्याद्युपनिषत्प्रतिपाद्यंमयास्तूयतइतिद्योतनायाक्षरादिशब्दप्रयोगइत्यनेननपुनरुक्तिःपदानामितिज्ञायते । नक्षरतीत्यक्षरंजीव

यंधर्मकामार्थविमुक्तकामाभजंतइष्टांगतिमाप्नुवंति ॥ किंचाशिषोरात्यपिदेहमव्ययंकरोतुमेऽदभ्रदयोविमोक्षणम् १७ एकांतिनोयस्यनकिंचनार्थंवांछंति येवैभगवत्प्रधानाः ॥ अत्यद्भुतंयच्चरितंसुमंगलंगायंतआनंदसमुद्रमग्नाः १८ तमक्षरंब्रह्मपरंपरेशमव्यक्तमाध्यात्मिकयोगगम्यम् ॥ अतींद्रियंसूक्ष्ममिवातिदूरमनंतमाद्यंपरिपूर्णमीडे १९ यस्यब्रह्मादयोदेवावेदालोकाश्चराचराः ॥ नामरूपविभेदेनजल्प्याचकलयाकृताः २० यथार्चिषोग्नेःसवितुर्गभस्तयोनिर्यांतिसंयात्यसकृत्स्वरोचिषः ॥ तथायतोयंगुणसंप्रवाहोबुद्धिर्मनःखानिशरीरसर्गः २१ सवैनदेवासुरमर्त्यतिर्यक्नस्त्रीनषंढोनपुमान्नजंतुः नायंगुणःकर्मनसन्नचासन्निषेधशेषोजयतादशेषः २२

व्यावृत्त्यर्थपरंब्रह्मेति । ब्रह्मणिमुक्तव्यावृत्त्यर्थंपरेशमितिआराधनेप्यनुग्रहमंतरेणनव्यज्यतइति । अव्यक्तंप्रसादेसतिज्ञायतइत्यध्यात्मयोगगम्यमितिवागादींद्रियमतीत्यवर्तमानत्वादतींद्रियम् । यतोवाचोनिवर्ततइतिश्रुतेः । यथासूक्ष्मंतथामहांतमितिसूचनायइवशब्दः । अणोरणीयानितिश्रुतेः । आनंत्यघटनायपरिपूर्णमिति १९ ब्रह्मादिस्थावरांतंजगद्यस्यभिन्नांशोनतुस्वरूपांशोइतिज्ञानंमुक्तिसाधनंनान्यदित्याशयेनाह यस्येति । यस्यकलयाजल्प्यावचसावाचेतिपाठेप्ययमेवार्थः । गीर्वाग्वाणीभारतीचब्राह्मीलागौःसरस्वतीत्यभिधानम् २० गुणसंप्रवाहइत्यस्यविवरणंबुद्धिरित्यादि । अनेनजगत्प्रवाहस्यनित्यत्वंज्ञापितमितिज्ञातव्यम् २१ अधुनाश्रीनारायणसद्भावेप्रमाणदर्शनपूर्वकंस्तौति सइति । यस्माद्गुणसंप्रवाहःसःदेवासुरमर्त्यतिर्यक्जातिर्नवैयस्मादित्यन्वयः । यतोबहुव्यक्त्यभावात् विशेषतोनिषेधति नस्त्रीति । नियतस्त्रियाद्याकाराभावान्नजंतुःकृमिलक्षणः । अमूर्ताकारोपिनास्तीत्याह नायमिति । देवादिशरीरकारणपृथिव्याद्यन्यतमोपिनस्यादित्याह नसन्निति । इतिमूर्तामूर्तनिषेधनशेषोयस्यसनिषेधशेषः ततोविलक्षत्वेनपरिशेषप्रमाणसिद्धः । सजयतान्ममानर्थभूतसंसारमभिभूयवर्ततामित्यन्वयःतत्स्वरूपमाह अशेषइति । परिपूर्णत्वेनसिद्धः । निषेधशिष्टश्चेदुच्छिष्टवत्त्यागयोग्यइत्यतोवाह अशेषइति । परिपूर्णत्वेनसिद्धःसएषआत्मानेतिनेतीत्यादिश्रुतेः २२

ज्ञानसाधनमंतरेणानेनशरीरेणचिरंरक्षितेनकिंप्रयोजनमित्याशयेनाह जिजीविषइति । अहंशरीरंतर्बहिश्चावृतयामुयेभयोन्याप्रकृत्याकिं नकिमपि इतियस्मात्तस्मादेह तान्नमितेशरीरांचरनाजजीवि षेनजीवितुमिच्छामीत्यन्वयः । स्वारंभककर्मक्षयेस्वयंनाशात्किमर्थंनजिजीविषइत्यर्थतइत्यतोलिंगशरीरनाशएवप्रार्थ्यतइत्याह इच्छामीति । तस्यात्मलोकावरणस्यस्वज्ञानावरकस्यालिंगशरीरस्य मोक्षणंनाशमिच्छामीत्यन्वयः । अस्यापिकालेननाशःकिंनस्यादत्राह कालेनेति । विप्रयोगोनाशःअनेनात्मज्ञानमंतरेणालिंगशरीरस्यनाशोनास्ति । सतितस्मिन्ततस्यादित्युक्तंभवति तस्मिन्दृष्टेप रावरइतिश्रुतेः २३ ननुगुणोपसंहारलक्षणोपासनावेदांतज्ञानेनसंभवेत्तिर्यग्योनित्वेनतदनधिकारादात्मज्ञानासंभवाल्लिंगशरीरनाशेआशामात्रंतवस्यादित्याशंक्यास्मज्जातिविहितप्रणामेनापिप्रसन्ने श्वरप्रसादादुत्पन्नज्ञानेनततस्यादित्यतस्तमाचराति सोहामिति । योहंलिंगशरीरमोक्षमाकांक्षेसोहंपरंपदंप्राप्नव्योत्तमंप्रणतोस्मीत्यन्वयःसर्वस्मादस्योत्तमत्वंकुतइत्यतस्तदुपपादकविशेषणैःसिद्धमित्याह विश्वसृजमित्यादिना । विश्वसृजत्वाद्विश्वं तर्हिमृद्घटवत्तदात्मकत्वमापन्नमितिनेत्याह । अविश्वमिति जगतोविलक्षणं स्वसृष्टपदार्थप्रविष्टत्वाद्विश्वंबहिष्ठत्वादविश्वमितिवा । दुर्भगशरीरस्थत्वेपिज्ञानलो पोनेत्याह विश्ववेदसमिति विश्ववेत्तीतिसर्वज्ञमित्यर्थः । सर्वज्ञत्वंचास्यैवसुलभमित्याह विश्वेति । विश्वंव्याप्यवर्तमानंविश्वंआदत्तइतिवा विश्वस्यस्वामीतिवाविश्वात्मानं जगत्स्रष्टुरस्यजगदाकारेणप रिणामःकिंनेत्याह अजमिति । अहंकारात्मारुद्रोप्युच्यतइतिनेत्याह ब्रह्मेति । वेदोनेत्याह परमिति मुक्तोनेत्याह। पदमिति २४ ज्ञानप्रत्यक्षमीश्वरसद्भावेप्रमाणमित्याशयेननमति योगेति । योगे

जिजीविषेनाहमिहामुयाकिमंतर्बहिश्चावृतयेभयोन्या ॥ इच्छामिकालेननयस्यविप्लवस्तस्यात्मलोकावरणस्यमोक्षणम् २३ सोहंविश्वसृजंविश्वमवि श्वंविश्ववेदसम् ॥ विश्वात्मानमजंब्रह्मप्रणतोस्मिपरंपदम् २४ योगरंधितकर्माणोहृदियोगविभाविते ॥ योगिनोयंप्रपश्यंतियोगेशंतंनतोस्म्यहम् २५ नमोनमस्तुभ्यमसह्यवेगशक्तित्रयायाखिलधीगुणाय ॥ प्रपन्नपालायदुरंतशक्तयेबुद्धींद्रियाणामनवाप्यवर्त्मने २६ नायंवेदस्वमात्मानंयच्छक्त्याहंधि याहतः ॥ तंदुरत्ययमाहात्म्यंभगवंतंनतोस्म्यहम् २७ श्रीशुकउवाच ॥ एवंगजेंद्रमुपवर्णितनिर्विशेषंब्रह्मादयोविविधलिंगभिदाभिमानाः ॥ नैतेयदो पससृपुर्निखिलात्मकत्वात्तत्राखिलामरवरोहरिराविरासीत् २८ तंतद्वदार्तमुपलभ्यजगन्निवासःस्तोत्रंनिशम्यदिविजैःसहसंस्तुवद्भिः ॥ छंदोमयेनगरुडे नसमुह्यमानश्चक्रायुधोह्यगमदाशुयतोगजेंद्रः २९

नरंधितानिदग्धानिकर्माणियेषांतेतथा २५ ननुतत्तच्छक्तिमतस्तत्तत्कर्मदृष्टं हरेस्तुसृष्ट्यादिकर्मकथमित्याशंक्यतत्तच्छक्तिविशिष्टत्वेनतंनमति नमइति । असह्यवेगोयासांताः तथातादृशीनांशक्तीनां उत्पत्तिस्थितिसंहारविषयाणांउत्साहमंत्रप्रभुविषयाणांवात्रयंयस्यसतथा तस्मै उत्पत्त्यादिशक्तयश्चज्ञानवतएवयुक्ताइत्याह अखिलेति । नचैताःशक्तयोदेवदत्तशक्तिवत्परिमिताइत्याशयवानाह दुरंतेति । परिच्छिन्नत्वमनुमानेनसाध्यतइतिचेत्तत्राह बुद्धीति । हेतोराश्रयासिद्धत्वेनानुमानानुदयात् २६ हरेःस्तुतिफलंदर्शयति नायमिति । यःस्वमात्मानंनवेद नजानातिपूर्वमितिशेषः । २७ अनंतरंकिमभूदत्राह एवमिति उपवर्णितंनिर्विशेषंसमंब्रह्मयेनसतथातंपृथिव्यादिविलक्षणंब्रह्मयेनसतथातामितिवा अवतारमूलरूपयोर्विशेषोनास्तीतिवानिर्विशेषंतदितिवा । पूर्णमदःपूर्ण मिदमितिश्रुतेःविविधानिलिंगानिपद्मवज्रादीनिवाहंसवृषभादीनिवा । एवंभिदयाभेदेनजातोभिमानोहंपद्मपाणिरहंवज्रपाणिरित्यादिलक्षणोयेषांतथास्रष्टृत्वसंहर्तृत्वादिलक्षणोवायेब्रह्मादयएतेयदागजेंद्रं नोपससृपुःतदासकलदेवनाथोहरिःयत्रगजेंद्रस्तत्राविरासीत्ततस्थएवतत्रप्रत्यक्षीभूतोनतुदूरादागत्य कुतइतितत्राह निखिलेति सर्वव्यापकत्वात् निखिलगुरोःनहिपरिच्छिन्नस्यसर्वगुरुत्वंघटते इत्यादि हेतुगर्भविशेषणं नहिगुरोराज्ञामंतरेणगच्छंतिसंतः यद्वा ब्रह्मादीनामनागमोनिमित्तमाह निखिलेति हरेःसर्वस्वामित्वाद्धरेःपूर्वमागमनेप्रयोजनासिद्धेरित्यर्थः २८ तद्वद्यथादर्शनेकृपोदेतितथातम् २९

अखिलगुरो नहिपरिच्छिन्नस्यसर्वगुरुत्वंघटतइतिनारायणेत्यादिहेतुगर्भविशेषणम् ३० ततःफलितमाह तंवीक्ष्येति उत्सियाणांदेवानाम् उत्सियाविजयादेवाआदित्याअमराःसुराइत्यभिधानम् ३१ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेवि० कु० टी० तृतीयोध्यायः ॥ ३ ॥ अनष्टदुरितस्यहरौनिरतिशयभक्तिःस्यादितितन्नाशसाधनादिनिरूप्यतेस्मिन्नध्याये तत्रप्रथमंदेवादीनांपुष्पवर्षादिकंभगवत्प्रीति साधनमाह तदेति यदागजेंद्रंअमुमुचत्सदा १ २ सपश्चात्पूर्वचीर्णपुण्योदयेनाविर्भूतज्ञानोहरिंस्तुत्वातत्प्रसादेनदेवलशापेन तृतीयापंचम्यर्थे तस्माच्छापान्मुक्तःपरमाश्चर्यरूपधृक्हरिंशि रसाप्रणम्ययशोधामागायतेत्यन्वयः कीर्तनीयागुणरूपाःसत्यःकथायस्यसतथातंयंस्मिंस्तथेतिवा अनेनहरिगुणकीर्तनरूपंगानंगायकशापादिमोक्षसमर्थमित्युक्तंभवति ॥ ३ ॥ ४ ॥ ५ ॥

सोंतःसरस्युरुबलेनगृहीतआर्तोदृष्ट्वागरुत्मतिहरिंखउपात्तचक्रम् ॥ उत्क्षिप्यसांबुजकरंगिरमाहकृच्छ्रान्नारायणाखिलगुरोभगवन्नमस्ते ३० तंवीक्ष्यपी डितमजःसहसावतीर्यसग्राहमाशुसरसःकृपयोज्जहार ॥ ग्राहाद्विपाटितमुखादरिणागजेंद्रंसंपश्यतांहरिरमूमुचदुस्रियानाम् ३१ ॥ इतिश्रीभा० अ० तृ तीयोध्यायः ॥ ३ ॥ श्रीशुकउवाच ॥ तदादेवर्षिगंधर्वाब्रह्मेशानपुरोगमाः ॥ मुमुचुःकुसुमासारंशंसंतःकर्मतद्धरेः १ नेदुर्दुंदुभयोदिव्यागंधर्वानन्ननृतुर्जगुः ऋषयश्चारणाःसिद्धारतुष्टुवुःपुरुषोत्तमम् २ योसौग्राहःसवैसद्यःपरमाश्चर्यरूपधृक् ॥ मुक्तोदेवलशापेनहूहूर्गंधर्वसत्तमः ३ प्रणम्यशिरसाधीशमुत्त मश्लोकमव्ययम् ॥ अगायतयशोधामकीर्तन्यगुणसत्कथम् ४ सोनुकंपितईशेनपरिक्रम्यप्रणम्यतम् ॥ लोकस्यपश्यतोलोकंस्वमगान्मुक्तकिल्बिषः ५ गजेंद्रोभगवत्स्पर्शाद्विमुक्तोऽज्ञानबंधनात् ॥ प्राप्तोभगवतोरूपंपीतवासाश्चतुर्भुजः ६ सवैपूर्वमभूद्राजापांड्योद्रविडसत्तमः ॥ इंद्रद्युम्नइतिख्यातोविष्णु व्रतपरायणः ७ सएकदाराधनकालआत्मवान्गृहीतमौनव्रतईश्वरंहरिम् ॥ जटाधरस्तापसआप्लुतोच्युतंसमर्चयामासकुलाचलाश्रयः ८ यदृच्छयात त्रमहायशामुनिःसमागमच्छिष्यगणैःपरिश्रितः ॥ तंवीक्ष्यतुष्णीमकृतार्हणादिकंरहस्युपासीनमृषिश्चुकोपह ९ तस्माइमंशापमदादसाधुरयंदुरात्माऽ कृतबुद्धिरद्य ॥ मद्धेलनात्प्राविशतांतमिस्रंयथागजःस्तब्धमतिःसदोषः १० ॥ श्रीशुकउवाच ॥ एवंशप्त्वागतोगस्त्योभगवान्नृपसानुगः ॥ इंद्रद्युम्नो पिराजर्षिर्दिष्टंतदुपधारयत् ११ आपन्नःकौंजरींयोनिमात्मस्मृतिविनाशिनीम् ॥ हर्यर्चनानुभावेनयद्गजत्वेप्यनुस्मृतिः १२ एवंविमोक्ष्यगजयू थपमब्जनाभस्तेनापिपार्षदगतिंगमितेनयुक्तः ॥ गंधर्वसिद्धविबुधैरुपगीयमानकर्माद्भुतंस्वभुवनंगरुडासनोगात् १३ एवंमहाराजतवेरितोमयाकृष्णानुभा वोगजराजमोक्षणम् ॥ स्वर्ग्यंयशस्यंकलिकल्मषापहंदुःस्वप्ननाशंकुरुतर्यशृण्वताम् १४ अथानुकीर्तयंत्येतच्छ्रेयस्कामाद्विजायतः ॥ शुचयःप्रातरुत्थाय दुःस्वप्नाद्युपशांतये १५ इदमाहहरिःप्रीतोगजेंद्रंकुरुसत्तम ॥ शृण्वतांसर्वभूतानांसर्वभूतमयोविभुः १६

ननु किमनेनान्यगुणकीर्तनेनइदानींगजेंद्रस्यभगवत्स्तुत्याकिमभूदित्याशंक्यस्तुत्याप्रसन्नस्यहरेर्दर्शनेनमुक्ताकिल्बिषस्यतत्साकूप्यंफलमभूदित्याह गजेंद्रइति ६ हरेर्नाममात्रतोवाग्रविष्णुप्रसादः पूर्वकइतितत्राह सवाइति ७ गजेंद्रयोनिप्राप्तिनिमित्तंवक्तुमुपोद्घातंरचयति सएकदेति ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ उपगीयमानानिकर्माणियस्यसतथा अगाल्लोकदृष्ट्यातु तत्रैवां तर्दधेइत्यर्थः १३ दुःस्वप्नस्यनाशोयस्माद्गजेंद्रमोक्षणाच्चतत्थातम् ॥ १४ ॥ १५ १६ ॥

१७ १८ १९ २० २१ २२ २३ अपररात्रांतेअरुणोदयप्रारंभेउत्थायत्वांमांचेत्यादिकंस्मरंतितेसर्वस्मादंहसोमुच्यंतइत्यन्वयः २४ मन्वंतरमुपापक्षयोस्मात्तद्विपयज्ञानंकस्मादित्यतस्तत्साधनमाह येमामिति प्राणात्ययेदेहोत्क्रमणे २५ जलजोत्तमंशंखोत्तमम् ॥ २६ ॥ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेवि॰कृ॰ टीकायांचतुर्थोध्यायः ॥ ४ ॥ ॥ ७ ॥ ॥ भक्तयारतुवतःपुरुषस्यापिप्रसन्नोभ वतिहरिरित्ययमर्थः प्रतिपाद्यतेस्मिन्नध्याये तत्रादौक्रमप्राप्तमन्वंतराधिपकथांप्रसंजयति राजन्निति रेवतस्यविद्यमानंरैवतम् १ बलविंध्यावादीयेषांतेतथाअर्जुनपूर्वःप्रधानोयेषांतेतथा २ वि

श्रीभगवानुवाच ॥ येमांत्वांचसरश्चेदंगिरिकंदरकाननम्॥ वेत्रकीचकवेणूनांगुल्मानिसुरपादपान् १७ शृंगाणीमानिधिष्ण्यानिब्रह्मणोमेशिवस्यच ॥ क्षीरोदंमेप्रियंधामश्वेतद्वीपंचभास्वरम् १८ श्रीवत्संकौस्तुभंमालांगदांकौमोदकींमम ॥ सुदर्शनंपांचजन्यंसुपर्णंपतगेश्वरम् १९ शेषंचमत्कलांसूक्ष्मां श्रियंदेवींमदाश्रयाम् ॥ ब्रह्माणंनारदमृषिंभवंप्रह्लादमेवच २० मत्स्यकूर्मवराहाद्यैरवतारैःकृतानिमे ॥ कर्माण्यनंतपुण्यानिसूर्यसोमहुताशनान् २१ प्रणवंसत्यमव्यक्तंगोविप्रान्धर्ममक्षयम् ॥ दाक्षायणींधर्मपत्नींसोमकश्यपयोरपि २२ गंगांसरस्वतींनंदांकालिंदींसितवारणम् ॥ ध्रुवंब्रह्मऋषीन्सप्त पुण्यश्लोकांश्चमानवान् २३ उत्थायापररात्रांतेप्रयताःसुसमाहिताः ॥ स्मरंतिममरूपाणिमुच्यंतेतेंऽहसोखिलात् २४ येमांस्तुवंत्यनेनांगप्रति बुद्ध्यनिशात्यये ॥ तेषांप्राणात्ययेचाहंददामिविमलांगतिम् २५ ॥ श्रीशुकउवाच ॥ इत्यादिश्यहृषीकेशःप्राध्मायजलजोत्तमम्॥ हर्षयन्विबुधानी कमारुरोहखगाधिपम् ॥ २६ इतिश्रीभागवतेअष्टमस्कंधेगजेंद्रमोक्षणंनामचतुर्थोध्यायः ॥ ४ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ राजन्नुदितमेतत्तेहरेः कर्माघनाशनम् ॥ गजेंद्रमोक्षणंपुण्यंरैवतंत्वंतरंशृणु १ पंचमोरैवतोनाममनुस्तापससोदरः ॥ बलविंध्यादयस्तस्यसुता अर्जुनपूर्वकाः २ विभुरिंद्रः सुरगणाराजन्भूतरयादयः ॥ हिरण्यरोमावेदशिराऊर्ध्वबाह्वादयोद्विजाः ३ पत्नीविकुंठाशुभ्रस्यवैकुंठैःसुरसत्तमैः ॥ तयोःस्वकलयाजज्ञेवैकुंठोभगवा न्स्वयम् ४ वैकुंठःकल्पितोयेनलोकोलोकनमस्कृतः ॥ रमयाप्रार्थ्यमानेनदेव्यातत्प्रियकाम्यया ५ तस्यानुभावःकथितोगुणाश्चपरमोदयाः ॥ भौमा न्रेणून्सविममेयोविष्णोर्वर्णयेद्गुणान् ६ षष्ठश्चचक्षुषःपुत्रश्चाक्षुषोनामवैमनुः ॥ पुत्राःपुरुषसुद्युम्नप्रमुखाश्चाक्षुषात्मजाः ७ इंद्रोमंद्रद्रुतस्तत्रदेवा आप्यादयोगणाः ॥ मुनयस्तत्रवैराजन्हविष्मद्वीरकादयः ८ तत्रापिदेवःसंभूत्यांवैराजस्याभवत्सुतः ॥ अजितोनामभगवानंशेनजगतःपतिः ९ प योब्धिंयेननिर्मथ्यसुराणांसाधितासुधा ॥ भ्रममाणोंभसिधृतःकूर्मरूपेणमंदरः १० राजोवाच ॥ यथाभगवताब्रह्मन्मथितःक्षीरसागरः ॥ यदर्थंवाय तश्चाद्रिंदधारांबुचरात्मना ११ यथामृतंसुरैःप्राप्तंकिमन्यदभवत्ततः ॥ एतद्भगवतःकर्मवदस्वपरमाद्भुतम् १२

भुर्विभुनामाहारिः । द्विजाःसप्तर्षयः ३ विकुंठायाःपुत्रोवैकुंठः तयोर्विकुंठाशुभ्रयोः कलयांशेन ४ ५ भौमान्रेणून्पृथ्वीरजांसिविममे मानंसंख्यांकरोति ६ पुत्राउच्यंतेइतिशेषः चाक्षुषात्मजाःपुरुषाद यइत्यन्वयः ७ अत्राविशब्दार्थोग्रंथांतरादवगंतव्यः ८ ९ १० यथाकथं पतःकुतःअंबुचरात्मनाकूर्मरूपेण ११ १२

तापैराध्यात्मिकादिदुखैःतापितक्लेशितम् १३ सूतःशौनकादिसंवादाविस्मरणार्थंराज्ञापृष्टः । श्रीशुकस्तस्यचोद्यंपरिहर्तुमुपक्रमतइत्याह सूतइति १४ कथमुपक्रांतवानितितत्राह यदेति गता सवः प्राणबलरहिताः यदाचनोत्तिष्ठेरन्यदाचनिःश्रीकाअभवन्ततत्रतदाइज्यादयःक्रियानेशुरित्यन्वयः १५ १६ यदादेवानिश्चयंनाध्यगच्छन्ततस्तदाब्रह्मसभांजग्मुरित्यन्वयः १७ १८ १९ परं पूरकंसृष्ट्वेतिशेषः २० धर्मजातयःस्वेदजाः २१ यस्यवध्यादयोनसंति २२ तस्यहेररयंकालःस्थितिपालनावसरःधास्यतिददाति शंसुखम् २३ अजितस्यहरेः २४ नित्यत्वेनाद्भुताभिः देवस्यहरेःविद्यमानाभिर्हरिगुणगणान्प्रतिपादिकाभिःनन्वादरणीयपक्षोनास्तीतिकथंसंगच्छते परापूर्वेषांइतिश्रुतेः देवानांभगवत्पक्षत्वावगमादत्रापिदेवार्थममृतमथनादितिचेन्न भक्तिवशःपुरुषःयमेवैषवृणुतेतेनलभ्यइत्यादिश्रुतेः देवानामनुग्राह्यत्वात्तत्पक्षत्वंस्वार्थनेतिविवेकात् अनुग्राह्यतयापक्षादेवानात्मार्थतोहरेरितिवचनात् २५ वेदशिरोविशारदानामस्मिंस्तोत्रेधिका

त्वयेत्थंकथ्यमानेनमहिम्नासात्वतांपतेः ॥ नातितृप्यतिमेचित्तंसुचिरंतापतापितम् १३ सूतउवाच ॥ संपृष्टोभगवानेवंद्वैपायनसुतोद्विजाः ॥ अभिनंद्य हरेर्वीर्यमभ्याचष्टुंप्रचक्रमे १४ श्रीशुकउवाच ॥ यदायुद्धेऽसुरैर्देवाबाध्यमानाःसितायुधैः ॥ गतासवोनिपतितानोत्तिष्ठेरन्स्मभूयशः १५ यदादुर्वासशापेनसेंद्रालोकास्त्रयोनृप ॥ निःश्रीकाश्चाभवंस्तत्रनेशुरिज्यादयःक्रियाः १६ निशाम्यैतत्सुरगणामेंद्रवरुणादयः ॥ नाध्यगच्छन्स्वयंमंत्रैर्मंत्रयंतोविनिश्चयम् १७ ततोब्रह्मसभांजग्मुर्मेरोर्मूर्धनिसर्वशः ॥ सर्वेविज्ञापयांचक्रुःप्रणताःपरमेष्ठिने १८ सविलोक्येंद्रवाय्वादीन्निःसत्वान्विगतप्रभान् ॥ लोकानमंगलप्रायान्सुरांश्चैवयथाविभुः १९ समाहितेनमनसासंस्मरन्पुरुषंपरम् ॥ उवाचोत्फुल्लवदनोदेवान्सभगवान्परः २० अहंभवोयूयमथासुरादयोमनुष्यतिर्यक्द्रुमघर्मजातयः ॥ यस्यावतारांशकलाविसर्जितावयंजामसर्वेशरणंतमव्ययम्२१नयस्यवध्योनचरक्षणीयोनोपेक्षणीयादरणीयपक्षः॥ अथापिसर्गस्थितिसंयमार्थंधत्तेरजःसत्वतमांसिकाले २२ अयंतुतस्यस्थितिपालनक्षणःसत्वंजुषाणस्यभवायदेहिनाम् ॥ तस्माद्वजामःशरणंजगद्गुरुंस्वानांसनोधास्यतिशंसुरप्रियः २३ श्रीशुकउवाच ॥ इत्याभाष्यसुरान्वेधाःसहदेवैररिंदम ॥ अजितस्यपदंसाक्षाज्जगामतमसःपरम् २४ तत्रादृष्टस्वरूपायश्रुतपूर्वायचाभ्यधात् ॥ स्तुतिमद्भुतदैवीभिर्गीर्भिरत्ववहितेंद्रियः २५ ब्रह्मोवाच॥ अविक्रियंसत्यमनंतमाद्यंगुहाशयंनिष्कलमप्रतर्क्यम् ॥ मनोग्रयाणंवचसानिरुक्तंनमामहेदेववरंवरण्यम् २६ विपश्चितंप्राणमनोधियात्मनामर्थेंद्रियाभासमनिद्रमव्रणम् ॥ छायातपौयत्रनगृध्रपक्षौतमक्षरंखंत्रियुगंव्रजामहे २७

रइतिज्ञापयन् ब्रह्मावेदांतोक्तविशेषणविशिष्टत्वेनस्तौतीत्याह ब्रह्मेति निष्कलंनिष्क्रियंशांतंसत्यंज्ञानमनंतं आत्मावाइदमेकएवाग्रआसीत्हृदयआहितंयन्नैषातर्केणमतिरापनेयानाहिसुज्ञेयमणुरेषधर्मः महद्भूतस्यनिःश्वसितमेतद्यद्ऋग्वेदः विद्यानांप्रथमोवक्तायद्वाचानभ्युदितंयोदेवानांनामधाएकएव तत्सवितुर्वरेण्यमित्यादिश्रुतयःप्रतीकतोग्राह्याः बहुश्रुतिसंग्रहरूपत्वात्पूर्वोत्तरसंबंधोत्रनान्वेषणीयः २६ प्राणमनोधियात्मनांविपश्चितंवेदितारंयःप्राणेतिष्ठन्प्राणस्यप्राणमुतचक्षुषश्चक्षुरित्यादयआत्मनितिष्ठन्नित्यादिअर्थानींद्रियाणिचाभासयतीदंपयतीत्यर्थेंद्रियाभासःअर्थेंद्रियाणांसान्निकर्षंउत्पाद्यतद्विषयंज्ञानंजनयतीत्यर्थः यस्यभासासर्वमिदंविभातियस्ततोभयविच्छेदःएवमस्यामेतंदिवि अनिद्रंअस्वप्नमव्रणंअकायांलिंगशरीररहितंअक्षतंवा । यत्रयस्मिन्हरौगृध्रस्यसर्वकांक्षमाणस्यजीवस्यपक्षौपक्षवद्वर्तमानौपृथक्अधोर्ध्वमार्गहेतू छायातपौअविद्याशास्त्रजन्यविद्यालक्षणौनस्तः छायात्वविद्यासंप्रोक्ताजन्यविद्यातपःस्मृतं जीवगृध्रस्यतौपक्षावधऔर्ध्वपथोःपृथक् तौविष्णोस्तुनविद्यते

नित्यविद्यास्वरूपिणइतिवचनादुक्तएवार्थइति तंत्रियुगंव्रजामहइत्यन्वयः त्रीणियुगानियस्यसतथातंतेप्ववतारादिति स्वयंभूस्वपुगःकृष्णःशाङ्गंदामादरस्तथत्याभधान अक्षात्सभवताहावच्च तद्धचेवाक्षरंब्रह्मखंसुखरूपंज्ञानरूपंवा कंब्रह्मखंवब्रह्म २७ अजस्यविष्णोरधीनंचक्रंपुनःप्रवाहरूपेणपरिवर्तमानत्वाच्चक्रसंज्ञंजगत् यःकेशवोक्षमक्षस्थानीयोयस्यतत्यदक्षमाहुः तमृतंप्रपद्यइत्यन्वयः चक्रंनवृत्तंतदेवर्तमित्यादि । चक्रंचेत्केनचिदीर्यमाणंपरिवर्ततेअस्यकिंप्रेरकमित्यतउक्तं अजयेति कार्यतेह्यवशःकर्मसर्वःप्रकृतिजैर्गुणैरिति अस्यवैलक्षण्यमाह मनोमयमिति कान्यस्याराणीत्य त्राह पंचदशारमिति श्रोत्रादीनिदश शब्दादय पंच पृथिव्यादीनिवा प्राणादयोवापंच एतएवाराणिदलानियस्यतत्तथातत् आशुशीघ्रभ्रमंव्याप्नंवात्रिणाभित्रयोगुणाःसत्वादयोनाभिर्यस्यतत्तथा य दक्षमित्यनेनोक्तंकेशवाधारत्वंस्पष्टयति विद्युद्बलमित्यादिना । विद्युद्विशेषणद्योतमानत्वात् ब्रह्मबलमाधारोयस्यतत्तथा विद्युद्ब्रह्मेत्युपासीत जगच्चक्रस्याक्षभूतोबलरूपश्चकेशवइतिचदेवासु रमनुष्यादयोष्टौनेमिर्यस्यतत्तथातत् २८ इदानींतुरीयमूर्तिनमति यदितिएकोवर्णोयस्यतदेकवर्णं स्वरव्यंजनविभागविवक्षामंतरेणव्यक्तैरेकत्वं अन्यथाषोडशस्वराइतिसंख्यानुपपत्तिःओमित्ये तदक्षरमिदंसर्वं प्रणवंहीश्वरंविद्यात्सर्वस्यहृदयेस्थितं सर्वव्यापिनमोंकारं तमसोज्ञानात्परंतद्रहितमित्यर्थः तुरीयंतत्सर्वदृक् सदाप्रकृतेःपरंवा अक्षरात्परतःपरःकूटस्थोक्षरउच्यतेउत्तमपुरुषः सत्त त्यंज्ञानंअवसादयतिनाशयत्यज्ञानं नानिद्रांनैवचस्वप्नंतुर्यंपश्यंतिनिश्चिताः निर्दोषज्ञानंवाऐकात्म्यप्रत्ययसारं पद्लृगतावितिधातुः अलोकंलोकव्यवहाराविषयं अदृष्टमव्यवहार्यमलक्षणमचिंत्यमव्यपदे श्यंअतएवाव्यक्तंअनंतपारंअंतपारवर्जितं पारंपूरणंसमुदायोमात्राणामितिशेषः अनंतमात्रमित्यर्थइतिवा अमात्रोनंतमात्रश्च धीरायोगरथेनभक्तिपूर्वकध्यानलक्षणरथेनयदुपासतेभजंति ओंकारं

अजस्यचक्रंत्वजयेर्यमाणंमनोमयंपंचदशारमाशु ॥ त्रिणाभिविद्युद्बलमष्टनेमियदक्षमाहुस्तमृतंप्रपद्ये २८ यदेकवर्णंतमसःपरंसदलोकमव्यक्तमनं तपारम् ॥ आसांचकारोपसुपर्णपत्रमुपामतेयोगरथेनधीराः २९ नयस्यकश्चातिपिपर्तिमायांययाजनोमुह्यतिवेदनार्थम् ॥ तंनिर्जितात्मात्मगुणंपरे शंनमामिभूतेषुसमंचरंतम् ३० इमेवयंयत्कृपयैवतन्वासत्त्वेनसृष्टाबहिरंतरंविभो ॥ गतिंनसूक्ष्मामृषयश्चविद्महेकुतोऽसुराद्याइतरप्रधानाः ३१ पादौमहीयंस्वकृतैवयस्यचतुर्विधोयत्राहिभूतसर्गः ॥ सवैमहापूरुषआत्मतंत्रःप्रसीदतांब्रह्ममहाविभूतिः ३२

आत्मैवसंविशत्यात्मनात्मानंयएवंवेद यश्चोपसुपर्णपत्रंसुपर्णपक्षसमीपेजीवाख्यवाहनपृष्ठेआसांचकारउपाविवेश सर्वस्यहृदयास्थितः यआत्मनितिष्ठन्द्वासुपर्णासयुजा २९ जनोयया माययावेदनार्थंज्ञानविषयंहरिंप्रतिज्ञानाख्यपुरुषार्थंवामुह्यतिअनीशयाशोचतिमुह्यमानः कश्चनतामसप्रकृतिर्यस्यतांमायांनातिपिपर्तिनातिक्रमति अत्येतुंसमर्थोनभवति सात्विकश्चेदस्यप्रसादे नजानाति अनादिमायायासुप्तोयदाजीवःप्रबुद्धचते यमेवैषवृणुतेतंनमामीत्यन्वयः नितरांजितआत्माआत्मगुणाश्चयेनसतथातं निवृत्तेःसर्वदुःखानामीशानःप्रभुरव्ययः एकोदेवःसर्वदेवेषुगू ढः सएषसर्वेश्वरः एषसर्वएषोंतर्याम्येवयोनिःसर्वस्य ३० सात्विकानामपिभगवत्कटाक्षवीक्षामंतरेणतज्ज्ञानंदुरापमित्यर्थादुक्तंतत्स्पष्टमाह इमइति विभोयत्कृपयैवयेनसत्वेनगुणे नसृष्टायेनबहिरंतरंचसृष्टाश्चेमेवयंयस्यतवसूक्ष्मांगतिंविश्वव्यापिनींसच्चिदानंदाकृतिनविद्महेयदनुग्रहमंतरेणेतिशेषः नचज्ञानाभावात्तज्ज्ञानाभावइत्याह ऋषयश्चज्ञानिनोपि अन्यथाब्रह्मादीनांअ प्राधान्यंस्यात्कौमुत्यन्यायमाह कुतइति हेतुगर्भविशेषणमाह इतरेति इतरस्तमोगुणःप्रधानायेषांतेतथा ३१ स्वकृतेयंमहीयस्यपादाविवनस्वरूपपादौयत्रयस्यांमह्यांजरायुजादिचतुर्विधोभूतस र्गःसवैसएवप्रसीदतामित्यन्वयः महापुरुषःपुरुषोत्तमः महद्विविधंभवनंयस्यसतथा विविधभवनमेकस्यकथमुपपद्यतइतितत्राह ब्रह्मअपिरिच्छिन्नगुणपूर्णत्वात् अथकस्मादुच्यतेब्रह्मेतिबृहंतोह्यस्मिन् गुणाइतिश्रुतेः पादावित्यनेनपादोस्यविश्वाभूतानीतिश्रुत्युक्तार्थः पातालमेतस्यहिपादमूलमितिस्मृत्युक्तार्थश्चेत्युभयंवक्ष्यतइतिज्ञातव्यं ३२

इदंचैकंमहाविभूतित्वंहरेर्युक्तमित्याह अंभइति त्रयोलोकाअथाखिललोकपालाश्चोदारवीर्यैउत्कृष्टबलंयदंभोयस्परेतोभवतितेनवर्धमानः सिद्धयंतिसिद्धाअवाप्तफलाभवंति जीवंत्युतअंतरमपितृप्तिलक्षणंजीवनमाप्नुवंत्यपिसोर्चतपरंतस्यार्चंतआपोजायंत आपोनाराइतिप्रोक्ताआपोवैनरसूनवः यच्चत्प्रथममृतंतद्वसवउपजीवंतीत्यादिसूर्यसोमयमेंद्रादीन्वासोममहेंद्रादीन्विनान्येखिललोकपालाअद्भिर्जीवंति किंचापांसोमस्यचजीवनप्रदाइंद्राद्याइतीमंविशेषंतुशब्दोज्ञापयति इममेवविशेषंतुशब्देज्ञापयतीतिकुतःअन्यत्किंकनस्यादितीयंशंका सूर्यसोमयमेंद्रादीनृतेन्येलोकपाअपि अद्भिर्जीवंतिसोमाच्चमहेंद्रादीनृतेखिलाः अपांसोमस्यचेंद्राद्याःसर्वेवैजीवनप्रदाइत्यनयापरित्दतेतिज्ञायतेमहतीविभूतिः सूर्यसोमविधिविशेषकल्पकैश्वर्यलक्षणायस्यसतथा एवंविधःकइतितत्राह ब्रह्मेति ३३ योदिवौकसां बलमंधआयुर्वैबलाद्यभिवृद्धिहेतुः यश्चनगानांवृक्षाणांअंकुरजननसामर्थ्यप्रदत्वेनेशः यश्चप्रजानांप्रजनःसुरतानंदगर्भलक्षणहेतुस्तंसोमं यस्यमनःसमामनंतीत्यन्वयःतंदेवानामत्रामेंद्रादीनृक्रतइतिशेषःअथयच्चतुर्थममृतंतन्मरुतःउपजीवंतिसोमेनसुखेनइति सोमंयस्यमनःसमामनंतियोदेवानांबलादिहेतुः यश्चनगानामीशोयश्चप्रजानांप्रजनःसहरिःप्रसीदतांइतिवा सोमेनदेवादिबलप्रदत्वेनमहाविभूतिः सोमोददद्गंधर्वाय सोमःप्रथमः ब्रह्मादेवानांपदवीःकवीनामृषिर्विप्राणांमहिषोमृगाणां श्येनोगृध्राणांस्वधितिर्वनानांसोमःपवित्रमत्येतिरेभन् अथवादेवादिबलप्रदमहाविभूतिः ३४ अग्निर्यस्यमुखंमुखाज्जातः सप्तसुप्रथमेतिपंचम्यर्थेप्रथमा मुखमाश्रित्यवर्ततेच अग्रणीत्वादग्निरित्यग्निशब्दस्यान्यत्रप्रवृत्तिसंभवात्कथंनिर्णयःस्यादितितत्राह जातवेदाइति अ

अंभस्तुयद्रेतउदारवीर्यैसिद्ध्यंतिजीवंत्युतवर्द्धमानाः ॥ लोकास्त्रयोथाखिललोकपालाःप्रसीदतांब्रह्ममहाविभूतिः ३३ सोमंमनोयस्यसमामनंतिदिवौकसांवैबलमंधआयुः ॥ ईशोनगानांप्रजनःप्रजानांप्रसीदतांनःसमहाविभूतिः ३४ अग्निर्मुखंयस्यतुजातवेदाजातःक्रियाकांडनिमित्तजन्मा ॥ अंतःसमुद्रेपचतःस्वधातून्प्रसीदतांनःसमहाविभूतिः ॥ ३५ ॥ यच्चक्षुरासीत्तरणिर्देवयानंत्रयीमयोब्रह्मणएषधिष्ण्यम् ॥ द्वारंचमुक्तेरमृतस्यमृत्योःप्रसीदतां नःसमहाविभूतिः ३६

ग्निर्वाअहमस्मीत्यब्रवीज्जातवेदावाअहमस्मीति जातंसर्ववेत्तीतिजातवेदश्शब्दस्यापिसावकाशत्वेनपूर्वोक्तसंशयानिस्तारःस्यादितितत्राह क्रियाकांडमवेनिमित्तंतत्तथातेनजन्मयस्यसतथा अग्निर्वैदेवानांमुखंहृदयतमइतिश्रुतेःअग्निमुखेनेंद्रादिदेवानां स्वहविर्भागप्राप्त्यर्थमग्निहोत्रादौमथनादिनाअग्नेःप्रसिद्धस्यजन्मोपपत्तिरितितद्वसवउपजीवंति अग्निनैवमुखेनेतिच अग्नेःपाचकत्वशक्तिरपिश्रीहरिनियतेत्यभिप्रायेणाह अंतःसमुद्रेउदरांतःस्थित्वास्वधातून्स्वाधीनानिचतुर्विधान्यन्नानिपचतःजरयतः अन्नमशितंत्रेधाविधीयतेतस्ययःस्थविष्ठोधातुः तत्पुरीषंभवतियोमध्यमस्तन्मांसंयोणुस्तन्मनइति पचाम्यन्नंचतुर्विधमितिसर्वोपकारकाग्निजनकत्वलक्षणमहाविभूतिः तुनावाचोपिहरेर्मुखक्षेत्रमितिसूचयति वाचोवह्नेर्मुखंक्षेत्रमितिस्वोक्तेः ३५ तरणिःसूर्यःयस्यचक्षुषःआसीदित्यन्वयःचक्षोःसूर्योअजायत तरंत्यनेनसंसारंपुरुषाइतितरणिरितिनामसूचितमर्थंस्पष्टमाह देवेति देवानांसंसारंमुक्तागतानांयानंमार्गउत्तरायणमार्गदेवतेत्यर्थः अथोत्तरेणतपसाब्रह्मचर्येणश्रद्धयाविद्ययात्मानमन्विष्यादित्यमभिजायते । त्रय्यामीयतइतित्रयीमयःवेदप्रतिपाद्येषुप्रधानंवा त्रयीमयायत्त्रिगुणात्मधारिणेएषतरणिर्ब्रह्मणःपरमात्मनोधिष्ण्यमभिव्यक्तिस्थानंयश्चासावादित्येध्येयःसदासवितृमंडलमध्यवर्ती । मृत्योःसंसारान्मुक्तेर्द्वारं द्वयोः मुक्तयोःकस्याइतितत्राह अमृतस्येति विदुषांविषयस्येत्यर्थः सयावत्क्षीप्येन्मनस्तावदादित्यंगच्छत्येतयैवस्वलुलोकद्वारंविदुषांप्रपदनंविरोधोविदुषांश्चामृतस्यमुक्तेर्मृत्योश्चप्राप्तिहेतुरितिवा एवंविधमाहात्म्योपेतसूर्यजनकमहाविभूतिः ३६

चराचराणांसहोबलौजोहेतुःस्वयंचताद्गगुणः आधिभौतिकंवायुरध्यात्मंप्राणोयस्यहरेःप्राणात्सहः आदिगुणवदात्मनोभून् आत्मनएषप्राणोजायतेतान्वारिष्टप्राणउवाचमामाहमापद्यथअहमवतत्पच
विधमात्मानंविभज्यैतद्बाणमवष्टभ्यविधारयामीतितेप्रीताः प्राणंस्तुवंत्येषोग्निस्तपत्येषसूर्यःप्राणैकऋषिरत्रिश्चस्यमत्पतिः वयमासाद्यदातारंपितात्वंमातरिश्वनः वयंयंचसंप्राजमन्वास्मवयंप्राणनामानं
चक्रवर्तिनमनुवर्तिमाहवइव प्राणचतुर्मुखयोरेकत्वादिवेत्यन्यत्रावधारणार्थंयथासम्राडेवाधिकृतान्नियुंक्तएतान्ग्रामानधितिष्ठस्वैतान्ग्रामानधितिष्ठस्वेत्येवमेवैषप्राणइतरान्प्राणान्पृथगेवसन्निधत्ते । पायू
पस्थेपानंचक्षुःश्रोत्रेमुखनासिकाभ्यांप्राणःस्वयंप्रतिष्ठितइतिशेषः संप्राजंयंभगवंतमन्वास्मैवेतिवा सर्वोत्तमप्राणजनकमहाविभूतिःप्राणस्यप्राणमुतचक्षुषश्चक्षुः ३७ यस्यश्रोत्रादिशोयस्यहृदयाच्च
खानींद्रियाणियस्यपुरुषस्यनाभेश्चखमाकाशइत्येतेप्रजज्ञिरेइत्यन्वयः अत्रचंद्रमामनसोजातइत्यारभ्यदिशःश्रोत्रादित्यंतंवाक्यंप्रमाणंदर्शयति तैजसाहंकारणगुणव्यंजकहृदयादींद्रियाणीत्यर्थः तै
जसानींद्रियाणित्युक्तेःसहस्रशीर्षापुरुषःप्रसन्नोभवत्वित्यन्वयः प्राणेंद्रियाणिव्याप्यातिष्ठतीतिप्राणेंद्रियात्माब्रह्मणोवाएतानिकरणानिएतत्सर्वंपरेआत्मनिसंप्रतिष्ठतेपृथिवीचेत्यारभ्यप्राणश्चविधारयित
व्यंचेत्यनेनकाठकोपनिषद्वतेनवाक्येनसविस्तरउच्यतेस्वशरीरभूतायाःपृथिव्याबंधुः यस्यपृथिवीशरीरं दिङ्नामदेवतादिसर्जनप्रतीतमहाविभूतिः ३८ गुणगुणिनोरभेदाभिप्रायेणाह बलादिति ब

प्राणादभूद्यस्यचराचराणांप्राणःसहोवैबलमोजश्चवायुः ॥ अन्वास्मसम्राजमिवानुगावयंप्रसीदतांनःसमहाविभूतिः ३७ श्रोत्रादिशोयस्यहृदश्चखा
निप्रजज्ञिरेखंपुरुषस्यनाभेः ॥ प्राणेंद्रियात्मास्वशरीरबंधुःप्रसीदतांनःसमहाविभूतिः ३८ बलान्महेंद्रस्त्रिदशाःप्रसादान्मन्योर्गिरीशोऽशरणाद्विरिंचः ॥ खे
भ्यश्छंदांस्यृषयोमेढ्रतस्तुप्रसीदतांनःसमहाविभूतिः ३९ श्रीर्वक्षसःपितरश्छायायासन्धर्मस्तनादितरःपृष्ठतोभूत् ॥ द्यौर्यस्यशीर्ष्णोप्सरसोविहारा
त्प्रसीदतांनःसमहाविभूतिः ४० विप्रोमुखाद्ब्रह्मचयस्यगुह्यंराजन्यआसीद्भुजयोर्बलंच ॥ ऊर्वोर्विशोंघ्रेरभवंश्चशूद्राःप्रसीदतांनःसमहाविभूतिः ४१ लो
भोधरात्प्रीतिरुपर्यभूद्द्युतिर्नस्तःपशव्यंस्पर्शेनकामः ॥ भ्रुवोर्यमःपक्ष्मभवस्तुकालःप्रसीदतांनःसमहाविभूतिः ४२ द्रव्यंवयःकर्मगुणाश्चशेषंयद्योगमा
याविहताःपतंति ॥ यद्दुर्विभाव्यंप्रबुधावबोधंप्रसीदतांनःसमहाविभूतिः ४३

लादिगुणेभ्यइंद्रादीनामुद्भवःनिर्दोषत्वेनमन्युरहितस्यनमन्युस्वभावस्तादृक्स्वभावरूपीतिसर्जनाभिप्रायादर्शितः कारणगुणः कार्येपुसमवैतीतिन्यायरक्षणार्थंच । अशरणात्स्वाधिष्ठानाल्लयोदधौपृ
थिव्याद्यधिष्ठानाभावात्स्वमहिम्नएवेत्यर्थः किंस्विदासीदधिष्ठानमारंभणेस्वेमहिम्नि धिषणादितिकेचित्पठंति सप्तेंद्रियैःसप्तछंदांसि ऋषयःप्रजापतयः कस्तस्यमेढ्रादित्युक्तेःविरिंचादिदेवजनकमहा
विभूतिः ३९ ४० ४१ उपर्युत्तरोष्टात्प्रीतिःद्युतिःकांतिश्चपशव्यंपशुजीवनं नस्तोनासिकायाःस्पर्शेनगुणेनजातःकामःस्त्रीविषयःकालोमृत्युः ४२ द्रव्यंभूतपंचकं वयआयुर्लक्षणंकर्मत्रिविधंगुणा
भक्त्यादयःशुक्लादयोवाशेषंस्वभावजीवकालादयः यस्यहरेर्योगमायायास्वरूपभूतेच्छयाविहताउपेक्षिताःपतंतिप्रच्युताभवंतीत्यन्वयः द्रव्यंकर्मचकालश्चेति किंच यद्दुर्विभाव्यमेवंविधमितिभावयितु
मशक्यं सवाएषआत्मानेति किंचप्रबुद्धज्ञानिनांअवबोधोज्ञानंयस्मात्तथाअनेनस्वानुग्रहेणस्वविषयज्ञानंसुशकामित्युक्तंभवति अज्ञानांज्ञानदोविष्णुर्यमेवैषवृणुतइत्यादि द्रव्यादिसत्ताप्रदत्वेनब्रह्माद्य
चिंत्यमहिमत्वेनज्ञानदातृत्वेनपरिपूर्णैश्वर्यःप्रसीदतामित्यत्वयः नवत्वसंख्याविशिष्टंद्रव्यंवयगतावितिधातोःवयत्यवगच्छत्यनेननीलोत्पलमित्यादिव्यवहारंपुरुषइतिवयःसमवायः उत्क्षेपणादीनिपंचकर्मा
णि शब्दस्पर्शरूपरसगंधादिचतुर्विंशतिगुणाः सामान्यविशेषौशेषमित्यनेनोच्यते एतेयद्योगमाययाविहताः अहितीकृताःपतंतिपातयंत्यधःपुरुषमितिशेषःनरकहेतवइत्यर्थःविषकंठकणभक्षशंकरोत्रि

दशबलपंचशिखाक्षपादवादान्महदपिसुविचार्यलोकतंत्रंभगवदुपास्तिमृतेनासिद्धिरस्तीतिप्रमितेनायमुक्तार्थइतिसिद्धम् कणादाक्षपादमतज्ञानात्सिद्धिर्माभूदद्वैतज्ञानेनसास्यादितितत्राह यदिति अद्वैतमतोक्तविधयाभावयितुमशक्यंअनेनान्योपिदुर्वादिवादाअपिनिरस्ताइतिज्ञातव्यंकर्मणापुरुषार्थसिद्धिःस्यात्तर्हीतिनेत्याह प्रबुधेतिअनेनभाट्टादिमतमपिप्रत्युक्तम् ४३ उपात्सर्वाधिकाद्विष्णोः शांताआनंदमूर्तयोयासांताःतादृश्यः शक्तयोभार्यायस्यसतथातस्मैनिवृत्तस्पष्टशक्तयइतिच स्वाराज्यलाभःस्वयंप्रकाशमानानंदस्तेनपरिपूरितआत्मायस्यसतथातस्मैनित्याविर्भूतानंदस्वरूपायेत्यर्थः मायया स्वाधीनप्रकृत्यारचितेषुनिर्मितेषुगुणेषुविषयेषुवाप्रवर्तमानायापितद्योग्याभिर्वृत्तिभिर्दुःखलक्षणाभिर्नसज्जमानायनिरवद्यत्वेनदुःखानुभूतिरहितायेत्यर्थः स्वभूतयेस्वयंभुवेस्वरूपपूर्णैश्वर्यायेतिवा ४४ अस्मत्करणगोचरोस्मींदद्रियविषयोभूत्वा ॥ ४५ ॥ भक्तानुकंपामंतरेणतवान्यत्कृत्यंनविद्यतेइत्याशयेनाह तैस्तैरिति ह्येविभोयद्यदानोस्माकंदुर्विषहंसोढुमशक्यंकर्मदुःखलक्षणमसुरादेः स्यादितिशेषःतदाभगवान्स्वयमसुरादेर्दुर्विषहंकर्मपराक्रमलक्षणंकरोतिवाइत्यन्वयःकथंस्वेच्छाकृतैस्तैस्तैरूपैःयदायदाहिधर्मस्येतिस्मृतिर्हिशब्देनगृहीता ॥ ४६ ॥ ज्ञानमेवमुक्तिसाधनंनकर्म तन्मतदूषणादित्यभिप्रायोयदितर्हिकर्मकरणंव्यर्थमित्याशंक्यसत्यंभगवदर्पणाख्यचिकित्साभावेसास्तिचेत्फलवदित्याशयेनाह क्लेशेति विषयार्तानांदेहिनांकर्माणिविफलानिविरुद्धफलान्यनभीष्टफ

नमोस्तुतस्माउपशांतशक्तयेस्वाराज्यलाभपरिपूरितात्मने ॥ गुणेषुमायारचितेषुवृत्तिभिर्नसज्जमानायनमःस्वभूतये ४४ सत्वंनोदर्शयात्मानमस्म
त्करणगोचरः ॥ प्रयतानांदिदृक्षूणांसस्मितंतेमुखांबुजम् ४५ तैस्तैःस्वेच्छाकृतैरूपैःकालेकालेस्वयंविभो ॥ कर्मदुर्विषहंयन्नोभगवान्वैकरोतिहि ४६
क्लेशभूर्यल्पसाराणिकर्माणिविफलानिच ॥ देहिनांविषयार्तानांनतथैवार्पितंत्वयि ४७ नाधमःकर्मकल्पोपिविफलायेश्वरार्पितः ॥ कल्पतेपुरुषस्यैव
वसद्यात्मादयितोहितः ४८ यथाहिस्कंधशाखानांतरोर्मूलावसेचनम् ॥ एवमाराधनंविष्णोःसर्वेषामात्मनश्चहि ४९ नमस्तुभ्यमनंतायदुर्वित
क्यात्मकर्मणे ॥ निर्गुणायगुणेशायसत्त्वस्थायचसांप्रतम् ५० इतिश्रीभागवतेअष्टमस्कंधेपंचमोध्यायः ॥ ५ ॥ ॥ ॥

लानीत्यन्वयःकथंभूरिक्लेशानिअल्पसाराणिच ईश्वरार्पितंकर्मतथाऽनर्पितवद्विफलंनस्यादित्यन्वयः ४७ सांगंकर्मईश्वरार्पितंसफलमस्तुअनंगंकथमितितत्राह नेति पुरुषस्यकर्मकल्पःकर्माभासअंग साकल्येनरहितःअतएवाधमोपियदीश्वरार्पितःतर्हिविफलायनकल्पतेकिंतुफलवानेवस्यादित्यन्वयःतत्राकिंकारणमत्राह सइति यत्मीत्यैकर्मकरोतिसआत्मापरमात्माहितःप्रेक्ष्येष्टकारी दयितो निमित्तबंधुःहियस्मात्तस्मादितिशेषःनाधर्मइतिकेचित्पठंति स्मृत्यविहितःसर्वधर्मान्परित्यज्येत्युक्तेः ४८ ननुपजतेत्यादिविहितकर्मपरित्यज्यभगवदेकाराधनायामितरदेवतातृप्त्यभावेनापुरुषार्थ स्यादितितत्राहयथेतिस्कंधानांशाखानांतृप्तिंजनयतीतिशेषःतेनांकुरफलपुष्पसमृद्धिलक्षणपुरुषार्थोयथाभवतितथासर्वेषांमित्रादीनामात्मनःस्वस्यापितृप्त्यानंदानुभवलक्षणपुरुषार्थःस्यादितिभावः मुखा दिंद्रश्चाग्निश्चेत्यादिवाक्यंहिशब्देनदर्शयतितेनेंद्रादीनांश्रीनारायणशाखिशाखात्वंदर्शितंभवति तथाहीतिवत्यथाहीत्येकंवाक्यं ४९ अनंतायेत्यनेनमुखांबुजमितिपरिच्छिन्नत्वशंकांनिवारयति दुर्वितर्क्यैत्यादिनानस्वरूपस्यानंत्यमपितुतत्कर्मगामप्युच्यतेनिर्गुणायेत्यनेनशबलत्वंनिवारयतिगुणेशायेत्यनेनगुणैःप्रवर्तमानस्यापिगुणसंपर्कप्राप्तंदोषंनिरुणद्धिसत्त्वस्थायेत्यनेनगुणैर्योगपद्यमतीतिं निवारयति सांप्रतमित्यनेनसत्त्वगुणयुक्तत्वंस्थितिकालंचदर्शयति यतस्त्वंसत्त्वगुणप्रवर्तकोधुनातस्मादस्मानापदःपालयेतिचार्थः ५० इतिश्रीभागवतेअष्टमस्कंधेवि०कृ०टीकायांपंचमोध्यायः ॥ ५ ॥

ज्ञानवत्ज्ञानपूर्वकंयथातस्यस्तुतिरपिहरेःप्रीतिजननीत्येतमर्थंप्रपंचयत्यास्मिन्नध्याये तत्रादौहरेराविर्भावप्रकारंवक्ति एवंस्तुत्यादिना ब्रह्माणपुरस्कृत्यातःशेषः १ आत्मानस्वान् जातावेकवचनम् अग्रतःस्थितम् २ ३ अवदातेनपीतेनअवदातोरुणेपीतश्वेतेश्यामेचकथ्यतइति वाससोपलक्षितम् ४ कपोलश्रियायुक्तमुखांबुजम् ५ कलापोभूषणंलक्ष्मलांछनंश्रीवत्सनाम ६ देवप्रवरोब्रह्मा ७ अजायाविष्णवे अजाविष्णुहरच्छागाइत्यतोऽजशब्दस्योभयत्रवृत्तावप्यत्रविष्णुरेवोच्यते सर्वेतिसर्वकारत्वेननिर्देशात्ततोपरत्वमतीतेः जन्मस्थितिसंयमायजन्मादीनांतदेकाधीनत्वात्तथोक्तिः गुणायविज्ञानमानंदंब्रह्मेतिश्रुतेरभिप्रायादुणत्वोक्तिःनिर्वाणसुखार्णवायशरीराभिमानानुत्थसुखसमुद्राय अपरिगण्यमहिम्ने ८ हेपुरुषर्षभ मोक्षादिपुरुषार्थाकांक्षिभिः वैदिकैस्तांत्रिकैश्चयदेतत्तव रूपं हेधातः अमुष्मिन्रूपेयोगेनसहत्रिलोकान्पश्यामि हेविश्वमूर्तेत्वंनःशरणंभवेत्यन्वयः भुवीतिपाठेआधारइत्यर्थः ९ इवयथाघटस्यादिरंतोमध्यंचमृत्स्नाप्रशस्तामृदेवोत्तमकारणं सलिलाद्यवांतरं तथात्वमप्यस्यजगतःआद्यांदिःपरस्मात्परउत्तमहेतुः अत्रमृद्रदुपादानकारणंनब्रह्मकिंतुतदधीनसत्ताकत्वादृष्टांतोपादानमित्याशयेनाह त्वमेवेति स्वशब्देनब्रह्मोपादानकत्वेसर्वस्यचेतनत्वापत्ति

श्रीशुकउवाच ॥ एवंस्तुतःसुरगणैर्भगवान्हरिरीश्वरः ॥ तेषामाविरभूद्राजन्सहस्रार्कोदयद्युतिः १ तेनैवसहसासर्वेदेवाःप्रतिहतेक्षणाः ॥ नापश्यन्खं दिशःक्षोणीमात्मानंचाग्रतोविभुम् २ विरिंचोभगवान्दृष्ट्वासहशर्वेणभारत ॥ स्वच्छंमरकतश्यामंकंजगर्भारुणेक्षणम् ३ तप्तहेमावदातेनलसत्कौशेयवाससा ॥ प्रसन्नचारुसर्वांगंसुमुखंसुंदरभ्रुवम् ४ महामणिकिरीटेनकेयूराभ्यांचभूषितम् ॥ कर्णाभरणनिर्भातकपोलश्रीमुखांबुजम् ५ कांचीकलाप वलयहारनूपुरशोभितम् ॥ कौस्तुभाभरणंलक्ष्मबिभ्रतंवनमालिनम् ६ सुदर्शनादिभिश्चास्त्रैर्मूर्तिमद्भिरुपासितम्॥ तुष्टावदेवप्रवरः सशर्वःपुरुषंपरम् ॥ सर्वामरगणैःसार्धंसर्वांगैरवनिंगतैः ७ ब्रह्मोवाच ॥ अजायजन्मस्थितिसंयमायगुणायनिर्वाणसुखार्णवाय ॥ अणोरणिम्नेपरिगण्यधाम्नेमहानुभावायनमो नमस्ते ८ रूपंतवैतत्पुरुषर्षभेड्यंश्रेयोर्थिभिर्वैदिकतांत्रिकैश्च ॥ योगेनधातःसहनस्त्रिलोकान्पश्याम्यमुष्मिन्भगवन्विश्वमूर्त्तै ९ त्वय्यग्रआसीदिदमात्मतंत्रे त्वमादिरंतोजगतोस्यमध्यम् ॥ घटस्यमृत्स्नेवपरःपरस्मात्त्वमेवचाशेषमशेषनामा १० त्वंमायया त्मात्मश्रयया स्वयेदंनिर्मायविश्वंतदनुप्रविष्टः ॥ पश्यंतियुक्तामनसामनीषिणोगुणव्यवायेप्यगुणंविपश्चितः ११

प्रसंगंसूचयति अयमर्थोत्रविवक्षितइतिकुतोवगतमितितत्राह अशेषेति १० ननुसृष्टिसंहृतिकर्तृत्वात्तदाद्यंतत्वमस्तुमध्यत्वंकथमितितत्राह त्वामिति आत्मैवआश्रयोयस्याः सातथातयाऽतएवस्वया स्वकीयत्वेनाभिमतयामायययाप्रकृत्याइदंविश्वंनिर्मायत्वंतदनुप्रविष्टइतियस्मात्त्वांमध्यंवदंतीतिशेषः तत्सृष्ट्वातदेवानुप्राविशदितिश्रुतिः अत्रकिंमानमितितत्राह पश्यंतीति मनीषिणोबुद्धिमंतोमनसा मननलक्षणविचारेणयुक्ताएवंपश्यंतीतियत्तद्दर्शनंमानमित्यन्वयः नन्वेवंतर्हिगुणसंपर्किणोगुणदोषलेपःस्यात् नस्यादत्रापीदमेवमानमित्याह गुणेति विपश्चितोगुणव्यवायेगुणकार्यसमूहेस्थितमप्य गुणंगुणानिमित्तदोषरहितंत्वांपश्यंतीतिशेषः इतोपिब्रह्मोपादानकारणंनकिंतुनिमित्तमेवेत्याशयेनाह त्वमिति मायायेदंविश्वंनिर्मायतदनुप्रविष्टइतिमनसायुक्तामनीषिणोगुणकार्येजगतिविषयेअगुणंगुण व्यतिरिक्तंकारणंनिमित्तमेवत्वांपश्यंतीत्यन्वयः विपश्चितःपंडिताःदर्शनपटवइत्यर्थः अनेनविद्वद्दर्शनमत्रप्रमाणमितिदर्शितम् ११

गुणकार्यैस्थितंगुणदोषरहितंपश्यंतीत्युक्तंकथंतत्रपश्यंतीतितत्राह यथेति यथाएधआदिष्वग्न्यादिनाधियंतिअधिगच्छंति तथाकवयोबुद्ध्यागुणेषुत्वामवयंतिजानंतीत्यन्वयः उर्व्याउत्खननेसतिअंबुयथा तथाशब्दःसमुच्चयेअमृतंक्षीरंघृतंवाभेदस्यदोषलेपराहित्यस्यचज्ञापनायाग्निनिदर्शनं सर्वस्मात्सारःस्वभक्तमुक्तिदइतिज्ञापनायामृतदृष्टांतः उपजीव्यत्वज्ञापनायात्रंयथेतिभूयस्त्वतापहरत्वदर्शनायां बुयथेति १२ यस्त्वंसर्वोत्तमश्चोपजीव्यत्वादिगुणसंन्नोवयंतंत्वांदृष्ट्वाद्यनिर्वृतिंगताइत्यन्वयः अतिचिरेणकालेनवांछितार्थसमुज्जिहानंविचार्यमाणेसतिसर्वोत्तमंभगवंतंउन्नतीकुर्वाणंदवार्त्तावनवह्नि क्लिष्टाःगांगंगगासंबंधि १३ योर्थोयेषांतेयदर्थाःयत्प्रयोजनाअखिललोकपालावयंतवपादमूलंसमागताःसत्वंतमर्थमस्मभ्यंविधत्स्वेत्यन्वयः तर्हिसोर्थःकइतितत्राहतेबहिरिति हेआत्मन्स्वात्मन्बहिरंतः साक्षिणःतेतवाद्यविज्ञाप्यंकिंचास्तिनकिमपीत्यन्वयः अतोस्मदभीष्टंभवतःसिद्धमित्यर्थः १४ इतोप्यस्माभिर्विज्ञाप्यंनास्तियतोवयंतवकिंकराइतिभावेनाह अहमिति यथाकेतवःज्वालाःअग्नेरुत्पद्यंते तमेवाश्रिताः एवंमदादयः सर्वेत्वदुत्पन्नत्वात्त्वत्किंकराइत्यर्थः किंकरत्वंविशदयति किंवेति ईशसृष्ट्यादिकर्तृत्वेनपृथक्पृथग्विभाताः प्रख्याताावयंकिंवाविधेम कांतवाज्ञांकुर्मःहेद्विजदेवमित्रनोस्माकंत

यथाग्निमेधस्यमृतंचगोषुभुव्यन्नमंबूत्खननेतथोर्व्याः ॥ योगैर्मनुष्याअधियंतिहित्वागुणेषुबुद्ध्याकवयोवयंति १२ तंत्वावयंनाथसमुज्जिहानंसरोजना भातिचिरेप्सितार्थम् ॥ दृष्ट्वागतानिर्वृतिमद्यसर्वेगजादवार्त्ताइवगांगमंभः १३ सत्वंविधत्स्वाखिललोकपालावयंयदर्थास्तवपादमूलम् ॥ समागतास्ते बहिरंतरात्मन्किंवाद्यविज्ञाप्यमशेषसाक्षिणः १४ अहंगिरित्रश्चसुरादयोयेदक्षादयोग्नेरिवकेतवस्ते ॥ किंवाविधेमेशपृथग्विभावितविधत्स्वशंनोद्विज देवमित्र १५ ॥ श्रीशुकउवाच ॥ ॥ एवंविरिंच्यादिभिरीडितस्तद्विज्ञायतेषांहृदयंययैव ॥ जगादजीमूतगभीरयागिराबद्धांजलीन्संवृतसर्वकामा न् १६ एकएवेश्वरस्तस्मिन्सुरकार्येसुरेश्वरः ॥ विहर्तुकामस्तानाहसमुद्रोन्मथनादिभिः १७ ॥ श्रीभगवानुवाच ॥ हंतब्रह्मन्महोशंभोहेदेवाममभाषितम् शृणुतावहिताःसर्वेश्रेयोवःस्याद्यथापुरा १८ यातुधानैश्चदैतेयैस्तावत्संधिर्विधीयताम् ॥ कालेनानुगृहीतैस्तैर्यावद्वोभवआत्मनः १९ अरयोपिहिसंधेयाःसतिकार्यार्थगौरवे ॥ अहिमूषकवद्देवाद्यर्थस्यपदवींगतैः २० अमृतोत्पादनेयत्नःक्रियतामविलंबितम् ॥ यस्यपीतस्यवैजंतुर्मृत्युग्रस्तोमरोभवेत् २१

वाज्ञाकरणलक्षणंशंविधत्स्वइदंकुरुध्वमित्याज्ञापय गिरित्रः सदाशिवः १५ हृदयमभिप्रायंजीमूतोमेघःसंवृतसर्वकामान्अप्रकाशितस्वाभिप्रायान् १६ यतोब्रह्मादयःश्रीनारायणंशरणंप्रापुःतस्मादेकए वेश्वरः सुरकार्यविषयेईश्वरःसमर्थः १७ आरंभेयथायेनविधिनायुष्माकंश्रेयःस्यात्तंविधिं यातुधानैःराक्षसैःअनुगृहीतैःऐकमत्येनगृहीतैर्वआत्मनोयुष्मदात्मनोभवःश्रेयःवृद्धिर्वा १८ १९ हेदेवाःकार्यार्थगौरवेकर्तव्यस्यप्रयोजनस्यगुरुत्वेसतिअर्थस्यप्रयोजनस्यपदवींगतैर्भवद्भिरसुराअरयोपिसंधेयाहीत्यन्वयः । कथमिवअहिमूषकयोरिव । यावन्मयूरसंत्रस्तःसर्पोमूषकवेश्मनि निली यानिर्भयःपश्चाद्भक्षित्वामूषकंगतइतितांत्रिकायां । संतिकार्यार्थगौरवादितिपाठेकार्यार्थगौरवादरयोपिसंधेयाइतिन्यायाःसंतीत्यन्वयः अहिमूषकसंधानमिवसर्पग्राहिणासर्पमूषकौगृहीत्वाफलको ध्वद्वारखर्वमंजूषायांनिहितौ । तत्रोषितःसर्पोमनुतएकमूषिकादनाद्वरमनेनसंधिंकृत्वेतोनिर्याणमिति । मूषकमभाषतहेमूषकोत्रतीभूतमत्फणाग्रेस्थित्वात्वत्कृतफलकरंध्रेणावांनिर्गच्छावततोस्वस्थो स्यावेतितेनतौनिर्गत्यस्थितंमार्जारगीतंमूषकंभक्षयित्वासर्पोप्ययासीदितिकिंवदंती २० अविलंबितंशीघ्रंयस्यशक्त्या । वैशब्देनयोग्यतांसूचयति २१

नेत्रंरज्जुं रज्जौचक्षुषिनेत्रंस्याज्जटायामपिनेतरादित्यभिधानम् २२ २३ इच्छंतिकार्यंसिद्धिमितिशेषःसंधानंवा संरंभेणद्वेषेणकोपेनवा सांत्वयाक्रियया २४ वोयुष्माभिः २५ ते षांपश्यताम् २६ २७ क्ष्वेलोदर्पःसिंहनादोवा । स्वोनायकोयेषांतेतथा २८ २९ ३० तेसुराःदैत्यस्यभृत्याः ३१ संविदंसंधिलक्षणवार्ता ३२ दुर्मदाःदुःसहमदाः ३३ दूरदेशंप्रतिभारोभरणंयस्यसदूरभारोगिरिस्तस्योद्वहोवहनंतेनश्रांताः अपारयंतःपारंगंतुमशक्नुवंतः ३४ ३५ नाम्नागरुडध्वजइतिरूपधारीबभूव ३६ ३७ ३८ सुपर्णोगरुडःजलांतेजलमध्ये । अत्रसुपर्णइतिकथनेनेदंतात्पर्यमवबोद्धव्यं वैवस्वतरैवतमन्वोरंतरयोरमृतमथनमास्ति । तत्रवैवस्वतमन्वंतरेऽनंतनाम्नागरुडेनोढोगिरिःसुपर्णनाम्नोढो रैवतमन्वंतरे । अनंतो

क्षिप्त्वाक्षीरोदधौसर्वौवीरुत्तृणलतौषधीः ॥ मंथानंमंदरंकृत्वानेत्रंकृत्वातुवासुकिम् २२ सहायेनमयादेवानिर्मंथध्वमतंद्रिताः ॥ क्लेशभाजोभविष्यंतिदैत्या यूयंफलग्रहाः २३ यूयंतदनुमोदध्वंयदिच्छंत्यसुराःसुराः ॥ नसंरंभेणसिद्ध्यंतिसर्वेर्थाःसांत्वयायथा २४ नभेतव्यंकालकूटाद्विषाज्जलधिसंभवात् ॥ लोभःकार्योनवोजातुरोषःकामस्तुवस्तुषु २५ ॥ श्रीशुकउवाच ॥ इतिदेवान्समादिश्यभगवान्पुरुषोत्तमः ॥ तेषामंतर्दधेराजन्स्वच्छंदगतिरीश्वरः २६ अथतस्मैभगवतेनमस्कृत्यपितामहः ॥ भवश्चजग्मतुःस्वंस्वंधामचेयुर्बलिंसुराः २७ दृष्ट्वारीनथसंपन्नान्जातक्ष्वेलान्स्वनायकान् ॥ न्यषेधद्दैत्यराड्धैःसंधिविग्रहकालवित् २८ तेवैरोचनिमासीनंगुप्तंचासुरयूथपैः ॥ श्रियापरमयाजुष्टंजिताशेषमुपागमन् २९ महेंद्रःश्लक्ष्णयावाचासांत्वयित्वामहामतिः ॥ अभ्यभाषततत्सर्वंशिक्षितंपुरुषोत्तमात् ३० तेन्वरोचंतदैत्यस्यतत्रान्येयेसुराधिपाः ॥ शंबरोरिष्टनेमिश्चयेचत्रिपुरवासिनः ३१ ततोदेवासुराःकृत्वासंविदंकृतसौहृदाः ॥ उद्यमंपरमंचक्रुरमृतार्थेपरंतप ३२ ततस्तेमंदरगिरिमंजसोत्पाट्यदुर्मदाः ॥ नदंतउदधिंनिन्युःशक्ताःपरिघबाहवः ३३ दूरभारोद्वहश्रांताःशक्रवैरोचनादयः ॥ अपारयंतस्तंवोढुंविवशाविजहुःपथि ३४ निपतन्सगिरिस्तावद्बहूनमरदानवान् ॥ चूर्णयामाससमहताभारेणकनकाचलः ३५ तांस्तथाभग्नमनसोभग्नबाहूरुकंधरान् ॥ विज्ञायभगवांस्तत्रबभूवगरुडध्वजः ३६ गिरिपातविनिष्पिष्टान्विलोक्यामरदानवान् ॥ ईक्षयाजीवयामाससिर्जराव्रिव्रणान्यथा ३७ गिरिंचारोप्यगरुडेहस्तेनैकेनलीलया ॥ आरुह्यप्रययावब्धिंसुरासुरगणैर्वृतः ३८ अवरोप्यगिरिंस्कंधात्सुपर्णःपततांवरः ॥ ययौजलांतउत्सृज्यहरिणासविसर्जितः ३९ ॥ इतिश्रीभागवतेअष्टमस्कंधेमंदराचलनयनेषष्ठोऽध्यायः ॥ ६ ॥ ॥ छ ॥

॥ श्रीशुकउवाच ॥ तेनागराजमामंत्र्यफलभागेनवासुकिम् ॥ परिधायगिरौतस्मिन्नेत्रमब्धिंमुदान्विताः १ ओरभिरेसुरायत्ताअमृतार्थेकुरूद्वह ॥ हरिःपुरस्ताज्जगृहेपूर्वंदेवास्ततोभवन् २ तन्नेच्छन्दैत्यपतयोमहापुरुषचेष्टितम् ॥ नगृह्णीमोवयंपुच्छमहेरंगममंगलम् ३

ढोमंदरस्तुयदावैवस्वतांतरं । अमृतार्थेसुपर्णोढोरैवतस्यांतरेमनोरित्यनेनेतिनिश्चयोक्तेरिति ३९ ॥ इतिश्रीभागवतेविजयध्वजकृतटीकायांअष्टमस्कंधेषष्ठोध्यायः ॥ ६ ॥ ॥ छ ॥ ॥ हालाहलंनामतमोगुणजन्यमन्यथाज्ञानलक्षणंसुरानामराजसाअज्ञानलक्षणाअमृतंनामसात्विकंज्ञानलक्षणंमुक्तिसाधनमित्याद्युत्पत्तिकथनेनमाहात्म्यंस्पष्टयतेत्राध्यायद्वये तत्रादौमथनप्रकारंशास्त्रश्रवणलक्षणं कथयति । तेनागराजेति परिधायवेष्टयित्वा १ देवास्ततःपूर्वमभवन्नित्यन्वयः २ ३

अर्थवादेनाभंगलत्वमुपपादयति स्वाध्यायेति ४ ५ अपोविशज्जलमध्यंप्रविष्टः ६ ७ विघ्नेशेनाधोगतिर्यस्यसतथातंगिरिंकाच्छपंकच्छपस्यविद्यमानम् ८ ९ तस्यगिरेरावर्तनंप
रिभ्रमणंकंडूयनमेनइत्यन्वयः १० तमोगुणप्रवर्तंकंरूपंयस्यसअबोधरूपःतिर्यग्रूपइतिवा ११ १२ आत्मन्यंतः १३ अहींद्रस्यसाहस्रसंख्यांगतानिकरालानिचदिशइवविस्तृ
तानिचमुखान्यहींद्रसाहस्रकरालदिङ्मुखानितेषांनिःश्वासाएवाग्नयःनिःश्वासाग्नयस्तेषांधूमैराहतंवर्चोयेषांतेतथा १४ अंबरंवस्त्रम् कंचुकःकूर्पासकम् १५ १६ कनकपरिधिःकनककांचीकः

स्वाध्यायश्रुतसंपन्नाःप्रख्याताजन्मकर्मभिः ॥ इतितूष्णींस्थितान्दैत्यान्विलोक्यपुरुषोत्तमः ४ स्मयमानोविमृज्याग्रंपुच्छंजग्राहसामरः ॥ कृतस्था
नविभागास्तेएवंकश्यपनंदनाः ५ ममंथुःपरमायत्ताअमृतार्थेपयोनिधिम् ॥ मथ्यमानेऽर्णवेसोद्रिरनाधारोह्यपोविशत् ६ ध्रियमाणोपिबलिभिर्गौरिवा
त्पांडुनंदन ॥ तेसुनिर्विण्णमनसःपरिम्लानमुखश्रियः ॥ आसन्स्वपौरुषेनष्टेदैवेनातिबलीयसा ७ विलोक्यविघ्नेशगतितंदेश्वरोदुरंतवीर्योवितथाभि
संधिः ॥ कृत्वावपुःकाच्छपमद्भुतंमहत्प्रविश्यतोयंगिरिमुज्जहार ८ तमुत्थितंवीक्ष्यकुलाचलंपुनःसमुद्यतानिर्मथितुंसुरासुराः ॥ दधारपृष्ठेनसलक्षयोज
नप्रस्तारिणाद्वीपइवापरोमहान् ९ सुरासुरैर्दैर्भुजवीर्यवेपितंपरिभ्रमंतंगिरिमंगपृष्ठतः ॥ बिभ्रत्तदावर्तनमादिकच्छपोमेनेंगकंडूयनमप्रमेयः १० तथासु
राणांविशदासुरेणरूपेणतेषांबलवीर्यमीरयत् ॥ तद्दीपयन्देवगणांश्चविष्णुर्दैवेननागेंद्रमबोधरूपः ११ उपर्यगेंद्रंगिरिराडिवान्यआक्रम्यहस्तेनसहस्र
बाहुः ॥ तस्थौदिविब्रह्मभवेंद्रमुख्यैरभिष्टुवद्भिःसुमनोभिवृष्टया १२ उपर्यधश्चात्मनिनेत्रगोत्रयोःपरेणतेप्राविशतासमेधिताः ॥ ममंथुरब्धिंतरसामदो
त्कटामहाद्रिणाक्षोभितनक्रचक्रम् १३ अहींद्रसाहस्रकरालदिङ्मुखश्वासाग्निधूमाहतवर्चसोऽसुराः ॥ पौलोमकालीयबलील्वलादयोदवाग्निदग्धाःश
लभाइवापतन् १४ देवांश्चतच्छ्वासशिखाहतप्रभान्धूमांबरस्रग्वरकंचुकाननान् ॥ समभ्यवर्षन्भगवद्वशावनावुःसमुद्रोर्म्युपगूढवायवः १५ मथ्य
मानात्तदासिंधोर्दैवासुरवरूथपैः ॥ यदासुधानजायेतनिर्ममंथाजितःस्वयम् १६ मेघश्यामःकनकपरिधिःकर्णविद्योतविद्युन्मूर्ध्निभ्राजद्विलुलितवनस्र
ग्धरोरक्तनेत्रः ॥ जैत्रैर्दोर्भिर्जगदभयदैर्दंदशूकंगृहीत्वामथ्नन्मन्थ्नाप्रतिगिरिरिवाशोभताथोधृताद्रिः १७ निर्मथ्यमानादुदधेरभूद्विषंमहोल्बणंहा
लहलाह्वमग्रतः ॥ संभ्रांतमीनोन्मकराहिकच्छपोत्तिमिद्विपग्राहतिमिंगिलाकुलात् १८ तदुग्रवेगंदिशिदिशयुपर्यधोविसर्पदुत्सर्पदसह्यवीर्यम् ॥ भीताः
प्रजादुद्रुवुरंगसेश्वराअरक्ष्यमाणाःशरणंसदाशिवम् १९ विलोक्यतंदेववरंत्रिलोक्याभवायदेव्याभियुतंमुनीनाम् ॥ आसीनमद्रावपवर्गहेतोस्तपोजुषाणः
स्तुतिभिःप्रणेमुः २० प्रजाऊचुः ॥ देवदेवमहादेवभूतात्मन्भूतभावन ॥ त्राहिनःशरणापन्नान्त्रैलोक्यदहनाद्विषात् २१

कर्णविद्योतविद्युदितिलुप्तोपमेयमिति कर्णशब्दप्रयोगेनकुंडलद्वयमुपलक्ष्यते तेनैवंयोजनीयम् विशिष्टोद्योतोययोस्तेविद्योते कर्णयोर्विद्योतेविशिष्टदीप्तिनी विद्युद्रूपेइवकुंडलेयस्यसतथा विलुलितावि
चलितावनस्रग्वनमालातांधारयतीतिमूर्ध्निशोभमानविलुलितवनस्रग्धरःदंदशूकंनागेंद्रम् मथनामंदराख्येन १७ उन्मकराःउन्मुखमकराःउत्तिमयः । उत्पततितिमिमत्स्याःसंभ्रांतैर्मीनादिभिःआकुला
दब्धेः १८ दुद्रुवुःशीघ्रंजग्मुः १९ २० २१

२२ यदासर्गादीन्यधत्सेतदाब्रह्माद्याभिधांधत्से २३ सदसद्भावादेवासुरतिर्यंगादयस्तान्भावयत्युत्पादयतिवर्धयतिवशीकरोतिचेति । अतःसदसद्भावभावनंअनेनब्रह्मशिवयोरंतर्यामित्वेनास्थितमेव जगदुत्पत्त्यादिकरोतीतिनिरणायि नानाशक्तिभिःआभासःआसमंताद्भासोभासनंयस्यसतथा २४ शब्दयोनिर्ज्ञप्तिकारणंयस्यसतथा प्राणादिसत्तामदःतत्तत्स्वभावप्रवर्तकः । क्रतुःसत्यकामःसंकल्पप्रवर्तकोवासत्यंसच्चिदानंदरूपंऋतमेकप्रकारंधारकत्वाद्धर्मःयच्चिवृदकारादिवर्णत्रयात्मकंतदक्षरंप्रणवलक्षणंत्वपित्वद्वाचकत्वेनप्रवर्तनइत्यामनंति । ओमित्येकाक्षरमित्यादिवेदांताः २५ अखिलदेवतात्माअखिलदेवताभ्योहविर्भागदाता हेलोकभवजगत्कर्तः अखिलदेवतांतर्यामिणः २६ द्रुहिणस्तवात्मासत्वलक्षणंचित्तम् २७ २८ ईशानःसर्वविद्यानामित्यादिपंचमंत्राःयैर्मंत्रैस्त्रिंशदष्टोत्तरमंत्रवर्गःअष्टत्रिंशत्कलालक्षणोमंत्रसमूहउत्पन्नइतिशेषः यच्छिवाख्यंतद्वस्तुतेवस्थितिरवस्थानंतदनुग्रहादितिशेषः २९ यैःसत्वादिभिः सर्गोभवतितानिसत्वादीनितवनेत्रत्रयं साक्षान्मनुःशास्त्रकृतः तवेक्षा ततोजातः देवर्षिस्तवच्छंदोमयः इच्छातोजातः ३० यच्चवपरंज्योतिःरूपंतद्विरिंच्यादिभिर्गम्यंनसर्वात्मनेतिशेषः निरस्तभेदं नेहनानास्तिकिंचनेतिश्रुतेः ३१ कामाद्यनेकभूत

त्वमेकःसर्वजगतईश्वरोबंधमोक्षयोः ॥ तंत्वामर्चंतिकुशलाःप्रपन्नार्तिहरंगुरुम् २२ गुणमय्यास्वशक्त्यास्यसर्गस्थित्यप्ययान्विभो ॥ धत्सेयदास्वदृक्
भूमन्ब्रह्मविष्णुशिवाभिधाम् २३ त्वंब्रह्मपरमंगुह्यंसदमद्भावभावनम् ॥ नानाशक्तिभिराभासस्त्वमात्माजगदीश्वरः २४ त्वंशब्दयोनिर्जगदादिरात्माप्रा
णेंद्रियद्रव्यगुणस्वभावः ॥ कालःक्रतुःसत्यमृतंचधर्मस्त्वंव्यक्षरंयत्त्रिवृदामनंति २५ अग्निर्मुखंतेखिलदेवतात्माक्षितिंविदुर्लोकभवांघ्रिपंकजम् ॥ कालो
गतिस्तेखिलदेवतात्मनोदिशश्चकर्णौरसनंजलेशः २६ नाभिर्नभस्तेश्वसनंनभस्वान्सूर्यश्चचक्षूंषिजलंस्मरेतः ॥ परावरात्माद्रुहिणस्तवात्मासोमोम
नोद्यौर्भगवन्शिरस्ते २७ कुक्षिःसमुद्रागिरयोस्थिसंघारोमाणिसर्वौषधिवीरुधस्ते ॥ छंदांसिसाक्षात्तवसप्तधातवस्त्रयीमयात्मन्हृदयंसधर्मः २८
मुखानिपंचोपनिषत्तवेशयैस्त्रिंशदष्टोत्तरमंत्रवर्गः ॥ यत्तच्छिवाख्यंपरमात्मतत्त्वंदेवस्वयंज्योतिरवस्थितिस्ते २९ छायात्वधर्मोमृडयैर्विसर्गोनेत्रत्रयंसत्व
रजस्तमांसि ॥ साक्षान्मनुःशास्त्रकृतस्तवेक्षाछंदोमयोदेवऋषिःपुराणः ३० नतेगिरित्राखिललोकपालविरिंचवैकुंठसुरेंद्रगम्यम् ॥ ज्योतिःपरंयत्रज
स्तमश्चसत्वंनयद्ब्रह्मनिरस्तभेदम् ३१ कामाध्वरत्रिपुरकालहराद्यनेकभूतद्रुहःक्षपयतःस्तुतयेनतत्ते ॥ यत्त्वंतकालइदमात्मकृतंस्वनेत्रवह्निस्फुलिंगशिख
याभसितंतवेश ३२ येत्वात्मरामगुरुभिर्हृदिचिंतितांघ्रिद्वंद्वंचरंतमुमयातपसेभितप्तम् ॥ कत्थंतउग्रवपुषंनिरतंश्मशानेतेभूतभूतिमविदस्तवहीनलज्जाः
३३ तत्तस्यतेसदसतोःपरतःपरस्यनांतःस्वरूपगमनेप्रभवंतिभूम्नः ॥ ब्रह्मादयःकिमुतसंस्तवनेवयंतुतत्सर्गसर्गविषयाऋषिभक्तिमात्रम् ३४

हिंसकस्यक्षपयतः संहरतस्तवस्तुतयेतज्जगन्नशक्तं कुतइतितत्राह यदिति । हेईशप्रलयकालतवस्वस्यनेत्रस्यनेत्रवह्नेःस्फुलिंगशिखयाभसितंभक्षितमिदमात्मकृतंजगदितियत्तस्मादित्यन्वयःअत्रहरेतिपदोपादानादियंस्तुतिःश्रीहरिर्विषयेतिज्ञायतेसर्वात्मात्रीयतेहरिरितिवक्ष्यमाणवाक्याच्च तत्रतत्रस्तुतिपदैर्हरिरेवतुतद्गतःस्तूयतेतोयुक्तमेवगुणाधिक्यवचोपितुइतिवचनाच्च ३२ येत्वामुमयोमायाअर्थे तपसेचरंतमतएवाभितप्तंश्मशानेनिरतमतएवोग्रवपुषंघोराकारंकत्थंतेभाषंतेतेतवभूतभूतिंपूर्णैश्वर्यंअविदोनजानंतोऽतएवनिर्लज्जाः ३३ यतस्तवचर्यादुर्बोधातस्मात्सदसतोःपरतःप्रकृतेःपरस्यतस्यभूम्नः
तेस्वरूपगमनेब्रह्मादयोंतर्यामिविषयेविरिंचादयः अन्यत्रसनकादयोनाजःप्रभवंति वयंब्रह्मपुत्राःस्तवनेनप्रभवामइतिकिमुतवयंनतन्निकटवर्तिनोपीत्याह तत्सर्गेति तस्यब्रह्मणःसृष्टिप्रवाहेनिपतिताः
तर्हिक्रियमाणाकेयमितितत्राह भक्तिमात्रमिति अस्मत्स्तुतिर्भक्तिप्रकटनमात्रमित्यर्थः तुशब्दोर्चनाद्योतकः ३४

अव्यक्तकर्मणस्तेव्यक्तिर्लोकस्यमृडनायपालनायेत्येतत्परंकेवलंप्रपश्यामःपरमन्यत्तवप्रयोजनंनपश्यामइत्यन्वयः । हेमहेश्वरपरंतवैतद्रूपंपश्यामः तवांतर्यामिरूपंपरंहरिंनपश्यामः एतद्रूपप्रयोज नमाह मृडनायेति व्यक्तिस्त्रिनेत्रादिलक्षणाकृतिः ३५ ३६ वैशसंनाशलक्षणम् ३७ ३८ पांतिरक्षंति ३९ कृपयतःकृपांकुर्वतः ४० गरंविषम् ४१ भवान्यास्तदात्मार्धत्वाद्विषभोज नंकिंननिवारितमितितत्राह तत्प्रभावज्ञेति ४२ गलेकंठेकलमषंयस्यसतथातस्यविषस्य । स्ववीर्यंस्वरूपभूतवीर्यम् ४३ किंतद्वीर्यमितितत्राह यदिति साधोर्देवस्यभूषणमभूत्तदूषणमित्यर्थः ४४ लोकोपकारार्थमेवविषपानमित्याशयेनाह तप्यंतइति । अनेनकिमस्यप्रयोजनमितितत्राह परमेति ४५ शशंसिरेइत्यनेनरुद्रस्ययशोर्थंहरिणाविषंनपीतमितिज्ञायते । रुद्रस्ययशसोर्थायस्वयं

एतत्परंप्रपश्यामोनपरंतेमहेश्वर ॥ मृडनायहिलोकस्यव्यक्तिस्तेव्यक्तकर्मणः ३५ ॥ श्रीशुकउवाच ॥ तद्वीक्ष्यव्यसनंतासांकृपयाभृशपीडितः ॥ सर्व भूतसुहृद्देवइदमाहसतींप्रियाम् ३६ अहोबतभवान्येतत्प्रजानांपश्यवैशसम् ॥ क्षीरोदमथनोद्भूतात्कालकूटादुपस्थितम् ३७ आसांप्राणपरीप्सूनांविधे यमभयंहिमे ॥ एतावान्हिप्रभोरर्थोयद्दीनपरिपालनम् ३८ प्राणैःस्वैःप्राणिनःपांतिसाधवःक्षणभंगुरैः ॥ बद्धवैरेषुभूतेषुमोहितेष्वात्ममायया ३९ पुं सःकृपयतोभद्रेसर्वात्माप्रीयतेहरिः ॥ प्रीतेहरौभगवतिप्रीयेहंसचराचरः ४० तस्मादिदंगरंभुंजेप्रजानांस्वस्तिरस्तुमे ॥ श्रीशुकउवाच ॥ एवमामं त्र्यभगवान्भवानींविश्वभावनः ४१ तद्विषंजग्धुमारेभेप्रभावज्ञान्वमोदत ॥ ततःकरतलीकृत्यव्यापिहालाहलंविषम् ४२ अभक्षयन्महादेवःकृपयाभू तभावनः ॥ तस्यापिदर्शयामासस्ववीर्यंगलकल्मषः ४३ यच्चकारगलेनीलंतच्चसाधोर्विभूषणम् ४४ तप्यंतेलोकतापेनसाधवःप्रायशोजनाः ॥ पर माराधनंतद्धिपुरुषस्याखिलात्मनः ४५ निशम्यकर्मतच्छंभोर्देवदेवस्यमीढुषः ॥ प्रजादाक्षायणीब्रह्मावैकुंठश्चशशंसिरे ४६ प्रस्कन्नंपिबतःपाणेर्यत्किं चिज्जगृहुःस्मतत् ॥ वृश्चिकाहिविषौषध्योदंदशूकाश्चयेपरे ४७ इतिश्रीभागवतेअष्टमस्कंधेअमृतमंथनेसप्तमोध्यायः ॥ ७ ॥ श्रीशुकउवाच ॥ पीतेगरे वृषांकेणप्रीतास्तेमरदानवाः ॥ ममंथुस्तरसासिंधुंहविर्धानीततोभवत् १ तामग्निहोत्रीमृषयोजगृहुर्ब्रह्मवादिनः ॥ यज्ञस्यदेवपानस्यमेध्यायहविषेट प २ ततउच्चैःश्रवानामहयोभूच्चंद्रपांडुरः ॥ तस्मिन्बलिःस्पृहांचक्रेनेंद्रईश्वराशिक्षया ३ ततऐरावतोनामवारणेंद्रोविनिर्गतः ॥ दंतैश्चतुर्भिःश्वेताभो ह रिस्तंतुसमग्रहीत् ४ ततोभवत्पारिजातःसुरलोकविभूषणः ॥ पूरयत्यर्थिनोयोर्थैःशश्वद्धुवियथाभवान् ५ ततश्चाप्सरसोजातानिष्ककंठ्यःसुवाससः ॥ रमण्यःस्वर्गिणांवल्गुगतिलीलावलोकनैः ६ ततश्चाविरभूत्साक्षाच्छ्रीरमाभगवत्प्रिया ॥ रंजयंतीदिशःकांत्याविद्युत्सौदामनीयथा ७ तस्यांचक्रुःस्पृ हांसर्वेससुरासुरमानवाः ॥ रूपौदार्यवयोवर्णमहिमाक्षिप्तचेतसः ८

विष्णुर्विषंविभुः नसंजग्धेसमर्थोपिवायुंचोचेप्रशांतयइतिवचनाच्च ४६ विषौषध्यःलांगलीप्रभृतयः ४७ ॥ इतिश्रीभागवतेअष्टमस्कंधेविजध्व०टीकायांसप्तमोध्यायः ॥ ७ ॥ १ किमर्थंजगृहु रितितत्राह यज्ञस्येति । हविषेयज्ञस्यदेवानांसोमपानस्यचमेध्याय देवानांसोमपानंयस्मिंस्तथातस्येति २ ३ ४ सुरलोकंविभूषयतीतिसुरलोकविभूषणः ५ निष्कमाभरणविशेषः रमण्यो रमणीयाः ६ रुच्यादिशिश्चद्योतयतीतिविद्युत्साचसौदामनी ७ रूपादिमहिम्ना ८

९ अभिषेचनिकाः अभिषेकयोग्यसाधनानि पंचपवित्राणिगोमयादीनि माधवंस्वकालसंभवम् १० ११ शंखादीनातुमुलःनिःस्वनायेपुततथा १२ १३ १४ १५ वक्रसमस्त नद्वयंचदधती १६ १७ आत्मनःस्वस्यनिर्दोषंगंधर्वादिषुपदंस्थानंपतिलक्षणंस्थानंनान्वविंदतेत्यन्वयः १८ ननुपदमनुपलभ्यकिंपुंश्चलीजातेत्याशंकाश्लोकद्वयेनपरिहरति नूनमिति यस्य तपोस्तितस्यमन्युनिर्जयोनास्तिनूनंनिश्चये नूनंतर्केर्थानिश्चयइत्यभिधानात्इतितर्कयामिवा विधिनोक्तेनमार्गेणकृच्छ्रचांद्रायणादिभिः शरीरशोषणंप्राहुस्तापसास्तपउत्तममिति अनेनऋषितयाना रदादयःप्रतिषिद्धाःकचित्पुंसिज्ञानमस्तितस्यज्ञानंसंगवर्जितंफलस्नेहरहितंनस्यात्नूनमित्यत्राप्यनुकृष्यते अनेनबृहस्पत्यादयोनिषिद्धाः कश्चिद्ब्रह्मातत्रमहानस्तितस्यब्रह्मणःकामनिर्जयोनास्तिप्रजा पतिःस्वांदुहितरंअभ्यध्यायदितिश्रुतेः कस्मैदेवायहविषाविधेमेतिचयःपरतोव्यपाश्रयःपरमन्यमाश्रयतइतिसईश्वरःकिंनैवअननरुद्रादिर्निवारितः १९ तर्हिदंडपाणिःस्यादितितत्राह धर्मइतिकचि त्संयमिन्यांधर्मोस्तितस्यधर्मस्यभूतेषुदयानास्तिनिरनुक्रोशाधिकारमवृत्तत्वात् कचित्कस्मिंश्चित्पुंसिपुण्यलक्षणोधर्मोस्तितस्यप्राणिषुनैवंहदंदुर्लभमितिसामान्यनिषेधोवा तच्चत्यजनंचअर्थिभ्योदेव

तस्याश्वासनमानिन्येमहेंद्रोमहदद्भुतम् ॥ मूर्तिमत्यःसरिच्छ्रेष्ठाहेमकुंभैर्जलंशुचि ९ अभिषेचनिकाभूमिराहरत्सकलौषधीः ॥ गावःपंचपवित्राणिवसं तोमधुमाधवम् १० ऋषयःकल्पयांचक्रुरभिषेकंयथाविधि ॥ जगुर्भद्राणिगंधर्वानार्यश्चननृतुर्जगुः ११ मेघामृदंगपणवमुरुजानकगोमुखान् ॥ व्यना दयन्शंखवेणुवीणातुमुलनिःस्वनान् १२ ततोभिषिषिचुर्देवींश्रियंपद्मकरांसतीम् ॥ दिग्गिभाःपूर्णकलशैःसूक्तवाकैर्द्विजेरितैः १३ समुद्रःपीतकौशे यवाससीसमुपाहरत् ॥ वरुणःस्रजंवैजयंतींमधुनामत्तषट्पदाम् १४ भूषणानिविचित्राणिविश्वकर्माप्रजापतिः ॥ हारंसरस्वतीपद्ममजोनागश्चकुंडले १५ ततःकृतस्वस्त्ययनोत्पलस्रजंनदद्विरेफांपरिगृह्यपाणिना ॥ चचालवक्त्रंसुकपोलकुंडलंसव्रीडहासंदधतीसुशोभनम् १६ स्तनद्वयंचातिकृशोदरी समंनिरंतरंचंदनकुंकुमोक्षितम् ॥ ततस्ततोनूपुरवल्गुसिंजितैर्विसर्पतीहेमलतेवसाबभौ १७ विलोकयंतीनिरवद्यमात्मनःपदंध्रुवंचाव्यभिचारिसद्गुणम् ॥ गंधर्वयक्षासुरसिद्धचारणत्रैविष्टपेशादिषुनान्वविंदत १८ नूनंतपोयस्यनमन्युनिर्जयोज्ञानंक्वचित्तच्चनसंगवर्जितम् ॥ कश्चिन्महांस्तस्यनकामनिर्जयः सईश्वरःकिंपरतोव्यपाश्रयः १९ धर्मःक्वचित्तस्यनभूतसौहृदंत्यागःक्वचित्तच्चनमुक्तिकारणम् ॥ वीर्येनपुंसोस्त्यजवेगनिष्कृतंनाहिद्वितीयोगुणसंगवर्जि तः २० क्वचिच्चिरायुर्नहिशीलमंगलंक्वचित्तदप्यस्तिनवेद्यमायुषः ॥ यत्रोभयंकुत्रचसोप्यमंगलःसुमंगलःकश्चनकांक्षतेहिमाम् २१ श्रीशुकउवाच एवंविमृश्याभिचारिसद्गुणंपदंनिजैकाश्रयिसद्गुणाश्रयम् ॥ वव्रेवरंसर्वगुणैरपेक्षितंरमामुकुंदंनिरपेक्षमीप्सितम् २२

तादिभ्योवान्यायार्जितधनादिदानंत्यागःतच्चमुक्तिकारणंनभवति भगवदर्पणबुद्ध्यानानुष्ठितत्वात्हानोपादानाद्विलक्षणत्यागाधिकारित्वाद्वायुरपिमुक्तिकारणंन मोक्षदस्तुजनार्दनइतिवचनाद्वा अनेनवायुर्लक्ष्यतेक्वचित्पुंसोवीर्यतापादिदुःखनिवारकमस्तितदजवेगनिष्कृतंनकालचक्रविजयिनभवति अनेनचंद्रोनिवारितः क्षीणःक्षीणःप्रविशतीतिवचनात् गुणसंगवर्जितोद्वितीयोनहिहरिंविनेतिशे षः २० क्वचिद्वस्तुनिचिरायुरस्तिचेत्तस्यशीलमंगलंनहिचिरजीविवत् क्वचिद्वस्तुनितच्छीलमप्यस्तितर्ह्यायुषोनवेद्यंआयुर्ज्ञानंदुःशकमित्यर्थः कुत्रचक्वापियत्रयास्मिन्पुंसिउभयमायुःशीलंवसोपिपु मानमंगलःगर्वितः सुमंगलःकश्चनलोकविलक्षणोमुक्तजातीयोमांकांक्षतेयदिसोपिनभवतीतिशेषः २१ एवमिंद्रादीनपिविमृश्यदोषानुक्त्वारमामुकुंदंपरंपदंवव्रेइत्यन्वयः अव्यभिचारिणोनाति व्याप्ताःसंतःअव्याप्यसंभवाख्यदोषरहितागुणालक्षणानियस्यसतथातम् निजाश्चैकाश्रयिणश्चैकस्मिन्नेववर्तमानाश्चसंतश्चतपआदिगुणायेषांतेतथातेषांपुंसामाश्रयंनिजत्वादेकाश्रयित्वमूनिजमात्मीयानि

त्ययोरितितत्तत्सत्ताप्रदत्वेनतदाश्रयत्वंयुक्तं । भक्त्यादिसर्वगुणैरपेक्षितत्वंनत्वन्यथा सौशील्यादिगुणैर्वा काचनकांक्षतइत्यस्यापवादमाह निरपेक्षमिति । तर्हिनकश्चनतस्मिन्नादरंकरोतीतितत्राह ईप्सितमिति एषब्रह्मातिवृद्धस्तत्पतिर्दिनपतिश्चंचलोमातरिश्वादिग्वासानीलकंठस्त्रिदशपतिरसौगर्वितःश्रीयतेब्जः । इत्थंदेव्यादिर्विचेयभ्रमरकुलकलागीतशब्दप्रफुल्लादत्तामालामुरारेःसुरतरुकुसुमालंकृतापातुयुष्मानितिपुराणज्ञाव्याचक्षते २२ तस्यहरेरंसेमालांनिवीयनिधायतस्थावित्यन्वयः । उशतीमिष्टसाधनीभूतांकांतांवा सव्रीडःसचासौहासः व्रीडयासहवर्तमानः सव्रीडहासः । तेनविकसितनयनेनस्वस्याःधामतस्यहरे उरःपश्यतीतिशेषः । भीताशरीरकंपोपेता अयंचशृंगारविशेषः । अनाद्यनंतकालंचविष्णुमेवाश्रितारमा अन्येषांज्ञापनार्थायदोषांनुक्तेतरान्जहावितिवचनात् । अधुनाहरे

तस्यांसदेशउशतींनवकंजमालांमाद्यन्मधुव्रतवरूथगिरोपघुष्टाम् ॥ तस्थौनिवीयनिकटेतदुरःस्वधामसव्रीडहासविकसन्नयनेनभीता २३ स्वस्याःस्त्रिय स्त्रिजगतोजनकोजनन्यावक्षोनिवासमकरोत्परमंविभूतेः ॥ श्रीःस्वप्रजाःसकरुणेननिरीक्षणेनयत्रस्थितैधयतसाधिपतींस्त्रिलोकान् २४ शंखतूर्यमृदंगानांवादित्राणांपृथक्स्वनः ॥ देवानुगानांसस्त्रीणांनृत्यतांगायतामभूत् २५ ब्रह्मरुद्रांगिरोमुख्याःसर्वेविश्वसृजोविभुम् ॥ ईडिरेवितथैर्मंत्रैस्तल्लिंगैःपुष्पवर्षिणः २६ श्रियाविलोकितादेवाःसप्रजापतयःप्रजाः ॥ शीलादिगुणसंपन्नालेभिरेनिर्वृतिंपराम् २७ निःसत्वालोलुपाराजन्निरुद्योगागतत्रपाः ॥ यदाचोपेक्षितालक्ष्म्याबभूवुर्दैत्यदानवाः २८ अथासीद्वारुणीदेवीकन्याकमललोचना ॥ असुराजगृहुस्तांवैहरेरनुमतेनते २९ अथोदधेर्मथ्यमानात्काश्यपैरमृतार्थिभिः॥उदतिष्ठन्महाराजपुरुषःपरमाद्भुतः ३० दीर्घपीवरदोर्दंडःकंबुग्रीवोरुणेक्षणः ॥ श्यामलस्तरुणःस्रग्वीसर्वाभरणभूषितः ३१ पीतवासामहोरस्कःसुमृष्टमणिकुंडलः ॥ नीलकुंचितकेशांतःसुभगःसिंहविक्रमः ३२ अमृतस्यपूर्णकलशंबिभ्रद्वलयभूषितः ॥ सवैभगवतःसाक्षाद्विष्णोरंशांशसंभवः ३३ धन्वंतरिरितिख्यातोआयुर्वेददृगिज्यभाक् ॥ तमालोक्यासुराःसर्वेकलशंचामृताहृतम् ३४ लिप्संतःसर्ववस्तूनिकलशंतरसाहरन् ॥ नीयमानेऽसुरैस्तस्मिन्कलशेऽमृतभाजने ३५ विषण्णमनसोदेवाहरिंशरणमाययुः॥ इतितद्दैन्यमालोक्यभगवान्भृत्यकामकृत् ॥ माखिद्यतमिथोर्भवःसाधयिष्येस्वमायया ३६ मिथःकलिरभूत्तेषांतदर्थेतर्षचेतसाम् ॥ अहंपूर्वमहंपूर्वंनत्वंनत्वामितिप्रभो ३७ देवाःस्वभागमर्हंतियेतुल्यायासहेतवः ॥ सत्र यागइवैतस्मिन्नेषधर्मःसनातनः ३८ इतिस्वान्प्रत्यषेधन्वैदैतेयाजातमत्सराः ॥ दुर्बलाःप्रबलान्राजन्गृहीतकलशान्मुहुः ३९

लक्ष्मीप्राप्तिर्नपूर्वमितिशंकापरिहर्तव्या स्वस्याःस्त्रियःइत्युत्तरश्लोकविशेषणसामर्थ्याच्च २३ ऐधयतअवर्धयत् २४ काहलेगोमुखेतूर्यदुंदुभौचप्रचक्षतइतिच २५ तल्लिंगैःश्रीलक्षणोपेतैःश्रीसूक्तैरित्यर्थः २६ २७ २८ वारुणीसुराभिमानिनीदेवताच २९ काश्यपैर्दैवासुरैःपरममुत्तममद्भुताश्चर्यमाहात्म्यंयस्यसतथा ३० कंबुग्रीवःरेखात्रयांकितगलः ३१ नीलकुंचितकेशांतःनीलकुंचितकेशस्वभावः । अंतस्त्ववसितेमृत्यौस्वभावेपरमात्मनीति ३२ अमृतस्येतिषष्ठीतृतीयार्थे अमृतेनपूर्णकलशमित्यर्थः ३३ इज्यभाक्अमृतलक्षणमाहृतमाहारोयस्मिन्सतथा तेषां सत्याच्चालनार्थहारिर्धन्वंतरिर्विभुः समर्थोप्यसुराणांचस्वहस्तादमुचत्सुधामितिवचनात् दैत्यैर्हरिहस्तादमृतंहृतंनत्वशक्त्वादितिदर्शनरहस्यम् ३४ ३५ ३६ तर्षचेतसांतृष्णायुक्तमनसाम् ३७ यथासत्रयागेसर्वेषांसमानंफलम् ३८ ३९

१ भगवदितरेषु दोषाःसन्ति इतिसर्वेषामन्येषांज्ञापनार्थं तेषुदोषोक्तिर्नतुस्वपतित्वेनप्रसक्तौतन्निराकरणार्थम् इतिभावः ।

४० सुकपोलेनोन्नतनासिकयायुक्तमाननंयस्यतत्तथा ४१ नवयौवननानिष्पदतानश्चलतास्तनयोर्भारेणकृशतनुतरउदरंयस्यतत्तथा मुखपरिमलपुरक्तानानरतानाअलानाभृंगाणांहुंकार णझंकारेणोद्विग्नेभ्रांतेलोचनेयस्यतत्तथा । सुष्ठुशोभनाग्रीवायस्यतत्तथा । शोभनंकंठाभरणंयस्यतत्तथा । शोभनैर्भुजांगदैर्विभूषितम् ४२ ४३ वधूनांविद्यमानावध्वीयातयाशोभयाचित्रं कांच्याचवि त्रम् । प्रविलसच्छोभमानंवा यथावल्गुकर्णरमणीयंतथास्फुटतीशब्दंकुर्वतीचरणनूपुरंयस्यतत्तथा ४४ सव्रीडस्मितेनविक्षिप्तैर्भ्रूविलासैर्युक्तैरवलोकनैःउद्दीपयन्ज्वलयन् ४५ ४६ ४७ ४८

एतस्मिन्नंतरेविष्णुःसर्वोपायविदीश्वरः ॥ योषिद्रूपमनिर्देश्यंदधारपरमाद्भुतम् ४० प्रेक्षणीयोत्पलश्यामंसर्वावयवसुंदरम् ॥ समानकर्णाभरणंसुकपोलो न्नसाननम् ४१ नवयौवननिष्पंदस्तनभारकृशोदरम् ॥ मुखामोदानुरक्तालिझंकारोद्विग्नलोचनम् ४२ बिभ्रत्स्वकेशभारेणमालामुत्फुल्लमल्लिकाम् ॥ सुग्रीवकंठाभरणंसुभुजांगदभूषणम् ४३ विरजांबरसंवीतंचित्रंवध्वीयशोभया ॥ कांच्याप्रविलसद्दल्गुस्फुटच्चरणनूपुरम् ४४ सव्रीडस्मितविक्षिप्तभ्रूवि लासावलोकनैः ॥ दैत्ययूथपचेतःसुकाममुद्दीपयन्मुहुः ४५ तेन्योन्यतःसुधापात्रंहरंतस्त्यक्तसौहृदाः ॥ क्षिपंतोदस्युधर्मेणआयांतींददृशुःस्त्रियम् ४६ अहोरूपमहोधामअहोअस्यानवंवयः ॥ इतितेतामभिद्रुत्यपप्रच्छुर्जातहृच्छयाः ४७ कात्वंकंजपलाशाक्षिकुतोवार्किंचिकीर्षसि ॥ कस्या सिवदवामोरुमथ्नतीवमनांसिनः ४८ नवयंत्वामरैर्दैत्यैःसिद्धगंधर्वचारणैः ॥ स्पृष्टपूर्वांतुजानीमोलोकेशैश्चकुतोनृभिः ४९ नूनंत्वंविधिनासुभ्रुप्रेषिता सिशरीरिणाम् ॥ सर्वेंद्रियमनःप्रीतिंविधातुंसघृणेनकिम् ५० सात्वंनःस्पर्धमानानामेकवस्तुनिभामिनि ॥ ज्ञातीनांबद्धवैराणांशंविधत्स्वसुमध्यमे ५१ वयंकश्यपदायादाभ्रातरःकृतपौरुषाः ॥ विभजस्वयथान्यायंनैवभेदोयथाभवेत् ५२ इत्युपामंत्रितोदैत्यैर्मायायोषिद्वपुर्हरिः ॥ प्रहस्यरुचिरापांगैर्निरीक्ष न्निदमब्रवीत् ५३ श्रीभगवानुवाच ॥ कथंकश्यपदायादाःपुंश्चल्यांमयिसंगताः ॥ विश्वासंपंडिताजातुकामिनीषुनयांतिहि ५४ सालावृकाणांस्त्रीणांच स्वैरिणीनांसुरद्विषः ॥ सख्यान्याहुरनित्यानिनूनंनूनंविचिन्वताम् ५५ श्रीशुकउवाच ॥ इतितेक्ष्वेलितैस्तस्याआश्वस्तमनसोऽसुराः ॥ जहसुर्भावगंभी रंददुश्चामृतभाजनम् ५६ ततोगृहीत्वामृतभाजनंहरिर्बभाषईषत्स्मितशोभयागिरा ॥ यद्यभ्युपेतंकचसाध्वसाधुवाकृतंमयावोविभजेसुधामिमाम् ५७ इत्यभिव्याहृतंतस्याआकर्ण्यासुरपुंगवाः ॥ अप्रमाणविदस्तस्यास्तत्तथेत्यन्वमंसत ५८ अथोपोष्यकृतस्नानाहुत्वाचहविषानलम् ॥ दत्वागोवि प्रभूतेभ्यःकृतस्वस्त्ययनाद्विजैः ५९ यथोपजोषंवासांसिपरिधायाहतानिते ॥ कुशेषुप्राविशन्सर्वेप्राग्ग्रेष्वभिसूषिताः ६० प्राङ्मुखेषूपविष्टेषुसुरेषु दितिजेषुच ॥ धूपामोदितशालायांजुष्टायांमाल्यधूपकैः ६१ तस्यांनेरंद्रकलभोरुलसद्दुकूलश्रोणीतटालसगतिर्मदविह्वलाक्षी ॥ साकूजतीकनकनूपुर सिंजितेनकुंभस्तनीकलशपाणिरथाविवेश ६२ त्वात्वाम् ४९ विधिनाविरिंचेन ५० शंविधत्स्वशंविधानंमनःसंतोषंकुरु ५१ ५२ मायया इच्छयाअंगीकृतस्त्रीदेहः ५३ पुश्चल्यांपुंश्चलीशीलगुणवत्याम् ५४ नूत्नंनूतनम् ५५ क्ष्वेलितैःछलमिश्रवचनैः ५६ अभ्युपेतंअंगीकृतम् ५७ प्रमाणमियत्ता ५८ ५९ ६० ६१ कलभोगजपोतःतत्करवच्छोभमानयोरूर्वोर्लसतादुकूले नयुतंश्रोणितटंयस्याःसा कलभोवंशांकुरस्तद्वद्वर्तमानयोर्वा अलसगतिःअलसामंदागतिर्यस्याःसातथा सिंजितेनशब्दितेन सिंजिअव्यक्तेशब्देइतिधातुः ६२

कनककुंडलचारुकर्णाभ्यांनासाकपोलाभ्यांचयुक्तंवदनंयस्याःसातथाताम् ६३ सुधापयसिदेवान्नेगुणपक्कपयोमृदीतिवचनात् सर्पाणांपयोदानमिवतानुद्दिश्य ६४ आलीश्रोणीस्त्रियांपंक्तिरुभ
योस्ततिरुच्यतइति ६५ उपसंचरैः समीपगमनादिनर्मव्यवहारैः ६६ कृतस्नेहाःछिन्नस्नेहाः कृञ्छेदनइतिधातुः । पूर्वंसंपन्नस्नेहाअधुनानष्टस्नेहाइत्यर्थः ६७ प्रणयस्यापायउपशमनसंभ
वतीतिकातराःभीताः ६८ ६९ ७० ७१ ७२ समादेशादयोयेषांते । तथापिविफलैर्विशिष्टफलैःविकल्पाः । विकल्पयोग्याः अभूवन् । कथंतत्राह तत्रेति तत्रापिहेतुमाह यत्पादेति ।
फलवैकल्पेविशेषणविशिष्टकल्पनार्हाइति ७३ नन्वसुरादीनामपिशिवादिदेवार्चनादिसद्भावात्कथंतैर्विशिष्टफलंनावाप्तमित्याशंक्यश्रीहरिचरणारविंदप्रणामाभावान्नाप्तमित्याशयेनाह यदीति नृ
भिःपुरुषैः । पुरस्तादुच्यतेषुफलदानाभिमुखेषुदेवात्मजादिषुयदर्चनादिकं वित्तादिभिःक्रियते यदितद्ह्यपितदसत्कर्मावैशिष्टफलंनभवति कुतइतितत्राह उच्यतेष्विति । उत्कृष्टफलमुद्दिश्ययत्तेषूपरतेषु

तांश्रीमुखींकनककुंडलचारुकर्णनासाकपोलवदनांपरदेवताख्याम् ॥ संवीक्ष्यसंमुमुहुरुत्स्मितवीक्षणेनदेवासुराविगलितस्तनपट्टिकांताम् ६३ असुरा
णांसुधापानंसर्पाणामिवदुर्नयम् ॥ मत्वाजातिनृशंसानांनतान्व्यभजदच्युतः ६४ कल्पयित्वापृथक्पंक्तीरुभयेषांजगत्पतिः ॥ तांश्चोपवेशयामासस्वासु
स्वासुचपंक्तिषु ६५ दैत्यान्गृहीतकलशोवंचयन्नुपसंचरैः ॥ दूरस्थान्पाययामासजरामृत्युहरंसुरान् ६६ तेपालयंतःसमयमसुराःस्वकृतंनृप ॥ तूष्णी
मासन्कृतस्नेहाःस्त्रीविवादजुगुप्सया ६७ तस्यांकृतातिप्रणयाःप्रणयापायकातराः ॥ बहुमानेनचाबद्धानोचुःकिंचनविप्रियम् ६८ देवलिंगप्रतिच्छ
न्नःस्वभानुर्देवसंसदि ॥ प्रविश्यसोममपिबच्चंद्रार्काभ्यांचसूचितः ६९ चक्रेणक्षुरधारेणजहारपिबतःशिरः ॥ हरिस्तस्यकबंधस्तुसुधयाप्लावितोपतत् ॥
७० शिरस्त्वमरतांनीतमजोग्रहमचीकॢपत् ॥ यस्तुपर्वणिचंद्रार्कावभिधावतिवैरधीः ७१ पीतप्रायेमृतेदेवैर्भगवाँल्लोकभावनः ॥ पश्यतामसुरेंद्राणां
स्वरूपंजगृहेविभुः ७२ एवंसुरासुरगणाःसमदेशकालहेत्वर्थयोगगतयोपिफलेविकल्पाः ॥ तत्रामृतंसुरगणाःफलमंजसापुर्यत्पादपंकजरजःश्रयणान्नदै
त्याः ७३ यद्युद्यतेषुचसुकर्ममनोवचोभिर्देवात्मजादिषुनृभिस्तदसत्पुरस्तात् ॥ तैरेवसद्भवतियात्क्रियतेचतस्मिन्सर्वस्यतद्भवतिमूलनिषेचनंयत् ७४ इति
श्रीभागवतेमहापुराणेअष्टमस्कंधेऽष्टमोध्यायः ॥ ८ ॥ श्रीशुकउवाच ॥ इतिदानवदैतेयानाविंदन्नमृतंनृप ॥ युक्ताःकर्मणियत्ताश्चवासुदेवपराङ्मुखाः
१ साधयित्वामृतंराजन्पाययित्वामृतंसुरान् ॥ पश्यतांसर्वभूतानांययौगरुडवाहनः २

विशिष्टशक्त्यभावादिद्विरावृत्त्यायोजनीयं । तर्हिकथंकारंतद्भवतीतितत्राह तैरिति । यदीत्यनुवर्तते यदितैःपूर्वोक्तैर्वित्तादिभिरेवचास्मिन्नरौयत्कर्मक्रियतेतर्हितत्पूर्णफलंभवतिहरिभक्तिमात्रेणदेवा
द्युद्दिष्टद्रव्यैस्तदर्चनाभावेकथंतत्पूर्णफलंस्यादितितत्राह सर्वस्येति । यन्मूलभूतस्यहरेरर्चनलक्षणं निषेचनंतत्सर्वस्यदेवतादेस्तन्निषेचनफलंभवति । हरिभक्तिमंतरेणशिवाद्यर्चनेनासुराणांविशिष्टफलं
नाभूत्तस्मात्तद्भक्त्याभाव्यमितीदंमुक्तितमसोर्निदर्शनायोक्तमितिज्ञातव्यम्। देहात्मजादिष्वेवमहादराद्धरौतदभावादात्मामहनीयइतिवचनादित्यतोवाह यदीति देहात्मजादिष्वितिकेचित्पठंति तत्रैवंयोज
निका । पुरस्तादेहांतरावाप्तेःपूर्वमेवासन्वित्तादिव्ययएवनान्यइत्यर्थःइति शेषं समं ७४ इतिश्रीभागवतेअष्टमस्कंधेवि०कृ० टीकायांअष्टमोध्यायः ॥८ ॥ भगवत्प्रसादजातेनज्ञानेनपापप्रणाशोभवत्ये
वनान्येनेत्येतन्निदर्शनायदेवासुरयुद्धंवर्णयत्यध्यायद्वयेन । तत्रादौहरेरदर्शनप्रकारमाह इतीति १ ययावदृश्योभूदिति २

३ एधितावाधिताः ४ उदन्वतःसमुद्रस्य रोधसितीरे ५ ६ ७ ८ तेषामारोहसाधनान्याह उष्ट्रैरित्यादिना । द्विजैः पक्षिभिः ९ खड्गमृगविशेषैः अरुणवनसत्त्वावशेषः २० ११ १२ चाहचामर-
पिच्छविरचितचामरैः १३ १४ वीचिमालाभिःपादसांजलजंतूनांवरूथिनीपथा १५ १६ सांग्रामिकंयुद्धसाधनम् १७ १८ १९ २० २१ २२ सोमस्यामृतस्य २३ उत्सिक्तान्ब

सपत्नानांपरामृद्विद्दृष्ट्वाचादितिनंदनाः ॥ अमृष्यमाणाउत्पेतुर्देवान्प्रत्युद्यतायुधाः ३ ततःसुरगणाःसर्वेसुधयापीतयौधिताः ॥ प्रतिसंयुयुधुःशस्त्रैर्नाराय
णपरायणाः ४ तत्रदेवासुरोनामरणःपरमदारुणः ॥ रोधस्युदन्वतोराजन्तुमुलोरोमहर्षणः ५ तत्रान्योन्यंसपत्नास्तेसंरब्धमनसोरणे ॥ समासाद्या
सिभिर्बाणैर्विजघ्नुर्विविधायुधैः ६ शंखतूर्यमृदंगानांभेरीडमरिणांमहान् ॥ हस्त्यश्वरथपत्तीनांनदतांनिःस्वनोभवत् ७ रथिनोरथिभिस्तत्रपत्तिभिः
सहपत्तयः ॥ हयाहयैरिभैश्चेभाःसमसज्जंतसंयुगे ८ उष्ट्रैःकेचिद्द्विजैःकेचिदपरेभिययुःखरैः ॥ केचिद्गौरमृगैर्ऋक्षैर्द्वीपिभिर्हरिभिर्भटाः ९ गृध्रैःकंकै
र्बकैरन्येश्येनभासैस्तिमिंगिलैः ॥ शरभैर्महिषैःखड्गैर्गोवृषैर्गवयारुणैः १० शिवाभिराखुभिःकेचित्कलासैःशशैर्नरैः ॥ वस्तैरेकेकृष्णसारैर्हंसैरन्येचसूकरैः
११ अन्येजलस्थलखगैःसत्त्वैर्विकृतविग्रहैः ॥ सेनयोरुभयोराजन्विविशुस्तेग्रतोग्रतः १२ चित्रध्वजपटैराजन्नातपत्रैःसितामलैः ॥ महाधनैर्वज्रदंडैर्वि
भ्राजन्बर्हिचामरैः १३ वातोद्धूततमोष्णीषैःसत्कृतैर्वर्ममूषणैः ॥ स्फुरद्भिर्विशदैःशस्त्रैःसुतरांसूर्यरश्मिभिः १४ देवदानववीराणांध्वजिन्यौपांडुनंदन ॥ रे
जतुर्वीचिमालाभिर्यादसामिवसागरे १५ वैरोचनिर्बलिःसंख्येसोसुराणांचमूपतिः ॥ यानंवैहायसंनामकामगंमयनिर्मितम् १६ सर्वसांग्रामिकोपेतं
सर्वाश्चर्यमयंप्रभो ॥ अप्रतर्क्यमनिर्देश्यंदृश्यमानमदर्शनम् १७ आस्थितस्तद्विमानाग्र्यंसर्वानीकाधिपैर्वृतः ॥ वालव्यजनछत्राग्र्यैरेजेचंद्रइवोदये १८
तस्यासन्सर्वतोयानैर्यूथानांपतयोसुराः ॥ नमुचिःशंबरोबाणोविप्रचित्तिरयोमुखः १९ द्विमूर्धाकालनाभोथप्रहेतिर्हेतिरिल्वलः ॥ शकुनिर्भूतसंतापो
वज्रदंष्ट्रोविरोचनः २० हयग्रीवःशंकुशिराःकपिलोमेघदुंदुभिः ॥ तारकश्चक्रदृक्शुंभोनिशुंभोजंभउत्कलः २१ अरिष्टोरिष्टनेमिश्चमयश्चत्रिपुराधिपः ॥
अन्येपौलोमकालेयानिवातकवचादयः २२ अलब्धभागाःसोमस्यकेवलंक्लेशभागिनः ॥ सर्वएतेरणमुखेबहुशोनिर्जितामराः २३ सिंहनादांविमुंचंतः
शंखान्दध्मुर्महारवान् ॥ दृष्ट्वासपत्नानुत्सिक्तान्बलभित्कुपितोभृशम् २४ ऐरावतंदिक्करिणमारूढोवियतिस्वराट् ॥ यथास्रवत्प्रस्रवणमुदयाद्रिमहर्प
तिः २५ तस्यासन्सर्वतोदेवानानावाहध्वजायुधाः ॥ लोकपालाःसहगणैर्वाय्वग्निवरुणादयः २६ तेन्योन्यमभिसंसृत्यक्षिपंतोनामभिर्मिथः ॥ आह्व
यंतोविशंतोग्रेयुयुधुर्द्वंद्वयोधिनः २७ युयोधबलिरिंद्रेणतारकेणदिवस्पतिः ॥ वरुणोहेतिनायुध्यन्मित्रोराजन्प्रहेतिना २८ यमस्तुकालनाभेनविश्वकर्मा
मयेनवै ॥ शंबरोयुयुधेत्वष्ट्रासवित्रातुविरोचनः २९

लगर्वितान् २४ स्रवत्प्रस्रवणंच्योतत्प्रस्रावणं च्योतन्मदजलं । अन्यत्रनिरंतरस्यंदमाननिर्झरं अहर्पतिःसूर्यः २५ २६ २७ २८ २९

३० ३१ ३२ ३३ ३४ ३५ ३६ ज्यया मौर्व्या आसंआसनंयत्तद्धनुःतनुत्रंकवचम् ३७ ३८ उद्वृत्तंविपर्यस्तंरहितंवा दच्छदैरोष्ठैःसंप्रास्तृतासछादिता ३९ कबंधाःशिरोरहितदेहाः ४० ४१ ४२

अपराजितेननमुचिरश्विनौवृषपर्वणा ॥ सूर्योबलिसुतैर्देवोबाणज्येष्ठशतेनसः ३० राहुणाचतथासोमःपुलोम्नायुयुधेनलः ॥ निशुंभशुंभयोर्देवीभद्रकालीनराशनी ३१ वृषाकपिस्तुजंभेनमहिषेणविभावसुः॥इल्वलःसहवातापिर्ब्रह्मपुत्रैररिंदमः ३२कामदेवेनदुर्मर्षउत्कलोमादृभिःसह ॥ बृहस्पतिस्तूशनसा नरकेणशनैश्चरः ३३ मरुतोनिवातकवचैःकालेयैर्वसवोऽमराः ॥ विश्वेदेवास्तुपौलोमैरुद्राक्रोधवशैःसह ३४ तएवमाजावसुराःसुरेंद्राद्वंद्वेनसंत्दृत्यचयुद्धचमानाः ॥ अन्योन्यमासाद्यनिजघ्नुरोजसाजिगीषवस्तीक्ष्णशरांश्चचिक्षिपुः ३५ भृशुंडिभिश्चक्रगदार्ष्टिपट्टिशैःशक्त्युल्मुकैःप्रासपरश्वधैरपि ॥ निस्त्रिंशभल्लैःपरिघैःसमुद्गरैःसमिंडिपालैश्चशिरांसिचिच्छिदुः ३६ गजास्तुरंगाःसरथाःपदातयःसारोहवाहाविविधाविखंडिताः ॥ निकृत्तबाहूरुशिरोधरांघ्रयश्छिन्नध्वजज्यासतनुत्रभूषणाः ३७ तेषांपदाघातरथांगचूर्णितादायोधनादुल्बणउच्छ्रितस्तदा ॥ रेणुर्दिशःखंद्युमणिंचछादयन्न्यवर्ततासृक्स्रुतिभिःपरिप्लुतः३८ शिरोभिरुद्वृत्तकिरीटकुंडलैःसंरंभदग्भिःपरिदष्टदच्छदैः ॥ महाभुजैःसाभरणैःसहायुधैःसंप्रास्तृताभूःकरभोरुभिर्बभौ ३९ कबंधास्तत्रचोत्पेतुःपतितैश्चशिरोक्षिभिः ॥ उद्यतायुधदोर्दंडैराधावंतोभटान्मृधे ४० बलिर्महेंद्रंदशभिस्त्रिभिरैरावतंशरैः ॥ चतुर्भिश्चतुरोवाहानेकेनारोहमार्छयत् ४१ सतानापततःशक्रस्तावद्भिःशीघ्रविक्रमः ॥ चिच्छेदनिशितैर्भल्लैरसंप्राप्तान्हसन्निव ४२ तस्यकर्मोत्तमंवीक्ष्यदुर्मर्षःशक्तिमाददे ॥ तांज्वलंतींमहोल्कामांहस्तस्थामच्छिनद्धरिः ४३ ततःशूलंततःप्रासंततस्तोमरमृष्टयः ॥ यद्यच्छस्त्रंसमादद्यात्सर्वंतदच्छिनद्विभुः ४४ ससर्जाथासुरींमायामंतर्धानगतोसुरः ॥ ततःप्रादुरभूच्छैलःसुरानीकोपरिप्रभो ४५ ततोनिपेतुस्तरवोदह्यमानादवाग्निना ॥ शिलाविटंकशिखराश्चूर्णयंतोद्विषद्बलम् ४६ महोरगाःसमुत्पेतुर्दंदशूकाःसदृश्चिकाः ॥ सिंहव्याघ्रवराहाश्चमर्दयंतोमहासुरान् ४७ यातुधान्यश्चशतशःशूलहस्ताविवाससः ॥ छिंधिभिंधीतिवादिन्यस्तथारक्षोगणाविभो ४८ ततोमहाघनाव्योम्निगंभीरपरुषस्वनाः ॥ अंगारान्मुमुचुर्वातैराहताःस्तनयित्नवः ॥ ४९ सृष्टोदैत्येनसुमहान्वह्निःश्वसतसारथिः ॥ सांवर्तक इवात्युग्रोविबुधध्वजिनीमधाक् ५० ततःसमुद्रउद्वेलःसर्वतःप्रत्यदृश्यत ॥ प्रचंडवातैरुद्भूततरंगावर्तभीषणः ५१ एवंदैत्यैर्महामायैरलक्ष्यगतिभीषणैः ॥ सृज्यमानासुमायासुविषेदुःसुरसैनिकाः ५२ नतत्प्रतिविधियत्रविदुर्रुद्रादयोनृप ॥ ध्यातःप्रादुरभूत्तत्रभगवान्विश्वभावनः ५३ ततःसुपर्णांसकृतांघ्रिपल्लवःपिशंगवासानवकंजलोचनः ॥ अदृश्यताष्टायुधबाहुरुल्लसच्छ्रीकौस्तुभानर्घकिरीटकुंडलः ५४

हरिरिंद्रः ४३ ऋष्टयःऋष्टीः ४४ ४५ विटंकशिखराःउन्नतशृंगाःविस्तृतप्राग्रावा ४६ महोरगाअजगराःदंदशूकाःदंशनशीलाःसर्पाः ४७ ४८ स्तनयित्नवः सनिर्घातामेघाः ४९ सांवर्तकःप्रलयाग्निः अधाक्अदहत् ५० उद्वेलःतीरमतिक्रांतः ५१ ५२ यत्रयदातदाध्यातः ५३ ५४

ण्प्रत्ययांतः । अरिःसिंहोवाहोपस्यसतथा इभारिवाहइतिपाठेस्पष्टोर्थः ५६ आहत्यप्राणापित्वांडजेंद्रोगरुडः । आघोहरिरिरिणाचक्रेणनदतोरेःकालनेमेःशिरोच्छिनदित्यन्वयः । अच्छिनदितिक्रिया पदशक्तेर्द्विवारंकालनेम्यादीन्हतवान्हारिरित्येषोर्थोभिविज्ञायते छिदिद्वैधीभावइतिद्वैधीभावश्रवणात् उशनाजीवयामासेत्युत्तरवाक्याच्चद्विवारंहतिरस्तिकालनेम्यादयः सर्वेहरिणानिहताअपि ॥ शुक्रे णोज्जीविताःसंतःपुनस्तेवैनिपातिताइतिवचनाच्चनिश्चितोयमर्थइति ५७॥ इतिश्रीभागवतेअष्टमस्कंधेवि०कृ०टी०नवमोध्यायः ॥९॥ देवासुरयुद्धमुपक्रम्यहरिणाचक्रेणकालनेमेःशिरोच्छिनदित्युपसंहृतंत त्रामरामृताउतपलायिताः विनष्टमरणधर्माणांतेषांविनाशायोगात्पलायनमेवग्राह्यं भगवतानुगृहीतबलानांतदप्ययुक्तंअतस्तैःकिमकारीतितत्राह अथोइति । अनेनहरेरनुग्रहेणैवजयोन्यथापराजयइत्यय

तस्मिन्प्रविष्टेसुरकूटकर्मजामायाविनेशुर्महतांमहीयसि ॥ स्वाप्नोयथाहिःप्रतिबोधआगतेहरिस्मृतिःसर्वविपद्विमोक्षणी ५५ दृष्ट्वामृधेगरुडवाहमिहारि वाहआविद्ध्यशूलमहिनोदथकालनेमिः ॥ तल्लीलयागरुडमूर्ध्निपतद्गृहीत्वातेनाहनन्नृपसवाहमरिंन्यधीशः ५६ मालीसुमाल्यतिबलौयुधिपेततुर्यच्चक्रेण कृत्तशिरसावथमाल्यवांस्तम् ॥ आहत्यतिग्मगदयाहनदंडजेंद्रंतावच्छिरोच्छिनदरेर्नदतोरिणाद्यः ५७ ॥ इतिश्रीभागवतेअष्टमस्कंधेनवमोध्यायः ॥ ९ ॥ ॥ श्रीशुकउवाच ॥ अथोसुराःप्रत्युपलब्धचेतसःपरस्यपुंसःपरयानुकंपया ॥ जघ्नुर्भृशंशक्रसमीरणादयस्तांस्तान्रणेयैरभिसंहताःपुरा १ वैरोचना यसंरब्धोमगवान्पाकशासनः ॥ उदयच्छद्यदावज्रंप्रजाहाहेतिचुक्रुशुः २ वज्रपाणिस्तमाहेदंतिरस्कृत्यपुरःस्थितम् ॥ मनस्विनंसुसंपन्नंविचरंतंमहामृधे ३ नटवन्मूढमायाभिर्मायेशान्नोजिगीषसि ॥ जित्वाबालान्निबद्धाक्षान्नओहरतितद्धनम् ४ आरुरुक्षंतिमायाभिरुत्सिसृक्षंयंतियेदिवम् ॥ तान्दस्यून्वि धुनोम्यज्ञान्पूर्वस्माच्चपदादधः ५ सोहंदुर्मायिनस्तेद्यवज्रेणशतपर्वणा ॥ शिरोहरिष्येमंदात्मन्घटस्वज्ञातिभिःसह ६ ॥ बलिरुवाच ॥ संग्रामेवर्तमा नानांकालनोदितकर्मणाम् ॥ कीर्तिर्जयोऽजयोमृत्युःसर्वेषांस्युरनुक्रमात् ७ तमिमंकालरशनंजनाःपश्यंतिसूरयः ॥ नहृष्यंतिनशोचंतितत्रयूयमपंडि ताः ८ नवयंमन्यमानानामात्मानंतत्रसाधनम् ॥ गिरोवःसाधुशोच्यानांगृह्णीमोमर्मताडनाः ९ ॥ श्रीशुकउवाच ॥ इत्याक्षिप्यविभुंवीरोनाराचैर्वीरमर्द नः ॥ आकर्णपूर्णैरहनदाशुगैराहतंपुनः १० एवंनिराकृतोदेवोवैरिणातथ्यवादिना ॥ नामृष्यत्तदधिक्षेपंतोत्राहतइवद्विपः ११

अर्थःस्पष्टितइतिध्वनयति १ तत्रबलिवासवयोःप्रसक्तंयुद्धंकिमभूदत्राह वैरोचनायेति २ तत्रशत्रुंग्रहरिष्यतायोधेनस्वपौरुषंप्रकाश्यप्रहर्तव्यमितिन्यायमनुसंदधानोवज्रमुद्धृत्यवज्रपाणिस्तंवक्ति वज्रपा णिरिति ३ स्वपौरुषप्रकटनमपिप्रतिभटनिंदापूर्वकमित्यतस्तांनिंदाति जित्वेति । कश्चित्खलइंद्रजालादिनानिबद्धाक्षान्बालान्जित्वानभआकाशंवाच्छाद्यतेषांधनंयथाहरति तथायेमायाभिःकपटमि श्रैस्तैः । दिवंपरलोकमारुरुक्षंति ततोप्युत्सिसृक्ष्यंतिऊर्ध्वंगंतुमिच्छंतिअहंतान्दस्यून्पूर्वस्माच्चक्रवर्तिपदादधोविधुनोमि चशब्दात्ततस्ततोविधूयाधोनिक्षिपामिकदाप्यूर्ध्वदर्शनरहितान्करोमीत्यर्थः । यत्रनार्यपच्यवमुपच्यवंचशिक्षतइत्यत्रयथोपमालुप्तातथात्रापि मायाभिस्तूत्सिसृप्संतमिंद्राद्यामारुरुक्षतः अवदस्यून्रधूनुथाः इत्यृचंप्रमाणयति ४ ५ ६ ७ रशनंरज्जुं ८ तत्रजयादौआत्मानंस्वंका र्ष्णंमन्यमानानांवोगिरः साध्वितिनगृह्णीमः । मर्मण्येवताडनंयासांतास्तथोक्ताः ९ १० ११

१२ १३ १४ १५ १६ १७ १८ १९ २० २१ शताभ्यांशतद्वयेनसंधानयुक्तमोक्षेणमौर्व्यासंधानंततोमोक्षणंचसकृद्युगपदितितत्कर्मकरणमपश्यतामितिशेषः २२ २३ २४ भिन्ननवःभिन्ननावः २५ तुराषाडिद्रःआखंडलस्तुराषाडितिहलायुधः २६ २७ २८ २९ ३० ३१ हरिरिंद्रः आकाशतलेआपतन्महावेगंशूलमिषुभिःसहस्रधानिचिच्छेदेनितरामच्छिनत्कंधरेकंठे शिरहरंश्छिदंस्तमहन

प्राहरत्कुलिशंतस्माअमोघंपरमर्दनम् ॥ सयानोन्यपतद्भूमौछिन्नपक्षइवाचलः १२ सखायंपतितंदृष्ट्वाजंभोबलिसखःसुहृत् ॥ अभ्ययात्सौहृदंसख्युर्हतस्यापिस्वमाचरन् १३ ससिंहवाहआसाद्यगदामुद्यम्यरंहसा ॥ जत्रावताडयच्छक्रंगजंचसुमहाबलः १४ गदाप्रहारव्यथितोभृशंविह्वलितोगजः ॥ जानुभ्यांधरणींस्पृष्ट्वाकश्मलंपरमंययौ १५ ततोरथोमातलिनाहरिर्दशशतैर्वृतः ॥ आनीतोद्विपमुत्सृज्यरथमारुरुहेविभुः १६ तस्यतत्पूजयन्कर्मशत्रोर्दानवसत्तमः ॥ शूलेनज्वलतातंतुस्मयमानोहनन्मृधे १७ सेहेरुजंसुदुर्मर्षंसत्वमालंब्यमातलिः ॥ इंद्रोजंभस्यसंक्रुद्धोवज्रेणापाहरच्छिरः १८ जंभंश्रुत्वाहतंतस्यज्ञातयोनारदादृषेः ॥ नमुचिश्चबलःपाकस्तत्रोपेयुस्त्वरान्विताः १९ वचोभिःपरुषैरिंद्रमर्दयंतोस्यमर्मसु ॥ शरैरवाकिरन्मेघाधाराभिरिवपर्वतम् २० हरीन्दशशतानाजौहर्यश्वस्यबलःशरैः ॥ तावद्भिरर्दयामाससयुगपल्लघुहस्तवान् २१ शताभ्यांमातालिंपाकोरथंसावयवंपृथक् ॥ सकृत्संधानमोक्षेणतदद्भुतमभूद्रणे २२ नमुचिःपंचदशभिःस्वर्णपुंखैर्मर्महेषुभिः ॥ आहत्यव्यनदत्संख्येसतोयइवतोयदः २३ सर्वतःशरकूटेनशक्रंसरथसारथिं ॥ छादयामासुरसुराःप्रावृद्सूर्यमिवांबुदाः २४ अलक्षयंतस्तमतीवविह्वलाविचुक्रुशुर्देवगणाःसहानुगाः ॥ अनायकाःशत्रुबलेननिर्जितावणिक्पथाभिन्नवोयथार्णवे २५ ततस्तुराषाडिषुबद्धपंजराद्विनिर्गतःसाश्वरथध्वजाग्रणीः ॥ बभौदिशःखंपृथिवींविरोचयन्स्वतेजसासूर्यइवक्षपात्यये २६ निरीक्ष्यपृतनांदेवःपरैरभ्यर्दितांरणे ॥ उदयच्छद्विपुंहंतुंवज्रंवज्रधरोरुषा २७ सतेनैवाष्टधारेणशिरसीबलपाकयोः ॥ ज्ञातीनांपश्यतांराजन्जहारजनयन्भयम् २८ नमुचिस्तद्वधंदृष्ट्वाशोकामर्षरुषान्वितः ॥ जिघांसुरिंद्रंनृपतेचकारपरमोद्यमम् २९ अश्मसारमयंशूलंघंटावद्धेमभूषणम् ॥ प्रगृह्याभ्यद्रवत्क्रुद्धोनमुचिर्दानवोत्तमः ३० तदाविद्ध्यमहावीर्योहतोसीतिविसर्जयन् ॥ प्राहिणोद्देवराजायनिनदन्मृगराडिव ३१ तदापतद्गगनतलेमहाजवंनिचिच्छेदेहरिरिषुभिःसहस्रधा ॥ तमाहनन्नृपकुलिशेनकंधेरुषान्वितस्त्रिदशपतिःशिरोहरन् ३२ ततोस्यनत्वचमपिवज्रऊर्जितोविभेदयःसुरपतिनौजसेरितः ॥ तदद्भुतंपरमतिवीर्यवृत्रभित्तिररस्कृतोनमुचिशिरोधरत्वचा ३३ तस्मादिंद्रोबिभेच्छत्रोर्वज्रःप्रतिहतोयतः ॥ किमिदंदैवयोगेनभूतंलोकविमोहनम् ३४ येनमेपूर्वमद्रीणांपक्षच्छेदःप्रजात्यये ॥ कृतोनिविशतांभारैःपतत्रैःपततांभुवि ३५ तपःसारमयंत्वाष्ट्रंवृत्रोयेनविपाटितः ॥ अन्येचापिबलोपेताःसर्वास्त्ररक्षतत्वचः ३६ सोयंप्रतिहतोवज्रोमयामुक्तोसुरेल्पके ॥ नाहंतदाददेदंडंब्रह्मतेजोप्यकारणम् ३७

दित्यन्वयः ३२ ततःकिमभूत्तत्राह ततइति तिरस्कृतोधिक्कृतः ३३ भूतंग्रहलक्षणम् ३४ पतत्रैःपततांभारैः भुविनिविशतामद्रीणाम् ३५ तपःसारंअयामितिपदच्छेदः ३६ ३७

धेवि०क्र०टी०दशमोध्यायः ॥ १० ॥ भगवज्ज्ञानसाधनभक्तिविधानार्थदेवोत्तमरुद्रादिसंभाव्यमहिमावर्ण्यतेस्मिन्नध्याये । तत्रविष्णुशिवयोःसंवादमकारंवक्तुमाह वृषध्वजइति हरिःसुरगणान्सोममपा यपदितियदिदंनिशम्य १ २ सःउमया सोषामविंदत्सस्वासोअग्निसोअर्केणविवबाधेतमांसिसेदभवोपमवथपूषामिद्रश्चमर्त्यइत्यादिवत् ३ हेतुर्निमित्तकारणंअदृष्टादिवत्रेत्याह आत्मेति नजीवइत्याह ईश्वरइति ४ ईश्वरश्चेच्छिवःकिंनतस्यस्वातंत्र्येणोपास्यमानत्वासंभवात् अस्यमोक्षार्थिभिस्तथात्वादित्याह तवेति ५ उपास्यमानमपिशबलंकिंनस्यादितितत्राह त्वंब्रह्मेति । ब्रह्मपदार्थमाह

इतिशक्रंविषीदंतमाहवागशरीरिणी ॥ नायंशुष्कैरथोनार्द्रैर्वधमर्हतिदानवः ३८ मयास्मैयद्वरोदत्तोमृत्युर्नैवार्द्रशुष्कयोः ॥ अतोन्यश्चिंतनीयस्तेउपा योमघवन्नरिपोः ३९ तांदैवींगिरमाकर्ण्यमघवान्सुसमाहितः ॥ ध्यायन्फेनमथापश्यदुपायमुभयात्मकम् ४० नशुष्केणनचार्द्रेणजहारनमुचेः शिरः ॥ तंतुष्टुवुर्मुनिगणामाल्यैश्चावाकिरन्विभुम् ४१ गंधर्वमुख्यौजगतुर्विश्वावसुपरावसू ॥ देवदुंदुभयोनेदुर्नर्तक्योननृतुर्मुदा ४२ अन्येप्येवंप्र तिद्वंद्वान्वाय्वग्निवरुणादयः ॥ सूदयामासुरस्त्रौघैर्मृगान्केसरिणोयथा ४३ ब्रह्मणाप्रेषितोदेवान्देवर्षिर्नारदोनृप ॥ वारयामासविबुधान्दृष्ट्वादानवसंक्षय म् ४४ नारदउवाच ॥ भवद्भिरमृतंप्राप्तंनारायणभुजाश्रयैः ॥ श्रियासमेधिताःसर्वेउपारमतविग्रहाद् ४५ श्रीशुकउवाच ॥ येऽवशिष्टारणेतस्मिन्ना रदानुमतेनते ॥ बलिंविपन्नमादायअस्तंगिरिमुपागमन् ४६ संयम्यमन्युसंरंभमानयंतोमुनेर्वचः ॥ गीयमानाजनुचैर्ययुःसर्वेत्रिविष्टपम् ४७ तत्रापिनष्टावयवान्विद्यमानशिरोधरान् ॥ उशनाजीवयामाससंजीविन्यास्वविद्यया ४८ बलिश्चोशनसास्पृष्टःप्रत्यापन्नेंद्रियस्मृतिः ॥ पराजितोपिना खिद्यल्लोकतत्त्वविचक्षणः ॥ ४९ इतिश्रीभागवतेअष्टमस्कंधेदशमोध्यायः ॥ १० ॥ श्रीशुकउवाच ॥ वृषध्वजोनिशम्येदंयोषिद्रूपेणदानवान् ॥ मो हयित्वासुरगणान्हरिःसोममपाययत् १ वृषमारुह्यगिरिशःसर्वभूतगणैर्वृतः ॥ सहदेव्याययौद्रष्टुंयत्रास्तेमधुसूदनः २ सभाजितोभगवतासादरंसोम याभवः ॥ सूपविष्टउवाचेदंप्रतिपूज्यस्मयन्हरिम् ३ देवदेवजगद्व्यापिन्जगदीशजगन्मय ॥ सर्वेषामेवभावानांत्वमात्माहेतुरीश्वरः ४ तवैवचरणांभोजं श्रेयस्कामानिराशिषः ॥ विसृज्योभयतःसंगंमुनयःसमुपासते ५ त्वंब्रह्मपूर्णममृतंविगुणंविशोकमानंदमात्रमविकारमनन्यदन्यत् ॥ विश्वस्यहेतुरुदय स्थितिसंयमानामात्मेश्वरश्चतदुपेक्षतयानपेक्षः ६

पूर्णमिति । अविनाशिनःपूर्णत्वंयुक्तमित्याह अमृतमिति । अमृतत्वंकुतइतितत्राह विगुणमिति । अतएवविशोकंआनंदमात्रमतोपिशोकोनास्त्यस्यषड्विकाररहितंएतादृशमन्यन्नास्तीत्याह अनन्यदिति स्वगतभेदविवर्जितंवाअन्यज्जगतइतिशेषःसर्वस्माद्भिन्नमित्यर्थः । जगत्कारणस्यतदुदासीनस्यचैकत्वप्रकटनायपुनरुक्तमाह विश्वस्येति । एवंविधंब्रह्मप्रकृत्यादिकमपेक्ष्यापिकर्तुं समर्थइत्याह तदुपेक्षतयेति ६

एतत्कथमितितत्राह एकइति । यथाकुंडलाद्यात्मनाकृतंप्रकृत्यात्मनात्वकृतंस्वर्णमेकमेवेहस्वर्णेवस्तुतोभेदोनास्ति तथासदादिवस्तुष्वस्थित्वातत्तत्स्वभावप्रवर्तकत्वेनसदादिशब्दवाच्यस्त्वमप्येकएव इदमपिसामर्थ्याभावे नयुक्तमथोनिरतिशयसामर्थ्यमस्यावगम्यतइतिभावः स्थानभेदादेकस्यपरमात्मनोभेदकल्पनमज्ञानमूलमित्याह अज्ञानतइति जनैरज्ञानतस्त्वयिविकल्पोभेदोविहितोयस्मात्तस्मादवस्तुभूतइतिशेषः विहतइतिपाठेअज्ञानतस्त्वयिविकल्पइतियस्मात्तस्माद्विहतोनष्टइत्यर्थः भेदकल्पनायांकामाप्तिरितितत्राह गुणेति । गुणानांव्यतिकरोमिथःकार्यार्थसमवायविशेषोयस्मात्सतत्तत्कार्येषुतत्तत्प्रवर्तकत्वेनतत्स्थत्वात्तदाशंकेतिभावः। ननुस्वतोभेदाभावेप्युपाधिभेदात्सस्यादितितत्राह निरुपाधिकइति । उपाधिसद्भावेतद्भेदात्सोस्तीति शंकितुंशक्यते सएवनास्तिआनंदमात्रमितिनिर्धारितत्वात् । पुनर्वचनंमंदाशंकानिवारणार्थमिति ७ एकस्यनानामतविषयत्वंनभिन्नस्येत्याह त्वामिति । केचिद्वेदांतिनःत्वांब्रह्मेत्यवयंत्यवगच्छंतिएकेस्मार्ताःधारकत्वाद्धर्म एकेपौराणिकाःपरेशंत्वांसदसतोःपरंपुरुषं । अन्येपांचरात्रिकाःत्वांविमलोत्कर्षणीज्ञानेत्यादिनवशक्तियुतंपरंवदंति केचिदेकांतिनःत्वामव्ययमात्मतंत्रंमहापुरुषमभिवदंतीत्यन्वयः ८ तद्विषयज्ञानसामग्र्यभावान्नानात्वक

एकस्त्वमेवसदसद्वयमद्वयंचस्वर्णंकृताकृतमिवेहनवस्तुभेदः ॥ अज्ञानतस्त्वयिजनैर्विहितोविकल्पोयस्माद्गुणव्यतिकरोनिरुपाधिकश्च ७ त्वांब्रह्मकेचिदवयंत्युतधर्ममेकएकेपरंसदसतोःपुरुषंपरेशम् ॥ अन्येवदंतिनवशक्तियुतंपरंत्वांकेचिन्महापुरुषमव्ययमात्मतंत्रम् ८ नाहंपरायुरृषयोनमरीचिमुख्या जानंतियाद्विरचितंखलुसत्वसर्गाः ॥ यन्माययामुषितचेतसईशदैत्यमर्त्यादयःकिमुतशश्वदभद्रवृत्ताः ९ सत्वंसमीहसिततःस्थितिजन्मनाशान्भूतेहितं चजगतोभवबंधमोक्षौ ॥ वायुर्यथाविशतिखंचचराचराख्यंसर्वंत्वदात्मकतयावगमोनुतिस्ते १० अवतारामयादृष्टारममाणस्यतेगुणैः ॥ सोयंतद्रष्टुमिच्छामियत्तेयोषिद्वपुर्धृतम् ११ येनसंमोहितादैत्याःपायिताश्चामृतंसुराः ॥ तद्दिदृक्षवजायाताःपरंकौतूहलंहिनः १२ श्रीशुकउवाच ॥ एवमभ्यर्थितोविष्णुर्भगवान्शूलपाणिना ॥ प्रहस्यभावगंभीरंगिरिशंप्रत्यभाषत १३ ॥ श्रीभगवानुवाच ॥ कौतूहलायदैत्यानांयोषिद्वेषोमयाकृतः ॥ पश्यतासुरकार्याणिहृतेपीयूषभाजने १४ तत्तेहंदर्शयिष्यामिदिदृक्षोःसुरसत्तम ॥ तत्कामिनांचमंतव्यंसंकल्पप्रभवोदयम् १५ श्रीशुकउवाच ॥ इतिब्रुवाणोभगवांस्तत्रैवांतरधीयत ॥ सर्वतश्चारयंश्चक्षुर्भवआस्तेसहोमया १६ ततोददर्शोपवनेवरस्त्रियंविचित्रपुष्पारुणपल्लवद्रुमे ॥ विक्रीडतींकंदुकलीलयालसद्दुकूलपर्यस्तनितंबमेखलाम् १७

लपनाइत्याशयेनाह नाहमिति । सत्वसर्गाःसात्विकाःअत्रापिनिमित्तमाह यन्माययेति ९ जन्मस्थित्यादीनांभिन्नकर्तृत्वेननानात्वंकिंनस्यादितितत्राह सत्वमिति । योब्रह्माद्यविज्ञातस्वरूपः । सजगतः स्थितिजन्मनाशान्भूतैरीहितंचबंधमोक्षावपिसमीहसिकरोषिहियस्मात्तस्मान्नानात्मकत्वंभ्रांतिरितिभावः नन्वासुकल्पनास्त्वेकविषयातोन्याकिंतवस्तुतिरितितत्राह वायुरिति । यथावायुःखंचराचराख्यंसर्वंप्रविशति ततोभिन्नश्चतथासर्वस्यत्वदात्मकतयात्वद्व्याप्तत्वेनावगमोज्ञानंतेतवनुतिःस्तुतिःस्यादित्यन्वयः । अनेनधर्मादिप्रवर्तकत्वेनतत्तच्छब्दवाच्यत्वावगमःस्तुतिरित्युक्तंभवति १० तवस्तुत्याकोभिप्रायइतितत्राह अवताराइति अस्तुदृष्टिस्ततः किमिदानीमपेक्षितमितितत्राह सोहमिति ११ १२ १३ १४ संकल्पप्रभवस्यकामस्योदयोयस्माद्वपुषस्तत्तथा तद्वपुःकामिनीनांचमंतव्यमितिप्रयोगोगंतव्यातेवसतिरलकेतिवत्कृद्योगेषष्ठी । चशब्दादकामिनामितिग्राह्यम् १५ १६ लसंतीनितंबेपर्यस्तापरिवृतादुकूलोपरिमेखलायस्याःसातथाताम् १७

आवर्तनोद्वर्तनकंपितस्तनप्रकृष्टहारोरुभरैःपदेपदे ॥ विभज्यमानामिवमध्यतश्चलत्पदप्रवालंनयतींततस्ततः १८ दिक्षुभ्रमत्कंदुकचापलैर्भृशंप्रोद्विग्नतारा
यतलोललोचनाम् ॥ स्वकर्णविभ्राजितलोलकुंडलोल्लसत्कपोलालकमंडिताननाम् १९ श्लथद्दुकूलांकबरींचविच्युतांसनघ्नतींवामकरेणवल्गुना ॥ वि
निघ्नतीमन्यकरेणकंदुकंविमोहयंतींजगदात्ममायया २० तांवीक्ष्यदेवइतिकंदुकलीलयेषद्विडास्फुटस्मितविसृष्टकटाक्षमूढः ॥ स्त्रीप्रेक्षणप्रतिसमीक्षणनिर्वृ
तात्मानात्मानमंतिकउमांस्वगणांश्चवेद २१ तस्याःकराग्रात्सतुकंदुकोयदागतोविदूरंतमनुव्रजंत्याः ॥ वासःसुसूक्ष्मंलघुमारुतोहरद्भवस्यदेवस्यकि
लानुपश्यतः २२ एवंतांरुचिरापांगींदर्शनीयांमनोरमाम् ॥ दृष्ट्वातस्यांमनश्चक्रेविलज्जंत्यांभवःकिल २३ तयापहृतविज्ञानस्तत्कृतस्मरविह्वलः
॥ भवान्याअपिपश्यंत्यागतह्रीस्तत्पदंययौ २४ सातमायांतमालोक्यविवस्त्राव्रीडिताभृशम् ॥ निलीयमानावृक्षेषुहसंतीनान्वतिष्ठत २५ ता
मन्वगच्छद्भगवान्भवःप्रध्यर्थितेंद्रियः ॥ कामस्यचवशंनीतःकरेणुमिवयूथपः २६ सोनुव्रज्यातिवेगेनगृहीत्वानिच्छतींस्त्रियम् ॥ केशबंधउपानीयबाहु
भ्यांपरिषस्वजे २७ सोपगूढाभगवताकरिणाकरिणीयथा ॥ इतस्ततःप्रसर्पंतीविप्रकीर्णशिरोरुहा २८ आत्मानंमोचयित्वांगसुरर्षभभुजांतरात् ॥
प्राद्रवत्सापृथुश्रोणीमायादेवविनिर्मिता २९ तस्यासौपदवींरुद्रोविष्णोरद्भुतकर्मणः ॥ प्रत्यपद्यतकामेनवैरिणाचविनिर्जितः ३० तस्यानुधावतोरेतश्चस्कं
दामोघरेतसः ॥ शुष्मिणोयूथपस्येवबासितामनुधावतः ३१ यत्रयत्रापतन्मह्यांरेतस्तस्यमहात्मनः ॥ तानिरुद्रस्यहेम्नश्चक्षेत्राण्यासन्महीपते ३२
सरित्सरःसुशैलेषुवनेषूपवनेषुच ॥ यत्रक्वचासन्नृषयस्तत्रसन्निहितोहरः ३३ स्कन्नरेतसिसोपश्यदात्मानंदेवमायया ॥ जडीकृतंनृपश्रेष्ठसन्यवर्ततकश्मला
त् ३४ अथावगतमाहात्म्यआत्मनोजगदात्मनः ॥ अपरिज्ञेयवीर्यस्यनमेनेतदुदाहृतम् ३५ तमविक्लवमव्रीडमालक्ष्यमधूसूदनः ॥ उवाचपरमप्रीतो
बिभ्रत्स्वांपौरुषींतनुम् ३६ श्रीभगवानुवाच ॥ दिष्ट्यात्वंविबुधश्रेष्ठस्वांनिष्ठामात्मनास्थितः ॥ यतोदुस्तरयास्वैरंमोहितोस्यंगमायया ३७

नुकूलाभूत् २५ २६ २७ २८ २९ वैरिणापुरुषार्थविरोधिनाविरुद्धप्रेरणावतावा ३० शुष्मिणोवीर्यवतःवासितांमैथुनेच्छावतींकरिणीम् ३१ रुद्रस्यक्षेत्राणिहेम्नश्चक्षेत्राणिस्वर्णीकाराण्यासन् ३२ क्वचय
त्रक्वचसरिदादिषुरेतःक्षेत्रेषुऋषयआसन् तत्रभवश्चसन्निहितोभवत् ३३ ३४ बुद्धिभ्रंशकरंकश्मलंनिवृत्तमितियस्मात्थतस्मात्तदुदाहृतंतांग्राम्योक्तिम् ३५ अविक्लवंस्वस्थंअव्रीडंकामजनकलज्जारहितं
३६ स्वनिष्ठांभक्तिलक्षणां आत्मनामनसा कुतइतितत्राह यतइति ३७

दुरंतेजविराशौकश्चिन्मायांतरेत्वैचित्र्यादितितत्राहऋतेत्वदिति । विषयेविषक्तः येयेविषयपाशबंधकास्तांस्तान्भावान्कश्चिद्धीरः प्रत्यगात्मानमैक्षतेतिश्रुतेःमायातरणपटूनांसद्भावात्कथंकोन्वित्याक्षिप्यतइतितत्राह दुस्तरामिति ३८ मदनुग्रहवतःसुतरेत्याह सेयमितिभागशःएकदेशेनापि ३९ ४० ४१ ४२ ४३ ४४ भागशएकदेशेनापिउत्तमश्लोकस्यहरेर्गुणानुवर्णनंसमस्तसंसारपरिश्रमविनाशनमितियद्यस्मात्तस्मान्निरंतरमेतदनुशृण्वतःकीर्तयतःपुरुषस्यसमुद्यमःसमीचीनःप्रयत्नोजातुनारिष्यतेननश्यति रीङ्क्षये ४५ निरंतरमनुस्मरणार्थंपूर्वोक्तगुणाविशिष्टत्वेनतंश्रीनाराणंनमति असदविषयमिति योभावेनभक्त्यागम्यंप्राप्यंचासतामभक्तानामविषयमंघ्रिंप्रपन्नानमरवर्यान्सिंधोर्मथनोद्भूतममृतमाशयदपाययत्कीदृशःकपटयुवतिवेषः सुरारीन्असुरान्मोह

कोनुमेतितरेन्मायांविषक्तस्त्वदृतेपुमान् ॥ तांस्तान्विसृजतींभावान्दुस्तरामकृतात्मभिः ३८ सेयंगुणमयीमायानत्वामभिभविष्यति ॥ मयासमेताकालेनकालरूपेणभागशः ३९ ॥ श्रीशुकउवाच ॥ एवंभगवताराजन्श्रीवत्सांकेनसत्कृतः ॥ आमंत्र्यतंपरिक्रम्यप्रणःस्वालयंययौ ४० आत्मांशभूतांतांमायांभवानींभगवान्भवः ॥ शंसतामृषिमुख्यानांप्रीत्यातुष्टाभुवाचह ४१ अयिव्यपश्यस्त्वमजस्यमायांपरस्यपुंसःपरदेवतायाः ॥ अहंकलानामृषभोविमुह्ययायावशोन्येकिमुतास्वतंत्राः ४२ यंमामपृच्छस्त्वमुपेत्ययोगात्समाःसहस्रांतउपारतंवै ॥ सएषसाक्षात्पुरुषःपुराणोनयत्रकालोविशतेनवेदः ४३ ॥ श्रीशुकउवाच ॥ इतितेभिहितस्तातविक्रमःशार्ङ्गधन्वनः ॥ सिंधोर्निर्मथनेयेनधृतःपृष्ठेमहाचलः ४४ एतन्मुहुःकीर्तयतोनुशृण्वतोनारिष्यतेजातुसमुद्यमःक्वचित् ॥ यदुत्तमश्लोकगुणानुवर्णनंसमस्तसंसारपरिश्रमापहम् ४५ असदविषयमंघ्रिंभावगम्यंप्रपन्नानमृतममरवर्यानाशयत्सिंधुमथ्यम् ॥ कपटयुवतिवेषोमोहयन्नयःसुरारीन्तमहमुपसृतानांकामपूरंनतोस्मि ४६ ॥इतिश्रीभागवतेअष्टमस्कंधेएकादशोध्यायः ॥११॥ श्रीशुकउवाच ॥ मनुर्विवस्वतःपुत्रःश्राद्धदेवइतिश्रुतः ॥ सप्तमोवर्तमानोयस्तदपत्यानिमेशृणु १ इक्ष्वाकुश्चनभश्चैवधृष्टःशर्यातिरेवच ॥ नरिष्यंतोथनाभागःसप्तमोदिष्ट उच्यते २ करूषश्चपृषध्रश्चदशमोवसुमान्स्मृतः ॥ मनोर्वैवस्वतस्यैतेदशपुत्राःपरंतप ३ आदित्यावसवोरुद्राविश्वेदेवामरुद्गणाः ॥ अश्विनावृभवोराजन्निंद्रस्तेषांपुरंदरः ४ कश्यपोत्रिर्वसिष्ठश्चविश्वामित्रोथगौतमः ॥ जमदग्निर्भरद्वाजइतिसप्तर्षयःस्मृताः ५ अत्रापिभगवज्जन्मकश्यपाददितेरभूत् ॥ आदित्यानामवरजोविष्णुर्वामनरूपधृक् ६ संक्षेपतोमयोक्तानिसप्तमन्वंतराणिते ॥ भविष्याण्यथवक्ष्यामिविष्णोःशक्त्यन्वितानिच ७ विवस्वतश्चद्वेभार्ये विश्वकर्मसुतेउभे ॥ संज्ञाछायाचराजेंद्रयेप्रागभिहितेतव ८ तृतीयावडवानामतासांसंज्ञासुतास्त्रयः ॥ यमोयमीश्राद्धदेवश्छायायाश्चसुताञ्छृणु ९

यन्उपसृतानांशरणंगतानांपुंसांकामपूरंअभीष्टदंतामिमंश्रीनारायणंनतोस्मीत्यन्वयःअनेनैवंविधेभगवतिभक्तिःकर्तव्येतिसिद्धमित्युक्तंभवति ४६ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेवि०कृ०टीकायांएकादशोध्यायः ॥ ११ ॥ प्रासंगिकंसामाप्यावशिष्टश्राद्धदेवादिमनुकथाकथनेनहरेर्माहात्म्यमेववर्णयतिकतिपयैरुत्तरैरध्यायैः तत्रश्राद्धदेवःकस्यपुत्रइतितत्राह मनुरिति १ श्राद्धदेवस्यापत्यानितत्रदेवनामानिसप्तऋषिनामानिहरेरवतारविशेषंचवक्ति इक्ष्वाकुरित्यादिना २ ३ ४ ५ ६ मंदानांप्रमेयविज्ञानार्थंउत्तरमन्वंतराणिप्रतिजानीते भविष्याणीति ७ ८ तासांसंज्ञाछायावडवानांमध्येसंज्ञासुताएतइत्याह यमइति ९

१० ११ १२ बलेरिंद्रपदानंतरंकासिद्धिरितितत्राह दत्वेमामिति पदत्रयंयाचमानायविष्णवेइमांपृथ्वादत्त्वाराड्भासद्धर्मद्रपदाहत्वायाबालस्ततःसिद्धमुक्तमवाप्स्यतात्यन्वयः १३ इदानी
कुत्रास्तइत्यतआह यइति स्वराडिवइंद्रइव १४ १५ स्वयोगतःअच्युतनिष्ठालक्षणयोगान् इदानींकुत्रासतइतितत्राह इदानीमिति १६ स्थानंस्वर्गं १७ १८ १९ अंबुधारायांस्त्रियांये

सावर्णिस्तपतीकन्याभार्यासंवरणस्यया ॥ शनैश्चरस्तृतीयोभूदश्विनौवडवात्मजौ १० अष्टमेअंतरेयातेसावर्णिर्भविताmनुः ॥ निर्मोहविरजस्काद्याःसा
वर्णेरतनयानृप ११ तत्रदेवाःसुतपसोविरजाअमितप्रजाः ॥ तेषाविरोचनसुतोबलिरिंद्रोभविष्यति १२ दत्वेमांयाचमानायविष्णवेयःपदत्रयम् ॥ राद्धर्मि
द्रपदंहित्वाततःसिद्धिमवाप्स्यसि १३ योसौभगवताबद्धःप्रीतेनसुतलेपुनः ॥ निवेशितोधिकेस्वर्गादधुनास्तेस्वराडिव १४ गालवोदीप्तिमान्रामोद्रो
णपुत्रःकृपस्तथा ॥ ऋष्यशृंगःपितास्माकंभगवान्बादरायणः १५ इमेसप्तर्षयस्तत्रभविष्यंतिस्वयोगतः ॥ इदानीमासतेराजन्स्वेस्वेआश्रममंडले
१६ देवगुह्यांसरस्वत्यांसार्वभौमपतिःप्रभुः ॥ स्थानंपुरंदराद्धृत्वाबलमेदास्यतीश्वरः १७ नवमोदक्षसावर्णिर्मनुर्वरुणसंभवः ॥ भूतकेतुर्दीप्तकेतुरित्या
द्यारतत्सुतानृप १८ परामरीचिगर्भाद्यादेवाइंद्रोद्भुतःस्मृतः ॥ द्युतिमत्प्रमुखास्तत्रभविष्यंत्यृषयस्ततः १९ आयुष्मतोंबुधारायामृषभोभगवा
न्किल ॥ भवितायेनसंत्रातोत्रिलोकींभोक्ष्यतेऽद्भुतः २० दशमोब्रह्मसावर्णिरुपश्लोकसुतोमहान् ॥ तत्सुताभूरिषेणाद्याहविष्मत्प्रमुखाद्विजाः २१
तत्रापिजन्मभविताहरेर्विश्वसृजांगृहे ॥ श्रीमूर्तिरितिविख्यातोयेनाप्यायेतवैजगत् २२ हविष्मान्सुकृतःसत्योजयोमूर्तिस्तदाद्विजाः ॥ सुवासनविरुद्धा
द्यादेवाःशंभुःसुरेश्वरः २३ विष्वक्सेनोविषूच्यांतुशंभोःसख्यंकरिष्यति ॥ जातःशांतस्तुभगवान्गृहेविश्वसृजांविभुः २४ मनुर्वैधर्मसावर्णिरेकाद
शमआत्मवान् ॥ अनागतस्तत्सुताश्चसत्यधर्मादयोदश २५ विहंगमाःकामगमानिर्वाणरुचयःसुगः ॥ इंद्रश्चैवधृतिस्तेषामृषयश्चारुणादयः २६ आर्यक
स्यसुतस्तत्रधर्मसेतुरितिस्मृतः ॥ वैधृतायांहरेरंशस्त्रिलोकींधारयिष्यति २७ भवितामेरुसावर्णीराजन्द्वादशमोमनुः ॥ देववानुपदेवश्चदेवश्रेष्ठादयःसु
ताः २८ ऋतधामाचतत्रेंद्रोदेवाश्चहरितादयः ॥ ऋषयश्चतपोमूर्तितपश्चाग्नीध्रकादयः २९ स्वधामाख्योहरेरंशःसाधयिष्यतितन्मनोः ॥ अंत
रंसत्यमहसःसूनृतायाःसुतोविभुः ३० मनुस्त्रयोदशोभाव्योदेवसावर्णिरात्मवान् ॥ चित्रसेनविचित्राद्यादेवसावर्णिदेहजाः ३१ देवाःसुकर्मसुत्रामसं
ज्ञाइंद्रोदिवस्पतिः ॥ निर्मोकतत्त्वदर्शाद्याभविष्यंत्यृषयस्तदा ३२ देवहोत्रस्यतनयउपहर्तादिवस्पतेः ॥ योगेश्वरोहरेरंशोबृहत्यांसंभविष्यति ३३
मनुर्वाइंद्रसावर्णिश्चतुर्दशमएष्यते ॥ जंतुभिरवयाद्याइंद्रसावर्णिवीर्यजाः ३४ विचित्राश्चाक्षुषादेवाःशुचिरिंद्रोभविष्यति ॥ अग्निर्बाहुःशुचिःशुद्धो
मागधाद्यारतपस्विनः ३५ नारायणस्यतनयोबृहद्भानुरतदाहरिः ॥ विनतायांमहाराजक्रियातंतून्नवितायिता ३६

नऋषभेणसंत्रातोऽद्भुतोनामेंद्रः २० २१ २२ २३ शंभोरिंद्रस्यशांतःशांताख्यः २४ अनागतोभविष्यन् २५ २६ २७ २८ २९ ३० ३१ दिवस्पतिःनामा ३२ ३३ ३४ ३५ क्रियातंतून्क्रियास
मुदायान्वितायितावितस्तारंकारयिता ३६

त्रिकालानुगतानिअतीतवर्तमानभविष्यत्संज्ञांस्त्रिकालाननुवर्त्तमानानीतित्रिलोकानुगतानीतिपाठेस्पष्टोर्थः तेतवामितःप्रमाणीकृतः ३७ ॥ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेविज०कृतटीकायांद्वादशोध्यायः ॥ १२ ॥ यथाकथंप्रवृत्तइतिशेषः येइमेमन्वादयोयेनपुरुषेणयस्मिन्कर्मणिनियुक्ताःप्रेरितावर्तंतेतत्सर्वं १ २ कोयंपुरुषइतितत्राह यज्ञादयइति मन्वादिकालमारभ्यतेनयज्ञनाम्नाहरिणाप्रचोदितामन्वादयोजगद्यात्रांजगत्स्थितिंनयंतीत्यन्वयः यतः श्रुतिगणेभ्यःसनातनोधर्मःसिद्धः ऋषयस्तान्श्रुतिगणान्यथावत्तपसापश्यन् ४ ततस्तदुक्तविधिनाहरिणाचोक्तामनवस्तंचतुष्पादंधर्ममद्धासंचारयंति ५ प्रजापालानृपाश्चस्वस्वकालेविभागशोयावदंतंकर्मक्षयपर्यंतंमहींपालयंतीत्यन्वयः ६ ७ सिद्धस्वरूपःज्ञानमुपदिशति ऋषिरूपधरोहरिः कर्मयोगेश्वररूपधृग्योगम् ८ प्रजापतिरूपेणसर्गंकरोतिस्वराड्वपुःक्षत्रवपुःदस्यून्हंतिपृथग्गुणः अयथार्थज्ञानजनकतमोगुणप्रवर्तकः ९ एभिर्ऋष्यादिभिःस्तूयमानोदृश्यतेनामरूपरहितयाअदृश्यत्वादिस्वभावविशिष्टयामायायाअव्यक्तशब्दवाच्ययामोहिता

राजन्चतुर्दशैतानित्रिकालानुगतानिते ॥ प्रोक्तान्येभिर्मितःकल्पोयुगसाहस्रपर्ययः ३७ ॥ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेद्वादशोध्यायः १२ ॥ राजोवाच ॥ मन्वंतरेषुभगवान्यथामन्वादयस्त्विमे ॥ यस्मिन्कर्मणियेयेननियुक्तास्तद्वदस्वमे १ ॥ ऋषिरुवाच ॥ मनवोमनुपुत्राश्चमुनयश्चमहीपते ॥ इंद्राःसुरगणाश्चैवसर्वेपुरुषशासनाः २ यज्ञादयोयाःकथिताःपौरुष्यस्तनवोनृप ॥ मन्वादयोजगद्यात्रांनयंत्याभिःप्रचोदिताः ३ चतुर्युगांतेकालेनग्रस्तान्श्रुतिगणान्यथा ॥ तपसाऋषयोपश्यन्यतोधर्मःसनातनः ४ ततोधर्मंचतुष्पादंमनवोहरिणोदिताः ॥ युक्ताःसंचारयंत्यद्धास्वेस्वेकालेमहींनृपाः ५ पालयंतिप्रजापालायावदंतंविभागशः ॥ यज्ञभागभुजोदेवायेचतत्रानुकीर्तिताः ६ इंद्रोभगवतादत्तांत्रैलोक्यश्रियमूर्जिताम् ॥ भुंजानःपातिलोकांस्त्रीन्कामंलोकेप्रवर्षति ७ ज्ञानंचात्युर्युगंब्रूतेहरिःसिद्धस्वरूपधृक् ॥ ऋषिरूपधरःकर्मयोगंयोगेशरूपधृक् ८ सर्वंप्रजेशरूपेणदस्यून्हंतिस्वराड्वपुः ॥ कालरूपेणसर्वेषामभवायपृथग्गुणः ९ स्तूयमानोजनैरेभिर्मायायानामरूपया ॥ विमोहितात्मभिर्नानादर्शनैर्नचदृश्यते १० एतत्कल्पविकल्पस्यप्रमाणंपरिकीर्तितम् ॥ यत्रमन्वंतराण्याहुश्चतुर्दशपुराविदः ११ ॥ ॥ इतिश्रीभागवतेऽष्टमस्कंधेत्रयोदशोध्यायः ॥ १३ ॥ ॥ ७ ॥ ॥ राजोवाच ॥ बलेःपदत्रयंभूमेःकस्माद्धरिरयाचत ॥ भूतेश्वरःकृपणवल्लब्धार्थोपिबबंधतम् १ एतद्वेदितुमिच्छामोमहत्कौतूहलंहिनः ॥ याञ्चेश्वरस्यपूर्णस्यबंधनंवाप्यनागसः २ ॥ श्रीशुकउवाच ॥ पराजितश्रीरसुभिश्चहापितइंद्रेणराजन्भृगुभिःसजीवितः ॥ सर्वात्मनातानभजद्भृगून्बलिःशिष्योमहान्स्वार्थनिवेदनेन ३ तंब्राह्मणाभृगवःप्रीयमाणाअयाजयन्विश्वजितात्रिलोकम् ॥ जिगीषमाणंविधिनाभिषिच्यमहाभिषेकेणमहानुभावाः ४

त्मभिःजनैःकल्पितैर्नानादर्शनैरद्वैतादिनानाविधशास्त्रैर्नदृश्यतेनज्ञायते चशब्दाद्वैतज्ञानेनदृश्यतइतिग्राह्यं अन्यमीशस्यमहिमानमितिवीतशोकइतिश्रुतेः १० उपसंहरति एतदिति पुराविदोयत्रयस्मिन्कल्पेचतुर्दशमन्वंतराण्याहुस्तस्यकल्पस्यैतत्प्रमाणमुक्तं यस्मिन्वांतरमन्वंतराण्याहुस्तस्यविकल्पस्यैतत्प्रमाणंपरिकीर्तितंशास्त्रांतरइतिशेषः इतिकल्पविकल्पस्यकल्पभेदस्येतिवा ११ ॥ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेवि०कृतटीकायांत्रयोदशोध्यायः ॥ १३ ॥ लब्धार्थःस्वीकृतत्रैलोक्यः १ पूर्णस्यईश्वरस्ययाच्ञाअनागसोबलेर्बंधनंयत्एतत् २ असुभिःप्राणैर्हापितोविजितःस्वार्थनिवेदनेनसर्वस्वसमर्पणेनअभीष्टार्थविज्ञापनेनवातान्भृगून्सर्वात्मनाअभजत् ३ विश्वजितासर्वस्वदाक्षिणात्मनायागेन महाभिषेकेणमंत्रपूतस्नानविशेषेण ४

हर्यश्वस्यइंद्रस्यतुरंगाणांवर्णोयेषांतेतथाइंद्राश्ववर्णसदृशवर्णाइत्यर्थः इद्धादीप्तान् ५ पुरटोपनद्धंसुवर्णबद्धं अरिक्तोवाणैरशून्योअक्षयसायकावित्यर्थः जलजशंखम् ६ योधनाथायुद्धसाधनावग्राह्यगाः
७ स्रग्धरोमालाधरः ८ धिष्ण्यस्थःआहवनीयादिस्थानेस्थितः हव्यवाडाग्निः ९ १० ११ १२ १३ यत्रेंद्रपुर्यांयत्रनालिनीपुरिखभूतयादीर्घिकावद्वर्तमानया १४ पट्टपुपरिबंधः १५ न्यर्बुदै

ततोरथःकांचनपट्टबद्धोहयाश्चहर्यश्वतुरंगवर्णाः ॥ ध्वजश्चसिंहेनविराजमानोहुताशनादासहविर्भिरिद्धात् ५ धनुश्चदिव्यंपुरटोपनद्धंतूणावरिक्तौकवचं चदिव्यम् ॥ पितामहस्तस्यददौचमालामम्लानपुष्पांजलजंचशुक्रः ६ एवंसविप्रार्जितयोधनार्थस्तैःकल्पितस्वस्त्ययनोथविप्रान् ॥ प्रदक्षिणंकृत्यच तप्रणामःप्रह्लादमामंत्र्यनमश्चकार ७ अथारुह्यरथंदिव्यंभृगुदत्तंमहारथः ॥ सुस्रग्धरोथसंनद्धश्चीखड्गीधृतेषुधिः ८ हेमांगदलसद्बाहुःस्फुरन्मकरकुंड लः ॥ रराजरथमारूढोधिष्ण्यस्थइवहव्यवाट् ९ तुल्यैश्वर्यवयःश्रीभिःस्वयूथैर्दैत्ययूथपैः ॥ पिबद्भिरिवखंदग्भिर्दहद्भिःपरिधीनिव १० वृतोविकर्ष न्महतीमासुरींध्वजिनींविभुः ॥ ययाविंद्रपुरीमृद्धांकंपयन्निवरोदसीम् ११ रम्यामुपवनोद्यानैःश्रीमद्भिर्नंदनादिभिः ॥ कूजद्विहंगमिथुनैर्गायन्मत्तमधुव्रतैः १२ प्रवालफलपुष्पोरुभारशाखामरद्रुमैः ॥ हंससारसचक्राह्वकारंडवकुलाकुलाः १३ नलिन्योयत्रक्रीडंतिप्रमदाःसुरसेविताः ॥ आकाशगंगयादेव्यावृतां परिखभूतया १४ प्राकारेणाग्निवर्णेनसाट्टालेनोन्नतेनच ॥ रुक्मपट्टकपाटैश्चद्वारैःस्फाटिकगोपुरैः १५ जुष्टांविभक्तप्रपथांविश्वकर्मविनिर्मिताम् ॥ सभा चत्वरथ्याढ्यांविमानैर्न्यर्बुदैर्युताम् १६ शृंगाटकैर्मणिमयैर्वज्रविद्रुमवेदिभिः ॥ यत्रनित्यवयोरूपाःश्यामाविरजवाससः ॥ भ्राजंतेरूपवन्नार्यअर्चिर्भिरिव वह्नयः १७ सुरस्त्रीकेशविभ्रष्टनवसौगंधिकस्रजाम् ॥ यत्रामोदमुपादायमार्गआवातिमारुतः १८ हेमजालाक्षनिर्गच्छद्धूमेनागुरुगंधिना ॥ पांडुरेणप्र तिच्छन्नमार्गेयांतिसुरस्त्रियः १९मुक्तावितानैर्मणिहेमकेतुभिर्नानापताकावलभीभिरावृताम् ॥ शिखंडिपारावतभृंगनादितांवैमानिकस्त्रीकलगीतमंगलाम् २० मृदंगशंखानकदुंदुभिस्वनैःसतालवीणामुरजर्ष्टिवेणुभिः ॥ नृत्यैःसवाद्यैरुपदेवगीतकैर्मनोरमांस्वप्रभयाजितग्रहाम् २१ यांनव्रजंत्यधर्मिष्ठाःख लाभूतद्रुहःशठाः ॥ मानिनःकामिनोलुब्धाएभिर्हीनाव्रजंत्युत २२ तांदेवधानींसवरूथिनीपतिर्बहिःसमंताद्रुरुधेपृतन्यया ॥ आचार्यदत्तंजलजंमहास्व नंदध्मौप्रयुंजन्भयमिंद्रयोषिताम् २३ मघवांस्तदभिप्रेत्यबलेःपरममुद्यमम् ॥ सर्वदेवगणोपेतोगुरुमेतदुवाचह २४भगवन्नुद्यतोभूयान्बलेर्नःपूर्ववैरिणः ॥ अविषह्यमिदंमन्येकेनासीत्तेजसासमः २५ नैनंकश्चित्कुतोवापिप्रतिवोढुमधीश्वरः ॥ पिबन्निवमुखेनेदंलिहन्निवदिशोदश २६ दहन्निवदिशोदृग्भिःसंव र्ताग्निरिवोत्थितः ॥ ब्रूहिकारणमेतस्यदुर्धर्षत्वस्यमद्रिपोः ॥ ओजःसहोबलंतेजोयतएवसमुद्यमः २७

रित्युपलक्षणंअनेकैरित्यर्थः १६ शृंगाटकैश्चत्वरमंडपैःवज्ररत्नविद्रुमखचितवेदिभिः श्यामाःषोडशवर्षाः १७ सौगंधिकैःस्थलचंपकैःरचिताःस्रजःतासामामोदंपरिमलमुपादाय १८ जालाक्षंगवाक्षं १९ २० जितसूर्यादिग्रहाम् २१ एभिरधर्मादिभिः २२ पृतन्ययापृतनया २३ २४ अस्यबलिस्तेजसाकेनब्रह्मणासमःकेनकेनापीतिवा २५ प्रतिवोढुंप्रतियोद्धुंवारयितुंवाइदंजगद्यतः २६ ओजआदयएषसमुद्यमश्चयतःमद्रिपोःएतस्यदुर्धर्षत्वस्यकारणंब्रूहीत्यन्वयः २७

गुरुभिर्भृगुभिर्यतः कारणात् २८ २९ त्रीणिविष्टपानिमहरादिस्थानानियस्मिन्तत्तथा ३० एषबलिविप्राणांबललक्षणमुत्तरफलंयस्यसतथाकुतइतितत्राह संप्रतीति ३१ ३२ ३३ ३४ ३५ द्विजाः भृगवस्तएवममीष्टदातृत्वेनदेवाः उपलंभितांप्रापिताम् ३६ इतिश्रीभागवतेअष्टमस्कंधेवि०कृ०टीकायां चतुर्दशोध्यायः ॥१४॥ १ तस्याअदित्याः २ ३ आदित्यलोके विप्राणामभद्रंनागतमपिकिंधर्म स्याभद्रंनागतमपिकिंअर्थस्याभद्रंनागतमपि छंदानुवर्तिनोमृत्योःसकाशादभद्रंलोकस्यनागतंकिंअयोगिनांसंसारिणांयत्रयेषुधर्मादियोगोस्तितेषुकिंचिदप्यकुशलंनहीतितत्रानुकर्षःकर्तव्यः ४ ५ ६

गुरुरुवाच ॥ जानामिमघवञ्छत्रोस्तेतेरस्यकारणम् ॥ शिष्यायोपभृतंतेजोगुरुभिर्ब्रह्मवादिभिः २८ भवद्विधोभवान्वापिवर्जयित्वेश्वरंहरिम् ॥ नास्यशक्तःपुरःस्थातुंकृतांतस्ययथाजनाः २९ तस्मान्निलयमुत्सृज्ययूयंसर्वेत्रिविष्टपम् ॥ यातकालंप्रतीच्छंतोयतःशत्रोर्विपर्ययः ३० एषवि प्रबलोदर्कःसंप्रत्यूर्जितविक्रमः ॥ एषामेवावमानेनसानुबंधोविनंक्ष्यति ३१ एवंसुमंत्रितार्थास्तेगुरुणार्थानुदर्शिना ॥ हित्वात्रिविष्टपंजग्मुर्गीर्वाणाःकामरूपिणः ३२ देवेष्वतिविलीनेषुबलिर्वैरोचनःपुरीम् ॥ देवधानीमधिष्ठायवशंनिन्येजगत्त्रयम् ३३ तंविश्वजयिनंशिष्यंभृगवःशिष्यवत्सलाः ॥ शते नहयमेधानामनुव्रतमयाजयन् ३४ ततस्तदनुभावेनभुवनत्रयविश्रुताम् ॥ कीर्तिंदिक्षुवितन्वानःसरेजउडुराडिव ३५ बुभुजेचश्रियंऋद्धांद्विजदेवोपलंभिताम् ॥ कृतकृत्यमिवात्मानंमन्यमानोमहामनाः ३६ इतिश्रीभागवतेअष्टमस्कंधेबलिविजयेचतुर्दशोध्यायः ॥१४॥ श्रीशुकउवाच ॥ एवंपुत्रेषुनष्टेषु देवमातादितिस्तदा ॥ हृतेत्रिविष्टपेदैत्यैःपर्यतप्यदनाथवत् १ एकदाकश्यपस्तस्याआश्रमंभगवानगात् ॥ निरुत्सवंनिरानंदंसमाधेर्विरताच्चिरात् २ सपत्नीदीनवदनांकृतासनपरिग्रहः ॥ सभाजितोयथान्यायमिदमाहकुरूद्वह ३ अप्यभद्रंनविप्राणांभद्रेलोकेधुनागतम् ॥ नधर्मस्यनलोकस्यमृत्यो श्छंदानुवर्तिनः ४ अपिवाकुशलंकिंवागृहेषुगृहमेधिनाम् ॥ धर्मस्यार्थस्यकामस्ययत्रयोगोह्ययोगिनाम् ५ अपिवातिथयोभ्येत्यकुटुंबासक्तयात्वया ॥ गृहादपूजिताया ताःप्रयुत्थानेनवाक्वचित् ६ गृहेषुयेष्वतिथयोनार्चिताःसलिलैरपि ॥ यदिनियांतितेनूनंप्रेतराजगृहोपमाः ७ अथाग्नयस्तुवेलायांनहुतार्हविषासति ॥ त्वयोद्विग्नधियाभद्रेप्रोषितेमयिकर्हिचित् ८ यत्पूजयाकामदुघान्यांतिलोकान्गृहान्विताः ॥ ब्राह्मणोग्निश्चवैविष्णोःसर्वदेवात्म नोमुखम् ९ अपिसर्वेकुशलिनस्तवपुत्रामनस्विनि ॥ लक्षयेऽस्वस्थमात्मानंभवत्यालक्षणैरहम् १० अदितिरुवाच ॥ भद्रंद्विजगवांब्रह्मन्नधर्मस्या स्यजनस्यच ॥ त्रिवर्गस्यपरंक्षेत्रंगृहमेधिन्गृहाइमे ११ अग्नयोतिथयोभृत्याभिक्षवोयेचलिप्सवः ॥ सर्वंभगवतोब्रह्मन्ननुध्यानान्नरिष्यति १२ कोनुमे भगवन्कामोनसंपद्येतमानसः ॥ यस्याभवान्प्रजाध्यक्षएवंधर्मान्प्रभाषते १३

प्रेतराजगृहोपमाःश्मशानतुल्याः ७ वेलायामिति योग्यकालेप्रोषितेगृहादन्यत्रस्थिते ८ सर्वदेवात्मनोविष्णोर्मुखंब्राह्मणोग्निश्चेतिद्वयम् ९ हियस्मात् अस्वस्थम् १० ११ इमेगृहाअग्नयश्चेत्यादिसर्वं भगवतोनुध्यानान्नरिष्यतिनक्षिणोति १२ यस्याममप्रजानांकुशलाकुशलयोरध्यक्षः साक्षित्वेनद्रष्टाभगवोनेवंविधान्धर्मान्प्रवक्तीतियत् १३

यथाविभागंसत्त्वादिगुणानुकूल्येनभजतेत्यानामनोरथंसाधयतीत्यभिप्रायः १४ अंशदेवताभागम् तवदेहार्थव्यवहारार्थवा हृतस्थानाः हृतस्वगस्थानाः १५ पुनरुक्तमवावाशनाष्ट परारात ननुनाना
मितिशेषः १६ १७ १८ अनात्माजडात्मकः मोहोऽज्ञानम् १९ २० इतराइतरदेवादिविषया २१ सत्यसंकल्पोहरिः २२ तदुपधावनंतस्यहरेःसेवाविषयम् आशुतुष्यतियेनेतिशेषः २३ यदेतद्व्रतं
तद्वक्ष्यामि २४ पयोव्रतइतिपुल्लिंगप्रयोगःसर्वसाधनत्वज्ञापनार्थःमृदोविशेषमाह क्रोडेति वराहस्तातया स्रोतःरयंदमानंजलंतत्रस्नानंकुर्यादित्यर्थः २५ रसायाःरसातलात् स्थानमिच्छताभू

तवैवमारीचमनःशरीरजाःप्रजाइमाःसत्त्वरजस्तमोजुषः ॥ मनोरथंतासुसुरादिपुप्रभोयथाविभागंभजतेमहेश्वरः १४ तस्मादंशंभजंत्यामेश्रेयश्चितयसुव्रत
हृतश्रियोहृतस्थानाःसपत्नैःपाहिनःप्रभो १५ परैर्विवासितासाहंमग्नाव्यसनसागरे ॥ ऐश्वर्यंश्रीर्यशःस्थानंहृतानिप्रबलैर्मम १६ यथातानिपुनःसाधोप्रपद्ये
रन्ममात्मजाः ॥ तथाविधेहिकल्याणंधियाकल्याणकृत्तम १७ श्रीशुकउवाच ॥ एवमभ्यर्थितोदित्याकस्तामाहस्मयन्निव ॥ अहोमायाबलंविष्णोःस्नेहबद्ध
मिदंजगत् १८ क्वदेहोभौतिकोनात्माक्वचात्माप्रकृतेःपरः ॥ कस्यकेपतिपुत्राद्यामोहएवहिकारणम् १९ उपतिष्ठस्वपुरुषंभगवंतंजनार्दनम् ॥ सर्वभूतगुहावा
संवासुदेवंजगद्गुरुम् २० सविधास्यतितेकामान्हरिर्दीनानुकंपनः ॥ अमोघाभगवद्भक्तिर्नेतरेतिमतिर्मम २१ अदितिरुवाच ॥ केनाहंविधिनाब्रह्मन्नुपस्था
स्येजगत्पतिम् ॥ यथामेसत्यसंकल्पोविदधातिमनोरथम् २२ आदिशत्वंद्विजश्रेष्ठविधिंतदुपधावनम् ॥ आशुतुष्यतिमेदेवःसीदंत्याःसहपुत्रकैः २३ कश्यप
उवाच॥एतन्मेभगवान्पृष्टःप्रजाकामस्यपद्मजः ॥ यद्हंतेप्रवक्ष्यामिव्रतंकेशवतोषणम् २४फाल्गुनस्यामलेपक्षेद्वादशाहंपयोव्रतः ॥ अर्चयेदरविंदाक्षंभक्त्या
परमयान्वितः ॥ सिनीवाल्यांमृदालिप्यस्नायात्क्रोडविदीर्णया २५ यदिलभ्येतवैस्रोतस्येतंमंत्रमुदीरयेत् ॥ त्वंदेव्यादिवराहेणरसायाःस्थानमिच्छता
२६ उद्धृतासिनमस्तुभ्यंपाप्मानंमेप्रणाशय ॥ निवर्तितात्मनियमोदेवमर्चेत्समाहितः २७ अर्चायांस्थंडिलेसूर्येजलेवह्नौगुरावपि ॥ नमस्तुभ्यंभग
वतेपुरुषायमहीयसे ॥ सर्वभूतनिवासायवासुदेवायसाक्षिणे २८ नमोव्यक्तायसूक्ष्मायप्रधानपुरुषायच ॥चतुर्विंशद्गुणज्ञायगुणसंस्थानहेतवे २९ नमोद्वि
शीर्षेत्रिपदेचतुःशृंगायतंतवे ॥ सप्तहस्तायसप्तत्रयीविद्यात्मनेनमः ३० नमःशिवायरुद्रायनमःसाधारणायच ॥ सर्वविद्याधिपतयेभूतानांपतये
नमः ३१ नमोहिरण्यगर्भायप्राणायजगदात्मने ॥ योगैश्वर्यशरीरायनमस्तेयोगहेतवे ३२ नमस्तेआदिदेवायदेवदेवायतेनमः ॥ नारायणायऋषयेनराय
हरयेनमः३३ नमोमरकतश्यामवपुषेधिगतश्रिये ॥ केशवायनमस्तुभ्यंनमस्तेपीतवाससे ३४

तानामितिशेषः २६ निवर्तितात्मनियमःकृतसंध्योपासनादिकः २७ २८ गुणसंस्थानहेतवेकपिलात्मने २९ द्वेशीर्षेचत्वारिशृंगेतिश्रुतेः चत्वारिशृंगावेदास्तुपादास्त्रिसवनानिच
प्रापणीयंशिरस्त्वेकमन्यच्चोदयनीयकम् हस्तास्तुसप्तच्छंदांसितैर्यद्वातिफलान्यसौ मंत्रब्राह्मणकल्पैस्तुत्रिधाबद्धइतीर्यते शस्त्रोद्गातृस्तुतिरवैरोरवीत्यृत्विजोमुखात् वृषभोमहान्स्वधर्मत्वादेवस्तुफल
भावनात् इति तंतवेव्याप्तायसंततिहैतवेचत्रयीविद्यानांसोमपानांआत्मनेअंतर्यामिणे ३० ३१ हिनोतिदुःखंरातिसुखमितिहिरण्यंरेतोलक्षणंगर्भयस्यसततथातस्मै ३२ ३३ ३४

पतोवरदर्षभःअतः ३५ श्रियाविनिर्जितेपद्मयोस्तौतथातयोः पादयोरामोदंस्पृहयंतोदेवायमन्ववर्ततसभगवान् ३६ उपस्पर्शनमाचमनम् ३७ ३८ द्वादशाक्षरविद्ययाॐनमोभगवतेवासुदेवायेतिपयसिश्रुतंपायसान्नम् ३९ ४० ४१ तच्छेषंपुष्पंद्रवमाणम् ४२ द्व्यवरानवरपक्षेपिद्वावपेक्षितौ मुख्यपक्षस्तुद्वादशेति ४३ ४४ ४५ ४६ ४७ ४८ स्नापकैःस्नानसाधनैः

त्वंसर्ववरदःपुंसांवरेण्यवरदर्षभ ॥ अतस्तेतपसाधीराःपादरेणुमुपासते ३५ अन्ववर्ततयंदेवाःश्रीविनिर्जितपद्मयोः ॥ स्पृहयंतइवामोदंमगवान्मेप्रसीदताम् ३६ एतैर्मंत्रैर्हृषीकेशमावाहनपुरःसरम् ॥ अर्चयेच्छ्रद्धयायुक्तःपाद्योपस्पर्शनादिभिः ३७ अर्चितंगंधमाल्याद्यैःपयसास्नापयेद्विभुम् ॥ वस्त्रोपवीताभरणपाद्योपस्पर्शनैस्ततः ३८ गंधधूपादिभिश्चार्चेद्द्वादशाक्षरविद्यया ॥ शृतंपयसिनैवेद्यंशाल्यन्नंविभवेसति ३९ ससर्पिःसगुडंदत्वाजुहुयान्मूलविद्यया ॥ निवेदितंतद्भक्तायदद्याद्भुंजीतवास्वयम् ४० दत्वाचमनमर्चित्वातांबूलंचानिवेदयेत् ॥ जपेदष्टोत्तरशतंस्तुवीतस्तुतिभिःप्रभुम् ४१ कृत्वाप्रदक्षिणांभूमौप्रणमेद्दंडवन्मुदा ॥ कृत्वाशिरसितच्छेषंदेवमुद्वासयेत्ततः ४२ द्व्यवरान्भोजयेद्विप्रान्पायसेनयथोचितम् ॥ भुंजीततैरनुज्ञातोहुतशेषंसभाजितैः ४३ ब्रह्मचार्यथतद्रात्र्यांश्वोभूतेप्रथमेहनि ॥ प्रातःशुचिर्यथोक्तेनविधिनासुसमाहितः ४४ पयसास्नापयित्वार्चेद्यावद्व्रतसमापनम् ॥ पयोभक्षोव्रतामिदंचरेद्विष्ण्वर्चनादृतः ४५ पूर्ववज्जुहुयादग्निंब्राह्मणांश्चापिभोजयेत् ॥ एवंत्वहरहःकुर्याद्द्वादशाहंपयोव्रतम् ४६ हरेराराधनंहोममर्हणंद्विजतर्पणम् ॥ प्रतिपद्दिनमारभ्ययावच्छुक्लचतुर्दशी ४७ ब्रह्मचर्यमधःस्वापंस्नानंत्रिषवणंचरेत् ॥ वर्जयेदसदालापंभोगानुच्चावचांस्तथा ४८ अहिंस्रःसर्वभूतानांवासुदेवपरायणः ॥ त्रयोदश्यामथोविष्णोःस्नापनंस्नापकैर्विभोः ४९ कारयेच्छास्त्रदृष्टेनविधिनाविधिकोविदैः ॥ पूजांचमहतींकुर्याद्वित्तशाठ्यविवर्जितः ५० चरुंनिरूप्यपयसिशिपिविष्टायविष्णवे ॥ शृतेनतेनपुरुषंयजेतसुसमाहितः ५१ नैवेद्यंचापिगुणवद्दद्यात्पुरुषतुष्टिदम् ॥ आचार्यंज्ञानसंपन्नंवस्त्राभरणधेनुभिः ५२ तोषयेदृत्विजश्चैवतद्विध्याराधनंहरेः ॥ भोजयेत्तान्गुणवतासदन्नेनशुचिस्मिते ५३ अन्यांश्चब्राह्मणान्शक्त्यायेचतत्रसमागताः ॥ दक्षिणांगुरवेदद्याद्दृत्विग्भ्यश्चयथार्हतः ५४ अन्नाद्येनाश्वपाकांश्चप्रीणयेत्समुपागतान् ॥ भुक्तवत्सुचविप्रेषुदीनांधकृपणादिषु ५५ विष्णोस्तत्प्रीणनंविद्वान्सहभुंजीतबंधुभिः ॥ नृत्यवादित्रगीतैश्चस्तुतिभिःस्वस्तिवाचनैः ५६ कारयेत्तत्कथाभिश्चपूजांभगवतोन्वहम् ॥ एतत्पयोव्रतंनामपुरुषाराधनंपरम् ५७ पितामहेनाभिहितंममतेसमुदाहृतम् ॥ त्वंचानेनमहाभागेसम्यक्चीर्णेनकेशवम् ५८ आत्मनाशुद्धभावेनभजनीयंभजाव्ययम् ॥ अयंवैसर्वयज्ञाख्योसर्वव्रतमिदंश्रुतम् ५९ तपःसारमिदंभद्रेदानंचेश्वरतर्पणम् ॥ तएवनियमाःसाक्षात्तएवचयमोत्तमाः ६० तपोदानंव्रतंयज्ञोयेनतुष्यत्यधोक्षजः ॥ तस्मादेवंव्रतंभद्रेप्रयताश्रद्धयाचर ६१

४९ ५० शिपिपुरुषिमपुविष्टःशिपिविष्टःशिपौगरुडेविष्टःतस्मैवा ५१ मधुरादिगुणवत् ५२ ५३ ५४ ५५ ५६ ५७ ५८ ५९ तपःसंतोषआस्तिक्यंदानमीश्वरपूजनम् सिद्धांतश्रवणं चैवह्रीर्मतिश्चजयोव्रतम् एतेतुनियमाःप्रोक्तास्तांश्चसर्वान्पृथक्शृणु अहिंसासत्यमस्तेयंब्रह्मचर्यंदयार्जवम् क्षमाधृतिर्मिताहारःशौचंचैतेयमाःस्मृताइति ६० ६१

६२ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेवि०कृ०टीकायांपंचदशोध्यायः ॥ १५ ॥ अव्यक्तस्वभाव॥पमत्तयाभजमानस्यपुत्रभरणतत्परयाचनगय॥॥ व्रताचरणप्रकारंवक्तिइत्युक्तेति १ २ ३ तद्व्रताचरणफलमाह तस्याइति ४ ५ तस्याःभक्तिलक्षणंदर्शयति । सेति पुलकेनरोमांचेनाकुलाव्याप्ताआकृतिस्तनुर्यस्याःसावथा पुनस्तयाकिमकारीतित्राह तद्दर्शनेति तद्दर्शनमेवात्युत्सवःतन्निमित्तोगात्रवेपथुर्देहकंपोयस्याःसातथा ६ तस्याःमुग्धभावंदर्शयति उद्वीक्षतीति ७ स्वाभीष्टोदयकरगुणविशिष्टत्वेनस्तौति यज्ञेशेति यज्ञपुरुषअच्युतइत्यनेनगुणांतराणिसमुच्चिनोति । तानिकानीतितत्राह तीर्थपादेत्यादितीर्थस्यशास्त्रस्यश्रवःश्रवणंयाभ्यांतेतीर्थश्रवसीतेचश्रवणेचेति । तीर्थश्रवःश्रवणेतेमंगलयतीतितीर्थश्रवःश्रवणमंगलं तच्चनामधेयंनामयस्यसतथा तस्यसंबुद्धिस्तीर्थश्रवःश्रवणमंगलनामधेय । आपन्नस्यलोकस्यवृजिनंदुःखंतस्योपशमनार्थपरिहारार्थमुदयोऽवतारोयस्यसतथा । तस्यसंबुद्धिस्तथा कृधिकुरु अव

भगवान्परितुष्टस्तेवरानाशुविधास्यति ॥ ६२ ॥ इतिश्रीभागवतेअष्टमस्कंधेव्रतोपदेशोनामपंचदशोध्यायः ॥ १५ ॥ श्रीशुकउवाच ॥ इत्युक्तासादितीराजन्स्वभर्त्राकश्यपेनवै ॥ अन्वतिष्ठद्व्रतमिदंद्वादशाहमतंद्रिता १ चिंतयत्येकयाबुद्ध्याभगवंतमधोक्षजम् ॥ प्रगृह्येंद्रियदुष्टाश्वान्मनसाबुद्धिसारथिः २ मनश्चैकाग्रयाबुद्ध्याभगवत्यखिलात्मनि ॥ वासुदेवेसमाधायचचारहपयोव्रतम् ३ तस्याःप्रादुरभूत्तातभगवानादिपूरुषः ॥ पीतवासाश्चतुर्बाहुःशंखचक्रगदाधरः ४ तंनेत्रगोचरंवीक्ष्यसहसोत्थायसादरम् ॥ ननामभुविकायेनदंडवत्प्रीतिविह्वला ५ सोत्थायबद्धांजलिरीडितुंस्थितानोत्सेहआनंदजलाकुलेक्षणा ॥ बभूवतूष्णींपुलकाकुलाकृतिस्तद्दर्शनात्युत्सवगात्रवेपथुः ६ प्रीत्याशनैर्गद्गदयागिराहरिंतुष्टावसादेव्यदितिःकुरुद्वह ॥ उद्वीक्षतीसापिबतीवचक्षुषारमापतिंयज्ञपतिंजगत्पतिम् ७ अदितिरुवाच ॥ यज्ञेशयज्ञपुरुषाच्युततीर्थपादतीर्थश्रवःश्रवणमंगलनामधेय ॥ आपन्नलोकवृजिनोपशमोदयाद्यशंनःकृधीशभगवन्नवसन्ननाथ ८ विश्वायविश्वभवनस्थितिसंयमायस्वैरंगृहीतपुरुशक्तिगुणायभूम्ने ॥ स्वस्थायशश्वदुपबृंहितपूर्णबोधव्यापादितात्मतमसेहरयेनमस्ते ९ आयुःपरंवपुरभीष्टमतुल्यलक्ष्मीर्द्यौर्भूरसाःसकलयोगगुणास्त्रिवर्गः ॥ ज्ञानंचकेवलमनंतभवंतितुष्टास्त्वतोनृणांकिमुपसन्नजनार्तिनाशः १० श्रीशुकउवाच ॥ अदित्यैवंस्तुतोराजन्भगवान्पुष्करेक्षणः ॥ क्षेत्रज्ञःसर्वभूतानामितिहोवाचभारत ११ श्रीभगवानुवाच ॥ देवमातर्भवत्यामेविज्ञातंचिरकांक्षितम् ॥ यत्सपत्नैर्हृतश्रीणांबाधितानांस्वधामतः १२ तान्विनिर्जित्यसमरेदुर्मदानसुरर्षभान् ॥ प्रतिलब्धजयश्रीभिःपुत्रैरिच्छस्युपासितुम् १३ इंद्रज्येष्ठैश्चतनयैर्हतानांयुधिविद्विषाम् ॥ स्त्रियोरुदंतीरासाद्यद्रष्टुमिच्छसिदुःखिताः १४

सन्ननाथक्षीणजनरक्षक ८ विश्वनाम्नेविश्वस्यभवनस्थितिसंहारायस्मात्सतथातस्मै स्वैरंस्वेच्छया गुणाःसत्वादयः व्यापादितात्मतमसेविनाशिताज्ञानाय ९ परमायुर्द्विपरार्द्धंवसानलक्षणंचयच्चतदादयोनृणांतुष्टास्त्वत्तोभवंतियत्तस्मादुपसन्नजनार्तिनाशःकिम् । शरणागतजनमनोदुःखनाशोभवतीतिकिंवक्तव्यं योगगुणोऽणिमादिः १० ११ भवत्याःसपत्नैःस्वर्गाद्धावितानांउच्चाटितानांहृतश्रीणांआकृष्टसंपदांपुत्राणामर्थेयच्चिरंकांक्षितंतन्मयाविज्ञातमित्यन्वयः १२ किंतदितिततत्राह तान्विनेर्जित्येति उपासितुंमामितिशेषः १३ इदंचाकांक्षितमित्याह इंद्रेति इंद्रःज्येष्ठोयेषांतेतथातैः १४

१५ नैतत्क्षिप्रसाध्यमित्याह प्रायइति कुतोत्राह यत्तइति अनुकूलैरीश्वरविप्रैर्गुप्तारक्षिताइतियत्तस्मात्तत्रतेषु १६ तर्ह्युपायाभावादुपरमएवश्रेयानितितत्राह अथेति ममसकाशान्ममव्रतचर्यया वा श्रद्धानुरूपमितिक्रियाविशेषणं ममार्चनमन्यथाफलराहित्येनगंतुंनार्हतियथाश्रद्धातथाफलहेतुकत्वात् पुरुषार्थलक्षणफलस्यनिमित्तत्वात्कप्रत्ययः स्वार्थमतिसाधयति १७ १८ उपाधावउ पास्व अपत्यंअपत्यत्वेन १९ परस्मैशत्रवे २० २१ २२ किमवबुद्धमितितत्राह प्रविष्टामिति २३ २४ २५ पृश्न्यांगर्भोयस्यसतथातस्मै वेदगर्भायसद्योजन्मशक्तये त्रीणिपृष्ठानिवैकुंठादीनियस्य

आत्मजान्सुसमृद्धान्स्वान्प्रत्याहृतयशःश्रियः ॥ नाकपृष्ठमधिष्ठायक्रीडतोद्रष्टुमिच्छासि १५ प्रायोधुनातेसुरयूथनाथाअवारणीयाइतिदेवमेमतिः ॥ यत्तेनुकूलेश्वरविप्रगुप्तानविक्रमस्तत्रसुखंददाति १६ अथाप्युपायोममदेविचिंत्यःसंतोषितस्यव्रतचर्ययाते ॥ ममार्चनंनार्हतिगंतुमन्यथाश्रद्धानुरू पंफलहेतुकत्वात् १७ त्वयार्चितश्चाहमपत्यगुप्तयेपयोव्रतेनानुगुणंसमीडितः ॥ स्वांशेनपुत्रत्वमुपेत्यतेसुतान्पातास्मिमारीचतपस्यवस्थितः १८ उपाधा वपतिंभद्रेप्रजापतिमकल्मषम् ॥ मांचभावयतेपत्यमेवंरूपमवस्थितम् १९ नैतत्परस्माआख्येयंदेवगुह्यंकथंचन ॥ सर्वंसंपद्यतेदेविदेवगुह्यात्सुसं वृताव् २० ॥ श्रीशुकउवाच ॥ एतावदुक्त्वाभगवान्तत्रैवांतरधीयत ॥ अदितिर्दुर्लभंलब्ध्वाहरेर्जन्मात्मनिप्रभोः २१ उपाधावत्पतिंभक्त्यापरयाकृत कृत्यवत् ॥ सवैसमाधियोगेनकश्यपस्तदबुध्यत २२ प्रविष्टमात्मनिहरेरंशंह्यवितथेक्षणः ॥ सोदित्यांवीर्यमाधत्ततपसाचिरसंचितम् २३ समाहितम नाराजन्दारुण्यग्नियथानिलः ॥ अदित्यांनिहितंगर्भंभगवंतंसनातनम् २४ हिरण्यगर्भोविज्ञायसमीडेगुह्यनामभिः ॥ ब्रह्मोवाच ॥ जयोरुगायभ गवन्नुरुक्रमनमोस्तुते ॥ नमोब्रह्मण्यदेवायत्रिगुणायनमोस्तुते २५ पृश्निगर्भायदेवायवेदगर्भायवेधसे ॥ त्रिगुणायत्रिपृष्ठायशिपिविष्टायविष्णवे २६ त्वमादिरंतोभुवनस्यमध्यमनंतशक्तिंपुरुषंयमाहुः ॥ कालोभवानाक्षिपतीशविश्वंस्रोतोयथांभःपतितंगभीरम् २७ त्वंवैप्रजानांस्थिर जंगमानांप्रजापती नामसिसंप्रविष्टः॥दिवौकसांदेवदिवश्च्युतानांपरायणंनौरिवमज्जतोप्सु२८ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेआदितिवरदानंनामषोडशोध्यायः॥१६॥ श्रीशुकउवाच ॥ इत्थंविरिंचिस्तुतकर्मवीर्यःप्रादुर्बभूवामृतभूरदित्याम् ॥ चतुर्भुजःशंखगदाब्जचक्रःपिशंगवासानलिनायतेक्षणः १ श्यामावदातोज्ज षराजकुंडलत्विषोल्लसच्छ्रीवदनांबुजःपुमान् ॥ श्रीवत्सवक्षावलयांगदोल्लसत्किरीटकांचीगुणचारुनूपुरः २ मधुव्रतव्रातविघुष्टयास्वयाविराजितश्री र्वनमालयाहरिः ॥ प्रजापतेर्वेश्मतमःस्वरोचिषाविनाशयन्कंठनिविष्टकौस्तुभः ३ दिशःप्रसेदुःसलिलाशयास्तदाप्रजाःप्रहृष्टाऋतवोगुणान्विताः ॥ द्यौरंतरिक्षंक्षितिरग्निजिह्वागावोद्विजाःसंजहृषुर्नगाश्च ४ श्रोणायांश्रवणद्वादश्यांमूहूर्तेऽभिजितिप्रभुः ॥ सर्वेनक्षत्रताराद्याश्चक्रुस्तज्जन्मदक्षिणम् ५ द्वादश्यांसवितातिष्ठन्मध्यंदिनगतोनृप ॥ विजयानामसाप्रोक्तायस्यांजन्मविदुर्हरेः ६

सलथाततस्मै २६ गभीरंस्रोतोनदी आक्षिपतितीरंप्रतिनयति २७ २८ इतिश्रीभा०अष्टमस्कंधेवि०टी०षोडशोध्यायः ॥१६॥ अमृतभूःमुक्ताश्रयोविष्णुः १ झषराजोमत्स्यश्रेष्ठःमकरस्तदाकारकुंडल त्विषा २ वेश्मतमःगृहांधकारः ३ सलिलाशयाःह्रदाःअग्निजिह्वादेवाः ४ श्रोणायांश्रावणेमासि अभिजितिमध्यंदिने ५ श्रवणद्वादश्यामतिष्ठत्तदासाद्वादशीविजयानाम अनेनसंज्ञांतरंविधीयते ६

शखादयोनेदुरितिशेषः ७ ८ सुपर्णःभुजगोत्तमाश्च ९ १० ११ यत्स्वभावतोव्यक्तवद्व्यक्तमेवतद्वपुरनुकंपया विभूषणायुधैर्व्यक्तंभाति हारिस्तादृशंवपुरधारयत् यद्वपुरव्यक्तवद्भातहारिस्तद्वपुःभूष
णायुधैर्व्यक्तमधारयदितिवा । सएवदिव्यगतिरनभिभूतज्ञानोहारिस्तेनाविभूषणायुधविशिष्टेनरूपेणपित्रोःसंपश्यतोसतोर्वामनोबटुर्बभूवेत्यन्वयः । मूलरूपावताररूपयोरभेदज्ञापनायैवमुच्यतेयथानटइति

शंखदंदुभयोभेर्योमृदंगपणवानकाः ॥ चित्रवादित्रतूर्याणांनिर्घोषस्तुमुलोभवत् ७ प्रीताश्चाप्सरसोनृत्यन्गंधर्वपतयोजगुः ॥ तुष्टुवुर्मुनयोदेवामनवःपि
तरोग्नयः ८ सिद्धविद्याधरगणाःसकिंपुरुषकिन्नराः ॥ चारणायक्षरक्षांसिसुपर्णभुजगोत्तमाः ९ गायंतोभिप्रशंसंतोनृत्यंतोविबुधानराः ॥ आदित्याआ
श्रमपदंकुसुमैःसमवाकिरन् १० दृष्ट्वादितिस्तंनिजगर्भसंभवंपरंपुमांसंमुदमापविस्मिता ॥ गृहीतदेहंनिजयोगमायया प्रजापतिश्चाहजयेतिविस्मितः
११ यत्तद्वपुर्भातिविभूषणायुधैरव्यक्तवद्व्यक्तमधारयद्धरिः ॥ बभूवतेनैवसवामनोबटुःसंपश्यतोर्दिव्यगतिर्यथानटः १२ तंबटुंवामनंदृष्ट्वामोदमानामह
र्षयःकर्माणिकारयामासुःपुरस्कृत्यप्रजापतिम् १३ तस्योपनीयमानस्यसावित्रींसविताब्रवीत् ॥ बृहस्पतिर्ब्रह्मसूत्रंमेखलांकश्यपोददौ १४ ददौ
कृष्णाजिनंभूमिर्दंडंसोमोवनस्पतिः ॥ कौपीनाच्छादनंमाताद्यौश्छत्रंजगतःपतेः १५ कमंडलुंवेदगर्भःकुशान्सप्तर्षयोददुः ॥ अक्षमालांमहाराजसरस्वत्य
क्षयात्मनः १५ तस्माइत्युपनीतायययक्षराट्पात्रिकामदात् ॥ भिक्षांभगवतीसाक्षादुमादादंबिकासती १७ सब्रह्मवर्चसेनैवसभांसंभावितोबटुः ॥
ब्रह्मर्षिगणसंजुष्टामन्वरोचतमारिषः ॥ समिद्धमाहितंवह्निंकृत्वापरिसमूहनम्॥परिस्तीर्यसमभ्यर्च्यसमिद्धिरजुहोद्द्विजः १९ श्रुत्वाश्वमेधैर्यजमानमूर्जितंब
लिंभृगूणामुपकल्पितैस्ततः ॥ जगामतत्राखिलसारसंभृतोभारेणगांसन्नमयन्पदेपदे २० तंनर्मदायास्तटउत्तरेबलेर्यज्ञर्त्विजस्तेभृगुवत्ससांज्ञिके ॥ प्र
वर्तयंतोभृगवःक्रतूत्तमंव्यचक्षताराद्उदितंयथारविम् २१ तत्रर्त्विजोयजमानःसदस्याहृतत्विषोवामनतेजसानृप ॥ सूर्यःकिमायात्ययबाविभावसुःसनत्कु
मारोत्रिदृक्षयाक्रतोः २२ इत्थंसशिष्यैभृगुभ्वनेकधावितर्क्यमाणोभगवान्सवामनः ॥ सदंडछत्रंसजलंकमंडलुंविवेशबिभ्रद्वयमेधवाटम् २३
मौंज्यामेखलयावीतमुपवीताजिनोत्तरम् । जटिलंवामनंविप्रंमायामाणवकंहरिम् २४ प्रविष्टंवीक्ष्यभृगवःसशिष्यास्तेसहाग्निभिः ॥ प्रत्यगृह्ण
न्समुत्थायसंक्षिप्तास्तस्यतेजसा २५ यजमानःप्रमुदितोदर्शनीयंमनोरमम् ॥ रूपानुरूपावयवंतस्माआसनमाहरत् २६ स्वागतेनाभिनंद्याथपादौभग
वतोबलिः ॥ अवनिज्यार्चयामासमुक्तसंगंमनोरमम् २७ तत्पादशौचंकलिकल्मषापहंसधर्मविन्मूर्ध्न्यदधात्सुमंगलम् ॥ यद्देवदेवोगिरिशश्चंद्रमौलि
र्दधारमूर्ध्नापरयाचभक्त्या २८ बलिरुवाच ॥ स्वागतंतेनमस्तुभ्यंब्रह्मन्किंकरवामते ॥ ब्रह्मर्षीणांतपःसाक्षान्मन्येत्वार्यवपुर्धरम् २९

तदभिप्रायेण १२ १३ १४ १५ १६ पात्रिकांभिक्षापात्रंउमा उमेतिसंस्यविशेषव्यावृत्त्यर्थंअंबिकेति १७ सभांप्राप्यात्यरोचतसभामरोचयदितिवा मारिषःपूज्यः १८ १९ भृगूणामुपकल्पितैःअश्वमेधैः
यजमानंयष्टारंबलिंश्रुत्वातत्रजगाम अखिलसारैर्गुणैःसंभृतःपूर्णः भारेणगारिम्णा २० भृगुवत्सेतिसंज्ञायस्यसतथातस्मिन् २१ २२वाटंशालां २३ आवीतंपरिवृतं २४ २५ २६ २७ २८ २९

३० तनुभिःरेणुभिःकोमलैर्वा ३१ प्रतीच्छगृहाण ३२ ३३ इतिश्रीभागवते अष्टमस्कंधेवि०टी०सप्तदशोध्यायः ॥१७॥ अनेनाध्यायद्वयेनबलेर्भक्तिविशेषंदर्शयति इतीति इतिशब्देनहरेर्माहात्म्यसूच कंवाक्यमुक्तमितिसूचयति १ जनदेवनृप सांपरायेपितामहःप्रमाणम् २ सर्वेस्तुतिप्रसन्नाएवाभीष्टंकुर्वतीत्यतस्तत्सिद्धिप्रकारंवचनंवक्ति नहीति यःयुष्मानितिप्रत्येकमभिसंबद्ध्यते प्रत्याख्यातानास्ती तिवक्ता अदाता ३ तीर्थेपात्रेअर्थिनाधनंयुद्धंचार्थयमानेनपराङ्मुखाअमनस्विनइत्येतद्विशेषणद्वयंयथायोग्यंसंबंधितव्यं अमनस्विनोहीनमनस्कायचस्मात्उद्धातिउत्कृष्टतयाद्योतते उडुपश्चंद्रः ४ ५ कृच्छ्रेणेतिमोहवचनं कृतःकृतिनस्तान्श्रयतेयत्तेनपराक्रमेणेत्यर्थइतिवा । क्ष्मायाःभूमेःउद्धारेउद्धरणकालेकृच्छ्रेणागतेप्राप्तेसतिभूरितस्यवीर्यंपराक्रममनुस्मरन्नपि आत्मानंजयिनंतदानीमेवात्मज

अद्यनःपितरस्तृप्ताअद्यनःपावितंकुलम् ॥ अद्यस्विष्टःक्रतुरयंयद्ध्वानागतोगृहान् ३० अद्याग्नयोमेसुहुतायथाविधिद्विजात्मजत्वच्चरणावनेजनैः ॥ ह तांहसोवाग्भिरियंचभूमिरद्यापुनीतातनुभिःपदैस्तव ३१ यद्यद्वटोवांच्छसितत्प्रतीच्छमत्वामर्थिनंविप्रसुतानुतर्कये ॥ गांकांचनंगुणवद्धाथधाममृष्टंतथान्नमु तवाविप्रकन्याम् ३२ ग्रामान्समृद्धांस्तुरगान्गजान्वारथांस्तथार्हत्तमसंप्रतीच्छ ३३ इतिश्रीभागवतेअष्टमस्कंधेसप्तदशोध्यायः ॥ १७ ॥ ॥ ७ ॥ श्रीशुकउवाच ॥ इतिवैरोचनेर्वाक्यंधर्मयुक्तंससूनृतम् ॥ निशम्यभगवान्प्रीतःप्रतिनंद्येदमब्रवीत् १ ॥ श्रीभगवानुवाच ॥ वचस्तवैतज्जनदेवसूनृतंकु लोचितंधर्मयुतंयशस्करम् ॥ यस्यप्रमाणंभृगवःसांपरायेपितामहःकुलवृद्धःप्रशांतः २ नह्येतस्मिन्कुलेकश्चिन्निःसत्वःकृपणःपुमान् ॥ प्रत्याख्याताप्र तिश्रुत्ययोवाऽदाताद्विजातये ३ नसंतितीर्थेयुधिवार्थिनार्थिताःपराङ्मुखायेत्वमनस्विनोनृप ॥ युष्मत्कुलेयद्यशसामलेनप्रह्लादउद्धातियथोडुपःखे ४ य तोजातोहिरण्याक्षश्चरन्नेकइमांमहीम् ॥ प्रतिवीरंदिग्विजयेनाविंदतगदायुधः ५ यंविनिर्जित्यकृच्छ्रेणविष्णुःक्ष्मोद्धारआगते ॥ नात्मानंजयिनंमेनेतद्वीर्य मूर्यनुस्मरन् ६ निशम्यतद्वधंभ्राताहिरण्यकशिपुःपुरा ॥ हंतुंभ्रातृहणंक्रुद्धोजगामानिलयंहरेः ७ तमायांतंसमालोक्यशूलपाणिंकृतांतवत् ॥ चिंत यामासकालज्ञोविष्णुर्मायाविनांवरः ८ यतोयतोहंतत्रासौमृत्युःप्राणभृतामिव ॥ अतोहमस्यहृदयंप्रवेक्ष्यामिपराग्दृशः ९ एवंसनिश्चित्यरिपोःशरीरं मायावतोनिर्विविशेसुरेंद्र ॥ श्वासानिलांतर्हितसूक्ष्मदेहस्तद्घ्राणरंध्रेणविविग्नचेताः १० सतन्निकेतंपरिमृश्यशून्यमपश्यमानःकुपितोननाद ॥ क्ष्मांद्यांदि शःखंविवरान्समुद्रान्विष्णुंविचिन्वन्नददर्शवीरः ११ अपश्यन्नितिहोवाचमयान्विष्टमिदंजगत् ॥ भ्रातृहामेगतोनूनंयतोनावर्ततेपुमान् १२ वैरानुबंधएतावा नामृत्योरिहदेहिनाम् ॥ अज्ञानप्रभवोमन्युरहंमानोपबृंहितः १३ पिताप्रह्लादपुत्रस्तेतद्विद्वान्द्विजवत्सलः ॥ स्वमायुर्द्विजलिंगेभ्योदेवेभ्योदात्सयाचितः १४

यंनमेनेकिंतुनित्यजयिनंमेनइत्यर्थः यद्वा क्ष्मायाउद्धारोयेनसतथासविष्णुर्नापरमपुरुषोयंविनिर्जित्यतत्स्वकीयंवीर्यंतद्रूपंनंतमनुस्मरन्नात्मानंजयिनंजयशीलोपेतंमेनइति ६ ७ मायाविनांज्ञानिनांवरः मोक्षादिवरदाता ८ पराग्दृशःबाह्यदृष्टेःपरांचित्त्वानिव्यवृणोदितिश्रुतेः परंदूरमंचतीतिपराग्दूरस्थंवस्तु पश्यतिइतिपराग्दृक्तस्यदूरस्थवस्तुदर्शिनइत्यर्थइतिवा ९ तद्घ्राणरंध्रेणतस्यघ्राणद्वारेण १० निकेतंजगतामितिशेषः तस्यहरेर्वैकुंठंपरिमृश्येतिवा ११ यतोगतस्ततः १२ क्रोधहेतुकोवैरानुबंधइत्याह अज्ञानेति १३ प्रह्लादस्ययःपुत्रःसतवपितावैरोचनः तान्द्विजरूपिणोदेवान्वि द्वान्द्विजानांलिंगंवेषोयेषांतेतथा तेभ्योदेवेभ्यःस्वमायुरदादित्यन्वयः १४

किंच यद्ब्राह्मणैरनुष्ठितंतन्ममापीष्टमितिमकटनायभवानप्याचरतीत्याह भवानिति आचरितानुष्ठाता अन्यैराजादिभिः १५ यस्मात्त्वपुण्यवताकुलजाताधमकृत्तातस्मात् [illegible]
तिर्माभूदित्याह त्रीणीति तेषांचमहत्त्वेनभयशंकातदवस्थेतितत्राह संमितानीति १६ इतोपिमहत्तरंकामंवदस्वदास्यामीतितत्राह नेति यदान्याद्दानशीलात् । राज्ञ्प्रतिग्रहात्तवदोषोनस्यात्किंने
त्याह नेति यावतापतिग्रहेणस्वप्रयोजनंसिद्ध्यतितावतःप्रतिग्रहात्आदानात् अजीविष्यान्निमान्यखादन्निति श्रुतेः विद्वान्प्रतिग्रहदोषदहनपटुर्ज्ञानवान् १७ अवृद्धसंमताःकुतोत्राह त्वमिति बुद्धिवै
शद्येबालत्वमप्रयोजकमत्राह बालिशेति जडमतिःस्वप्रयोजनंज्ञातुंनशक्नुवतइत्यर्थः १८ कथमेतदवगतमत्राह मांवचोभिरिति अबुद्धिमान्दाशुषेदानशीलंबुद्धिमानितिव्यतिरेकोवा १९ कुतो
मामपहससीतितत्राह नपुमानिति २० यदुक्तंवृत्तकरींभूमिंप्रतिगृह्णातीतितदजितेंद्रियंप्रतिव्यर्थमित्याशयेनाह श्रीभगवानिति अजितेंद्रियमलंबुद्धिरहितंपुरुषमितिशेषः २१ एतदेवोपपादय

भवानाचरिताधर्मानास्थितान्गृहमेधिभिः ॥ ब्राह्मणैःपूर्वजैःशूरैरन्यैश्चोदामकीर्तिभिः १५ तस्मात्त्वत्तोमहीमीषद्वृणेहंवरदर्षभ ॥ पदानित्रीणिदैत्येंद्र
संमितानिपदामम १६ नान्यंतेकामयेराजन्वदान्याज्जगदीश्वरात् ॥ नैनःप्राप्नोतिवैविद्वान्यावदर्थप्रतिग्रहात् १७ बलिरुवाच ॥ अहोब्राह्मणदाया
दवाचस्तेऽवृद्धसंमताः ॥ त्वंबालोबालिशमतिःस्वार्थंप्रत्यबुधोयथा १८ मांवचोभिःसमाराध्यलोकानामेकमीश्वरम् ॥ पदत्रयंवृणीतेयोबुद्धिमानिवदा
शुषम् १९ नपुमान्मामनुव्रज्यभूयोयाचितुमर्हति ॥ तस्माद्वृत्तिकरींभूमिंबटोकामंप्रतीच्छमे २० श्रीभगवानुवाच ॥ यावंतोविषयाःप्रेष्ठास्त्रिलोक्या
मजितेंद्रियम् ॥ नशक्नुवंतितेसर्वेप्रतिपूरयितुंनृप २१ त्रिभिःक्रमैरसंतुष्टोद्वीपेनापिनपूर्यते ॥ नववर्षसमेतेनसप्तद्वीपधरेच्छया २२ सप्तद्वीपाधिपतयोनृपावै
न्यगदादयः ॥ अर्थैःकामैर्गतानांतंतृष्णायाइतिनःश्रुतम् २३ यदृच्छयोपपन्नेनसंतुष्टोवर्ततेसुखम् ॥ नासंतुष्टस्त्रिभिर्लोकैरजितात्मोपसादितैः २४ पुंसोयं
संसृतेर्हेतुरसंतोषोर्थकामयोः ॥ यदृच्छयोपपन्नेनसंतोषोमुक्तयेस्मृतः २५ यदृच्छालाभतुष्टस्यतेजोविप्रस्यवर्धते ॥ तत्प्रशाम्यत्यसंतोषादंभसेवाशुशुक्ष
णिः २६ तस्मात्त्रीणिपदान्येववृणेत्वद्वरदर्षभात् ॥ एतावतैवसिद्धोहंवित्तंयावत्प्रयोजनम् २७ श्रीशुकउवाच ॥ इत्युक्तःसहसन्नाहवाञ्छितंप्रतिगृह्णता
म् ॥ वामनायमहींदातुंजग्राहजलभाजनम् २८ विष्णवेक्ष्मांप्रदास्यंतमुशनाअसुरेश्वरम् ॥ जानंश्चिकीर्षितंविष्णोःशिष्यंग्राहविदांवरः २९ उशनाउ
वाच ॥ एषवैरोचनेसाक्षाद्भगवान्विष्णुरव्ययः ॥ कश्यपाददितेर्जातोदेवानांकार्यसाधकः ३० प्रतिश्रुतंत्वयैतस्मैयदनर्थमजानता ॥ नसाधुमन्येदैत्या
नांमहानुपगतोनयः ३१

ति त्रिभिरिति ननदीद्वीपोत्रकथ्यतइत्याह
नवेति कुतोत्राह सप्तेति २२ नैतावतापिपूर्तिरित्याह सप्तेति अंतमवसानम् अर्थैःकामैःअर्थसंपादितकामैर्वा २३ संतोषशब्दाभिप्रायंवदन्नलंबुद्धिरेवसुखसाधनमित्याह यदृच्छयेति व्यतिरेकमा
ह नासंतुष्टइति उपसादितैरवाप्तैःसुखंनवर्त्ततइतिपूर्वेणान्वयः २४ इतोपिसंतोषएवापाद्यः सुखहेतुत्वादन्यस्यानर्थहेतुत्वाच्चेत्याह पुंसइति अर्थकामयोरसंतोषः २५ तेजोबलादिकं तेजोबले
प्रभावेचज्योतिष्यर्चिषिरेतसि नवनीतेनलेधर्मेदानेहरितमदेपिचेति तत्तेजः आशुशुक्षणिःअग्निः आशुशुक्षणिरेकंग्रीयजनेथाश्रुतीबलेइति २६ यतःसंतुष्टोहंतस्माद्यावत्प्रयोजनंवित्तंस्वीकुर्याभितिशे
षः २७ २८ उशनाविदुषागुरुणाशिष्यायहितोपदेशःकर्तव्यइतिशिक्षयन्नाह । विष्णवइति २९ ३० बंधनाद्यनर्थमजानतात्वयाएतस्मैवामनायप्रतिज्ञातंयत्तत्साधुनमन्यइत्यन्वयः कुतो
त्राह दैत्यानामिवअनयोर्दुःखहेतुरनीतिः ३१

तदुपपादयति एषइति विश्वकायः३२ ३३ त्रिपदक्रमणप्रकारंस्पष्टयति क्रमतइति तार्तीयस्यतृतीयपदस्य ३४ प्रतिश्रुतमदातुः निष्ठांतंप्रतिश्रुतदानपर्यंतंनरकंदुःखंमन्ये नरकमेवोप पादयति प्रतिश्रुतस्येति ३५ तस्यतवदानं कुतोनप्रशंसंतीतितत्राह येनेति वृत्तिर्जीवनंविपद्यतेनश्यतीतियेनतस्मादितिशेषः । संभावितस्यचाकीर्तिर्मरणादतिरिच्यतइतिस्मृतेर्वृत्ति र्जीवनसाधनंवानष्टंस्यात्ततन्नाशेकिंछिन्नमत्राह दानमिति ३६ अर्थायकोशवृद्धयेक्रियादिव्यवहारायवा ३७ किमन्यत्त्वदुक्तेःप्रमाणमित्याशंक्यबह्वृचांवाक्यंप्रमाणमित्याह अत्रापीति बह्वृ चैःऋग्वेदिभिःकिंतद्गीतमित्यर्थतःप्रतीकयति सत्यमिति ओमितियत्प्रोक्तंअर्थिनंप्रतितत्सत्यंतथेतिसंवेदनीयमित्यर्थः नेतियदाहार्थिनंप्रतितदनृतं हिशब्दउभयोर्विरोधमाह ३८ कुतोत्राह सत्यमिति पुष्पमेवफलंयस्यतत्पुष्पफलं जीवतःप्राणधारकस्यात्माख्यवृक्षस्यसत्यंपुष्पफलंविद्यात् पुष्पंचफलंवपुष्पफलमितिवा यथाऽशुष्कस्यवृक्षस्यपुष्पफलेस्यातांतथात्मनः सत्यलक्षणेपुष्पफलेवि द्यादित्यर्थः तदुक्तं पुष्पंहिफलंवाचःसत्यंवदतीतिआत्मवृक्षेऽजीवतिशुष्कलक्षणमरणेसतितत्सत्यलक्षणंपुष्पफलंनस्यात् आत्मनःआत्मवृक्षस्यअनृतंसर्वस्वादानलक्षणंमूलंस्थितिकारणं अथैतन्मूलंवा

एषतेस्थानमैश्वर्यंश्रियंतेजोयशःश्रुतम् ॥ दास्यत्याच्छिद्यशक्रायमायामाणवकोहरिः ३२ त्रिभिःक्रमैरिमाँल्लोकान्विश्वकायःक्रमिष्यति ॥ सर्वस्वंविष्ण वेदत्वामूढवर्तिष्यसेकथम्३३क्रमतोगांपदैकेनद्वितीयेनदिवंविभो ॥ खंचकायेनमहतातार्तीयस्यकुतोगतिः ३४ निष्ठांतंनरकंमन्येह्यप्रदातुःप्रतिश्रुतम् ॥ प्रतिश्रुतस्ययोनीशःप्रतिपादयितुंभवान् ३५ नतद्दानंप्रशंसंतियेनवृत्तिर्विपद्यते ॥ दानंयज्ञस्तपःकर्मलोकवृत्तिमतोयतः ३६ धर्मायययशसेऽर्थायका मायस्वजनायच ॥ पंचधाविभजन्वित्तमिहामुत्रचमोदते ३७ अत्रापिबह्वृचैर्गीतंशृणुष्वासुरसत्तम ॥ सत्यमोमितियत्प्रोक्तंयन्नेत्याहानृतंहितत् ३८ सत्यंपुष्पफलंविद्यादात्मवृक्षस्यजीवतः ॥ वृक्षेजीवतितत्रस्यादनृतंमूलमात्मनः ३९ तद्यथावृक्षउन्मूलःशुष्यत्युद्वर्ततेचिरात् ॥ एवंनष्टानृतःसद्यआत्मा शुष्येन्नसंशयः ४० पराग्रिक्तमपूर्णंवाअक्षरंयत्तदोमिति ॥ तद्यत्किंचोमितिब्रूयान्नसरिष्येतवैपुमान् ४१ भिक्षवेसर्वमोंकुर्वन्नालंकामेभ्यआत्मने ॥ अथै तत्पूर्णमभ्यात्मंयच्चनेत्यनृतंवचः ४२

चायदनृतमितिच ३९ विपक्षेबाधकमाह तद्यथेति तद्यथातथोदाहरिष्यामः उन्मूलःउत्खाताशिफःवृक्षःशुष्यति अचिरादुद्वर्त्ततेनश्यतिच एवंनष्टानृतःनष्टमूलः सद्यस्तत्क्षणमेवशुष्येत्शुष्यतिनश्यति तद्यथावृक्षआविर्मूलःशुष्यतिसउद्वर्त्ततएवमेवानृतंवदन्नाविर्मूलमात्मानंकरोतिसशुष्यतिसउद्वर्तते तस्मादनृतंनवदेदितिच ४० यत्तदोमित्यक्षरमेतदपूर्णंसर्वस्वंपराक्परविषयंरिक्तंपृथक्कृतंअर्थिनंस र्वस्वंदत्तमित्यर्थस्यवाचकंवदेदित्यर्थःपराग्वाएतद्रिक्तमक्षरंयदेतदोमितिच फलितमाह तदिति तत्तस्मात्पुमान्यत्किंचस्वजीवनातिरिक्तंधनंओंदास्यामीतिब्रूयात्ब्रवीतिसनरिष्येतवैननश्यतीत्यन्वयः तद्यत्किंचोमित्याहात्रैवास्मैतद्रिच्यतइतिरिच्यतेसंपन्नोभवतीत्यर्थः ४१ तात्पर्यादुक्तंबाधकांतरेणद्रढयति भिक्षवइति भिक्षवेयाचमानायसर्वमोंकुर्वन्सर्वस्वंददन्कामेभ्योविषयाणांदत्तस्वादात्मनेनालं आत्मनोभोज्याभावेनपर्याप्तोनभवतिनष्टोभवतीत्यर्थःअथतस्मान्नेत्यनृतंयद्वचएतदभ्यात्मंआत्मानंप्रतिपूर्णसर्वस्वादानेस्वजीवनंसंपन्नंभवतीत्यर्थः अतिथिंप्रतिसर्वंनदास्यामीतिब्रूयात्तर्हिआत्मानंपूर्णसर्व स्वंजीवनंसमृद्धंभवतीतिपूर्वेणसंबंधःपूर्णंसपचम् ४२

किंच नत्यातिथिप्रतिब्रूयादितियागावभागःकर्तव्यः तथाह आतायमातोकधनदारधामभूपाशाहतपुष्कलतृणोदपात्रम् [illegible] प्यदानेचअदृष्टविरोधेनदुष्कीर्त्याजीवन्मृतत्वंस्यात्तस्माच्चावद्विहितंकर्तव्यमिति सयत्सर्वमोंकुर्याद्विष्णवादात्मानंसकामेभ्योनालंस्यादयैतत्पूर्णमभ्यात्मंयन्नेतिब्रूयात्पापिकास्यकीर्तिर्जायेत सेनंतत्रैव हन्यात्तस्मात्कालएवदद्यात्कालेनदद्यात्तत्सत्पानृतेमिथुनीकरोति तयोर्मिथुनात्प्रजायतेभूयान्भवतियोवैतांवाचंवेदेति । आत्मानंरिक्थात्शून्यंकुर्यात् ननुप्रतिश्रुताप्रदानेमहान्दोषःस्यादित्याशंक्यषेन स्यादित्याह स्त्रीष्वितिनर्मनर्मणिहिंसायांत्रैवर्णिकविषयायां नस्त्रीपुराजन्नविवाहकालेप्राणात्ययेसर्वधनापहारइत्यादिसिद्धमेतत् ४३ इतिश्रीभागवतेअष्टमस्कंधेवि० कृ० टी० अष्टादशोध्यायः ॥१८॥ भ क्तिविधानार्थंत्रिविक्रमावतारमाहात्म्यंवक्तुमस्मिन्नध्याये तत्रादौबलेःसत्यसंधनिश्चयमाह बलिरिति १ योदानादिधर्मार्थादिकंस्वजीवनसाधनंनबाधेतननश्यतिसोयंगृहस्थानांधर्मःइतियदुक्तंतत्स त्यंअबाधितमित्यन्वयः २ तथेवानुष्ठेयोधर्मइतिनेत्याहसइति योददामीतिप्रतिज्ञायास्थितःसोहंमत्याचक्षेनदास्यामीतिनिषेधंकरोमीति कुतःप्राणादिःकितवोधूर्तः ३ ४ ५ ननुवित्तलोभाभा

सर्वंनेत्यर्थिनंब्रूयात्सदुष्कीर्तिश्वसन्स्मृतः ॥ स्त्रीषुनर्मविवाहेचवृत्त्यर्थेप्राणसंकटे ॥ गोब्राह्मणार्थेहिंसायां नाचृतंस्याज्जुगुप्सितम् ४३ इतिश्रीभागवतेअ ष्टमस्कंधेअष्टादशोध्यायः ॥ १८ ॥ ७ ॥ श्रीशुकउवाच ॥ बलिरेवंगृहपतिःकुलाचार्येणभाषितः ॥ तूष्णींभूत्वाक्षणंराजन्नुवाचावहितोगुरुम् १ ब लिरुवाच ॥ सत्यंभगवतात्प्रोक्तंधर्मोयंगृहमेधिनां ॥ अर्थकामंयशोवृत्तंयोनबाधेतकर्हिचित् २ सचाहंवित्तलोभेनप्रत्याचक्षेकथंद्विजम् ॥ प्रतिश्रुत्यद दामीतिप्राह्लादिःकितवोयथा ३ नह्यसत्यात्परोधर्मइतिहोवाचभूरियम् ॥ सर्ववोढुमलंमन्येऋतेऽलीकपरंनरम् ४ नाहंबिभेमिनिरयान्नाधर्म्यादसु खार्णवात् ॥ नस्थानच्यवनान्मृत्योर्यथाविप्रप्रलोभनात् ५ यद्यद्वास्यतिलोकेस्मिन्संपरेतोधरादिकम् ॥ तस्यात्यागेनिमित्तंकिंविप्रस्तुष्येततेनचेत् ६ श्रेयःकुर्वंतिभूतानांसाधवोदुस्त्यजासुभिः ॥ दध्यङ्शिबिप्रभृतयःकोविकल्पोधरादिषु ७ यैरियंभुज्यतेब्रह्मन्दैत्येंद्रैरनिवर्तिभिः ॥ तेषांकालोग्रसी ल्लोकान्नयशोधिगतंभुवि ८ सुलभायुधिविप्रर्षेह्यनिवृत्तास्तनुत्यजः ॥ नतथातीर्थआयातेश्रद्धयायेधनत्यजः ९

वेस्वजीवनहानिःस्यादित्याशंक्यपदानेनाविप्रालंबुद्धिरेवप्रयोजिकानान्येत्याशयेनाह तस्येति यत्प्रतिश्रुतंतेनवित्तेनविप्रोयदितुष्येततर्हितस्यवित्तस्यात्यागेअदानेनिमित्तंकारणंकिंनाकिमपि ६ स्व जीवनंकारणंचेन्नेत्याह श्रेयइति केतेसाधवइतितत्राह दध्यङ्इति दध्यङ्नाथर्वणोदेवेभ्यःस्वदेहंशिबिःकपोताय ततःप्रकृतेकिंतत्राह कोविकल्पइति दित्सितेषुधरादिषुविकल्पःदास्यामिनवेति संशयःकःनकोपीत्यर्थः ७ सतिविभवेर्थिनिचप्राप्तेलोभाददातृणामैहिकामुष्मिकसुखंनसेत्स्यतीत्याशयेनाह यैरियमिति अनिवर्त्तिभिःयुद्धइतिशेषः कालोयमःस्वर्गादिलोकानग्रसीत्ग्रस्तवान् येलोकदानशीलानांसतानाप्नोतिपुष्कलानितिस्मृतिसिद्धलोकानसंतीत्यर्थः ८ पात्राभावान्नदास्यांतितस्मिन्सातिदातारःसुलभाइतितत्राह यथायुधियुद्धादानेवृत्तास्तनुत्य जःशरीरत्यागिनःसुलभा स्तथातीर्थेपात्रेप्राप्तेश्रद्धयाधनत्यजः धनदातारोनसुलभाइत्यन्वयः तीर्थमंत्रान्नुपाध्यायेशास्त्रेष्वंभसिपावने पात्रोपायावतारेषुस्त्रीपुष्पेयोनियज्ञयोरितियादवः परांचिच्छीर्षावनृजुस्तइंद्रायज्वा नोयज्वभिःस्पर्धमानाइति ९

ननुसर्वस्वदानेस्वजीवनहानिलक्षणक्लेशःस्यादितियदुक्तंतत्राह मनस्विनइति अर्थकामाययाचमानायकामितार्थदानेनोपनयोगृहंप्रतिप्रस्थापनंयत्तेनदुर्गतिर्दारिद्र्यलक्षणनाशोभवतीतियत्तत्कारुणिकस्यमनस्विनउदारस्यशोभनमिहामुत्रसुखसाधनंस्यात् भवादृशांब्रह्मविदांसर्वस्वदानात्क्लेशःसुखहेतुरिति किंपुनःकिमुवक्तव्यं फलितमाह ततइति १० अयंबटुरपियःकश्चननभवतीतिदर्शयन्स्वस्यहरिविषयंज्ञानंसूचयन्नाह यजंतीतिक्रतुभिःसंकल्पैःसप्ततंतुसंज्ञैर्वा ११ ब्रह्मतनुंब्राह्मणंबटुं १२ जिहासतित्यक्तुमिच्छति मामां एनांगां १३ अश्राद्धितंअश्रद्धयोपेतंप्रहितः प्रेरितः सत्यसंधंसत्यप्रतिज्ञं १४ १५ १६ जालकैःकुड्मलैःकृतामालास्याअस्तीतिजालकमालिनीजालकंकोरकंकलिकाकुड्मलमुकुलानितुल्यानीतिहलायुधः अपांभृतंपूर्णजलंअवनेजनीप्रक्षालनमिच्छंती १७ १८ आर्यज्ञानि

मनस्विनःकारुणिकस्यशोभनंयदर्थकामोपनयेनदुर्गतिः ॥ कुतःपुनर्ब्रह्मविदांभवादृशांततोबटोरस्यददामिवांछितम् १० यजंतियज्ञक्रतुभिर्यमादृता भवंतआम्नायविधानकोविदाः ॥ सएषविष्णुर्वरदोस्तुवापरोदास्याम्यमुष्मैक्षितिमीप्सितांमुने ११ यद्यप्यसावधर्मेणमांबध्नीयादनागसम् ॥ तथाप्येनंनहिंसिष्येलीनंब्रह्मतनुंरिपुम् १२ एषवाउत्तमश्लोकोनजिहासतियद्यशः ॥ हत्वामैनांहरेद्युद्धेशयीतानिहतोमया १३ ॥ श्रीशुकउवाच ॥ एवमश्राद्धितंशिष्यमनादेशकरंगुरुः ॥ शशापदैवप्रहितःसत्यसंधंमनस्विनम् १४ दृढंपंडितमान्यज्ञस्तब्धोस्यस्मदुपेक्षया ॥ मच्छासनातिगोयस्त्वमचिराद्भ्रश्यसे श्रियः १५ एवंशप्तःस्वगुरुणासत्यान्नचलितोमहान् ॥ वामनायददावेतामर्चित्वोदकपूर्वकम् १६ विंध्यावलिस्तदागत्यपत्नीजालकमालिनी ॥ आनिन्येकलशंहैममवनेजन्यपांभृतम् १७ यजमानःस्वयंतस्यश्रीमत्पादयुगंमुदा ॥ अवनिज्यावहन्मूर्ध्नितदपोविश्वपावनीः १८ तदासुरेंद्रंदिविदेवतागणा गंधर्वविद्याधरसिद्धचारणाः ॥ तत्कर्मसर्वेभिगृणंतआर्यप्रसूनवर्षैर्ववृषुर्मुदान्विताः १९ नेदुर्मुहुर्दुंदुभयःसहस्रशोगंधर्वकिंपूरुषकिन्नराजगुः ॥ मनस्विना नेनकृतंसुदुष्करंविद्वानदाद्यद्रिपवेजगत्त्रयम् २० तद्वामनंरूपमवर्धताद्भुतंहरेरनंतस्यगुणत्रयात्मकम् ॥ भूःखंदिशोद्यौर्विवराःपयोधयस्तिर्यङ्नृदेवाऋषयोयदासन् २१ कायेबलिस्तस्यमहाविभूतेःसहर्त्विगाचार्यसदस्यएतत् ॥ ददर्शविश्वंत्रिगुणंगुणात्मकेभूतेंद्रियार्थाशयजीवयुक्तम् २२ रसामचष्टांघ्रितलेथपादयोर्महींमहीध्रान्पुरुषस्यजंघयोः ॥ पतत्त्रिणोजानुनिविश्वमूर्तेरूर्वोर्गणंमरुतामिंद्रसेनः २३ संध्यांविभोर्वाससिगुह्यऐक्षत्प्रजापतीन्जघनेस्वात्ममुख्यम् ॥ नाभ्यांनभःकुक्षिषुसप्तसिंधूनुरुक्रमस्योरसिऋक्षमालाम् २४ हृद्यंगधर्मस्तनयोर्मुरारेर्ऋतंचसत्यंचमनस्यथेंदुम् ॥ श्रियंचवक्षस्यरविंदहस्तांकंठेचसामानिसमस्तरेफान् २५ इंद्रप्रधानानमरान्भुजेषुतत्कर्णयोःककुभोद्यौश्चमूर्ध्नि ॥ केशेषुमेघाञ्छ्वसनंनासिकायामक्ष्णोश्चसूर्यंवदनेचवह्निम् २६

नंअसुरेंद्रम् १९ विद्वान्दानफलंशत्रुरितिवा स्वजातिरिपवेवामनायजगत्त्रयमदादितियत्तस्मादनेनमनस्विनाबलिनासुदुष्करंकृतमित्युक्ताजगुः २० भूखादयोयस्मिन्रूपेआसन्सावकाशंस्थिताःतद्वामनमणुनरंरूपमवर्धतेत्यन्वयः गुणत्रयस्यात्माकृतिर्यैनतत्तथातत् आत्माजीवेकृतौदेहेस्वभावेपरमात्मनि यक्षेर्कग्रैमतौवातेप्याखुःसूकरमूषकाविति यादवाः २१ अर्थाःशब्दादयःआशयोमनोबुद्धिर्वा २३ महीध्रान्पर्वतान् इंद्रसेनोबलिः २३ स्वात्ममुख्यंभृत्येषुमुख्यं ऋक्षमालांनक्षत्रपंक्तिम् २४ समस्तरेफान्सर्वशब्दान् २५ २६

रसेरसनायांमन्युंक्रोधाभिमानिनंदेवं २७ रेतसउदूतं २८ २९ ३० वैद्याधरावैद्याधरसंज्ञौ ३१ ३२ ।कथंतर्यतमवयतातंतत्राह ।ज्ञानमिति २२ २० २१ [illegible]

एकोनविंशोध्यायः ॥ १२ ॥ सर्वस्वापहरणेपिभगवद्भक्तस्याण्वपिमनोदुःखंनस्यादितिदर्शयितुमुत्तराध्यायारंभः तत्रादौब्रह्मणोतिथेरागमनेपादार्चनादिगार्हस्थ्यधर्मप्रदर्शनप्रकारंवक्ति सतमिति हतास्वधाम्नःसत्यनाम्नोद्युतिर्यस्यसतथा नस्तेदुभिर्हरेरितिशेषः आवृतःपरिवारैरितिशेषः अभ्यगात्पाददेशमितिशेषः १ २ यस्यहरेःस्मरणानुभावःनिरंतरोपास्तिप्रभावस्तस्मात् । अनुभावःप्रभावेस्पा

वाण्यांचछंदांसिरसेजलेशंभुवोर्निपेधंचविधिंचपक्ष्मसु ॥ अहश्चरात्रिंचपरस्यपुंसोमन्युंललाटेधरएवलोभम् २७ स्पर्शेचकामंनृपरेतसोंभःपृष्ठेत्वधर्मं क्रमणेषुयज्ञम् ॥ छायासुमृत्युंहसितेचमायांतनूरुहेष्वौषधिवीरुधश्च २८ नदाश्चनाडीषुशिलानखेषुबुद्धावजंदेवगणानृषींश्च ॥ प्राणेषुगात्रेस्थिरजंगमानि क्षणार्धमात्रेणविवृद्धमूर्तेः २९ सर्वात्मनीदंभुवनंनिरीक्ष्यसर्वेऽसुराःकश्मलमापुरंग ॥ सुदर्शनंचक्रमसह्यतेजोधनुश्चशार्ङ्गंस्तनयित्नुघोषम् ३० पर्जन्यघोषोजलजःपांचजन्यःकौमोदकीविष्णुगदातरस्विनी ॥ वैद्याधरोसिःशतचंद्रयुक्तस्तूणोत्तमावक्षयसायकौच ३१ सुनंदमुख्याउपतस्थुरीशंस्वपार्षदमुख्याःसहलोकपालाः ॥ स्फुरत्किरीटांगदमीनकुंडलश्रीवत्सरत्नोत्तममेखलांबरैः ३२ मधुव्रतस्रग्वनमालयावृतोरराजराजन्भगवानुरुक्रमः ॥ क्षितिंपदैकेनबलेर्विचक्रमेनभःशरीरेणदिशश्चबाहुभिः ३३ पदंद्वितीयंक्रमतस्त्रिविष्टपंनवैतृतीयस्यतदीयमण्वपि ॥ उरुक्रमस्यांघ्रिरुपर्यधोदिवोमहर्जनाभ्यांतपसःपरंगतः ३४ ॥ इतिश्रीभागवतेअष्टमस्कंधेएकोनविंशोध्यायः ॥ १९ ॥ श्रीशुकउवाच ॥ सतंसमीक्ष्याब्जभवोनखेंदुभिर्हतस्वधामद्युतिरावृतोभ्यगात् ॥ मरीचिमिश्राऋषयोबृहद्व्रताःसनंदनाद्यानरदेवयोगिनः १वेदोपवेदानियमायमान्वितास्तर्केतिहासांगपुराणसंहिताः॥ येवापरेयोगसमीरदीपितज्ञानाग्निनारंधितकर्मकल्मषाः २ ववंदिरेयत्स्मरणानुभावतःस्वायंभुवंधामगताअकर्मकम् ॥ अथांघ्रयेप्रोन्नमितायविष्णोरुपाहरत्पद्मभवोर्हणादिकम् ३ समर्च्यभक्त्याभ्यगृणाच्छुचिश्रवायन्नाभिपंकेरुहसंभवःस्वयम् ४ धातुःकमंडलुजलंतदुरुक्रमस्यपादावनेजनपवित्रतयानरेंद्र ॥ स्वर्धुन्यभून्नभसिसापततीनिमार्ष्टिलोकत्रयंभगवतोविशदेवकीर्तिः ५ ब्रह्मादयोलोकनाथाःस्वनाथायसमाहृताः ॥ सानुगाबलिमाजहुरसंक्षिप्तात्मभूतये ६ तोयैःसमर्हणैःस्रग्भिर्दिव्यगंधानुलेपनैः ॥ धूपैर्दीपैःसुरभिभिर्लाजाक्षतफलांकुरैः ७ स्तवनैर्जयशब्दैश्चकीर्तिभिर्नियमांकितैः ॥ वृत्तवादित्रगीतैश्चशंखदुंदुभिनिःस्वनैः ८ जांबवान्ऋक्षराजस्तुभेरीशब्दैर्मनोजवः ॥ विजयंदिक्षुसर्वासुमहोत्सवमघोषयत् ९ महींसर्वांहृतांदृष्ट्वात्रिपदव्याजयाच्ञया ॥ ऊचुःस्वभर्तुरसुरादीक्षितस्यात्यमर्षिताः १० नवाअयंब्रह्मबंधुर्विष्णुर्मायाविनांवरः ॥ द्विजरूपप्रतिच्छन्नोदेवकार्यंचिकीर्षति ११ त्रिश्चयेभावसूचकइतियादवः।

स्वायंभुवंस्वयंभुवोब्रह्मणोविद्यमानंधामब्रह्मसत्यलोकंगताःमरीचिप्रधानास्तस्यअकर्मणाज्ञानेनाप्राप्यंयत्तत्पदंववंदिरइत्यन्वयः ३ यस्यहरेस्तस्यविष्णोस्तत्कमंडलुजलंस्वर्धुनीस्वर्गंगानदीअभूत् निमार्ष्टिशुद्धंकरोति ४ ५ असंक्षिप्तासंकोचरहिता अपरिमितात्मभूतिःस्वरूपश्रीर्येनसतथातस्मैभूतिःश्रीर्जन्मभरमनिहतिच ६ ७ ८ ९ १० अयंब्रह्मबंधुर्नवैकिंस्विद्विष्णुः ११

१२ १३ १४ १५ १६ १७ स्वांस्वांस्वस्यप्राप्तांश्चसुरसेनां १८ १९ २० पौरुषैःपुरुषकारैः २१ २२ २३ २४ २५ रसांरसातलं २६ विराट्पक्षिराट्कृतोःसौत्येहानिकृतोःसोमपानदिवसे २७ २८ २९ ३० पदत्रयमितंभूरमिताऽतःकथंतृतीयमुपकल्पयेत्युच्यतइतितत्राह यावदिति ३१ अस्तुभूमेरियत्तातथापिलक्षणशास्त्रलक्षितपदस्याणुत्वेनतन्मितत्वेनकिमनुपपन्नमित्याशंक्यैदंपदमलौकिकमित्याशयेनापूर्तिमाह पदेति ३२ आत्मनाप्रतिश्रुतंस्ववित्तमदातुस्तवयतोनष्टप्रातिश्रुस्तस्मात् ३३ किंच यःप्रतिश्रुतंनपूरयतितस्यस्वर्गमाप्रवानीतिमनोरथोमृषाभवति प्रतिश्रुतैकदेशदाने

अनेनयाचमानेनशत्रुणाबटुरूपिणा ॥ सर्वस्वंनोहृतंभर्तुर्न्यस्तदंडस्यबार्हिषि १२ सत्यव्रतस्यसततंदीक्षितस्याविशेषतः ॥ नानृतंभाषितुंशक्यंब्रह्मण्यस्यदयावतः १३ तस्मादस्यवधोधर्मोभर्तुःशुश्रूषणंचनः ॥ इत्यायुधानिजगृहुर्बलेरनुचरासुराः १४ तेसर्वेवामनंहंतुंशूलपट्टिशपाणयः ॥ अनिच्छतोबलेराजन्प्राद्रवन्जातमन्यवः १५ तानभिद्रवतोदृष्ट्वादितिजानीकपाबृप ॥ प्रहस्यानुचराविष्णोःप्रत्यषेधन्तदायुधाः १६ नंदःसुनंदोथजयोविजयःप्रबलोबलः ॥ कुमुदःकुमुदाक्षश्चविष्वक्सेनःपतत्रिराट् १७ जयंतःश्रुतदेवश्चपुष्पदंतोथसात्वतः ॥ सर्वेनागायुतप्राणाःस्वांस्वांतेजसुरासुरीम् १८ हन्यमानान्स्वकान्दृष्ट्वापुरुषानुचरैर्बलिः ॥ वारयामाससंरब्धान्काव्यशापमनुस्मरन् १९ हेविप्रचित्तेहेराहोहेहेतेश्रूयतांवचः ॥ मायुद्ध्यतनिवर्तध्वंननःकालोयमर्थकृत् २० यःप्रभुःसर्वभूतानांसुखदुःखोपपत्तये ॥ तंनातिवर्तितुंदैत्याःपौरुषैरीश्वरःपुमान् २१ योनोभवायप्रागासीदभवायदिवौकसाम् ॥ सएवभगवानद्यवर्ततेतद्विपर्ययः २२ बलेनसचिवैर्बुद्ध्यादुर्गमंत्रौषधादिभिः ॥ सामादिभिरुपायैश्चकालेनात्येतिवैजनः २३ भवद्भिर्निर्जिताह्येतेबहुशोनुचराहरेः ॥ दैवरुद्धास्तएवाद्ययुधिजित्वानदंतिनः २४ एतान्वयंविजेष्यामोयदिदैवंप्रसीदति ॥ तस्मात्कालंप्रतीक्षध्वंयोनोर्थत्वायकल्पते २५ ॥ श्रीशुकउवाच ॥ पत्युर्निगदितंश्रुत्वादैत्यदानवयूथपाः ॥ रसांनिर्विविशूराजन्विष्णुपार्षदताडिताः २६ अथतार्क्ष्यसुतोज्ञात्वाविराड्विभुचिकीर्षितम् ॥ बबंधवारुणैःपाशैर्बलिंसौत्येहनिक्रतोः २७ हाहाकारोमहानासीद्रोदस्योःसर्वतोदिशम् ॥ गृह्यमाणेसुरपतौविष्णुनाप्रभविष्णुना २८ तंबद्धंवारुणैःपाशैर्भगवानाहवामनः ॥ नष्टश्रियंस्थिरप्रज्ञमुदारयशसंनृप २९ पदानित्रीणिदत्तानिभूमेर्मह्यंत्वयासुर ॥ द्वाभ्यांक्रांतामहीसर्वातृतीयमुपकल्पय ३० यावत्तपत्यसौगोभिर्यावदिंदुःसहोडुभिः ॥ यावद्वर्षतिपर्जन्यस्तावतीभूरियंतव ३१ पदैकेनमयाक्रांतोभूर्लोकोविवरैःसह ॥ स्वर्लोकस्तुद्वितीयेनपश्यतस्तेमयात्मना ३२ प्रतिश्रुतमदातुस्तेनिरयेवासइष्यते ॥ विशत्वंनिरयंतस्माद्गुरुणाचानुमोदितः ३३ विप्रायप्रतियोश्रुत्यनतदर्पयतेक्वचित् ॥ वृथामनोरथस्तस्यदूरंस्वर्गात्पतत्यधः ३४ विप्रलब्धोददामीतित्वयाहंचाढ्यमानिना ॥ तद्व्यलीकफलंभुंक्ष्वनिरयंकतिचित्समाः ३५ ॥ ॥ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेविंशोध्यायः ॥ २० ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

नापिमनोरथःस्यादितिचेत्सत्यंतत्फलंस्वर्गंप्राप्नोति पुनस्ततोऽदानदोषेणनिकृष्टांतिरश्चांयोनिमाप्नोतीत्याह दूरमिति अधःपतित्वादूरंयातीत्यर्थः ३४ प्रतिश्रुतैकदेशदानात्फलप्राप्तिःस्यादित्यभ्युपगम्यचेदमुक्तं तवतदपिनस्यात्किंतुनिरयनिवासएवविप्रलंभदोषादित्याह विप्रलब्धइतितत्तस्माद्व्यालीकफलमनृतफलं ३५ ॥ ॥ इतिश्रीभागवतेअष्टमस्कंधेवि० कृ० टी० विंशोध्यायः ॥ २० ॥

बलिःस्वात्मनोलोकंप्रकारांतरेणपरिहर्तुमाह एवमिति १ प्रलंभनंवंचकफलम् । विप्रलंभनंकथंनभवेदितितत्राह पदमिति २ स्वात्मनाऽहंलक्षणसामग्रीमाह विभमात्ति ३ आमश्चात्मत्वदर्शयात उक्ता मिति ४ पारोक्ष्यंसाक्षात्कारमंतरेणतस्यमदस्यभ्रंशोयेनततथा ५ ततोवैरानुबंधेनवैरपुत्रस्नेहेन ६ ७ ननुकृतोन्यथाचभावइत्याशंक्यश्रुतप्रह्लादमाहात्म्यानुस्मरणादित्याशयेनाह पितामहइति साधुरि सिवादःसाधुवादःस्तुतिलक्षणःविचित्रवैशसंनानाहिंसनंत्वमेवपरमोयस्यसतथा ८ श्रीप्रह्लादःकथाचर्यायाअतिप्रियदेहादिकमुत्सृज्यश्रीहरिचरणैकशरणमापेतितत्राह किमिति योयेनात्मनादेहेनमुदं जहातितद्वियोगलक्षणमरणेनेतिशेषःतस्यपुंसःतेनदेहेनकिंनकिमपिप्रयोजनमित्यर्थःरिक्थहारैःपितृधनस्वीकारयोग्यैरेभिरायुषाव्ययोनाशइतियत्तस्माद्दुर्जनसंगाद्भीतःस्वपक्षोऽसुरजनः तस्यनाशकस्य

श्रीशुकउवाच ॥ एवंविप्रकृतोराजन्बलिर्भगवतासुरः ॥ भिद्यमानोप्यभिन्नात्माप्रत्याहाविक्लवंवचः १ बलिरुवाच ॥ यद्युत्तमश्लोकभवान्ममेरितंव चोव्यलीकंसुरवर्यमन्यसे ॥ करोम्यृतंतन्नभवेत्प्रलंभनंपदंतृतीयंकुरुशीर्ष्णिमेनिजम् २ बिभेमिनाहंनिरयात्पदच्युतोनपाशबंधाद्व्यसनाद्दुरत्ययात् ॥ नैवार्थकृच्छ्राद्भवतोविनिग्रहादसाधुवादाद्भृशमुद्विजेयथा ३ पुंसांश्लाघ्यतमंमन्येदंडमर्हत्तमार्पितम् ॥ यंनमातापिताभ्रातासृहृदश्चादिशंतिहि ४ त्वंनूनमसुराणांनःपारोक्ष्यंपरमोगुरुः ॥ योनोनेकमदांधानांतद्धंशंचक्षुरादिशः ५ यस्मिन्वैरानुबंधेनरूढेनविबुधेतराः ॥ बहवोलेभिरेसिद्धिंयामिहैकांतयोगिनः ६ तेनाहंनिगृहीतोस्मिभवताभूरिकर्मणा ॥ बद्धश्चवारुणैःपाशैर्नाव्रीडेनचविव्यथे ७ पितामहोमेभवदीयसंमतःप्रह्लादआविष्कृत साधुवादः ॥ भवद्विपक्षेणविचित्रवैशसंसंप्रापितस्त्वत्परमःस्वपित्रा ८ किमात्मनानेनजहातियोमुदंःकिंरिक्थहारैःस्वजनाख्यदस्युभिः ॥ किंजाय यासंसृतिहेतुभूतयामर्त्यस्यगेहैःकिमिहायुषोव्ययः ९ इत्थंसनिश्चित्यपितामहोमहानगाधबोधोभवतःपादपद्मम् ॥ ध्रुवंप्रपेदेह्यकुतोभयंजनाद्भीतः स्वपक्षक्षपणस्यसत्तमः १० अथाहमप्यात्मरिपोरतवांतिकंदैवेननीतःप्रसभंत्याजितश्रीः ॥ इदंकृतांतांतिकवर्तिजीवितंययाध्रुवंस्तब्धमतिर्नबुध्यते ११ श्रीशुकउवाच ॥ तस्येत्थंभाषमाणस्यप्रह्लादोभगवत्प्रियः ॥ आजगामकुरुश्रेष्ठराकापतिरिवोत्थितः १२ तमिंद्रसेनःस्वपितामहंश्रियाविराजमानंनलि नायतेक्षणम् ॥ प्रांशुंपिशंगांबरमंजनत्विषंप्रलंबबाहुंसुभगंसमैक्षत १३ तस्मैबलिर्वारुणपाशयंत्रितःसमर्हणंनोपजहारपूर्ववत् ॥ ननाममूर्ध्नाश्रुविलोल लोचनःसव्रीडनीचीनमुखोबभूवह १४ सतत्रहासीनमुदीक्ष्यसत्पतिंसुनंदनंदाद्यनुगैरुपासितम् ॥ उपेत्यभूमौतरसामहामनाननाममूर्ध्नापुलकाश्रुविह्व लः १५ ॥ प्रह्लादउवाच ॥ त्वयैवदत्तंपदमैंद्रमूर्जितंहृतंत्वयैवाद्यतथैवशोभनम् ॥ मन्येमहानस्यकृतोप्यनुग्रहोविभ्रंशितोयच्छ्रियआत्ममोहनात् १६

९ १० ममाप्ययमेवनिश्चयइतिभावेनाह अथेति असुरजातित्वान्ममशत्रुभूतस्य । त्वयात्याजितराज्यश्रीः बुभूषुणेयंश्रीर्बलादपित्याज्याअन्यथानर्थयोगएवेतिभावेनाह इदमिति ययाश्रियास्तब्ध मतिःकृतांतांतिकवर्त्तीदंजीवितंनजानातीत्यन्वयः ११ शुकःप्रह्लादस्यभक्त्यतिशयंदर्शयितुंबलेःस्तवनेनभगवद्भक्तिविशेषमाज्ञायागमनमितितदागमनमाह शुकइति १२ प्रांशुमुन्नतम् १३ सव्री डत्वेननीचीनमर्वाचीनंमुखंयस्यसतथा १४ १५ आत्मनोमोहहेतुभूतयाश्रियाविभ्रंशितोविगलितइतियदयंमहाननुग्रहोस्यकृतइतिमन्ये तत्तस्मात्कःपुमानात्मनोगतिंयथावदभिचष्टेनकोपि यथात्मनः स्वस्यगतिंसर्वत्रस्वातंत्र्यलक्षणामभिचष्टेतथाकःपरमात्मनोगतिंस्थितिंस्वातंत्र्यलक्षणांपश्यति श्रीमदांधत्वान्नपश्यतीतिवा १६

१७ १८ स्वभर्तृगर्वोद्रेकंकटाक्षीकृत्यभगवंतंसमीडे क्रीडार्थंमिति वेत्वयेदंत्रिजगदात्मनःक्रीडार्थंकृतामितिसांगरितंकेचित् क्रीडार्थंसृष्टिरित्येकइतिश्रुतेः हेईशतत्रापरेकुधियोऽसुरप्रकृतयः आत्मनः स्वाम्यंकुर्युः वयमस्यस्वामिनइतिजल्पंतिजल्पंकुर्वंति तत्रापितुशब्दोमहाविशेषंप्रकाशयति तेनतवस्वाम्यस्यनकामापिहानिमापादयंतिइत्याह कर्तुरिति त्वयाऽवरोपितोविचालितोहंकर्त्तेतिविवादेयेषांतेतथा अतएवत्यक्तलज्जास्तेकुधियोस्यजगतःकर्त्तुःप्रभोराधिपतेस्तवकिमावहंति नाकिमपिहानिंकुर्वंतीत्यर्थः समर्थोधिपतौप्रभुरितिच १९ २० २१ २२ बंधनादिकमासुरजन्मदोषापहरणायत्वयाकृतंनतुद्वेषादन्यथातववैषम्यनैर्घृण्येस्यातांनतद्युक्तमित्याशयेनाह यत्पादयोरिति नविक्लवमनाःसर्वस्वदानादप्यहीनमनाः २३ यद्यपिब्रह्माभगवदभिप्रायंवेत्तितथापीतरेषांतज्ज्ञापनायस्वाभिप्रायंवक्ति ब्रह्मन्निति ब्रह्मन्प्रजापतेयन्मदःयद्धित्तनिमित्तमदः २४ नानायोनिभ्यउत्तमत्वेनमदोद्रेकहेतोरपिपुरुषयोनेर्यदृच्छयाप्राप्तौमदनुगृहीतस्यपुंसोमदोनैवोत्पद्यतइत्याह यदा

ययाहिविद्वानपिमुह्यतेजनस्तत्कोभिचष्टेगतिमात्मनोयथा ॥ तस्मैनमस्तेजगदीश्वरायवैनारायणायाखिललोकसाक्षिणे १७ ॥ श्रीशुकउवाच ॥ बद्धं वीक्ष्यपतिंसाध्वीतत्पत्नीभयविह्वला ॥ प्रांजलिःप्रणतोपेंद्रंबभाषेबाङ्मुखीनृप १८ ॥ विंध्यावलिरुवाच ॥ क्रीडार्थमात्मनइदंत्रिजगत्कृतंतेस्वाम्यंतु तत्रकुधियोपरईशकुर्युः ॥ कर्तुःप्रभोस्तवकिमस्यतआवहंतित्यक्तह्रियस्त्वदवरोपितकर्तृवादाः १९ ॥ श्रीशुकउवाच ॥ तस्यानुशृण्वतोराजन्प्रह्लादस्य कृतांजलेः ॥ हिरण्यगर्भोभगवानुवाचमधुसूदनम् २० ॥ ब्रह्मोवाच ॥ भूतभावनभूतेशदेवदेवजगन्मय ॥ मुंचैनंहृतसर्वस्वंनायमर्हतिनिग्रहम् २१ कृत्स्नातेऽनेनदत्ताभूर्लोकाःकर्मार्जिताश्चये ॥ निवेदितंचसर्वस्वमात्माविक्लवयाधिया २२ यत्पादयोरशठधीःसलिलंप्रदायदूर्वांकुरैरपिविधायसतींसपर्याम् ॥ अप्युत्तमांगतिमसौभजतेत्रिलोकींदत्वानविक्लवमनाःकथमार्त्तिमृच्छेत् २३ ॥ श्रीभगवानुवाच ॥ ब्रह्मन्यमनुगृह्णामितद्वित्तंविधुनोम्यहम् ॥ यन्मदःपुरुषस्तब्धोलोकंमांचावमन्यते २४ यदाकदाचिज्जीवात्मासंसरन्निजकर्मभिः ॥ नानायोनिष्वनीशोयंपौरुषींगतिमाव्रजेत् २५ जन्मकर्मवयोरूपविद्यैश्वर्यधनादिभिः ॥ यद्यस्यनभवेत्स्तंभस्तत्रायंमदनुग्रहः २६ मानस्तंभनिमित्तानांजन्मादीनांसमंततः ॥ सर्वश्रेयःप्रतीपानांहंतमुद्योन्मत्परः २८ एषदानवदैत्यानामग्रणीःकीर्तिवर्धनः ॥ अजैषीदजयांमायांसीदन्नपिनमुह्यति २८ क्षणाद्विभ्रंशितःस्थानाल्लक्ष्मीबद्धश्चशत्रुभिः ॥ ज्ञातिभिश्चपरित्यक्तोयातनामनुयापितः २९ गुरुणाभर्त्सितःशप्तोजहौसत्यंनसुव्रतः ॥ छलैरुक्तोमयाधर्मोनायंत्यजतिसत्यवाक् ३० एवंमेप्रापितःस्थानंदुःप्रापममरैरपि ॥ सावर्णेरंतरस्यायंभवितेंद्रोमदाश्रयः ३१

कदाचिदिति अयंजीवात्मानिजकर्मभिर्नानायोनिषुसंसरन्कदाचिद्दैववशात्पौरुषींगतिमाव्रजेत् २५ तत्रपौरुषगतौयद्यस्यजीवात्मनोमदर्चनादौस्तंभस्तंद्रीलक्षणानभवेत्तर्ह्ययंमदनुग्रहःमत्कटाक्षपातलक्षणइतिज्ञातव्यम् २६ स्वभक्तलक्षणमाह मानस्तंभेति पंचम्यर्थेजन्मादीनामितिषष्ठी २७ एतल्लक्षणदर्शनायदवीयान्मार्गोनगंतव्यःकिंत्वत्रैवेतिभावेनाह एषदानवेति अजयां अजेयां नजयोयस्याःसाजयेति २८ यातनांतीव्रवेदनाम् २९ सत्यत्यागनिमित्तक्षीणत्वादिकंप्राप्तोपिसत्यंनत्यक्तवानित्यन्वयः ३० भवतास्मैकिमनुग्रह्यतेत्वद्भक्तायेतितत्राह एवमिति किंतत्स्थानमत्राह सावर्णेरिति ३१

तर्हितावत्पर्यंतमाशयोद्रेकवदेवंविधैश्वर्यमनुभूयस्थीयतांकिंतत्राह तावत्सुतलमिति तत्रान्येषामापद्दशानुभवानास्ताकपुनरस्यातत्रावस्थानं [illegible]
थंगमिष्यामीतिशंकामाभूदित्याह इंद्रसेनेति ३३ मृतवदेकःकथंगमिष्यामीत्यतउक्तं ज्ञातिभिरिति स्वर्गस्थैरर्थ्यचेत्स्पर्द्धयालोकेशामामुपद्रविष्यंतीतितत्राह नत्वामिति ३४ राज्यंत्यक्त्वागतस्यतव
शासनेवर्यंनतिष्ठामइतितिष्ठतांदंडमाह त्वच्छासनेति किंबहुनोक्तेनसर्वतोमद्रक्षावश्यंतवास्तीत्याह सर्वतइति ३५ नकेवलंसन्निधानविशेषाद्रक्ष्यामिकिंतुमत्यक्षतएवेत्यतउक्तं तत्रमामिति तत्राप्ययमन
र्थस्तदवस्थएवदानवादीनांसंसर्गादितिचशंकामाभूदित्याह तत्रदानवेति ३६ सद्यःकुंठइत्येकंपदंसद्यःकुंठःछेदोपस्यसतथाअवनंक्ष्यतीति विनंक्ष्यतीतिपाठेनिर्मूलोभविष्यतीत्यर्थः ३७ इ०भा०अष्टमस्कं
धेवि०टी०एकविंशोध्यायः ॥२१॥ भगवतिभक्तिमतःपुरुषस्यकिमपिदुःसाध्यंनास्तीत्येतत्प्रपंच्यतेस्मिन्नध्याये तत्रबलेर्दैत्यान्नाकरणंवक्तुमाह इत्युक्तवंतमिति भक्तेरुत्कलउद्रेकोयस्यसतथा १ समुद्यतःऊ

तावत्सुतलमध्यास्तांविश्वकर्मविनिर्मितम् ॥ यत्राधयोव्याधयश्चक्लमस्तंद्रिपराभवः ३२ नोपसर्गानिवसतांसंभवंतिममेच्छया ॥ इंद्रसेनमहाराजया
हिभोभद्रमस्तुते ३३ सुतलंस्वर्गिभिःप्रार्थ्यैज्ञातिभिःपरिवारितः ॥ नत्वामभिभविष्यंतिलोकेशाःकिमुतापरे ३४ त्वच्छासनातिगान्दैत्यान्चक्रंमेसू
दयिष्यति ॥ रक्षिष्येसर्वतोहंत्वांसानुगंसपरिच्छदम् ३५ सदासन्निहितंवीरतत्रमांद्रक्ष्यतेभवान् ॥ तत्रदानवदैत्यानांसंगात्तेभवआसुरः ३६ दृक्षाम
दनुभावंवैसद्यःकुंठोविनंक्ष्यति३७ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेबलिविमोक्षणंनामएकविंशोध्यायः ॥२१॥ श्रीशुकउवाच ॥ इत्युक्तवंतंपुरुषंपुरा
तनंमहानुभावोखिलसाधुसंमतः ॥ बद्धांजलिर्बाष्पकलाकुलेक्षणोभक्त्युत्कलोगद्गदयागिराब्रवीत् १ बलिरुवाच ॥ अहोप्रसादोस्यकृतःसमुद्यतःप्रपन्न
भक्तार्थविधौसमाहितः ॥ यल्लोकपालैस्तदनुग्रहोमरैरलब्धपूर्वोपसदेऽसुरेर्पितः २ श्रीशुकउवाच ॥ इत्युक्त्वाहरिमानम्यब्रह्माणंसभवंततः ॥ विवेशसु
तलंप्रीतोबलिर्मुक्तःसहासुरैः २ एवमिंद्रायभगवान्प्रीत्यानीयत्रिविष्टपम् ॥ पूरयित्वादितेःकाममशासत्सकलंजगत् ४ लब्धप्रसादनिर्मुक्तंपौत्रंवंशधरं
बलिम् ॥ निशाम्यभक्तिप्रवणःप्रह्लादइदमब्रवीत् ५ ॥ प्रह्लादउवाच ॥ ॥ नेमंविरिंचोलभतेप्रसादंनश्रीर्नशर्वःकिमुतापरेते ॥ यन्नोसुराणाम
सिदुर्गपालोविश्वाभिवंद्यैरभिवंदितांघ्रिः ६ यत्पादपद्ममकरंदनिषेवणेनब्रह्मादयःशरणदाश्नुवतेविभूतीः ॥ कस्माद्वयंकुसृतयःखलयोनयस्तेदाक्षिण्यद
ष्टिपदवींभवतःप्रणीताः ७

र्ध्ववर्धमानस्यास्यतवप्रसादोअहो कुतोविस्मयइत्यतउक्तं कृतइति स्वेनेतिशेषः इतोपिविस्मयइत्याह प्रपन्नइति समाहितःएकाग्रीकृतोन्यत्रानवसरदुस्थइत्यर्थः त्वमपितेष्वेकःकिंनस्यादित्यतआत्मा
नंधिक्करोति यल्लोकेति असुरजातावप्यपसदेअयमेअलब्धपूर्वइतियथायोग्यमितिज्ञातव्यं २ ३ ४ लब्धप्रसादश्चनिर्मुक्तश्चतं ५ विश्वाभिवंद्यैर्ब्रह्मादिभिरभिवंदितांघ्रिःश्रीकांतोसुराणामपिनोदुर्गपालो
द्वारपालआसीदिति यदिमंप्रसादंविरिंचादिभिर्नलभ्यतेइत्यन्वयः ६ कुसृतयःकुत्सितमार्गास्तत्रहेतुमाह खलयोनयइति तस्यतेतवकस्माद्धेतोर्दाक्षिण्यदृष्टिपदवींप्रणीताःभक्तानुकंपित्वमंतरेणेतिशेषः
यमेवैषवृणुतेतेनलभ्यइतिश्रुतेः ७

भवत्स्वरूपत्वादाहितमपिलोकविलक्षणमितिभावेनाह चित्रमिति तवचित्रंनानाविधमीहितंचेष्टितमहो अहोहिहविस्मयइतियादवःतत्कथमितितत्राह विषमेति विषमस्वभावोसिमक्तप्रियोसिकल्प तरुस्वभावोसियत्तस्माद्विस्मयःसमदृशोविषमस्वभावत्वंसर्वात्मनोभक्तप्रियत्वेनकल्पतरुस्वभावत्वंचविस्मयहेतुरित्यर्थः ८ बलिप्रह्लादयोर्भगवद्भक्तत्वेपिबलेर्बंधनादिदुःखमभूत्तत्किंनिमित्तमितिशंकाव लिरप्यसुरावेशात्स्तुवन्नपिजनार्दनम् आक्षिपत्यंतराक्रापिप्रह्लादोनेत्यभक्तिमानित्यनेननपरिहर्तव्या आक्षेपफलंदुःखमित्यर्थः ९ १० ११ १२ १३ कर्मवितन्वतोस्ययत्तद्ब्रह्मभिर्ब्राह्मणैर्दृष्टं निरूपितंकर्मसुवैषम्यमंतरायोपहतिःयथासंविहितफलप्रदत्वेनसमर्थंभवेत्तथातवाशिष्यस्यबलेः कर्मणोवैषम्यलक्षणमपराधंसंतनुपरित्रहतंकुरु कर्मैरंधंसमुन्नतंकुरुवा छिद्रंरंध्रापराधयोरित्यभिधानंब

चित्रंतवेहितमहोमितयोगमायालीलाविसृष्टभुवनस्यविशारदस्य ॥ सर्वात्मनःसमदृशोविषमस्वभावोभक्तप्रियोयदसिकल्पतरुस्वभावः ८ श्रीभगवा
नुवाच ॥ वत्सप्रह्लादभद्रंतेप्रयाहिसुतलातलम् ॥ मोदमानःस्वपौत्रेणज्ञातीनांसुखमावह ९ नित्यंद्रष्टासिमांतत्रगदापाणिमवस्थितम् ॥ मद्दर्शनमहाह्लाद
न्यस्तकर्मनिबंधनः १० श्रीशुकउवाच ॥ आज्ञांभगवतोराजन्प्रह्लादोबलिनासह ॥ बाढमित्यमलप्रज्ञोमूर्ध्न्याधायकृतांजलिः ११ परिक्रम्यादिपुरुषं
सर्वासुरचमूपतिः ॥ प्रणतस्तदनुज्ञातःप्राविवेशमहाबिलम् १२ अथाहोशनसंराजन्हरिर्नारायणोंतिके ॥ आसीनमृत्विजांमध्येसदसिब्रह्मवादिनाम्
१३ ब्रह्मन्संतनुशिष्यस्यकर्माच्छिद्रंवितन्वतः ॥ यत्तत्कर्मसुवैषम्यंब्रह्मदृष्टंसमंभवेत् १४ शुक्रउवाच ॥ कुतस्तत्कर्मवैषम्यंयस्यकर्मेश्वरोभवान् ॥ यज्ञेशो
यज्ञपुरुषःसर्वभावेनपूजितः१५मंत्रतस्तंतत्रश्छिद्रंदेशकालार्हवस्तुतः॥ सर्वंकरोतिनिश्छिद्रमनुसंकीर्तनंतव१६तथापिवदतोभूमन्करिष्याम्यनुशासनम्॥
एतच्छ्रेयःपरंपुंसांयत्तवाज्ञानुपालनम् १७ अभिनंद्यहरेराज्ञामुशनाभगवानिति ॥ यज्ञच्छिद्रंसमतनोद्बलेर्विप्रर्षिभिःसह १८ एवंबलेर्महींराजन्भिक्षित्वा
वामनोहरिः ॥ ददौभ्रात्रेमेंद्रायत्रिदिवंयत्पैर्हृतम् १९ प्रजापतिपतिर्ब्रह्मादेवर्षिपितृभूमिपैः ॥ दक्षभृग्वंगिरोमुख्यैःकुमारेणभवेनच २० कश्यप
स्यादितेःप्रीत्यैसर्वभूतभवायच ॥ लोकानांलोकपालानामकरोद्दामनंपतिम् २१ वेदानांसर्वदेवानांधर्मस्ययशसःश्रियः ॥ मंगलानांव्रतानांचकल्पंस्व
र्गापवर्गयोः २२ उपेंद्रंकल्पयांचक्रेपतिंसर्वविभूतये ॥ तदासर्वाणिभूतानिभृशंमुमुदिरेनृप २३ ततस्त्विंद्रःपुरस्कृत्यदेवयानेनवामनम् ॥ लोकपालै
र्दिवंनिन्येब्रह्मणाचानुमोदितः २४ प्राप्यत्रिभुवनंचेंद्रउपेंद्रभुजपालितम् ॥ श्रियापरमयाजुष्टोमुमुदेगतसाध्वसः २५ ब्रह्माशर्वःकुमारश्चभृग्वाद्यामुन
योनृप ॥ पितरःसर्वभूतानिसिद्धावैमानिकाश्चये २६ सुमहत्कर्मतद्विष्णोर्गायंतःपरमाद्भुतम् ॥ धिष्ण्यानिस्वानितेजग्मुरदितिंचशशंसिरे २७ सर्वमे
तन्मयाख्यातंभवतःकुलनंदन ॥ उरुक्रमस्यचरितंश्रोतृणामघमोचनम् २८

ह्मणादृष्टंवा १४ सतिछिद्रेतत्परिहारस्तदेवनास्ति अस्तिचेदापितवनामसंकीर्तनंनिश्छिद्रंकरोतीतिवक्तुंशनेत्याह शुक्रइति यज्ञपुरुषोभवान्यस्यबलेःकर्मेश्वरःकुतःयज्ञेशइति अनेनसर्वयज्ञस्वामित्वंतव विद्यतेकिमुतैतच्चज्ञस्वामित्वंबलेस्त्वद्भक्तत्वादितिसूचितं तस्यबलेःकर्मवैषम्यंकुतोहेतोःस्यादित्यन्वयः सर्वभावेनसर्वदानेनपूजितइत्यस्माच्च १५ तवानुसंकीर्तनंमंत्रतस्तंत्रतश्छिद्रंसर्वदेशकालोचितव स्तुतोपथातथानिश्छिद्रंपूर्णंकरोतित्यन्वयः १६ १७ १८ १९ २० २१ २२ २३ ततःबलिपज्ञशालायाः २४ २५ २६ २७ २८

ब्रह्मादिमहिमातिरिक्तमहिमत्वेमुरारेश्चरितस्यसंसाराख्यायसंघातविघातदक्षत्वंघटतामपितत्कथमित्याशङ्क्यप्रमाणपूर्वकतदाह पारमाहब्रह्मेतावष्णानुकंपायाणभवाच्च नतावष्णाजायमानानजायमान मंत्रदृग्वेददृष्टाऋषिरित्याह यस्यपुरुषस्ययोमर्त्यःपार्थिवानिरजांसिपार्थिवपरमाणून्विममेमानंकरोत्यपि छंदसिव्यत्ययोबहुलमितिवचनाल्लडर्थेलिट्जातोजायमानःउतजनिष्यमाणोवासमर्थःमहि म्नःपारंसमाप्तिउपैतीतिकिंनैवोपेतीत्यन्वयःपुरुषःकइतितत्राह मुरारिरिति सयदुतिलकइतिनेत्याह उरुविक्रमतइति उरुमहत्यथाभवतितथेतिक्रियाविशेषणंकविरप्यतिक्रांतदर्शयतीतिवा २९ यस्तस्याद्भुतकर्मणोदेवदेवस्यहरेरवतारानुचरितंशृण्वन्ततेसपरांगतिंवैकुंठाख्यांयातीत्यन्वयः ३० अन्यविषयकर्मसमयेपिकीर्त्यमानामिदंभगवत्कर्मपूर्णफलप्रदंकरोतीत्याह क्रियमाणइति अथ मंगलेदैवप्रभृतिकर्मणिक्रियमाणेसतीदमवतारानुचरितंयत्रयत्रकर्मणिकीर्त्यतेतेषांपुंसांतत्तत्कर्मसुकृतंपूर्णफलदानसमर्थंविदुर्ज्ञानिनइतिशेषः३१ इतिश्रीभागवतेअष्टमस्कंधेवि०टी०द्वाविंशोध्यायः॥२२॥

पारंमहिम्नउरुविक्रमतोमुरारेर्यःपार्थिवान्यपिकविर्विममेरजांसि ॥ किंजायमानउतजातउपैतिमर्त्यइत्याहमंत्रदृगृषिःपुरुषस्ययस्य २९ यइदंदेवदेवस्यह रेरद्भुतकर्मणः ॥ अवतारानुचरितंशृण्वन्यातिपरांगतिम् ३० क्रियमाणेकर्मणीदंदैवेपित्र्येथमानवे ॥ यत्रयत्रानुकीर्त्यैततत्तेषांसुकृतंविदुः ३१ ॥ इति श्रीभागवतेअष्टमस्कंधेद्वाविंशोध्यायः ॥२२॥ राजोवाच ॥ भगवञ्छ्रोतुमिच्छामिहरेरद्भुतकर्मणः ॥ अवतारकथामाद्यांमायामत्स्यविडंबनाम् १ यद र्थमदधद्रूपंमात्स्यंलोकजुगुप्सितम् ॥ तमःप्रकृतिदुर्मर्षंकर्मग्रस्तइवेश्वरः २ एतन्नोभगवन्सर्वंयथावद्वक्तुमर्हसि ॥ उत्तमश्लोकचरितंसर्वलोकसुखावहम् ३ सूतउवाच ॥ इत्युक्तोविष्णुरातेनभगवान्बादरायणिः ॥ उवाचचरितंविष्णोर्मत्स्यरूपेणयत्कृतम् ४ ॥ श्रीशुकउवाच ॥ गोविप्रसुरसाधूनांछंदसा मपिचेश्वरः ॥ रक्षामिच्छंस्तनूर्धत्तेधर्मस्यार्थस्यचैवहि ५ उच्चावचेषुभूतेषुचरन्वायुरिवेश्वरः ॥ नोच्चावचत्वंभजतेनिर्गुणत्वाद्धियोगुणैः ६ आसीदती तकल्पांतेब्राह्मोनैमित्तिकोलयः ॥ समुद्रोपप्लुतास्तत्रलोकाभूरादयोनव ७ कालेनागतनिद्रस्यधातुःशिशयिषोर्बली ॥ मुखतोनिःसृतान्वेदान्हयग्रीवोंति केहरत् ८ ज्ञात्वातद्दानवेंद्रस्यहयग्रीवस्यचेष्टितम् ॥ दधारशफरीरूपंभगवान्हरिरीश्वरः ९ तत्रराजऋषिःकश्चिन्नाम्नासत्यव्रतोमहान् ॥ नारायणपरोतप्य त्तपस्तत्सलिलाशये १० योसावस्मिन्महाकल्पेतनयःसविवस्वतः ॥ श्राद्धदेवइतिख्यातोमनुत्वेहरिणार्पितः ११ एकदाकृतमालायांकुर्वतोजलतर्पणम् ॥ तस्यांजल्युदकेकाचिच्छफर्येकाभ्यपद्यत १२

अंशिज्ञानवदंशज्ञानमपिमुक्तिसाधनंगुणाद्यविशेषादितिदर्शनायमत्स्यावतारचरितमनुवर्तयत्यस्मिन्नध्याये तत्रश्रुतवामनावतारचरितसुधापानाद्वितृष्णइवपुनरपिराजादशावताराणामादित्वेनमत्स्या वतारमाहात्म्यंश्रोतुंपृच्छतिराजेति मायामत्स्यस्यविडंबनंयस्यांसातथा १ कथंजुगुप्सितमभूदितितत्राह तमःप्रकृतीति तमःस्वभावोयस्यसतथा दुर्मर्षंसोढुमशक्यं कर्मग्रस्तोजीवः २ लोकजुगु प्सितंचेत्किमितिवक्तव्यमत्राह उत्तमेति ३ ४ ५ ननूच्चावचेषुसुरनरादिसंज्ञेषुभोगायतनशरीरेषुवर्तमानस्यहरेरिंद्रियगुणैरवलेपोपिसंभाव्यतेदेवदत्तवदितितत्राह उच्चावचेष्विति धीशब्देनेंद्रियाण्यु पलक्षयति ६ आदितएववक्तुमुपक्रमते आसीदिति समुद्रैरुपप्लुताआलीनाः ७ अंतिकेविदूरतः ८ ९ १० कोसौसत्यव्रतइतितत्राह योसाविति ११ १२

अंजलितोयेन १३ १४ सःमनुःशफर्याःरक्षणार्थाय १५ १६ अलब्धात्मावकाशमितिक्रियाविशेषणम् १७ १८ उदंचनंमणिकर्षं हस्तत्रयंव्यामत्रयम् १९ पदंस्थानम् २० तत्सरोवरंआत्मनाशरीरेणावृत्यव्याप्य २१ अविदासिनिअगाधेअभिन्नसेतौवा २२ अनंतरंकिमकरोदितितत्राह इत्युक्तइति जलाशयेन्हदे असंमितमसमानंसंमितंसमानंवा २३ २४ २५ एवंविधंवीर्यंयस्यसःएवंवीर्यः अह्नायझटिति व्यानशेव्याप्तः २६ विशेषसंबंधित्वान्नारंज्ञानंतदयनंयस्यसतथा ज्ञानाश्रयःकश्चिच्चेतनएवनारायणः किंनस्यादित्यतःसाक्षाद्धरिरितितुरीयमूर्तिः २७ २८ यदर्थंयत्प्रयोजनायभवतादृ

सत्यव्रतोंजलिगतांसहतोयेनभारत ॥ उत्ससर्जनदीतोयेशफरींद्रविडेश्वरः १३ तमाहसातिकरुणंमहाकारुणिकंनृपम् ॥ यादोभ्योज्ञातिघातिभ्योदीनांदीनवत्सल ॥ कथंविसृजसेराजन्भीतामस्मिन्सरिज्जले १४ ॥ श्रीशुकउवाच ॥ सजात्मनोनुग्रहार्थंप्रीत्यामत्स्यवपुर्धरम् ॥ अजानन्रक्षणार्थायशफर्याःसमनोदधे १५ तस्यादीनतरंवाक्यमाश्रुत्यसमहीपतिः ॥ कलशाप्सुनिधायैनांदयालुर्निन्यआश्रमम् १६ सातुतत्रैकरात्रेणवर्धमानाकमंडलौ ॥ अलब्धात्मावकाशंवाइदमाहमहीपतिम् १७ नाहंकमंडलावस्मिन्कृच्छ्रंवस्तुमिहोत्सहे ॥ कल्पयैकःसुविपुलंयत्राहंनिवसेसुखम् १८ सएनांततआदायन्यधादौदंचनोदके ॥ तत्रक्षिप्तामुहूर्तेनहस्तत्रयमवर्धत १९ नमएतदलंराजन्सुखंवस्तुमुदंचनम् ॥ पृथुदेहिपदंमह्यंयत्त्वाहंशरणंगता २० श्रीशुकउवाच ॥ ततआदायसाराज्ञाक्षिप्तोराजन्सरोवरे ॥ तदावृत्यात्मनासर्वंमहामीनोन्ववर्धत २१ ॥ मीनउवाच ॥ नैतन्मेस्वस्तयेराजन्नुदकंसलिलौकसः ॥ निधेहिरक्षायोगेनह्रदेमामविदासिनि २२ ॥ श्रीशुकउवाच ॥ इत्युक्तःसोनयन्मत्स्यंतत्रतत्राविदासिनि ॥ जलाशयेसंमितंतंसमुद्रेप्राक्षिपज्झषम् २३ क्षिप्यमाणस्तमाहेदमिहमांमकरादयः ॥ अदंत्यतिबलावीरमानेहोत्स्रष्टुमर्हसि २४ एवंविमोहितस्तेनवदतावल्गुभारतीम् ॥ तमाहकोभवानस्मान्मत्स्यरूपेणमोहयन् २५ नैवंवीर्योजलचरोदृष्टोस्माभिःश्रुतोपिवा ॥ योभवान्योजनशतमह्नायव्यानशेसरः २६ नूनंत्वंभगवान्साक्षाद्धरिर्नारायणोव्ययः ॥ अनुग्रहायभूतानांधत्सेरूपंजलौकसाम् २७ नमस्तेपुरुषश्रेष्ठस्थित्युत्पत्त्यप्ययेश्वर ॥ भक्तानांनःप्रपन्नानांमुख्योह्यात्मागतिर्विभो २८ सर्वेलीलावतारास्तेभूतानांभूतिहेतवे ॥ ज्ञातुमिच्छाम्यदोरूपंयदर्थंभवताधृतम् २९ नतेरविंदाक्षपदोपसर्पणंमृषाभवेत्सर्वसुहृत्प्रियात्मनः ॥ यथेतरेषांपृथगात्मनांसतामदीदृशोयद्वपुरद्भुतंहिनः ३०

मत्स्यरूपंधृतंतत्प्रयोजनपूर्वकंज्ञातुमिच्छामीत्यन्वयः २९ अहंत्वत्स्वरूपज्ञानेयोग्यइत्याह नतइति हेअरविंदाक्षयथापृथगात्मनांभिन्नविषयबुद्धीनांइतरेषांतेतवपदोपसर्पणंमुधावृथाभवेत्तदप्यनेवंविन्महत्पुण्यंकर्मकरोति तद्धास्यांततःक्षीयतइतिश्रुतिरतएवपृथगित्युक्तं सतांतथानस्यात्तत्रहेतुमाह अदीदृशइति तवाद्भुतंनोऽस्माकंइतरमत्स्यविलक्षणत्वादाश्चर्ययद्वपुःडुवप्बीजसंतानइतिधातोःजगदुत्पादनसमर्थंरूपंअदीदृशःदर्शितवानिति हियस्मात्संतएतद्रूपज्ञानेयोग्याइत्यर्थःतवविषमस्वभावत्वात्तथात्वमितिनेत्याह सर्वेति ३०

विषयसुखप्रेरकत्वात्प्रियः तदेतत्प्रयामितिश्रुतेः ३१ अद्यतनादहऊर्ध्वसप्तमेहनिनिमंक्ष्यतिनिमग्नंभविष्यति अप्ययाभाधौप्रलयसमुद्र ३२ सर्वतोभासलयजल उपस्थास्यतिसमीपमागमिष्यति सत्वैःप्राणिभिःउपबृंहितः पूरितः ३४ निरालोकेतमःप्रायेऋषीणांवर्चसाप्रकाशेनैवनान्येन ३५ दोधूयमानांइतस्ततोत्पतंतंकंप्यमानांनिचग्रीहिनिबंधनंमहाहिनापाशेन ३६ ब्राह्मीब्रह्मसंबंधिनी ३७ तव सम्यक्प्रश्नैःहृदिविवृतंस्पष्टीकृतंमयानुगृहीतंमदीयंब्रह्मेतिशब्दितंमहिमानंज्ञास्यसि ३८ अन्ववैक्षतप्रतीक्ष्यस्थितः ३९ ४० ४१ ४२ अविनाशंविनाशविरोधिजीवानांशंसुखंअविनाशंसुखयुक्तंपदंविधास्यतीतिवा ४३ ४४ वरत्रेणपाशेनमधुवन्मधुसंसारंसूदितवानितिमधुसूदनःतम् ४५ अनाद्यविद्योपहतात्मसंवित्परमात्मज्ञानंयेषांतेतथासाविद्यामूलंकारणंयस्यसतन्मूलःसचसंसारस्तन्मूलसंसारस्तस्मिन्प

इतिब्रुवाणंनृपतिंजगत्पतिःसत्यव्रतंमत्स्यवपुर्युगक्षये ॥ विहर्तुकामःप्रलयार्णवेब्रवीन्निकीर्षितंकांतजनप्रियःप्रभुः ३१ श्रीभगवानुवाच ॥ सप्तमेद्यत नादूर्ध्वमहन्येतदरिंदम ॥ निमंक्ष्यत्यप्ययांभोधौत्रैलोक्यंभूर्भुवादिकम् ३२ त्रिलोक्यांलीयमानायांसंवर्तांभसिवैतदा ॥ उपस्थास्यतिनौःकाचिद्विशालात्वांमयेरिता ३३ त्वंतावदौषधीःसर्वाबीजान्युच्चावचानिच ॥ सप्तर्षिभिःपरिवृतःसर्वसत्वोपबृंहितः ३४ आरुह्यबृहतीनावंविचरिष्यस्यविक्लवः ॥ प कार्णवेनिरालोकेऋषीणामेववर्चसा ३५ दोधूयमानांतांनावंसमीरेणबलीयसा ॥ उपस्थितस्यमेशृंगेनिबध्नीहिमहाहिना ३६ अहंत्वाम्ऋषिभिःसाकंस हनावमुदन्वति ॥ विकर्षन्विचरिष्यामियावद्ब्राह्मीनिशाप्रभो ३७ मदीयंमहिमानंचपरंब्रह्मेतिशब्दितम् ॥ वेत्स्यस्यनुगृहीतंमेसंप्रश्नैर्विवृतंहृदि ३८ श्रीशुकउवाच ॥ इत्थमादिश्यराजानंहरिरंतरधीयत ॥ सोन्ववैक्षततंकालंयंहृषीकेशआदिशत् ३९ आस्तीर्यदर्भान्प्राक्कूलान्राजर्षिःप्रागुदङ्मुखः ॥ निष सादहरेःपादौचिंतयन्मत्स्यरूपिणः ४० ततःसमुद्रउद्वेलःसर्वतःप्लावयन्महीम् ॥ वर्धमानोमहामेघैर्वर्षद्भिःसमदृश्यत ४१ ध्यायन्भगवदादेशंददृशेनाव मागतम् ॥ तामारुरोहविप्रेंद्रैरादायौषधिवीरुधः ४२ तमूचुर्मुनयःप्रीतंराजन्ध्यायस्वकेशवम् ॥ सवैनःसंकटादस्मादविनाशंविधास्यति ४३ सोनु ध्यातस्ततोराज्ञाप्रादुरासीन्महार्णवे ॥ एकशृंगधरोमत्स्योहैमोनियुतयोजनः ४४ निबद्धचनावंतच्छृंगेयथोक्तोहारिणापुरा ॥ वरत्रेणाहिनातुष्टस्तुष्टावम धुसूदनम् ४५ राजोवाच ॥ अनाद्यविद्योपहतात्मसंविदस्तन्मूलसंसारपरिश्रमातुराः ॥ यदृच्छयेहोपसृतायमाप्तुर्विमुक्तिदोनःपरमोगुरुर्भवान् ४६ जनोबुधोयंनिजकर्मबंधनःसुखेच्छयाकर्मसमीहतेऽसुखम् ॥ यत्सेवयाताविधुनोत्यसन्मतिंग्रंथिंविभिंद्याद्धृदयेसनोगुरुः ४७

रिभ्रमस्ततोआतुराःक्लिष्टाःयदृच्छयापूर्वजन्मार्जितपुण्याभिमुखीभूतदेवेच्छयाइहलोकेविशिष्टजन्मोपसृताः पुरुषाःयमाप्नुयुः सपरमोगुरुर्भवान्नोविमुक्तिदोस्त्वित्यन्वयः ४६ कर्मनिर्मूलनंभगवत्सेवनमेवेत्याह जनइति आत्मीयकर्मणाबंधनंयस्यसतथाअयमबुधोजनः सुखमाप्रवानीतीच्छयाकर्मसमीहतेततोसुखंदुःखमाप्नोतिइतियत्ततोबुधोजनोयस्येश्वरस्यसेवयाकर्माविषयामसन्मतिं विधुनोति अतः कर्मनिर्मूलनंचाप्नोतिगुरुर्ज्ञानोपदेष्टासनोहृदयेस्थितांग्रंथिंकर्मपाशकृतांभिंद्यादित्यन्वयः ४७

एषपुमान्यत्सेवयाआत्मनस्तमोलक्षणंमलंविजह्याज्जहातिनिजंवर्णंपरमात्मगतिंआनंदस्वरूपंचभजेतभजते कथमिव अग्निदाहलक्षणसेवयारुद्ररोदनंहिरण्यंस्वमलंदशविधंजह्यात्जहातिनिजवर्णंशास्त्रात्स
द्धंस्वरूपंभजतियथातथेत्यर्थः किंच सजीवःपुनरव्ययोऽसंवृतः आवरणरहितोभवति व्येञ्संवरणइतिधातोःगुरोर्गुरुःसपरमोनोमुक्तिदोभूयादित्यन्वयः ईशः मुक्तिदानसमर्थःईर्लक्ष्मीःतस्याःशंयस्मा
स्सइतिवाजातरूपंश्रीमुकुटंहिरण्यंरुद्ररोदनमित्यभिधानं सगभवानव्ययइतिवा ४८ अन्येदेवाःअन्येगुरवोजनाश्चस्वयंसमेतामिलिताःपुंसःयस्यहरेःप्रसादायुतभागलेशंकर्तुंनप्रभवंतितदनुग्रहमंतरेणे
तिशेषः अहंतंत्वामीश्वरंशरणंयामीत्यन्वयः ४९ यथांधस्यपुंसःसचक्षुर्दृष्टिमानग्रणीः अग्रतोगंताकृतःयथाचाविदुषोजनस्यबुधोजनोगुरुःकृतःशास्त्रविशारदैरितिशेषः तथासुगतिंबुभुत्सतांबोद्धु
मिच्छतांनोर्थदृक्पुरुषार्थद्रष्टासर्वदृशांसर्वेंद्रियाणांसमीक्षणःसाक्षीत्वंगुरुर्वृतःज्ञानोपदेशकत्वेनेतिशेषःअचक्षुरितिपाठेअयमर्थः त्वामंतरेणेतरेषांगुरुत्वंपुरुषार्थानुपयोगिसम्यग्ज्ञ नहीनत्वादित्याह
अचक्षुरितियथांधस्याचक्षुषोंधोग्रणीःकृतोभवतितथाऽविदुषोजनस्याबुधएवंगुरुर्भवति अंधनेवनीयमानायथांधाःउभावप्यश्रुतग्रंथाउभावपिजडात्मकावित्यादिश्रुतिस्मृतिभ्यःत्वंचार्थदृक्शिष्यस्या
पेक्षितपुरुषार्थदर्शीकुतःदर्शनसाधनत्वेनदृशोपींद्रियाणितेषांसाक्षित्वादस्माकंगुरुत्वेनवृतइति ५० एतदेवविवृणोति जनइति जनोजननाद्यभिमानीतादृशस्यजनस्यासतींगतिंइहामुत्रचोरुफलदंज्ञा
नमादिशति यथायेनज्ञानेनदुरत्ययंतमःनित्यदुःखात्मकमंधंतमःप्राप्नोति तादृशमितिशेषः यथेतिपाठेयथोपदिष्टेनदुरत्ययंतमःप्राप्येततथोपदिशति नसन्नासन्नसदसदित्याद्याकारेणेत्यर्थः अंधंतमःप्रवि

यत्सेवयाग्नेरिवरुद्ररोदनंपुमान्विजह्यान्मलमात्मनस्तमः ॥ भजेतवर्णंनिजमेषसोव्ययोभूयात्सईशःपरमोगुरुर्गुरोः ४८ नयत्प्रसादायुतभागलेशमन्येचदेवागु
रवोजनाःस्वयम् ॥ कर्तुंसमेताःप्रभवंतिपुंसस्तमीश्वरंत्वांशरणंप्रपद्ये ४९ सचक्षुरंधस्ययथाग्रणीःकृतस्तथाजनस्याविदुषोबुधोगुरुः ॥ त्वमर्थदृक्सर्वद
शांसमीक्षणोवृतोगुरुर्नःसुगतिंबुभुत्सताम् ५० जनोजनस्यादिशतेऽसतींगतिंतथाप्रपद्येतदुरत्ययंतमः ॥ त्वमव्ययंज्ञानममोघमंजसाप्रपद्यतेयेनजनो
निजंपदम् ५१ त्वंसर्वलोकस्यसुहृत्प्रियेश्वरोह्यात्मागुरुर्ज्ञानमभीष्टसिद्धिः ॥ तथापिलोकोनभवंतमंधधीर्जानातिसंतंहृदिबद्धकामः ५२ तंत्वामहंदेववरंवरे
ण्यंप्रपद्यईशंप्रतिबोधनाय ॥ भिंध्यर्थदीपैर्भगवन्वचोभिर्ग्रंथिंहृदय्यांविवृणुस्वमोकः ५३

शंतीतिश्रुतेः ज्ञानस्यसत्वेद्वैतभंगइतितत्राह त्वमितिजनोयेनज्ञानेननिजंपदंनिर्दोषत्वेनत्वद्रूपसदृशंसच्चिदानंदलक्षणमंजसाअव्यवधानेनप्रपद्येतयच्चाव्ययमक्षयंयच्चामोघमव्यभिचारितय
फलसमर्पकंत्वंतदेवज्ञानमादिशसीत्यन्वयः ५१ इतोपित्वदुपदिष्टज्ञानमेवापेक्षितपुरुषार्थसाधनंनान्यत् अनिमित्तबंधुत्वादिगुणपूर्णत्वेनसिद्धत्वेनवंचनाशंकानास्पदत्वादित्याशयेनाह त्वमिति
सुहृत्प्रत्युपकारशून्यःप्रियश्चेश्वरश्चविषयसुखस्यापीश्वरइतिवा आत्मापूर्णानंदःगुरुर्ज्ञानोपदेष्टा जानातीतिज्ञानं अभीष्टसिद्धिरपेक्षितपुरुषार्थसाधकः श्लोकः सुहृत्त्वादिगुणवंतंकुतोनजानातीति
तत्राह तथापीति यद्यप्यनिमित्तबंधुस्तथापिलोकोभवंतंनजानातिकुतःअंधधीःनष्टज्ञानत्वात् ज्ञाननाशःकस्मादित्यतउक्तंहृदीति दूरस्थत्वान्नतज्ज्ञानमित्यतउक्तंसंतमिति हृदीत्येतदुभयत्र यो
ज्यं ५२ इदानींस्वार्थंप्रकाशयति तंत्वामिति प्रतिबोधनायत्वत्स्वरूपविषयज्ञानायाहंयोज्ञानोपदेष्टृत्वादिगुणोपेतस्तंत्वांशरणंप्रपद्यइत्यन्वयः देवोत्तमत्वादयमेवशरण्यइतिभावेनोक्तं देववरमिति
सौंदर्यादिगुणभावेनत्वद्भक्तिरुदेतीतिभावेनोक्तंवरेण्यमिति उक्तगुणाअन्यत्रव्यभिचारिणोनेत्याह ईशमिति अन्यथेश्वरत्वानुपपत्तिःहृदय्यांअहंकारसंभूतांग्रंथिमर्थस्यदीपकैःप्रकाशकैःमन्मनाभ
वमद्भक्तोमद्याजीमांनमस्कुरुइत्यादिलक्षणवचोभिः किंचस्वमोकःस्वस्वरूपंस्वाश्रयंवैकुंठंवाविवृणुप्रकाशयेत्यन्वयः ओकसीमंदिराश्रयावितिच ५३

५४ सांख्ययोगक्रियावतींज्ञानभक्तिकर्मयोगवतीं पुराणसंहितामब्रवीत् इदंश्रद्धेयमितिभावेनोक्तमात्मगुह्यमिति आचार्यस्तुतगतवक्तृवदुपादष्टव [illegible] ५५ ५६
जलयाने ५६ प्रलयानामपायेअतीतेसति ततःउत्थितायवेधसेब्रह्मणेप्रत्याहरत् दैत्याहृतांस्तान्ज्ञात्वाप्रत्याहृत्यदत्तवानित्यर्थः ५७ ५८ ५९ संवादस्यपापहरत्वे अवतारकथाकीर्त्तनेनकिं
प्रयोजनमत्राह अवतारमिति अस्तुश्रवणफलं कीर्त्तनेनकिंफलमित्यतोवाह अवतारमिति ६० बुद्धिसंग्रहार्थमवतारकथांसंकलय्यकथयति प्रलयेति सुप्तशक्तेर्विषयोपरतेंद्रियशक्तेः कार्यानभि

इत्युक्तवंतंनृपतिंभगवानादिपूरुषः ॥ मत्स्यरूपीमहांभोधौविहरंस्तत्त्वमब्रवीत् ५४ पुराणसंहितांदिव्यांसांख्ययोगक्रियावतीं ॥ सत्यव्रतस्यराजर्षेरात्म
गुह्यमशेषतः ५५ अश्रौषीदृषिभिःसाकमात्मतत्त्वमसंशयम् ॥ नाव्यासीनोभगवतापोक्तंब्रह्मसनातनम् ५६ अतीतेप्रलयापायउत्थितायचवेधसे ॥ हत्वा
सुरंहयग्रीवंवेदान्प्रत्याहरद्धरिः५७सतुसत्यव्रतोराजाज्ञानविज्ञानसंयुतः ॥ विष्णोःप्रसादात्कल्पेस्मिन्नासीद्वैवस्वतोमनुः ५८ सत्यव्रतस्यराजर्षेर्मायामत्स्य
स्यशार्ङ्गिणः ॥ संवादंमहदाख्यातंश्रुत्वामुच्येताकिल्बिषात् ५९ अवतारंहरेर्योमुंकीर्त्तयेदन्वहंनरः ॥ संकल्पास्तस्यसिद्ध्यंतिसयातिपरमांगतिम् ६०
प्रलयपयसिधातुःसुप्तशक्तेर्मुखेभ्यःश्रुतिगणमुपनीतंप्रत्युपादत्तहत्वा ॥ दितिजमकथयच्चब्रह्मसत्यव्रतायतमहमखिलहेतुंजिह्ममीनंनतोस्मि ६१ इ
तिश्रीमद्भागवतेमहापुराणेपारमहंस्यांसंहितायामष्टमस्कंधेमत्स्यचरितोपाख्यानेत्रयोविंशोध्यायः ॥ २३ ॥ ॥ ७ ॥ ॥ ७ ॥

मुखीभूतप्रकृतिशक्तेर्वा अपनीतंनिःसृतंदैत्येननीतं जिह्ममीनंमायामत्स्यं अनंतशक्तिर्भगवान्मत्स्यरूपीजनार्दनः कीडार्थंयाचयामासस्वयंसत्यव्रतंनृपमित्यनेनतमाह सातिकरुणंमहाकारुणिक
मित्यादिनाविक्रीडितमितिज्ञातव्यं ॥ पदरत्नावलिर्नामअष्टमस्कंधसंगता ॥ प्रीत्यैमत्स्यात्मनोविष्णोरस्तुनिर्दोषवर्ष्मणः ६१ ॥ इतिश्रीमद्भागवतेमहापुराणेपारमहंस्यांसंहितायामष्टमस्कंधेटीकायां
विजयध्वजतीर्थभट्टारककृतौमत्स्यावतारेत्रयोविंशोध्यायः ॥ २३ ॥

॥ इति श्रीमद्भागवते अष्टमःस्कंधः समाप्तः ॥

॥ अथ श्रीमद्भागवते नवमः स्कंधः प्रारभ्यते ॥

श्रीवेदव्यासायनमः ॥ कमलाकांतंकमलाक्षंविमलानंदंप्रणम्यच ॥ नृपवंशस्कंधविलासंनवमस्कंधंविवृणोमि १ अस्मिन्स्कंधेराजवंशवर्णनेनश्रीनारायणेभक्तिविधानार्थंभगवन्माहात्म्यमेवप्रपंच्य
ते तत्रवृत्तवर्तिष्यमाणस्कंधयोःसंगतिप्रदर्शनायवृत्तानुवादपूर्वकंवैवस्वतमनोःपुत्राणांतद्वंशानामनुवंशंतच्चरितानिचराजाशुकंपृच्छति मन्वंतराणीत्यादिना वदविक्रमानित्यंतेन १ २ ३ ४
विक्रमान्वंशेजातानांपुरुषाणांचरितानि ५ राज्ञाभिषिक्तानांप्रजापालनादिलक्षणःपरमोधर्मस्तंवेत्तीति ६ ७ आत्माप्यंतर्यामीइदंविश्वंसएवासीत्तदधीनमेवाभूत्तुस्वतंत्रंकिंचनप्रधानादिक
मपि तस्माद्धान्यंनपरःकिंचनासेतिश्रुतेः ८ उदस्तादुदभूत्स्वयंभूरित्यस्याविष्णावपिचवृत्तेरित्यतश्चतुराननइत्युक्तं विष्णुःस्वयंभूरथभुक्स्वभूर्विश्वपतिःपतिरित्यभिधानम् ९ मानसोमनोजातः
ततःकश्यपात् १० ततोविवस्वतोमनोः पुत्रानाह श्रद्धायामित्यादिना आत्मवान्वशीकृतमनाः ११ १२ अप्रजस्यअपुत्रस्य इक्ष्वाकुप्रभृतिपुत्रोत्पतेःपूर्वंमित्रावरुणयोरिष्टिंमित्रा

राजोवाच ॥ मन्वंतराणिसर्वाणित्वयोक्तानिश्रुतानिमे ॥ वीर्याण्यनंतवीर्यस्यहरेस्तत्रकृतानिच १ योसौसत्यव्रतोनामराजर्षिर्द्रविडेश्वरः ॥ ज्ञानंयो
तीतकल्पांतेलेभेपुरुषसेवया २ सवैविवस्वतःपुत्रोमनुरासीदितिश्रुतम् ॥ त्वयातस्यसुताःप्रोक्ताइक्ष्वाकुप्रमुखानृपाः ३ तेषांवंशंपृथग्ब्रह्मन्वंशानुच्च
रितानिच ॥ कीर्तयस्वमहाभागनित्यंशुश्रूषतांहिनः ४ येभूतायेभविष्याश्चभवंत्यद्यतनाश्चये ॥ तेषांनःपुण्यकीर्तीनांसर्वेषांवदविक्रमान् ५ सूतउवा
च ॥ एवंपरीक्षितराज्ञासदसिब्रह्मवादिनाम् ॥ पृष्टःप्रोवाचभगवाञ्छुकःपरमधर्मवित् ६ श्रीशुकउवाच ॥ श्रूयतांमानवोवंशःसंक्षेपेणपरंतप ॥ नश
क्यतेविस्तरतोवक्तुंवर्षशतैरपि ७ परावरेषांभूतानामात्मायःपुरुषःपरः ॥ सएवासीदिदंविश्वंकल्पांतेन्यन्नकिंचन ८ तस्यनाभेरुदस्तात्सपद्मकोशोहिर
ण्मयः ॥ तस्मिन्जज्ञेमहाराजस्वयंभूश्चतुराननः ९ मरीचिर्मानसस्तस्यजज्ञेतस्यापिकश्यपः ॥ दाक्षायण्यांततोदित्यांविवस्वानभवत्सुतः १० ततो
मनुःश्राद्धदेवःसंज्ञायामासभारत ॥ श्रद्धायांजनयामासदशपुत्रान्सआत्मवान् ॥ ११ इक्ष्वाकुनृगशर्यातिदिष्टधृष्टकरूषकान् ॥ नरिष्यंतंपृषध्रंचनाभागं
चनभंविभुम् १२ अप्रजस्यमनोःपूर्ववसिष्ठोभगवान्किल ॥ मित्रावरुणयोरिष्टिंप्रजार्थमकरोद्विभुः १३ तत्रश्रद्धामनोःपत्नीहोतारंसमयाचत ॥ दुहित्र
र्थमुपागम्यप्रणिपत्यपयोव्रता १४ प्रेषितोध्वर्युणाहोतादध्यौतत्सुसमाहितः ॥ गृहीतेतेनहविषिवषट्कारंगृणन्द्विजः १५ होतुस्तद्व्यभिचारेणकन्ये
लानामसाभवत् ॥ तांविलोक्यमनुःप्राहनातिहृष्टमनागुरुम् १६ भगवन्किमिदंजातंकर्मवोब्रह्मवादिनाम् ॥ विपरीतमहोकष्टंमैवंस्याद्ब्रह्मविक्रिया १७
यूयंमंत्रविदोयुक्तास्तपसादग्धकिल्बिषाः ॥ कुतःसंकल्पवैषम्यमनृतंविबुधेष्विव १८

वरुणदैवत्यां १३ १४ सुसमाहितःएकाग्रचित्तः तच्छ्रद्धयोक्तंदध्यौवषट्कारंमंत्रविशेषंवागृणन्स्वकर्माकरोदितिशेषः १५ तस्यकर्मणोव्यभिचारेणविपक्षवर्तिनाहेतुना वाङ्निमित्त
त्वादिला वाणीसरस्वतीभाषावागिडेलाप्रकीर्तितेति १६ इदंजातंकिमितितत्राह कर्मेति ब्रह्मवादिनांवःकर्मविपरीतंपुत्रार्थिनःकन्याफलमभूदतःकिमिदमितिकुतूहलयामि अत्रैवंभूतेप्यन्य
त्रमाभूदित्याह मैवमिति ब्रह्मविदांवःक्रियामैवंभूदित्यर्थः १७ क्वचित्स्खलनेऽन्यत्रापिनियमोनस्यादित्याशंक्यक्वचिदप्यन्यथात्वंनयुक्तंयुष्माकमित्याह यूयमिति मैत्रावरुणीमिष्टिंकुर्या
स्पुत्रकामइत्यादिमंत्रहृदयज्ञाःयस्यैदेवतायैहविर्गृहीतंस्यात्तांध्यायेद्वषट्कुरिष्यन्निति वचनान्मनोयोगयुक्ताः नचदोषादन्यथात्वंमनसइत्याह तपसेति यूयमेवंविधास्तेषुयुष्मासुसंकल्पवैषम्यंचिंतितस्या

न्यथात्वंकुतोनकुतोपसंभाव्यते कुतइततत्राह अनृतामात नाहदवष्वनृतदृष्टचरतस्मादनृतनवदादावश्रुतः २२ २९ हातुव्यामचारतःध्यानस्यान्यथात्वलक्षणात् २० २१ २२ तनवरणहतुनी सैंधवांसिंधुदेशजातम् २३ २४ नाम्नासुकुमारवनंअधस्तात्स्थितम् २५ वडवामश्वस्त्रिलिंग्यां आत्मनोदेहस्यलिंगविपर्ययंपुरुषचिह्नविपरीतं स्त्रीचिह्नम् २६ २७ ॥ ॥ इतिश्रीभागवतेमहा पुराणेनवमस्कंधेविजयध्वजकृतटीकायांप्रथमोध्यायः ॥ १ ॥ ७ ॥ एवंगुणःपुरुषस्यस्त्रीत्वापवादकगुणयुक्तः १ भासास्वतेजसाविति मिराःनिरस्तांधकाराः २ नीवींवस्त्रंपर्यधाद्वेष्टितंक

तन्निशम्यवचस्तस्यभगवान्प्रपितामहः ॥ होतुर्व्यतिक्रमंज्ञात्वाबभाषेरविनंदनम् १९ एतत्संकल्पवैषम्यंहो तुस्तेव्यभिचारतः ॥ तथापिसाधयिष्येहं सुप्रजास्त्वंस्वतेजसा २० एवंव्यवसितोराजन्भगवान्समहायशाः ॥ अस्तौषीदादिपुरुषमिलायाःपुंस्त्वकाम्यया २१ तस्मैकामवरंतुष्टोभगवान्हरिरीश्व रः ॥ ददाविलाभवत्तेनसुद्युम्नःपुरुषर्षभः २२ सएकदामहाराजविचरन्मृगयांवने ॥ वृतःकतिपयामात्यैरश्वमारुह्यसैंधवम् २३ प्रगृह्यरुचिरंचापं शरांश्चपरमाद्भुतान् ॥ दंशितोनुमृगंवीरोजगामदिशमुत्तराम् २४ सुकुमारवनंमेरोरधस्तात्प्रविवेशह ॥ यत्रास्तेभगवाञ्छंभूरममाणःसहोमया २५ त स्मिन्प्रविष्टएवासौसुद्युम्नःपरवीरहा ॥ अपश्यत्स्त्रियमात्मानमश्वंचवडवांनृप २६ तथातदनुगाःसर्वआत्मालिंगविपर्ययम् ॥ दृष्ट्वाविमनसोभूवन्वीक्ष्य माणाःपरस्परम् २७ इतिश्रीभागवतेमहापुराणेनवमस्कंधेप्रथमोध्यायः ॥ १ ॥ राजोवाच ॥ कथमेवंगुणोदेशःकेनवाभगवन्कृतः ॥ प्रश्नमेनंसमाचक्ष्व परंकौतूहलंहिनः १ ॥ श्रीशुकउवाच ॥ एकदागिरिशंद्रष्टुमृषयस्तत्रसुव्रताः ॥ दिशोवितिमिराभासाःकुर्वंतस्तमुपागमन् २ तान्विलोक्यांबिकादेवीवि वस्त्राव्रीडिताभृशम् ॥ मर्तुरंकात्समुत्थायनीवीमाश्वथपर्यधात् ३ ऋषयोपितयोर्वीक्ष्यप्रसंगंरममाणयोः ॥ निवृत्ताःप्रययुस्तस्मान्नरनारायणाश्रमम् ४ तदैवंभगवानाहप्रियायाःप्रियकाम्यया ॥ स्थानंयःप्रविशेदेतत्सवैयोषिद्भवेदिति ५ ततऊर्ध्ववनंतद्वैपुरुषावर्जयंतिहि ॥ सचानुचरसंयुक्तोविचचारव नाद्वनम् ६ अथतामाश्रमाभ्याशेचरंतींप्रमदोत्तमाम् ॥ स्त्रीभिःपरिवृतांवीक्ष्यचकमेभगवान्बुधः ७ सापितंचकमेसुभ्रूःसोमराजसुतंपतिम् ॥ सतस्यां जनयामासपुरूरवसमात्मजम् ८ एवंस्त्रीत्वमनुप्राप्तःसुद्युम्नोमानवोनृपः ॥ सस्मारस्वकुलाचार्यंवसिष्ठंमितिशुश्रुम ९ सतस्यांतांदशांदृष्ट्वाकृपयाभृश पीडितः ॥ सुद्युम्नस्याशयन्पुंस्त्वमुपाधावतशंकरम् १० तुष्टःसतस्मैभगवानृषयेप्रीतिमावहन् ॥ स्वांचवाचमृतांकुर्वन्नि दमाहविशांपते ११ मासंपु मान्सभवितास्त्रीमासंतपसातव ॥ इतिव्यवस्थयाकामंसुद्युम्नोवतुमेदिनीम् १२

तवती ३ ४ भगवानाहेत्यन्वयःकथं यएतत्स्थानंप्रविशेत्सयोषिद्भवेदितिवाइत्यनेनात्मवर्जमितिसूचयति ५ तद्वैतदेवनान्यत् हिशब्दोहेतौ यतःस्त्रीत्वंस्यादतइति ६ ७ सबुधस्तस्यां स्त्रीत्वमापन्नायांसुद्युम्नाख्यायां ८ ९ दशांस्त्रीत्वलक्षणांआशयन्कामयन् उपाधावत्तासेवत १० ११ मासमितिद्वितीया त्रिंशद्दिनेष्वप्येकस्मिन्दिनेप्यनन्यथात्वंसूचयति कालाध्वनोरत्यंतसंयोगेइतिसूत्रात् १२

पुंस्त्वलक्षणंकामंजगतींराजप्रधानभूमिम् १३ दक्षिणापथस्यदेशस्यराजानः १४ परिणतःवृद्धःप्रतिष्ठानाख्यपुरपतिःगांभूमिम् ॥ १५ ॥ इतिश्रीभागवतेमहापुराणेनवमस्कंधेविजयध्वजकृतटीकायां द्वितीयोध्यायः ॥ २ ॥ सुद्युम्नेसुतेवैवस्वतःश्राद्धदेवोमनुः १ इक्ष्वाकुःपूर्वजोज्येष्ठोयेषांतेतथातान् २ मनोःपुत्राणामष्टमःपुत्रोवृषध्रः गाःपालयामासकीदृशः गुरुणावसिष्ठेनगोपालःकृतःतुशब्दे नवृषान्धारयितुंयोग्यइतिनिरुक्त्येतिसूचयति गोरक्षैकनिष्ठयानेत्रेउन्मील्यजाग्रदेवगोसंनिधानेप्रतिष्ठानाद्वीरासनव्रतः ३ निशिमेघेवर्षतिसति ४ सागौः ५ बभ्रोर्गोःशिरोहनत् बभ्रुर्गौः सौरभेयीचमाहेयीगोमतल्लिकेति गोःशिरच्छेदनेकोहेतुरितितत्राह निशीति निश्यपिनक्षत्रादिप्रकाशनेनाविवेकज्ञानंसुलभमित्यत्राह प्रलीनेति मेघच्छायाच्छादितनक्षत्रादिप्रकाशेचसति ६ वि

श्रीशुकवाच आचार्यानुग्रहात्कामंलब्ध्वापुंस्त्वंव्यवस्थया ॥ पालयामासजगतींनाभ्यनंदन्स्मतंप्रजाः १३ तस्योत्कलोगयोराजन्विमलश्चसुतास्त्रयः ॥ दक्षिणापथराजानोबभूवुर्धर्मवत्सलाः १४ ततःपरिणतःकालेप्रतिष्ठानपतिःप्रभुः ॥ पूरूरवसउत्सृज्यगांपुत्रायगतोवनम् १५ इतिश्रीभागवतेमहापुराणे नवमेद्वितीयोध्यायः ॥ २ ॥ श्रीशुकउवाच ॥ एवंगतेथसुद्युम्नेमनुर्वैवस्वतःसुते ॥ पुत्रकामस्तपस्तेपेयमुनायांशतंसमाः १ ततोयजन्मनुर्देवमपत्यार्थं हरिंप्रभुम् ॥ इक्ष्वाकुपूर्वजान्पुत्राँल्लेभेस्वसदृशान्दश २ वृषध्रस्तुमनोःपुत्रोगोपालोगुरुणाकृतः ॥ पालयामासगायंत्तोरात्र्यांवीरासनव्रतः ३ एकदा प्राविशद्गोष्ठंशार्दूलोनिशिवर्षति ॥ शयानागावउत्थायभीतास्ताबभ्रमुर्व्रजे ४ एकांजग्राहबलवान्सानुक्रोशभयातुराम् ॥ तस्यास्तुक्रंदितंश्रुत्वावृषध्रोभि ससारह ५ खड्गमादायतरसाप्रलीनोडुगणेनिशि ॥ अजानन्नहनद्बभ्रोःशिरःशार्दूलशंकया ६ व्याघ्रोविवृक्णश्रवणोनिस्त्रिंशाग्रहतस्ततः ॥ निश्चक्रामभृशंभीतोरक्तंपथिसमुत्सृजन् ७ मन्यमानोहतंव्याघ्रंवृषध्रःपरवीरहा ॥ अद्राक्षीत्स्वहृतांबभ्रुंव्युष्टायांनिशिदुःखितः ८ तंशशापकुलाचार्यःकृतागसमकामतः ॥ नक्षत्रबंधुःशूद्रस्त्वंकर्मणाभवितासुना ९ एवंशप्तस्तुगुरुणाप्रत्यगृह्णात्कृतांजलिः ॥ अधारयच्चतंवीरऊर्ध्वरेतामुनिप्रियम् १० वासुदेवेभगवतिसर्वात्मन्यमलेपरे ॥ एकांतित्वंगतोभक्त्यासर्वभूतसुहृत्समः ११ विमुक्तसंगःशांतात्मासंयताक्षोऽपरिग्रहः ॥ यदृच्छयोपपन्नेन कल्पयन्वृत्तिमात्मनः १२ आत्मन्यात्मानमाधायज्ञानतृप्तःसमाहितः ॥ विचचारमहीमेतांजडांधबधिराकृतिः १३ एवंव्रतोवनंगत्वादृष्ट्वादावाग्निमुत्थितम् ॥ तेनोपयुक्तकरणोब्रह्मप्रापपरंमुनिः १४

वृक्णश्रवणःछिन्नकर्णमूलःनिस्त्रिंशस्यखड्गस्याग्रेणहतःप्रहतः ७ निशिव्युष्टायांप्रभातायाम् ८ अकामतः बभ्रुहननेच्छाभावतोपिकृतागसंकृतापराधं अमुनाक्रूरकर्मणाशूद्रोभवितानक्षत्रबंधुरितिशशापेत्यन्वयः ९ तुशब्देनगुरावननुमूयावानित्याह कुतोवगतमेतदित्यतउक्तंप्रत्यगृह्णादिति भयात्प्रतिग्रहःकिंतस्यादित्यतउक्तंकृतांजलिरिति मुनिप्रियमूर्ध्वरेतस्त्वम् १० किंतन्मुनिप्रियंव्रतमित्यतआह वासुदेवइति एकांतित्वादिकंव्रतम् ११ संयताक्षःनियमितेंद्रियःयदृच्छयाऽसंपार्थितागतेन १२ १३ तेनदावाग्निनाउक्तकरणःस्वीकृतदेहःदग्धदेहइत्यर्थः करणंसाधकतमेशरीरेंद्रिययोरपीति १४

उक्तमेवविवृणोति कविरिति यदाशापंप्राप तदाविषयेषुनिःस्पृहःकविज्ञानीअयंवृषध्रःबंधुभिःसहसंगावेसृज्यवनावशं स्वराचपस्वयमकाशपुरुषाचत्तानवश्य कशारवयाअल्पवयाःतत्प्रसादनपरंगतइत्य न्वयः १५ मानवात् मनुपुत्रात्करूशात्कारूशाइत्येवंप्रसिद्धाआसन्नित्यन्वयःक्षत्रजातयइत्यनेनगोपालत्वादिजात्यंतरंनाप्नाःकिंतुतज्जातयएवइतिसूचयति १६ धृष्टान्मनुपुत्रान् नाभागधार्ष्टक्षत्रमभूत्तदृत्त माह ब्रह्मभूतमिति ब्रह्मत्वंश्रोत्रियत्वंगतमित्यर्थःनभस्यमनुपुत्रस्यपुत्रःस्वातिमूलःतस्यपुत्रःनाभावसुरभवत् १७ तत्पुत्रःप्रतीकपुत्रःओघवान् ओघवतस्तस्यसहोदर्योघवतीकन्याचाभवत् सुदर्शनोनामरा जा१८ नरिष्यंतान्मनुपुत्राच्चित्रसेननामासुतोभूत्तस्यचित्रसेनस्यदक्षः १९ २० अग्नेर्जातूकर्ण्यइतिनाम २१ततोजातूकर्ण्याद्ब्रह्मकुलंजातम् तदेवाग्निवेश्यायनमितिनामांतरेणप्रसिद्धं इक्ष्वाकुप्रभृतीनांच

कविस्तदायंविषयेषुनिःस्पृहोविसृज्यसंगंसहबंधुभिर्वनम् ॥ निवेश्यचित्तेपुरुषंस्वरोचिषंविवेशकैशोरवयाःपरंगतः १५ करूशान्मानवादासन्करूशाः क्षत्रजातयः ॥ उत्तरापथगोप्तारोब्रह्मण्याधर्मवत्सलाः १६ धृष्टाद्धार्ष्टमभूत्क्षत्रंब्रह्मभूतंगतंक्षितौ ॥ नभपुत्रोतिबलवान्स्वातिमूलोभवद्वसुः १७ वसोःप्र तीकस्तत्पुत्रओघवान्नोघवत्स्वसा ॥ कन्याचोघवतीनामसुदर्शनउवाहताम् १८ चित्रसेनोनरिष्यंतादक्षस्तस्यसुतोभवत् ॥ तस्यमीढ्वांस्ततःकूर्चेइंद्रसे नस्तुतत्सुतः १९ वीतिहोत्रस्त्विंद्रसेनात्तस्यसत्यश्रवाअभूत् ॥ उरुश्रवाःसुतस्तस्यदेवदत्तस्ततोभवत् २० देवदत्तस्यभगवानग्निःस्वयमभूत्सुतः ॥ कानीनइतिविख्यातोजातूकर्ण्योमहानृषिः २१ ततोब्रह्मकुलंजातमाग्निवेश्यायनंनृप ॥ नरिष्यंतान्वयःप्रोक्तोदिष्टवंशमतःशृणु २२ नाभागोदिष्टपुत्रो न्यःकर्मणावैश्यतांगतः ॥ भलंदनःसुतस्तस्यवत्सप्रीतिर्भलंदनात् २३ वत्सप्रीतेःसुतःप्रांशुस्तत्सुतःप्रमितिर्विभुः ॥ खनित्रःप्रमितेस्तस्माच्चाक्षुषोथ विविंशतिः २४ विविंशतिसुतोरंभःखनिनेत्रोस्यधार्मिकः ॥ करंधमोमहाराजतस्यासीदात्मजोनृपः २५ तस्यावीक्षित्सुतोयस्यमरुत्तश्चक्रवर्त्यभूत् ॥ संवर्तोयाजयद्यंवैमहायोग्यंगिरःसुतः २६ मरुत्तस्ययथायज्ञोनतथान्योस्तिकश्चन ॥ सर्वंहिरण्मयंत्वासीद्यत्किंचास्त्यतिशोभनम् २७ अमाद्यदिंद्रःसोमे नदक्षिणाभिर्द्विजातयः ॥ मरुतःपरिवेष्टारोविश्वेदेवाःसभासदः २८ गरुत्तस्यदमःपुत्रस्तस्यासीद्राज्यवर्धनः ॥ सुधृतिस्तत्सुतोजज्ञेसौधृतेयोनरःसुतः२९ तत्सुतःकेवलस्तस्माद्बंधुमान्वेगवांस्ततः ॥ बंधुस्तस्याभवद्यस्यतृणबिंदुर्महीपतिः ३०

तुर्थदिष्टवंशं २२ अन्यःअन्यजातीयःकथंवाणिज्यादिकर्मणावैश्यत्वंगतःदिष्टपुत्रोयइतिकेचित्पठंतिवक्ष्यमाणादन्यइतिवा २३ २४ २५ तस्यकरंधमस्यपुत्रअवीक्षित् यस्यावीक्षितोमरुत्तःसुतः मरुत्तं विशिनष्टिसंवर्तइतिस्तोकोसंवर्तइतिवत्राह महायोगीति २६ संवर्तोनामऋषिःकीदृशं यज्ञमकारयत्येनमहायोगित्वंसंभाव्यतइत्यतस्तंयज्ञंविशिनष्टि मरुत्तस्येति अनेनमरुत्तस्यापिमहायोगित्वंश्री नारायणानुग्रहपात्रत्वंसूचितं २७ द्विजातयोदक्षिणाभिरमाद्यन्संहृष्टइत्यन्वयःमरुतोदेवाःऋभवोऽमराश्चमरुतोवृंदारकाविनिर्जराइत्यभिधानं विश्वेदेवाइतिविशेषणाद्रायवोवापरिवेष्टारःसोकृणामपेक्षितां धसादिनिक्षेप्तारः सभायांसीदंत्युपविशंतीतिसभासदःप्रत्यक्षंसभायामुपविश्यसर्वंविचारयंतइत्यर्थः २८ २९ ३०

अलंबुषानामवराप्सरास्तंतृणबिंदुभेजे ३१ कीदृशीलिबिलेतितांविशिनष्टि यस्यामिति योगेश्वरोविश्रवाऋषिश्चइलिबिलायाःपितुस्तृणबिंदोःपरमांविद्यांप्रदायतामुद्वाह्ययस्यामिलिबिलायांधनाधिपंवैश्रवणमुत्पादयामासेत्यन्वयः ३२ ३३ ३४ इडस्पतिंअन्नपतिंवाक्पतिंवा ३५ वैशालभूपालाःविशालवंशेजाताभूपालाः ३६ इतिश्रीभागवतेमहापुराणेनवमस्कंधेवि०कृ०टी०तृतीयोध्यायः ॥ ३ ॥ ब्रह्मिष्ठःब्राह्मणनिष्ठःवेदनिष्ठोवा । तत्फलमाह योवाइति द्वितीयेह्रियोमंत्रोऽध्येतव्यःतत्रकल्पोक्तफलसिद्धयेतंमंत्रमध्यगादित्ययमर्थोद्वितीयमहरध्यगादित्युच्यते १ तस्यशर्यातेः २ विचिन्वंतीमृगयंती वल्मीकरंध्रेवल्मीकबिले खद्योतेखद्योतरूपे खएवद्योततइतिखद्योतः ३ सासुकन्यामुग्धभावेनअज्ञातवस्तुस्वरूपतयाबालभावत्वेनवा कंटकेनकंटकाग्रेणज्योतिषीज्योतिराश्रयेद्रव्येचक्षु

तंभेजेलंबुषादेवीभजनीयगुणालयम् ॥ वराप्सरायतःपुत्राःकन्याचेलिबिलाभवत् ३१ यस्यामुत्पादयामासविश्रवाश्चधनाधिपम् ॥ प्रदायविद्यांपरमामृषिर्योगेश्वरःपितुः ३२ विशालःशून्यबंधुश्चधूमकेतुश्चतत्सुताः ॥ विशालोवंशकृद्राजावैशालींनिर्ममेपुरीम् ३३ हेमचंद्रःसुतस्तस्यधूम्राक्षस्तस्यचात्मजः ॥ तत्पुत्रःसहदेवस्तुकृशाश्वःसहदेवजः ३४ कृशाश्वात्सोमदत्तोभूद्योश्वमेधैरिडस्पतिम् ॥ इष्ट्वापुरुषमापाद्यांगतियोगेश्वराश्रिताम् ३५ सोमदात्तिस्तुसुमतिस्तत्सुतोजनमेजयः ॥ एतेवैशालभूपालास्तृणबिंदोर्यशोधराः ३६ इतिश्रीभागवतेनवमेतृतीयोध्यायः ॥३॥ श्रीशुकउवाच ॥ शर्यातिर्मानवोराजन्ब्रह्मिष्ठःसंबभूवह ॥ योवाअंगिरसांसत्रेद्वितीयमहरध्वगात् १ सुकन्यानामतस्यासीत्कन्याकमललोचना ॥ तयासार्धंवनगतोह्यगमच्छ्यवनाश्रमम् २ सासखीभिःपरिवृताविचिन्वंत्यंघ्रिपान्वने ॥ वल्मीकरंध्रेददृशेखद्योतेइवज्योतिषी ३ दैवेनचोदिताबालाज्योतिषीकंटकेनसा ॥ अविध्यन्मुग्धभावेनसुस्रावासृक्ततोबहु ४ शकृन्मूत्रनिरोधोभूत्सैनिकानांचतत्क्षणात् ॥ राजर्षिस्तमुपालभ्यपुरुषान्विस्मितोब्रवीत् ५ अप्यभद्रंनयुष्माभिर्भार्गवस्यविचेष्टितम् ॥ व्यक्तंकेनापिनस्तस्यकृतमाश्रमदूषणम् ६ सुकन्याप्राहपितरंभीतार्किंचित्कृतंमया ॥ द्वेज्योतिषीअजानंत्यानिर्भिन्नेकंटकेनते ७ दुहितुस्तद्वचःश्रुत्वाशर्यातिर्जातसाध्वसः ॥ मुनिंप्रसादयामासवल्मीकांतर्हितंशनैः ८ तदभिप्रायमाज्ञायप्रादाद्दुहितरंमुनेः ॥ कृच्छ्रान्मुक्तस्तमामंत्र्यपुरंप्रायात्सहानुगः ९ सुकन्याच्यवनंप्राप्यपतिंपरमकोपनम् ॥ प्रीणयामासचित्तज्ञाअप्रमत्तानुवृत्तिभिः १० कस्यचित्त्वथकालस्यनासत्यावाश्रमंगतौ ॥ तौपूजयित्वाप्रोवाचवयोमेदत्तमीश्वरौ ११

षीइतियावत् असृग्रुधिरंततःविद्धचक्षुषोः ४ सैनिकानांराजसेवकानां निरोधःस्तंभनम् ५ युष्माभिर्भार्गवस्याभद्रममंगलंविचेष्टितंकिमपिकृतमेव नतत्रसंशयइत्याह व्यक्तमिति नोमध्येकेनापि पुरुषेणतस्यभार्गवस्याश्रमदूषणंव्यक्तंकृतमतइदंसेनाशकृन्मूत्रस्तंभनंभार्गवस्यविचेष्टितमितिव्यक्तमभूदितिपुनरावृत्त्यायोजनीयं ६ तेद्वेज्योतिषी तत्त्वमजानंत्यामयाकंटकेननिर्भिन्नेइत्यन्वयः ७ ८ तस्यमुनेःसुकन्यादानलक्षणमभिप्रायंज्ञात्वाकृच्छ्रान्मुक्तःसुकन्यामुनिभ्यामितिशेषः ९ परमकोपनंअत्यंतकोपशीलंभोजनससमयमंतरेणान्यमयंवृथानमुंचतीत्यभिप्रायेणीचित्तज्ञाअप्रमत्तेतिसंध्यभावइतिज्ञायते १० कस्यचित्कालस्यसमागमेदत्तंयुवामितिशेषः ११

तवयोदानेनावयोःकिंफलमितितत्राह ग्रहमिति ग्रहमाहुतिविशेषभागमसोमयोःसोमपानशून्ययोरपि १२ भिषक्तमौवैद्यश्रेष्ठौ १३ धमनीभिःशिराभिर्व्याप्तोदेहइतिशेषः स्वयमात्मनोच १४ आपञ्चाः षोडशवर्षप्रायाः १५ वरारोहायोषित् सरूपान्योग्यरूपान् १६ १७ १८ १९ हेअसतिदुर्वृत्तेजरयाग्रस्तत्वादसंमतंअध्वगंपांथम् २० अंबपुत्रिकइपंमतिरन्यथागता अन्यथोक्तंविवृणोति असतामिति असतांमार्गगतेत्यर्थः इदंत्वत्कर्ममत्कुलदूषणंत्वेव किंतत्कर्मेतितत्राह बिभर्षीति निर्लज्जाभूत्वाजारंजरयत्युभयकुलमित्युपपतिंबिभर्षियत्तस्मात् तदेवस्पष्टयति कुलमिति नयसिप्रापय

ग्रहंग्रहीष्येसोमस्ययज्ञेवामप्यसोमयोः ॥ क्रियतांमेवयोरूपंप्रमदानांयदीप्सितम् १२ बाढमित्यूचतुर्विप्रमभिनंद्याभिषक्तमौ ॥ निमज्जतांभवानास्मिन्ह्रदेसिद्धविनिर्मिते १३ इत्युक्तोजरयाग्रस्तदेहोथमनिसंततः ॥ ह्रदंप्रवेशितोश्विभ्यांस्वयंचामज्जतांह्रदे १४ पुरुषास्त्रयउत्तस्थुरापीन्द्यावनिता प्रियाः ॥ रुक्मस्रजःकुंडलिनस्तुल्यरूपाःसुवाससः १५ तान्निरीक्ष्यवरारोहासरूपान्सूर्यवर्चसः ॥ अजानतीपतिंसाध्वीअश्विनौशरणंययौ १६ दर्शयित्वापतिंतस्यैपातिव्रत्येनतोषितौ ॥ ऋषिमामंत्र्ययथतुर्विमानेनत्रिविष्टपम् १७ यक्ष्यमाणोथशर्यातिश्च्यवनस्याश्रमंगतः ॥ ददर्शदुहितुःपार्श्वेपुरुषंसूर्यवर्चसम् १८ राजादुहितरंप्राहकृतपादाभिवंदनाम् ॥ आशिषश्चाप्रयुंजानोनातिप्रीतमनाइव १९ चिकीर्षितंतेकिमिदंपतिस्त्वयाप्रलंभितोलोकनमस्कृतोमुनिः ॥ यात्वंजराग्रस्तमसत्यसंमतंविहायजारंअजसेऽमुमध्वगम् २० कथंमतिस्तेंऽबगतान्यथाऽसतांमार्गेत्वियंमत्कुलदूषणंत्विदम् ॥ बिभर्षिजारंयदपत्रपाकुलंपितुश्चभर्तुश्चनयस्यधस्तमः २१ एवंब्रुवाणंपितरंस्मयमानाशुचिस्मिता ॥ उवाचतातजामातातवैषभृगुनंदनः २२ शशंस पित्रेतत्सर्ववयोरूपाभिलंभनम् ॥ विस्मितःपरमःप्रीतस्तनयांपरिषस्वजे २३ सोमेनयाजयन्वीरंग्रहंसोमस्यचाग्रहीत् ॥ असोमयोरप्यश्विनोश्च्यवनःस्वेनतेजसा २४ हंतुंतमाददेवज्रंसद्योमन्युरमर्षितः ॥ सवज्रंस्तंभयामासभुजमिंद्रस्यभार्गवः २५ अन्वजानंस्ततःसर्वेग्रहंसोमस्यचाश्विनोः ॥ भिषजाविति यत्पूर्वंसोमाहुत्याबहिष्कृतौ २६ उत्तानबर्हिरानर्तोभूरिषेणइतित्रयः ॥ शर्यातेरभवन्पुत्राआनर्ताद्रेवतोभवत् २७ सोंतःसमुद्रेनगरींवि निर्मायकुशस्थलीम् ॥ आस्थितोऽभुंक्तविषयानानर्तादीनरिंदम २८ तस्यपुत्रशतंजज्ञेककुद्म्यिज्येष्ठमुत्तमम् ॥ ककुद्मीरेवतींकन्यांस्वामादायविभुंगतः २९ पुत्र्यावरंपरिप्रष्टुंब्रह्मलोकमपाद्रुतम् ॥ आवर्तमानेगांधर्वेस्थितोलब्धक्षणःक्षणम् ३० तदंतेविभुमानम्यस्वाभिप्रायंन्यवेदयत् ॥ तच्छ्रुत्वाभगवान्ब्रह्माप्रहस्यतमुवाचह ३१ अहोराजन्निरुद्धास्तेकालेनहृदियेकृताः ॥ तत्पुत्रपुत्रनप्तॄणांगोत्राणिचनशृण्महे ३२

सि २१ २२ २३ सोमेनहविषाअसोमयोःसोमपानरहितयोः २४ तंच्यवनंसद्योमन्युस्तदानींजातक्रोधः सवज्रंभुजम् २५ अन्वजानन्अनुज्ञातवंतः पूर्वंसोमग्रहाभावःकथंस्यादितितत्राह भिषजाविति २६ २७ कुशस्थलींद्वारवतीं २८ विभुंब्रह्माणम् २९ अपावृतंप्रकाशितं गांधर्वेगानेअलब्धक्षणःअलब्धावसरः ३० तदंतेगीतावसाने ३१ येहृदिकृतास्तेपुरुषाःकालेननिरुद्धाःमृताः न केवलंतएवनसंतितत्पुत्रादयोपिनसंतीत्याह तत्पुत्रेति नश्शृण्महेनश्शृणुमः ३२

प्रतियातस्यात्रागतस्यतेतवाश्राव्यंनरस्यश्रोतुमयोग्यंगानंमुहूर्तंमत्वा शृण्वतःकालोयातअतिक्रांतइत्यन्वयः कियानितितत्राह त्रिनवेति त्रिनवाभिःचतुर्युगैःविशिष्टत्वेनकल्पितःसप्तविंशतिचतुर्युग
भेदभिन्नइत्यर्थः ३३ तर्हिकिंकरोमिकन्याचावश्यंदातव्याताइमांकस्मैदास्यामीतितत्राह तदितिं ३४ ३५ पुण्यजनत्रासाद्राक्षसभयाद्दिक्ष्ववस्थितैर्भ्रातृभिस्त्यक्तां स्वपुरं निजपुरीमागतः
३६ ककुद्मीत्वनवद्यांगींशोभनावयवांसुतांबाहुशालिनेबलायदत्वातपस्तप्तुंबदर्याख्यंनारायणाश्रमंययावित्यन्वयः ३७॥ इतिश्रीभागवतेमहापुराणेनवमस्कंधेवि०कु०टीकायांचतुर्थोध्यायः ॥ ॥
॥ ४ ॥ ॥ ७ ॥ ॥ बह्वृचब्राह्मणप्रसिद्धोनाभागोमनुपुत्रउच्यतेततस्तस्माद्दिष्टपुत्रादन्यःकथांतरसूचकोवावेदसिद्धत्वाच्चशसातोव्याप्तोवानाभानेदिष्टइत्यन्यः ततोन्यत्राम्नाख्यातःवेदइतिशे
षोवानाभानेदिष्टंशंसतीत्यादौप्राज्ञोमेधावीज्येष्ठभ्रातरोब्रह्मचारिणंविवाहानभिमुखंयविष्ठंकनिष्ठंयंनाभागंकविं आत्मज्ञानिस्वेनातिक्रांतदर्शिनंमत्वादायंकुलपारंपर्येणप्राप्तविभागयोग्यंद्रव्यंव्यभजन्यदाक
वेर्भागमदत्वा तदासकविर्नाभागोऽवगम्यैत्यभ्रातॄनाह १ हेभ्रातरोमह्यंकिमभांक्षीति । नाभानेदिष्टंवैमानवंब्रह्मचर्यवसंतंभ्रातरोनिरभजन्सोब्रवीदित्यंकिंमह्यमभांक्षीतिब्राह्मणवाक्यसूचनायाभाक्षीतिपद
प्रयोगः । ममभागंकिमर्थंविभक्तवंतोममभागःकोवाकल्पितइतिवाप्राक्षीदितितएतमनुब्रुवन् । भजानापितरंतवेति तवापितरंभज अनगच्छ । अनचेष्टायामितिधातुः । यदितवविभागापेक्षात
र्हिगत्वातंप्रसाद्यविचारयवयंचागत्यपृच्छामइत्यर्थः एतमेवनिष्ठावंतंवदितारमित्यब्रुवन् । तस्माद्वाप्येतर्हिपितरंपुत्रादिष्टावोवदितेत्येवाचक्षतइतिच । निष्ठावंतंव्यवस्थागमकंव्यवस्थापकंअतएवा

मुहूर्तंश्रृण्वतोऽश्राव्यंप्रतियातस्यतेनघ ॥ कालोयातस्त्रिनवभिश्चतुर्युगविकल्पितः ३३ तद्गच्छदेवदेवांशोबलदेवोमहाबलः ॥ कन्यारत्नमिदंराजन्नरर
त्नायदेहिभो ३४ भुवोभारावतारायभगवान्भूतभावनः ॥ अवतीर्णोनिजांशेनपुण्यश्रवणकीर्तनः ३५ इत्यादिष्टोभिवंद्याजंनृपःस्वपुरमागतः ॥ त्य
क्तांपुण्यजनत्रासाद्भ्रातृभिर्दिक्ष्ववस्थितैः ३६ सुतांदत्वानवद्यांगींबलायबलशालिने ॥ बदर्याख्यंययौराजातपुंनारायणाश्रमम् ३७ इतिश्रीभागवते
महापुराणेनवमेचतुर्थोध्यायः ॥ ४ ॥ श्रीशुकउवाच ॥ नाभागोन्यस्ततःप्राज्ञोयंमत्वाभ्रातरःकविम् ॥ यविष्ठंव्यभजन्दायंब्रह्मचारिणमाहसः १ भ्रातरो
भांक्तकिंमह्यंभजामपितरंतव ॥ किंमआर्यास्तताभांक्षुर्मापुत्रकतदादृथाः २ इमअंगिरसःसत्रमासतेऽद्यसुमेधसः ॥ षष्ठंषष्ठमुपेत्याहःकवेमुह्यंतिकर्मणि ३

गम्यवदितारंपितरमब्रुवन्नित्यर्थः । यतोनाभागादयोनिश्चयार्थंपितरंगत्वाब्रुवंस्तस्मादेतर्हिअद्यापिपुत्राःपितरंनिर्णीयव्यवस्थापकइत्याहुरित्यर्थः । सनाभागोगत्वाभ्रातृभिःसहपितरमपृच्छत्किंमितितत्रा
ह किंमइति । हेतततातापितःमेआर्याज्येष्ठास्तद्वस्तुअभांक्षुःकिमितिपृच्छामित्वांयदाहंमोषितस्तदार्यास्त्वांव्यवस्थाप्यमेभागमदत्वाकिमर्थमभांक्षुरितिवात्वामंतरेणाभांक्षुरितित्वांहवावमह्यंततोभांक्षुरितिस
पिताप्रत्याहमेति हेपुत्रकतन्माद्दथाःतस्मिन्दायेविभागेआदरंमाकार्षीरिति। तंपिताऽब्रवीन्मापुत्रकतदादृथाइति २ तर्हिममजीवनोपायःकइतिनाभागेनपृष्टःपिताप्रत्याह इमइति । अद्यइमेसुमेधसःशो
भनप्रज्ञाआंगिरसःसत्रमासतेबहुकर्तृकेचिरकालीनेयज्ञेदीक्षितास्तिष्ठंति हेकवेतेऋषयः । षष्ठंषष्ठमहरुपेत्यतस्मिन्नहनिकर्तव्येवैश्वदेवैर्विश्वदैवत्येकर्मणिमुह्यंतित्वंमहात्मनःतान्प्रतिज्ञातव्येद्वेसूक्तेशंसयब्रूहि
तेआंगिरसः । स्वःस्वर्गंयंतोगच्छंतआत्मनःसत्रपरिशेषितंस्वसत्रेपरिशेष्टंतुष्टिसाधनंद्रव्यंतेतुभ्यंदास्यंते । अथकालक्षेपमंतरेणत्वंतान्ऋषीन्गच्छतनाभागआत्मनेपित्रायथोक्तंतथाकृतवानित्यर्थः । अं
गिरसोवाइमेस्वर्गायलोकायसत्रमासतेषष्ठंषष्ठमेवाहरागत्यमुह्यंतितानेतेसूक्तेषष्ठेहनिशंसयतेषांयत्सहस्रंसत्रपरिवेषणंतत्तेस्वर्यंतोदास्यंतीतितथेतितानुपैत्प्रातिगृह्णीतमानवंसुमेधसइतितमब्रुवन्किंकामो
वदसीतीदमेववःषष्ठमहःप्रज्ञापयानीत्यब्रवीदथयद्वएतत्सहस्रंसत्रपरिवेषणंतन्मेस्वर्यंतोदत्तेतितथेतितानेतेसूक्तेषष्ठेऽहन्यशंसयत् । ततोवैतेमयज्ञमजानन् विप्रःस्वर्गलोकंतद्यदेतेसूक्तेषष्ठेहनिशंसतियज्ञस्य

तांस्त्वंशंसयसूक्तेद्वैश्वदेवेमहात्मनः ॥ तेस्वर्यंतोधनंसत्रपरिशेषितमात्मनः ४ दास्यंतेतेऽथतान्गच्छतथासकृतवान्यथा ॥ तस्मैदत्वायगुःस्वर्ग्यंतेसत्रपरिवेषणम् ५ तंकश्चित्स्वीकरिष्यंतंपुरुषःकृष्णदर्शनः ॥ उवाचोत्तरतोभ्येत्यममेदंवास्तवंवसु ६ ममेदमृषिभिर्दत्तमितितर्हिस्ममानवः ॥ स्याद्नौतेपितरिप्रश्नःसगतःपितरंतथा ७ यज्ञवास्तुगतंसर्वमुच्छिष्टमृषयःक्वचित् ॥ चकुर्हिभागंरुद्रायसदेवःसर्वमर्हति ८ नाभागस्तंप्रणम्याहतवेशकिलवास्तुगम् ॥ इत्याहमेपिताब्रह्मन्नशिरसात्वांप्रसादये ९ यत्तेपितावदद्धर्मंत्वंचसत्यंप्रभाषसे ॥ ददामितेमंत्रदशोज्ञानंब्रह्मसनातनम् १० गृहाणद्रविणंदत्तंयत्सत्रपरिवेषितम् ॥ इत्युक्तांतर्हितोरुद्रोभगवान्सत्यवत्सलः ११

फलमाह यएतदिति कविस्तत्त्वविज्ञानीमंत्रज्ञःऋग्वेदतात्पर्यार्थज्ञानीआत्मनः स्वपरलक्षणस्यवस्तुनोगतिंस्थितिंज्ञानंवाप्राप्नोतीतिशेषः । सएषसहस्रसनिर्मंत्रोयेनाभानेदिष्ठमुपैनंसहस्रंनमतिप्रषष्टेनाह्ना स्वर्गलोकंजानातियएवंवेदेत्यनेनापिफलश्रुतेरर्थः सूचितइति यदाहनाभानेदिष्ठःसहस्रसनिः वनषणसंभक्तावितिधातोः सहस्रेत्युपलक्षणमनेकजनायधनदाता सनलाभइतिधातोरनेकविषयज्ञानलाभो पेतःमंत्रोमंत्रज्ञानीपुरुषःएवमुक्तमितिहासार्थंवेद एनंपुरुषमुद्दिश्यसहस्रंउपनमति षष्टेनाह्नाषष्ठदिनापेक्षिनसूक्तपूर्वककृत कर्मणांस्वर्गसुखज्ञानात्मकंलोकंसर्वाधारंहरिंप्रजानातीतिभावः १२ इतिश्रीभागव तेमहापुराणेनवमस्कंधेविजयध्वजकृतटीकायांपंचमोध्यायः॥५॥कृतंपूर्णब्रह्मास्यास्तीति कृतीसुकृतीवा चक्रेणसुदर्शननाम्नाप्रतिहतोनिरस्तः १ २ प्रथमतस्तस्यविरक्तिमाह अंबरीषइति मह्यादिकंतत्स र्वंस्वप्नसंमितंस्वप्नवदनित्यंमेनइत्यन्वयः अव्ययांदीर्घकालीनां विभवांहिरण्यादिलक्षणं अनेनांबरीषशब्दार्थोपिसूचितःसआविष्करिष्यते अंबादिकंरीषंनश्वरमितिज्ञानमस्यास्तीत्यंबरीषः रुषरिषहिंसा यांमत्वर्थेअच्प्रत्ययः अबरवदीषाइच्छायस्यसतथा आकाशवद्बहुलज्ञानइत्यर्थः व्यत्यासश्छांदसः अंबब्रह्मतस्यवरिर्वरणंतत्रेच्छायस्यसतथा ३ एतदेवस्पष्टयति विद्वानितिविभवानिर्वाणंहिरण्यादिसंपदां

यएतत्संस्मरेत्प्रातःसायंचसुसमाहितः ॥ कविर्भवतिमंत्रज्ञोगतिंचैवतथात्मनः १२ इतिश्रीभागवतेनवमस्कंधेपंचमोध्यायः ५ श्रीशुकउवाच ॥ ना भागादंबरीषोभून्महाभागवतःकृती ॥ नास्पृशद्ब्रह्मशापोपिचक्रप्रतिहतःक्वचित् १ राजोवाच ॥ भगवन्श्रोतुमिच्छामिराजर्षेस्तस्यधीमतः ॥ नप्रा भूद्यत्रनिर्मुक्तोब्रह्मदंडोदुरत्ययः २ ॥ श्रीशुकउवाच ॥ अंबरीषोमहाभागःसप्तद्वीपवतींमहीम् ॥ अव्ययाचश्रियंलब्ध्वाविभवंचातुलंभुवि ३ मेनेति दुर्लभंपुंसांसर्वंतत्स्वप्नसंमितम् ॥ विद्वान्विभवनिर्वाणंतमोविशतियत्पुमान् ४ वासुदेवेभगवतितद्भक्तेषुचसाधुषु ॥ प्राप्तोभावंपरंविश्वंयेनेदंलोष्टवत्स्मृ तम् ५ सवैमनःकृष्णपदारविंदयोर्वचांसिवैकुंठगुणानुवर्णने ॥ करौहरेर्मंदिरमार्जनादिषुश्रुतिंचकाराच्युतसत्कथोदये ६ मुकुंदलिंगालयदर्शनेदृ शौतद्भृत्यगात्रस्पर्शेंगसंगम् ॥ घ्राणंचतत्पादसरोजसौरभश्रीमत्तुलस्यारसनांतदर्पिते ७ पादौहरेःक्षेत्रपदानुसर्पणेशिरोहृषीकेशपदाभिवंदने ॥ कामंतु दास्येनतुकामकाम्ययातथोत्तमश्लोकजनाश्रयारतिम् ८ एवंसदाकर्मकलापमात्मनःपरेधियज्ञेभगवत्यधोक्षजे ॥ सर्वात्मभावंविदधन्महीमिमांतन्निष्ठविप्राभिहितःशशासह ९ ईजेश्वमेधैरधियज्ञमीश्वरंमहाविभूत्योपचितांगदक्षिणैः ॥ ततैर्वसिष्ठासितगौतमादिभिर्विद्वानभिस्रोतमसौसरस्वतीम् १० य स्यक्रतुषुगीर्वाणैःसदस्याऋत्विजोजनाः ॥ तुल्यरूपाश्चनिमिषाव्यदृश्यंतसुवाससः ११

नाशंक्षणिकंविद्वान्पुमान्यच्चस्माद्भिवान्मुग्धस्तमोविशति ४ परंभावमुत्कृष्टांभक्तिंयेनांबरीषेणइदंविश्वंलोष्टवत्पांसुपिंडवत्स्मृतंयेनभावेनवा ५ उत्कृष्टभक्तिमतःप्रवृत्तिंदर्शयति सवाइति ६ मुकुंद स्यलिंगंप्रतिमालक्षणंतेनयुक्तस्यालयस्य पादसरोजसौरभेणयुक्तायाम् ७ कामकाम्यया विषयतृष्णया उत्तमश्लोकस्यहरेःजनानाश्रयतीतिजनाश्रयाताम् ८ तस्मिन्हरौनिष्ठामनोयांगलक्षणायेषांते तथा तादृशैर्विप्रैरभिहितःकर्मकलापंकर्मसमूहंसर्वात्मभावंभक्तिंचेतिद्वयंभगवतिविदधत् ९ सरस्वतीमभिस्रोतंसरस्वत्या स्रोतोजलप्रवाहःसयथाभिमुखोभवतितथा सरस्वतीजलमुद्दिश्येत्यर्थः उप चितासंवर्धितायज्ञस्यांगभूतादक्षिणायेषांतेतथावै.ततैर्वेद्यासुनिपुणैर्वसिष्ठश्चासितश्चगौतमश्चादिर्येषांतेतथा.तैः १० तुल्यरूपाःरूपयौवनवस्त्राभरणादिभिःसमानवेषाःअनिमिषाःउन्मीलितलोचनाः ११

स्यांबरीषस्यमनुजैरमरप्रियःस्वर्गोपिनप्रार्थितइत्यन्वयः तत्रकिंकारणमितितत्राह शृण्वद्भिरिति अननमुकुंदचरितश्रवणगायनाभ्यामेवकस्वर्गतुल्यमपरंस्वर्गानभिलाषइत्युक्तम् ११ यस्यकाम्पंतइतिकामाविषयभोगानोअल्पत्वान्नवाञ्छिताइतिनेत्याह समृद्धाइति भोगेच्छूनामलंबुद्धिविषयामवंतीत्यर्थः समृद्धौनिमित्तमाह स्वाराज्येति स्वराज्ये स्वरूपभूतैरूर्येणपरिभाविताः प्रचिताः अतएवास्यसुलभत्वेप्यन्येषांदुर्लभाइत्याह दुर्लभाइति अत्रापीदमेवनिमित्तमाह मुकुंदमिति ११ अपरोक्षज्ञानफलमाह सइति स्वधर्मेणप्रजापालनलक्षणेन १४ कथंजहावित्यत्राह गृहेष्विति असंत्यमंगलानिअनर्थकरणानीतिमतिंबुद्धिचकार १५ अपरोक्षज्ञानित्वेपियावद्देहंमोक्षासंभवादुद्रिक्तभक्तिभास्करादुत्फुल्लहृदयांबुजस्यहरेरंबरीषेनुग्रहविशेषंदर्शयितुमाह तस्माइति १६ लोकशिक्षाप्रकटनार्थंसांवत्सरमित्युक्तंनत्वन्यकालनिषेधार्थं अन्यथाभक्तिलोपःप्रसज्येत १७ १८ संवत्सरव्रतांतेसर्वसाधनंसपदामहाभिषेकविधिः साम्राज्याभिषेकप्रकारः । वराकल्पैरुत्तमाभरणैः १९

स्वर्गोनप्रार्थितोयस्यमनुजैरमरप्रियः ॥ शृण्वद्भिरुपगायद्भिरुत्तमश्लोकचेष्टितम् १२ समृद्धायस्यनोकामाःस्वाराज्यपरिभाविताः ॥ दुर्लभाअपिसिद्धानांमुकुंदहृदिपश्यतः १३ सइत्थंभक्तियोगेनतपोयुक्तेनपार्थिवः ॥ स्वधर्मेणहरिंप्रीणन्संगान्सर्वान्छनैर्जहौ १४ गृहेषुदारेषुसुतेषुबंधुषुद्विपोत्तमस्यंदनवाजिपत्तिषु ॥ अक्षय्यरत्नाभरणायुधादिष्वनंतकोशेष्वकरोदसन्मतिम् १५ तस्माअदाद्धरिश्चक्रंप्रत्यनीकभयापहम् ॥ एकांतभक्तियोगेनप्रीतोभूत्वाभिरक्षणम् १६ आरिराधयिषुःकृष्णंमहिष्यातुल्यशीलया ॥ युक्तःसांवत्सरंवीरोदधारद्वादशीव्रतम् १७ व्रतांतेकार्तिकेमासित्रिरात्रंसमुपोषितः॥ स्नातःकदाचित्कालिंद्यांहरिंमधुवनेऽर्चयत् १८ महाभिषेकविधिनासर्वोपस्करसंपदा ॥ अभिषिच्यवराकल्पैर्गंधमाल्यार्हणादिभिः १९ तद्व्रतांतरभावेनपूजयामासकेशवम् ॥ ब्राह्मणांश्चमहाभागान्सिद्धार्थानपिभक्तितः २० गवांरुक्मविषाणीनांरूप्यांघ्रीणांसुवाससाम् ॥ पयःशीलवयोरूपवत्सोपस्करसंपदाम् २१ प्राहिणोत्साधुविप्रेभ्योगृहेषुन्यर्बुदानिषट् ॥ भोजयित्वाद्विजानग्रेस्वाद्वन्नंगुणवत्तरम् २२ लब्धकामैरनुज्ञातःपारणायोपचक्रमे ॥ तस्यतर्ह्यतिथिःसाक्षाद्दुर्वासाभगवानभूत् २३ तमानर्च्यातिथिंभूयःप्रत्युत्थानासनार्हणैः ॥ ययाचेभ्यवहारायपादमूलमुपागतः २४ प्रतिनंद्यसतद्याच्ञांकर्तुमावश्यकंगतः ॥ निममज्जबृहद्ध्यायन्कालिंदीसलिलेशुचौ २५ मुहूर्तार्धावशिष्टायांद्वादश्यांपारणंप्रति ॥ चिंतयामासधर्मज्ञोद्विजैस्तद्धर्मसंकटे २६ ब्राह्मणातिक्रमेदोषोद्वादश्यांयदपारणे ॥ यत्कृत्वासाधुमेभूयादधर्मोवानमांस्पृशेत् २७ अंभसाकेवलेनाद्यकरिष्येव्रतपारणम् ॥ आहुरब्भक्षणंविप्राह्यशितंनाशितंचयत् २८

तद्व्रतांतरभावेनश्रीहरिनिष्ठामनस्कत्वेनासिद्धार्थान्कृतकृत्यान् २० २१ शतकोटिसंख्यान्यर्बुदम् २२ २३ अभ्यवहारायभोजनाय २४ आवश्यकंनित्यकर्म बृहत्ब्रह्म बृहतेर्धातोर्डप्रत्ययः २५ धर्मसंकटेधर्मापदिप्राप्तायांसत्याम् २६ आमंत्रितब्राह्मणातिक्रमेदोषोस्तिद्वादश्यामपारणेश्रीहरिप्रियद्वादशीभोजनाकरणेचदोषोस्ति । यत्तस्माद्यत्कृत्वोमसाधुभूयादुभयदोषपरिहारेणश्रेयःस्यात् । उभयोरेकातिक्रमलक्षणोऽधर्मोवामांनस्पृशेदितितद्विजैःसहचिंतयामास २६ एवंसंचिंत्याद्विजानांहार्दंस्वहार्दंचैकमेवेत्याशयेनाह अंभसेति केवलेनाद्यान्नरहितेन तत्रकिंप्रमाणंइतितत्राह आहुरिति द्वेविप्राः अप्भक्षणंअंभसांपारणंअशितंभुक्तंपूर्वव्रतधारणार्थंभुक्तंभवति उत्तरकर्मार्थंअनशितमभुक्तंभवतीत्यादुर्वेदाइतिहिपत्तदिदंयुष्माकंचसिद्धंतस्मात्तेनैवव्रतपारणांकरिष्येइत्यन्वयः २८

ततःकिंकृतमितितत्राह इतीति प्रत्याचष्टप्रत्यैक्षत २९ ३० भ्रुकुट्याकुटिलंवक्त्रमाननंयस्यसतथा ३१ विष्णोरिष्टमानिनः ३२ अदत्वान्नमितिशेषः ३३ जटामुत्कृत्यस्वशिरसीतिशेषः तस्मैअंबरीषाय ३४ वेपयंतींकंपयंतीम् ३५ ३६ कृत्यांदग्ध्वात्मानंअभिद्रवत्तच्चक्रं स्वप्रयासंस्वप्रयत्नं । प्राणपरीप्सयास्वजीवनरक्षणेच्छया ३७ तंदुर्वाससंविविक्षुःप्रवेष्टुमिच्छुः ३८ च क्रानुपातोदुर्वासाएतानिस्थानानिबभ्रामेत्याह दिशइत्यादिना ३९ अलब्धोनाथोपालनसमर्थोयेनसतथाअरणंशरणंएषमाणःअन्वेषमाणःअजिततेजसःहरेस्तेजोरूपाच्चक्रात्त्राहिरक्ष ४० ब्रह्म णाकिमवादीतित्राह स्थानमिति द्विपरार्धसंज्ञेयमायुःपूर्तिलक्षणेहरिक्रीडावसानेआसन्नप्रलयइतियावत् सहविश्वंचराचरलक्षणप्रपंचेनसहितमेतन्मदीयंस्थानंभ्रूभंगमात्रेणसंदिधक्षोःसंदग्धुमिच्छोः

इत्यपःप्राश्यराजर्षिश्चिंतयन्मनसाच्युतम् ॥ प्रत्याचष्टकुरुश्रेष्ठद्विजागमनमेवसः २९ दुर्वासायमुनाकूलात्कृतावश्यकआगतः ॥ राज्ञाभिच्छंदितस्त स्यबुबुधेचेष्टितंधिया ३० मन्युनाप्रचलद्गात्रोभ्रुकुटीकुटिलाननः ॥ बुभुक्षितश्चसुतरांकृतांजलिमभाषत ३१ अहोअस्यनृशंसस्याश्रियोन्मत्तस्यपश्यत ॥ धर्मव्यतिक्रमंविष्णोरभक्तस्येष्टमानिनः ३२ योमामतिथिमायातमातिथ्येननिमंत्र्यच ॥ अदत्वाभुक्तवांस्तस्यसद्यस्तेदर्शयेफलम् ३३ एवंब्रुवाणउत्कृ त्यजटांरोषविदीपितः ॥ तयासनिर्ममेतस्मैकृत्यांकालानलोपमाम् ३४ तामापतंतींज्वलतीमसिहस्तांपदाभुवम् ॥ वेपयंतींसमुद्वीक्ष्यनचचालपदान्नृ पः ३५ ॥ श्रीशुकउवाच ॥ आदिष्टंभक्तरक्षायांपुरुषेणमहात्मना ॥ ददाहकृत्यांतांचक्रंक्रुद्धाहिमिवपावकः २६ तदभिद्रवदुद्वीक्ष्यस्वप्रयासंचनिष्फ लम् ॥ दुर्वासादुद्रवेभीतोदिक्षुप्राणपरीप्सया ३७ तमन्वधावद्भगवद्रथांगंदावाग्निरुद्धूताशिखोयथाहिम् ॥ तथानुषक्तंमुनिरीक्षमाणोगुहांविविक्षुःप्रससा रमेरोः ३८ दिशोनभःक्ष्मांविवरान्समुद्राँल्लोकान्सपालांस्त्रिदिवंगतःसः ॥ यतोयतोधावतितत्रतत्रसुदर्शनंदुःप्रसहंददर्श ३९ अलब्धनाथःसयदाकुताश्चि त्संत्रस्तचित्तोऽरणमेषमाणः ॥ देवंविरिंचंसमगाद्विधातस्राह्यात्मयोनेजिततेजसोमाम् ४० ॥ ब्रह्मोवाच ॥ स्थानंमदीयंसहविश्वमेतत्क्रीडावसानेद्वि परार्धसंज्ञे ॥ भ्रूभंगमात्रेणहिसंदिधक्षोःकालात्मनःपश्यतिकोभविष्यत् ४१ अहंभवोदक्षभृगुप्रधानाःप्रजेशभूतेशसुरेशमुख्याः ॥ सर्वेवयंयन्नियमंप्रप न्नामूर्ध्नार्पितंलोकहितंवहामः ४२ ॥ श्रीशुकउवाच ॥ प्रत्याख्यातोविरिंचेनविष्णुचक्रोपतापितः ॥ दुर्वासाःशरणंयातःशर्वंकैलासवासिनम् ४३ श्रीशंकरउवाच ॥ वयंनतातप्रभवामभूम्नोभवंतिकालेनभवंतिहीदृशाः ॥ यस्मिन्परेन्येप्यजजीवकोशाःसहस्रशोयत्रवयंभ्रमामः ४४

कालात्मनःकालरूपस्यहरेर्यद्भविष्यत्कर्मकोवापुरुषस्तत्पश्यति अपरोक्षीकर्तुंसमर्थःनकोपीत्यन्वयः त्वामुपलक्षीकृत्यमदादिकंसर्वंसंहरिष्यतीतिज्ञातुंनशक्यतइतिभावः ४१ अतोमदादीनांवदनुम तमेवानुकर्तुंप्रयतनंनत्वन्यदित्याशयेनाह अहमिति यन्नियमंयस्याज्ञालक्षणंप्रेरणंतस्येतिपूर्वेणान्वयः अर्पितंतेनैवेतिशेषः ४२ यद्यप्यनेनशंकरोपिप्रत्याख्यातस्तथापिमंदजनशंकानिरासायदुर्वा ससः शंकरशरणप्राप्तिमाह प्रत्याख्यातइति सर्वःशर्वःशिवःस्थाणुःशर्वःसंरोधानद्धरिरित्यतोविष्णुशंकानिरासायाह कैलासेति ४३ शंकरोपिस्वाशक्तिमेववक्तीत्याह वयमिति हेतातवयं नप्रभवामत्वांरक्षितुंनसमर्थाःस्यामःआद्यंतवत्त्वादित्याह भूम्नइति ईदृशामादृशाभूम्नःपूर्णानंदाद्धरेःसृष्टिकालेभवंतिसंहारकालेनभवंतिहियस्माच्चस्मात् यदाचेतनस्यभगवदधीनत्वंस्पष्टंतदाकिंवक्तव्यम

चेतनस्यत्याशयेनाह यास्मिन्निति यत्रयपुअजजीवकाशवुवयश्रमामतअन्यअचतनाआपसहस्रथाजावकाशाः अजाब्रह्मासएवजाव-तस्यकाशाःशरारस्थानाया-मब्राह्मकाट्याथास्मन्परस्तासहशाना
त्वदापदःपरिहर्तास्याम्रवयमितिवाक्यशेषः ४४ अन्यतोप्यवनाशांनिवारयति अहमिति अहंसनत्कुमारादयः इतिसर्वेवयंयस्यहरेर्मायामिच्छाकिंविषयामितिनविदामइत्यन्वयः ४५ ४६ दुर्विषहंसोढु
मशक्यम् तर्ह्यहंकिंकरोमीतितत्राह तमेवेति ४७ ४८ अवरक्ष विश्वभावनसर्ववशीकरणसमर्थ ४९ तस्याघस्यापचितिंप्रायश्चित्तम्अघपरिहारसामर्थ्यंतवैवेत्याह मुच्येतेतिनारकोनरकस्थोयन्नाम्न्युदि
तेअघान्मुच्येतेत्यन्वयः ५० आत्मरक्षार्थंदुर्वाससाप्रार्थितोभगवान्लोकसंग्रहार्थमात्ममायांप्रकटयति अहमिति अतोऽस्वतंत्रइवनत्वस्वतंत्रः स्वतंत्रस्यास्वातंत्र्यवचनंकथंसंगच्छतइतितत्राह साधु
भिरिति ५१ ग्रस्तहृदयत्वंनामकिमित्यतस्तद्विवृणोतिनाहमिति साधुभिर्भक्तैर्विनाहमात्मानंस्वरूपंनाशासेनेच्छामि तदप्रियेप्राप्तेमज्जीवनेनकिंप्रयोजनमितिकृत्वेतिशेषः यद्वास्वात्मानमपिना

अहंसनत्कुमारश्चनारदोभगवानजः ॥ कपिलोऽपांतरत्नमोदेवलोधर्मआसुरिः ४५ मरीचिप्रमुखाश्चान्येसिद्धेशाःपारदर्शिनः ॥ विदामनवयंसर्वेयन्मा
यांमायायावृताः ४६ तस्यविश्वेश्वरस्येदंशस्त्रंदुर्विषहंहिनः ॥ तमेवशरणंयाहिहरिस्तेशंविधास्यति ४७ ततोनिराशोदुर्वासाःपदंभगवतोययौ ॥ वि
कुंठाख्यंयदध्यास्तेश्रीनिवासःश्रियासह ४८ संदह्यमानोऽजितशस्त्रवह्निनातत्पादमूलेपतितःसवेपथुः ॥ आहाच्युतानंतसदीप्सितप्रभोक्रुताग्संमा
मवविश्वभावन ४९ अजानतातेपरमानुभावंकृतंमयाघंभवतःप्रियाणाम् ॥ विधेहितस्यापचितिंविधातर्मुच्येतयन्नाम्न्युदितेनारकोपि ५० श्रीभगवानु
वाच ॥ अहंभक्तपराधीनोह्यस्वतंत्रइवद्विज ॥ साधुभिर्ग्रस्तहृदयोभक्तैर्भक्तजनप्रियः ५१ नाहमात्मानमाशासेमद्भक्तैःसाधुभिर्विना ॥ श्रियंचात्यंतिकीं
ब्रह्मन्येषांगतिरहंपरा ५२ येदारागास्पुत्रादीन्प्राणान्वित्तमिदंपरम् ॥ हित्वामांशरणंयाताःकथंतांस्त्यक्तुमुत्सहे ५३ मयिनिर्बद्धहृदयाःसाधवःसमदर्शि
नः ॥ वशीकुर्वंतिमांभक्त्यासत्स्त्रियःसत्पतिंयथा ५४ मत्सेवयाप्रदिष्टंचसालोक्यादिचतुष्टयम् ॥ नेच्छंतिसेवयापूर्णाःकुतोन्यत्कालविप्लुतम् ५५ सा
धवोहृदयंमह्यंसाधूनांहृदयंत्वहम् ॥ मदन्यत्तेनजानंतिनाहंतेभ्योमनागपि ५६ उपायंकथयिष्यामितवविप्रशृणुष्वतत् ॥ अयंह्यात्माभिचारस्तेयत
स्तंयातुवैभवान् ५७ साधुषुप्रहितंतेजःप्रहर्तुःकुरुतेभयम् ॥ तपोविद्याचविप्राणांनिःश्रेयसकरेउभे ५८ तएवदुर्विनीतस्यकल्पेतेकर्तुरन्यथा ॥ ब्रह्मं
स्तद्रच्छभद्रंतेनाभागतनयंनृपम् ५९ क्षमापयमहाभागततःशांतिर्भविष्यति ६०

शासेतदाऽनन्यशरणांश्रियंनाशासइतिकिंवक्तव्यमित्याह श्रियंचेति भक्ताश्चापीदृशाइत्याह येषामिति ५२ इदंभूस्थानंपरंस्वर्गादिकम् ५३ तदत्यागेभक्त्यावशीकरणमेवकारणंनान्यदित्याहम
यीति ५४ इदंचात्यागेकारणमित्याह मत्सेवयेति ५५ इतोपिमदन्यापेक्षातेषांनास्तीत्याशयेनाह साधवइति मह्यंममहृदयंप्रियम् तुशब्दोहेतौ साधवोममहृदयंअहंसाधूनांहृदयमितिय
स्मात्तेमदन्यंप्रियंनजानंति अहमपितेभ्यःसाधुभ्योमनागत्यल्पमपिप्रियमन्यन्नजानामीत्यन्वयः ५६ प्रकृतेकिमनेनायातमितितत्राहअयमितिआत्मनात्वपाकृतोभिचारःकृत्याप्रयोगःयतःयस्मै ५७
तस्मैप्रयुक्तमात्मानंकथंबाधतइतितत्राह साधुष्विति महितंप्रयुक्तंक्षुद्रोपद्रवक्षणंतेजोर्चिः तेजोबलेप्रभावेनेज्योतिष्यर्चिषिरेतसीत्यभिधानंप्रहर्तुःप्रयोक्तुरपिभयंकुरुते विनयशून्यस्यतवविद्यातपसी
अनर्थकरेएवाभूतामितिभावेनाह तपइति ५८ अन्यथाअनर्थकरे ५९ ६०

६१ ६२ मात्राःशब्दादयः ६३ सहस्राणिअराणिदलानियस्यसततथा हेसहस्रार विप्रायदुर्वाससे इडस्पतेअन्नपते ६४ ६५ सुनाभसुदर्शन धूमकेतुरग्निः ६६ अनंजनेननिर्लेपेन ऊर्जितदैत्य दानवंबलंबाह्वादीन्वृक्णन्छिंदन्प्रधनेयुद्धे ६७ त्वत्तेजसातमःसंहृतंमहात्मनांदृशोःप्रकाशश्चसंहृतस्तंभितः एतत्परावरंसदसत्त्वद्रूपंत्वत्प्रतिमा ६८ साधुजनत्राणायखलप्रहाणयेदुष्टनिग्रहायचक्र

श्रीशुकउवाच ॥ एवंभगवतादिष्टोदुर्वासाश्चक्रतापितः ॥ अंबरीषमुपावृत्यतत्पादौदुःखितोग्रहीत् ६१ तस्यतद्व्यसनंवीक्ष्यपादस्पर्शविलज्जितः ॥ अस्तावीत्तद्धरेरस्त्रंकृपयापीडितोभृशम् ६२ अंबरीषउवाच ॥ त्वमग्निर्भगवान्सूर्यस्त्वंसोमोज्योतिषांपतिः ॥ त्वमापस्त्वंक्षितिर्व्योमवायुर्मात्रेंद्रियाणिच ६३ सुदर्शननमस्तुभ्यंसहस्राराच्युतप्रिय ॥ सर्वास्त्रघातिन्विप्रायस्वस्तिभूयादिडस्पते ६४ त्वंधर्मस्त्वंधृतिःसत्यंत्वंयज्ञोखिलयज्ञभुक् ॥ त्वंलोकपालःसर्वात्मात्वं तेजःपौरुषंपरम् ६५ नमःसुनाभाखिलधर्मसेतवेअधर्मशीलासुरधूमकेतवे ॥ त्रैलोक्यगोपायविशुद्धवर्चसेमनोजवायाद्भुतकर्मणेस्तुते ६६ यदाविमृष्टस्त्वमनंजनेनवैबलंप्रविश्योर्जितदैत्यदानवम् ॥ बाहूदरोर्वंघ्रिशिरोधराणिवृक्णन्नजस्रंप्रधनेविराजसे ६७ त्वत्तेजसाधर्ममयेनसंहृततंतमःप्रकाशश्चदृशोर्महात्मनाम् ॥ दुरत्ययस्तेमहिमागिरांपतेत्वद्रूपमेतत्सदसत्परावरम् ६८ सत्वंजगत्त्राणखलप्रहाणयेनिरूपितःसर्वसहोगदाभृता ॥ विप्रायचास्मत्कुलदैवहेतवेविधेहिभद्रंतदनुग्रहोहिनः ६९ यद्यस्तिदत्तमिष्टंवास्वधर्मोवास्वनुष्ठितः ॥ कुलंनोविप्रदैवंचेद्विजोभवतुविज्वरः ७० यदिमेभगवान्प्रीतएकःसर्वगुणाश्रयः ॥ सर्वभूतात्मभावेनद्विजोभवतुविज्वरः ७१ श्रीशुकउवाच ॥ इतिसंस्तुवतोराज्ञोविष्णुचक्रंसुदर्शनम् ॥ अशाम्यत्सर्वतोविप्रंप्रदहद्राजयाच्ञया ७२ स मुक्तोस्त्राग्नितापेनदुर्वासाःस्वस्तिमांस्ततः ॥ प्रशशंसतमुर्वीशंयुंजानःपरमाशिषः ७३ दुर्वासाउवाच ॥ अहोअनंतदासानांमहित्वंदृष्टमद्यमे ॥ कृतागसोपियद्राजन्मंगलानिसमीहसे ७४ दुष्करंकिन्नुसाधूनांदुस्त्यजंवामहात्मनाम् ॥ यैःसंगृहीतोभगवान्सात्वतामृषभोहरिः ७५ यन्नामश्रुतिमात्रेणपुमान्भवतिनिर्मलः ॥ तस्यतीर्थपदःकिंवादासानामवशिष्यते ७६ राजन्ननुगृहीतोहंत्वयातिकरुणात्मना ॥ ममाघंपृष्ठतःकृत्वाप्राणायन्मेभिरक्षिताः ७७ राजातमकृताहारःप्रत्यागमनकांक्षया ॥ चरणावुपसंगृह्यप्रसाद्यसमभोजयत् ७८ सोशित्वादृतमानीतमातिथ्यंसार्वकामिकम् ॥ तृप्तात्मानृपतिंप्राहभुज्यतामितिसादरम् ७९ प्रीतोस्म्यनुगृहीतोस्मितवभागवतस्यवै ॥ दर्शनस्पर्शनालापैरातिथ्येनात्ममेधसा ८० कर्मावदातमेतत्तेगायंतिस्वःस्त्रियोमहुः॥ कीर्तिंपरमपुण्यांचकीर्तायिष्यतिभूरियम् ८१ ॥ श्रीशुकउवाच ॥ एवंसंकीर्त्यराजानंदुर्वासाःपरितोषितः ॥ ययौविहायसामंत्र्यब्रह्मलोकमहैतुकम् ॥ ८२ संवत्सरोत्यगात्तावद्यावत्तंनागतोगतः ॥ मुनिस्तद्दर्शनाकांक्षीराजाभक्षोबभूवह ८३

स्मत्कुलस्यदैवहेतवेदेवताभक्त्युत्पत्तिनिदानाय ६९ ७० ७१ ७२ ७३ महित्वंमहिमा ७४ ७५ ७६ ७७ ७८ आतिथ्यंअतिथिप्रियंअन्नं सार्वकामिकंअपेक्षिताखिलभोजनं ७९ आत्ममेधसाआत्मज्ञानेन ८० ८१ ८२ इतोगतोमुनिर्यावत्तंनृपंनागतःतावत्संवत्सरोत्यगात् मुनिदर्शनाकांक्षोराजाचतावदबुभक्षोभूत् ८३

सोंबरीषोबुद्धचामुनेर्व्यसनान्मोक्षंस्ववीर्यंच परमात्मनोनुभावःप्रभावःसामर्थ्यंपरिमस्तत्तथाभगवन्महिमोपेतंमेनइत्यर्थः ८४ विरिंचःआदिःकारणंपरयसविरिंचादिस्तप्रपंचयथायाग्यंअधश्चकारनतुसर्वं तथात्वेब्रह्मादिभक्तिकोटयंशादंशोनेवांबरीषके । नेवास्त्यन्यस्यकस्यापितयापिहरिरीश्वरः । तात्काऽिकोपचेयत्वात्तेषांयज्ञसआदिराडिति । मन्वंबरीषएवस्तुनिकृत्वाचक्रनिवर्तनंकृतवान् नब्रह्मादयइत्यतआह । ब्रह्मादयश्चतत्कीर्तिंव्यंजयामासुरुत्तमाम् । मोहनायचदैत्यानांब्रह्मादेर्निंदनायच । अन्यार्थंचेति । निंदनाय असुरकृतायेतिशेषः । अन्यार्थं अर्थवादार्थंकिंचफलानिच्छुत्वज्ञापनायच विष्ण्वादिभिश्चक्रंननिवर्तितमित्याह । स्वयंविष्णुर्ब्रह्माद्याश्चनिराशिषइति । अंबरीषस्यमनुष्याधिकारिपुभक्त्यादिगुणैरुत्तमत्वज्ञापनार्थमपि । मानुषेषूत्तमत्वाच्चेति । ब्रह्मादीनांभक्त्यादिगुणाधिक्यप्रकटनायच । तेषांभक्त्यादिभिर्गुणैरितिअन्यच्चप्रयोजनम् । ब्रह्मादेर्विष्ण्वधीनत्वज्ञापनायचकेवलमिति । तर्हिदुर्वासाः कइतिचेद्रुद्रावतारः । दुर्वासाश्चस्वयंरुद्रइति । तथापिरुद्रत्वेपिअसुरावेशादन्याय्यवचनम् । तथाप्यन्यायमुक्त्वानिति । स्वाज्ञाकारित्वेनतस्मिन्ननुग्रहविशेषाय भक्तजनमदविनाशनायचविष्णुर्निवर्तननाकारि । तस्याप्यनुग्रहार्थापदर्पनाशार्थमेवचेति

गतेथदुर्वाससिसोंबरीषोद्विजोपभोगातिपवित्रमाहरन् ॥ ऋषेर्विमोक्षंव्यसनाच्चबुद्ध्यामेनेस्ववीर्यंचपरानुभावम् ८४ एवंविधानेकगुणःसराजापरात्मनिब्रह्मणिवासुदेवे ॥ क्रियाकलापैःसमुवाहभक्तियायाविरिंचादिमधश्चकार ८५ श्रीशुकउवाच ॥ अथांबरीषस्तनयेषुराज्यंसमानशीलेषुविसृज्यधीरः ॥ वनंविवेशात्मनिवासुदेवेमनोदधद्ध्वस्तगुणप्रवाहः ८६ इत्येतत्पुण्यमाख्यानमंबरीषस्यभूपतेः ॥ संकीर्तयन्ननुध्यायन्भक्तोभगवतोभवेत् ॥ ८७ ॥ इतिश्रीभागवतेनवमस्कंधेअंबरीषोपाख्यानंनामषष्ठोध्यायः ॥ ६ ॥ श्रीशुकउवाच ॥ विरूपःकेतुमाञ्छंभुरंबरीषसुतास्त्रयः ॥ विरूपात्पृषदश्वोभूत्तत्पुत्रस्तुरथीतरः ॥ रथीतरस्याप्रजस्यास्यभार्यायांतंतवेर्थितः १ अंगिराजनयामासब्रह्मवर्चस्विनःसुतान् ॥ एतेक्षत्रप्रसूतावैपुनश्चांगिरसःस्मृताः २ रथीतराणांप्रवराःक्षत्रोपेताद्विजातयः ३ क्षुवतस्तुमनोर्जज्ञेइक्ष्वाकुर्घ्राणतःसुतः ॥ तस्यपुत्रशतंज्येष्ठाविकुक्षिनिमिदंडकाः४तेषांपुरस्तादभवन्नार्यावर्तेनृपात्तप ॥ पंचविंशतिपश्चात्रयोमध्येपरेन्यतः ५ सप्तैकदाष्टकाश्राद्धइक्ष्वाकुःसुतमादिशत् ॥ मांसमानीयतांमेध्यंविकुक्षेगच्छमाचिरम् ६ तथेतिसवनंगत्वामृगान्हत्वाक्रियार्हकान् ॥ श्रांतोबुभुक्षितोवीरःशशमाददपस्मृतिः ७

शास्त्रविरोधःस्यादतोभक्तिविधानार्थंतद्यशोर्थंदुष्टजनमोहनार्थंचेतिज्ञातव्यम् ८५ ८६ आख्यानफलमाह । इतीति ॥ ८७ ॥ इतिश्रीभागवतेमहापुराणेनवमस्कंधेविजयध्वजकृतटीकायांषष्ठोध्यायः ॥ ६ ॥ तंतवेसंतानाय १ अंगिरसउत्पत्तिनिमित्तत्वात्तान्ना आंगिरसः २ रथीतराणांरथीतरसंततिजातानाम् ३ एकवंशंसमाप्यान्यवंशंवक्तुंप्रारभते क्षुवतइति क्षुतंकुर्वतःघ्राणतः घ्राणोद्गीर्णशब्दात् ४ आसमुद्रात्पुरस्तात्तुआसमुद्राच्चपश्चिमात् तयोरेवांतरंगिर्योरार्यावर्तंप्रचक्षतइत्येवंविधआर्यावर्तेपुरस्तात् पूर्वदिक्पालास्तेषांविकुक्ष्यादीनांमध्येपंचविंशतिनृपाःपश्चात्पश्चिमदिक्पालाःपंचविंशतिनृपाः अभूवन्मध्येविंध्यहिमवत्पर्वतयोर्मध्येतेषांमध्येत्रयःपालकाःअपरेचयेत्रिपंचाशदवशिष्टाःसप्तवत्वारिंशद्वृंदाःतेअन्यतः दक्षिणतउत्तरतःपालकाअभूवन्नित्यन्वयः ५ ६ अपस्मृतिःविवेकरहितः ७

अकर्मकंकर्मायोग्यम् ८ त्यक्तविधिंआचारशून्यम् ९ नाम्नाजापकेनविप्रेणसंवादं तत्त्वविषयंसमाचरन् तेनसंवादजनितेनज्ञानेनयोगी।ज्ञानीसइक्ष्वाकुःपत्परंब्रह्मतदवाप सदेहआपाकेत्यत्याह त्यक्त्वेति १० पुनर्विकुक्षिणाकिमकारीतितत्राह पितरीतिअशासदीजेसहरियज्ञैःपुष्कलदाक्षिणैरिबिकेचित्पठंति शासन्नीजेहरियज्ञैःशशादइतिविश्रुतइत्यन्ये शशमत्तीतिशशादः पुष्कलदक्षिणैः पूर्णदाक्षिणैः ११ तस्यविकुक्षेः इंद्रोवाहोवाहनंयस्यसतथाकर्मभिर्विक्रमलक्षणैःअवाप्तानि १२ १३ १४ इंद्रात्मकवृषभककुदिस्थितः १५ १६ १७ तस्यपुरंजयस्यइषोःशरस्य

शेषंनिवेदयामासपित्रेतेनचतद्गुरुः ॥ चोदितःप्रोक्षणायाहदुष्टमेतदकर्मकम् ८ ज्ञात्वापुत्रस्यतत्कर्मगुरुणाभिहितंनृपः ॥ देशान्निःसारयामाससुतंत्यक्तविधिंरुषा ९ सतुविप्रेणसंवादंजापकेनसमाचरन् ॥ त्यक्काकलेवरंयोगीसतेनावापयत्परम् १० पितर्युपरतेभ्येत्यविकुक्षिःपृथिवीमिमाम् ॥ शासन्नीजेहरियज्ञैःशशादइतिविश्रुतः ११ पुरंजयस्तस्यसुतइंद्रवाहइतीरितः ॥ ककुत्स्थइतिवाप्युक्तःशृणुनामानिकर्मभिः १२ कृतांतआसीत्समरेदेवानांसहदानवैः ॥ पार्ष्णिग्राहोवृतोधीरोदेवैर्दैत्यपराजितैः १३ वचनाद्देवदेवस्यविष्णोर्विश्वात्मनःप्रभोः ॥ वाहनत्वेवृतस्तस्यबभूवेंद्रोमहावृषः १४ ससन्नद्धोधनुर्दिव्यमादायविशिखाञ्छितान् ॥ स्तूयमानस्तमारुह्ययुयुत्सुःककुदिस्थितः १५ तेजसाव्यापितोविष्णोःपुरुषस्यपरात्मनः ॥ प्रतीच्यांदिशिदैत्यानांन्यरुणद्भिदशैःपुरम् १६ तैस्तस्यह्यभवद्राजन्संग्रामोरोमहर्षणः ॥ यमायभल्लैरनयद्दैत्यान्येयुयुधुर्मृधे १७ तस्येषुपाताभिमुखंयुगांताग्निमिवोल्बणम् ॥ विसृज्यदुद्रुवुर्दैत्याहन्यमानाःस्वमालयम् १८ जित्वापुरंधनंसर्वमयच्छद्वज्रपाणये ॥ प्रत्ययच्छत्सराजर्षिरितिनामभिराहुतः १९ पुरंजयस्यपुत्रोभूदमेनास्तत्सुतःपृथुः ॥ विश्वगंधिस्ततश्चंद्रोयुवमाश्वस्तुतत्सुतः २० शावस्तिस्तत्सुतोयेनशावस्तीनिर्मितापुरी ॥ बृहदश्वस्तुशावस्तेस्ततःकुवलयाश्वकः २१ यःप्रियार्थंमुकुंदस्यधुंधुनामासुरंबली ॥ सुतानामेकविंशत्यासहस्रैरहनद्वृतः २२ धुंधुमारइतिख्यातस्तत्सुतास्तेप्रजज्वलुः ॥ धुंधोर्मुखाग्निनासर्वेत्रयएवावशेषिताः २३ दृढाश्वःकपिलाश्वश्चभद्राश्वइतिभारत ॥ दृढाश्वपुत्रोहर्यश्वोनिकुंभस्तत्सुतःस्मृतः २४ बर्हणाश्वोनिकुंभस्यकृशाश्वोथास्यसेनिजित् ॥ युवनाश्वोभवत्तस्यसोनपत्योवनंगतः २५ भार्याशतेननिर्विण्णऋषयोस्यकृपालवः ॥ इष्टिंस्मवर्तयांचक्रुर्द्रौतेसुसमाहिताः २६ राजातद्यज्ञसदनंप्रविष्टोनिशितर्षितः ॥ दृष्ट्वाशयानान्विप्रांस्तान्पपौमंत्रजलंस्वयम् २७ उत्थितास्तेनिशाम्याथव्युदकंकलशंप्रभो ॥ पप्रच्छुःकस्यकर्मेदंपीतंपुंसवनंजलम् २८ राज्ञापीतंविदित्वाथईश्वरप्रहितेनते ॥ ईश्वरायनमश्चक्रुरहोदैवबलंबलम् २९

पातस्याभिमुखंप्रत्यवस्थानंस्वमालयंस्वगृहंचाहित्वादैत्यादुद्रुवुरित्यन्वयः १८ सराजापुरंजित्वासर्वंपुरधनमयच्छदाप्नोत् पुनश्चतत्पुरधनंवज्रपाणयेप्रत्ययच्छत्दत्तवान्सराजर्षिर्दैत्यपुरंजयात्पुरंजय इतिनाम्नाहूतः वृषभरूपेंद्रस्यास्यवाहनत्वादिंद्रवाहइतिनाम्नाहूतःवृषभककुदिस्थितत्वात्ककुत्स्थइतिनाम्नाहूतः १९ २० २१ २२ २३ २४ २५ २६ तर्षितःउदन्ययायुतः मंत्रपूतं जलम् २७. व्युदकं जलरहितंपुंसवनंपुत्रोत्पत्त्यर्थमभिमंत्रितं २८ ईश्वरप्राहितेनदैवप्रेरितेन २९

२० स्तन्यःस्तनपानेच्छुरयंबालोभृशंरोदयते पुनःपुनरत्यंतरादनकरातिकधास्यति कस्यब्राजनस्यस्तनयास्यतामत्रत्वाश्रावयस्तनमारोपःरोदनमाकार्षीरनुकंपस्वमनुष्यस्वमनुष्य
तोमांधातेतिनाम २१ तस्यमांधातुःपितायुवनाश्वः २२ २३ २४ यज्ञंश्रीहरिं सर्वदेवप्रधानंसर्वात्मकंमंत्रतंत्रद्रव्यादिसर्वव्यापिनं २५ एतदेवस्पष्टयति द्रव्यमिति यआत्माव्यापीयस्यतद्यदात्मकं
२६ २७ २८ २९ निर्वृतिमानंदं ४० ४१ ससौभरिरयंमुनिःस्त्रीणामसंमतोजरठःएजत्कंपमानंकंकशिरोयस्यसतथा वलीपलितअतएवाप्रियइतिमत्वाअहंराज्ञाप्रत्युदाहृतः स्वयंवरेगृह्यतामितिप्रोक्तः
इत्थंविचिंत्यात्मानंमांतथासाधयिष्येयथासुरस्त्रीणामभीष्टमितिव्यवसितः ४२ ४३ क्षत्राकन्यांतःपुरंप्रवेशितःएकःपंचाशताराजकन्याभिर्वृतश्चाभूदितिशेषः ४४ कलिःकलहःतदर्थंसौभरिपतिपरिणय

ततःकालउपावृत्तेकुक्षिनिर्भिद्यदक्षिणम् ॥ युवनाश्वस्यतनयश्चक्रवर्तीजजानह ३० कंधास्यतिकुमारोयंस्तन्योरोरूयतेभृशम् ॥ मांधातर्वत्समारोदीरितींद्रोदेशिनीमदात् ३१ नममारपितातस्यविप्रदेवप्रसादतः ॥ युवनाश्वोथतत्रैवतपसासिद्धिमन्वगात् ३२ त्रसद्दस्युरितींद्रोंगविदधेनामतस्यवै ॥ य
स्मात्रसंतिह्युद्विग्नादस्यवोरावणादयः ३३ यौवनाश्वोथमांधाताचक्रवर्त्यवर्नीप्रभुः ॥ सप्तद्वीपवतीमेकःशशासाच्युततेजसा ३४ ईजेचयज्ञंक्रतुभिरात्म
विद्भूरिदक्षिणैः ॥ सर्वदेवमयंदेवंसर्वात्मकमतींद्रियम् ३५ द्रव्यंमंत्रोविधिर्यज्ञोयजमानस्तथर्त्विजः ॥ धर्मोदेशश्चकालश्चसर्वमेतद्यदात्मकम् ३६ याव
त्सूर्योउदेतिस्मयावच्चंद्रःप्रतिष्ठति ॥ सर्वंतद्यौवनाश्वस्यमांधातुःक्षेत्रमुच्यते ३७ शशबिंदोर्दुहितरिंबिंदुमत्यामधाद्नृपः ॥ पुरुकुत्समंबरीषंमुचुकुंदंचयो
गिनम् ३८ तेषांस्वसारःपंचाशत्सौभरिंवव्रिरेपतिम् ३९ यमुनांतर्जलेमज्जंस्तप्यमानःपरंतपः ॥ निर्वृतिंमीनराजस्यवीक्ष्यमैथुनधर्मिणः ४० जात
स्पृहोनृपंविप्रःकन्यामेकामयाचत ॥ सोप्याहगृह्यतांब्रह्मन्कामंकन्यांस्वयंवरे ४१ सविचिंत्याप्रियःस्त्रीणांजरठोयमसंमतः ॥ वलीपालितएजत्कइत्यहं
प्रत्युदाहृतः ४२ साधयिष्येतथात्मानंसुरस्त्रीणामभीप्सितम् ॥ किंपुनर्मनुजस्त्रीणामितिव्यवसितःप्रभुः ४३ मुनिःप्रवेशितःक्षत्राकन्यांतःपुरमृद्धिमत् ॥
वृतश्चराजकन्याभिरेकःपंचाशतावरः ४४ तासांकलिरभूद्भूयांस्तदर्थेपोह्यसौहृदम् ॥ ममानुरूपोनायंवइतितद्व्रतचेतसाम् ४५ सबह्वृचस्ताभिरवारणी
यश्रियाविराजत्सपरिच्छदेषु ॥ गृहेषुनानोपवनामलांभःप्रसूनसौगंधिककाननेषु ४६ महार्हशय्यासनवस्त्रभूषणस्नानानुलेपाभ्यवहारमाल्यकैः ॥ स्व
लंकृतस्त्रीपुरुषेषुनित्यदारेमेनुगायद्विजभृंगबंदिषु ४७

नार्थेसौहृदंसुहृद्भावंअपोह्यपरित्यज्यतस्मिन्वरेआसक्तचेतसाम् ४५ बह्वृचःसौभरिःगृहेषुताभिःकन्याभिः रेमेइत्यन्वयःकीदृशेषुगृहेषुअवारणीयश्रियाअप्रतिघातलक्ष्म्याविराजंतिशोभमानानिचपरि
च्छदैरुपकरणैःसहितानिचविराजत्सपरिच्छदानितेषुश्रियाअवारणीयःअनिवार्यःतथापिवरणयोग्यइत्यर्थइतिवा अमलान्यंभांस्यमलांभांसि प्रसूनानांसौगंधिकानिसौरभ्ययुतानिनानाविधोपवनानि
च अमलांभोभिर्युतानिचप्रसूनसौगंधिकानिचकाननानियेषुतानितथातेषुअनुगायंतिद्विजवृंदानि अनुगायद्विजवृंदानि द्विजानांपक्षिणांवृंदानिद्विजवृंदानितान्येवबंदिनोयेषुतानितथातेषु ४६ ४७

एतावदेवानुवर्णयितुंशक्यंनातोधिकमित्याशयेनाह यदिति स्तंभमहंकारनिमित्तंकर्तव्याकरणलक्षणम् ४८ आज्यस्तोकैः घृतबिंदुभिः ४९ आत्मापह्नवंस्वरूपापहारणम् तपसस्तिरस्कारंवा ५० याश्चिरंधृतंब्रह्मतपःतत्प्रस्रावितंच्युतंनष्टमित्यर्थः ब्रह्मवेदस्तपस्तत्त्वमिप्यभिधानम् तत्त्वमनारोपितंरूपंपुंसोज्ञातमेवतत्सृतंमनिबद्धमितिवा ५१ लोकसंग्रहमेवापिसंपश्यन्कर्तुमर्हसीतिवाक्यार्थमनु संधानआह संगमिति मिथुनवृजिनात्स्त्रीपुरुषसंगोद्भूतपापान्मुमुक्षुःसंगंस्त्रेहलक्षणंत्यजेतइंद्रियाणिबहिःशब्दादिविषयेषुनविसृजेत्नप्रयुञ्जीतएकाकीचरन्रहसिएकांतेअनंतेईशेचित्तंयुंजीत प्रसंग शेचदिप्रसंगोपेक्षितस्तर्हितस्मिन्हरौरतिर्यैषांतेतद्व्रतयस्तेषुसाधुषुनिर्मत्सरजनेषुप्रसंगःस्यान्नान्यत्रेत्यन्वयः ५२ अहमेकएवतपस्वीअर्थाभसिमंगलजलेमत्स्यसंगान्मत्स्यानांमिथःस्नेहदृष्ट्वाअयानंत रंपंचाशतास्त्रीभिःसहसुरतप्रसंगेनसुतपंचसहस्रसंगआसं अथोभयकृत्यंपुत्राणांविवाहादिःकन्यकानांप्रदानादिरित्युभयंकर्तव्यं तत्रयेमनोरथाःमनः संकल्पविशेषास्तेषांउभयेनस्त्रीपुरुषद्वयेनयत्कृत्यंतत्र विद्यमानानांमनोरथानांवाउभयास्मिन् इहलोकेपरलोकेचयत्कृत्यंतद्विषयमनोरथानांवाअंतमवसानंनव्रजामि तत्रेदंनिमित्तमाह मायेति शब्दादिविषयेप्रयोजनबुद्धिः मंगलानंतरारंभप्रश्नकार्त्स्न्येष्वथोअ

यद्गार्हस्थ्यंतुसंवीक्ष्यसप्तद्वीपवतीपतिः ॥ विस्मितःस्तंभमजहात्सार्वभौमश्रियान्वितम् ४८ एवंगृहेष्वभिरतोविषयान्विविधैःसुखैः ॥ सेवमानो नचातुष्यदाज्यस्तोकैरिवानलः ४९ सकदाचिदुपासीनआत्मापह्नवमात्मना ॥ ददर्शबह्वृचाचार्योमीनसंगसमुत्थितम् ५० अहोइमंपश्यतमेवि नाशंतपस्विनःसच्चरितव्रतस्य ॥ अंतर्जलेवारिचरप्रसंगात्प्रस्रावितंब्रह्मचिरंधृतंयद् ५१ संगंत्यजेतमिथुनव्रतीजिनान्मुमुक्षुःसर्वात्मनाविसृजेद्बहिरिं द्रियाणि ॥ एकश्चरन्रहसिचित्तमनंतईशेयुंजीततद्व्रतिषुसाधुषुचेत्प्रसंगः ५२ एकस्तपस्व्यहमथांभसिमत्स्यसंगात्पंचाशताथसुतपंचसहस्रसंगः ॥ नांतं व्रजाम्युभयकृत्यमनोरथानांमायागुणैर्हृतमतिर्विषयेर्थभावः ५३ एवंवसन्गृहेकालंविरक्तोन्यासमाश्रितः ॥ वनंजगामानुययुस्तत्पत्न्यःपतिदेवताः ५४ तत्रतस्वातपस्तीक्ष्णमात्मकर्शनमात्मवित् ॥ सहैवाग्निभिरात्मानंयुयोजपरमात्मनि ५५ ताःस्वपत्युर्महाराजनिरीक्ष्याध्यात्मिकींगतिम् ॥ अन्वी युस्तत्प्रभावेनशांतमाग्निमिवार्चिषः ५६ मांधातृपुत्रप्रवरोयोंबरीषःप्रकीर्तितः ॥ मातामहेनप्रवृतोयुवनाश्वस्तुतत्सुतः ५७ हरितस्तस्यपुत्रोभून्मां धातृप्रवराइमे ॥ नर्मदाभ्रातृभिर्दत्तापुरुकुत्सायचोरगैः ५८ तयारसातलंनीतोभुजगेंद्रप्रयुक्तया ॥ गंधर्वान्सोवधीत्तत्रवध्यश्चान्विष्णुशक्तिधृक् ५९ ना गाल्लब्धवरःसर्पादभयंस्मरतामिमम् ॥ त्रसद्दस्युःपौरुकुत्सोयोनरण्यस्यदेहकृत् ६०

येत्यमरः ५३ एवंविरज्यकिमकार्षीत्तत्राहएवमिति न्यासंचित्तग्रहादित्यागलक्षणम् ५४ आत्मकर्शनंदेहस्यकृशत्वापादकम् अग्निभिःसहात्मानंदेहंदग्ध्वापरमात्मनियुयोज सायुज्यलक्षणंमोक्ष माप्तवानित्यर्थः ५५ ५६ मातामहेनमातुपित्राशशबिंदुनातस्यांबरीषस्यसुतः ५७ मांधाताप्रवरोयेषांतेतथा भ्रातृभिःउरगैःपुरुकुत्सायमांधातृज्येष्ठपुत्रायदत्ता ५८ भुजगेंद्रप्रेरितयातयान मेदयारसातलंनीतःसपुरुकुत्सःतत्ररसातलेवध्यश्चान्गंधर्वानवधीदित्यन्वयः वधार्हाश्चायेषांतेतथातान्वा ५९ नागाकिमस्मैददुरितितत्राह सर्पादिति इमंगंधर्ववधलक्षणंपुरुकुत्सविक्रमंस्मरतांपु सांसर्पादभयलक्षणं लब्धवरइत्यर्थः पुरुकुत्सस्यापत्यंपौरुकुत्सःयत्रसद्दस्युरनरण्यस्यदेहकृत्पितानरण्यत्रसद्दस्युसुतइत्यर्थः ६०

तस्यात्रिबंधुरस्यसुतःसत्यव्रतःत्रिशंकुरितिनामद्वयेनविश्रुतइत्यर्थः६१गुरोर्वसिष्ठस्यशापात्कौशिकस्यविश्वामित्रस्यतेजसाप्रभावेणसशरीरःमानुषशरीरसहितःस्वर्गगतःअथापिदिवि
तिशेषःस्वर्गंगतःकथंमानवैर्दृश्यतइतितत्राह पातितइतितेनविश्वामित्रेणबलात्तपःशक्तेश्चत्रिशंकवःत्रिशंकोरपत्यंहरिश्चंद्रोयोहरिश्चंद्रोनिमित्तंयस्यतद्यन्निमित्तंपक्षिणोःसहायिनोःपक्षःपार्श्वमरुत्साध्यसहायवलि
भिश्चिष्वितियादवः६३ ६४नापुत्रस्यलोकोस्तीतिशक्यार्थज्ञानाद्विषण्णमनाअनपत्यःसहरिश्चंद्रोनारदोपदेशात्हेप्रभोमेपुत्रोजायतामितिनिवेद्यवरुणंशरणंगतइत्यन्वयः एतदेवविवृणोति यदीति हेमहाराज
यदिवीरःपुत्रोजायेततर्हितेनपुत्रेणत्वांयजे पुरुषपशुनात्वांयक्ष्येइतिहरिश्चंद्रेणोक्तेवरुणेनापितथास्त्वित्युक्तेनाजारोहितःपुत्रोजातइत्यन्वयः अथैनमुवाचवरुणंराजानमुपधाव पुत्रोमेजायतांतेनत्वायजइति
तथेतिसवरुणंराजानमुपससार पुत्रोमेजायतांतेनत्वायजाइतितथेतितस्यहपुत्रोजज्ञेरोहितोनामेतिब्राह्मणंचैवमेवार्थमनुवदति अथवरुणआगत्यहरिश्चंद्रमवादीदित्याह जातइति अंगतेसुतोजातोनेनपुत्रे
णमांयजस्वेति । सहरिश्चंद्रोवक्तिसोब्रवीदिति ६५ ६६ तंहोवाचाजनिर्वैतेपुत्रोयजस्वमानेनेतिसहोवाचयदावैपशुर्निर्दशोभवत्यथसमेध्योभवतिनिर्दशोन्यस्त्वथत्वायजाइति तथेतिइतिनिर्दशःदशाहाति
क्रांतःनिर्दशेजातेसहानिर्दशआस तंहोवाचनिर्दशोन्वभूद्यजस्वमानेनेतीति ६७ यद्यदापशोर्दंताजायेरन्अथतदापशुःशुचिःस्यादनंतरंत्वांयक्ष्येइत्यब्रवीत्हरीश्चंद्रः सहोवाच यदावैपशोर्दंताजायंतेअथसमे

हर्यश्वस्तत्सुतस्तस्मादरुणोथत्रिबंधुरः ॥ तस्यसत्यव्रतःपुत्रस्त्रिशंकुरितिविश्रुतः ६१ प्राप्तश्चंडालतांशापाद्गुरोःकौशिकतेजसा ॥ सशरीरोगतःस्व
र्गमद्यापिदिविदृश्यते ६२ पातितोवाक्छिरादेवैस्तेनैवस्तंभितोबलात् ॥ त्रैशंकवोहरिश्चंद्रोविश्वामित्रवसिष्ठयोः ६३ यन्निमित्तमभूद्युद्धंपक्षिणोर्बहुवार्षि
कम् ॥ सोनपत्योविषण्णात्मानारदस्योपदेशतः ६४ वरुणंशरणंयातःपुत्रोमेजायतांप्रभो ॥ यदिवीरोमहाराजतेनैवत्वांयजेइति ६५ तथेतिवरुणेनो
क्तेपुत्रोजातस्तुरोहितः ॥ जातःसुतोद्यनेनांगमांयजस्वेतिसोब्रवीत् ६६ यदापशुर्निर्दशःस्यादथमेध्योभवेदिति ॥ निर्दशेत्वसमागत्ययजस्वेत्याहसोब्रवीत्
६७ दंताःपशोर्यज्जायेरन्नथमेध्योभवेदिति ॥ जातादंतायजस्वेतिसप्रत्याहाथसोब्रवीत् ६८ यदापतंत्यस्यदंताअथमेध्योभवेदिति ॥ पशोर्निपतितादंता
यजस्वेत्याहसोब्रवीत् ६९ यदापशोःपुनर्दंताजायंतेथपशुःशुचिः ॥ पुनर्जातायजस्वेतिसप्रत्याहाथसोब्रवीत् ७० सान्नाहुकोयदाराजन्राजन्योथपशुःशु
चिः ॥ इतिपुत्रानुरागेणस्नेहयंत्रितचेतसा ॥ कालंवंचयतातंतमुक्तोदेवस्तमैक्षत ७१

ध्योभवतिदंतास्त्वस्यजायंतामथत्वायजाइतितथेतिइति सवरुणएत्याह हरिश्चंद्रंअस्यदंताजाताअथमांयजस्वेतितस्यहदंताजज्ञिरेतंहोवाचाज्ञतवाअस्यदंतायजस्वमानेनेति अज्ञतअजायंतयदास्यपुत्रस्य
दंताःपतंत्यथसशुद्धोभवेदित्यब्रवीत् सहोवाचयदावैपशोर्दंताः पद्यंतेअथसमेध्योभवतिदंतान्वस्यपद्यंत्वामथत्वायजाइतितथेतितस्यहदंताःपेदिरेइति पुत्रपशोर्दंताःनिपतिताःअथमांयजस्वेति वरुण
आह तंहोवाचापत्स्यतवा अस्यदंतायजस्वेतिमानेनेतीति ६८ ६९ यदापशोर्दंताःपुनर्जायंतेअनंतरंपशुःशुद्धःस्यादिति सहरिश्चंद्रोब्रवीत्सहोवाचयदावैपशोर्दंताःपुनर्जायंतेथसमेध्योभवतिदंतान्वस्यपु
नर्जायंतामथत्वायजाइतितथेतितस्यदंताःपुनर्जज्ञिरेइति अस्यदंताःपुनर्जाताःअथमांयजस्वेतिसवरुणोहरिश्चंद्रमेत्याह तंहोवाचाज्ञतवाअस्यपुनर्दंतायजस्वमानेनेति ७०यदाराजन्यःक्षत्रियःसान्नाहुकः
संनाहयोग्यःशस्त्रास्त्रग्रहणयोग्यःकवचवान्वाथराजपशुःशुचिरितिसहरिश्चंद्रोब्रवीत् सहोवाचयदावैक्षत्रियःसान्नाहुकोभवत्यथसमेध्योभवतिसन्नाहंनुप्राप्नोत्यथत्वायजाइतितथेतिसहसंनाहंप्रापतंहोवाच

सन्नाहंतुमाप्नोयजस्वमानेनेति ननुहरिश्चंद्र किमर्थंकालमक्षिपदितितत्राह इतीति । स्नेहपाशबद्धचेतसादशाहादिलक्षणंतंतंकालंवंचयताहरिश्चंद्रेणोक्तोवरुणोदेवःतमैक्षतप्रत्याहचेत्यन्वयः । तथात्मयाग कालमैक्षतेतिवा ७१ सतचेत्युक्तापुत्रमामंत्रयामाससतायंवैमह्यंत्वामददाद्धंतत्वयाहमिमंयजाइति सहमेत्युक्ताधनुरादायारण्यमुपात्तस्थौ ससंवत्सरमरण्येचचारेतिब्राह्मणप्रसिद्धंपितुश्चिकीर्षितंवरुणमुद्दि श्यात्मयजनंकर्तुमिष्टंतत्कर्माभिज्ञायप्राणप्रेप्सुरात्मजीवनेच्छुः रोहितोधनुरादायवनंप्राप ७२ तदनंतरंपितरंवरुणग्रस्तमित्यारभ्यप्रदायसमवंदतेत्यंतेनग्रंथेनाथैक्ष्वाकंवरुणोजग्राह तस्यहोदरंजज्ञेइत्यादि ब्राह्मणप्रसिद्धोर्थोनूच्यतेइषापआजगामप्रशंसायांरूपप्रत्ययविधानात् प्रशस्तपुरुषरूपःविप्रइतियावत्इंद्रोवृद्धविप्रोभूत्वातंरोहितमेत्यपर्युवाच । अपपरीवर्जनइतिसूत्रान्निषेधवचनंकृतवान्नगंतव्यमित्युक्त वानित्यर्थः ७३ तत्रयुक्तिमाह भोरोहित नानाश्रांतायपुण्यतीर्थक्षेत्रनिषेवणेननानाविधेनश्रांतस्यजनस्यश्रीरैहिकामुष्मिकसंपदस्तीतिनृषद्वरः अनुक्तकारीगुर्वादिवचनमशृण्वन्स्तंभवत्तिष्टन्चर्मकारोवा जनःपापःइतिश्रुश्रुमःतर्हिसंचरमाणस्यएकाकिनश्चोरादिभयंस्यादितिनाशंकनीयम् चरतः पुंसःइंद्रएवसखाभवतीत्यतःचरैवत्वंअटनंकुरुष्वैवंकश्चिद्ब्राह्मणोयमवोचत्कथंचरैवेति नृषद्वरोनुक्तकारीचर्मकृच्च प्रकीर्तितइति इंद्रेणोपदिष्टोरोहितःकिंचकारेतितत्राह सोपीति समाः वत्सरान् ७४ एवंकतिवत्सरान्अरण्यंचचारेतितत्राह एवमिति द्वितीयंसंवत्सरमरण्येचचारेतिआदिब्राह्मणंचास्मिन्नर्थेमानं पुष्पिण्यौजंघेचरतःपुष्पिणीगर्भिणीजंघयोर्बलाच्चरतिअटतिनैकत्रास्ते यथाभूष्णुर्बुभूषुःपुरुषः आत्मासततंपर्यटनफलग्राहिःफलंगृह्णातियथाकिंतत्फलमाप्नोतीतितत्राह शेरइति प्रपथेमहामार्गे

रोहितस्तदभिज्ञायपितुःकर्मचिकीर्षितम् ॥ प्राणप्रेप्सुर्धनुःपाणिररण्यंप्रत्यपद्यत ७२ पितरंवरुणग्रस्तंश्रुत्वाजातमहोदरम् ॥ रोहितोग्राममेयायतमिंद्रःप्रत्यषेधत ७३ भूमेःपर्यटनंपुण्यंतीर्थक्षेत्रनिषेवणैः ॥ रोहितायादिशच्छक्रःसोप्यरण्येचरत्समाः ७४ एवंद्वितीयेतृतीयेचतुर्थेपंचमेतथा ॥ अभ्येत्याभ्येत्यस्थविरोविप्रोभूत्वाहवृत्रहा ७५

तीर्थयात्राश्रमेणहताअस्यपुंसः सर्वेपाप्मानःशेरेशीर्णाभवंतीति अतस्त्वमपिचरन्फलंलभस्वेत्यर्थः चरैवेत्युक्तार्थंआसीनस्यनिव्यापारस्यभगोभाग्यमप्यास्तआसीनंभवतिसमृद्धंनभवतितिष्ठतउ त्थानंकुर्वतोभगऊर्ध्वस्तिष्ठतिउत्थानंकरोति । पुरुषच्छायेवनिपद्यमानस्यनिकृष्टोभवतीत्यर्थः । चरतःपुण्येनयथासंचरमाणस्यपुंसःभगश्चरतिप्राप्नोतितमितिशेषःभगोयोन्यांभगोयत्नेयशोवीर्यैकभूति ष्विति कलिःशयानइत्यादिनाकारणगुणःकार्यपरोयोजनीयः । तथाहि कलौजातःशयानःतामसत्वेनशुभप्रवृत्तिशून्योभवति द्वापरोजातःसंजिहानःसंशयानः इदंवाअदोवोतितस्त्वंनानिश्नोति । संबंधिपुत्रौदायादौद्वापरौयुगसंशयाविितित्रेतायांजातउत्तिष्ठन् धर्मार्थकामलक्षणकार्योद्योगीभवति । कृतयुगेजातःकृतंविहितंचरन्संपद्यतेज्ञानसंपन्नोभवतीत्यतस्त्वंचरकोभवेत्यर्थः । युगेक्ष पातेपर्याप्तेकृतंक्लीबेहितेर्थवदिति । भूमौचरन्पर्यटन्मधुसुखंविंदतिवैअशनक्लेशोपिनास्तीत्याह स्वादिष्टमुदुंबरंफलविशेषंचरन्भक्षयन्भूमिपर्यटनंकुर्वतःइत्थंभावमाह चरान्निति । श्रवणमननाभ्यां स्वादुपुनःपुनःसेवाबुद्धिजनकंउदुंबरं अत्युत्तमंवरंवरणीयंसर्वगुणाभिरामंहरिंचरणंगच्छन्नन्त्वेतिधा नित्यमटन्कोस्तीतितत्राह सूर्यस्येति यश्चरन्नविरतमटन्नतंद्रयते आलस्यंनकरोति । तस्य सूर्यस्यश्रेमाणंअव्याहतगमनाशिक्षांपश्य । तवाप्येवमरण्येचरतः जीवनक्षेमस्यादितिवृत्रहारोहितं अशिक्षतेत्यन्वय ७५

एवंशोक्षत्रस्तत्रारण्येषष्ठंसंवत्सरंचरित्वापुरीमुपगच्छन्नग्रहीताजीगतान्मध्यमंसुतंशुनःशेपमक्रीणात् गवांशतंदत्वास्वीकृतवान् । स्वीकृत्यशुनःशेपाख्यंपशुंरज्ज्वादिनाबद्ध्वा

यः षष्ठंसंवत्सरमरण्येचचारसोजीगर्तःसौयवसिमृषिमशनयापरीतमरण्यमुपेयायतस्यहत्रयःपुत्राआसुः शुनःपुच्छःशुनःशेपःशुनोलांगूलइतितंहोवाच ऋषेहतेशतंददाम्यहमेषामेकेनात्मानंनिष्क्रीणाइ

तिसज्येष्ठंपुत्रंनिगृह्णात्उवाच नन्विममिति । नोएवेममितिकनिष्ठंमातातोहमध्यमेसंपादयांचक्रतुःशुनःशेपेतस्यहशतंदत्वासतमादायसोरण्याद्ग्राममेयायसपितरमेत्योवाच ततहंताहमनेनात्मानम् निष्क्री

णाइतिसवरुणंराजानमुपससारानेनत्वायजाइतितथेतिभूयान्वैब्राह्मणःक्षत्रियादिति वरुणउवाचेति ७६ ततःपुरुषपशुभ्यांनंतरंमहायशाहरिश्चंद्रः पुरुषमेधेनपुरुषपशुहिंसालक्षणयज्ञेनवरुणा

दीन्यजंस्ततःसराजा मुक्तोदरोजलोदररोगरहितोभवदित्यन्वयः तस्माएतंराजसूयंयज्ञक्रतुंप्रोवाचतमेतमभिषेचनीयेपुरुषंपशुमालेभेइति सोभिषेचनीयइति तादर्थ्येसप्तमी वरुणमुद्दिश्येति आलेभेआ

लंभनंउपक्रांतवान् ७७ तस्यहविश्वामित्रोहोतासीज्जमदग्निरध्वर्युर्वसिष्ठोब्रह्मायास्योद्गातेतिब्राह्मणार्थत्वेनास्मिन्यज्ञेहोत्रादीनाह विश्वामित्रइति आयस्यएवसामगः अयास्यसामगः साम

गायतीतिसामगउद्गातेत्यर्थः आत्मापरमात्मास्यास्तीतिआत्मवान् ७८ तस्मैशुनःशेपायउपरिष्टाच्चतुर्दशेध्याये ७९ भूपतेर्भार्यायासहितस्यसत्यसारंसज्जनहितकरंवाक्यं धृतिंलौकिकमार्गा

दचलनंदृष्ट्वा अविहतांअप्रतिषिद्धांगतिंज्ञानलक्षणांविद्यां भार्यायाःएतद्वयमप्यस्तीतिप्रकाशनायसभार्यस्येत्युक्तम् ८० उपासनाकालेमनआदितत्त्वानांजडानांस्वस्वकारणेविलयस्तदाभिमानि

षष्ठंसंवत्सरंतत्रचरित्वारोहितःपुरीम् ॥ उपव्रजन्नजीगर्तादक्रीणान्मध्यमंसुतम् ॥ शुनःशेपंपशुंपित्रेप्रदायसमवंदत ७६ ततःपुरुषमेधेनहरिश्चंद्रोमहायशाः ॥
मुक्तोदरोयजन्देवान्वरुणादीन्महाक्रतौ ७७ विश्वामित्रोभवत्तस्मिन्होताथाध्वर्युरात्मवान् ॥ जमदग्निरभूद्ब्रह्मावसिष्ठोऽयास्यसामगः ७८ तस्मैतुष्टोददा
विंद्रःशातकौंभमयंरथम् ॥शुनःशेपस्यमाहात्म्यमुपरिष्टात्प्रचक्षते ७९ सत्यसारंधृतिंदृष्ट्वासभार्यस्यचभूपतेः ॥ विश्वामित्रोभृशंप्रीतोददावविहतांगतिम्
८० मनःपृथिव्यांतामद्भिस्तेजसांभोनिलेनतत् ॥ खेवायुंधारयंस्तच्चशब्दादौतन्महात्मनि ८१ तस्मिन्ज्ञानकलांध्यात्वातयाज्ञानंविनिर्दहन् ॥ हि
त्वातांस्वेनभावेननिर्वाणसुखसंविदा ॥ अनिर्देश्याप्रतर्क्येणतस्थौविध्वस्तबंधनः ८२ ॥ ॥ इतिश्रीभागवतेमहापुराणेनवमस्कंधेहरिश्चंद्रोपा
ख्यानेसप्तमाध्योयः ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

देवतानांभिन्नानांभिन्नेषुप्रवेशलक्षणोविलयः स्वरूपाणांस्वस्वरूपेष्वेकीभावलक्षणश्चितनीयइत्यतस्तंप्रकारमाह मनःपृथिव्यामिति अन्नमयंहिसौम्यमनःआपोमयःप्राणस्तेजोमयीवागितिश्रुतेः
अन्नंपृथिवीत्यतःपार्थिवंमनःपृथिव्यांविलीयतेतिचेतनंमनोधारयत्तांपृथिवीमद्भिरप्सुअंभस्तेजसासंह्रियतेतत्तेजोनिलेनग्रस्यतेतंवायुंखेआकाशेलीनंतच्चखंशब्दादावहंकारे तमहंकारंमहात्मनिमहत्त
त्वे तदभिमानिनंतदभिमानिन्यात्मनिचतुर्मुखेब्रह्मणिप्रविष्टम् ८१ तस्मिन्महत्तत्वेज्ञानकलांबुद्धितत्त्वंलीयते तदभिमानिनीसरस्वतीतत्सायुज्येनस्थीयतेइतिध्यात्वातयाबुद्धिकलया ज्ञानमस्व
रूपचैतन्यंनिर्दहन् तांबुद्धिमस्वरूपविषयांहित्वाविध्वस्तंबंधनंयेनसतथा सहरिश्चंद्रःस्वभावेनस्वमहिम्नानिर्वाणेशरीररहितेसुखसंविदौयस्यसतथातेनसच्चिदानंदेनअनिर्देश्यंचाप्रतर्क्यंचतत्तथाते
नब्रह्मणासहतस्थौ सहब्रह्मणाविपश्चितेतिश्रुतिः आत्मनआकाशःसंभूतइतिचश्रुतेः शब्दादौशब्दकारणेमहति आत्मनिहरौज्ञानकलांज्ञानलक्षणकामधेनुंज्ञानपूर्णइतिध्यात्वा तयातथाध्यातया
अज्ञानंतन्निमित्तसंसारंभस्मीकुर्वन्तांसंस्तुतिंहित्वापरित्यज्यनिर्वाणसुखसंविदाअशरीरानंदज्ञानलक्षणेन माद्दशैरनिर्देश्याप्रतर्क्यैगस्वेनस्वभावेनस्वरूपभूतैश्वर्येणतस्थाविवेति ॥ ८२ ॥ इतिश्रीभाग
वतेमहापुराणेनवमस्कंधेवि० कृ० टी० सप्तमोध्यायः ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

तस्माद्धरिताच्चंपः । तस्माच्चंपान्निर्मितापुरीचंपानाम अतश्चंपात् यस्यसुदेवस्य १ सबाहुकः २ अनुमरिष्यतीअनुमरणंकर्तुमिच्छंती प्रजावंतंपुत्रवंततस्याआत्मानंदहंजानताइयमंतर्वत्नीतिविदुषे त्यर्थः ३ सहसाहंतीतिसाहसोगरोत्रगर्भेपुत्रमाज्ञायसपत्नीभिरस्यैबाहुकपत्न्यैदत्तइत्यन्वयः तेनगरेणविषेणसहवर्ततइतिसगरः ४ यस्यस्यादाज्ञयापृथिवीचक्रवर्तीसईर्यतेइति सगरपुत्राःसागरास्तैः कृतत्वात्सागरःसमुद्रःतालजंघादयोद्वीपांतरवासिनोनिर्देश्याः ५ पामरान्मावधीरितिगुरोर्वाक्येनउत्सृष्टंमंत्रयित्वेतिशेषः उपाकृतमित्यर्थः ६ ७ ८ सगरस्यसुमतिः केशिनीतिद्वेभार्ये तत्र सुमतिर्गरुडस्य स्वसातस्याःपुत्राः ९ १० षष्टिसहस्रसंख्यायेषामस्तीतिषष्टिसहस्रिणः उन्मिषनेत्रविकासंकृतवान् ११ महेंद्रेणहृतंचेतोयेषांततथामुग्धाइत्यर्थः महतोव्यतिक्रमेणहताः चोरोहन्यतामित्यादिवचनलक्षणापराधेनैवस्वकृतदोषहताःनृपपुत्राःनतुमुनिकोपदग्धाः १२ शारदजलवन्नित्यप्रसन्नमूर्तेर्हरौतमोगुणकारणस्यक्रोधस्यप्रवेशदुष्प्रदत्वात्क्रोधसंभूतपापाटवीदहनत्वाच्चे

श्रीशुकउवाच ॥ हरितोरोहितादासीच्चंपस्तस्माद्विनिर्मिता ॥ चंपापुरीसुदेवोतोविजयोयस्यचात्मजः १ तरुकस्तत्सुतस्तस्माद्बृकस्तस्यापिबाहुकः ॥ सोरिभिर्हृतराज्यस्तुसभार्योवनमाविशत् २ वृद्धंतंपंचतांप्राप्तंमहिष्यनुमरिष्यती ॥ और्वेणजानतात्मानंप्रजावंतंनिवारिता ३ आज्ञायास्यैसपत्नीभिर्ग रोदत्तोत्रसाहसः ॥ सहतेनैवसंजातःसगराख्योमहायशाः ४ सगरश्चक्रवर्त्यासीत्सागरोयत्सुतैःकृतः ॥ यस्तालजंघान्यवनाञ्छकान्हैहयबर्बरान् ५ नाव धीद्गुरुवाक्येनचक्रेविकृतवेषिणः ॥ मुंडान्श्मश्रुधरान्कांश्चिन्मुक्तकेशार्धमुंडितान् ६ अनंतर्वाससःकांश्चिदबहिर्वाससोपरान् ॥ सोश्वमेधैरयजतसर्ववेदसु रात्मकम् ७ और्वोपदिष्टयोगेनहरिमात्मानमीश्वरम् ॥ तस्योत्सृष्टंपशुंयज्ञेजहराश्वंपुरंदरः ८ सुमत्यास्तनयाद्दृष्ट्वापितुरादेशकारिणः ॥ हयमन्वेष माणास्तेसमंतान्न्यखनन्महीम् ९ प्रागुदीच्यांदिशिहयंददृशुःकपिलांतिके ॥ एषवाजिहरश्चोरआस्तेमीलितलोचनः १० हन्यतांहन्यतांपापइ तिषष्टिसहस्रिणः ॥ उदायुधाअभिययुरुन्मिषेषतदामुनिः ११ स्वशरीराग्निनातावन्महेंद्रहृतचेतसः ॥ महद्व्यतिक्रमहताभस्मसादभवन्क्षणात् १२ नसाधुवादोमुनिकोपभर्जितानृपेंद्रपुत्राइतिसत्वधामनि ॥ कथंतमोरोषमयंविभाव्यतेजगत्पवित्रात्मनिखेरजोभुवः १३ यस्येरितासांख्यमयीदृढेह नौर्ययामुमुक्षुस्तरतेदुरत्ययम् ॥ भवार्णवंमृत्युपथंविपश्चितःपरात्मभूतस्यकथंपृथङ्मतिः १४ योसमंजसइत्युक्तःसकेशिन्यान्नृपात्मजः ॥ तस्यपुत्रोंशु मान्नामापितामहहितेरतः १५

त्याह नसाधुवादइति नृपेंद्रपुत्रामुनिकोपभर्जिताइत्ययंसाधुवादोनास्तिअसंभवात्कथमितितत्राह सत्वधामनीति शुद्धस्फटिकविशदज्ञानमूर्तौश्रीकपिलदेवेरोषमयंतम कथंविभाव्यतेउत्पत्तुमवकाशंलभतेनकथमपि किंचजगत्पवित्रीकरणसमर्थस्वभावे आत्माजीवेधृतौदेहेस्वभावेपरमात्मनीतियादवः कथमिवभुवोरजःपार्थिवोधूलिःखेयथेत्ययंलुप्तोपमःवेदेदृष्टत्वात् १३ इतोपितमोगुणका र्यस्यकोपस्यहरावनवसरःइत्याशयेनाह यस्येति इहजगतिसदनुग्रहाययस्ययेनेरितायंथरूपेणकथितादृढाअपेक्षितफलदानायसमर्थान्यत्रनूतनत्वेनबलिष्ठासांख्यमयीसम्यग्ज्ञानमयीनौस्तरीययाज्ञान नावामुमुक्षुर्मुक्तयेयोग्यःपुरुषः मृत्युपथंमृत्योर्मार्गंदुरत्ययंज्ञाननावमंतरेणात्येतुमशक्यंभवार्णवंतरते तादृशीयेनसंदृष्टेत्यर्थः तस्यपरात्मभूतस्यसाक्षान्नारायणावतारस्यापिश्चितःशुद्धज्ञानवतःश्रीकपि लस्यपृथङ्मतिःरोषरूषितामतिःकथंसंभाव्यतेइत्यन्वयः १४ योसमंजसइत्युक्तःहेनृपसकेशिन्याःसगरभार्यायाः आत्मजःपितामहःसगरः १५

पुरापूर्वजन्मनि योगीयोगाभ्यासनिपुणोसमंजसःसंगाद्धेतोःयोगादीश्वरोपासनालक्षणाद्धेतोश्चालितोहयस्मात्यस्मात्पूर्वजा॥तस्मरता॥तजा॥तस्मरः आत्मानमतनजन्तमतनयन्तंतिरोदधानं यन्संगंजहावितिशेषः १६ असमंजसत्वंदर्शयति आचरन्निति किंतज्ज्ञातीनांविप्रियंकर्मेतितत्राह सरय्वामितिजनमुद्वेजयन्कंपयन्तीरक्रीडतोबालान्सरय्वांनद्यांप्रास्यत्प्राक्षिपदित्यन्वयः १७ ततःकिमभूदितत्राह एवमिति योगैश्वर्येणयुष्मद्बालाएतेइतिताम्नदीजलमग्नान्बालान्दर्शयित्वाततःस्थानाद्ययावित्यन्वयः १८ विसिस्मिरेविस्मयंचक्रुःअथासमंजसेगतेराजाचान्वतप्यतपश्चात्तापंप्राप्तइत्यन्वयः १९ पितरिगतेऽशुमतीकिमकारीतितत्राह अंशुमानिति पितृव्याअसमंजससहोदरातेषामनुमार्गेपितृव्याणांशरीरभस्महयमपिदद्दशेइत्यन्वयः भस्मातेतिपाठेभस्मसमीपेहयंदृष्ट्वेत्यर्थः २० अस्तौत्स्तुतवान् २१ स्तुतिर्द्वेधाविद्यमानगुणविषयाऽविद्यमानगुणविषयाच तत्राद्वितीयापिविद्वद्विद्वद्विषयभेदेनाद्विधा उभयस्याअपिस्तुतिफलंनलभ्यतेविदुषआत्मन्यविद्यमानगुणकथनेनाऽहयास्तोतरिद्वेषसंभवादविदुषोऽज्ञानेनमुखविकासादिसंभवेपि स्तोतुःस्तुतिफलप्रदानशक्तिसामग्र्यभावादतःप्रथमैवश्रेयसीतिभावेनस्तौति नपश्यतीति । अजनोऽजोविरिंचःयस्यपरमात्मनोशंत्वांनपश्यति अनंतत्वेनसाक्षादपरोक्षीकर्तुनशक्नोति तर्हिपरोक्षतोजानातिकिंनेत्याह नेति समाधियुक्तिभिरेकाग्रीकृतचित्तयोगैरद्यापिनबुद्ध्यतेसम्यक्नजानातीत्यन्वयः । पश्यंतोपिनपश्यंतिभेरोरूपंविपश्चितःइतिवत् नयस्यतत्त्वमितिपाठेपरमात्मनोयस्यतवतत्त्वंनबुद्ध्यतइतिनकिंतुबुद्ध्यतेतथापि सम्यक्नजानातीत्यर्थः कश्छंदसांयोगमावेदधीरःकोधिष्ण्याप्रतिबाचंपपादेतिश्रुतेः

असमंजसआत्मानंदर्शयन्नसमंजसम् ॥ जातिस्मरःपुरासंगाद्योगीयोगाद्विचालितः १६ आचरन्गर्हितंलोकेज्ञातीनांकर्मविप्रियम् ॥ सरय्वांक्रीडतोबालान्प्रास्यदुद्वेजयन्जनम् १७ एवंवृत्तःपरित्यक्तःपित्रास्नेहमपोह्यवै ॥ योगैश्वर्येणबालांस्तान्दर्शयित्वाततोययौ १८ अयोध्यावासिनःसर्वेबालकान्पुनरागतान् ॥ दृष्ट्वाविसिस्मिरेराजन्राजाचाप्यन्वतप्यत १९ अंशुमांश्चोदितोराज्ञातुरंगान्वेषणेययौ ॥ पितृव्यखातानुपथंभस्मापिदद्दशेहयम् २० तत्रासीनंमुनिंवीक्ष्यकपिलाख्यमधोक्षजम् ॥ अस्तौत्समाहितमनाःप्रांजलिःप्रणतोमहान् २१ नपश्यतित्वांपरमात्मनोऽजनोनबुद्ध्यतेद्यापिसमाधियुक्तिभिः ॥ कुतोपरेतस्यमनःशरीरविसर्गसृष्टावयवप्रकाशाः २२ येदेहभाजस्त्रिगुणप्रधानागुणान्विपश्यंत्युतवातमश्च ॥ यन्मायया मोहितचेतसस्तेविदुःस्वसंस्थंनबहिःप्रकाशाः २३

नपश्यतीति । रूपस्यनानोपायविशारदज्ञानस्यपरमात्मनस्तवतत्त्वंनबुद्ध्यतेइतिवा । एकस्याभावेप्यन्यस्यसंभवःकिंनस्यात्तथादृष्टत्वादित्याशंक्येतरविषयोयंन्यायोनपरमात्मविषयइतिभावेनाह कुतइति । अपरेविरिंचादितरेसमाधियुक्तिरहिताः कुतोहेतोःपश्यंतिजानंति दर्शनादिसद्भावेनाकिमपिलिंगमित्यर्थः । अनेनचोद्यंकथंपरिहृतमित्यितत्राह तस्येति तस्याविरिंचस्यमनसः शरीराच्चविसर्गैः विशिष्टासृष्टिर्येषांमरीच्यादीनांतेमनःशरीरविसर्गास्तैःसृष्टेषुशरीरावयवेषुश्रोत्रादिषुप्रकाशोअभिमानित्वेनस्थितिलक्षणोयेषांदिक्सूर्यादीनांतेमनःशरीरविसर्गसृष्टावयवप्रकाशाः अनेनइंद्रादयोमरीच्यादयःउभयेपिप्रत्युक्ताः अत्रजनोनपश्यतिनबुद्ध्यतेइत्यंगीकारेकुतोपरेइत्येतद्वृतार्थत्वेनासंगतंस्यादितिषहुवचनमेवावशिष्यतेइति पदच्छेदेनाविरिंचएवग्राह्यः २२ येदेहभाजःशरीरिणस्तेत्रिगुणप्रधानाः सत्वप्रधानारजःप्रधानास्तमःप्रधानाइतित्रिविधाः । तत्ररजःप्रधानाःराजसामानुषाःत्रिगुणप्रधानाःधर्मार्थकामपरायणाःगुणान्सर्गादीनेवपश्यंतिनमोक्षम् तमःप्रधानास्तामसाःअसुराःयस्यहरेर्मायया बंधशक्त्यामोहितचेतसःअन्यथाज्ञानपूर्णबुद्धयःतमोवाअंधंतमएवविशिष्टंपश्यंतिअनुभवंति तत्रनिमित्तमाह तइतितेस्वसंस्थंस्वहृदिस्थितंविष्णुंनविदुरितियत्तस्मादितिशेषःतर्ह्यचेतनाःकिंतेइतिनेत्याह बाहिरिति बहिर्देहादावेवप्रकाशोयेषांतेतथाअनात्मज्ञानिनइत्यर्थःआत्मैवमहेप्यइतिश्रुतेःज्ञानाश्रयत्वेनचेतनत्वेपियथार्थज्ञानंनास्तीतिभावः २३

येसत्वप्रधानाःसात्विकप्रकृतयः तैःसनंदनाद्यैर्मुनिभिर्विभाव्यंउपास्यंतंतत्तद्योग्येभ्यस्तत्फलदातारंत्वामहंकथंपरिभावयामि चिंतयामिचिंतनेकानुपपत्तिरितितत्राह विमूढइतिसामन्यज्ञातेवस्तुनिविशेषजिज्ञासासंजाघटीति ममतुतदेवनास्त्यतस्त्वद्विषयज्ञानाभावएवानुपपत्तिरित्यर्थःसनंदनादीनामपिदेहभाक्त्वाविशेषात्तत्परिभावनाकथंस्यादितितत्राहप्रध्वस्तेतिप्रध्वस्तोमायामयःप्रकृतिहेतुकःमेदमोहःअनात्मन्यात्मत्वमोहोयैस्तेतथातैःनिरस्तमिथ्याज्ञानैरित्यर्थःअनेनदेहभाक्त्वेपिविशेषोस्तीतिदर्शितं कार्यतेह्यवशःकर्मसर्वःप्रकृतिजैर्गुणैरितिस्मृतिः २४ त्वांनमामहइत्यन्वयःत्वामितिकइतितत्राह पुरुषमितितर्हिदेवदत्तवच्चिरंतनःकश्चिदयंस्यादितिनेत्याह अनामरूपमिति प्राकृतनामादिरहितम् तत्कुतइतितत्राहप्रशांतेतिप्रशांतानिउपरतानिमायागुणाःसत्वादयःकर्माणितन्निमित्तव्यापारोलिंगंशरीरंयस्यसतथा तत्कारणत्वेनमृद्वदभिन्नत्वेएतत्कथंघटतइतितत्राह सादितिसतोब्रह्मणअसतःपरमाण्वादेः विमुक्तंभिन्नंरुक्मवर्णमितिश्रुतेःशरीरत्वेननामरूपदर्शनात्तदभावकथनंकथमितितत्राहज्ञानेतिलोकानुग्रहार्थंशरीरग्रहणं नतुकर्मनिमित्तंअतएवानित्यदुःखाभावः २५ त्रिविधानांजीवानांस्वभावाभिभवोनास्तीतिदर्शनाय मानुषस्वभावमाह यन्मायययेति यस्यहरेर्मायायाप्रकृत्याइच्छया

तंत्वामहंज्ञानघनस्वभावंप्रध्वस्तमायामयभेदमोहैः ॥ सनंदनाद्यैर्मुनिभिर्विभाव्यंकथंविमूढःपरिभावयामि २४ प्रशांतमायागुणकर्मलिंगमनामरूपंसदसद्विमुक्तम् ॥ ज्ञानोपदेशायगृहीतलिंगंनमामहेत्वांपुरुषंपुराणम् २५ यन्मायारचितेलोकेवस्तुबुद्ध्यागृहादिषु ॥ भ्रमंतिकामलोभेर्ष्यामोहविभ्रांतचेतसः २६ अद्यनःसर्वभूतात्मन्कामकर्मेंद्रियाशयः ॥ मोहपाशोदृढश्छिन्नोभगवंस्तवदर्शनात् २७ श्रीशुकउवाच ॥ इत्थंगीतानुभावस्तंभगवान्कपिलोमुनिः ॥ आंशुमंतमुवाचेदमनुगृह्यधियानृप २८ श्रीभगवानुवाच ॥ अश्वोयंनीयतांवत्सपितामहपशुस्तव ॥ इमेचपितरोदग्ध्वागंगांभोर्हतिनेतरत् २९ तंपरिक्रम्यशिरसाप्रसाद्यहयमानयत् ॥ सगरस्तेनपशुनाक्रतुशेषंसमापयत् ३० राज्यमंशुमतेन्यस्यनिःस्पृहोमुक्तबंधनः ॥ और्वोपदिष्टमार्गेणलेभेगतिमनुत्तमाम् ३१ आंशुमांश्चतपस्तेपेगंगागमनकाम्यया ॥ कालंमहांतंनाशक्नोत्ततःकालेनसंस्थितः ३२ दिलीपस्तत्सुतस्तद्वदशक्तःकालमेयिवान् ॥ भगीरथस्तस्यपुत्रस्तेपेससुमहत्तपः ३३ दर्शयामासतंदेवीप्रसन्नावरदास्मिते ॥ इत्युक्तःस्वमभिप्रायंशशंसावनतोभृशम् ३४ गंगोवाच ॥ कोविधारयतावेगंपतंत्यामेमहीतले ॥ अन्यथाभूतलंभित्वानृपयास्येरसातलम् ३५ किंचाहंदुर्गतिंयास्येनरामय्यामृजंत्यघम् ॥ मृजामितदघंक्वूरंराजंस्तत्रविचिंत्यताम् ३६

वारचितेनिर्मितेलोकेभूम्यादौरचितगृहादिषुवस्तुबुद्ध्याऽनश्वराणीति मनसाभ्रमंतिपरिवर्ततेकेमानुषाइतिशेषःनिमित्तमाह कामेतिकामोविषयाभिलाषः लोभोधर्मादिविषयार्थत्यागानिच्छाईर्ष्याअक्षमामोहोवैचित्त्यंएतैर्विभ्रांतंचेतोयेषांतेतथाअनेनान्यद्वयंव्याख्यातम् २६ उपसंहरतिअद्येति अद्यनोस्माकंपुत्रादिषुदृढोमोहपाशः आज्ञानहेतुकःस्नेहपाशश्छिन्नइत्यर्थःकामकर्मेंद्रियेष्वाशेतइतिकामकर्मेंद्रियाशयः २७ २८ अर्हतिअपेक्षते २९ ३० ३१ महदपराधपंकप्रक्षालनेनात्मजनोद्धारायमहांतंकालंतपस्तेपइत्यन्वयः संस्थितोमृतः ३२ कालमेयिवान्मरणंप्राप्तः ३३ प्रसन्नादेवीतेवरदास्मीतिनिगद्यस्वात्मानंतमुद्दिश्यप्रदर्शयामास ३४ ३५ किंचरसातलप्रवेशलक्षणानर्थएवनअन्योप्यस्तीत्याशयेनाह किंचेति कुतोनरकप्राप्तिरितितत्राह नराइति पापिनोनराःस्नानादिनामय्यघमामृजंतिशोधयंतिपापांनिक्षिप्यस्वयंशुद्धाभवंति हेराजन्तदघमृजामिशोधयामिकेतिशेषः कानिक्षिप्यशुद्धाभवामिअत्रास्मिन्नर्थेविचिंत्यतांनराणामघसंहर्त्र्यहंमद घसंहर्तृकइतिविवेकःक्रियतामित्यन्वयः ॥३६॥

उत्तरमाह साधवइति शमदमादिलक्षणसंपन्नाःसाधवोतएवानिराशिषःस्वर्गादिसुखलक्षणाशारहिताः कुतइतितत्राह ब्रह्मिष्ठाइति इष्टनूप्रत्ययांतत्वेच ब्रह्मणिपूर्णाभगवद्भक्त्यातशषः अभाअतशपनश्च ब्रह्मपूर्णाःब्रह्मिष्ठाःब्रह्मण्येवस्थिताइत्ययंछांदसःतथात्वेब्रह्मस्थाइतिस्यात्तस्मादयमिष्ठत्रतस्तमनुसृत्यैवंकृतं लोकपावनाएवंविधाःयेस्वहृदाहरिंप्राप्तास्तेअंगसंगात्पादप्रक्षालनादिनाहस्ताद्यंगसंबंधात्पापिना मघंहरंतीतिशेषः तेषांस्वहृदिस्थितहरिसान्निध्यात्पापंनास्त्येव तर्वीकवक्तव्यमनवरतपद्मनाभपादसरोजनिजवासायाइत्यर्थः ३७ द्वितीयंप्रश्नंपरिहृत्यप्रथमंपरिहरति धारयिष्यतीति शरीरिणामात्माहंकाररूपेणस्वरूपभूतइव शाटीकंथागुणितद्विपुटिकावा ३८ तथाल्पीयसाकालेन शिवआशुअतुष्यतेति ३९ राज्ञाभिहितः शिवः ४० ४१ प्रयांतंभगीरथंअनुधावतीपृष्ठतःआयांती ४२ देहभस्मभिः

राजोवाच ॥ साधवोनिराशिषःशांताब्रह्मिष्ठालोकपावनाः ॥ हरंत्यघंतेंगसंगाद्येप्राताःस्वहृदाहरिम् ३७ धारयिष्यतितेवेगंरुद्रस्त्वात्माशरीरिणाम् ॥ यस्मिन्नोतमिदंप्रोतंविश्वंशाटीवतंतुषु ३८ इत्युक्त्वासनृपोदेवींतपसातोषयच्छिवम् ॥ कालेनाल्पीयसाराजंस्तपसावाश्वतुष्यत ३९ तथेतिराज्ञाभिहितः सर्वलोकहितःशिवः ॥ दधारावहितोगंगांपादपूतजलांहरेः ४० भगीरथोपिराजर्षिर्निन्येभुवनपावनीम् ॥ यत्रस्वपितृणांदेहाभस्मीभूताःस्मशेरते ४१ रथेनवायुवेगेनप्रयांतमनुधावती ॥ देशान्पुनंतीनिर्दग्धानसिंचत्सगरात्मजान् ४२ यज्जलस्पर्शमात्रेणब्रह्मदंडहताअपि ॥ सगरात्मजादिवंजग्मुःकेवलंदेहभस्मभिः ४३ भस्मीभूतांगसंगेनस्वर्याताःसगरात्मजाः ॥ किंपुनःश्रद्धयादेवींयेसेवंतेधृतव्रताः ४४ नह्येतत्परमाश्चर्यंस्वर्धुन्यायदिहोदितम् ॥ अनंतचरणांभोजप्रसूतायाभवच्छिदः ४५ सन्निवेश्यमनोयस्मिञ्छ्रद्धयामुनयोमलाः ॥ त्रैगुण्यंदुस्त्यजंहित्वासद्योयातास्तदात्मताम् ४६ श्रुतोभगीरथाज्जज्ञेतस्य नाभोवरोभवत् ॥ सिंधुद्वीपस्ततस्तस्मादयुतायुस्ततोभवत् ४७ ऋतुपर्णोनलसखोयोश्वविद्यामयान्नलात् ॥ दत्वाक्षहृदयंतस्मैसर्वकामस्तुतत्सुतः ४८ ततःसुदासस्तत्पुत्रोमदयंतीपतिर्नृपः ॥ आहुर्मित्रसहंयंवैकल्माषांघ्रिमुतक्वचित् ४९ वसिष्ठशापाद्रक्षोभूदनपत्यःस्वकर्मणा ५० राजोवाच ॥ किन्निमित्तोगुरोःशापःसौदासस्यमहात्मनः ॥ एतद्वेदितुमिच्छामःकथ्यतांनरहोयदि ५१ श्रीशुकउवाच ॥ सौदासोमृगयांकिंचिच्चरन्रक्षोजघानह ॥ शुशोच भ्रातरंसोथगतःप्रतिचिकीर्षया ५२ सचिंतयन्नघंराज्ञःसूदरूपधरोगृहे ॥ गुरवेभोक्तुकामायपक्त्वानिन्येनरामिषम् ५३

सार्कं ४३ भस्मीकृतांगस्यत्वर्धुन्यासंगेन ४४ श्रीनारायणचरणसंगलब्धमेवास्यामाहात्म्यंनान्यतोतोनैतच्चित्रमित्याह नहीति इहसगरात्मजकथाप्रसंगेगंगामाहात्म्यमुदितमतएवभवच्छिदःसंसारच्छेन्त्र्याःजन्मच्छेन्त्र्यावा भवोभद्रेहरेप्राप्तौसत्तासंसारजन्मस्विति ४५ संसारच्छेदनमाहात्म्यंश्रीहरिनिष्ठंगंगायांउपचारइत्याशयवानाह सन्निवेश्येति तदात्मतांतत्सायुज्यलक्षणांमुक्तितत्स्वामिकतांवा ४६ एवंभगीरथस्यगंगानयनादिमाहात्म्यमुक्त्वातत्संततिंकथयति श्रुतइति तस्यश्रुतस्यनाभस्यवरःसुतः ततःअयुतायोः ४७ ऋतुपर्णः अयात्प्राप्नवान्तत्सुतःऋतुपर्णसुतः ४८ यंसुदासपुत्रं ४९ ५० ५१ रक्षोराक्षसं मृतंभ्रातरंप्रतिचिकीर्षयाभ्रातृहंतृहननलक्षणप्रतिकारेच्छया ५२ सूदरूपधरःपाचकवेषधरःनरामिषंनरमांसं ५३

एवंविधः ५४ रक्षःकृतंराक्षसकृतं ५५ रुशतीःक्रूराःमंत्रितत्वात् रुषारिषाहिंसायांहिंसयंतीर्वा रुशशब्दे हतंचिकीर्षामइतिशब्दयंतीर्वा माधमासेरटंत्यापइतिवचनात् ५६ कल्माषतांवनमाषवर्णवत्तां व्यवायकालेसुरतसमये ५७ द्विजपत्नीराक्षसस्यकृपाजननायावध्यत्वेचानेकानिकारणान्याह नभवानित्यादिना ५८ ५९ ६० ६१ ६२ भ्रूणस्यस्वस्यस्वयमेवपुत्रस्य ब्रह्मवादिनःब्रह्मज्ञानिनःषडंगवेदाध्यायिनोवा ६३ बभ्रोःसौरभेय्याःमाहेयीसौरभेयीचबभ्रुःस्याद्दृषकांक्षिणीत्याभिधानं ६४ येनपत्या मृतकंप्राणरहितशरीरंप्राणमंतरेण ६५ ६६ ६७ हेअकृतप्रज्ञआशिक्षितबुद्धे तवमृत्युरेवंगर्भा

परिवेष्यमाणंभगवान्विलोक्याभक्ष्यमंजसा॥राजानमशपत्क्रुद्धोरक्षोह्येवंभविष्यसि ५४ रक्षःकृतंतद्विदित्वाचक्रेद्वादशवार्षिकम् ॥ सोप्यपोंजलिनादायगुरुंशप्तुंसमुद्यतः ५५ वारितोमदयंत्यापोरुशतीःपादयोर्जहौ ॥ दिशःखमवर्नीसर्वांपश्यन्जीवमयींनृपः ५६ राक्षसंभावमापन्नःपादेकल्माषतांगतः ॥ व्यवायकालेदृदृशेवनौकौदंपतीद्विजौ ५७ क्षुधार्तोजगृहेविप्रंतत्पत्न्याहाकृतार्थवत् ॥ नभवान्राक्षसःसाक्षादिक्ष्वाकूणांमहारथः ५८ मदयंत्याःपतिर्वीरनाधर्मंकर्तुमर्हसि ॥ देहिमेपत्यकामायास्त्वकृतार्थंपतिंद्विजम् ५९ देहोयंमानुषोराजन्पुरुषस्याखिलार्थदः ॥ तस्मादस्यवधोवीरसर्वार्थवधउच्यते ६० एषहिब्राह्मणोविद्वांस्तपःशीलगुणान्वितः ॥ आरिराधयिषुर्ब्रह्ममहापुरुषसंज्ञितम् ६१ सर्वभूतात्मभावेनभूतेष्वंतर्हितंगुणैः ॥ सोयंब्रह्मर्षिवर्यस्तेराजर्षिप्रवराद्विभो ६२ कथमर्हतिधर्मज्ञवधंपितुरिवात्मजः॥तस्यसाधोरपापस्यभ्रूणस्यब्रह्मवादिनः ६३ कथंवधंयथाबभ्रोर्मन्यतेसंमतोभवान् यद्ययंक्रियतेभक्ष्यस्तर्हिमांखादपूर्वतः ६४ नजीविष्येविनायेनक्षणंचमृतकंयथा ॥ एवंकरुणभाषिण्याविलपंत्याअनाथवत् ६५ व्याघ्रःपशुमिवाखादत्सौदासःशापमोहितः ॥ ब्राह्मणीवीक्ष्यभर्तारंपुरुषादेनभक्षितम् ६६ शोचंत्यात्मानमुर्वीशमशपत्कुपितासती ॥ यस्मान्मेभक्षितःपापकामार्तायाःपतिस्त्वया ६७ तवापिमृत्युरापातादकृतप्रज्ञदर्शितः ॥ एवंमित्रसहंशप्त्वापतिलोकपरायणा ६८ तदस्थीनिसमिद्धेग्नौप्रास्यभर्तुर्गतिंगता ॥ विशापोद्वादशाब्दांतेमैथुनायसमुद्यतः ६९ विज्ञायब्राह्मणीशापंमहिष्यासन्निवारितः ॥ ततउर्ध्वंसतत्याजस्त्रीसुखंकर्मणाप्रजाम् ७० वासिष्ठस्तदनुज्ञातोमदयंत्यां प्रजामधात् ॥ सावैसप्तसमागर्भमबिभ्रन्नव्यजायत ७१ जघ्नेऽश्मनोदरंतस्मात्सोश्मकस्तेनकथ्यते॥ अश्मकान्मूलकोजज्ञेयःस्त्रीभिःपरिरक्षितः ७२ नारीकवचइत्युक्तोनिःक्षत्रेमूलकोभवत् ॥ ततोदशरथस्तस्मात्पुत्रोएलबिलिःस्मृतः ७३ राजाविश्वसहोयस्यखट्वांगश्चक्रवर्त्यभूत् ॥ योदेवैरर्थितोदैत्यानवधीद्युधिदुर्जयान् ७४

धानसमयेदार्शंतोभवेदापातादतर्किंतात्कालादितिशेषः ६८ प्रास्यनिक्षिप्य ६९ ब्राह्मण्याशापंविज्ञायसमित्रसहःस्त्रीसुखंत्रियंदूरीकृत्य कर्मणाभैथुनलक्षणेन प्रजांसंततिंतत्याज ७० तर्ह्यस्यकेनविधिनापुत्रोजातइतितत्राह वासिष्ठइति तेनसौदासेनअनुज्ञातः मद्वार्यायांपुत्रमुत्पादयेति समाःसंवत्सरान् ७१ ७२ निक्षत्रेपरशुरामेणदुष्टक्षत्रियसंहारेकृतेसति ७३ खट्वांगोदैत्यान्निहत्यस्वपुरं गत्वायुर्मुहुर्तावधिकंज्ञात्वैवंमनःसंदधे ७४

मुहूर्तमायुर्ज्ञात्वैत्यस्वपुरंसंदधेमनः ॥ नमेब्रह्मकुलात्प्राणाःकुलदैवान्नचात्मजाः ७५ नश्रियोनमहीराज्यंनदाराश्चातिवल्लभाः ॥ नबाल्येपिमतिर्मह्यम
धर्मेरमतेक्वचित् ७६ नापश्यमुत्तमश्लोकादन्यत्किंचनवस्त्वहम् ॥ देवैःकामवरोदत्तोमह्यंत्रिभुवनेश्वरैः ७७ नवृणेह्यवमंकर्ममृतभावनभावनात् ॥ येऽ
विक्षिप्तेंद्रियधियोदेवास्तेस्वहृदिस्थितम् ७८ नविंदंतिप्रियंशश्वदात्मानंकिमुतापरे ७९ अथेशमायारचितेषुसंगगुणेषुगंधर्वपुरोपमेषु ॥ रूढंप्रकृत्या
त्मनिविश्वभर्तुर्भावेनहित्वातमहंप्रपद्ये ८० इतिव्यवसितोबुद्ध्यानारायणगृहीतया ॥ हित्वान्यभावमज्ञानंततःस्वंभावमाश्रितः ८१ यत्तद्ब्रह्मपरंसू
क्ष्ममशून्यंशून्यकल्पितम् ॥ भगवान्वासुदेवेतियंगृणंतिहिसात्वताः ८२ खट्वांगादीर्घबाहुश्चरघुस्तस्मात्पृथुश्रवाः ॥ अजस्तस्मान्महाराजस्तस्माद्दश
रथोभवत् ८३ तस्यापिभगवानेषसाक्षाद्ब्रह्ममयोहरिः ॥ अंशांशेनचतुर्धागात्पुत्रत्वंप्रार्थितःसुरैः ॥ रामलक्ष्मणभरतशत्रुघ्नाश्चेतिसंज्ञया ८४ तस्या
नुचरितंराजन्नृषिभिस्तत्त्वदर्शिभिः ॥ श्रुतंहिवर्णितंभूरित्वयासीतापतेर्मुहुः ८५ गुर्वर्थेत्यक्तराज्येाव्यचरदनुवनंपद्मपद्भ्यांप्रियायाःपाणिस्पर्शक्षमाभ्यां
मृजितपथिरुजोयोहरींद्रानुजाभ्याम् ॥ वैरूप्याच्छूर्पणख्याःप्रियविरहरुषारोपितभ्रूविजृंभःश्रुत्वाविर्बद्धसेतुःखलदवदहनःकोसलेंद्रोवतीर्णः ८६ विश्वा
मित्राध्वरेयेनमारीच्याद्यानिशाचराः ॥ पश्यतोलक्ष्मणस्यैवहतानैर्ऋतपुंगवाः ८७ योलोकवीरसमितौधनुरैशमुग्रंसीतास्वयंवरमुखेत्रिशतोपनेयम् ॥
आदायबालगजलीलइवेक्षुयष्टिंसज्जीकृतंनृपविकृष्यबभंजमध्ये ८८

तस्यांतेसुषिरंसूक्ष्मंब्रह्मेतिपरमात्मेतिभगवानितिशब्द्यतेइत्यादेःशून्यंब्रह्मत्वमवाभ्यामितिच ८२ ८३ ब्रह्ममयःवेदमुख्यार्थभूतःस्वयमंशेन लक्ष्मणादिषुअंशांशेन ८४ तत्वदर्शिभिःऋषिभिःवर्णितंतस्यसीता
पतेर्भूरिफलतोमहत्तरमनुचरितम् ८५ त्वयापुनःपुनःश्रुतमपिशृणुष्वेत्याशयेनाह गुर्वर्थइति गुर्वर्थेपित्रर्थे पद्मपद्भ्यांपद्मोपमचरणाभ्यांमृजितपथिरुजःमार्जितमार्गक्लेशःहरींद्रानुजाभ्यांसुग्रीवलक्ष्मणाभ्यां
वैरूप्यान्नासिकाच्छेदलक्षणात्प्रियायाःसीतायाःविरहोद्भूतरुषाआरोपितभ्रूविजृंभःउन्नमितभ्रूभंगःलंकायांहनुमतः आविर्भावंश्रुत्वाखलाएवदवःखलदवःतस्यखलदवस्यदाहेदहनेग्निः दवोदावोवनारण्यद
न्ह्योरितियादवः एवंविधोभगवान्कोसलेंद्रनाम्नाभुव्यवतीर्णइत्यन्वयः अवतान्नइतिकेचित्पठंति ८६ एकपद्येनसूत्रवत्संक्षिप्तरामचरितमादितएवकिंचित्प्रपंचयति विश्वामित्रेति येनैव ८७ लोकेवेदी
रास्तेषांसमितौसभायांईशस्यशिवस्यविद्यमानंत्रिशतैरनेकैःपुरुषैःउपनेयंसमीपंआनेतुंयोग्यंसज्जीकृतंज्यायासहितंकृतम् ८८

उरसिअभिलब्धमानांप्राप्तमानांआत्मनःस्वस्यरूपादिभिरनुरूपायासीताभिधाश्रीर्लक्ष्मीस्तांजित्वाप्राप्यस्वार्जितइतिवत् मार्गेव्रजन्रामोहतराजबीजांनिर्मूलितक्षत्रसंततिंमहींकृतवतोभृगुपतेःपरशुराम स्यप्ररूढं । दर्पउन्नतमदंव्यनयदपनीतवानित्यन्वयः८९ योरामःसत्याख्यपाशेनपरिवीतस्यपरिवेष्टितस्यपितुर्निदेशमाज्ञांशिरसापिपितृसंभावनार्थंजगृहइत्यन्वयः अपिर्जुगुप्सितार्थोवा। जुगुप्सायांकिं नित्तमित्यतउक्तं स्त्रैणस्येति । स्त्रीजितस्यसभार्यइत्यनेनतस्याअपिबहुमानातिशयंसूचयतिअसूनिवेत्यनेनराज्यलक्ष्म्यादीनांअशक्यत्याज्यतांदर्शयति । मुक्तसंगइत्यनेनाऽसंगोह्ययंपुरुषइतिश्रुति सिद्धनित्यासंगतांदर्शयति अधिवासंअयोध्याम् ९० रक्षस्वसुःशूर्पणख्याःरूपंव्यकृत कर्णनासिकाच्छेदनलक्षणविकारंकारितवान् अटमानःवनइतिशेषः ९१ शूर्पणखीमुखात्सीतायाःसौंदर्यादिवि षयकथायाः श्रवणेनदीपितःप्रज्वलितोहृच्छयः कामोयस्यसतथातेनदशकंधरेणरावणेन सृष्टंप्रतिपाद्यप्रेषितं उत्सर्जनंविसर्जने विश्राणनंवितरणंस्पर्शनंप्रतिपादनमित्यभिधानं कृतैणवपुषा विरचितमृगाकारेणाश्रमतःसमीपेविचरंतंविलोक्यसीतयाप्रकृष्टः उल्लिखितोभेदितोवशीकृतइतियावत् आश्रमतोपकृष्ट दूरंनीतोरामोविशिखेनमारीचंआशुजघ्नइत्यन्वयः । उग्रोनरसिंहोहिरण्यकशि पुनामानंअरिं उग्रोजज्ञेवीर्यायस्वधावानितिश्रुतिः रुद्रोंधकाख्यंरिपुंवाउग्रः कपर्दीश्रीकंठःशितिकंठःकपालभृदित्याभिधानं ९२ निर्ऋत्यादिराक्षसविवक्षयारक्षोधमेनरावणेनाविपिनेवृकवास्थितेन । वृ

जित्वानुरूपगुणशीलवयोनुरूपांसीताभिधांश्रियमुरस्यभिलब्धमानाम् ॥ मार्गेव्रजन्भृगुपतेर्व्यनयत्प्ररूढंदर्पंमहींकृतवतोहतराजबीजाम् ८९ यःसत्य पाशपरिवीतपितुर्निदेशंस्त्रैणस्यचापिशिरसाजगृहेसभार्यः ॥ राज्यश्रियंप्रणयिनःसुहृदोधिवासंत्यक्काययौवनमसूनिवमुक्तसंगः ९० रक्षःस्वसुर्व्यकृतरू पमशुद्धबुद्धेस्तस्याःखरत्रिशिरदूषणमुख्यबंधून् ॥ जघ्नेचतुर्दशसहस्रमवारणीयकोदंडपाणिरटमानउवासकृच्छ्रम् ९१ सीताकथाश्रवणदीपितहृच्छये नसृष्टंविलोक्यनृपतेदशकंधरेण ॥ जघ्नेकृतैणवपुषाश्रमतोप्रकृष्टोमारीचमाशुविशिखेनयथारिमुग्रः ९२ रक्षोधमेनवृकवद्विपिनेसमक्षंवैदेहराजदुहित र्यपियापितायाम् ॥ भ्रात्रावनेकृपणवत्प्रिययावियुक्तःस्त्रीसंगिनामितिरतिंप्रथयंश्चचार ९३ यद्रोषतीव्रपरिवृत्तकटाक्षपात संभ्रांतनक्रमकरोभयगीर्णघो षः ॥ सिंधुःशिरस्यर्हणंपरिगृह्यरूपीपादारविंदमुपगम्यबभाषएतत् ९४

णोत्यावृणोत्यात्मानमितिवेषांतरेणास्थितेनेत्यर्थःअसमक्षमप्रत्यक्षंरामस्येतिशेषः वैदेहराजदुहितरि सीतायामप्रयापितायामपनीतायां अवनेनियुक्तेनभ्रात्रालक्ष्मणेनरहितायामितिशेषः प्रियया सीत यावियुक्त लोकदृष्ट्येतिशेषः। स्त्रीसंगिनांरातिमितीत्थंप्रथयन्प्रख्यापयन्चचार अनेनविटजनशिक्षणार्थमेवंदर्शितामितिज्ञायतेप्रथयन्नित्युक्तेः । किमर्थमेवंकल्पनातत्स्वभावानुभवात्किंनस्यादितिचेन्नि त्यपूर्णसुखज्ञानस्वरूपोसौयतोविभुः । ततोस्यरामइत्याख्यातस्यदुःखकृतोण्वपि । तथापिलोकशिक्षार्थमदुःखोदुःखवार्तीवत् । अंतर्हितांलोकदृष्ट्यासीतामासीत्स्मरन्निवेतिस्मृतिविरोधात् प्रिययावियुक्तत्व दर्शनमपिलोकदृष्ट्यपेक्षयेतिज्ञातव्यं तत्कुतोवगतमितिचेज्ज्ञानार्थंपुनर्नित्यसंबंधंस्वात्मनःश्रिया । अयोध्यायाविनिर्गच्छन्सर्वलोकस्यचेश्वरः । प्रत्यक्षंतुश्रियासार्धंजगामानादिरव्ययइतिस्मृत्याज्ञात व्यं । एवमन्यत्रापिप्रमाणसामर्थ्यात्सर्वत्राप्यनुसंधेयोऽन्यर्थइतिविशेषंसमस्तं ९३ इतोपिश्रीरामःसाक्षान्नारायणावतारएवनदेवदत्ताद्यन्यसमःतस्यप्रियावियोगादिनादुःखप्रकटनमसुरजनमोहनायमा नुषावतारदेवताजनशिक्षणायचेत्येतदभ्रत्यैःश्लोकैरवज्ञातुंसुशकमित्याशयेनतन्माहात्म्यंप्रकटयति यद्रोषेतियस्यरामस्यरोषेणतीव्रपरिवृत्तश्चकटाक्षः । यद्रोषतीव्रपरिवृत्तकटाक्षस्तस्यपातेनलक्षवेधवद्वि षयीकरणेनसंभ्रांताइतस्ततोऽनवस्थितानक्राश्रमकराश्रयस्मिन्सतथाभयेनगीर्णोनष्टोघोषोयस्मिन्सतथाअतएवतूष्णींस्थितइत्यर्थः। अर्हणमर्घ्यपाद्यादिपूजासाधनंरूपीकरचरणादिविशिष्टावयवोपेतः९४

जडवदचेतनवद्धीर्येषांतेतथाज्ञानपूर्वप्रवृत्तिशून्याइत्यर्थः । जडाधाराइत्याथाप्यग्राह्यः अननतावदवास्मत्तःप्रयोजनमातसूचयति । यतोजगत्कारणस्यब्रह्मत्वान्नाचेतनत्वंनापरमात्मत्वंचेत्यर्थः तिचेत्तदस्याप्यस्तीत्याह त्वमिति । यस्त्वंसत्वगुणात्सुरगणान् । असृक्षीःरजोगुणात्प्रजेशान्मनुष्यानसृजः । मन्योस्तमोगुणाच्चभूतपतयःभूतपतीन्ब्रह्मराक्षसादिलक्षणासुरान्उदभावयःसपरमाण्वादिमहत्तत्त्वांतजगतःकर्ताभवान्नान्यः । गुणैःप्रवर्तमानस्यगुणनिमित्ताभिभवोनाशंकनीयः गुणानांतदधीनत्वादित्याशयेनाह गुणेशइति क्रोधस्यतमःकार्यत्वात्तेनतल्लक्षयति ९५ यथावमेहोविष्ठ शरीरान्निर्गताशुनामुपयोगायभवति । तथायमपिविश्रवसोदेहान्निर्गतत्वेनावमेहस्थानीयस्त्वच्छरानिर्भिन्नहृदयः । शुनामशनायस्यादित्यतोविश्रवसोवमेहमित्युक्तं । त्रैलोक्यस्यरोदनकरणत्वात्रैलोक्यरावणं हेवीरइहमयिवितत्यैविस्ताराय यंसेतुं ९६ विविधाद्रिकूटैर्नानाविधपर्वतशृंगैःकपींद्राणांकरैःकंपितानिभूरुहाणांवृक्षाणांअंगानिशाखोपशाखालक्षणानियेषुतानितथातैः ९७ यदासालंकारमेणाविष्टातदागजकुलैर्घूर्णाहृदिनीवघूर्णाभूदितिशेषः । विहरंत्यस्मिन्नितिविहारंक्रीडास्थानं कोष्ठमंतर्गृहंसद्वारंसभाद्वारंप्रशस्तसाधारणद्वारंवा । गोपुरंपुरद्वारं सदःसभास्थानवलभी

तंत्वावयंजडधियोनविदामभूमन्कूटस्थमादिपुरुषंजगतामधीशम् ॥ त्वंसत्वतःसुरगणान्रजसःप्रजेशान्मन्योश्चभूतपतयःसभवान्गुणेशः ९५ कामं प्रयाहिजहिविश्रवसोवमेहंत्रैलोक्यरावणमवाप्नुहिवीरपत्नीम् ॥ बध्नीहिसेतुमिहतेयशसोवितत्यैगायंतिदिग्विजयिनोयमुपेत्यभूपाः ९६ बध्वोदधौरघुपतिर्विविधाद्रिकूटैःसेतुंकपींद्रकरकंपितभूरुहांगैः ॥ सुग्रीवनीलहनुमत्प्रमुखैर्नरेंद्रैर्लंकांविभीषणदृशाविशदाशुदग्धाम् ९७ सावानरेंद्रबलरुद्धविहारकोष्ठसद्वारगोपुरमदोवलभीविटंका ॥ निर्भज्यमानधिषणध्वजहेमकुंभशृंगाटकागजकुलैर्हृदिनीवघूर्णा ९८ रक्षःपतिस्तदवलोक्यनिकुंभकुंभधूम्राक्षदुर्मुखसुरांतनरांतकादीन् ॥ पुत्रान्प्रहस्तमतिकायविकंपनादीन्सर्वानुगान्समहिनोदथकुंभकर्णम् ९९ तांयातुधानपृतनामसिशूलचापप्रासर्ष्टिशक्तिशरतोमरखड्गजुष्टाम् ॥ सुग्रीवलक्ष्मणमरुत्सुतगंधमादनीलांगदर्क्षपनासादिभिरन्वितोयात् १०० तेनीकपारघुपतेरभिपत्यसर्वेद्वंद्वंवरूथमिभपत्तिरथाश्वयोधम् ॥ जघ्नुर्द्रुमैर्गिरिगदेषुभिरंगदाद्याःसीताभिमर्शहतमंगलरावणेशम् १

गृहाच्छादनांतर्नाली । दारुभिःपरितोनिर्मितागोपानसीतिकीर्त्यते विटंकापक्षिपट्टिका वानरेंद्राणांबलेनसेनयारुद्धाआवारिताः विहारादयोयस्याःसातथा । आच्छादनंस्याद्वलभीगृहाणांगोपानसीदारुषुवक्रसंस्थानिप्रबलीकंपटलांतमाहुःकपोतपालीचविटंकसंज्ञामितिहलायुधः । गोपानसीतुवलभीछादनेवक्रदारुणि कपोतपालिकायांतुविटंकंपुंनपुंसकमित्यमरः । निर्भज्यमानावानरेंद्रबलेननिर्भिद्यमानाधिषणध्वजाःगृहालंकारहेतवःहेमकुंभाःसुवर्णकलशाःशृंगाटकाःगृहमुखाग्रतोन्नतत्रिशूलांकगृहैकदेशाःयस्यांसातथा । ध्वजोपरिस्थहेमकुंभैर्युक्ताःशृंगाटकाः चतुष्पथावा ९८ तद्वानरेंद्रबलकृतंकर्म समहिनोदपातयत् ९९ यारावणेनप्रेरितातांयातुधानपृतनांराक्षससेनांम् १०० रघुपतेस्तेनीकपाःसेनानायकाःवरूथंरथगुप्तिमभिपत्यप्राप्य । इभाश्चपत्तयश्चरथाश्चाश्वाश्चयोधाश्चयस्मिन्तादिभपत्तिरथाश्वयोधंद्वंद्वंद्वाभ्यांद्वाभ्यांइभादिभ्यांक्रियमाणंयुद्धंअभ्युपगम्यराक्षसबलंजघ्नुरित्यन्वयः । रथगुप्तिर्वरूथोनाकूबरोनायुगंधरःहतियादवः कीदृशंबलंसीताभिमर्शेनसीतायापरामर्शेनसीतायाअपहारणेत्यर्थः । हतंनष्टंमंगलंपुण्यंयस्यसतथा । सचासौरावणःसीताभिमर्शहतमंगलरावणःसएवेशोयस्यतत्तथातत् १

द्युमतितेजोवतिस्वःस्वर्गादवतीर्णेस्यंदनेरथेविभ्राजमानंक्षुरप्रैरर्धचंद्रैःअर्धचंद्रःक्षुरप्रःस्यादिति प्रासःकुंतःऋष्टिःप्रसिद्धाशक्तिःशतमारणीतोमरःलोहमयद्विफलःनिस्त्रिंशःखड्गःपट्टिशःलोहदंडइत्यर्थः श तघ्नीचतुस्तालालोहकंटकसंचिताकेचित्शतघ्नीमयःकंटकसंछन्नांमहाशिलांवदंति भृशुंडीवृत्तायःकलसंचितादारुमयी हस्तिबरोगजत्रासहेतुरष्टमुनयःदेवदंडोश्चत्रासकरोरात्निमात्रःह्रघनोमुद्गरःतत्रशक्त्या द्यस्त्रंहस्तमुक्तंशरादिकंयंत्रमुक्तंमुक्तामुक्तंनागपाशादिकंअमुक्तंछुरिकादिकमितिचतुर्विधमायुधप्रसंगात्कथितम् २ हेपुरुषादपुरीषराक्षसाधमअपकृष्टंपुरीषंस्यात्विष्ठनिष्ठ्यूतमप्युतेति असताअमशस्तक र्मणात्वयाकांतासीतानःअस्माकमसमक्षंअस्मान्वंचयित्वापहृतेतियत्तस्मादद्यत्यक्तत्रपस्यनिर्लज्जस्यरक्षस्त्वेनजुगुप्सितस्यतेतवतस्यकर्मणः फलंकर्तुमनेकार्थत्वाद्धातूनांदातुमिच्छामि तवाधुनातल्लंघनम

रक्षःपतिःस्वबलनष्टिमवेक्ष्यरुष्टआरुह्ययानकमथाभिससाररामम्॥ स्वःस्यंदनेद्युमतिमातलिनोपनीतेविभ्राजमानमहनन्निशितैःक्षुरप्रैः२रामस्तमाहपुरुषा दपुरीषयन्नःकांतासमक्षमसतापहृतास्वयंते ॥ त्यक्तत्रपस्यफलमद्यजुगुप्सितस्यइच्छामिकालइवकर्तुमलंव्यवीर्यः ३ एवंक्षिपद्धनुषिसंधितमुत्ससर्जबा णंसवज्रमिवतद्धृदयंबिभेद ॥ सोसृग्वमन्दशमुखैर्न्यपतद्विमानाद्वाहेतिजल्पतिजनेसुकृतीवरक्षः ४ ततोनिष्क्रम्यलंकायायातुधान्यःसहस्रशः ॥ मं दोदर्यासमंतस्मिन्प्ररुदंत्यउपाद्रवन् ५ स्वान्स्वान्बंधून्परिष्वज्यलक्ष्मणेषुभिरर्दितान् ॥ रुरुदुःसुस्वरंदीनाघ्नंत्यआत्मानमात्मना ६ हाहताःस्मवयंना थलोकरावणरावण ॥ कंयायाच्छरणंलंकात्वद्विहीनापरार्दिता ७ नवैवेदमहाभागभवान्कामवशंगतः ॥ तेजोनुभावंसीतायोयेननीतोदशामिमाम् ८ कृतैषाविधवालंकावयंचकुलनंदन ॥ देहःकृतोयंगृध्राणामात्मानरकहेतवे ९ श्रीशुकउवाच ॥ स्वानांबिभीषणश्चक्रेकोसलेंद्रानुमोदितः ॥ पितृमेध विधानेनयदुक्तंसांपरायिकम् १० ततोददर्शभगवानशोकवनिकाश्रमे ॥ क्षामांस्वविरहव्याधेःशिंशपामूलमाश्रिताम् ११ रामःप्रियतमांभार्यांदीनां वीक्ष्यान्वकंपत ॥ आत्मसंदर्शनाह्लादविकसन्मुखपंकजाम् १२ आरोप्यारुरुहेयानंभ्रातृभ्यांहनुमद्युतः ॥ विभीषणायभगवन्ददत्वारक्षोगणेशताम् १३ लंकामायुश्चकल्पांतंययौतीर्णव्रतःपुरीम् ॥ अवकीर्यमाणःकुसुमैर्लोकपालार्पितैःपथि १४ उपगीयमानचरितःशतधृत्यादिभिर्मुदा ॥ गोमूत्रयावकं श्रुत्वाभ्रातरंवल्कलांबरम् १५ महाकारुणिकोतप्यज्जटिलंस्थंडिलेशयम् ॥ भरतःप्राप्तमाकर्ण्यपौरामात्यपुरोहितैः १६ पादुकेशिरसिन्यस्यरामंप्रत्युद्य ताग्रजम् ॥ नंदिग्रामात्स्वशिबिराद्गीतवादित्रनिःस्वनैः १७

शक्यमित्याशयेनाह कालइति कालोंतकःकालोमृत्युर्यमइतियादवः वीर्यपराक्रमेरेतस्यत्नमाहात्म्ययोरपीतिसरावणः सुकृतीमुक्तपुण्यःस्वर्गादिव ४ ५ अर्दितान्हिंसितान् अर्दाहिंसायां आत्मानंदेहं उ दरमितियावत् आत्मनादेहेनहस्तेन ६ ७ नीतोयेनतंनैषवेद ८ वयंचविधवाःकृताःदेहःगृध्राणामात्माजीवोजीवनायकृतः गृध्रप्राणरक्षणेनापिपुण्यंस्यादितितत्राह नरकहेतवइति नरकदुःखानुभवार्थं भवति ९ पितृमेधविधानेनशवदाहादिविधिना सांपरायिकंपरलोकसुखसाधनं १० क्षामामित्यादिकमसुरमोहनार्थं ११ १२ भ्रातृभ्यांलक्ष्मणविभीषणाभ्यां विभीषणस्यभ्रातृत्वमुपचारः १३ तीर्ण व्रतःपूर्णवनवासव्रतः १४ शतधृत्यादिभिःब्रह्मादिभिःगोमत्रेणसहपक्वयावकाहारंभ्रातरंभरतं १५ १६ १७

स्वर्णकक्ष्यैःसुवर्णमयीकक्ष्याउदरबंधोयेषांतेतथातैं हैमैर्मालक्तैश्चित्रानानावर्णाध्वजाःयेषांतैः १८ रुक्मसन्नाहःस्वर्णानामताःसन्नाहाःकवचानियेषांतैः पुरटसुवर्णत्रय॥मरकतकरभरभसः सारत्व॥
न्यनर्घत्वेनप्रशस्तानिभांडानिअश्वाभरणानिपिठराद्युपकरणानिच १९ २० २१ ततस्तत्रयेविप्राअभवंस्तेभ्यः २२ उत्तरासंगंउत्तरीयवस्त्रंधुन्वंतःकंपयंतः २३ २४ निषंगंतूणीरंऋक्षराट्
जांबवान् २५ २६ २७ २८ गत्वागवान्प्राणानवाप्यतन्वः तनवःयथोत्थिताभवंति तथाविरहशुचः २९ गुरुर्वसिष्ठः ३० ३१ सिंहोपपदमासनम् । ग्रहणेहेतुमाह भ्रात्रेति भ्रात्राभरतेन

ब्रह्मघोषेणचमुहुःपठद्भिर्ब्रह्मवादिभिः ॥ स्वर्णकक्ष्यैर्गजैश्चापिहैमैश्चित्रध्वजैरथैः १८ सदश्वैरुक्मसन्नाहैर्भटैःपुरटवर्मभिः ॥ श्रेणीभिर्वारमुख्याभिर्भृत्यै
श्चागात्सदोद्यतैः १९ पारमेष्ठ्यान्युपादायभांडान्युच्चावचानिच ॥ पादयोर्न्यपतत्प्रेम्णाप्रह्लिन्नहृदयेक्षणः २० पादुकेन्यस्यपुरतःप्रांजलिर्बाष्पलो
चनः ॥ तमाश्लिष्यदृढंदोर्भ्यांस्नापयन्नेत्रजैर्जलैः २१ रामोलक्ष्मणसीताभ्यांविप्रेभ्योयेभवंस्ततः ॥ तेभ्यःस्वयंनमश्चक्रेप्रजाभिश्चनमस्कृतः २२
धुन्वंतउत्तरासंगंपतिंवीक्ष्यचिरागतम् ॥ उत्तराःकोसलामाल्यैःकिरंतोनृतुर्मुदा २३ पादुकेभरतोगृह्याच्चामरव्यजनोत्तमे ॥ विभीषणःससुग्रीवःश्वेत
च्छत्रंमरुत्सुतः २४ धनुर्निषंगाच्छत्रुघ्नःसीतातीर्थकमंडलुम् ॥ अबिभ्रदंगदःखड्गंहैमंचर्मर्क्षराट्नृप २५ पुष्पकस्थैर्वृतस्त्वेभिःस्तूयमानश्चबंदिभिः ॥
विरेजेभगवान्राजन्ग्रहैरिंदुरिवोदितः २६ भ्रातृभिर्वंदितःसोपिसोत्सवांप्राविशत्पुरीम् ॥ प्रविश्यराजभवनंगुरुपत्नीश्चमातरम् २७ गुरून्वयस्या
वरजान्पूजितःप्रत्यपूजयत् ॥ वैदेहीलक्ष्मणश्चैवयथायोग्यंप्रणेमतुः २८ पुत्रांस्तन्मातरस्तावत्प्राणांस्तन्वइवोत्थिताः ॥ आरोप्यांकेभिषिंचंत्योबा
ष्पौघैर्विजहुःशुचः २९ जटानिर्मुच्यविधिवत्कुलवृद्धैःसमंगुरुः ॥ अभिषिंचद्यथैवेंद्रंचतुःसिंधुजलादिभिः ३० एवंकृतशिरःस्नानःसुवासाःसद
लंकृतः ॥ स्वलंकृतैःसुवासोभिर्भ्रातृभिर्भार्ययाबभौ ३१ अग्रहीदासनंभ्रात्राप्रणिपत्यप्रसादितः ॥ प्रजाःस्वधर्मनिरतावर्णाश्रमगुणान्विताः ३२
जुगोपपितृवद्रामोमेनिरेपितरंचतम् ॥ त्रेतायांवर्तमानायांकालःकृतसमोभवत् ३३ रामेराजनिधर्मज्ञेसर्वभूतसुखावहे ॥ वनानिनद्योगिरयोवर्षा
णिद्वीपासिंधवः ३४ सर्वेकामदुघाआसन्प्रजानांभरतर्षभ ॥ नाधिव्याधिजराक्षुत्तृड्दुःखशोकभयक्लमाः ३५ मृत्युश्चानिच्छतांनासीद्रामेराजन्यधो
क्षजे ॥ एकपत्नीव्रतधरोराजर्षिचरितःशुचिः ३६ स्वधर्मंगृहमेधीयांशिक्षयन्स्वयमाचरन् ॥ प्रेम्णानुवृत्त्याशीलेनप्रश्रयावनतासती ॥ मियान्हियाभि
भावज्ञाभर्तुःसीताहरन्मनः ३७ ॥ इतिश्रीभागवतेनवमस्कंधेअष्टमोध्यायः ॥ ८ ॥ ॥ श्रीशुकउवाच ॥ भगवानात्मनात्मानंरामउत्तमकल्पकैः ॥
सर्वदेवमयंदेवमीजआचार्यवान्मखैः १ होत्रेददादिशंप्राचींब्रह्मणेदक्षिणांविभुः ॥ अध्वर्यवेप्रतीचींचउदीचींसामगायसः २

३२ ३३ ३४ ३५ अनिच्छतांमरणमितिशेषः ३६ अनुवृत्त्याशुश्रूषयाशीलेनानुकूलस्वभावेन प्रश्रयेणविनयेनअवनता ॥ ३७ ॥ इतिश्रीभागवतेमहापुराणेनवमस्कंधेविजयध्वजकृतटीकायांअष्टमो
ध्यायः ॥ ८ ॥ आचार्यवानित्यनेनगुरुकुलवासित्वंशिक्षितत्वंचसूचयति आचार्यवान्पुरुषोवेदेतिश्रुतेः १ २

३ सौमंगल्यंमंगलमूत्रमेवावशेषितंयस्याःसातथा ४ ब्राह्मणादेवाःपूज्याइति भावोयस्यसतथातस्य वात्सल्यंस्नेहपारवश्यं भक्तिक्लिन्नधियःद्रवच्चिनाः प्रत्यर्प्यदत्तंपुनर्दत्त्वा ५ ननुदत्तंनालमितिमत्वाप्र त्यर्पितंइतोधिकंप्रियमस्मद्योग्यमेवदत्तमतोन्यन्नापेक्षितामितिमत्वावा नप्रथमः यदृच्छालाभसंतुष्टिमतामस्माकंअनलंबुद्धिदोषोनास्तियतोतोद्वितीयएवाभिमतइत्याशयेनाह अप्रत्तमिति हेभगवंस्त्वम स्मद्दत्तयांतर्हृदिसंविश्ययथानिद्रासुखसाधनंतथास्थित्वास्वरोचिषाज्ञानलक्षणंतमोहंसिनाशयसि यतोतस्त्वयानोऽप्रत्तमदत्तंकिंतुनकिमपिइत्यतोधिकं भूदानादिकंनभवतिज्ञानधनस्यानश्वरत्वादहार्य त्वाच्च भूपालत्वात्तत्कर्मतवैवयोग्यंतस्मिन्कर्मण्यनधिकारिणोवयं तस्मादयोग्यत्वात्प्रत्यर्पणेनस्वीकारेणापहारदोषपंकलेपोनास्तिभवतइतिस्वीकृत्य तद्रक्षणंकर्तव्यमधिकृतत्वादितिभावः ६ त्वम स्मभ्यमनश्वरंधनंदत्तवान्वयंतत्प्रतिकर्तुंनशक्नुमः किंतुतुभ्यंनमनलक्षणंधनंदास्यामइत्येतावदेवेत्याशयेनाह नमइति न्यस्ततत्त्वायस्वकेषुनिक्षिप्तस्वरूपाय अर्पितांघ्रये स्वकेष्वितिशेषः न्यस्तदंडार्पितां घ्रयेइतिपाठेन्यस्तमनोवाक्कायदंडाःसंन्यासिनःतेष्वर्पितोंघ्रिर्ज्ञानलक्षणागतिर्येनसतथातस्मै अधिलघिगत्यर्थावितिधातुःउत्तमश्लोकस्यहरेःधुरंवहतीतिउत्तमश्लोकधुर्यस्तस्मै ७ कस्यचित्पुंसोवचः ८ ९

आचार्यायददौशेषायावतीभूस्तदंतरा ॥ मन्यमानइदंकृत्स्नंब्राह्मणोर्हतिनिःस्पृहः ३ इत्यदात्स्वमलंकारंवासोभ्यामवशेषितः ॥ तथाराज्ञ्यपिवैदेही सौमंगल्यावशेषिता ४ तेतुब्राह्मणदेवस्यवात्सल्यंवीक्ष्यसज्जनाः ॥ प्रीताःक्लिन्नधियस्तस्मैप्रत्यर्प्यैदंबभाषिरे ५ अप्रत्तंनस्त्वयाकिंतुभगवन्भुवनेश्वर ॥ यतोंतर्हृदिसंविश्यतमोहंसिस्वरोचिषा ६ नमोब्रह्मण्यदेवायरामायाकुंठमेधसे ॥ उत्तमश्लोकधुर्यायन्यस्ततत्त्वार्पितांघ्रये ७ श्रीशुकउवाच ॥ कदाचिल्लोकजिज्ञासुर्गूढोरात्र्यामलक्षितः ॥ चरन्वचोशृणोद्रामोभार्यामुद्दिश्यकस्यचित् ८ नाहंबिभर्मित्वांदुष्टामसतींपरवेश्मगाम्॥स्त्रैणोहिबिभ्दयात्सीतांरामोनाहंभजेपुनः ९ इतिलोकाद्बहुमुखाद्बुराराध्यादसंविदः ॥ श्रुत्वाभीतेनसात्यक्ताप्राप्ताप्राचेतसाश्रमम् १० अंतर्वत्न्यागतेकालेयमौसासुषुवेसुतौ ॥ कुशोलवइतिख्यातौतयोश्चक्रेक्रियामुनिः ११ अंगदश्चकेतुश्चलक्ष्मणस्यात्मजौसुतौ ॥ तक्षःपुष्कलइत्यास्तांभरतस्यमहीपते १२ सुबाहुःश्रुतसेनश्चशत्रुघ्नस्यबभूवतुः॥गंधर्वान्कोटिशोजघ्नेभरतोविजयेदिशाम्१३तदीयंधनमानीयसर्वंराज्ञेन्यवेदयत् ॥ शत्रुघ्नश्चमधोःपुत्रंलवणंनामराक्षसं ॥ हत्वामधुवनंचक्रेमथुरांनामवैपुरीम् १४ मुनौनिक्षिप्यतनयौसीताभर्त्राविवासिता ॥ ध्यायंतीरामचरणौविवरंप्रविवेशह १५ स्त्रीपुंप्रसंगएतादृक्सर्वत्रत्रासमावहः ॥ अपीश्वराणांकिमुतग्राम्यस्यगृहमेधिनः १६ ततऊर्ध्वंब्रह्मचर्यंधारयन्नजुहोत्प्रभुः ॥ त्रयोदशाब्दसाहस्रमग्निहोत्रमखंडितम् १७

बहुमुखादन्योन्यशिक्षानियतत्वेनानेकशब्देनप्रधानादतएवदुराराध्याद्दुःसाध्यात् कार्यनिष्पत्तिरहितादित्यर्थः अतएवासंविदःअन्यसंवादशून्यात्मर्यादारहिताद्बालोकाच्छ्रुत्वालोकापवादभीतेनरामे णत्यक्तासासीताप्राचेतसःप्रचेतसोवरुणस्यापत्यंवाल्मीकिःतस्याश्रमंप्राप्ता १० अंतर्वत्नीगर्भिणीयमौयमलोक्रियाः क्षत्रयोग्याःजातकादिकाः ११ १२ १३ १४ मुनौवाल्मीकौ विवरंभूबिलं १५ १६ अपिपदेनलोकशिक्षार्थंसंभावितएवनत्वनुभूतइत्याह ततइति अस्याभूमेदेशानंतरंअखंडितंअग्निहोत्रमजुहोत् पूर्वंकाचित्खंडितमित्यर्थोनैवाकिंतुततः पूर्वंचब्रह्मचर्यधारयन्नित्यस्याप्यूर्ध्वरेत स्त्वंनार्थः किंतुब्रह्मणालक्ष्म्यासीतयासहचर्यंचरणवर्तनंधारयन्कुर्वन्नेवममयोनिर्मर्हद्ब्रह्मेतिवचनात् अन्यथात्रयोदशसहस्रमित्युक्तिरसंगतास्यात् सर्वात्मनाराज्यकरणस्यतावच्चात्तस्मात्क्षितिमंडलंत्र योदशसहस्रमब्दंब्रह्मलोकसमंकृत्वानक्षत्रमासगणितंत्रयोदशसहस्रकं ब्रह्मलोकसमंचक्रेसमस्तंक्षितिमंडलमितिवचनाच्चेत्यर्थः ऊर्ध्वोधःशब्दयोश्चवैय्यर्थ्याच्च १७

ततोऽयोध्यायामगाद्वैकुंठमितिशेषः अंशुकैःसूर्यकिरणैःबुद्धंविकसितंपद्ममिवशोभमानंस्वपादपल्लवंस्मरतांपुसांहृदीवन्यस्यानाधवाऽधायआत्मज्योतिःस्वभावप्रकाशः १८ रघुपतारेषशापवश
प्राणलक्षणंनकिंतन्निषेध्यमितितत्राह रक्षइति राक्षसवधोयःपद्मजलधिबंधनंइदमिति रघुपतिःकोसाविततत्राहविश्वेति किंप्रयोजनमुद्दिश्यरघुपतिनामरूपग्रहणमित्याशंक्यनकिमपिप्रयोजनमुद्दि
श्येत्याशयेनाह लीलेति शरीरग्रहणेनकिमपिदुःखादिकमस्यास्तीत्याशयेनाह अधिकेतिसर्वस्मादधिकंशांतमानंदपूर्णंनित्यमुक्तंधामस्वरूपंयस्यसतथातस्य यतएवंविधमहात्म्योरघुपतिरतोत्र
पाणेर्धनुःपाणेस्तस्यकपयः शत्रुहननेसहायाःबलभूताःकिंक्षेत्यर्थः १९ नकेवलंनृपसभासुगायंतिअपितुदिगिभेंद्रपातेदिग्गजानांपातःसंचारोयस्मिन्लोकालोकप्रदेशेपीत्यनेनसर्वत्रेत्याह नाकपाला
इंद्रादयःवसुपालाःकुबेरादयः २० यैस्पृष्टःनमनादिना दृष्टोवा चक्षुरादिना श्रुतोवा श्रोत्रादिनासंवित्तःसम्यक्ज्ञातोवानुगतोवा पृष्ठतोयातोवा कोसलाअयोध्यावासिनइत्युपलक्षणं सर्वेपीतिग्राह्यं य
त्रयोगिनोभक्तिज्ञानयोगवंतोगच्छंतितत्स्थानंययुरित्यन्वयः २१ पुरुषमात्रस्यश्रुतिमात्रेणापिरामनाम्नःकर्मबंधमोक्षःस्यादित्याशयेनाह पुरुषइति आदृशंस्यपरोहिंसाकर्मपरोपि अनेन
रामोरामोरामइतिसर्वेषामभवत्तदा सर्वोराममयोलोकोयदारामस्त्वपालयदितिवाक्यमसूचि २२ तत्रैवंराजापृच्छति कथमिति सभगवान्भ्रात्रादिपुकथंकेनयोगेनरामोरमायेतृत्वेनावर्तत औ

स्मरतांहृदिविन्यस्यबुद्धंपद्ममिवांशुकैः ॥ स्वपादपल्लवंरामआत्मज्योतिरगात्ततः १८ नेदंयशोरघुपतेरिहविश्वमूर्तेर्लीलातनोरधिकशांतविमुक्तधाम्नः ॥
रक्षोवधोजलधिबंधनमस्त्रपाणेःकिंतस्यशत्रुहननेकपयःसहायाः १९ यस्यामलंनृपसदस्सुयशोधुनापिगायंत्यघघ्नमृषयोदिगिभेंद्रपाते ॥ तन्नाकपाल
वसुपालकिरीटजुष्टपादांबुजंरघुपतेःशरणंप्रपद्ये २० सयैःस्पृष्टोभिदृष्टोवासंवित्तोनुगतोपिवा ॥ कोसलास्तेययुःस्थानंयत्रगच्छंतियोगिनः २१
पुरुषोरामचरितंश्रवणैरुपधारयन् ॥ आनृशंस्यपरोराजन्कर्मबंधैर्विमुच्यते २२ राजोवाच ॥ कथंसभगवान्रामोभ्रातृबंधुष्ववर्तत ॥ प्रजास्वौरसवद्रा
मःकथंवारामईश्वरः २३ श्रीशुकउवाच ॥ अथादिशद्दिग्विजयेभ्रातॄंश्चत्रिदशेश्वरः ॥ आत्मानंदर्शयन्स्वानांपुरींमैक्षतसानुगः २४ आसिक्तमार्गांगंधोदैःक
रिणांमदसीकरैः ॥ स्वामिनंप्राप्तमालोक्यमत्तांवासुतरामिव २५ प्रासादगोपुरसभाचैत्यदेवगृहादिषु ॥ विन्यस्तहेमकलशैःपताकाभिश्चमंडिताम् २६
पूगैःसवृंतैरंभाभिःपालिकाभिःसुवाससाम् ॥ आदर्शैरंशुकैःस्रग्भिःकृतकौतुकतोरणाम् २७

रसवद्यथौरसःस्वदेहोत्पन्नःपुत्रःपित्रादौकलभाषणादिनारातिप्रदत्वेनाजिह्रासुस्वनाममयत्वेनप्रवर्तते तथायमपिकेनप्रकारेणरामोरातिप्रदःप्रजास्ववर्तत किंच रामोबालवत्क्रीडावान्कथंकेनभावेनेश्व
रोयमितिसर्वजनबुद्धाववर्ततेतदिंप्रश्नत्रयंपरिहर्तव्यमितिशेषेणान्वयः २३ प्रथमतृतीयप्रश्नौपरिहरति अथेति । अथराज्याभिषेकानंतरंभ्रात्रादौस्वाज्ञाकारित्वेनावर्तत त्रिदशेश्वरइत्यनेनमानवेश्वरत्वं
किंवक्तव्यमित्यसूचि । तेनलोकानुकरणायेयंक्रीडेतिकथितमित्यर्थः । द्वितीयंपरिहरति आत्मानमिति । स्वात्मसंदर्शनेनजनस्यानंदजनकत्वेनरामइतिबुद्धिजनयामासेत्यर्थः । पुरीनिरीक्षणंवस्वभ
क्तानुकंपित्वप्रदर्शनाय २४ गंधोदैःचंदनादिगंधद्रव्यमिश्रजलैःलंकायाःनाथंरावणंनिहत्यप्राप्तंस्वामिनमालोक्यसुतरांहर्षेणमत्तामिवकरिणींमदसीकरैःमदजलबिंदुभिर्वामत्तामिवस्थिताम् २५ चैत्यंपा
षाणादिभिर्बद्धं वृक्षमूलस्थलंबद्धशालास्थलंवा २६ सवृंतैःफलस्तबकसहितैः । पूगैःक्रमुकैः । रंभाभिःकदलीस्तंभैः आदर्शैःदर्पणैरंशुकैर्वस्त्रैः स्रग्भिःमालाभिश्च । कृतकौतुकानिरचितमंगलानिचतोरणा
नियस्यांसातथाताम् २७

प्राक्वराहावतारेत्वयापातालादुद्धृतांभुवमितिशेषः २८ २९ ३० विद्रुमैरुदुंबरैस्ताम्रैःकृतद्वारैः । ताम्रंशुल्बंमर्कटाख्यंरक्तंकांस्यमुदुंबरमिति ३१ कांतंशोभितम् पट्टिकाभिर्वितानैः ३२ भूषणानामपिभूषणैः ३३ स्वारामाःशोभनोद्यानानितत्रचारोपेषांतेस्वारामचारास्तेषामृषभःनिरंतरंचारुतरोद्यानेषुसंचरतांईश्वरइत्यनेनातीवसौख्यंसूचयति । अनेनापिसीताविप्रयोगोनास्तीत्युक्तंभवति । किंचसीतयानित्यरमणात्स्वयंसुखरूपत्वात्यजानांसुखहेतुत्वात्सर्वजनचित्तविलयत्वेनरामइतिभावः ३४ ३५ इतिश्रीभागवतेमहापुराणेनवमस्कंधेवि०कृ०टी०नवमोध्यायः॥ ९ ॥अथश्री

तमुपेयुस्तत्रतत्रपौराअर्हणपाणयः ॥ आशिषोयुयुजुर्देवपाहीमांप्राक्त्वयोद्धृताम् २८ तंताःप्रजावीक्ष्यपतिंचिरागतंदिदृक्षवोत्सृज्यगृहान्स्त्रियोनराः ॥ आरुह्यहर्म्याण्यरविंदलोचनंनतृप्ननेत्राःकुसुमैरवाकिरन् २९ अथप्रविष्टःस्वगृहंजुष्टंस्वैःपूर्वराजभिः ॥ अनंतगृहकोशाढ्यमनर्घ्योरुपरिच्छदम् ३० विद्रुमोदुंबरद्वारैर्वैदूर्यस्तंभपंक्तिभिः ॥ स्थलैर्मरकतैःस्वच्छैर्भ्राजत्स्फटिकभित्तिभिः ३१ चित्रस्रग्भिःपट्टिकाभिर्वासोमणिगणांशुभिः ॥ मुक्ताफलैश्चिदुल्लासैःकांतंकामोपपत्तिभिः ३२ धूपदीपैःसुरभिभिर्मंडितैःपुष्पमंडकैः ॥ स्त्रीपुंभिःसुरसंकाशैर्जुष्टंभूषणभूषणैः ३३ तस्मिन्सभगवान्रामःस्निग्धयाप्रिययेच्छया ॥ रेमेस्वारामचाराणामृषभःसीतयासह ३४ बुभुजेचयथाकामंकामंधर्ममपीडयन् ॥ वर्षपूगान्बहून्नृणामभिध्येयांघ्रिपल्लवः ३५ इतिश्रीभागवतेनवमस्कंधेनवमोध्यायः ॥ ९ ॥ श्रीशुकउवाच ॥ कुशस्यचातिथिस्तस्मान्निषधस्तत्सुतोनभः ॥ पुंडरीकोथतत्पुत्रःक्षेमधन्वाभवत्ततः १ देवानीकस्ततोहीनःपारिपात्रश्चतत्सुतः ॥ ततोबलस्थलस्तस्माद्वज्रनाभोर्कसंभवः २ स्वगणस्तत्सुतस्तस्माद्विधृतश्चाभवत्सुतः ॥ ततोहिरण्यनाभोभूद्योगाचार्यस्तुजैमिनेः ३ शिष्यःसकलमध्यात्मंयाज्ञवल्क्योध्यगाद्यतः ॥ योगंमहोदयमृषिर्हृदयग्रंथिभेदनम् ४ पुष्योहिरण्यनाभस्यध्रुवसंधिस्ततोभवत् ॥ सुदर्शनोथाग्निवर्णःशीघ्रस्तस्यमरुत्सुतः ५ योसावास्तेयोगसिद्धःकलापग्राममास्थितः ॥ कलेरंतेसूर्यवंशंनष्टंभावयितापुनः ६ तस्मात्तुसुश्रुतस्तस्यसंधिस्तस्यापिमर्षणः ॥ महस्वांस्तत्सुतस्तस्माद्विश्वसाह्वोव्यजायत ७ ततोबृहद्बलोयस्तुपित्रातेसमरेहतः ॥ एतेहीक्ष्वाकुभूपालाअतीताःशृण्वनागतान् ८ बृहद्बलस्यभवितापुत्रोनाम्नाबृहद्रणः ॥ उरुक्षयःसुतस्तस्यवत्सप्रीतोभविष्यति ९ प्रतिव्योमस्ततोभानुर्दिवाकोवाहिनीपतिः ॥ सहदेवस्ततोभावीबृहदश्वोथभानुमान् १० प्रतीकाश्वोभानुमतःसुप्रतीकोथतत्सुतः ॥ भवितामरुदेवोथसुनक्षत्रोथरुक्षकः ११ तस्यांतरिक्षस्तत्पुत्रःसुतपास्तदमित्रजित् ॥ बृहद्राजस्तुतस्यापिबर्हिस्तस्मात्कृतंजयः १२

रामपुत्रस्यकुशस्यसंततिमनुक्रामति कुशस्यचेति । चशब्दःसंततेरविच्छेदंसूचयति १ २ ३ अध्यात्मंपरमात्मविषयंमहानुदयोमोक्षलक्षणोयस्मात्सतथा एतदेवविशिनष्टि हृदयेति । ऋषिर्ज्ञानी ४ तस्याग्निवर्णस्यशीघ्रनामासुतः । मरुन्नामासुतोयस्यसमरुत्सुतःतस्यशीघ्रस्यमरुत्सुतोभूदितिवा ५ ६ तस्मान्मरुत्तः ७ समरेतेतवपित्राअभिमन्युनाहतःअनागतानुत्पत्स्यमानान् । तस्येत्येतत्पूर्वोत्तरत्रसंबंधयितव्यम् ८ ९ १० ११ तस्यसुतपसःसुतोऽमित्रजित् १२

रणंजयस्तस्यसुतःसंजयोभवितातताः ॥ तस्माच्छक्योथशुद्धोदोलांगलस्तत्सुतःस्मृतः १३ ततःप्रसेनजित्तस्मात्क्षुद्रकोभवितातताः ॥ कुणकोभवितात स्मात्सुरथस्तनयस्ततः ॥ सुमित्रोनामनिष्ठांतस्त्वेतेबार्हद्बलानृपाः १४ इक्ष्वाकूणामयंवंशःसुमित्रांतोभविष्यति ॥ यतस्तंप्राप्यराजानंसंस्थांप्राप्स्यति वैकलौ १५ इतिश्रीभागवतेमहापुराणेनवमस्कंधेदशमोध्यायः ॥ १० ॥ श्रीशुकउवाच ॥ निमिरिक्ष्वाकुतनयोवसिष्ठमवृतर्त्विजम् ॥ आरभ्यसत्रंसोप्याह शक्रेणप्राग्वृतोस्मिभो १ तन्निवर्त्यागमिष्यामितावन्मांप्रतिपालय ॥ तुष्णींमासीद्बृहपतिःसोपींद्रस्याकरोन्मखम् २ निमिःसत्रविदांविद्वान्सत्रमारभतात्म वान् ॥ ऋत्विग्भिरपरैस्तावद्यावत्तन्नागमद्गुरुः ३ शिष्यव्यतिक्रमंवीक्ष्यनिर्वर्त्यगुरुरागतः ॥ अशपत्पततांदेहोनिमेःपंडितमानिनः ४ निमिःप्रतिददौशा पंगुरवेधर्मवर्तिने ॥ तवापिपततांदेहोलोभाद्धर्ममजानतः ५ इत्युत्ससर्जतंदेहंनिमिरध्यात्मकोविदः ॥ मित्रावरुणयोर्जज्ञेउर्वश्यांप्रपितामहः ॥ गंध वस्तुषुतद्देहंनिधायमुनिसत्तमाः ६ समाप्तेसत्रयागेथदेवानूचुःसमागतान् ॥ राज्ञोजीवतुदेहोयंप्रसन्नाःप्रभवोयदि ७ तथेत्युक्तेनिमिःप्राहमाभून्मेदेहबं धनम् ॥ यस्ययोगंनवांछंतिवियोगभयकातराः ८ भजंतिचरणांभोजंमुनयोहरिमेधसः ॥ देहंनावरुरुत्सेहंदुःखशोकभयाश्रयम् ९ सर्वत्रास्ययतोमृत्युर्म त्स्यानामुदकेयथा १० देवाऊचुः ॥ विदेहउष्यतांकामंलोचनेषुशरीरिणाम् ॥ उन्मेषणनिमेषाभ्यांलक्षितोध्यात्मसंस्थितः ११ अराजकभयंनृणांमन्य मानामहर्षयः ॥ देहंममंथुश्चनिमेःकुमारःसमजायत १२ जननाज्जनकःसोभूद्वैदेहस्तुविदेहजः ॥ मिथिलोमथनाज्जातोमिथिलायेननिर्मिता १३

१३ सुमित्रोनामराजा । निष्ठायाःवंशावलेरंतोवधिभूतःतत्रसमाप्तइत्यर्थः १४ एतदवांवशदपातं इक्ष्वाकूणामिति । सुमित्रांतावत्सा नपस्यस्तत्य। तस्यानाशस्तमान्य। । तस्यान्वस्यनान्तस्त मान्याचारमंत्रिष्विति १५ इतिश्रीभागवतेमहापुराणेनवमस्कंधेविजयध्वजकृतटीकायांदशमोध्यायः ॥ १० ॥ अवृतवत्र। सर्वसिष्ठांपितंशक्रस्यपागंनिर्वर्त्यमप्राप्य प्रतिपालयप्रतीक्षस्व । बृहपतिर्निमिः १ २ संतस्त्रायतइतिसत्रंत्रायतिवासत्रंब्रह्म तद्विदांमध्येविद्वांस्तेषांसंशयच्छेता अपरैवसिष्ठव्यतिरिक्तैःतावन्नागमदित्यादिनागुर्वपेक्षायाःनियतत्वदर्शनात्तत्यजिसंज्ञानमगमत्य । शिष्यापशापदानय र्मइतिकृत्वाधर्मवर्तिनइत्युक्तं ३ ४ लोभात्पौरोहित्यविषयात् ५ ततःकिमभूदितितत्राह मित्रावरुणयोरिति । योमित्रावरुणयोरुर्वश्यांजज्ञेःमयप्रपितामहोवासिष्ठः तद्देहं तस्यनिमेर्देहं । गंधवस्तुषुगं धवासिततैलेषुहारिद्रादिद्रव्यविशेषेषुनिधाय ६ सत्रनामयागे ७ देहलक्षणंबंधनं किमितिदेहबंधोमाभूदितितत्राह यस्येति । यस्यदेहस्ययोगंसंबंधं । यस्यवियोगभयेनकातराः व्यग्रचित्ताः ८ हरि

भक्तजनपापहरणशीलामेधाधारणावतीधीः । धीर्धारणावतीमेधाइत्यमरःबुद्धिर्यस्यसतथातस्य हरिवत्सूर्यवत्प्रकाशमानामेधायस्येतिवातस्यविष्णोः पुनर्योवांचंयमाःतंदेहंनावरुरुत्सेस्वीकर्तुनेच्छामिदुः खंतीव्रवेदनाशोकःमन्युःमन्युशोकौतुशुक्स्त्रियामित्यमरः । भयंसंचलनम् ९ ततोपिदेहग्रहणेच्छानेत्याह सर्वत्रेति १० अदेहस्यास्यवासःकथंघटते अधिष्ठानाद्यभावादितितत्राह लोचनेष्वति लोचने ष्वस्यसद्भावःकथंजायतइतितत्राह उन्मेषणेति । किमस्यकर्मेति तत्राह अध्यात्मेति । परमात्मोपासनायुक्तः ११ १२ नामनिर्वचनपूर्वकंजनकस्यवंशंकथयति जननादित्यादिना । मथनेनजननमस्ये त्यस्मिन्नर्थेमिथिलेतिनिपातनं । शवानांशयनमस्मिन्नितिश्मशानमितिवत्मिथिलापुरी १३

१४ सुधृत्पिता सुधृतोजनकः १५ १६ १७ सीताजननहेतुत्वेनसीरंध्वजंगमकंज्ञापकंयस्यससीरध्वजः । ध्वजगताविति धातुः १८ १९ २० २१ २२ २३ २४ २५ २६ गृहेषुस्थिताअपियोगेश्वरस्यया ज्ञवल्क्यस्यप्रसादेनजनकादयोद्वंद्वैःशीतोष्णादिभावैःमुक्ताआत्मारामाइत्यर्थः ॥ २७ ॥ इतिश्रीभागवतेनवमेस्कंधेजनकवंशानुवर्णनंनामवि० कृ० टी० एकादशोध्यायः ११ ॥ ७ ॥ अथसूर्यवंशकथना नंतरंयतोवंशज्ञानंपुरुषार्थसाधनमतइतिहेत्वर्थः । गुणविशिष्टपुरुषज्ञानमंतरेणवंशज्ञानेनकथंपुरुषार्थःस्यादित्यतःक्षिप्रप्रवृत्त्यर्थंतद्वंश्यान्संक्षिप्याह यस्मिन्निति १ २ इयमेववार्तासर्वत्रनान्या सर्वैःसंभावि

तस्मादुदावसुस्तस्यपुत्रोभून्नंदिवर्धनः ॥ ततःसुकेतुस्तस्यापिदेवरातोमहीपतिः १४ तस्माद्बृहद्रथस्तस्यमहावीर्यःसुधृत्पिता ॥ सुधृतोधृष्टकेतुर्वैहर्य श्वोथमरुस्ततः १५ मरोःप्रतींधकस्तस्माज्जातःकृतरथोयतः ॥ देवमीढस्तस्यसुतोविधृतोथमहाधृतिः १६ कृतिरातस्ततस्तस्मान्महारोमाथतत्सुतः ॥ स्वर्णरोमासुतस्तस्यह्रस्वरोमाव्यजायत १७ ततःसीरध्वजोजज्ञेयज्ञार्थंकर्षतोमहीम् ॥ सीतासीराग्रतोजातातस्मात्सीरध्वजःस्मृतः १८ कुशध्व जस्तस्यपुत्रस्ततोधर्मध्वजोनृप ॥ धर्मध्वजस्यद्वौपुत्रौकृतध्वजमितध्वजौ १९ कृतध्वजात्केशिध्वजःखांडिक्यस्तुमितध्वजात् ॥ कृतध्वजसुतोराजन्ना त्मविद्याविशारदः २० खांडिक्यःकर्मतत्त्वज्ञोभीतःकेशिध्वजाद्गतः ॥ भानुमांस्तस्यपुत्रोभूच्छतद्युम्नस्तुतत्सुतः २१ शुचिस्तुतनयस्तस्मात्सनद्वाज जस्ततोभवत् ॥ ऊर्जकेतुःसनद्वाजादजोथकुरुजित्सुतः २२ अरिष्टनेमिस्तस्यापिश्रुतायुस्तत्सुपार्श्वकः ॥ ततश्चित्ररथोयस्यक्षेमापिर्मिथिलाधिपः २३ तस्माद्धेमरथस्तस्यसुतःसत्यरथस्ततः ॥ आसीदुपगुरुस्तस्मादुपगोपाग्निसंभवः २४ वैवस्वतोथतत्पुत्रोयुयुधायत्सुभाषणः ॥ श्रुतस्ततोजयस्तस्माद्विज योस्माद्दृतःसुतः २५ शुनकस्तत्सुतोजज्ञेवीरहव्योधृतिस्ततः ॥ बहुलाश्वोधृतस्तस्यकृतिरस्यमहावशी २६ एतेवैमिथिलाराजन्नात्मविद्याविशारदाः ॥ योगेश्वरप्रसादेनद्वंद्वैर्मुक्तागृहेष्वपि ॥ २७ ॥ इतिश्रीभागवतेनवमस्कंधेजनकवंशानुवर्णनंनामएकादशोध्यायः ॥ ११ ॥ श्रीशुकउवाच ॥ अथातःश्रू यतांराजन्वंशःसोमस्यपावनः ॥ यस्मिन्नैलादयोभूपाःकीर्त्यंतेपुण्यकीर्तयः १ सहस्रशिरसःपुंसोनाभिह्रदसरुहात् ॥ जातस्यासीत्सुतोधातुरत्रिःपि तृसमोगुणैः २ तस्यदृग्भ्योभवत्पुत्रःसोमोमृतमयःकिल ॥ विप्रौषध्यंबुगर्भाणांब्रह्मणाकल्पितःपतिः ३ सोयजद्राजसूयेनविजित्यभुवनत्रयम् ॥ पत्नींबृह स्पतेर्दर्पात्तारांनामाहरद्बलात् ४ यदासदेवगुरुणायाचितोभीक्ष्णशोमदात् ॥ नात्यजत्तत्कृतेजज्ञेसुरदानवविग्रहः ५ शुक्रोबृहस्पतेर्द्वेषादग्रहीत्सासुरोडुप म् ॥ हरोगुरुसुतस्नेहात्सर्वभूतगणावृतः ६ सर्वदेवगणोपेतोमहेंद्रोगुरुमन्वयात् ॥ सुरासुरविनाशोभूत्समरस्तारकामयः ७

तोयंसोमइतिवाकिलेत्युक्तं वार्तासंभावयोःकिलेत्यमरःयोदेवोविप्राणामोषधीनांअंबुगर्भाणांकुमुदादीनांपतिःपोषकः ३ ४ तत्कृतेतारार्थम् ५ असुरैःसहवर्तमानःसासुरः । उडूनांनक्षत्राणांपतिःउडुपः शुक्रविशेषणंसासुरइति । संधिश्छांदसः बृहस्पत्तेर्द्वेषाद्बृहस्पतिविषयद्वेषात्हरःगुरुरंगिरास्तस्यसुतोबृहस्पतिस्तत्स्नेहात् ६ सुरासुराणांविनाशोयस्मिन्सतथातारकामयः तारकार्थंविद्यमानः ७

अजोब्रह्मा बृहस्पतिस्तारामाहेतिशेषः ८ मत्क्षेत्रात्तद्गर्भत्यज कुतइतितत्राह आहितमिति । सांतानकपुत्रतास्मन्कुमार ९ १० ११ अलीकलज्जयाऽनृतानामसलज्जश्च १२ यासि असद्वृत्तेदुराचारेअमंगलस्वरूपेवा । वृत्तंस्वरूपचरितेवृत्तंछंदोविधासुचेति । किंवक्ष्यामीतितत्राह पितरमिति । आत्मावद्यविगूहनीमित्यनेनभस्मीकरणयोग्यत्वेसूचितेपिमावृशब्दवाच्याह स्वात्भस्मसान्नकुर्यामितिवक्ति १३ सांत्वयावाचा १४ ताराजनकंवक्तीत्याह सोमस्येति नंकुमारम् । आत्मापरमात्मायोनिर्जनकोयस्यसतथा १५ नामकरणेनिमित्तमाह बुद्धचेति उदाहृतः पूर्वमितिशेषः १६ १७ आगमनेकारणांतरमाह मित्रेति १८ १९ २० नौआवयोःशाश्वतीःसमाःबहून्संवत्सरान् । रतिःग्राम्यविषयाक्रीडाऽस्तु २१ मनोहरत्वेनिमित्तमाह यदंगादिति ।

निवेदितोजोंगिरसासोमंनिर्भर्त्स्यविश्वकृत् ॥ तारांस्वभर्त्रेप्रायच्छदंतर्वत्नींबृहस्पतिः ८ त्यजत्यजाशुदुःप्रज्ञेमत्क्षेत्रादाहितंपरैः ॥ नाहंत्वांभस्मसात्कुर्यां स्त्रियंसांतानिकेसति ९ तत्याजव्रीडितातारांकुमारंकनकप्रभम् ॥ तस्यांजज्ञेदस्युहंताकुमारःकनकप्रभः १० स्पृहामांगिरसश्चक्रेकुमारेसोमएवच ॥ ममायंनतवेत्युच्चैस्तस्मिन्विवदमानयोः ११ पप्रच्छुर्ऋषयोदेवानैवोचेव्रीडिताचसा ॥ कुमारोमातरंप्राहकुपितोलीकलज्जया १२ किंनवोचस्यसद्वृत्तोपितरंमेवदाशुवै ॥ नत्वांतुभस्मसात्कुर्यांमात्मावद्यविगूहनीम् १३ ब्रह्मातंतुविनिर्भर्त्स्यक्षेप्तारंमातुरंतिके ॥ तामाहूयसमप्राक्षीद्रहएवतुसांत्वया १४ सोमस्येत्याहशनकैःसोमस्तंतावदग्रहीत् ॥ तस्यात्मयोनिरकृतबुधइत्यभिधांनृप १५ बुद्ध्यागंभीरयायेनपुत्रेणापोडुराण्मुदम् ॥ ततःपुरूरवाजज्ञेइला यांयउदाहृतः १६ तस्यारूपगुणौदार्यशीलद्रविणविक्रमान् ॥ श्रुत्वोर्वशींद्रभवनेगीयमानान्सुरर्षिणा १७ तदंतिकमुपेयायदेवीस्मरशरार्दिता ॥ मित्रावरुणयोःशापादापन्नानरलोकताम् १८ निशम्यपुरुषश्रेष्ठंकंदर्पमिवरूपिणम् ॥ धृतिंविहायललनाउपतस्थेतदंतिकम् १९ सतांविलोक्यनृपतिर्हर्षेणोत्फुल्ललोचनः ॥ उवाचश्लक्ष्णयावाचादेवींहृष्टतनूरुहः २० राजोवाच ॥ स्वागतंतेवरारोहेआस्यतांकरवामकिम् ॥ संरमस्वमयासाकंरतिर्नौशाश्वतीःसमाः २१ उर्वश्युवाच ॥ कस्यास्त्वयिनसज्जेतमनोदृष्टिश्चसुंदर ॥ यदंगान्नरमायातिसदृष्टोहरिराश्रयः २२ एतावुरणकौराजन्न्यस्तौरक्षस्वमानद ॥ संरंस्येभवतासाकंश्लाघ्यःस्त्रीणांवरःस्मृतः २३ घृतंमेवीरभक्ष्यंस्यान्नेक्ष्येत्वान्यत्रमैथुनात् ॥ विवाससंतत्तथेतिप्रतिपेदेमहामनाः २४ अहोरूपमहोभावंनरलोकविमोहनम् ॥ कोनसेवेतमनुजोदेवींत्वांस्वयमागताम् २५ तयासपुरुषश्रेष्ठोरमयंत्यायथार्हतः ॥ रेमेसुरविहारेषुकामंचैत्ररथादिषु २६

रमायस्यहरेरंगान्नयातिनच्यवते नित्यश्रितवक्षस्थलत्वात् सहरिस्तवाश्रयोदृष्टइत्यन्वयः । लक्ष्मीकांतस्यसन्निधिपात्रत्वादित्यर्थः २२ उरणकौमेषौन्यस्तौनिक्षेपकल्पनयास्थापितौ तस्माद्रक्षस्व । संरंस्येसम्यक्त्वयासहरतिंकरिष्ये ! अस्माकमियमेवव्रतज्ञप्तिरित्याह श्लाघ्यइतियःश्लाघ्यःकमनीयःसएवस्त्रीणांवरःपतिरित्यन्वयः २३ समयंबध्नाति नेक्षइति । मैथुनादन्यत्रसुरतसमयभंतरेणत्वांविवाससनग्नेनेक्षनपश्याम्यन्यथेतोगमिष्यामीतिशेषः । पुरूरवाउत्तरमाह तथेतीति । एवमुक्तंतथेतिप्रतिपेदेअभ्युपगतवान् २४ तस्यैंगितंहर्षोल्लासंदर्शयति अहोइति । भावंशृंगारादिकंनरीयंतइतिनराअमरास्तेषांलोकःसमूहःतमपिविमोहयतीतिनरलोकविमोहनंएवंविधांत्वां २५ सुराणांविहारोयेषुतेतथातेषु २६

२७ मद्भक्तप्रेममास्थानंसभाएवंमत्वागंधर्वान्समचोदयत् २८ जायपोर्वश्या २९ नपुंसानपुंसकेननिर्वीर्येणेत्यर्थः ३० हृतापत्याहृतपुत्रा योनिशिनारीयथासंत्रस्ताशेते । दिवापुमान्पुरुषशक्तिमतीतथासंत्रस्तःशेते आह्निपुरुषः ३१ इत्येवंवाक्सायकैः वचनबाणैर्विद्धस्ताडितः । प्रतोदैरंकुशैःकुंजेषुरंतुंशीलमस्येतिकुंजरः ३२ तत्रतस्मिन्समयेतेगंधर्वाः स्वविद्युताप्रद्योतंतप्रकाशंतआलोकविषयाआसन्नित्यर्थः ३३ बभ्रामभ्रमुअनवस्थानइतिधातुः । पर्यटनंकृतवान् ३४ तस्याउर्वश्याःपंचसखीःपुरूरवाः उर्वशीहष्ट्वाकिंचकारेतित्राह प्राहेति । किंतत्सूक्तामित्यर्थतस्तत्प्रतिगृह्णाति अहोजायेतिष्ठेति । हयेजायेमनसेत्यारभ्यहविषायजातिस्वर्गउत्वमपिमादयासेइत्यंतमुत्तरप्रत्युत्तरात्मकंसूक्तमुर्वशीवशीकरणाभिप्रायेणप्राहेत्यर्थः । हयेअहोजायेमनसातिष्ठमनःपूर्वकंपूर्ववत्तिष्ठ मांत्यक्तुंनार्हसीतिशेषः । हेघोरेसुरतशौंडे येपरतरे अहन्अहानि उत्तरोत्तरत्रदिवसेमयासुखकरंचनकुर्वत्येव । एतेनौआवयोःसुरतमंत्राकरुणोक्तिपूर्वकाः । नुअद्याप्यनुदितासःअनिवृत्ताअपरिसमाप्ताः । इतियस्मादतोनैतदुचितमतोमिथ्राणिसंल्लापलक्षणानिवचांसिकृणवावहैकरवावहै ३५ ३६ सारसंग्रहाभिप्रायेणमध्येकाश्चनचोविहायसुदेवोद्यप्रपतेदित्येतामृचम

रममाणस्तयादेव्यापद्मकिंजल्कगंधया ॥ तन्मुखामोदमुषितोमुमुदेऽब्दगणान्बहून् २७ अपश्यन्नुर्वशीमिंद्रोगंधर्वान्समचोदयत् ॥ उर्वशीरहितंमह्यमास्थानंनातिशोभते २८ तउपेत्यमहारात्रौतमसिप्रत्युपस्थिते ॥ उर्वश्याउरणौजघ्नुर्न्यस्तौराजनिजायया २९ निशम्याक्रंदितंदेवीपुत्रयोर्नीयमानयोः ॥ हतास्म्यहंकुनाथेननपुंसावीरमानिना ३० यद्विस्रंभादहंनष्टाहृतापत्याचदस्युभिः ॥ यःशेतेनिशिसंत्रस्तोयथानारीदिवापुमान् ३१ इतिवाक्सायकैर्विद्धःप्रतोदैरिवकुंजरः ॥ निशिनिस्त्रिंशमादायविवस्त्रोभ्यद्रवद्रुषा ३२ तेविसृज्योरणौतत्रप्रद्योतंतस्वविद्युता ॥ आदायमेषावायांतंनग्नमैक्षतसापतिम् ॥ ३३ ऐलोपिशयनेजायामपश्यन्विमनाअभूत् ॥ तच्चित्तोविक्लवःशोचन्बभ्रामोन्मत्तवन्महीम् ३४ सतांवीक्ष्यकुरुक्षेत्रेसरस्वत्यांचतत्सखीः ॥ पंच प्रहृष्टवदनःप्राहसूक्तंपुरूरवाः ३५ अहोजायेतिष्ठतिष्ठघोरेनत्यक्तुमर्हसि ॥ मंत्राअद्याप्यनिर्वृत्तावचांसिकृणवावहै ३६ सुदेवोयंपतत्यत्रेदंविदूरंहृतस्त्वया ॥ खादंत्येनंवृकागृध्रास्त्वत्प्रसादस्यनास्पदम् ३७ ॥ उर्वश्युवाच ॥ मामृथाःपुरुषोसित्वंमास्मत्वाद्युर्वृकाइमे ॥ क्वापिसख्यंनवैस्त्रीणांवृकाणांहृदयंयथा ३८

र्थतउदाहरति सुदेवइति । हेदेवि योहंपरावतंपरवंतंदीर्घश्छांदसः । दूरंदेशंहृतःत्वयासहपरमांरतिंगंतवैउगंतुमेव । तस्यमेअयंसुदेवःगतिलक्षणज्ञानसाधनंशरीरं । अत्रकुरुक्षेत्रेअस्यामवस्थायांवाप्रपतेत्प्रपतिष्यति कुतःअनावृत्आधाररहितः अथपतनानंतरंनिर्ऋतेर्भूमेरुपस्थेपृष्ठेशयीतपतेत् अथनिर्जीवमेनंशरीरंरभसासः भक्षणसंभ्रमाकुलाःवृकाःअद्युःखादंति पतित्वाशयित्वापिकथंचित्तप्राणंचेदृकाइंद्रियाणिखादंतिइति सुदेवोअद्यप्रपतेदनावृत्परावतंपरमांगंतवाउअधाशयीतनिर्ऋतेरुपस्थेधैनंवृकारभसासोअद्युरीति । हयेजायेत्यस्याउत्तरंकिमेतावाचेति तवैतयावाचाकिंकृणवैकिंकुर्वःआवयोःपूर्ववत्संगमानुपपत्तेःकिंनिमित्तंतत्राह अहमिति । अहमुषसामग्र्येवप्राक्रमिषं । यथाप्रथमोषसःअतिक्रांतत्वात्पश्चात्तनानामुषसांयोगोनघटतेतथाऽवयोरपीत्यर्थः ३७ तर्ह्यहंकिंकरोमीतित्राह पुरूरवइति । हेपुरूरवःपुनःपश्चादस्तंगृहंपरोहिगच्छ इदानीमेवंकर्तव्यंत्वयेत्यर्थः अस्तमेयायेतिश्रुतेः । किमर्थंपश्चाद्गमनमितित्राह दुरापनेतियथावातोवायुगृहीतुमशक्यःतथाहमपिदुरापनादुर्ग्रहेत्यर्थः । श्रुतिमृदुवचनोत्तरेणायंगृहंनयातीत्यभिसंधायकठिणोत्तरेणवर्तयिष्यामीतिमत्वापुरूरवोमामृथामाप्रपत्थोमात्वावृकासोअशिवासउक्षन् । नवैस्त्रैणानिसख्यानिसंतिसालावृकाणांहृदया

न्येतेत्येतदर्थेउत्तरत्रेनोर्वशीवक्ति मामृथाइति । हेपुरूरवःत्वंमामृथाःमरणेनमागुहि । गूढाक्षपकरणातपुरुषइतपुल्लगशक्तेमत्वनबालष्टत्वात्कामानोमत्तमरणतवनयुक्त अबलायाश्चदबलत्वनकथाच त्संभावितंस्यादित्यर्थः । अनेनार्थतःमाप्रपत्तइत्येतद्विवृतंभवति । प्रपत्तइतिपततेर्यङ्लुङ्तंरूपं कामपारवश्येनभ्रशंपतितोमाभूः । अभ्यासस्यदीर्घाभावश्छांदसः । इमेआशीवासःअशिवाःअशुद्धिहेतवो वृकावृकासोत्वात्वांमोक्षन् उक्षतिरत्रभक्षणार्थः । मास्मात्वुर्नलालाजलेनमोक्षयित्वाभक्षयेयुरित्यर्थः । स्त्रैणानिस्त्रीसंबंधीनिसख्यानि ददातिप्रतिगृह्णातिगुह्यमाख्यातिपृच्छति भुंक्तेभोजयतेचैवषड्विधंस्नेह लक्षणमिति । स्नेहलक्षणानिनसंतिसदातनानिनभवंतिवैकापि यथेत्यनेनसालावृकाणामितिलुप्तोपमामितिसूचयति हृदयामि । जातावेकवचनं यथासालावृकाणांहृदयानि एतान्यपिस्त्रीणांहृद यानितथेत्यर्थः ३८ एतेइत्युक्तमेवविवृणोति स्त्रियइति । किंक्रूरंस्त्रीहृदयंपुनरपिकिंक्रूरमंगनाहृदयंइत्येतद्विशब्देनदर्शितं प्रियेश्रेष्ठेपिसाहसंबलात्कारलक्षणंकर्मयासांतास्तथा एतदेवविविच्यदर्शयति ध्नंतीति । विस्रब्धंविश्वस्तम् ३९ अलीकविसंभंकपटविश्वासं अज्ञेषुपुरुषेषुअत्यंतसौख्यदाःतत्तत्कालोपभोग्यसुखप्रदानत्वादात्यंतिकसुखदाः पुंश्चल्यइत्यस्यविवरणं स्वैरवृत्तयइति । इष्टज नशिक्षामनुपा कर्ण्यस्वेच्छानियतमद्यपानादिवृत्तयः ४० मयासहैकरात्रंवत्स्यतिसुरतलीलामनुभविष्यतीत्यर्थः ४१ समुवास संभोगलक्षणंसुरतमनुभूतवान्स्त्रियोह्यकरुणाइत्यारभ्यतयानिशामित्यंतेनोक्तमितिज्ञातव्यं

स्त्रियोह्यकरुणाःक्रूरादुर्मर्षाःप्रियसाहसाः ॥ घ्नंत्यल्पार्थेपिविस्रब्धंपतिभ्रातरमप्युत ३९ विधायालीकविस्रंभमज्ञेष्वत्यंतसौख्यदाः ॥ नवंनवमभीप्संत्यः पुंश्चल्यःस्वैरवृत्तयः ४० संवत्सरांतेपिभवानेकरात्रंमयेश्वर ॥ वत्स्यत्यपत्यानिचतेभविष्यंत्यपराणिभो ॥ अंतर्वत्नीमुपालक्ष्यदेवींसप्रययौपुरीम् ४१ पुन स्तत्रगतोब्दांतेउर्वशींवीरमातरम् ॥ उपलभ्यमुदायुक्तःसमुवासतयानिशम् ४२ अथैनमुर्वशीप्राहकृपणंविरहातुरम् ॥ गंधर्वानुपधावेमान्तुभ्यं दास्यंतिमामिति ४३ तस्यसंस्तुवतस्तुष्टाअग्निस्थालींददुर्नृप ॥ उर्वशींमन्यमानस्तांनाबुध्यतचरन्वने ४४ स्थालीन्यस्यवनेगत्वागृहानध्युषितोनि शि ॥ त्रेतायांसंप्रवृत्तायांमनसित्रय्यवर्तत ४५ स्थालीस्थानंगतोश्वत्थंशमीगर्भंविलक्ष्यसः ॥ तेनद्वेअरणीकृत्वाउर्वशीलोककाम्यया ४६ उर्वशींमं त्रतोध्यायन्नधरारणिमुत्तराम् ॥ आत्मानमुभयोर्मध्येयत्तत्प्रजननंप्रभुः ४७

४२ उपधावशरणंगच्छ धावुगतिशुद्धचोःत्रिकरणशुद्धचास्तुतिंकुर्वित्यर्थः इतित्वादेवाइमआहुरैलयथेमेतद्भवसिमृत्युबंधुःप्रजातदेवान्हविषायजातिस्वर्गउत्वमपिमादयासइति ४३ अग्निस्थालींअग्निस्था पनयोग्यपात्रंउर्वशींमन्यमानोवनेचरंस्तामुर्वशींनाबुध्यत नेयमुर्वशीकिंत्वियमग्निस्थालीतिज्ञातवानित्यर्थः ४४ सपुरूरवाः अग्निस्थालींवनेन्यस्यनिक्षिप्यनिशिगृहान्गत्वातांनिशामध्युषितोभूत् अथप रस्मिन्दिवसेत्रेतायांसंप्रवृत्तायांत्रेतायुगारंभसमयेजातेसत्युर्वशींचिंतयतस्तस्यराज्ञोमनसिअग्न्याधानादिसांगयज्ञप्रकाशवेदत्रयंप्रकाशितमभूदित्यर्थः ४५ तदर्थंविचार्याग्निस्थालीप्रदानाभिप्रायंज्ञात्वाअ ग्निस्थालीस्थानंगतःतत्रपुरूरवाःशमीगर्भंशमीवृक्षेणाधिष्ठितंअश्वत्थंविलक्ष्यविशेषतोदृष्ट्वास्थालीशमीजाताग्निस्तश्वत्थोजातइतिविज्ञाय शमीगर्भमश्वत्थंछित्वातेनशमीगर्भाश्च त्थेनेद्वअरणीकृत्वाउत्तराध रारणिभेदननिधायउर्वशीलोकप्राप्तीच्छया ४६ फलविशेषार्थं जनिष्टोअपोनप्तृःसुजातःप्रोर्वशीतिरतदीर्घमायुरितिमंत्रार्थत्वेनोर्वशींध्यायन्उर्वशीमधरारणिंआत्मानंपुरूरवःशब्दोपलक्षितमुत्तरारणिंच चिंतयन् उभयोररण्योर्मध्येयत्प्रजननसाधनंतच्चमनसाध्यायन्नरणीनिर्ममंथेतिशेषः प्रभुरित्यनेनसर्वध्यानादिसामर्थ्यंदर्शयति ४७

मथितमाह तस्येति तस्यराज्ञोनिर्मथनाज्जातवेदाजातइतितत्प्रभृतिजातवेदानामाग्नेरितिसूचितं सविभावसुरग्निस्त्रय्याविद्ययावेदत्रयसंज्ञयाप्रतिपाद्योराज्ञापुत्रत्वेकल्पितइत्यन्वयः त्रिभिराहवनीयादिरूपैर्वर्ततइतित्रिवृत्अध्यात्मविवक्षायांअकारोकारमकारसमाहारोंकाररूपेणवर्ततइतित्रिवृत् ४८ तेनत्रिवृताग्निनाउर्वशीसालोक्यंसर्वदेवमयंसर्वदेवोत्तमं ५९ पुराकृतैःअकारादिसर्ववाग्विगितिसर्ववाङ्मयःप्रणवोप्येकः ५० त्रयीत्रिप्रकारा अग्निनाप्रजयापुत्रत्वेनकल्पितेनाग्निना ५१ इतिश्रीभागवतेमहापुराणेनवमस्कंधेवि०कृ०टी०द्वादशोध्यायः १२ ब्रह्मणोत्रिरत्रेःसोमःसोमाद्बुधःबुधात्पुरूरवाःतस्यपुत्रानाह ऐलस्येति १ २ ३ ४ कुशांबुजोगाधिरित्येकस्यनामद्वयं ५ भार्गवमृचीकं ६ कुशिकानामन्वयोयस्यसतथा कुशिकान्वयः समयज्ञतेवा ७ श्वश्रूवाभार्यामात्रा । उभयैःसात्विकराजसभेदभिन्नैःमंत्रैः ।

तस्यनिर्मथनाज्जातोजातवेदाविभावसुः ॥ त्रय्यासविद्ययाराज्ञापुत्रत्वेकल्पितस्त्रिवृत् ४८तेनायजतयज्ञेशंभगवंतमधोक्षजम्॥उर्वशीलोकमन्विच्छन्सर्वदेवमयंहरिम् ४९ एकएवपुरावेदःप्रणवःसर्ववाङ्मयः ॥ देवोनारायणोनान्यएकोग्निर्वर्णएवच ५० पुरूरवसएवासीत्त्रयीत्रेतामुखेनृप ॥ अग्निनाप्रजयाराजा लोकंगांधर्वमेयिवान् ५१ इतिश्रीभागवतेनवमस्कंधेऐलोपाख्यानेद्वादशोध्यायः॥१२॥श्रीशुकउवाच॥ ऐलस्यचोर्वशीगर्भात्षडासन्नात्मजानृप ॥ आयुः श्रुतायुसत्यायुरयोथविजयोजयः १ श्रुतायोर्वसुमान्पुत्रःसत्यायोश्चश्रुतंजयः ॥ रयस्याद्भुतएकस्तुजयस्यतनयोमितः २ भीमस्तुविजयस्याथकांचनोहोत्रकस्ततः ॥ तस्यजह्नुःसुतोगंगांगंडुषीकृत्ययोपिबत् ३ जह्नोःपुरुस्तस्यपुत्रोबलाकश्चात्मजोजकः ॥ ततःकुशःकुशस्यापिकुशांबुस्तनयोवसुः ४ कुशनाभश्चचत्वारोगाधिरासीत्कुशांबुजः ॥ तस्यसत्यवतींकन्यामृचीकोयाचतद्विजः ५ वरंविसदृशंमत्वागाधिर्भार्गवमब्रवीत् ॥ एकतःश्यामकर्णानांहयानांचंद्रवर्चसाम् ६ सहस्रंदीयतांशुल्कंकन्यायाःकुशिकान्वयः ॥ इत्युक्तस्तन्मतंज्ञात्वागतःसवरुणांतिकम् ७ आनीयदत्वातानश्वानुपयेमेवरांगनाम् ॥ सऋषिःप्रार्थितःपत्न्याश्वश्रूवाचापत्यकाम्यया ॥ श्रपयित्वोभयैर्मंत्रैश्चरुंस्नातुंगतोमुनिः ८ तावत्सत्यवतीमात्रास्वचरुंयाचितासती ॥ श्रेष्ठंमत्वातयाय च्छन्मात्रेमातुरदत्स्वयम् ९ तद्विज्ञायमुनिःप्राहपत्नींकष्टमकार्षिनः ॥ घोरोदंडधरःपुत्रोभ्रातातेब्रह्मवित्तमः १० प्रसादितःसत्यवत्यामैवंभूदितिभार्गवः ॥ अथतर्हिभवेत्पौत्रोजमदग्निस्ततोभवत् ११ साचाभूत्सुमहापुण्याकौशिकीलोकपावनी ॥ रेणोःसुतांरेणुकांवैजमदग्निरुवाहयाम् १२ तस्यांवैभार्गवऋषेःसुतावसुमदादयः ॥ यवीयान्जज्ञएतेषांरामइत्यभिविश्रुतः १३ यमाहुर्वासुदेवांशंहैहयानांकुलांतकम् ॥ त्रिःसप्तकृत्वोयइमांचक्रेनिःक्षत्रियांमहीम् १४ दृप्तंक्षत्रंभुवोभारमब्रह्मण्यमधार्मिकम् ॥ रजस्तमोवृतमहन्फल्गुन्यपिकृतेंहसि १५

चरुंश्रपयित्वाप्रपच्याभिमंत्र्य तवेदंतवमातुरिदमितिनिगद्यसंस्थाप्य । स्नातुंगतः ८ तावत्तदाआत्मीयचरुंश्रेष्ठंमत्वातयास्वमात्रायाचितासत्यवतीस्वचरुंमात्रेददौ मातुश्चरुंस्वयमदत्स्वीकृतवती ९ तवपुत्रोघोरोदंडधरः । तेभ्राताब्रह्मवित्तमः १० ११ १२ साकौशिकीसत्यवतीनदीबभूवेतिशेषः १३ भार्गवऋषेर्जमदग्नेर्यवीयान्कनिष्ठः १४ क्षत्रवधेमुख्यंकारणमाह दृप्तमिति । अहन्हतवान् । फल्गुन्यल्पे अंहस्यपराधे १५

१६ दत्तंदत्तात्रेयं परिकर्मभिःपरिचर्याभिराराध्य १७ अरातिपुदुर्धर्षत्ववरं । अजश्रीरौत्पत्तिकीश्रीःयत्रतेजआदयोणिमादयश्चगुणाःसंतिअव्याहतगतिश्चचारइत्यन्वयः १८ १९ स्वायाःन र्मदायाः । अंभासिरुरोधप्रवाहस्तंभनंकृतवान् २० स्वशिबिरंरावणस्यसेनाविमोचनस्थानं प्रतिस्रोतःसरिज्जलैःप्रतीपगमनस्रोतःप्रवाहोयेषांतानितथाप्रतिस्रोतांसिचसरिज्जलानिप्रतिस्रोतःसरि ज्जलानितैर्विप्लावितंप्रवाहवेगेननीतंवीक्ष्येतिशेषः । स्रोतोंबुनिर्गमद्वारेइंद्रियेषुजलस्रुतावितिच २१ यथाकेनचित्कपिर्मुक्तःपुनर्बद्धोभवतितथायंदशमुखोयेनार्जुनेनमाहिष्मत्यांसान्निरुद्धोभूदित्यन्व यः २२ २३ हविर्धान्याकामधेन्वा २४ आत्मनःस्वस्यऐश्वर्यमतिशायिनंअतीत्यवर्तमानंतदैश्वर्यनादियन्नादरंकुर्वन् । अग्निहोत्रौधनुंप्रतिसाभिलाषःइच्छांकुर्वन् २५ हविर्धानींधेनुं । न

राजोवाच ॥ किंतदंहोभगवतोराजन्यैरजितात्मभिः ॥ कृतंतेनकुलंनष्टंक्षत्रियाणामभीक्ष्णशः १६ ॥ श्रीशुकउवाच ॥ हैहयानामधिपतिरर्जुनःक्षत्रिय र्षभः ॥ दत्तंनारायणस्यांशमाराध्यपरिकर्मभिः १७ बाहून्दशशतंलेभेदुर्धर्षत्वमरातिषु ॥ अव्याहतेंद्रियाजश्रीस्तेजोवीर्ययशोबलम् १८ योगेश्वरत्व मैश्वर्यैगुणायत्राणिमादयः ॥ चचाराव्याहतगतिर्लोकेषुपवनोयथा १९ स्त्रीरत्नैरावृतःक्रीडन्नरेवांभसिमदोत्कटः ॥ वैजयंतींस्रजंबिभ्रद्धरोधसरितंभुजैः २० विप्लावितंस्वशिबिरंप्रतिस्रोतःसरिज्जलैः ॥ नामृष्यत्तस्यतद्वीर्यंवीरमानीदशाननः २१ गृहीतोलीलयास्त्रीणांसमक्षंकृतकिल्बिषः ॥ माहिष्मत्यांस न्निरुद्धोमुक्तोयेनकपिर्यथा २२ सएकदातुमृगयांविचरन्विपिनेवने ॥ यदृच्छयाश्रमपदंजमदग्नेरुपाविशत् २३ तस्मैसनरदेवायमुनिरर्हणमाहरत् ॥ ससैन्यामात्यवाहायहविर्धान्यातपोधनः २४ सवीरस्तस्यसंदृष्ट्वाआत्मैश्वर्यातिशायिनम् ॥ तन्नाद्रियन्नग्निहोत्रींसाभिलाषःसहैहयः २५ हविर्धानीम् षेर्दर्पान्नरान्हर्तुमयोजयत् ॥ तांतेमाहिष्मतीनिन्युःसवत्सांक्रंदतींबलात् २६ अथराजनिनिर्यातेरामआश्रमआगतः ॥ श्रुत्वातत्तस्यदौरात्म्यंचुक्रोधा हिरिवाहतः २७ परशुंयोजयामाससतूणंचर्मकार्मुकम् ॥ अन्वधावतदुर्मर्षोमृगेंद्रइवयूथपम् २८ तमापतंतंभृगुवर्यमोजसाधनुर्धरंबाणपरश्वधायुधम् ॥ ऐणेयचर्मांबरमात्मधामभिर्युतंजटाभिर्दद्दशेपुरींनृप २९ अचोदयद्वास्तिवरांश्चपत्तिभिर्गदासिबाणार्ष्टिशताग्रशक्तिभिः ॥ अक्षौहिणीःसप्तदशातिभी षणास्तारामएकोभगवानमूदयत् ३० यतोयतोसौप्रहरन्परश्वधोमनोनिलौजाःपरचक्रमूदनः ॥ ततस्ततश्छिन्नभुजोरुकंधरानिपेतुरुर्व्यांहतसूतवाह नाः ३१ दृष्ट्वास्वसैन्यंरुधिरौघकर्दमेरणाजिरेरामकुठारसायकैः ॥ विवृक्णचर्मध्वजचापविग्रहंविपातितंहैहयआपतद्रुषा ३२

रान्पुरुषान् हर्तुंनेतुंअयोजयन्नियुंक्तवान् २६ २७ योजयामासउत्तेजितंकृतवान् । कार्मुकंगृहीत्वेतिशेषः । रथेयोजयामासेतिवा २८ ऐणेयंचर्मकृष्णाजिनंदेवांबरंयस्यसतथातं आत्मनःस्वस्यधामतेजोयासांताःतथा । ताभिर्जटाभिर्युक्तंतंपुरीमापतंतम् २९ अर्जुनोयाअक्षौहिणीरचोदयद्रामस्ताअसूदयदित्यर्थः ३० मनोवदनिलवदोजोवेगोयस्यसतथामनोद्वेगआनिलवद वष्टंभइतिवा । ओजोवष्टंभबलयोरितियादवः ३१ विग्रहोदेहः ३२

अथागत्यार्जुनःपंचशतेषुधनुष्षुबाहुभिः । बाणान्युगपदेकमयत्नेनसंदधे अस्त्रभृतांसम्यगग्रणीरामःसमंयुगपदेकस्मिन्धनुषिबद्धेषुभिःसंधितशरैस्तान्पंचशतशरान्भ्रच्छिनदित्यन्वयः ३३ पुनः रामःस्वहस्तैरचलान्गिरीन्अंघ्रिपान्वृक्षान्मृधेउत्क्षिप्यप्रहृत्ययुधिवेगादभिधावतोर्जुनस्यभुजान् । कठोरनेमिनाशितधारेणाचिच्छेदेत्यन्वयः ॥ ३४ ३५ उपावर्त्यनिवर्त्य । इतस्ततःआकर्ष णादिनापरिक्लिष्टां क्लेशोपेताम् ३६ ३७ ३८ ३९ यथासौरीसूर्यसंबंधिनीप्रभारोचतेतथाब्राह्मीब्राह्मणसंबंधिनीलक्ष्मीःक्षमयाप्रकाशते ४० मूर्द्धावसिक्तस्यचक्रवर्तिनः ब्रह्मवधाद्ब्राह्मणहननादच्युतेश्री नारायणेबुद्धिर्यस्यसतथा ४१ ॥ इतिश्रीभागवतेनवमस्कंधेवि०कृ०टी०त्रयोदयोध्यायः ॥ १३ ॥ चरित्वाकृत्वा १ यातागंगामितिशेषः २ किंचिच्चित्ररथस्पृहाईषच्चित्ररथेस्पृहावतीजाता ३

अथार्जुनःपंचशतेषुबाहुभिर्धनुष्षुबाणान्युगपत्सुसंदधे ॥ रामायरामोस्त्रभृतांसमग्रणीस्तानेकबद्धेषुभिरच्छिनत्समम् ३३ पुनःस्वहस्तैरचलान्मृधेऽघ्रिपा नुत्क्षिप्यवेगादभिधावतोयुधि ॥ भुजान्कुठारेणकठोरनेमिनाचिच्छेदरामःप्रसभंहसन्निव ३४ कृत्तबाहोःशिरस्तस्यगिरिशृंगमिवाहरत् ॥ हतेपितरित त्पुत्राअयुतंदुद्रुवुर्भयात् ३५ अग्निहोत्रीमुपावर्त्यसवत्सांपरवीरहा ॥ समुपेत्याश्रमंपित्रेपरिक्लिष्टांसमर्पयत् ३६ स्वकर्मतत्कृतंरामःपित्रेभ्रातृभ्यएवच ॥ वर्णयामासतच्छ्रुत्वाजमदग्निरभाषत ३७ रामरामहाबाहोभवान्पापमकार्षीत् ॥ अवधीर्नरदेवंयत्सर्वदेवमयंवृथा ३८ वयंहिब्राह्मणास्तातक्षमयार्हणतां गताः ॥ ययालोकगुरुर्देवःपारमेष्ठ्यमगात्पदम् ३९ क्षमयारोचतेलक्ष्मीर्ब्राह्मीसौरीयथाप्रभा ॥ क्षमिणामाशुभगवांस्तुष्यतेहरिरीश्वरः ४० राज्ञोमूर्धा वसिक्तस्यवधोब्रह्मवधाद्गुरुः ॥ तीर्थसंसेवयाचांहोजह्यंगाच्युतचेतनः ४१ ॥ इतिश्रीभागवतेनवमस्कंधेपरशुरामचरितेत्रयोदशोध्यायः ॥ १३ ॥ श्रीशुक उवाच ॥ पित्रोपशिक्षितोरामस्तथेतिकुरुनंदन ॥ संवत्सरंतीर्थचर्याचरित्वाश्रममाव्रजत् १ कदाचिद्रेणुकायातागंगायांपद्ममालिनम् ॥ गंधर्वराजं क्रीडंतमप्सरोभिरपश्यत २ विलोकयंतीक्रीडंतमुदकार्थंनदींगता ॥ होमवेलांनसस्मारकिंचिच्चित्ररथस्पृहा ३ कालात्य यंतांविलोक्यमुनेःशापाद्विशंकि ता ॥ आगत्यकलशंतस्थौपुरोधायकृतांजलिः ४ व्यभिचारंमुनिर्ज्ञात्वापत्न्याःप्रकुपितोब्रवीत् ॥ घ्नतैनांपुत्रकाःपापामित्युक्तास्तांनचक्रिरे ५ रामः संचोदितःपित्राभ्रातॄन्मात्रासहावधीत् ॥ प्रभावज्ञोमुनेःसम्यक्समाधेस्तपसश्चसः ६ वरेणछंदयामासप्रीतःसत्यवतीसुतः ॥ वव्रेहतानांरामोपिजीवि तंचास्मृतिंवधे ७ उत्तस्थुस्तेकुशलिनोनिद्रापायइवांजसा ॥ पितुर्विद्वांस्तपोवीर्यंरामश्चक्रेसुहृद्वधम् ८

कलशंभर्तुःपुरोनिधायतत्रैवकृतांजलिस्तस्थौ ४ घ्नतहतांकुरुत तांहातिं ५ मुनेःसमाधेःतपसश्चसम्यक्प्रभावज्ञःप्रतापमाहात्म्ययोःप्र भावःस्यादिति ६ छंदयामासवशीचकार । वशा भिप्राययोःश्छंदइतिच । वधेअस्मृतिंवयंरामेणहताइतिस्मृतिशून्यत्वलक्षणंवरंच ७ रामएतेवसुमदादयोजीवंतिवेज्जीवंतुनोचेन्म्रियंतामितिमत्वासुहृद्वधोनाकारि । किंतुस्वसार्वज्ञमैश्वर त्वेनदोषाभावंचप्रकटयितुमितिभावेनेत्याह पितुरिति । वीर्यंपराक्रमेरेतस्यत्रमाहात्म्ययोरपीत्यभिधानात् । पितुस्तपोमाहात्म्यंजानताकृतमितिभावः । साक्षान्नारायणावतारस्यानिरवद्यस्यसकलगुणाक रस्यभार्गवरामस्यक्षत्रहत्यादिदोषमार्जनायतीर्थसेवामातृभ्रातृवधात्स्वाज्ञाकारित्वेनप्रसन्नात्पितुर्वरदानमित्यादिकंकथंघटतइतीत्थंशंका । जामदग्न्योवरंवव्रेऽनंतशक्तिरपिस्वयं । पितुर्मान्यत्वसिद्ध्यर्थं

लोकेलोकेश्वरःप्रभुरित्यादिवाक्येनपरिहर्तव्याइतिज्ञातव्यम् ८ ९ लब्धाच्छिद्राः लब्धावसराः १० विषयादाहृत्यभगवत्यवानवाशतबुद्धिम् ११ १२ आत्मनापरमात्मानमाहश्रीधरस्वामी ग्रौमतोवातेइतियादवः । आत्मशब्दःपूर्वार्धे १३ दूरस्थाःस्वभिन्नदेशंगताः १४ १५ क्षत्रांतायविशेषेणक्षत्रियकुलनाशाय १६ ब्रह्मद्वेर्ब्राह्मणहंतृभिःविहतानष्टाश्रीर्यस्याःसातथातां शीर्षभिः तस्यां प्रविश्यमध्येमाहिष्मतीमध्ये १७ अब्रह्मण्यानांब्राह्मणद्वेषिणां भयंकरांनदींचक्रइतिगतेनान्वयः । निमित्तमाह हेतुमिति । अमंगलकारिणिसति १८ स्यमंतपंचकेकुरुक्षेत्रे । शोणितान्येवोदकानियेषुतेतथातान्ह्रदान् । जलैरगाधप्रदेशान् १९ शिरःकायेनसंधायबर्हिषिपद्मआधायदर्भबंधनविशेषेवासर्वदेवमयंसर्वदेवोत्तमम् २० २१ उपद्रष्टेन्यूनातिरिक्तकर्मसाक्षिणे परंअवशिष्टम् २२ विधूताशे

येर्जुनस्यसुताराजन्स्मरंतःस्मपितुर्वधम् ॥ रामवीर्यपराभूतालेभिरेशर्मनक्वचित् ९ एकदाश्रमतोरामेसभ्रातरिवनंगते ॥ वैरंसिसाधयिषवोलब्धच्छिद्राउपागमन् १० दृष्ट्वाम्याागारआसीनमावेशितधियंमुनिम् ॥ भगवत्युत्तमश्लोकेजघ्नुस्तेपापनिश्चयाः ११ याचमानाःकृपणयारामामात्रातिदारुणाः ॥ प्रसह्यशिरउत्कृत्यजग्मुस्तेक्षत्रबंधवः १२ रेणुकादुःखशोकार्तानिघ्नंत्यात्मानमात्मना ॥ रामरामेतितातेतिविचुक्रोशोच्चकैःसती १३ तदुपश्रुत्यदूरस्थाहारामेत्यार्तवत्स्वरम् ॥ त्वरयाश्रममासाद्यददृशुःपितरंहतम् १४ तेदुःखरोषामर्षार्तिशोकवेगविमोहिताः ॥ हातातसाधोधर्मिष्ठत्यक्तास्मान्स्वर्गतोभवान् १५ विलप्यैवंपितुर्देहंनिधायभ्रातृषुस्वयम् ॥ प्रगृह्यपरशुंरामःक्षत्रांतायमनोदधे १६ गत्वामाहिष्मतींरामोब्रह्मघ्नविहताश्रियम् ॥ तस्यांसशीर्षभीराज्ञांमध्येचक्रेमहागिरिम् १७ तद्रक्तेननदींघोरामब्रह्मण्यभयावहाम् ॥ हेतुंकृत्वापितृवधंक्षत्रेऽमंगलकारिणि १८ त्रिःसप्तकृत्वःपृथिवींकृत्वानिःक्षत्रियांविभुः ॥ स्यमंतपंचकेचक्रेशोणितोदान्ह्रदान्नव १९ पितुःकायेनसंधायशिरआधायबर्हिषि ॥ सर्वदेवमयंदेवमात्मानमयजन्मखैः २० ददौप्राचींदिशंहोत्रेब्रह्मणेदक्षिणांदिशम् ॥ अध्वर्यवेप्रतीचींवाउद्गात्रउत्तरांदिशम् २१ अन्येभ्योवांतरदिशःकश्यपायचमध्यतः ॥ आर्यावर्तमुपद्रष्ट्रेसदस्येभ्यस्ततःपरम् २२ ततश्चावभृथस्नानविधूताशेषकिल्बिषः ॥ सरस्वत्यांब्रह्मनद्यांरेजेव्यभ्रइवांशुमान् २३ स्वदेहंजमदग्निस्तुलब्ध्वासंज्ञानलक्षणम् ॥ ऋषीणांमंडलेसोभूत्सप्तमोरामपूजितः २४ जामदग्न्योपिभगवान्रामःकमललोचनः ॥ आगामिन्यंतरेराजन्वर्तयिष्यतिवैबृहत् २५ आस्तेद्यापिमहेंद्राद्रौन्यस्तदंडःप्रशांतधीः ॥ उपगीयमानचरितःसिद्धगंधर्वचारणैः २६ एवंभृगुषुविश्वात्माभगवान्हरिरीश्वरः ॥ अवतीर्यपरंभारंभुवोहन्बहुशोनृपान् २७

षकिल्बिषत्वमौपचारिकंलोकशिक्षार्थत्वात् नाम्नासरस्वत्यांब्रह्मनद्यांवेदमय्यांनद्याम् । व्यभ्रःमेघच्छायानिर्मुक्तः अंशुमानादित्यः । जनेतिपदाध्याहारेणावभृथस्नानविधूताशेषकिल्बिषजनइतिवा अवभृथस्नानेनविधूतमशेषंकिल्बिषंयस्यसतथा । अवभृथस्नानविधूताशेषकिल्बिषोजनोयस्यसतथा अनेनावभृथस्नानेनजनस्याशेषतःकिल्बिषंविध्वस्तंभवतीतिदर्शनायरामेणावभृथस्नानमकारीतिसूचितंभवति २३ जमदग्निस्तुसंज्ञानलक्षणंज्योतिर्मयलक्षणंस्वयोग्यंदेहमाकारविशेषंलब्ध्वासप्तर्षीणांमंडलेसप्तमोऋषिरितिशेषःअभूत् २४ आगामिन्यंतरेभविष्यन्मन्वंतरे । बृहद्ब्रह्मवेदलक्षणंवर्तयिष्यतिवेदप्रवर्तकोभविष्यतीत्यर्थः २५ २६ भुवःपरंभारंकेवलंभारभूतान्नृपानहन्संहृतवान् २७

---

१ अपापमपिदेवेशपितरःसंनिवर्तयन् ॥ अजानंतोस्यमाहात्म्यंमोहितास्तस्यमायया ॥ मोहयन्मायया लोकंचक्रेचापचितिंतवे ॥ पुण्यपापादिनिर्मातुःकुतःपापादेसंगतिरितिशेषतात्पर्यं ।

महातेजाविश्वामित्रः २८ तस्यविश्वामित्रस्यैकशतंपुत्राआसन् तेषामेकोत्तरशतपुत्राणांमध्येयोमध्यमःसतुमधुच्छंदोनामतेनमधुच्छंदसासंयुक्तायेपंचाशत्पुत्राःतेमाधुच्छंदसनामानोभवंतिनान्ये । तस्य हविश्वामित्रस्यैकशतंपुत्राआसुरित्यादिब्राह्मणंचेममेवार्थंवक्ति २९ शुनःशेपस्यमाहात्म्यंउपरिष्टात्प्रचक्षतइत्युक्तंप्रपंचायितुमाह पुत्रंकृत्वेति । अत्रकाचित्कैवदंतीममपुत्रोभवेतिविश्वामित्रेणोक्तोय माजीगर्तःशुनःशेपोहंत्वत्पुत्राणांज्येष्ठश्चेत्तवपुत्रःस्यांतत्रापिमध्यमोनस्यांनापिकनिष्ठइतिविश्वामित्रमाह तदैवमस्त्विति विश्वामित्रःशुनःशेपंपुत्रंकृत्वाऽन्यानौरसान्पुत्रानब्रवीत् एषशुनःशेपोयुष्माकंज्येष्ठःप्रकल्प्यतांभवद्विरितिशेषइति शुनःशेपशब्दंशृण्वतांशुनीजातीयोयंकिमित्यन्यथाप्रतीतिंनिवारयति भार्गवमिति । भृगुवंशोद्भवः अनेनापिसाकथंनिवारितास्यादित्यतआह आजीगर्तमिति । अजीगर्तस्यमुनेरपत्यं तर्हिविश्वामित्रस्यपुत्रत्वेकासंगतिरित्यतोदेवरातमिति । विश्वामित्रायदेवैःरातंदत्तंविश्वामित्रस्यदत्तपुत्रत्वेनसंबंधइत्यर्थः २० अनेनविशेषणत्रयेणज्येष्ठत्वकल्पनायांवैशिष्ट्य मुक्तावैशिष्ट्यांतरंचाह यइति । यःशुनःशेपःहरिश्चंद्रयज्ञेअजीगर्तेनपित्रारोहितायविक्रीतःपुरुषाख्यःपशुरभूत् । यश्चब्रह्मादिदेवांस्तुत्वातत्प्रसादात्पाशबंधनात्संसाराख्यपाशबंधनात्यूपसंबंधिरज्जुबं धनात् आत्मानंमुमुचेमोचयामासकर्मकर्तरिप्रयोगः यस्यनूनंकतमस्यामृतानांमनामहेचारुदेवस्यनामेत्यारभ्यअस्मेरयिंनिधापयेत्यंतवेदवाक्येनस्तुत्वाऋग्भाष्येएतासामृचामर्थआचार्यैरेवविस्तारेणो

गाधेरभून्महातेजाःसमिद्धइवपावकः ॥ तपसाक्षात्रमुत्सृज्ययोलेभेब्रह्मवर्चसम् २८ विश्वामित्रस्यचैवासन्पुत्राएकशतंनृप ॥ मध्यमस्तुमधुच्छंदामा धुच्छंदसएवते २९ पुत्रंकृत्वाशुनःशेपंदेवरातंचभार्गवम् ॥ आजीगर्तंसुतानाहज्येष्ठएषप्रकल्प्यताम् ३० योवैहरिश्चंद्रमखेविक्रीतःपुरुषःपशुः ॥ स्तु त्वादेवान्प्रजेशादीन्मुमुचेपाशबंधनात् ३१ योरातोदेवयजनेदैवैर्गाधिसुतायसः ॥ देवरातइतिख्यातःशुनःशेपस्तुभार्गवः ३२ येमधुच्छंदसोज्येष्ठाःकुश लंमेनिरेनतत् ॥ अशपत्तान्मुनिःक्रुद्धोम्लेच्छाभवतदुर्जनाः ३३ सहोवाचमधुच्छंदाःसार्धंपंचशतातताः ॥ यत्रोभवान्संजानीतेतस्मिंस्तिष्ठामहेवयम् ॥ ३४ ज्येष्ठंमंत्रदृशंचक्रुस्त्वामन्वंचोवयंस्महि ॥ विश्वामित्रःसुतानाहवीरवंतोभविष्यथ ३५

क्तइतिनास्माभिःप्रपंच्यते ३१ देवरातशब्दानिर्वचनेनविश्वामित्रस्यतत्संबंधमाह यइति । यःदेवयजनेयज्ञेयद्दैवैरातोरक्षितस्तैरेवगाधिसुतायविश्वामित्रायरातःदत्तः । तस्मात्सदेवरातइतिख्यातःप्रसिद्धः इत्यतोयंभार्गवः ३२ शुनःशेपोज्येष्ठत्वेनकल्प्यतामितिविश्वामित्रेणोक्ताः । येपंचाशत्पुत्रामधुच्छंदसोजन्मनाज्येष्ठास्तेशुनःशेपस्यज्येष्ठत्वंस्वात्मानःकनिष्ठत्वंयत्तत् । कुशलंसाधुनमेनिरे ततः किमभूदितितत्राह अशपदिति ३३ तेषांम्लेच्छभावेनशुनःशेपस्यकिमायातमितितत्राह सहेति । हेत्यनेनब्राह्मणमनुकरोति सविश्वामित्रःपंचाशतासार्धंमधुच्छंदसमुवाचह । अयंशुनःशेपोवःज्ये ष्ठोभवत्वितिविश्वामित्रेणोक्तस्येदमेववाक्यमुत्तरंसमधुच्छंदाःपंचाशतासार्धंपितरमुवाचह । ततस्तातःपिताभवान्नोस्माकंयद्विजानीतेआज्ञापयति तस्मिन्नाज्ञप्तेशुनःशेपस्यज्यैष्ठ्यैअस्माकंकानिष्ठ्ये सर्वेवयमविचारेणतिष्ठामहे । प्रकाशनस्थेयाख्ययोश्चेतिसूत्रात् । निश्चितंस्थिरीकृतंचेदंकार्यमितिभावः ३४ तर्हितथाकुर्वंत्वितिपित्राउदितास्तेपुत्राःकस्यनूनमित्यादिमंत्रदृशंऋग्वेदद्रष्टारंशुनःशेपंज्ये ष्ठंचक्रुः । कथंचक्रुरितितत्राह त्वामिति । भोदेवरातवयंत्वामन्वंचः अनुवर्तमानाः । कनिष्ठाःस्मभवामहिमसिद्धंहेतौवा । यस्माद्वयंत्वत्कनिष्ठाअभूमतस्मात्तेज्येष्ठत्वेसंशयोमाभूदिति । अथवाहेपितः वयंत्वात्वामन्वंचःअनुवर्तमानाःस्म त्वदाज्ञाकारिणइत्यर्थइति । संतुष्टःपिताकंवरंप्रायच्छदितितत्राह विश्वामित्रइति । वीरवंतःपुत्रवंतःकर्तव्येविशिष्टप्रेरणावंतोवा ३५

कुतोयंवरोदत्तइतित्राह यइति येभवंतोमानमभिमानमनुगृह्णत परिपालनलक्षणानुग्रहंकुर्वंतः मामवीरवंतं अकर्तृकर्तवंतइतिपस्मात्तस्माद्यूयंवीरवंतोभविष्यथेति । वीरवतमकर्तमातत्राह्मणवाक्यानुकरण वेदतुल्यमितिप्रकाशयति अकर्तमम्वाक्यमकुर्वत । जीवतोवाक्यकरणादेवसंशोधनेनच गयायांपिंडदानाच्चत्रिभिःपुत्रस्यपत्रतेतिस्मृतेः । हेकौशिकाःकौशिकगोत्राः एषदेवरातोममवीरःपुत्रोनोयुष्माकं ज्येष्ठः । यूयंतमन्वितअनुवर्तध्वम् ३६ अन्येचाष्टकादयोनुवर्तंतामितिशेषः । उपसंहरति एवमिति यत्कौशिकगोत्रं । तद्वैश्वामित्रैःपृथग्विधमभूत् ३६ कथंतदितितत्राह प्रवरांतरमिति प्रवरांतरमाप

येमानंमेनुगृह्णंतोवीरवंतमकर्तमा ॥ एषवःकौशिकावीरोदेवरातस्तमन्वित ३६ अन्येचाष्टकहारिताजयक्रतुमदादयः ॥ एवंकौशिकगोत्रंतद्वैश्वामित्रैः पृथग्विधम् ३७ प्रवरांतरमापन्नंतद्धीत्येवंप्रकल्पितम् ॥ यःपुरूरवसःपुत्रआयुस्तस्याभवत्सुताः ३८ नहुषःक्षत्रवृद्धश्चरजीराभश्चवीर्यवान् ॥ अनेना इतिराजेंद्रक्षत्रवृद्धान्वयंशृणु ३९ क्षत्रवृद्धसुतस्यासन्सुहोत्रस्यात्मजास्त्रयः ॥ काश्यःकुशोगृत्समदइतिगृत्समदादभूत् ४० शुनकःशौनकोयस्यबह्वृचप्रवरोमुनिः ॥ काश्यस्यकाशिस्तत्पुत्रःसुराष्ट्रोदीर्घतमःपिता ४१ धन्वंतरिर्दीर्घतमसआयुर्वेदप्रवर्तकः ॥ यज्ञभुग्वासुदेवांशःस्मृतिमात्रार्तिनाशनः ४२ तत्पुत्रःकेतुमान्यस्यजज्ञेभीमरथस्ततः ॥ दिवोदासोद्युमांस्तस्मात्प्रतर्दनइतिस्मृतः ४३ सएवशत्रुजिद्वत्सोऋतध्वजइतीरितः ॥ तथाकुवलयाश्वेतिप्रोक्तोऽलर्कादयस्ततः ४४ षष्टिवर्षसहस्राणिषष्टिवर्षशतानिच ॥ नालर्कादपरोराजाबुभुजेमेदिनींयुवा ४५ आलर्कात्संनतिस्तस्मात्सुनीथोथसुकेतनः ॥ धर्मकेतुसुतस्तस्मात्सत्यकेतुरजायत ४६ धृष्टकेतुस्ततस्तस्मात्सुकुमारःक्षितीश्वरः ॥ वीतिहोत्रोस्यभर्गोतोभार्गभूमिरभूत्नृप ४७ इतीमेकाश्यनाभूपाःक्षत्रवृद्धान्वयायिनः॥ राभस्यरभसःपुत्रोगंभीरश्चककस्ततः ४८ तस्यक्षेत्रेब्रह्मजज्ञेशृणुवंशमनेनसः ॥ शुद्धस्ततःशुचिस्तस्माद्भिककुब्धर्मसारथिः ४९ तन्नःशांतरजाजज्ञेकृतकृत्यःसआत्मवान् ॥ रजेःपंचशतान्यासन्पुत्राणामितौजसाम् ५० देवैरभ्यर्थितोदैत्यान्हत्वेंद्रायादददादिवम् ॥ इंद्रस्तस्मैपुनर्दत्वागृहित्वाचरणौरजेः ५१ आत्मानमर्पयामासप्रह्लादात्परिशंकितः ॥ पितर्युपरतेपुत्रायाचमानायनोददुः ५२ त्रिविष्टपंमहेंद्रायययज्ञभागान्समाददुः ॥ गुरुणाहूयमानेऽग्नौबलभित्तनयान्रजेः ५३ अवधीद्भंशितान्मार्गान्नकश्चिदवशेषितः ॥ प्रतिक्षत्रःक्षत्रवृद्धात्संजयस्तत्सुतोजयः ५४ ततःकृतःकृतस्यापिजज्ञेवीर्यधनोनृपः ॥ सहदेवस्ततोहीनोजयत्सेनस्तुतत्सुतः ५५ संकृतिस्तस्यचजयःक्षत्रधर्मामहारथः ॥ क्षत्रवृद्धान्वयाभूपाइमेशृण्वथनाहुषान् ॥ ५६ ॥ इतिश्रीभागवतेमहापुराणेनमस्कंधेचतुर्दशोध्यायः ॥ १४ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

त्रंहिपस्मात्तस्मादेवपृथग्विधंकल्पितंहिप्रसिद्धमितिभावः श्रुतायोःसंततिंविस्तृत्यपुरूरवसः । पुत्रस्यप्रथमस्यायेर्वंशंवर्णयतिबादरायणिः यइति ३८ नहुषान्वयस्यैवराज्यार्हत्वात्क्षत्रवृद्धान्वयस्यतदनर्हत्वात्सूचीकटाहन्यायमनुसंदधानःक्षत्रवृद्धान्वयंवक्तिक्षत्रवृद्धान्वयामिति ३९ ४० ४१ ४२ ४३ ४४ अलर्कादपरोराजायुवातथानबुभुजे ४५ ४६ ४७ इतीमेकाश्यन्नाःकाश्यस्यसंतानजाभूपाः ४८ ४९ ५० ५१ ५२ ५३ पुनरपिक्षत्रवृद्धात्प्रतिक्षत्रोभूत् ५४ ५५ ५६ इतिश्रीभागवतेमहापु॰विजयध्वजटीकायांनवमस्कंधेचतुर्दशोध्यायः ॥ १४ ॥ ॥ ७ ॥ ॥ ७ ॥

अथनहुषस्यसंततिमनुक्रामति यतिरित्यादिना १ तस्यराज्यस्यपरिणामवित्फलपरिपाकपटुतांजानातीति यत्रराज्ये २ इद्राण्याधर्षणात्शच्याःसंस्पर्शानिमित्तात्पितरिनहुषेस्वर्गस्थानात्द्विजैर्भ्रंशितेत्याजितेअजगरत्वंमहासर्पत्वंप्रापितेसति ३ यवीयसःकनिष्ठान्संयातिपूर्वान्काव्यस्यशुक्रस्यपुत्र्यादेवयान्यावृषपर्वणोदैत्यस्यपुत्र्याशर्मिष्ठयाकृतदारः ४ प्रातिलोम्येनविवाहःकथंघटतइतिपृच्छति ब्रह्मर्षिरिति ५ दैववशादिदंपाणिग्रहणंप्राप्तंनतुमानुषवदितिप्रकाशयितुमाख्यायिकांकथयति एकदेति ६ ७ सिंचतीःअन्योन्यजलप्रक्षेपंकुर्वत्यः ८ पर्यधुराच्छादितवत्यः ९ अजानतीशर्मिष्ठागुरुपुत्र्यावासःस्वीयंमत्वा समव्ययत्संवीतवती व्ययसंवरणइतिधातुः तदाप्रकुपिताप्रारब्धकोपादेवयानीदंवाक्यमुवाचेत्यन्वयः १० मह्यंममअसांप्रतमयुक्तं ११ स्वकुलप्रशंसार्थंब्राह्मणानां

श्रीशुकउवाच ॥ यतिर्ययातिःसंयातिरायतिर्वियतिःकृतिः ॥ षडिमेनहुषस्यासन्निंद्रियाणीवदेहिनः १ राज्यंनैच्छद्यतिःपित्रादत्तंतत्परिणामवित् ॥ यत्रप्रविष्टःपुरुषआत्मानंनावबुध्यते २ पितरिभ्रंशितेस्थानादिंद्राण्याधर्षणाद्द्विजैः ॥ प्रापितेजगरत्वंचययातिरभवन्नृपः ३ चतसृष्वादिशद्दिक्षुभ्रातॄन्गोप्तॄन्यवीयसः ॥ कृतदारोजुगोपोर्वींकाव्यस्यवृषपर्वणः ४ ॥ राजोवाच ॥ ब्रह्मर्षिर्भगवान्काव्यःक्षत्रबंधुश्चनाहुषः ॥ राजन्यविप्रयोःकस्माद्विवाहःप्रातिलोमकः ५ ॥ श्रीशुकउवाच ॥ एकदादानवेंद्रस्यशर्मिष्ठानामकन्यका ॥ सखीसहस्रसंयुक्तागुरुपुत्र्याचभामिनी ६ देवयान्यापुरोद्यानेपुष्पितद्रुमसंकुले ॥ व्यचरत्कलगीतालिनलिनीपुलिनेऽबला ७ जलाशयंसमासाद्यकन्याःकमललोचनाः ॥ तीरेन्यस्यदुकूलानिविजह्रुःसिंचतीर्मिथः ८ वीक्ष्यव्रजंतंगिरिशंसहदेव्यावृषेस्थिम् ॥ सहसोत्तीर्यवासांसिपर्यधुर्वीडिताःस्त्रियः ९ शर्मिष्ठाऽजानतीवासोगुरुपुत्र्याःसमव्ययत् ॥ स्वीयंमत्वाप्रकुपितादेवयानीदमब्रवीत् १० अहोनिरीक्ष्यतांमह्यंदास्याःकर्मह्यसांप्रतम् ॥ अस्मद्धार्यंधृतवतीशुनीबहविरध्वरे ११ यैरिदंतपसासृष्टंमुखंपुंसःपरस्यवै ॥ धार्यतेयैःपरंज्योतिःशिवःपंथाश्चदर्शितः १२ येपीदमुपतिष्ठंतेलोकनाथाःसुरेश्वराः ॥ भगवानपिविश्वात्मापावनःश्रीनिकेतनः १३ वयंतत्रापिभृगवःशिष्योस्यानःपिताऽसुरः ॥ अस्मद्धार्यंधृतवतीशूद्रोवेदमिवासती १४ एवंक्षिपंतींशर्मिष्ठागुरुपत्नीमभाषत ॥ रुषाश्वसंतीनागीवधर्षितादष्टदच्छदा १५ आत्मवृत्तिमविज्ञायकत्थसेबहुभिक्षुकि ॥ किंनप्रतीक्षसेस्माकंगृहान्बलिभुजोयथा १६ एवंविधैःसुपरुषैःक्षिप्त्वाचार्यसुतांसतीम् ॥ शर्मिष्ठाप्राक्षिपत्कूपेवासस्त्वादायमन्युना १७ तस्यांगतायांस्वगृहंययातिर्मृगयांचरन् ॥ प्राप्तोयदृच्छयाकूपेजलार्थीतांददर्शह १८ दत्वास्वमुत्तरंवासस्तस्यैराजाविवाससे ॥ गृहीत्वापाणिनापाणिमुज्जहारदयापरः १९

माहात्म्यंकथयति यैरिदमित्यादिना इदंविश्वंयैर्ब्राह्मणैस्तपसासृष्टं येपरमस्यपुंसःमुखंयैरिदंपरंज्योतिर्ब्रह्माख्यंधार्यतेयैश्चशिवःपंथाःवेदमार्गोदर्शितः १२ येलोकनाथाःसुरेश्वरास्तेपीदंब्राह्मणकुलमुपतिष्ठंते अग्निमुखेनहविरादातुंप्रतीक्षंते विश्वात्माभगवानपिब्राह्मणप्रियस्तिष्ठतीतिशेषः १३ वयंतत्रब्राह्मणेषुभृगवः भृगुकुलजाः अतएवश्रेष्ठाइतिशेषः अस्याःपितावृषपर्वाऽसुरोनोस्माकंशिष्यःअस्मत्पितृशिष्यत्वादहमपितत्पुत्रीत्वान्मान्येतियस्मात्तस्मादस्मद्धार्यंवस्त्रमिदंधृतवती यथावेदग्रहणायोग्योवृषलोवेदंधारयातितथेति १४ धर्षिताअप्रगल्भीकृतातुच्छीकृतेत्यर्थः १५ बहुकत्थसेत्यर्थवचनंवदसिभिक्षुकीत्वंस्पष्टमित्याह किन्नेति बलिभुजःश्वानःकाकोवा १६ १७ १८ उत्तरमुत्तरीयं उज्जहारकूपादितिशेषः १९

प्रेमनिर्भरयास्नेहपूर्णयाहस्तंगृह्णातीतिहस्तग्राहः पाणिग्रहणकर्ता अपरान्यानस्यात् हस्तग्राहइतिपाठेहस्तग्राहग्रहणस्यसप्तमत्वं [illegible] एषःसंबंधःईशकृतःश्रीनारायणविहितः नपौरुषःपुरुषाकाररचितोनभवति २१ ब्राह्मणपुत्र्यास्तवब्राह्मणएवभर्तापुक्तोनक्षत्रियःप्रतिलोमप्रवेशप्रसंगादितिशंकांपरिहरति नब्राह्मणइति हेमहाभुजमे ब्राह्मणोहस्तग्राहोनभवितानभविष्यति कुतइतित्राह कचस्येति बार्हस्पत्यस्यबृहस्पतेरपत्यस्यनाम्नाकचस्यशापात्मृतसंजीवनीविद्यार्थीकचस्तत्प्रतिग्रहायबहुतिथंगुरुपरिचर्याविधायतत्प्रसादमा प्राप्यतद्विद्यामादायगुरोरनुज्ञयागंतुकामंकचमुपलभ्यसर्वप्रकारेणकचस्यहितमाचरंत्यामयाशोकचक्रंममभर्तृभवेत्युक्तोमामुवाच हेदेवयानित्वयानैवंवक्तव्यंपद्धातहमिति तदाकुपितोहंतमशपं म त्पितुरवाप्तविद्यानफलत्वितीयमाख्यायिकानेनोच्यते यमशपंपुरेति अहंपुरायंकचमशपंशप्तवतीतस्यशापादिति २२ अनंतरंययातिनाकिंकृतमित्यत्राह ययातिरिति यदनभिप्रेतंप्रतिलोम्येनोद्वहनंत देवात्मनःदैवेनश्रीनारायणेनउपहृतमर्पितमात्मनोमनश्चतस्यांगतमनुरक्तंबुद्धातस्याःदेवयान्याःवचःप्रतिगृहीतवानित्यन्वयः २३ २४ कापोतींकपोतसंबंधिनींवृत्तिं स्तुवन्ग्रंथाधिकभयान्नकापोतीवृत्तिर्वि

तंवीरमाहोशनसीप्रेमनिर्भरयागिरा ॥ राजंस्त्वयागृहीतोमेपाणिःपरपुरंजय ॥ हस्तग्राहोपरोमाभूद्गृहीतायास्त्वयाहिमे २० एषईशकृतोवीरसंबंधोनौनपौ रुषः ॥ यदिदंकूपमग्नायाभवतोदर्शनंमम २१ नब्राह्मणोमेभवितोहस्तग्राहोमहाभुज ॥ कचस्यबार्हस्पत्यस्यशापाद्यमशपंपुरा २२ ययातिरनभिप्रेतंदै वोपहृतमात्मनः ॥ मनस्तुतद्गतंबुध्वाप्रतिजग्राहतद्वचः २३ गतेराजनिसावीरेतत्रस्मरुदतीपितुः ॥ न्यवेदयत्ततःसर्वंमुक्तंशर्मिष्ठयाकृतम् २४ दुर्मनाभग वान्काव्यःपौरोहित्यंविगर्हयन् ॥ स्तुवन्वृत्तिंचकापोतींडुहित्रासययौपुरात् २५ वृषपर्वातमाज्ञायप्रत्यनीकविवक्षितम् ॥ गुरुंप्रसादयन्मूर्ध्नापादयोःप तितःपथि २६ क्षणार्धमन्युर्भगवान्छिष्यंव्याचष्टभार्गवः ॥ कामोस्याःक्रियतांराजन्नैनांत्यक्तुमिहोत्सहे २७ तथेत्यवस्थितेप्राहदेवयानीमनोगतम् ॥ पित्रादत्तायतोयास्येसानुगायातुमामनु २८ स्वानांतत्संकटंवीक्ष्यतदर्थस्यचगौरवम् ॥ देवयानींपर्यचरत्स्त्रीसहस्रेणदासिवत् २९ नाहुषायसुतांद त्वासहशर्मिष्ठयोशना ॥ तमाहराजंश्छर्मिष्टांमाधास्तल्पेतुकर्हिचित् ॥ विलोक्यौशनसींराज्ञीशर्मिष्ठासुप्रजांक्वचित् ॥ तमेववव्रेरहसिसख्याःपतिमृतौ सति ३१ राजपुत्र्यार्थितोपत्येधर्मंचावेक्ष्यधर्मवित् ॥ स्मरंश्छुक्रवचःकालेदिष्टमेवाभ्यपद्यत ३२

ब्रीयते देवयान्यादुहित्रासह २५ प्रत्यनी

कानामसुरद्वेषिणांदेवानांवक्तुमिष्टंकार्यं २६ अस्याःदेवयान्याःकामोपेक्षाविशेषः स्वाभीष्टसाधनाययात्वियंशर्मिष्ठाभवानस्मत्प्रियायास्तामितितत्राह नैनामिति २७ यदभीष्टंतत्तथाकरिष्येइत्येवमुक्ता वृषपर्वण्यवस्थितेसति वृषपर्वणातवकिंकर्तव्यमितिपृष्टादेवयानीमनोगतंस्वमनसिस्थितंकार्यंप्राह किंतदाह पित्रेति अहंपित्रादत्तायास्येयतोमामियंशर्मिष्ठासानुगादासीसहस्रेणसहितानुयातुअन्वागच्छ तुइति २८ शर्मिष्ठातत्सर्वंश्रुत्वायद्यहंनानुगमिष्यामितदागुरुद्रोहान्मत्कुलंसर्वंनष्टंभवतीतियत्स्वानांसंकटंतद्वीक्ष्यतदर्थस्यतदनुगमनलक्षणप्रयोजनस्यगौरवंगुरुप्रसादेनस्वकुलाभिवृद्धिलक्षणमस्तीति मनसानिश्चित्यस्त्रीसहस्रेणपरिवृतातथाकरिष्यामीतिपितरमुक्त्वादेवयानींदासीवत्पर्यचरत् २९ उशनासुतांदेवयानींनाहुषायनहुषपुत्रायययातयेशर्मिष्ठयासहदत्त्वातंराजानमाह किमाह क्वचिद पिशर्मिष्ठांतल्पेशयनीयस्थानेमाधाःधृतांमाकार्षीः मिथुनीभावंनकुर्वित्यर्थः ३० औशनसींदेवयानींकार्यमालोच्यरहस्येकांतेसख्याःपतितमेवययातिमेवऋतुकालेवव्रे ३१ अपत्येसंतानार्थेराजपुत्र्याश र्मिष्ठयाप्रार्थितोधर्मवित्तद्धर्मज्ञः नकांचनपरिहरेत्तद्व्रतमितिश्रुतेः स्वयमागतांपरिहर्तुमशक्यंचेतियर्मंचावेक्ष्यशुक्रवचःस्मरन्नपिकालेदिष्टमेवदैवमेवात्रकारणमितिनिश्चित्याभ्यपद्यत तामितिशेषः ३२

३३ आसुर्याः शर्मिष्ठायां ३४ ३५ हेस्त्रीकामअनृतपुरुष असत्यवादिपुरुष ज्ञानीपुरुषोनेतिवा त्वांजराविशतइतिलट्लोडर्थे जरात्वामाविशतामिति शापमदादित्यर्थः ३६ तेतवदुहितरिकामा नांशब्दादिविषयाणांस्मरणेनातृप्तोस्मि अलंबुद्धिनप्राप्तोस्मि स्मृतौवृत्तेनिषेधेस्मस्वःस्वर्गपरलोकयोरिति अतएवमनुग्रहःकर्तव्यइत्याह व्यत्यस्येति योमह्यंवयोभिदास्यतितस्मिन्नेतांजरांव्यत्यस्थसं क्रमय्य तद्वयसायथाकामंभुंजइति ३७ तर्हितथास्त्वितिलब्धव्यवस्थानोययातिर्ज्येष्ठपुत्रमुवाच प्रतीच्छगृहाण ३८ मातामहेनशुक्रेणकृतांरंस्येसुरतमनुभवा.मि ३९ कुतोनोत्सहइतितत्रा

यदुंचतुर्वसुंचैवदेवयानीव्यजायत ॥ द्रुह्यंचानुंचपूरुंचशर्मिष्ठावार्षपर्वणी ३३ गर्भसंभवमासुर्याभर्तुर्विज्ञायभामिनी ॥ देवयानीपितुर्गेहंययौक्रोधविमू र्छिता ३४ प्रियामनुगतःकामीवचोभिरभिमंत्रयन् ॥ नप्रसादयितुंशेकेपादसंवाहनादिभिः ३५ शुक्रस्तमाहकुपितःस्त्रीकामानृतपूरुष ॥ त्वांजराविशते मंदीवरूपकरणीनृणाम् ३६ ययातिरुवाच ॥ अतृप्तोस्म्यद्यकामानांब्रह्मन्दुहितरिस्मते ॥ व्यत्यस्यैतांयथाकामंवयसायोभिधास्यति ३७ श्रीशुकउ वाच ॥ इतिलब्धव्यवस्थानःपुत्रंज्येष्ठमवोचत ॥यदोतातप्रतीच्छेमांजरांदेहिनिजंवयः ३८ मातामहकृतांवत्सनतृप्तोविषयेष्वहम् ॥ वयसाभवदीयेनरंस्येकतिपयाःसमाः ३९ यदुरुवाच ॥ नोत्सहेजरयास्थातुमंतराप्राप्तयातव ॥ अविदित्वासुखंग्राम्यंवैतृष्ण्यंनैतिपूरुषः ४० तुर्वसुश्चोदितःपित्राद्रुह्युश्चा नुश्चभारत ॥ प्रत्याचख्युरधर्मज्ञाह्यनित्येनित्यबुद्धयः ४१ अपृच्छत्तनयंपुत्रंवयसोनंगुणाधिकम् ॥ नत्वमग्रजवद्वत्समांप्रत्याख्यातुमर्हसि ४२ पूरुरुवा वाच ॥ कोनुलोकेमनुष्येंद्रपितुरात्मकृतःपुमान् ॥ प्रतिहर्तुंक्षमोयस्यप्रसादाद्वंदतेपरम् ४३ उत्तमश्लोकतंकुर्यात्प्रोक्तकारीतुमध्यमः ॥ अधमोऽश्रद्ध याकुर्यादकर्त्तोच्चरितंपितुः ४४ इतिप्रमुदितःपूरुःप्रत्यगृह्णाज्जरांपितुः ॥ सोपितद्वयसाकामान्यथावज्जुजुषेनृपः ४५ सप्तद्वीपपतिःसम्यक्पितृवत्पालयन्प्र जाः ॥ यथोपजोषंविषयान्जुजोषाव्याहतेंद्रियः ४६ देवयान्यप्यनुदिनंमनोवाग्देहवस्तुभिः ॥ प्रेयसःपरमांप्रीतिमुवाहप्रेयसींरहः ४७ अयजद्यज्ञपुरु षंक्रतुभिर्भूरिदक्षिणैः ॥ सर्वदेवमयंदेवंसर्ववेदमयंहरिम् ४८ यस्मिन्निदंविचरितंव्योम्नीवजलदावलिः ॥ नानेवभातिनाभातिस्वप्नमायामनोरथः ४९ तमे वह्रदिविन्यस्यवासुदेवंगुहाशयम् ॥ नारायणमणीयांसंनिराशीरजयत्प्रभुः ५० एवंवर्षसहस्राणिमनःषष्ठैर्मनःसुखम् ॥ विदधानोपिनातृप्यत्सार्वभौमः कदिंद्रियै ५१ इतिश्रीभागवतेनवमस्कंधेययातिचरितेपंचदशोध्यायः ॥ १५ ॥ ॥ ॥ ७ ॥ ॥ ७ ॥

इ अविदित्वेति अविदित्वा अननुभूय वैतृष्ण्यंवैराग्यं ४० प्रत्याचख्युःनिराकृतवंतःअनित्येक्षणभंगुरे ४१ वयसोनंकनिष्ठंमयाल्पम् ४२ आत्मकृतःशरीरोत्पादनकर्तुः परंलोकं ४३ उच्चरि तंमुदनिर्गतंमलम् ४४ जुजुषेनुभुजे ४५ यथोपजोषंयथासुखम् ४६ प्रेयसःभर्तुः ४७ ४८ स्वप्नमायामनोरथवदनित्यफलमस्वतंत्रंच ४९ निराशीःकृच्छ्रचांद्रायणादितपोभिलाषरहितः ५० कदिंद्रियैःदुष्टेंद्रियैः ५१ इतिश्रीभागवतेनवतस्कंधेविजयध्वजकृतटीकायांपंचदशोध्यायः ॥ १५ ॥

अन्यापदेशेनरववृत्तांतंशिक्षाकरणत्वेनस्वभार्यायैकथयति सइत्थमिति स्त्रैणःस्त्रीजितःसययातीरत्थंआत्मज्ञाननाशहतून्कामान्विषयान्आचरन्भुजानःआत्मनापह्नवानस्यपुत्रहानलक्षणंगर्हितं
ज्ञायनिर्विण्णोविरक्तएतांवक्ष्यमाणत्वेनबुद्धिसन्निहितांगाथाम् स्वकीयवृत्तांतरूपामगायतेत्यन्वयः १ मार्गविभृगुकुलजाते मद्विधैःमादृशैःस्त्रीजितैःपुरुषैःआचरितांवनेधीराःनिवृत्तिमार्गलक्षणेस्थिराः
मुक्तसंगाःज्ञानिनोयस्यग्रामवासिनोगृहस्थस्याचरणमनुशोचंति अहोलोकस्यमौढ्यमितिपरिखिन्नाभवंतीत्यर्थः तस्यममसदृशैराचरितामित्यर्थः २ बस्तोऽजःप्रियंस्त्रीजनंकूपेसंसारलक्षणे अत्रा
जशब्देनप्रकृतिपुरुषावुपलक्ष्येते ३ तीर्थेकूपजलेअवतारस्थलेवा निर्वर्त्यकिंचिदवतीर्यविषाणाग्रेणोद्धृत्यरोधसिकूपतीरेन्यधत्तामितिशेषः तीर्थमंत्राद्युपाध्यायेशास्त्रेष्वंभसिपावने पात्रोपायाव
तारेषुस्त्रीपुष्पयोनियज्ञयोरितियादवः उपायंवानिर्वर्त्यउद्धरणोपायंद्रष्ट्वेत्यर्थः ४ कांतविषयःकामोयासामस्तीतिकांतकामिन्यःश्मश्रुलंबहुलश्मयुश्रुक्तं मीढ्वांसंरेतःसेकसमर्थं यावकोविदंयावान्नभक्ष
णपाटवोपेतं यावःयावकःकुल्माषःतद्भक्षणेशक्तइतिवायावःकेवलकुल्माषबलकेतोपवर्णिकेइतियामकोविदमितिपीठत्वामैथुनकुशलीमीतव्याख्यानंमीढ्वांसमित्यनेनगतार्थत्वात्पुनरुक्तता असंग्रदाय

श्रीशुकउवाच ॥ सइत्थमाचरन्कामांस्त्रैणोपह्नवमात्मनः ॥ बुध्वाप्रियायैनिर्विण्णोगाथामेतामगायत १ शृणुभार्गव्यमूंगाथांमद्विधाचरितांभुवि ॥ धीरा
यस्यानुशोचंतिवनेग्रामनिवासिनः २ बस्तएकोवनेकश्चिद्विचिन्वन्प्रियमात्मनः ॥ ददर्शकूपेपतितांस्वकर्मवशगामजाम् ३ तस्याउद्धरणोपायंबस्तःका
मीविचिंतयन् ॥ निर्वर्त्यतीर्थउद्धृत्यविषाणाग्रेणरोधसि ॥ सोत्तीर्यकूपात्सुश्रोणीतमेवचकमेकिल ४ तयावृत्तंसमुद्वीक्ष्यबह्वयोजाःकांतकामिनीः ॥
पीवानंश्मश्रुलंप्रेष्ठंमीढ्वांसंयावकोविदम् ५ सएकोजवृषस्तासांबह्वीनांरतिवर्धनः ॥ रेमेकामग्रहग्रस्तआत्मानंनाववुद्धयत ६ तमेवव्रज्यतमयारममाण
मजान्यया ॥ विलोक्यरूपसंलग्नानामृष्यद्वस्तकर्मतत् ७ तंदुर्हृदंसुहृद्रूपंकामिनंक्षणसौहृदम् ॥ इंद्रियारामभुत्सृज्यस्वामिनंदुःखितायया ८ सोपि
चानुगतःस्त्रैणःकृपणस्तांप्रसादितुम् ॥ कुर्वन्विलिबिलाकारंनाशक्नोत्पथिसंधितुम् ९ तस्यतत्रद्विजःकश्चिदजस्वाम्यच्छिनद्रुषा ॥ लंबंतंवृषणंभूयःसंद
धेर्थाययोगवित् १० संवृद्धवृषणःसोपिह्यजयाकूपलब्धया ॥ कालंबहुतिथंभद्रेकामैर्नाद्यापितुष्यति ११ तथाहंकृपणःसुभ्रुभवत्याःप्रेमयंत्रितः ॥
आत्मानंनाभिजानामिमोहितस्तवमायया १२

ज्ञाताचात्रप्रसज्येत मेजंमेषमित्यपितद्वद्भेजशब्दस्यभेषवाचित्वाश्रवणात् ५ मीढ्वांसमितिपदंविवृण्वन्नाह सएकइति ६ रूपसंलग्नारूपगुणसंपन्नाकुचसंलग्नेतिपाठेकुचभरसन्नसमध्या व्रज्यतम
यात्राप्रेयोग्यतमयाअन्ययाऽजयाएवंरममाणंतंविलोक्य बस्वस्यममतत्कर्मअन्यासक्तिलक्षणंनामृष्यदित्यन्वयः ७ अनेनात्मकटाक्षीकारेणस्वामिनंशुक्रमित्येषोर्थःसूच्यते अन्यत्राजम् ८
सोपिबस्तोपिययातिशब्दवाच्योपिविलिबिलाकारंमैथुनानुकरणलक्षणंतिर्यक्कंठोत्थितशब्दविशेषं अन्यत्तत्सीत्कारादिशब्दंचकुर्वन्संधितुंसंधानंकर्तुं तिर्यक्विलिबिलाकारोमैथुनानुकृतोरवइत्यभि
धानम् ९ अजस्वामीशुक्रःअन्यत्रप्रसिद्धः लंबंतंवृषणंउपभोगसमर्थं अच्छिनत्शस्त्रेणेतिशेषः अन्यत्रजराकरणेनपुत्रेषुजरावत्स्वाक्षेनोपायेनसंदधेभोगसामर्थ्यमापादितवान् योगवित्संधानो
पायज्ञःअन्यत्रजराव्यत्ययसनोपायकरणेन अर्थात्मैथुनलक्षणप्रयोजनाय १० अजयारममाणइतिशेषः ११ आत्मानंपरमात्मानंस्वस्वरूपंमायया विभ्रमलक्षणयासुरतवैरूप्यात्मलक्षणयावा १२

काममोहनाशविद्धस्यपुंसःनैतच्चित्रमित्याह यत्पृथिव्यामिति व्रीहियवंइत्येकवद्भावः व्रीह्यादयःमनःप्रीतिंनपूरयंतिनदुह्यंति दुहप्रपूरणइतिप्रपूरणंनामौषसोरिक्तीकरणंभांडलक्षणपात्रस्यपूर्णीकरणमित्यतःस्त्रीपुंसयोरपिकामभोगादिनालंबुद्धिर्नास्तीतिभावः १३ ननुप्रावृड्परमेनदीजलह्रासवत्कामानामुपभोगेनशांतिःस्यादितितत्राह नेति कामःतृष्णाकामानांविषय णांहविषाज्येन हविर्गव्येघृतेतोयेहेम्निकांचनचेतनइति कृष्णवर्त्माग्निः १४ नन्वेवंचेत्साधनाभावेनकदापिमुक्तिर्नस्यादितितत्राह यदेति यदासर्वभूतेषुअमंगलंपापसाधनंहिंसालक्षणंभावंस्वभाव न कुरुतेयस्तदातस्य समदृष्टेःसर्वस्यब्रह्माधीनत्वेनतत्तद्योग्यताविशिष्टवस्तुदर्शिनःपुंसःसर्वाःदिशः सुखमयंतेप्रापयंतीतिसुखमयाःसुखप्रधानावा एकस्यामपिदिश्यणुमात्रंदुःखंनास्तीत्यर्थः भावःपदार्थेसत्ताया मात्मयोनिस्वभावयोरितियादवः १५ ननुस्थाविर्यैनिराहारत्वेवाविषयतृष्णात्यागेनमुक्तिःकिंस्यादितितत्राह येति सत्यंतृष्णात्यागेमुक्तिःस्यात्सएवनास्तितस्मात्ज्ञानेनतत्सुत्यागोतस्तदेवा पाद्यमित्यर्थः शर्मकामःसुखार्थी वयसाअनशनेनवाजीर्यतोजरामाप्नुवतः १६ अविविक्तासनःएकशय्यासनः १७ स्वतोविषयतृष्णानशाम्यतीत्यत्रस्वानुभवमाह पूर्णमिति १८ अतःकिंफलित

यत्पृथिव्यांव्रीहियवंहिरण्यंपशवःस्त्रियः ॥ नदुह्यंतिमनःप्रीतिंपुंसःकामहतस्यमे १३ नजातुकामःकामानामुपभोगेनशाम्यति ॥ हविषाकृष्णवर्त्मेव भूयएवाभिवर्धते १४ यदानकुरुतेभावंसर्वभूतेष्वमंगलम् ॥ समदृष्टेस्तदापुंसःसर्वाःसुखमयादिशः १५ यादुस्त्यजादुर्मतिभिर्जीर्यतोयानजीर्यते ॥ तांतृष्णांदुःखनिवहांशर्मकामोदुतंत्यजेत् १६ मात्रास्वस्रादुहित्रावानाविविक्तासनोभवेत् ॥ बलवानिंद्रियग्रामोविद्वांसमपिकर्षति १७ पूर्णंवर्षसहस्रंमेविषयान्सेवतोसकृत् ॥ तथापिचानुसवनंतृष्णातेषूपजायते १८ तस्मादेतामहंत्यक्त्वाब्रह्मण्याधायमानसम् ॥ निर्द्वंद्वोनिरहंकारश्चरिष्यामि मृगैःसह १९ दृष्टंश्रुतमसद्बिद्धान्नानुध्यायेन्नसंविशेत् ॥ संसृतिंचात्मनाशंचतत्रविद्वान्सआत्मदृक् २० ॥ श्रीशुकउवाच ॥ इत्युक्तानाहुषोजायांतदीयंपूरवेवयः ॥ दत्वा स्वांजरसंतस्मादाददेविगतस्पृहः २१ दिशिदक्षिणपूर्वस्यांद्रुह्यंदक्षिणतोयदुम् ॥ प्रतीच्यांतुर्वसुंचक्रेउदीच्यामनुमीश्वरम् २२ भूमंडलस्यसर्वस्यपूरुमर्हत्तमंविशाम् ॥ अभिषिच्याग्रजांस्तस्यवशेस्थाप्यवनंययौ २३ आम्रेडितंवर्षपूगान्षड्वर्गंविषयेषुसः ॥ क्षणेनमुमुचेनीडंजातपक्षइवद्विजः २४ सतत्र निर्मुक्तसमस्तसंगआत्मानुभूत्याविधुतत्रिलिंगः ॥ परेमलेब्रह्मणिवासुदेवलेभेगतिंभागवतींप्रतीतः २५

मितितत्राह तस्मादिति मृगयंतेतत्त्वमितिमृगाःज्ञानिनस्तैःसहअरण्यचरैःहरिणादिभिर्वातपश्चारिण्यामीत्यर्थः १९ दृष्टश्रुतत्यागेनादृष्टाश्रुतसुखायकःकुशलःप्रयतते अरण्येकायक्लेशंविद्वानितितत्राह दृष्टमिति दृष्टंराज्यादिविभवं श्रुतं स्वर्गादिमंगलमित्युभयमसत्क्षणभंगुरंविद्वान्तन्नानुध्यायेत्तद्विषयाचिंतानकार्या नसंविशेत्भोगलक्षणप्रवेशोनकर्तव्यइत्यन्वयः कुतइतितत्राह संसृतिमिति त त्रानुध्यानसंवेशयोःसतोःसंसारंआत्मनाशंस्वरूपज्ञाननाशंविद्वान्यःसआत्मदृगात्मज्ञानीत्युच्यतइत्यन्वयः ध्यायतोविषयान्पुंसःसंगस्तेषूपजायतेइत्यादेःअनेनदृष्टश्रुतसुखस्यसदातनत्वंविद्वान्बालिशोयतोस्यदुःखोदर्कत्वज्ञानीपश्यतीतिज्ञायते २० तदीयंपूरोर्विद्यमानं २१ दक्षिणपूर्वस्यांआग्नेय्यां ईश्वरंराजानम् २२ विशांप्रजानामहर्त्तमंपूज्यतमंस्थापयित्वा २३ शब्दादिविषयेषुआम्रेडितमभ्यस्तंषडिंद्रियवर्गंमुमुचे विषयादाहृत्यभगवद्विषयंचकारेत्यर्थः आत्मानुभूत्यापरमात्मापरोक्षज्ञानेनविधुतंत्रिभिःसत्वादिकैर्गुणैर्निर्मितंलिंगमभिमानलक्षणंयस्यसतथा विध्वस्ताध्यात्मिकाधिभौतिकाधिदैविकलिंगोवाभागवतीभागवतधर्मलक्ष्यांगतिंभक्तगतस्यांप्रतीतः कोविदः २५

केचनराजर्षयोभवंति राजवंश्याःकेचनब्रह्मवंश्याश्चभवंति वंशेभवा वंश्याः १ २ ३ तस्यरौद्राश्वस्यऋतेय्वादयोदशपुत्राः ४ जगदात्मनःजगद्व्याप्तिष्ठतोमुख्यस्यप्राणस्य ५ ६ क

श्रुत्वागाथांदेवयानीमेनेप्रस्तोभमात्मनः ॥ स्त्रीपुंसोःस्नेहवैक्लव्यात्परिहासमिवोदितम् २६ सासंनिवासंसुहृदांप्रपायामिवगच्छताम् ॥ विज्ञायेश्वरतंत्राणांमायाविरचितंप्रभो २७ सर्वत्रसंगमुत्सृज्यस्वप्रौपम्येनभार्गवी ॥ कृष्णेमनःसमावेश्यव्यधुनोल्लिंगमात्मनः २८ नमस्तुभ्यंभगवतेवासुदेवाय वेधसे ॥ सर्वभूताधिवासायशांतायबृहतेनमः ॥ २९ ॥ इतिश्रीभागवतेम०नव०ययातिचरितेषोडशोध्यायः ॥ १६ ॥ श्रीशुकउवाच ॥ पूरोर्वंशंप्रवक्ष्यामियत्रजातोसिभारत ॥ यत्रराजर्षयोवंश्याब्रह्मवंश्याश्चजज्ञिरे १ जनमेजयोभूत्पूरोस्तुप्रचिन्वांस्तत्सुतःस्मृतः ॥ प्रवीरोथनमस्तुर्वैतस्माच्चारुपदोभवत् २ तस्यसुद्युरभूत्पुत्रस्तस्माद्बहुगवस्ततः ॥ शंयातिस्तस्यहयातीरौद्राश्वस्तत्सुतःस्मृतः ३ ऋतेयुस्तस्यकक्षेयुःस्थंडिलेयुःकृतेयुकः ॥ जलेयुःसंतनेयुश्च धर्मसत्यव्रतेयवः ४ दशैतेप्सरसःपुत्रावनेयुश्चावमःस्मृतः ॥ घृताच्यामिंद्रियाणीवमुख्यस्यजगदात्मनः ५ ऋतेयोरंतिनारोभूत्रयस्तस्यात्मजानृप ॥ सुमतिर्ध्रुवोप्रतिरथःकण्वोप्रतिरथात्मजः ६ तस्यमेधातिथिस्तस्मात्प्रस्कण्वाद्याद्विजातयः ॥ पुत्रोभूत्सुमतेरैम्योदुष्यंतस्तत्सुतोमतः ७ दुष्यंतोमृगयां यातःकण्वाश्रमपदंगतः ॥ तत्रासीनांस्वप्रभयामंडयंतींरमामिव ८ विलोक्यमुमुहेसद्योदेवमायामिवस्त्रियम् ॥ बभाषेतांवरारोहांभटैःकतिपयैर्वृतः ९ ॥ तद्दर्शनप्रमुदितःसन्निवृत्तपरिश्रमः ॥ पप्रच्छकामसंतप्तःप्रहसन्श्लक्ष्णयागिरा १० कात्वंकमलगर्भाभैकस्यासिहृदयंगमे ॥ किंवाचिकीर्षितं त्वत्रभवत्याविजनेवने ११ व्यक्तंराजन्यतनयांवेद्मयहंत्वांसुमध्यमे ॥ नहिचेतःपौरवाणामधर्मेरमतेक्वचित् ॥ १२ ॥ शकुंतलोवाच ॥ विश्वामित्रात्मजैवाहंत्यक्तामेनकयावने ॥ वेदैतद्भगवान्कण्वोवीरकिंकरवामते १३ आस्यतामरविंदाक्षगृह्यतामर्हणंचनः ॥ भुज्यतांसंतिनीवाराउष्यतांयदिरोचते १४ ॥ दुष्यंतउवाच ॥ उपपन्नमिदंसुभ्रुजातायाःकुशिकान्वये ॥ स्वयंहिवृणुतेराज्ञांकन्यकासदृशंवरम् १५ ॥ श्रीशुकउवाच ॥ ओमित्युक्तेयथा धर्ममुपयेमेशकुंतलाम् ॥ गांधर्वविधिनाराजादेशकालविधानवित् १६ अमोघवीर्योराजर्षिर्महिष्यांवीर्यमादधे ॥ श्वोभूतेस्वपुरंयातःकालेनामूतसासुतम् १७ कण्वःकुमारस्यवनेचक्रेसमुदिताःक्रियाः ॥ बध्वामृगेंद्रांस्तरसाक्रीडतिस्मसबालकः १८ तंदुरत्ययविक्रांतमादायप्रमदोत्तमा ॥ हरेरंशांशसंभूतंभर्तुरंतिकमागमत् १९

ण्वाद्याःराजवंश्याःप्रस्कण्वाद्याःब्रह्मवंश्याः ७ ८ ९ १० कमलगर्भाभेपद्मोदरप्रभे । हृदयंगमेसुंदरि ११ १२ १३ अर्हणंअर्घ्यादिपूजानीवाराःदेवव्रीहयःतैरापादितमन्नमितिशेषः १४ १५ ब्राह्मेराक्षसो गांधर्वइत्यादयोबहवोविवाहविधयःसंति तेषुगांधर्वविधिनास्वयंवरलक्षणेन १६ १७ समुदिताःविध्युक्ताः १८ तंकुमारं । प्रमदोत्तमाशकुंतला १९

अशरीरिणीवाक्देवीवाणीआह गुह्यभाषयाराजानमितिशेषः त्रिभाषांयोनजानातिरीतीनांशतमेवचेत्युक्तेः । पुराणेषुभाषात्रयस्यन्यायप्राप्तत्वात् २० यथाकारुस्त्रालाचुल्लीस्थिताग्निशक्त्युद्दीपकत्वेनाग्नेराधारमात्रंभस्त्राभसभक्षणदीप्त्योरितिधातोस्तथामाताभर्त्राहितंवीर्यमादायकरचरणावयवावविशिष्टदेहाकारेणपरिणामप्राप्त्यस्त्रीर्यस्यप्रथममाधारभूतत्वात्मातुःपुत्रत्वमौपचारिकं । तर्हिकस्यमुख्यपुत्रत्वमितितत्राह पितुरेवपुत्रइति । मुख्यपुत्रत्वंपितुरेव कुतइत्यत्राह यस्मादिति सपितैवपुत्रोजातइतियस्मात्तस्मात्सपुत्रःपितुरेवेत्यर्थः । आत्मावैपुत्रनामासीतिश्रुतेः । तज्जायाजाया भवतियदस्यांजायतेपुनःइतिच । पुत्रदेहस्यापिपितृदेहैकदेशस्योपादानत्वद्योतनायपितुरित्युक्तं । अन्यथापितापुत्रइतिप्रयोगस्यापिसंभवात् । प्रकृतेकिमपेक्षितमितितत्राह भरस्वेति । भरस्वस्वीकुरु अन्यपुत्रंकथंस्वीकरोमीत्यतउक्तं दौष्यंतिमितिऔरसंपुत्रमित्यर्थः । अतःशकुंतलास्वैरिणीतिभावमंस्थाःअवज्ञातांनकुरु २१ ननुपुत्रेणममकिंप्रयोजनंस्याद्येनभार्यास्यादितितत्राह रेतोधाइति पुत्रंपुत्रः रेतोधाःरेतोधातारंपितरंयमक्षयंयोऽक्षयोऽनंतोलोकस्तंवैकुंठादिकंनयतिप्रापयति । यस्मात्पुत्रमनुशिष्टंलोकमाहुस्तस्मादेनमनुशासतीतिहिश्रुतिः । नरदेवदुष्यंत दौष्यंतिंपुत्रंस्वीकुर्वितिशेषः । मयानाहितगर्भजातंपुत्रंकथंदौष्यंतिमितिवदतीतितत्राहत्वंचेति । चशब्दएवार्थे त्वमेवास्यगर्भस्यधाताआधानकर्ता । कआहेतितत्राह सत्यमिति । शकुंतलासत्यंयथार्थमेव नानृतमाह । यःपुत्रःस्वरेतोधातारमक्षयंनयतीतिवा सुप्तिङुपग्रहलिंगनराणामितिसूत्राद्व्यत्ययोयुक्तः । अथवास्वीकारेणानर्थमाह रेतोधाइति । रेतोधाभवान्पुत्रंयमक्षयंमृत्युलोकंनयतिमृतप्रायंकरोति अस्वीकारात् । तेनसत्पुत्रहत्यादोषप्राप्तिस्तवस्यादतस्तद्भयादपिस्वीकुर्वित्यर्थः । ननुनाहंरेतोधाइतिनेत्याह त्वंचेति । अथवातदुक्तंश्रुत्वास्वीकरोमिकिमतइत्यतस्तल्लक्षणमाह रेतोधाइति । यमयतिशिक्षयतिशिष्यमितियमो

यदानजगृहेराजाभार्यापुत्रावनिंदितौ ॥ शृण्वतांसर्वभूतानांखेवागाहाशरीरिणी २० माताभस्त्रापितुःपुत्रोयस्माज्जातःसएवसः ॥ भरस्वपुत्रंदौष्यंतिमावमंस्थाःशकुंतलाम् २१ रेतोधाःपुत्रंनयतिनरदेवयमक्षयम् ॥ त्वंचास्यधातागर्भस्यसत्यमाहशकुंतला २२ पितर्युपरतेसोभूच्चक्रवर्तीमहायशाः ॥ महिमागीयतेतस्यहरेरंशभुवोभुवि २३ चक्रंदक्षिणहस्तेस्यपद्मकोशश्चपादयोः ॥ ईजेमहाभिषेकेणसोभिषिक्तोधिराट्प्रभुः २४ पंचपंचाशतैर्मेध्यैर्गंगायामनुवाजिभिः ॥ दीर्घतमसंपुरोधाययमुनायामनुप्रभुः २५ अष्टसप्ततिमेध्याश्वान्बबंधप्रददेवसु ॥ भरतस्यहिदौष्यंतेरग्निःसाचीगुणेचितः २६

गुरुःक्षिनिवासगत्योरितिक्षयोनिवासः । रेतोधाःपुत्रंगुरुनिवासंनयतीतिन्यायात् भवानपिपुत्रंस्वीकृत्यगुरुकुलवासंप्राप्यनयतिन्यायशास्त्रादिविशारदंकरोतीत्यर्थः । त्वत्पुत्रत्वसंशयोमाभूदित्याह त्वंचेति । अथवारेतोधाःअक्षयमगतिंमनन्याधारंयंपुत्रंनयतिस्वाश्रयंकरोति । सपुत्रःतंरेतोधातारंअक्षयंलोकंनयतिअनन्याधारत्वेहेतुगर्भविशेषणमाह त्वंचेति । अस्यसर्वस्यप्रमाणंशकुंतलावचनमित्याह सत्यमिति । द्वितीयाचप्रथमेत्यनुवर्ततेद्वितीयाविभक्तिःसप्तसुवर्ततइतिद्वितीयायाःप्रथमात्वसंभवात्पुत्रमित्यादेःप्रथमात्वंसप्रामाणिकं रेतोधाइत्यस्याद्वितीयात्वंचेत्यर्थः । माताभस्त्रेतिलुप्तोपमं हिरण्यधान्यादिग्राहिणीपात्रीभस्त्रानामयथा तथाभर्तुराहितवीर्यधारिणीमातापुत्रस्यद्वारमात्रंपितृवीर्यात्मकत्वात्पितुरेवपुत्रइतिवायोजनाशेषःपूर्ववत् २२ पितरिदुष्यंतेउपरतेमृतेसति । सदुष्यंतपुत्रः भरस्वेत्युक्तत्वात्भरतोभरेणहरिणाततत्वाद्वाभूमेर्भरंभरणंतनोतीतिवाशुभरतत्वाच्चगुरुत्वलक्षणभारेणततत्वाद्वा चक्रवर्तीआज्ञयैवधर्माधर्मशास्तभूदित्यन्वयः २३ नाम्नामहाभिषेकेणाभिषिक्तइतिवा २४ कोमहाभिषेकोनामयज्ञइत्यतस्तत्स्वरूपमाह पंचेति । गंगायामनुसभीपतीरेपंचपंचाशतैःपंचभिःपंचाशताचदीर्घतमसंपुरोधायपुरोहितंकृत्वाप्रभुरुत्तमकल्पेनयष्टुंसमर्थः । पुनर्यमुनायांअनुतीरेअष्टसप्ततिमेध्याश्वान्बबंध तदादक्षिणांवसुधाराशिमेवप्रददौ । भरतस्येदंचसामर्थ्यमाह भरतस्येति । कैकेयीपुत्रव्यावृत्त्यर्थं दौष्यंतेरिति । भरतस्ययज्ञेअग्निरग्रभागनेतृत्वादग्निनामा साचीगुणेचितः सचिवगुणेकृतः । साचिव्यंकृतवानित्यर्थः २५ २६

सहस्रंद्वंद्वशोयस्मिन्ब्राह्मणागाविभेजिरे ॥ त्रयस्त्रिंशच्छतंह्यश्वान्बध्वाविस्मापयन्नृपान् ॥ दौष्यंतिरत्यागान्मायांदेवानांपुरुमायया २७ मृगांश्छुक्लदतःकृष्णा
न्हिरण्येनपरिष्कृतान् ॥ अदात्कर्मणिमष्णारेनियुतानिचतुर्दश २८ भरतस्यमहत्कर्मनपूर्वेना परेनृपाः ॥ नोदायुर्नैवप्राप्स्यंतिबाहुभ्यांत्रिदिवंयथा
२९ किरातहूणान्यवनानंध्रान्कंकान्कषांश्छकान् ॥ अब्रह्मण्यान्नृपांश्चाहन्म्लेच्छान्दिग्विजयेऽखिलान् ३० जित्वापुरासुरान्देवायेनस्वौकांसिभेजिरे
॥ देवस्त्रियोरसानीताःपाणिभिःपुनराहरत् ३१ सर्वकामान्दुदुहतुःप्रजानांतस्यरोदसी ॥ समास्त्रिनवसाहस्रीर्दिक्षुचक्रमवर्तयत् ३२ ससम्राट्लोकपाला
नामैश्वर्यमधिराट्श्रियम् ॥ चक्रंवास्खलितंप्राणान्मृषेत्युपरराम ह ३३ तस्यासन्नृपवैदर्भ्यःपत्न्यस्तिस्रःसुसंमताः ॥ जघ्नुस्त्यागभयात्पुत्रान्नानुरूपाइ
तीरिते ३४ तस्यैवंवितथेवंशेतदर्थंयजतःसुतम् ॥ मरुत्स्तोमेनमरुतोभरद्वाजमुपाददुः ३५ अंतर्वत्न्याभ्रातृपत्न्यामैथुनायबृहस्पतिः ॥ प्रवृत्तोवारितो
गर्भंशप्त्वावीर्यमवासृजत् ३६ तंत्यक्तुकामांममतांभर्तुस्त्यागविशंकिताम् ॥ नामनिर्वचनंतस्यश्लोकमेतंजगुःसुराः ३७ मूढेभरद्वाजमिमंभरद्वाजंबृह
स्पतेः ॥ त्रातातुदुःखात्पितरौभरद्वाजस्ततस्त्वयम् ३८

यात्पुत्रांस्तान्जघ्नुरित्यन्वयः ३४ नन्वेवंचेद्भरतस्यपुत्राभावेनपरलोकक्षेमाभावःप्रसक्तइतित्राह तस्येति । तस्यवंशेएवंवितथेउत्सन्नेसतिअनुरूपवंशवर्धनेनपुत्रेणभाव्यमिति तदर्थपुत्रार्थंनाम्नामरुत्स्तो
मेनमरुद्विषययज्ञेनयजतस्तस्यभरतस्यमरुतोनामदेवाः गुणनिमित्तेननाम्नाभरद्वाजंसुतमुपाददुःपुत्रत्वेनदत्तवंतः ३५ कस्मादस्यभरद्वाजाख्यंयेनतन्नामयुक्तःस्यादतस्तज्ज्ञापनायतदुत्पत्तिप्रकारमाह
अंतर्वत्न्येति । बृहस्पतेर्भ्रातुरुतथ्यस्यपत्न्याअंतर्वत्न्याउतथ्याहितशुक्रंधानयानाम्नाममतयाअंतर्गर्भिणीतिनिवारितोपिमैथुनायप्रवृत्तोबृहस्पतिरंधोभवेदितिगर्भशप्त्वाधिकृत्यस्ववीर्यंतस्यांममतायामह
जत् अथादित्यन्वयः ३६ ततःकिमभूदितितत्राह तमिति । तंबृहस्पतिगर्भंत्यक्तुकामां किमर्थंउचथ्याख्यभर्तृत्यागशंकितांममतांप्रतितस्यसुतस्यनाम्नोनिर्वचनं । येनज्ञायतेसतथातंश्लोकंसुराजगुरि
त्यन्वयः ३७ भोमूढेइमंद्वाजंभर भृभरणइतिधातुः नत्यजउचथ्यस्यक्षेत्रजंबृहस्पतेर्जातमितिद्वयोःउचथ्यक्षेत्रबृहस्पत्योर्जातत्वात् द्वाजमितिभरद्वाजनामानं । क्रियापदस्यसुबंतपदसायुज्येननामत्वंस्कंद
धरइत्यादौद्रष्टव्यं धरस्कंधेत्यर्थोपपत्तेः । पुरीमवस्कंदलुनीहिनंदनंमुषागरत्नानिहरामरांगनाइतिदर्शनात् । स्कंदगतिशोषणपोरितियातोः तदुक्तं द्वाजांममंभरउचथ्यस्यक्षेत्रजोबृहस्पतेर्जातइतिद्वयोर्जा

तत्वात्द्वाजइति । यश्चबृहस्पतेर्वाजंप्रजार्थंसंततिंभरद्वरणशीलश्चइतिवा बृहस्पतेर्निमित्ताद्भरद्वाजंप्रजासंततिंभरन् । भरंश्चासौबृहस्पतेर्वाजश्चेतिविग्रहः । भरतेःशविकरणत्वादभ्यासाभावः पितरौदुःखा भरत्भर्त्राऽत्राता बृहस्पतेर्वाजतोवाजः । वाशब्दस्यपूर्वनिपातोज्ञातव्यः । यथाबृस्पतेर्जातःतथोचथ्यादपीत्यर्थः ततःपितृभर्तृत्वात्बृहस्पतेर्वाजत्वादयंभरद्वाजइति तदुक्तं बृहस्पतेर्वाजःप्रजासंततिर्येनभृताऽत्र बृहस्पतेर्भरद्वाजइति ३८ सामप्रमतासुरैरेवंचोद्यमानाभरेतिप्रेर्यमाणापितमात्मजंदेवंबृहस्पतिंपुत्रात्मनाजातंमत्वाभर्तृत्यागशंकयातमात्माजंव्यसृजत् । ततोदेवाद्वाजंकिमकुर्वन्नितितत्राह मरुतइति मरुतो देवास्तंद्वाजंगर्भमाबिभ्रन्भृतवंतइतिभरद्वाजः । तदुक्तं भरद्वाजोमरुद्भिश्चभृतोजातोद्वयोर्यतइतिममतायावाजंगर्तंसृतंगर्भंमरुतोऽभरन्नित्यतोवाभरद्वाजइत्येषोर्थोप्यवबोद्धव्यः भृत्वाकिंकृतंतैरितितत्राह दत्तइति भरतस्यान्वयेवितथेसति मरुद्भिरयंभरतायदत्तःपुत्रत्वेनेतिशेषःअस्यभरतपुत्रत्वानंतरंवितथेतिनामांतरमपिज्ञातव्यं वितथस्यसुतान्मन्योरित्युत्तरचनाच्चेति ॥ ४० ॥ इतिश्रीभागवते महापुराणेनवमस्कंधेविजयध्वज कृतटीकायांसप्तदशोध्यायः ॥ १७ ॥ ॥ ॥ ७ ॥ पूरोःसप्तदशमोदौष्यंतिःतस्यान्वयःकथ्यते वितथस्येत्यादिना ॥ १ ॥ भरताद्दशमोरंतिदेवःतस्यम हात्म्यंभगवन्म हिमोपीचतत्वात्कथयतिरंतिदेवस्येत्यादिना । चशब्दोदौष्यंतिमाहिन्नासमुच्चीयते २ कीदृशंयशःशत्रुविजयाल्लब्धमुतास्मादितिसंशयंनिवारयतिवीतवित्तस्येति । वीतवित्तस्यवस्तु

चोद्यमानासुरैरेवंमत्वातंदेवमात्मजम् ॥ व्यसृजन्मरुतोबिभ्रन्दत्तोयं वितथेऽन्वये ३९ इतिश्रीभा०नवमस्कंधेपुरुवंशानुकीर्तनंनामसप्तदशोध्यायः॥१७॥
श्रीशुकउवाच ॥ वितथस्यसुतान्मन्योर्बृहत्क्षेत्रोजयस्ततः ॥ महावीर्योनरोगर्गःसंकृतिस्तुनरात्मजः १ गुरुश्चरंतिदेवश्चसंकृतेःपांडुनंदन ॥ रंतिदेवस्य हियशइहामुत्रचगीयते २ वीतवित्तस्यददतोलब्धंलब्धंबुभुक्षतः ॥ निष्किंचनस्यधीरस्यसकुटुंबस्यसीदतः ३ व्यतीयुरष्टचत्वारिंशदहान्यपिबतःकिल॥ घृतपायससंयावंतोयंप्रातरुपस्थितम् ४ कृच्छ्रप्राप्तकुटुंबस्यक्षुत्तृड्भ्यांजातेवपथोः ॥ अतिथिर्ब्राह्मणःकालेभोक्तुकामस्यचागमत् ५ तस्मैसंव्यभजत्सोन्नमादृत्यश्रद्धयान्वितः ॥ हरिंसर्वत्रसंपश्यन्सभुक्त्वाप्रययौद्विजः ६ अथान्योभोक्ष्यमाणस्यविभक्तस्यमहीपतेः ॥ विभक्तंव्यभजत्तस्मैवृषलायहरिंस्मरन् ७ यातेशूद्रेतमभ्यागादतिथिःश्वभिरावृतः ॥ राजन्मेदीयतामन्नंसगणायबुभुक्षते ८ सआतिथ्यावशिष्टंयद्बहुमानपुरःसरम् ॥ तच्चदत्त्वानमश्चक्रेश्वभ्यःश्वपतयेविभुः ९ पानीयमात्रमुच्छेषंतच्चैकपरितर्पणम् ॥ पास्यतःपुल्कसोभ्यागादपोदेह्यशुभस्यमे १० तस्यातिकरुणांवाचंनिशम्यविपुलश्रमाम् ॥ कृपयाभृशसंतप्तइदमाहामृतंवचः ११

शून्यस्यदरिद्रस्येत्यर्थः धनाभावेदानंकथंघटतइतितत्राह लब्धमिति । स्वयंबुभुक्षाभावाद्दातिनतुकर्त्तव्यत्वेनेतितत्राह बुभुक्षतइति । भोगेच्छुश्चेत्संस्वःअन्यथातदसंभवादितितत्राह निष्किंचनस्येति तर्हिभिक्षुवत्कृपणइत्यतोवाहनिष्किंचनस्येतिअकृपणस्यकथमवगतंतादितितत्राह धीरस्योति असद्विषयचिंतानास्तीत्यतोवाह धीरस्योति । धियासहरमतेनतुस्त्रियेतिधीरस्तस्यएकाकिनःकाचिंताइति तत्राह सकुटुंबस्येति । अतएवसीदतः विभ्यतःशीर्णस्यवा ३ शीर्णत्वेनिमित्तमाह अपिबतइति घृतंचपायसंचगोधूमान्नंचघृतपायससंयावम् । प्रातरुपस्थितंप्राप्तमेतद्भोक्तुकामस्य कालेभोजनसमये ४ ५ आहृत्य आनीय सर्वत्रव्याप्तं । ब्राह्मणायविभक्तस्यान्नस्यशेषंभोक्ष्यमाणस्यभोक्तुकामस्य । महीपतेरन्योतिथिरागमत् । पूर्वंविभक्तमन्नंसगणायगणसहितायनमश्चक्रेहरयेइतिशेषः ६ ७ ८ ९ घृतादिकंदत्वापानीय मात्रमुच्छेषमवशिष्टंतदपिएकपरितर्पणं एकस्यतृप्तिकरंनतुबहूनांपास्यतःपातुकामस्यपुल्कसोगोमांसभक्षकः १० ११

महर्द्धियुक्तां अगणितसमृद्धिसंपन्नांयोगेश्वराणांगतिमणिमादिलक्षणांमहरादिलोकंवा नकामयेनवांछामिअपुनर्भवंमोक्षंवा तत्रैकास्मन्काक्षाइततत्राह आर्तामात । यनदहमाजामयापतजलपानाय१५
नाक्षुधादिनिमित्तदुःखरहिताभवंतिये तेनतेषामंतस्थितामार्तिंमहं प्रपद्येइत्यन्वयः येनजलेनादुःखाःतत्तेभ्योदत्वातदार्तिमद्याहंप्रपद्यइतिवा १२ एवंभाषणमात्रेणाकिंफलमितित्राह क्षुत्तृडिति कृप
णस्यजंतोर्जीवस्यजलार्पणेनजीवनप्रदजलदानेनसर्वेषांसुखंस्यात्तदार्तिर्ममास्त्विति जिजीविषोर्जीवितुमिच्छतःपुंसःक्षुत्तृडादयोनिवृत्ताभवंतीत्यन्वयः अनेनक्षुदादिमतः पुंसाजलादिदानेनदातुरपि
तन्निवृत्तिस्तददानेतदनिवृत्तिरित्यन्वयव्यतिरेकौद्रष्टव्यौ १३ पिपासयाम्रियमाणः १४ आत्मानं मायांमहिमोपेतं । महिमापिभगवदनुग्रहविजृंभितइत्याह विष्ण्वाविति १५ १६ ईश्वरालंबनंश्रीना

नकामयेहंगतिमीश्वराणांमहर्द्धियुक्तामपुनर्भवंच ॥ आर्तिंप्रपद्येऽखिलदेहभाजामंतस्थितांयेनभवंत्यदुःखाः १२ क्षुत्तृट्श्रमोगात्रपरिश्रमश्चदैन्यंक्लमः
शोकविषादमोहाः ॥ सर्वेनिवृत्ताःकृपणस्यजंतोर्जिजीविषोर्जीवजलार्पणेन १३ एवंप्रभाष्यपानीयंम्रियमाणःपिपासया ॥ पुल्कसायाददाद्धीरोनिसर्ग
करुणोनृपः १४ तस्यत्रिभुवनाधीशाःफलदाःफलमिच्छताम् ॥ आत्मानंदर्शयांचक्रुर्मायांविष्णुविनिर्मिताम् १५ सवैतेभ्योनमस्कृत्यनिःसंगोविगत
स्पृहः ॥ वासुदेवेभगवतिभक्त्याचक्रेमनःपरम् १६ ईश्वरालंबनंचित्तंकुर्वतोऽनन्यराधसः ॥ मायागुणमयीराजन्स्वप्नवत्प्रत्यलीयत १७ तत्प्रसंगानु
भावेनरंतिदेवानुवर्तिनः ॥ अभवन्योगिनःसर्वेनारायणपरायणाः १८ गर्गाच्छिनिस्ततोगार्ग्यात्क्षत्राद्ब्रह्मह्यवर्तत ॥ दुरितक्षयोमहावीर्यात्तस्यत्रैय्यारु
णिःकविः ॥ पुष्करारुणिरित्यत्रयेब्राह्मणगतिंगताः १९ बृहत्क्षत्रस्यहोत्रोस्माद्धस्तीयद्धस्तिनापुरम् २० अजमीढोद्विमीढश्चपुरुमीढश्चहस्तिनः ॥ अज
मीढस्यवंश्याःस्युःप्रियमेधादयोद्विजाः २१अजमीढाद्बृहदिषुस्तस्यपुत्रोबृहद्धनुः ॥ बृहत्कायस्ततस्तस्यपुत्रआसीद्बृहद्रथः २२तत्सुतोविशदस्तस्यश्येनजि
त्समजायत ॥ रुचिराश्वोदृढहनुःकाश्योवत्सश्चतत्सुताः २३ रुचिराश्वसुतोयाजःपृथुसेनस्तदात्मजः ॥ पारस्तत्तनयोनीपस्तस्यपुत्रशतंत्वभूत् २४ अणुहो
नामयस्तेषांज्येष्ठोवैसत्यकोनृप ॥ संकृत्व्यांशुककन्यायांब्रह्मदत्तमजीजनत् २५ योगेशोगविभार्यायांविष्वक्सेनमधात्सुतम् ॥ जैगीषव्योपदेशेनयोगतंत्रं
चकारह २६ उदक्सेनस्ततस्तस्माद्भल्लादोबार्हदीषवः ॥ यवीनरोद्विमीढस्यकृतिमांस्तत्सुतस्ततः २७ नाम्नासत्यधृतिर्यस्माद्दृढनेमिःसुपार्श्वकृत् ॥ सु
पार्श्वात्सुमतिस्तस्यपुत्रःसंततिमांस्ततः २८ कृतिर्हिरण्यनाभाद्योयोगंप्राप्यजगौद्विषट् ॥ सांहिताःप्राच्यसाम्नांवैनीपोह्यौग्रायुधस्ततः २९

रायणविषयंअनन्यराधसःभगवत्सिद्धिमंतरेणान्यसिद्धिशून्यस्यतदेकनिष्ठस्येत्यर्थः । अन्यस्माद्राधःसिद्धिर्मुक्तिःतयारहितस्यभगवतएवापेक्षिताशेषपुरुषार्थवतः प्रत्यलीयतनष्टाभूत् मायासंसाराख्या १७
तस्यरंतिदेवस्यप्रसंगःकथालक्षणःतस्यानुभावेनभावसूचकेन अनुभावःप्रभावेस्याब्रिश्वपेभावसूचकइतियादवः १८ ब्रह्मब्राह्मणकुलं नाम्नादुरितक्षय.तस्यत्रैय्यारुणिःकविःपुष्करारुणिश्चेतित्रयः पुत्राः
ये तेअत्रक्षत्रवंशेब्राह्मणगतिंब्राह्मणरूपतांगताः १९ भरतप्रपौत्रस्यबृहत्क्षत्रस्यवंशांतरमाह बृहत्क्षत्रस्येति नाम्नाहस्ती । यच्चेनतहस्तिनापुरंकृतमितिशेषः २० २१ २२ २३ २४ २५ २६
२७ २८ प्राच्यसाम्नाद्वादशसंहिताः जगौ २९

३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ ॥ इतिश्रीभागवतेमहापुराणेनवमस्कंधेविजयध्वजकृतटीकायांअष्टादशोऽध्यायः ॥ १८ ॥ ॥ ७ ॥ ॥ अहल्यासंततिंप्रोच्यदिवोदाससंततिंकथयति मित्रायुरिति १ २ अजमीढसुतोयोऽन्योबृहदिषोरितिशेषः अन्यस्यांभार्यायांजातःनाम्नाऋक्षः ऋक्षाज्जातःसंवरणोनाम ३ ४ ५ ६ ७ जरयाराक्षस्या ८ जाह्नवःजह्नोःपुत्रः ९ १० ११ १२ अप्यक्षरसाम्यान्निर्ब्रूयान्नवाएकेनाक्षरेणछंदांसिवियंतीत्यतः शंतनुशब्दंनिर्वक्ति यंयमिति यस्यसंस्पर्शंतनोतिकराभ्यामितिशेषःशंतनुंसुतनुंयुवानंनयतीति शंतनुंशंतंशांतंनयतिप्रापयतीतिवा १३

तस्यक्षेम्यःसुवीरोथसुवीरस्यरिपुंजयः ॥ ततोबहुतिथोनामपुरुमीढोप्रजोभवत् ३० नलिन्यामजमीढस्यनीलःशांतिस्तुतत्सुतः ॥ शांतेःसुशांतिस्तत्पुत्रः पुराजोर्कस्ततोभवत् ३१ हर्म्याश्वस्तत्सुतस्तस्यपंचासन्मुद्गलादयः ॥ यवीनरोबृहदिषुःकांपिल्यःसंजयस्ततः ३२ हर्म्याश्वःप्राहपुत्रामेपंचानांरक्षणायहि ॥ विषयाणामलमिमेइतिपंचालसंज्ञिताः ३३ मुद्गलाद्ब्रह्मनिर्वृत्तंगोत्रंमौद्गल्यसंज्ञितम् ॥ मिथुनंमुद्गलाच्चार्याद्दिवोदासःपुमानभूत् ३४ अहल्याकन्यकायस्यांशतानंदस्तुगौतमात् ॥ तस्यशतधृतिःपुत्रोधनुर्वेदविशारदः ३५ शरद्वांस्तत्सुतोयस्मादुर्वशीदर्शनात्किल ॥ शरस्तंबेऽपतद्रेतो मिथुनंतदभूच्छुभम् ३६ तच्छ्रुत्वाकृपयागृह्णाच्छंतनुर्मृगयांचरन् ॥ कृपःकुमारःकन्याचद्रोणपत्न्यभवत्कृपी ॥ ३७ ॥ इतिश्रीभागवतेनवमस्कंधेसोमवंशानुकीर्तनेऽष्टादशोध्यायः ॥ १८ ॥ श्रीशुकउवाच ॥ मित्रायुश्चदिवोदासाद्यवनस्तत्सुतोनृप ॥ सुदासःसहदेवोथसोमकोजंतुजन्मकृत् १ तस्यपुत्रशतंतेषांयवीयान्पृषतस्ततः ॥ द्रुपदोद्रौपदीतस्यधृष्टद्युम्नादयःसुताः २ धृष्टद्युम्नाद्धृष्टकेतुर्हर्म्याःपांचालकाइमे ॥ योऽजमीढसुतोह्यन्यऋक्षात्संवरणस्ततः ३ तपत्यांसूर्यकन्यायांकुरुक्षेत्रपतिःकुरुः ॥ परीक्षित्सुधनुर्जह्नुर्निषधाश्चःकुरोःसुताः ४ सुहोत्रोभूत्सुधनुषश्चवनस्तत्सुतःकृती ॥ वसुस्तस्योपरिचरोबृहद्रथमुखास्ततः ५ कुशांबुमत्स्यप्रत्यग्रवेदिषाद्याश्चचेदिपाः ॥ बृहद्रथात्कुशाग्रोभूदृषभस्तस्यतत्सुतः ६ जज्ञेसत्यहितोपत्यंपुष्पवांस्तत्सुतोजहुः ॥ अन्यस्यामपिभार्यायांशकलेद्वेबृहद्रथात् ७ तेमात्राबहिरुत्सृष्टेजरयाचाभिसंधिते ॥ जीवजीवेतिक्रीडंत्याजरासंधोभवत्सुतः ८ ततश्च सहदेवोभूत्सोमापिर्यच्छ्रुतश्रवाः ॥ परीक्षिदनपत्योभूत्सुरथोनामजाह्नवः ९ ततोविदूरथस्तस्मात्सार्वभौमस्ततोभवत् ॥ जयत्सेनस्तत्तनयोराची कोऽतोद्युमानभूत् १० ततश्चाक्रधनस्तस्माद्देवातिथिरमुष्यच ॥ ऋक्षस्तस्यदिलीपोभूत्प्रतीपस्तस्यचात्मजः ११ देवापिःशंतनुस्तस्यबाह्लीकइतिचात्मजाः ॥ पितृराज्यंसमुत्सृज्यदेवापिस्तुवनंगतः १२ अभवच्छंतनूराजाप्राङ्महाभिषसंज्ञितः ॥ यंयंकराभ्यांस्पृशतिजीर्णंयौवनमेतिसः १३ शांतिमाप्नोतिचैवाग्र्यांकर्मणातेनशंतनुः ॥ समाद्वादशतद्राष्ट्रेनववर्षयदाविभुः १४ शंतनुर्ब्राह्मणैरुक्तःपरिवेत्तायमग्रभुक् ॥ राज्यंदेह्यग्रजायाशुपुरराष्ट्रविवृद्धये १५

१४ दाराग्निहोत्रादियोगंयःकुरुतेऽग्रजेस्थितेसतिसपरिवेत्ता तदुक्तं दाराग्निहोत्रसंयोगंकुरुतेयोग्रजेस्थिते परिवेत्तासइत्युक्तःपरिवित्तिस्तुपूर्वजइति । अयंशंतनुरग्रभुक्अग्रजस्यदेवापेरग्रतोराज्यंभुंक्तेइतिदोषेणावर्षणमितिविज्ञायाग्रजायाशुराज्यंदेहीत्युक्तं १५

छंदयामासप्रसादयामासशंतनोःकश्चिन्मंत्रीअश्मकःविप्राण्यपुंक्तअपंदेवाःपिर्यधावेदमार्गाद्विभ्रांशितोभवातिथाकतर्व्यामिति तन्मंत्रिप्रहितैर्विप्रैर्वेदाद्विभ्रंशितःसःदेवापिःवेदवादातिवादान् वेदार्थानिंदालक्षणान्दोषान्गिराब्रवीदित्यन्वयः १६ ततःदेवापीविभ्रष्टसतिअनंतरमिंद्रदेवोवृष्टवान् योगंभगवद्ध्यानम् १७ १८ १९ रामःपरशुरामःदाशकन्यायांसत्यवत्यां २० नाम्नानिमित्तेन हतगंधर्वेणेति शेषःयस्यांदाशकन्यायां २१ कृष्णोव्यासःयतःकृष्णादिदं श्रीभागवतंअध्यगामधीतवानस्मि श्रीभागवतंस्तौति हित्वेति २२ काशिराजसुतेअंबिकांबालिकेबलाद्भीष्मेणानीते २३ यक्ष्मणाक्ष

एवमुक्तोद्विजैर्ज्येष्ठंछंदयामाससोब्रवीत् ॥ तन्मंत्रिप्रहितैर्विप्रैर्वेदाद्विभ्रंशितोगिरा १६ वेदवादातिवादान्वैततोदेवोववर्षह ॥ देवापिर्योगमास्थायकलापग्राममाश्रितः १७ सोमवंशेकलौनष्टेकृतादौस्थापयिष्यति ॥ बाह्लीकात्सोमदत्तोभूद्भूरिर्भूरिश्रवास्ततः १८ शलश्चशंतनोरासीद्गंगायांभीष्मआत्मवान् ॥ सर्वधर्मविदांश्रेष्ठोमहाभागवतःकविः १९ वीर्यूथाग्रणीर्येनरामोपियुधितोषितः ॥ शंतनोर्दाशकन्यायांजज्ञेचित्रांगदःसुतः २० विचित्रवीर्योवरजोनाम्नाचित्रांगदोहतः ॥ यस्यांपराशरात्साक्षादवतीर्णोहरेःकला २१ देवगुप्तौमुनिःकृष्णोयतोहमिवमध्यगाम् ॥ हित्वास्वशिष्यान्पैलादीन्भगवान्बादरायणः २२ मह्यंपुत्रायशांतायपरंगुह्यमिदंजगौ ॥ विचित्रवीर्योथोवाहकाशिराजसुतेबलात् २३ स्वयंवरादुपानीतेअंबिकांबालिकेउभे तयोरासक्तहृदयोगृहीतोयक्ष्मणामृतः २४ क्षेत्रेऽप्रजस्यवैभ्रातुर्मात्रोक्तोबादरायणः ॥ धृतराष्ट्रंचपांडुंचविदुरंचाप्यजीजनत् २५ गांधार्यांधृतराष्ट्रस्यजज्ञेसुतशतंनृप ॥ तेषांदुर्योधनोज्येष्ठोदुःशलाचापिकन्यका २६ शापान्मैथुनरुद्धस्यपांडोःकुंत्यांमहारथाः ॥ जाताधर्मानिलेंद्रेभ्योयुधिष्ठिरमुखास्त्रयः २७ नकुलःसहदेवश्चमाद्र्यांनासत्यदस्रयोः ॥ द्रौपद्यांपंचपंचभ्यःपुत्रास्तेपितरोभवन् २८ युधिष्ठिरात्प्रतिविंध्यःश्रुतसेनोवृकोदरात् ॥ अर्जुनाच्छ्रुतकीर्तिस्तुशतानीकस्तुनाकुलिः २९ सहदेवसुतोराजन्श्रुतकीर्तिस्तथापरे ॥ युधिष्ठिरात्तुपौरव्यांदेवकोथघटोत्कचः ३० भीमसेनाद्धिडिंबायांकालीशर्वगतंततः ॥ सहदेवात्सुहोत्रंतुविजयासूतपार्वती ३१ करेणुमत्यांनकुलोनिरमित्रंतथार्जुनः ॥ इरावंतमुलूप्यांवैसुतायांबभ्रुवाहनम् ३२ मणिपूरपतेःसोपितत्पुत्रःपुत्रिकासुतः ॥ तवतातःसुभद्रायामभिमन्युरजायत ३३ सर्वातिरथजिद्वीरउत्तरायांततोभवान् ॥ परिक्षीणेषुकुरुषुद्रौणेर्ब्रह्मास्त्रतेजसा ३४ त्वंतुकृष्णानुभावेनसजीवोमोचितोंतकात् ॥ तवेमेतनयास्तातजनमेजयपूर्वकाः ३५ श्रुतसेनोभीमसेनउग्रसेनश्चवीर्यवान् जनमेजयस्त्वांविदित्वातक्षकान्निधनंगतम् ३६

यरोगेण अग्रजस्यभ्रातुर्विचित्रवीर्यस्य विदुरंभुजिष्यायांजनयामास २४ २५ २६ मुनिशापान्मैथुनरुद्धस्यमैथुनमरणलक्षणविघ्नवतः २७ पंचपुत्राःपूर्वजन्मानीपितरः २८ विविच्याह युधिष्ठिरादिति नाकुलिःनकुलपुत्रः २९ ३० शर्वगतंशर्वभ्रातं ३१ मणिपूरपतेःसुतायां ३२ सोपिबभ्रुवाहनोपिपुत्रिकासुतात्तस्यमणिपूरपतेःपुत्रोभूदितिशेषःतवतातःतवपिता ३३ २४ ३५ निधनं मरणलक्षणम् ३६

सर्पान्वैसर्पयागाग्नौसहोष्यतिरुषान्वितः ॥ कावषेयंपुरोधायतुरंतुरगमेधया ३७ समंतात्पृथिवींसर्वांजित्वायक्ष्यतिचाध्वरैः ॥ तस्यपुत्रःशतानीको याज्ञवक्त्याद्वर्यीपठन् ३८ अस्त्रज्ञानंक्रियाज्ञानंशौनकात्परमेष्यति ॥ सहस्रानीकस्तत्पुत्रस्ततश्चैवाश्वमेधजः ३९ विस्रंभकृष्णस्तस्यापिनेमिचक्रस्तुतत्सुतः ॥ गजाह्वयेहृतेनद्याकौशाम्यांसाधुवत्स्यति ४० उक्तस्ततश्चित्ररथस्तस्माच्छुचिरथःसुतः ॥ तस्माच्चवृष्टिमांस्तस्यसुषेणोथमहीपतिः ४१ सुनीथस्तस्यभवितानृचक्षुर्यत्सुखीनलः ॥ पारिप्लवःसुतस्तस्मान्मेधावीसुनयात्मजः ४२ नृपंजयस्ततोदुर्वस्तिमित्रस्तस्माज्जनिष्यते ॥ ततोबृहद्रथस्तस्माच्छतानीकःसुदासजः ४३ शतानीकादुर्दमनस्तस्यापत्यंप्रहीतरः ॥ दंडपाणिर्निमिस्तस्यक्षेमकोभवितानृपः ४४ ब्रह्मक्षत्रस्यवैयोनिर्वंशोदेवर्षिसत्कृतः ॥ क्षेमकंप्राप्यराजानंसंस्थांप्राप्स्यतिवैकलौ ४५ पापानिकीर्तनादेषांविलयंयांतिकृत्स्नशः ॥ अथमागधराजानोभाविनोयेवदामि ते ४६ भवितासहदेवस्यसोमापिर्यत्सुतश्रवाः ॥ ततोयुतायुस्तस्यापिनिरमित्रोथतत्सुतः ४७ सुनक्षत्रःसुनक्षत्राद्बृहत्सेनोथकर्मजित् ॥ ततःश्रुतंजयोविप्रःशुचिस्तस्यभविष्यति ४८ क्षेमोथसुव्रतस्तस्माद्धर्मसूत्रःश्रमस्ततः ॥ द्रढसेनोथसुमतिःसुबलोजनितातः ४९ सुनीथःसत्यजिदथविश्वजिद्यद्रिपुंजयः ॥ बार्हद्रथाश्चभूपालाभाव्याःसाहस्रवत्सरम् ॥ ५० ॥ इतिश्रीभागवतेनवमस्कंधेसोमवंशचरितेएकोनविंशोध्यायः ॥ १९ ॥ श्रीशुकउवाच ॥ अनोःसभानरश्चक्षुःपरेक्षुश्चत्रयःसुताः ॥ सभानरात्कालनरःसंजयस्तत्सुतस्ततः १ जनमेजयस्तस्यपुत्रोमहाशीलोमहामनाः ॥ उशीनरस्तितिक्षुश्चमहामनसआत्मजौ २ शिबिर्वेनःकृमिर्दक्षश्चत्वारोशीनरात्मजाः ॥ वृषदर्भःसुवीरश्चमद्रःकैकेयआत्मजाः ३ शिबेश्चत्वारएवासंस्तितिक्षोश्चपृषद्रथः ॥ ततोहेमोथसुतपावलिःसुतपसोभवत् ४ अंगवंगकलिंगाद्याःसुह्मपुंड्रांध्रसंज्ञिताः ॥ जज्ञिरेदीर्घतपसोबलेःक्षेत्रेमहीक्षितः ५ चक्रुःस्वनाम्नाविषयान्नवडिमान्प्राच्यकानिह ॥ खनपानोंगतोजज्ञेतस्माद्दिविरथस्ततः ६ सुतोधर्मरथोयस्यजज्ञेचित्ररथोऽप्रजः ॥ रोमपादइतिख्यातस्तस्मैदशरथःसखा ७ शांतांस्ववकन्यांप्रायच्छद्दृष्यशृंगउवाहताम् ॥ देवेऽवर्षतियंरामाआनिन्युर्हरिणीसुतम् ८ वाद्यसंगीतवादित्रैर्विभ्रमालिंगनार्हणैः ॥ सतुराज्ञोनपत्यस्यनिरूप्येष्टिमरुत्वतः ९ प्रजामदाद्दशरथोयेनलेभेऽप्रजःप्रजाः ॥ चतुरंगोरोमपादात्पृथुलाक्षस्तुतत्सुतः १०

विषयसमानाऽतिज्ञायतेक्षेत्रभार्यायांमहीक्षितइत्यनेनब्राह्मणकुलंव्यावर्तयति ५ प्राच्यकान्प्राचीविषयान् । इहभुविखनपानोनाम ६ ७ अवर्षतिसतियमृष्यशृंगंहरिणीसुतामिति । अनेनऋष्यस्यरंगस्यशृंगमिवशृंगंयस्यसतथातमातिविग्रहंसूचयति ८ निरूप्यविचित्यमरुत्वतःइष्टिंइंद्रविषयामिष्टिं ९ येनइष्टिविशेषेण १०

११ १२ अपाविद्धंभज्ञातवद्विसृष्टं कानीनंकन्यायांजातम् १३ ययातिपुत्रस्यद्रुह्यावंशंनरूपयति द्रुह्योश्च १४ १५ ययातिपुत्रस्यतुर्वसावंशकथयति । तुर्वसोश्च १६ १७ सूचाकटाहन्या
येनद्रुह्यादीनांपुत्राणांवंशंकथयित्वाबहुलत्वाद्विशेषपुण्यहेतुत्वाच्चज्येष्ठपुत्रस्यय ोर्वंशंकथयति ययातेरिति १८ १९ २० २१ २२ २३ २४ २५ २६ अनष्टंअविच्छिन्नंविष्णुस्मरणं यस्यसत

बृहद्रथोबृहत्कर्माबृहद्भानुश्चतत्सुताः ॥ ततोबृहन्मनास्तस्माज्जयद्रथउदाहृतः ११ विजयस्तस्यसंभूत्यांततोधृतिरजायत ॥ ततोधृतव्रतस्तस्यसधर्मा
धिरथस्ततः १२ योसौगंगातटक्रीडन्मंजूषांतर्गतंशिशुम् ॥ कुंत्यापविद्धंकानीनमनपत्योकरोत्सुतम् १३ वृषसेनःसुतस्तस्यकर्णस्यजगतीपतेः ॥ द्रु
ह्योश्चतनयोबभ्रुःसेतुस्तस्यात्मजस्ततः १४ आरब्धस्तस्यगांधारस्तस्यधर्मस्ततोधृतः ॥ धृतस्यकर्दमस्तस्मात्प्रचेताःप्राचेतसंशतम् १५ म्लेच्छा
धिपतयोभूवन्नुदीचींदिशमाश्रिताः ॥ तुर्वसोस्तुसुतोवह्निर्वह्नेर्भर्गोथभानुमान् १६ भानुस्तत्सुतोस्यापिकरंधमउदारधीः ॥ मरुतस्तत्सुतःपुत्रःपुत्रं
पौरवमन्वभूत् १७ दुष्यंतंसपुनर्भेजेस्वयंसाम्राज्यकामुकः ॥ ययातेर्ज्येष्ठपुत्रस्ययदोर्वंशंनरर्षभ १८ वर्णयामिमहापुण्यंसर्वपापहरंनृप ॥ यदोर्वंशंनरः
श्रुत्वासर्वपापैर्विमुच्यते १९ यत्रावतीर्णोभगवान्परमात्मानराकृतिः २० यदोःसहस्रजित्क्रोष्टानलोरिपुरितिश्रुताः ॥ चत्वारःसूनवस्तस्यशतजित्प्र
थमात्मजः ॥ महाहयोवेणुहयोहैहयश्चेतितत्सुताः २१ धर्मस्तुहैहयसुतोनेत्रःकुंतेःपितातताः ॥ सोहंजिरभवत्कुंतेर्महिष्याभद्रसेनकः २२ दुर्मदोभद्र
सेनस्यधनकःकृतवीर्यकः ॥ कृत्याग्निःकृतवर्माचकृतौजाधनकात्मजाः २३ अर्जुनःकृतवीर्यस्यसप्तद्वीपेश्वरोभवत् ॥ दत्तात्रेयाद्वरंरंशात्प्राप्तयोगमहागु
णः २४ ननूनंकार्तवीर्यस्यगतिंयास्यंतिपार्थिवाः ॥ यज्ञदानतपोयोगैःश्रुतवीर्यजयादिभिः २५ पंचाशीतिसहस्राणिह्यव्याहतबलाःसमाः ॥अकरोदर्जु
नोराज्यंहरिश्चैवान्वहंस्मरन् २६ अनष्टविष्णुस्मरणोवुभुजेक्षय्यषड्वसु ॥ तस्यपुत्रसहस्राणांपंचैवोर्वरितामृधे २७ जयध्वजःशूरसेनोवृषभोमधुरूर्जितः
॥ जयध्वजात्तालजंघस्तस्यपुत्रशतंत्वभूत् २८ क्षत्रंयत्तालजंघाख्यमौर्वतेजोपसंहृतम् ॥ तेषांज्येष्ठोवीतिहोत्रोवृष्णिःपुत्रोमधोःस्मृतः २९ तस्यपुत्र
शतंत्वासीद्वृष्णिज्येष्ठंयतःकुलम् ॥ माधवावृष्णयोराजन्यादवाश्चेतिसंज्ञितम् ३० यदुपुत्रस्यचक्रोष्टोःपुत्रोवृजिनवांस्ततः ॥ वाहिस्ततोरुशेकुर्वैतस्य
चित्ररथस्ततः ३१ शशबिंदुर्महायोगीमहाभोजोमहानभूत् ॥ चतुर्दशमहारत्नश्चक्रवर्त्यपराजितः ३२ तस्यपत्नीसहस्राणांदशासन्सुमहायशाः ॥
दशलक्षसहस्राणिपुत्राणांतास्वजीजनत् ३३ तेषांतुषट्प्रधानानांपृथुश्रवसआत्मजः ॥ धर्मोनामोशनास्तस्यहयमेधशतस्ययट् ३४ तत्सुतोरुचकस्त
स्यपंचासन्नात्मजाःशृणु ॥ पुरुजिद्रुक्मरुक्मेषुपृथुज्यामघसंज्ञिताः ३५ ज्यामघस्त्वप्रजोप्यन्यांभार्यांशैब्यापतिर्भयात् ॥ नाविंदच्छत्रुभवनात्कन्यां
भ्रष्टामहार्षीत् ३६ रथस्थांतांनिरीक्ष्याहशैब्यापतिममर्षिता ॥ केयंकुहकमारुह्यानंरथमारोपितेतिवै ३७

थासंततविष्णुस्मरणोपेतः । षष्ठांशेवसुषड्वसुषड्म्यीगुणेभ्योलब्धंयद्वसुतत्षड्वसुवा २७ २८ और्वमुनेःतेजसोपसंहृतम् २९ ३० ३१ ३२ ३३ ३४ ३५ पुरुद्रुह्यष्टाम् ३६ ३७

स्नुषातवेत्यभिहितास्मयंतीपतिमब्रवीत् ॥ अहंवंध्याऽसपत्नीचस्नुषायुज्येतमेकथम् ३८ जनयिष्यसियंराज्ञितस्येयमुपपद्यते ॥ अन्वमोदंततद्विश्वेदे
वाःपितरएवच ३९ शैब्यागर्भमधात्कालेकुमारंसुषुवेशुभम् ॥ सविदर्भइतिप्रोक्तउपयेमेस्नुषांसतीम् ४० इतिश्रीभागवतेमहापुराणेनवमस्कंधेविंशोऽ
ध्यायः ॥२०॥ श्रीशुकउवाच ॥ तस्यांविदर्भोजनयत्पुत्रौनाम्नाकुशक्रथौ ॥ तृतीयंरोमपादंचवैदर्भंकुलनंदनम् १ रोमपादसुतोबभ्रुर्बभ्रोःकृतिरजायत ॥
उशिकस्तत्सुतस्तस्माच्चेदिश्चैद्यादयोयतः २ क्रथस्यकुंतिःपुत्रोभूद्धलिस्तस्याथनिर्वृतिः ॥ ततोदशार्हनामाथतस्यव्योमःसुतस्ततः ३ जीमूतोविकृतिस्त
स्यतस्यभीमरथःसुतः ॥ ततोनवरथःपुत्रोजातोदशरथस्ततः ४ करंभिःशकुनेःपुत्रोदेवरातस्तदात्मजः ॥ देवक्षत्रस्ततस्त्वस्यमधुःकुरूरकस्ततः ५ पुरुहो
त्रस्त्वनोःपुत्रस्तस्यायुःसत्वतस्ततः ॥ भजमानोभजिर्दिव्योवृष्णिर्देवावृधोंधकः ६ सत्वतस्यसुताःसप्तमहाभोजश्चमारिष ॥ भजमानस्यनिम्लोचिः
किंकणोधृष्टिरेवच ७ एकस्यामात्मजाःपत्न्यामन्यस्यांचत्रयःसुताः ॥ शताजिच्चसहस्राजिदयुताजिदितिप्रभो ८ बभ्रुर्देवावृधसुतास्तयोःश्लोकंपठं
त्यमुम् ॥ यथैवश्रृणुमोदूरात्सपश्यामस्तथांतिकात् ९ बभ्रुःश्रेष्ठोमनुष्याणांदेवैर्देवावृधःसमः ॥ पुरुषाःपंचषष्टिश्चषट्सहस्राणिचाष्टच १० येऽमृतत्व
मनुप्राप्ताबभ्रोर्देवावृधादपि ॥ महाभोजोतिधर्मात्माभोजाआसंस्तदन्वये ११ वृष्णेःसुमित्रःपुत्रोभूद्युधाजिच्चपरंतप ॥ शिनिस्तस्यानमित्रश्चानिम्नोभूदन
मित्रतः १२ सत्राजितःप्रसेनश्चानिम्नस्याप्यासतुःसुतौ ॥ अनिमित्रसुतोयोन्यःशिनिस्तस्यचसत्यकः १३ युयुधानःसात्यकिर्वैजयस्तस्यकुणिस्ततः ॥ युगं
धरोनमित्रस्यपृश्निःपुत्रोऽपरस्ततः १४ श्वफल्कश्चित्ररथश्चैवगांदिन्यांतुश्वफल्कतः ॥ अक्रूरप्रमुखाआसन्पुत्राद्वादशविश्रुताः १५ आसंगःसारमेयश्चमृदु
रोमृदुविद्विरिः ॥ धर्मोविधृष्टकर्माचक्षेत्रोपेक्षोरिमर्दनः १६ शत्रुघ्नोगंधमोदाद्वःप्रतिबाहुश्चाद्वादश ॥ तेषांस्वसासुचारारूयाद्वावक्रूरसुतावपि १७ देववानु
पदेवश्चतथाचित्ररथात्मजः ॥ पृथुर्विपृथुधाताद्याबहवोवृष्णिनंदनाः १८ कुकुरोभजमानश्चशुचिःकंबलबर्हिषः ॥ कुकुरस्यसुतोवृष्णिर्विलोमास्तनय
स्ततः १९ कपोतरोमातस्यानुःसखायस्यचतुंबरुः ॥ अनोश्चदुंदुभिस्तस्यदरिद्रयोतःपुनर्वसुः २० तस्याहुकश्चाहुकीचकन्याद्वावाहुकात्मजौ ॥
देवकश्चोग्रसेनश्चचत्वारोदेवकात्मजाः २१ देववानुपदेवश्चसुदेवोदेववर्धनः ॥ तेषांस्वसारःसप्तासन्शांतिदेवादयोनृप २२ शांतिर्देवोपदेवाचश्रीदेवादे
वरक्षिता ॥ सहदेवादेवकीचवसुदेवउवाहताः २३ कंसःसुनामान्यग्रोधःकंह्वःशंकुःसुभूस्तथा ॥ राष्ट्रपालोऽदसृष्टिश्चतुष्टिमानौग्रसेनयः २४

१ ७ ८ ९ १० ११ १२ १३ नाम्नायुयुधानःसात्यकिरितिगुणनामा १४ १५ १६ १७ १८ १९ २० २१ २२ २३ औग्रसेनयःउग्रसेनपुत्राः २४

वसुदेवस्यानुजानांदेवभागादीनांस्त्रियोभार्याः २५ २६ तस्यहृदिकस्यसुताः २७ २८ यस्यवसुदेवस्यजननसमय दुंदुभ्यानकवाद्यनदनाद्वसुदेवस्यनामातरमस्यात्याह वसुदेवआवस्थानसम्य-
रस्य २९ ३० एतेषांवसुदेवादीनांशूरस्यसरव्युःपुत्रस्यकुंतेः ३१ देवहूतांदेवाहूयंतेनयेतिदेवहूतीदेवाह्वानकरीत्यर्थःतांविद्यांदुर्वाससःअलभतेतिशेषःतस्याःविद्यायाःशुचिःस्नातुस्नाता ३२ प्र
त्ययार्थंविश्वासार्थंप्रयुक्तायाांविद्यायामाहात्म्यंच भोदेवक्षमस्वयाहीति ३३ कुंत्याभिहितोरविःकुंतीमाह अमोघमिति देवसंदर्शनमयोघंसफलंजानीहीतिशेषः स्वकर्तव्यमाह आधास्यइति ।
मैथुनयोग्यतारुण्यादर्शनाच्छिन्नयोनिर्दुष्टास्यादितिपृथायामनागतशंकापरिहारार्थमाह योनिरितितथाकर्तालोकस्यापवादादितिशेषः ३४ ३५ तवप्रपितामहः पांडुः ३६ वसुदेवभगिनी

कंसाकंसवतीकंकासुरभूराष्ट्रपालिका ॥ औग्रसेनादुहितरोवसुदेवानुजस्त्रियः २५ शूरोविदूरथादासीद्भजमानसुतात्ततः ॥ शिनिस्तस्मात्स्वयंभोजोहृदि
कस्तत्सुतोमतः २६ देवबाहुःशतधनुःकृतवर्मेतितत्सुताः ॥ देवमीढस्यशूरस्यमारिषानामपत्न्यभूत् २७ तस्यांसंजनयामासदशपुत्रानकल्मषान् ॥
वसुदेवंदेवभागंदेवश्रवसमानकम् २८ सृंजयंश्यामकंकंकमनीकंवत्सकंवृकम् ॥ देवदुंदुभयोनेदुरानकायस्यजन्मनि २९ वसुदेवंहरेःस्थानंवदंत्यानक
दुंदुभिम् ॥ पृथाचश्रुतदेवाचश्रुतकीर्तिःश्रुतश्रवाः ३० राजाधिदेवीचैतेषांभगिन्यःपंचकन्यकाः ॥ कुंतेःसख्युःपिताशूरोह्यपुत्रस्यपृथामदात् ३१ सा
चदुर्वाससोविद्यांदेवहूतांप्रतोषितात् ॥ तस्यावीर्यपरीक्षार्थमाजुहावरविंशुचिः ३२ तंदैवोपगतंदेवंवीक्ष्यविस्मितमानसा ॥ प्रत्ययार्थंप्रयुक्तामेयाहिदे
वक्षमस्वमे ३३ अमोघंदेवसंदर्शमाधास्येत्वयिचात्मजम् ॥ योनिर्यथानदुष्येतकर्ताऽहंतेसुमध्यमे ३४ इतितस्यांसमाधायगर्भंसूर्योदिवंगतः ॥ सद्यः
कुमारःसंजज्ञेद्वितीयइवभास्करः ३५ तंसाऽत्यजन्नदीतोयेकृच्छ्राल्लोकस्यबिभ्यती ॥ प्रपितामहस्तामुवाहपांडुर्वैसत्यविक्रमः ३६ श्रुतदेवींतुकारूषोवृद्ध
शर्मासमग्रहीत् ॥ यस्याममूंहंतवक्रइतिशब्दोदितेःसुतः ३७ केकयोधृष्टकेतुश्चश्रुतकीर्तिमविंदत ॥ संतर्दनादयस्तस्याःपंचासुःकैकयाःसुताः ३८ रा
जाधिदेव्यामावंत्यौजयत्सेनोऽजनिष्टह ॥ दमघोषश्चेदिराजःश्रुतश्रवसमग्रहीत् ३९ शिशुपालःसुतस्तस्याःकथितस्तस्यसंभवः ॥ देवभागस्यकंसायां
चित्रकेतुबृहद्बलौ ४० कंसवत्यांदेवश्रवसःसुवीरइषुमांस्तथा ॥ कंकायामानकाज्जातःसत्यजित्पुरुजित्तथा ४१ सृंजयोराष्ट्रपाल्यांतुवृषदुर्मर्षणादिकान्॥
हरिकेशहिरण्याक्षौसुरभूम्यांतुकामुकः ४२ मित्रकेश्यामप्सरसिवृकादीन्वत्सकस्तथा ॥ तक्षपुष्करसालादीनुर्वश्यांवृकआदधे ४३ सुमित्रार्जुनबाणादी
ननीकात्तुसुदामनी ॥ गांडूषःकर्णिकायांवैऋक्षधामजयावपि ४४ ॥

नांश्रुतदेव्यादीनांविवाहंकथयति श्रुतदेवीमित्यादिना इतिशब्दोदितेःसुतःपूर्वदितेःसुतइतिशब्दोयस्यविजयस्यसदितेःसुतःइतिशब्दःसनकादिभिरेवंशप्रोविजयःपागदितेःसुतोभूत् पश्चाद्धिरण्यक
इतिसएवाधुनादंतवक्रइतिजावइतिभावः ३७ नाम्नाधृष्टकेतुःकेकयविषयाधिपतित्वात्कैकयशब्दश्चशब्दःपूर्वेणसमुच्चीयते ३८ आवंत्यौविंदानुविंदौअजनिष्टजनयामास ३९ वसुदेवभ्रातॄणांवं
शंकथयति देवभागस्येत्यादिना ४० ४१ ४२ ४३ ४४

४५ उदपादयत् उत्पादयामास ४६ ४७ ४८ ४९ ५० ५१ ५२ ५३ ५४ ५५ ५६ ननुयदेश्रीनारायणोजीववज्जन्मकर्माणिभजतेतर्हिसंसारानिवृत्तयेतत्सेवान्यर्थेतितत्राह नहीति ॥ विषमोदृष्टांतः तथाहि जीवस्यजन्मादिमत्त्वेपुण्यपापकारणं विधिबद्धत्वात्तदनियतत्वादीश्वरस्यनाहेतेस्तः । नाहिकार्यमकारणमितिन्यायात् कारणंवक्तव्यं चेत्लोकानुग्रहाद्बुद्धात्मेच्छैवेतिब्रूमःअनुग्रहाद्बोधस्यापि धर्मपाप्मनोःक्षयवृद्धिदर्शनमित्युक्तम् अतस्तत्सेवानव्यर्थेत्यर्थः हरेरविधिबद्धत्वेपिजन्मादिदर्शनात् अतःकिंतत्त्वेनपुण्यादिलेपित्वेनदुःखित्वंस्यादितितत्राह ईशस्येति । ईशस्यकचित्तमेदुःखित्वंस्यादिति तन्निवारणसमर्थत्वादन्यस्यतदभावात् जीवएवईशःकिंनस्यादितितत्राह परस्येति । ननुकिंतद्वैलक्षण्यंयेनेशादन्याजीवःस्यादितितत्राह द्रष्टुरिति । यःसर्वज्ञःसर्वविदितिश्रुतेः नहिद्रष्टुर्दृष्टेर्विपरिलोपो विद्यतइत्यादेश्चसार्वज्ञ्यंजीवाद्भिन्नत्वेनमुख्यंलक्षणं सार्वज्ञ्यंस्वभाविकंनतुनैमित्तिकमित्याशयेनाह आत्मनइति एवंविधःकइत्यतोवाह आत्मनइति आत्मादेहधृतौजीवस्वभावेपरमात्मनीतियादवः ५७

पौरवीरोहिणीभद्रामदिरागेचनाइला ॥ देवकीप्रमुखाआसन्पत्न्यआनकदुंदुभेः ४५ बलंगदंसारणंचदुर्मदंविपुलंध्रुवम् ॥ वसुदेवस्तुरोहिण्यांकृतधीरुद
पादयत् ४६ सुभद्रोभद्रबाहुश्चदुर्मदोभद्रएवच ॥ पौरव्यास्तनयाह्येतेभूताद्याद्वादशाभवन् ४७ नंदोपनंदकृतकशूराद्यामदिरात्मजाः ॥ भद्राख्याके
शिनंत्वेकमसूतकुलनंदनम् ४८ रोचनायांततोजाताहस्तहेमांगदादयः ॥ इलायांपुरुवल्कादीन्यदुमुख्यानजीजनत् ४९ त्रिपृष्ठोधृतदेवायांजातआन
कदुंदुभेः ॥ शांतिदेवात्मजाराजन्प्रश्रमप्रश्रितादयः ५० राजानःकल्पवर्षाद्याउपदेव्याःसुतादश ॥ वसुहंससुधन्वाद्याःश्रीदेवायाश्चषट्सुताः ५१ देव
रक्षितयालब्धानवचात्रगदादयः ॥ वसुदेवःसुतानष्टावादधेसहदेवया ५२ पुरुवत्समृदुमुख्यान्साक्षाद्धर्मोवसूनिव ॥ वसुदेवस्तुदेवक्यामष्टपुत्रानजी
जनत् ५३ कीर्तिमंतंसुषेणंचभद्रसेनमुदारधीः ॥ ऋजुंसंमर्दनंभद्रंसंकर्षणमहीश्वरम् ५४ अष्टमस्तुतयोरासीत्स्वयमेवहरिः किल ॥ सुभद्राचमहाभा
गातवराजन्पितामही ५५ यदायदाहिधर्मस्यक्षयोर्वृद्धिश्चपाप्मनः ॥ तदातुभगवानीशआत्मानंसृजतेहरिः ५६ नह्यस्यजन्मनोहेतुःकर्मणांवामहीपते॥
आत्ममायांविनेशस्यपरस्यद्रष्टुरात्मनः ५७ यन्मायाचेष्टितंपुंसःस्थित्युत्पत्त्यप्ययायहि ॥ अनुग्रहस्तन्निवृत्तेरात्मलाभायचेष्यते ५८ अक्षौहिणीनांप
तिभिरसुरैर्नृपलांछनैः ॥ भुवआक्रम्यमाणानामभावायकृतोद्यमः ॥ ५९ ॥

ननुजीवव्यावर्तकंलक्षणंजगत्कर्तृत्वादिकंतत्प्रकृतेरतःसार्वज्ञ्यमात्रेणकथमीश्वरोजीवाद्व्यावर्त्यः । विशेषणस्यसर्वज्ञत्रिपुरांतकत्रिनयनइत्यादावन्यविषयत्वेनव्यभिचारित्वादुक्तदोषानिस्तारइतितत्रा
हयन्मायेतियस्येश्वरास्याधीनायाःमायायाःप्रकृतेश्चेष्टितंपरिमाणलक्षणंपुंसइत्युपलक्षणंप्रपंचस्यस्थित्युत्पत्तिसंहारायभवतिःस्थित्यादेर्हेतुर्भवतीत्यर्थः तदेकविषयत्वद्योतनायबहुवचनं
प्रकृतिंपुरुषंचैवप्रविश्यपुरुषोत्तमइतिस्मृतिंहिशब्देनदर्शयति यदनुग्रहःप्रकृतिचेष्टायाःनिवृत्तिहेतुःनिवृत्तिश्चात्मलाभायसच्चिदानंदस्वरूपाविर्भावायबलमानंदओजश्चेत्यादिश्रुत्यवेष्यतेनिरूप्यते ॥ हरेःप्रपंच
निर्माणादिकंतत्तत्पदार्थविशेषज्ञानंविनानयुज्यते । तद्बलादपोहितुंनपार्यतेप्रामाणिकत्वादतोनिरुपमचरितंसार्वज्ञ्यंहरेरेवान्यस्यौपचारिकमित्यतोजीवव्यावृत्तिलक्षणसद्भावाच्चुक्तेतिभावः ५८ ननुकी
दृशोनुग्रहोयेनतन्निवृत्तिःस्यादितितत्राह अक्षौहिणीनामिति भुवोभारायमाणानां असुराणामभावायनाशाय ५९

अपरिमेयानिपरिमातुमशक्यानि ६० यशोलक्षणंपराक्रमंदुःखशोकतमोनुदम् ६१ यत्कर्णपीयूषं ... शास्त्रश्रवनजलश्रेष्ठश्रोत्रेएवांजलिर्यस्यसतथा । उपस्पृश्यस्नानपानाचमनानिकृत्वापःपकर्मवासनाःपापकर्मकरणश्रद्धालक्षणाः ६२ श्लाघनीयेहितःपुण्यमानचरितः ६३ स्निग्धस्मितेक्षितेनोदारैर्मनोहरैर्विक्रमलीलयाविक्रमविलासेनसर्वांगसुंदरयामूर्त्यानृलोकंमनुष्यजनं । नृनरइतिश्रुतेर्नरपतिभक्तिपूर्वंकंतत्वंजानातीतिनृलोकोज्ञानिसमूहस्तमितिवा ६४ रतिकरणप्रकारंदर्शयति यस्येति । मकराकारकुंडलाभ्यांचारुकर्णौताभ्यांभ्राजत्कपोलाभ्यांसुभगंसुंदरं । विलासेनसहितंहासंयस्यसतथातंनित्यंउत्सवोयस्यसतथातम् तत्क्षणानंदजनकमित्यर्थः नरनृपुःनालंबुद्धिप्राप्ताःनिमेर्निमेषस्येतिषष्ठीद्वितीयार्थे निमेषंप्रति । कुपिताःविकासविरोधित्वात् ६५ वेषुदारेषु आत्मनिगमंआत्मज्ञानं । स्वगुणप्रतिपादकवेदलक्षणशास्त्रंवा प्रथयन्प्ररूपापयन् ६६ सकृष्णःस्वधामस्वमूलरूपंसमगात् संग

कर्माण्यपरिमेयानिमनसापिसुरेश्वरैः ॥ सहसंकर्षणश्चक्रेभगवान्मधुसूदनः ६० कलौजनिष्यमाणानांदुःखशोकतमोनुदम् ॥ अनुग्रहायभूतानांसुपुण्यं व्यतनोद्यशः ६१ यस्मिन्सत्कर्णपीयूषेयशस्तीर्थवरेसकृत् ॥ श्रोत्रांजलिरुपस्पृश्यधुनुतेकर्मवासनाः ६२ भोजवृष्ण्यंधकमधुशूरसेनदशार्हकैः ॥ श्लाघनीयेहितःशश्वत्कुरुसृंजयपांडुभिः ६३ स्निग्धस्मितेक्षितोदारैर्वाक्यैर्विक्रमलीलया ॥ नृलोकंरयमामासमूर्त्यासर्वांगरम्यया ६४ यस्याननंमकरकुंडलचारुकर्णभ्राजत्कपोलसुभगंसविलासहासम् ॥ नित्योत्सवंनततृपुर्दृशिभिःपिबंत्योनार्योनराश्चमुदिताःकुपितानिमेश्च ६५ जातोगतःपितृगृहाद्व्रजमेधितोव्रहत्वारिपून्सुतशतानिकृतारुदारः ॥ उत्पाद्यतेषुपुरुषःक्रतुभिःसमीजआत्मानमात्मनिगमंप्रथयन्जनेषु ६६ पृथ्व्याःसवैगुरुभरंक्षपयन्कुरूणामंतःसमुत्थकलिनायुधिभूपबंधम् ॥ दृष्ट्वाविधूयविजयेजयमुद्विघुष्यप्रोच्योद्धवायचवरंसमगात्स्वधाम ॥ ६७ ॥ इतिश्रीभागवतेमहापुराणेपारमहंस्यांसंहितायांनवमस्कंधेसोमवंशवर्णनेवंशानुचरितंनामएकविंशोऽध्यायः ॥ २१ ॥ समाप्तोयंनवमस्कंधः ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

तवानेकोभूदित्यन्वयःपूर्णमदः पूर्णमदमित्याद्युपनिषद्वैइत्यनेनसूचयति पृथ्व्याःगुरुभरमसुरलक्षणंभूपबंधंभूरसमूहलक्षणंबंधंविधूयसंहृत्यउद्विघुष्यडिंडिमघोषंकारयित्वा वरंवरणयोग्यंज्ञानंप्रोच्यविस्तरेणोपदिश्यइति ६७ नाम्नाक्षत्रवसुंधरासुरमहावंशावलीमंदिरंव्याख्याव्याजविनोदतोऽयनवमस्कंधोमयाम्रेडितः॥सर्वज्ञोविजयध्वजायततपेमह्यंमहाभूतिदोहारीहारमनोहरोह्यहरहःप्रीतोस्तुविश्वंभरः १ पदरत्नावलिर्भूयान्नवमस्कंधअर्पिता ॥ तुलसीवहरेःपादद्वंद्वेद्वंद्वापहारिणी २ श्रीमद्वेंद्रतीर्थपूज्यपादशिष्यविजयध्वजतीर्थस्यकृतौपदरत्नावल्यांश्रीमद्भागवतव्याख्यायांनवस्कंधेएकविंशोऽध्यायः २१ ॥

॥ इति श्रीमद्भागवते नवमः स्कंधः समाप्तः ॥

॥ अथ श्रीमद्भागवते दशमस्कंधे पूर्वार्धप्रारंभः ॥

श्रीवेदव्यासायनमः ॥ नवमस्कंधेतिसंक्षिप्तंश्रीविष्णुचरितंविस्तरतःश्रोतुंराजावृत्तमनूद्यवक्तुंप्रार्थयते कथितोवंशविस्तारइत्यादिना विद्ययाजन्मनाचैकलक्षणःसंतानोवंशस्तत्रभवोवंश्यः व्यासःप्रपंचो विस्तारइत्यभिधानं राज्ञांचरितंचकथितं कथनेनिमित्तमाह परमेति १ अत्राविशेषमाह यदोरिति यदोर्ययातिपुत्रस्यवंशोनितरांकथितः धर्मोभगवांस्तत्समाधियुक्तस्य शीलसमाधाविति धा तुःअस्तुनामततःकिमपेक्षितमितितत्राह तत्रेति यदोर्वंशे वीर्याणिपराक्रमान् २ तात्पर्यात्पुनरुक्तमेवाह अवतीर्येति यानिभूकंटकादितिसुतहननादीनिकर्माणि विश्वात्माविश्वव्यापीत्यनेनब्रह्मत्वं ध्वनयति विस्तरतःनकेवलमर्थतःप्रपंचनमपिनुशब्दतः अल्पबुद्धीनामवगंतुमशक्यत्वात् सचशब्दस्याविस्तरइत्यभिधानं ३ अतीतस्कंधेहारिकथाश्रवणेनालंबुद्धिर्नाभूत्किमितितत्रा ह निवृत्तेति निवृत्तबर्षैर्विषयालंबुद्धिसहितैः भवौषधात्संसाराख्यरोगपरिहारहेतुभूतौषधात् अतिमुग्धात्अन्यथाज्ञानिनः पशुघ्नादितिवापाठः ४ माहात्म्यंहरेरनुभवासिद्धंयस्मादतोवक्तव्यमित्या शयेनाह पितामहाइति पितामहाअर्जुनादयःअमरान्देवान्जयंतीत्यमरंजयास्तैः देवानामिवव्रतंअप्रजाजननलक्षणंयस्यसभीष्मःसआद्योयेषांद्रोणादीनांतेतथा तएवातिरथारथ्युत्तमास्तैः तिमि

ओंनमोभगवतेवासुदेवाय ॥ राजोवाच ॥ कथितोवंशविस्तारोभवतासोमसूर्ययोः ॥ राज्ञांचोभयवंश्यानांचरितंपरमाद्भुतम् १ यदोश्चधर्मशीलस्य नितरांमुनिसत्तम ॥ तत्रांशेनावतीर्णस्यविष्णोर्वीर्याणिशंसनः २ अवतीर्ययदोर्वंशेभगवान्भूतभावनः ॥ कृतवान्यानिविश्वात्मातानिनोवदविस्तरात् ३ निवृत्ततर्षैरुपगीयमानाद्भवौषधाच्छ्रोत्रमनोभिरामात् ॥ कउत्तमश्लोकगुणानुवादात्पुमान्विरज्येतविनातिमुग्धात् ४ पितामहामेसमरेऽमरंजयैर्दे वव्रताद्यातिरथैस्तिमिंगिलैः ॥ दुरत्ययंकौरवसैन्यसागंरकृत्वातरन्वत्सपदंस्मयत्प्लवाः ५ द्रौण्यस्त्रविप्लुष्टमिदंमदंगंसंतानबीजंकुरुपांडवानाम् ॥ जुगो पकुक्षिंगतआत्तचक्रोमातुश्चमेयःशरणंगतायाः ६ वीर्याणितस्याखिलदेहभाजामंतर्बहिःपूरुषकालरूपैः ॥ प्रयच्छतोमृत्युमनामयंचमायामनुष्यस्य वदस्वविद्वन् ७ रोहिण्यास्तनयःप्रोक्तोरामःसंकर्षणस्त्वया ॥ देवक्यागर्भसंबंधःकुतोदेहांतरंविना ८ कस्मान्मुकुंदोभगवान्पितुर्गेहाद्व्रजंगतः ॥ क्वावा संज्ञातिभिःसार्धंकृतवान्सात्वतांपतिः ९ व्रजेवसन्किमकरोन्मधुपुर्यांचकेशवः ॥ भ्रातरंचावधीत्कंसंमातुरद्धाऽतदर्हणम् १० देहंमानुषमाश्रित्यकति वर्षाणिवृष्णिभिः ॥ यदुपुर्यांसहावात्सीत्पत्न्यःकत्यभवन्विभोः ११ एतदन्यच्चसर्वंमेमुनेकृष्णविचेष्टितम् ॥ वक्तुमर्हसिसर्वज्ञश्रद्दधानायविस्तृतम् १२

र्नाममहामत्स्यःकायेनदशयोजनप्रमाणमावृत्यस्थितःतमपिगिलंतिग्रसतइतितिमिंगिलः खप्रत्ययनिमित्तंमुमागमःवत्सपदंगोवत्सपदमिव वत्सपदंलुप्तोपमं यःकृष्णःप्लवउडुपंयेषांतेयत्प्लवाः नदीत रणायनिर्मितवंशचर्मादिनायत्साधनंसप्लवइति ५ इतोऽपितद्वीर्याणिश्रोतव्यानीत्याह द्रौण्यस्त्रेति मातुरुत्तरायाःकुक्षिगतःप्रविष्टः इदंप्रत्यक्षंचेतिभावेनोक्तंमेयइति मयामेयःज्ञेयःममदृग्विषयः ६ भास नोपसंभाषाज्ञानयत्नविमत्युपमंत्रणेषुवदइत्यतोवदस्वेत्यात्मनेपदप्रयोगोमाद्धितार्थवक्तव्यमितिसूचनार्थः शुकस्यवक्तव्यांशज्ञानपाटवप्रदर्शनार्थंच एतदेवप्रकटितमभूद्विद्वन्नित्येनन अंतःपुरुषरूपैः बहिःकालरूपैःअनाभयंसंसारदुःखनिरासेनसुखं मृत्युंदुःखानुभवलक्षणं अंधंतमः प्रयच्छतोददतः बहुरूपत्वाद्बहुवचनं प्रलपांतइतिशेषः ७ एकस्यद्वयोर्योनिसंबंधानुपपत्तिःप्रश्नबीजं ८ ९ मधुपुर्यांचवसनकिंकर्मकृतवान मातर्भ्रातरंमातुलमित्यर्थः अतदर्हणंतस्यवधस्यायोग्यमित्यर्थः १० ११ मेमह्यम् १२

क्षुधितस्यतवदौर्बल्यान्मनोनेच्छतिश्रोतुमितितत्राह नैषेति त्यक्तोदंआचमनजलमतरणातिशयः ननु दिव्यमन्त्रापधादकमतरणक्षुधादकमानुषदहनापवदव ... ति सूतंगलितम् १३ सूतःशौनकंप्रत्याह सूतइतिहेभृगुनंदनशौनकप्रत्यर्च्यप्रतिसंभाव्य राजानमितिशेषः १४ कीदृशीप्रत्यर्चेतितामाह सम्यग्व्यवसितेति नैष्ठिकीश्रीनारायणोत्कर्षसंबंधिनी निष्ठोत्कर्षेव्यवस्थायामितियादवः निश्चलतयास्थितिर्निष्ठातद्वतीतिवा १५ नकेवलंहरिकथाप्रश्नःप्रष्टारंपुनातिकिंतुवक्तारमपीत्याह वासुदेवेति तत्पादसलिलंभागीरथी शालग्रामतीर्थवा गंगागंगेतियो ब्रूयादित्यादेः १६ एतदन्यच्चेत्येतत्यदन्यदितितदिदमितिध्वनयन्कथामाहितउपक्रमते भूमिरित्यादिना शतायुतैरत्यनेनासंख्यातत्वंसूचयति भूरिभारेणपीडितेतिशेषः १७ यथाकरुणंभवतितथा रुदंती व्यसनंविविधनिरसनम् १८ १९ जगन्नाथत्वंराजादेरप्यस्तीतिदेवदेवमिति इंद्रादिव्यावृत्त्यर्थं वृषाकपिं अभीष्टदानादानंदनाच्च वृतपङ्गुत्वात्अकपेर्दुःखवेषणाच्चवृषाकपिः तम् । नीरूप स्यहरेरींद्रियाविषयत्वंकथमित्यतःपुरुषमिति तस्येदमेवशिरइत्यादेः उपतस्थेमंत्रवचनपूर्वकमुपासनांकृतवानिति उपान्मंत्रकरणेइत्यात्मनेपदं कोयंमंत्रः येनधात्वर्थःसमर्थितःस्यादित्यतःपुरुषसूक्तेनेति २०

नैषातिदुःसहाक्षुन्मांत्यक्तोदमपिबाधते ॥ पिबंतंत्वन्मुखांभोजस्रुतंहरिकथामृतम् १३ ॥ सूतउवाच ॥ एवंनिशम्यभृगुनंदनसाधुवादंवैयासकिःस भगवानथविष्णुरातम् ॥ प्रत्यर्च्यकृष्णचरितंकलिकल्मषघ्नंव्याहर्तुमारभतभागवतप्रधानः १४ श्रीशुकउवाच ॥ सम्यग्व्यवसितावुद्धिस्तवराजर्षिस त्तम ॥ वासुदेवकथायांतेयज्जातानैष्ठिकीरतिः १५ वासुदेवकथाप्रश्नःपुरुषांस्त्रीन्पुनातिहि ॥ वक्तारंपृच्छकंश्रोतृंस्तत्पादसलिलंयथा १६ भूमिर्दृप्तनृ पव्याजदैत्यानीकशतायुतैः ॥ आक्रांताभूरिभारेणब्रह्माणंशरणंययौ १७ गौर्भूत्वाश्रुमुखीखिन्नारुदंतीकरुणंयथा ॥ उपस्थितांऽतिकेतस्मैव्यसनंसमवो चत १८ ब्रह्मातदुपधार्याथमहदेवैरतयासह ॥ जगामसत्रिनयनस्तरिक्षंरिपयोनिधेः १९ तत्रगत्वाजगन्नाथंदेवदेवंवृषाकपिम् ॥ पुरुषंपुरुषसूक्तेनउपत स्थेसमाहितः २० गिरंसमाधौगगनेसमीरितांनिशम्यवेधास्त्रिदशानुवाचह ॥ गांपौरुषींमेशृणुतामराःपुनर्विधीयतामाशुतथैवमाचिरम् २१ पुरैवपुंसा वधृतोधराज्वरोभवद्भिरंशैर्यदुषूपजन्यताम् २२ सयावदुर्व्याभरमीश्वरेश्वरःस्वकालशक्त्याक्षपयंश्चरेद्भुवि ॥ वसुदेवगृहेसाक्षाद्भगवान्पुरुषःपरः ॥ जनि ष्यतेतत्प्रियार्थंसंभवंतुसुरस्त्रियः २३ वासुदेवकलानंतःसहस्रवदनःस्वराट् ॥ अग्रतोभवितादेवोहरेःप्रियचिकीर्षया २४

समाधावितितादर्थ्येसप्तमी समाध्यर्थंहेकार्यसमर्थनार्थंसमीरितांगिरं अत्यर्थमितिगीर्वाणीवाचिहिसंप्रतिष्ठितमितिश्रुतेः तांस्तुतिगिरंसंस्तुत्यगुणध्यानसमवस्थायांवाकथितांसमाधिध्यानसंधानप्रति ज्ञासुसमर्थनइत्यभिधानादित्यर्थः पौरुषींपुरुषेणोक्तां गमयत्यवगमयतीतिज्ञापयत्यर्थमितिगौर्वाक् अथकस्माद्गौरितिगच्छतीतिनिरुक्तकारनिर्वचनमपिवक्तुःश्रोतुःकर्णांतरगमनाद्युक्तम् २१ धराज्वरः भूमेःसंतापः ज्वरसंतापइतिधातुः । नकेवलंजननमेवपूर्वंतेतावंतंकालमवस्थानंचापेक्षितमित्याह सयावदिति । स्वकालशक्त्यास्वरूपभूतोपसंहारकालाख्यशक्त्या २२ नकेवलंदेवानामुर्व्यामवतारस्त दंगनानामपीत्याह वसुदेवेति २३ हरेरवतारांविनाभूतस्यशेषावतारस्यप्रकारमाह वासुदेवेति । वासुदेवकालानंतइत्येकंपदम् । वासुदेवस्यकलयासितकेशांशेनयुक्तःशेषः । स्वेनहरिणाराजतइतिस्व राट् स्वस्यस्वतंत्रस्यहरेरधस्तच्छयनीयत्वेनराजतइतिवा । स्वमात्मानंसनकादिभ्योराजयतिप्रकाशयतीतिवा हरेरग्रतः २४

देवकार्यार्थसहायांतरंवक्ति योगमायेति । योगमायादुर्गा २५ महर्लोकादिभ्यःपरम् २६ चतुर्युगेषुभवंसांत्वयित्वासत्यलोकंगतेउत्तरकथांप्रसंजयति शूरसेनइति । कार्तवीर्यसुतःपुरीमावसन्निति सप्तम्यर्थेद्वितीया । उपान्वध्याङ्वसइतिसूत्रात् २७ २८ ततःकिमत्राह तस्यामिति २९ विवाहकालेरथहयानांकविकाग्रहणेअत्यंतबंधुनाभाव्यमितिदर्शयितुंतद्ग्राहिणमाह उग्रसेनसुतइति ३० विवाहकालेदुहित्रेयदीयमानंधनंतत्सारिबर्हनाम ३१ ३२ प्रयाणप्रक्रमेगमनारंभे ३३ प्रग्रहःकविकातद्वंतम् अस्याःदेवक्याः ३४ कुलपांसनःकुलधूलीकरणशीलः कचेकेशपाशे ३५ नृशंसंक्रूरकर्माणम् परिसांत्वयन्स्नाभ्रांभेदनचसंबोधयन् ३६ संबंधलाभोपकृतिरभेदोगुणकीर्तनम् । साम्नःपंचविधोभेदोदृष्टादृष्टभयंवचइतिपंचविधंसामज्ञायतेश्लाघनीयगुणेत्यादिनाश्लाघनीयगुणेतिगुणकीर्तनं भोजय

योगमायाभगवतीययासंमोहितंजगत् ॥ आदिष्टाप्रभुणांशेनकार्यार्थेसंभविष्यति २५ श्रीशुकउवाच ॥ इत्यादिश्यामरगणान्प्रजापतिपतिर्विभुः ॥ आश्वास्यचमहींगीर्भिःस्वधामपरमंययौ २६ शूरसेनोयदुपतिर्मथुरामावसन्पुरीम् ॥ माथुराञ्छूरसेनांश्चविषयान्बुभुजेस्वराट् २७ राजधानीततः साभूत्सर्वयादवभूभुजाम् ॥ मथुराभगवान्यत्रनित्यंसन्निहितोहरिः २८ तस्यांतुकर्हिचिच्छौरिर्वसुदेवःकृतोद्वहः ॥ देवक्याभार्ययासार्धंप्रयाणेरथमारुहत् २९ उग्रसेनसुतःकंसःस्वसुःप्रियचिकीर्षया ॥ रश्मीन्हयानांजगृहेरौक्मैरथशतैर्वृतः ३० चतुःशतंपारिबर्हंगजानांहेममालिनाम् ॥ अश्वानामयुतं सार्धंरथानांचत्रिषट्शतम् ३१ दासीनांसुकुमारीणांद्वेशतेसमलंकृते ॥ दुहित्रेदेवकःप्रादाद्यानेदुहितृवत्सलः ३२ शंखतूर्यमृदंगानिनेदुर्दुंदुभयःसमम् ॥ प्रयाणप्रक्रमेतातवरवध्वोःसुमंगलम् ३३ पथिप्रग्रहिणंकंसमाभाष्याहाशरीरवाक् ॥ अस्यास्त्वामष्टमोगर्भोहंतायांनयसेऽबुध ३४ इत्युक्तःसखलःपापोभोजानांकुलपांसनः ॥ भगिनींहंतुमारब्धःखड्गपाणिःकचेऽग्रहीत् ३५ तंजुगुप्सितकर्माणंनृशंसंनिरपत्रपम् ॥ वसुदेवोमहाभागउवाचपरिसांत्वयन् ३६ वसुदेवउवाच ॥ श्लाघनीयगुणःशूरैर्भवान्भोजयशस्करः ॥ सकथंभगिनींहन्याःस्त्रियमुद्वाहपर्वणि ३७ मृत्युर्जन्मवतांवीरदेहेनसह जायते ॥ अद्यवाब्दशतांतेवामृत्युर्वैप्राणिनांध्रुवः ३८ देहेपंचत्वमापन्नेदेहीकर्मानुगोऽवशः ॥ देहांतरमनुप्राप्यप्राक्तनंत्यजतेवपुः ३९ व्रजंस्तिष्ठन्पदैकेनयथैवैकेनगच्छति ॥ यथातृणजलूकैवंदेहीकर्मगतिंगत. ४०

शस्करेतिकीर्तिलाभकथनंहन्याःस्त्रियमितिस्त्रीवधादकीर्तिलाभसूचनम् । भगिनीमितिसंबंधवचनम् । उद्वाहपर्वणीतिअपकृतिसूचनम् । उद्वाहपर्वणीतिसूचनाद्विवाहोऽपमेव ३७ मृत्युर्जन्मवतामित्यादिनाअदृष्टभयम् ३९देहेपंचत्वमित्यादिनादृष्टभयंकर्मपुण्यपापविषयंअवशोविष्णुवशः त्यजतेत्यजति ३९ पूर्वदेहपरित्यागेनदेहांतरप्राप्तौदृष्टांतमाह व्रजन्निति यथाव्रजन्पुरुषःएकेनपादेनातिष्ठतिएकेनगच्छतिपूर्वदेशवियोगेनदेशांतरसंयोगमाप्नोति । यथातृणजलूकातृणांतरंगृहीत्वापूर्वतृणंत्यजतिएवंदेहीकर्मगतिंगतोभवतीत्यन्वयः कर्मणोगतिरास्थिर्यस्मिन्देहेत्यजतितथातच्चदेहांतरमित्यर्थः ४०

ननुदेहात्मनोरभेदेनदेहीपूर्वदेहंपरित्यज्यअभिनवदेहांतरंपातीतिकथंसंजाघटीतीतितत्राह स्वप्नइति । जाग्रद्दृष्टश्रुतपदार्थसंस्कारसमुद्बुद्धमनोरथनआभानावष्टचेतनःगाढमग्नस्तदुद्बुद्धरात्मात्वमश्नुते जाग्रद्देहसदृशदेहंयथापश्यति । स्वकीयत्वेनानुभवतिपरकीयत्वेनवा आत्मनएकत्वेनदेहयोर्द्वित्वेनदर्शनादेहात्मनोर्भेदआनुभाविकः । तथामनसानुचिंतन्आत्मादृष्टश्रुतस्मृतानुसृतंतत्तत्रकिमपिदेवा द्यन्यतमशरीरंप्रपद्यते । कदेत्यतउक्तंअपस्मृतिरितिउत्तरदेहेअभिमानितयापूर्वदेहस्मरणाभावेनमृतइत्यर्थः । हिशब्दोहेतौ यतएवमृतइत्यर्थःतदुक्तमाचार्यैःस्वप्नेयथादृष्टश्रुतस्मृत्यनुसारिदेहंप्राप्नोत्य पस्मृतिर्मृतः पूर्वदेहस्मरणाभावात् अनभिमानतइति ४१ एतदेवविवृणोति यतोयतइति । सार्वविभक्तिकस्तसिरितिवचनाद्यतोयतोयत्रयत्र । मायारचितेष्वित्यादिषुसप्तमीषष्ठ्यर्थे भगवदिच्छो द्भोधितप्रकृतिनिमित्तानां । प्रकृतेरेकत्वेनसृष्टेर्नानाविध्यंकथमत्राह गुणेष्विति । कार्यकारणाभेदात्सत्वादिगुणविहितानांआत्मपंचमुदेवगंधर्वपितृमनुष्यासुरभेदेनपंचानामात्मनांमध्येदैवेनअदृष्टोद्बो धकेनहरिणाचोदितंप्रेरितंमनोधावतिविषयीकरोति मनोविशिनष्टि विकारात्मकमिति । संकल्पविकल्पनिबद्धमिति यस्यमनःमरणसमयेयोग्यतानुसारेणयंयंधावतिअसौदेहीतत्रतत्रप्रपद्यमानः प्र वृत्तिंलभमानः तेनदैवेनसहजायते । प्राज्ञेनात्मनाऽन्वारूढउत्सृज्ययातीतिश्रुतेः । उत्पद्यमानोपितेनसहउत्पद्यतइतिज्ञातव्यं । अत्रापियोग्यतामपेक्ष्यतत्तच्छरीरग्रहणं तदुक्तं देवादित्वंयोग्यतयात त्सकाशस्त्वनुस्मृतेः श्वेतद्वीपादितत्रापियोग्यतामप्यपेक्ष्यतु विष्णोःस्थानंविनान्यत्रवायुशक्रादिनामपि त्रैलोक्यदेशभेदेषुयोग्यतानत्वपेक्ष्यतइति अनेनव्याप्तस्यात्मनोगमनंकथमितिचोद्यंपरिहृतंपर मात्मानमंतरेणनिरूपचरिताव्याप्तिर्नास्ति अणुर्ह्येषआत्मेतिश्रुतेः आलोकवद्गुणेनयथायोग्यव्याप्तिरस्तुनाम तथापिस्वरूपतोनास्त्येवव्याप्तिरात्मानश्चेतनानिर्गुणश्चेतिस्मृतेःश्रीनारायणविषयेतिनिर

स्वप्नेयथापश्यतिदेहमीदृशंमनोरथेनाभिनिविष्टचेतनः ॥ दृष्टश्रुताभ्यांमनसानुचिंतयन्प्रपद्यतेतत्किमपीह्यपस्मृतिः ४१ यतोयतोधावतिदैवचोदि
तंमनोविकारात्मकमात्मपंचसु ॥ गुणेषुमायारचितेषुदेह्यसौप्रपद्यमानःसहतेनजायते ४२ ज्योतिर्यथैवोदकपार्थिवेष्वदःसमीरवेगानुगतंविभाव्यते ॥
एवंस्वमायारचितेष्वसौपुमान्गुणेषुरागानुगतोविमुह्यति ४३ तस्मान्नकस्यचिद्द्रोहमाचरेत्सतथाविधः ॥ आत्मनःक्षेममन्विच्छन्द्रोग्धुर्वैपरतोभयम्
४४ एषातवानुजाबालाकृपणापुत्रिकोपमा ॥ हंतुंनार्हसिकल्याणीमिमांत्वंदीनवत्सल ४५

णायि नोचेदुक्तागतिरेवेति ४२ ननुगुणानांनानात्वात्सृष्टेर्वैचित्र्यमस्तु एकस्यात्मनोनानाविधप्रतीतिःकथमितिशंकांसदृष्टांतंपरिहरति ज्योतिरिति । यथाअदोज्योतिरादित्यलक्षणंसमीरवेगानुग तंवायुवेगनिमित्तचलनेनअनुचलितमौदकपार्थिवेषुजलपूर्णशरावाद्युपाधिषुप्रतिबिंबितंविभाव्यते विविधत्वेनभाव्यते छिन्नभिन्नादिरूपेणप्रतीयते । एवमसौपुमान्स्वमायारचितेषुपरस्वोहारीरिति वचनात्स्वस्यविष्णोरिच्छयारचितेषुदेहेषुप्रतिबिंबितःअशोभनेशोभनाध्यासोरागःतेनानुगतःतन्मयांतःकरणोविमुह्यति विविधांछिन्नोभिन्नोमृतोस्मीतिमोहमज्ञानंप्रतिपद्यते यथातदेवज्योतिःपार्थिव वद्धनीभूतपूर्णजलेप्रतिबिंबितंवायुवेगानुगतंविशिष्टंनिश्चलंभाव्यते छेदभेदादिरहितंप्रतीयते एवंयोग्योजीवोगुणेषुप्रतिबिंबितोरागमनुरागंस्नेहविशेषमनुगतोनिर्मुक्तद्वेषोविगतमोहोभवति अज्ञाननि मित्तछिन्नोहमितिदुःखेनप्राप्नोतीतिपरिहारपरतयावायोजनीयंउभयोरपिसमाख्यानसिद्धप्रमाणत्वात् तदुक्तं यथैवोदशरावेष्वित्यारभ्यपरेषांद्रोहमाचरान्नित्यंतेन स्वमायेत्यत्रस्वशब्देनविष्णुरेवोच्यतेमा नसिद्धत्वात् तदुक्तं परस्वोहारिरुदामइतिपद्येन गुणयोगयुक्तरूढ्यसिद्धत्वात् मुख्यंच तदुक्तं स्वतंत्रत्वात्सुखत्वाच्चस्वनामाविष्णुरुच्यतइति । रागोऽनुरागेलाक्षायामितियादवः ४३ नन्वस्तुना मात्मनोजन्मादिकंकर्मनिमित्तंप्रकृतेततःकिंतत्राह तस्मादिति यतआत्मातथाविधः कर्मफलभोक्तातस्मात्सतादृशःकस्यचिद्द्रोहंहिंसांनाचरेत् ततःकिंतत्राह आत्मनइतिअनर्थंवाह द्रोग्धुरिति परतः परलोके दुःखलक्षणंभयंभवतीतिशेषः ४४ परतोऽन्यस्माद्द्रोह्यात्पुरुषात्द्रोहलक्षणंभयंस्यादितिमत्वानिरंतरद्रोहलक्षणंदुःखंभवतीतिभयसामप्रदर्श्यभेदसामप्रदर्शयति एषेति ४५

पुरुषादान्राक्षसाननुव्रतः तत्स्वभावमापन्न इत्यर्थः ४६ यः शास्त्रनिषिद्धस्तं प्राप्तकालं प्राप्तावसरं व्यसनं प्रति व्योढुं गतिहर्तुं इदं वक्ष्यमाणं अन्वपद्यत अपश्यत् ४७ यावद्बुद्धिबलोदयमित्यव्ययीभावः यावदवधारणेइतिसूत्रात् अपराधः शास्त्रविरोधाचरणलक्षणः ४८ किमपश्यत्तदाह प्रत्यर्प्यमृत्यवेमारकायकंसाय उपायाभासोऽयंयदपत्यार्पणंतत्राहवाममसुतोत्पत्तेः प्राक्नम्रियेतचेत्यदिनम रिष्यति४९ विपर्ययोवा ममपुत्रः कंसंवाहनिष्यतीतिकिंनस्यात् कथमेतदितितत्राह धातुरिति । धातुरीश्वरस्यगतिश्चेष्टालक्षणादुरत्यया अतिक्रांतुमशक्या अतः किंतत्राह उपस्थितइति सर्वथातावदु पस्थितोमृत्युरस्याः निवर्तेत निवृत्तोयदिरावणादेरिवपुनरापतेत्तर्हिततदानीमस्तुकिंतावदिदानीम् ५० इतोपिधातुर्गतिर्दुरत्ययेत्येतत्सदृष्टांतमुपपादयति अग्नेरिति । यथाग्नेर्दावादिदहनस्यदा रुवियोगयोगयोः कष्ठानभिव्यक्तिव्यक्त्योः दाह्यवृक्षाभिमानिजीवादृष्टप्रेरकेश्वरात्अन्यन्निमित्तंनास्ति अदृष्टइत्यादौहरिनिवेशः कस्मात् उच्यते कुंडस्थाग्नेर्दारुवियोगादौस्वतः प्रवृत्त्यभावादितिवच

एवंससामभिर्भेदैर्बोध्यमानोऽपिदारुणः ॥ नन्यवर्ततकौरव्यपुरुषादाननुव्रतः ४६ निर्बंधंतस्यतंज्ञात्वाविचिंत्यानकदुंदुभिः ॥ प्राप्तकालंप्रतिव्योढुमि दंतत्रान्वपद्यत ४७ मृत्युर्बुद्धिमताऽपोह्योयावद्बुद्धिबलोदयम् ॥ यद्यसौननिवर्त्तेतनापराधोऽस्तिदेहिनः ४८ प्रत्यर्प्यमृत्यवेपुत्रान्मोचयेकृपणामिमा म् ॥ सुतामेयदिजायेरन्मृत्युर्वानम्रियेतचेत् ४९ विपर्ययोवाकिंनस्याद्गतिर्धातुर्दुरत्यया ॥ उपस्थितोनिवर्तेतनिवृत्तःपुनरापतेत् ५० अग्नेर्यथादा रुवियोगयोगयोरदृष्टतोन्यन्ननिमित्तमस्ति ॥ एवंहिजंतोरपिदुर्विभाव्यःशरीरसंयोगवियोगहेतुः ५१ एवंविमृश्यतंपापंयावदात्मनिदर्शनम् ॥ सांत्व यामासवैशौरिर्बहुमानपुरःसरम् ५२ प्रत्यग्रवदनांभोजोनृशंसंनिरपत्रपम् ॥ मनसादूयमानेनप्रहसन्निदमब्रवीत् ५३ नह्यस्यास्तेभयंसौम्ययद्वैत्वाहा शरीरवाक् ॥ पुत्रान्समर्पयिष्येऽस्यायतस्तेभयमुत्थिम् ॥ ५४ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेपूर्वार्धेप्रथमोऽध्यायः ॥ १ ॥ श्रीशुकउवाच॥ सुहृद्वधान्निवृतेकंसस्तद्वाक्यसारवित् ॥ वसुदेवोपितंप्रीतःप्रशस्यप्राविशद्गृहम् १ अथकालउपावृत्तेदेवकीसर्वदेवता ॥ पुत्रान्प्रसुषुवेचाष्टौकन्यांचै वानुवत्सरम् २ कीर्तिमंतंप्रथमंजंपुत्रमानकदुंदुभिः ॥ अर्पयामासकृच्छ्रेणसोऽनृतादतिविह्वलः ३

नात् यथाकुंडस्थितस्याग्नेर्दैवाद्दारूपसन्नमेत् ॥ देहयोगवियोगश्चतथादैवान्नचान्यथेतिवचनाच्च । एवंजंतोरपिशरीरवियोगसंयोगहेतोर्हरेरन्योदुर्विभाव्यःकेवलादृष्टलक्षणस्यकर्मणःस्वतःप्रवृत्त्यनुपपत्तेः कार्यस्यचदर्शनान्यथाऽनुपपत्त्याश्रीनारायणएवभाव्यइत्यतस्त्वयाशास्त्रज्ञेनास्याःहननंनोचितमितिभावः ५१ आत्मनियावद्दर्शनंपरबोधलक्षणंज्ञानंविमृश्यालोच्यज्ञात्वातावत्सांत्वयामास स्वावग तलोकप्रसिद्धदृष्टांतोयावांस्तावतावा ५२ प्रत्यग्रंसद्यस्कंनूतनंवदनांबुजंयस्यसतथा । प्रत्यग्रमुक्तंसद्यस्कमितिहलायुधः दूयमानेनमनसेतिअंतस्तापंचसूचयति प्रहसन्निति बहिःप्रसादं इदंमहतांलक्ष णम् ५३ यावद्बोधेनाप्युक्तसंवादंविज्ञाययथासंवादीस्यात्तथाप्रत्येतुंवाक्किनह्यस्याइति पतोदेवक्याः ५४ इतिश्रीभागवतेमहापुराणेदशमस्कंधेविजयध्वजकृतटीकायांपदरत्नावल्यांप्रथमोऽध्यायः ॥ १ ॥ अत्रकंसचरितकथनव्याजेनसंसारस्यानर्थरूपत्वंवर्ण्यतिशुकः सुहृत्सहोदरी भार्यावधोपरमात्प्रीतःकंसंप्रशस्य १ सर्वादेवतायस्यांसन्निहिताःसातथा अनुवत्सरंप्रतिवत्सरम् २ नाम्नाकीर्तिमंतम् ३

स्वात्मनःप्राणनाशेनापिसत्यमेवरक्षतिमहतइत्याशयनाह किंदुःसहामात कसाऽसाधुष्वकृत्याशयनाह किंसकाशानाम कथंनानुस्मरन्त... दुस्त्यजमिति ऋतात्मनांसत्यस्वभावानां ४ ५ ६ अविजितात्मनोऽसतःकंसस्यतद्वचनंनविश्वसनीयमितिनाम्यनंदत ७ ८ नंदाद्याइत्यारभ्यवधोद्यममित्यंतंनारदवाक्यं ९ उभयोःयदुकुलगो कुलयोः १० ११ वधोद्यमं देवैःक्रियमाणमितिशेषः १२ १३ अहन्हतवान् अजनोविष्णुरवतीर्णइतिशंकया १४ परप्राणैःस्वानसून्प्राणारतर्पयंतीत्यसृपः १५ प्राक्पूर्वजन्मनि १६ शूरसेना न्विषयान् १७ इतिश्रीभागवतेमहापुराणेदशमस्कंधेविजयध्वजकृतटीकायांद्वितीयोऽध्यायः ॥ २ ॥ अवतारेरूपंहरेर्नकिंचिदपिभिन्नंसाक्षात्स्वरूपमेवतज्ज्ञानस्यमुक्तिहेतुत्वादित्यभिप्रायेणनिरूपणम

किंदुःसहंनुसाधूनांविदुषांकिमपेक्षितम् ॥ किमकार्यंकदर्याणांदुस्त्यजंकिमृतात्मनाम् ४ दृष्ट्वासमत्वंतच्छौरेःसत्येचैवव्यवस्थितिम् ॥ कंसस्तुष्टमनाराज न्प्रहसन्निदमब्रवीत् ५ प्रतियातुकुमारोऽयंनह्यस्मादस्तिमेभयम् ॥ अष्टमाद्युवयोःपुत्रान्मृत्युर्मेविहितःकिल ६ तथेतिसुतमादाययययावानकदुंदुभिः॥ ना म्यनंदततद्वाक्यमसतोऽविजितात्मनः ७ अथकंसमुपागम्यनारदोब्रह्मनंदनः ॥ एकांतमुपसंगम्यवाक्यमेतदुवाचह ८ नंदाद्यायेव्रजेगोपायाश्चामी षांचयोषितः ॥ वृष्णयोवसुदेवाद्यादेवक्याद्यायदुस्त्रियः ९ सर्वेवैदेवताप्रायाउभयोरपिभारत ॥ ज्ञातयोबंधुसुहृदोयेचकंसमनुव्रताः १० असुराःसर्वएवैते लोकोपद्रवकारिणः ॥ गतेथवसुदेवेतुदेवकार्यार्थमुद्यतः ११ एतत्कंसायभगवान्शंसयामासनारदः ॥ भूमेर्भारावतीर्णानांदैत्यानांचवधोद्यमम् १२ ऋषे र्विनिर्गमेकंसोयदून्मत्वासुरानिति ॥ देवक्यागर्भसंभूतंविष्णुंचस्ववधंप्रति १३ देवकींवसुदेवंचनिगृह्यनिगडैर्गृहे ॥ जातंजातमहन्पुत्रंतयोरजनशंकया १४ मातरंपितरंभ्रातॄन्सर्वांश्चसुहृदःसखीन् ॥ निघ्नंत्यसृपोलुब्धाराजानःप्रायशोभुवि १५ आत्मानमिहसंजातंजानन्प्राग्विष्णुनाहतम् ॥ महासुरंकाल नेमिंयदुभिःसव्यरुध्यत १६ उग्रसेनंचपितरंयदुभोजांधकाधिपम् ॥ स्वयंनिगृह्यबुभुजेशूरसेनान्महाबलः १७ इतिश्रीभागवतेमहापुराणेदशमस्कंधेद्वि तीयोऽध्यायः २ श्रीशुकउवाच ॥ प्रलंबबकचाणूरतृणावर्त्तमहाशनैः ॥ मुष्टिकारिष्टद्विविदपूतनाकेशिधेनुकैः१ अन्यैश्चासुरभूपालैर्बाणभौमादिभिर्युतः॥ यदूनांकदनंचक्रेबलीमागधसंश्रयः २ तेपीडितानिविविशुःकुरुपांचलकैकयान् ॥ शाल्वान्विदर्भान्निषधान्विदेहान्मागधानपि ३ एकेतमनुरुंधानाज्ञात यःपर्युपासते ॥ मथुरायांस्थिताश्चैवयेऽक्रूराद्याविशांपते ॥ हतेषुषट्सुबालेषुदेवक्याऔग्रसेनिना ४ सप्तमोवैष्णवंधामयमनंतंप्रचक्षते ॥ गर्भोबभूवदे वक्याहर्षशोकविवर्धनः ५

स्मिन्नध्याये तत्रदुष्टेंद्रियैःसहेंद्रियनिग्रहइवकंसःप्रलंबादिभिःसहितोयदुनिग्रहमकृतेत्यादिकंनिरूपयति प्रलंबेत्यादिना १ कदनंकलहं मागधोजरासंधःसंश्रयोयस्यसतथा तंसंश्रयतीतिवा २ ते यादवानिविविशुःनिवेशनंचक्रुः ३ अनुरुंधानाःअनुवर्तमानाः ४ वैष्णवंधामविष्णुतेजःसन्निहितं । हर्षशोकविवर्धनइतिउत्पत्तिप्रस्रवणाभ्यामितिशेषः हर्षंसमेधयन्शोकमेधयन्नितिवा ५

६ ७ पर्वतविवरेषु ८ स्वांशभागेनस्वांशांशेन अंशस्यभागोभजनंस्वीकारःतेनेतिवा ९ १० ११ दुराधिगमत्वाद्दुर्गाभद्रामंगलानीलाचेतिभद्रकाली सर्वादिशोविजयतीतिविजया विष्णोरियंवैष्णवी कौमूंमोमोदतीतिकुमुदा चंडिकोपइतिधातोःशत्रवेकुपितत्वाच्चंडिका सदानंदत्वात्कृष्णा मधुकुलोत्पन्नत्वान्माधवी विष्णुदयितत्वाद्वा कंसुखंनयतीतिकन्या नित्यकुमारीवा १२ मीयतेज्ञायतेइति माया मांयातीतिवा नारस्यनरसमुदायस्यअयनत्वान्नारायणी सर्वस्येष्टेतिईशाना शीर्यतइतिशारःतंसंसारंद्यतिखंडयतीतिशारदा शत्रुविषयंशारंहिंसांददातीतिवा सर्वस्यमातृत्वादंबिका १३ बलोच्छ्रयाद्बलोन्नतेः १४ तद्वचनंतथेतिस्पष्टीकरणंतथेत्योमिति तथाकरोमीतितद्वचःप्रतिगृह्णातिवा १५ योगनिद्रयादेवक्याःगर्भेरोहिणीप्रणीतेसति विस्रंसितःस्रावितःनिर्गलितइतिविचुक्रुशुः१६ १७ पौरुषं धामपुरुषाकारीभूतंविष्णुतेजः १८ वसुदेवप्रवेशानंतरंदेवीअच्युतस्यहरेरंशकृष्णकेशलक्षणंदधारजगन्मंगलयतिभूभारहरणेनजगन्मंगलंकरोतीतिजगन्मंगलम् शूरसुतेनवसुदेवेनसमाहितम् सर्वात्मनः

भगवानपिविश्वात्माविदित्वाकंसजंभयम् ॥ यदूनांनिजनाथानांयोगमायांसमादिशत् ६ गच्छदेविव्रजंभद्रेगोपगोभिरलंकृतम् ॥ रोहिणीवसुदेवस्य भार्यास्तेनंदगोकुले ७ अन्याश्चकंससंविग्नाविवरेषुवसंतिहि ॥ देवक्याजठरेगर्भंशेषाख्यंधाममामकम् ८ तत्सन्निकृष्यरोहिण्याउदरेसन्निवेशय ॥ अथाहं स्वांशभागेनदेवक्याःपुत्रतांशुभे ९ प्राप्स्यामित्वंयशोदायांनंदपत्न्यांभविष्यसि ॥ अर्चिष्यंतिमनुष्यास्त्वांसर्वकामवरेश्वरीम् १० नानोपहारबलि भिःसर्वकामवरप्रदाम् ॥ नामधेयानिकुर्वंतिस्थानानिचनराभुवि ११ दुर्गेतिभद्रकालीतिविजयावैष्णवीतिच ॥ कुमुदाचंडिकाकृष्णामाधवीकन्यके तिच १२ मायानारायणीशानाशारदेत्यंबिकेतिच १३ गर्भसंकर्षणात्तंवैप्राहुःसंकर्षणंभुवि ॥ रामेतिलोकरमणाद्बलभद्रंबलोच्छ्रयात् १४ श्रीशुकउवाच संदिष्टैवंभगवतातथेत्योमितितद्वचः ॥ प्रतिगृह्यपरिक्रम्यगांगतातत्तथाकरोत् १५ गर्भेप्रणीतेदेवक्यारोहिणीयोगनिद्रया ॥ अहोविस्रंसितोगर्भइति पौराविचुक्रुशुः १६ भगवानपिविश्वात्माभक्तानामभयंकरः ॥ आविवेशांशभागेनमनआनकदुंदुभेः १७ सबिभ्रत्पौरुषंधामराजमानोयथारविः ॥ दुरा सदोऽतिदुर्धर्षोभूतानांसंबभूवह १८ ततोजगन्मंगलमच्युतांशंसमाहितंशूरसुतेनदेवी ॥ दधारसर्वात्मकमात्मभूतंकाष्ठायथानंदकरंनभस्तः १९

सर्वव्यापिनोहरेःयासर्वव्यापित्वशक्तिःसाऽस्यास्तीतिसर्वात्मकस्तम् । आत्मभूतंदेवक्यांप्रत्यगात्मस्वरूपम् आत्मनोमनसोभूतमभिव्यक्तंवा आत्मभुवश्चतुर्मुखस्यभूतमिष्टसाधकत्वादिष्टंदैवंवा आनंदकरंमुक्तमपंचस्यापिसुखकरं कथमिव काष्ठापूर्वादिक् आनंदोऽमृतंकरोयस्यसतमानंदकरंचंद्रंनभस्तआकाशेयथादधातितथाहृदयाकाशेदधार नतुयोन्याकाशे कीदृशीकाष्ठापूर्णमनोरथा कीदृशीदेवीद्योतमाना कीदृशंचंद्रंरात्र्यांधकारनिरासेनजगन्मंगलभूतम् च्युतिरहिताअंशाःकरायस्यसतथातंपूर्णकलमित्यर्थः शूरश्चंडकरःसूर्यस्तत्सुतःसुषुम्नाख्योरश्मिस्तेनसमाहितंनिष्पादितं अमावास्यायांसूर्येलीनःतस्यसुषुम्नाख्यरश्मिनाअभिव्यज्यतइतिशास्त्रप्रसिद्धिः सर्वासामोषधीनामंकुरजनकत्वेनश्रेष्ठत्वात्सर्वात्मकंआत्मनोमनसोभिमानित्वादात्मभूतं लोकविडंबनार्थंपितृमातृ प्रवेशक्रमःनतुशरीरस्वीकारार्थं तदुक्तम् आविश्यपितरंविष्णुस्वरूपेणैवमातरः । विडंबनार्थंलोकस्यनिर्जनिश्चाप्यथाविशत् । आनंदमात्रदेहेनजातवत्संप्रदृश्यतइत्यादिना १९

॥ ४ ॥

सादेवकीप्रथमंभोजेंद्रगेहेरुद्धानविरेजइति नत्रमध्यात्हत्यव्याख्येयम् पश्चात्सर्वंजगंत्यास्मिन्निवसंतीतिसर्वजगन्निवासाविष्णुः तस्यानिवासभूता हतुगर्भावशषणम् नितरामत्यतावरजनरजइतिपाठन ओऽध्याहार्यत्वम् अत्रदृष्टांतः दाहकाग्निशिखादाह्यतृणपटलादिनारुद्धानराजते पुनःशुष्केणतेनैवज्वलितायथाराजतेयथावासतीसरस्वतीसत्यरूपावाणीद्यूतस्खलेद्यूतरंगस्थलेअनृतेनरुद्धानराजते सैवनिर्व्याजारोचतेतथेतिअन्यथायथास्थितकथनंदृष्टांतदार्ष्टांतिकविरोधादयुक्तम् २० अजितंभरांविष्णुंदधानांजेतुमशक्यगर्भभरांवा अंतःस्थितविष्णुप्रभावर्धितस्वदेहप्रभयागर्भरूपेणतद्हृदयगु हांप्रविष्टोयद्यस्मात्तत्तस्माद्ध्रुवम् २१ अस्तुतवप्राणहरोहरिस्ततःकिमत्राह किमद्येति अद्येमंयातस्मिन्गर्भस्मितेहरौघटनीयंउपद्रपत्वेनकर्तव्यंतत्केनप्रकारेणेतिचिंत्यते तदप्याशुकर्तव्यं नकालः क्षेपणीयः कुतोऽत्राह अर्थेति अधुनाअहमर्थतंत्रःप्रयोजनाधीनइतिपत्तस्मात्कालोनक्षेपणीयइतितत्राह यथेति यथाअयमर्थतंत्रःदेवकार्यलक्षणप्रयोजनैकपरायणोगर्भस्थितोहरिःममविक्रमंजो वनलक्षणंनविहंति तथाझटितिकरणीयमित्यर्थः यथाअर्थतंत्रःपुरुषःस्वविक्रमंनविहंतितथेतिवा ननुतर्हितद्धधएवश्रेयानितितत्राह स्त्रियइति अयंस्त्रियोवधोयशोहंति अस्त्वयशस्करस्ततःकिंतत्राह स्वसुरिति स्वसुर्वधःश्रियंहंति जीवन्भद्राणीतिवचनात्तदप्यास्त्वितितत्राह गुरुमत्याइति गर्भिण्यावधोनुकूलंक्षप्रमायुर्हरतिअतोवधोनघटनीयइतिभावः २२ ननुलोकेकेषांचित्क्रूरकर्मिणांदीर्घायुष्यदर्शना

सादेवकीसर्वजगन्निवासनिवासभूतानितरांविरेजे ॥ भोजेंद्रगेहेऽग्निशिखेवरुद्धासरस्वतीद्यूतस्खलेयथासती २० तांवीक्ष्यकंसःप्रभयाजितंभरांविरोचयंतींभवनंशुचिस्मिताम् ॥ अहैषमेप्राणहरोहरिर्गुहांध्रुवंश्रितोयन्नपुरेयमीदृशी २१ किमद्यतस्मिन्घटनीयमाशुमेयथार्थतंत्रोनविहंतिविक्रमम् ॥ स्त्रियः स्वसुर्गुरुमत्यावधोयंयशःश्रियंहत्यनुकूलमायुः २२ सएषजीवन्खलुसंपरेतोवर्तेतयोऽत्यंतनृशंसितेन ॥ देहेमृतेतमनुद्यर्थकामौयशोमलंगौरभिमानि नोध्रुवम् २३ इतिघोरतमाद्भावात्सन्निवृत्तःस्वयंप्रभुः ॥ आस्तेप्रतीक्षंस्तज्जन्महरैर्वैरानुबंधवित् २४ आसीनःसंविशंस्तिष्ठन्भुंजानःपर्यटन्पिबन् ॥ चिंतयानोहृषीकेशमपश्यत्तन्मयंजगत् २५ ब्रह्माभवश्चतत्रैत्यमुनिभिर्नारदादिभिः ॥ देवैःसानुचरैःसाकंगीर्भिर्विष्णुमथास्तुवत् २६ ब्रह्मभवावूचतुः ॥ सत्यव्रतंसत्यपरंत्रिसत्यंसत्यस्ययोनिंनिहितंचसत्ये ॥ सत्यस्यसत्यमुतसत्यनेत्रंसत्यात्मकंत्वांशरणंप्रपन्नाः २७

स्तवापिकिंनस्यादित्यतआह सएषइतिजीवन्परेतोजीवन्मृतो नकेवलंक्रूरकर्मकर्तुरत्रजीवन्मृतमात्रंअपितुमृतेपुरुषार्थसर्वस्वहानिःस्यादित्याह देहइति । अभिमानिनोदेहमृतेपंचत्वंप्राप्तेतंदेहमन्वर्थकामौ पुरुषार्थौनश्यतःसाधकाभावात् हिशब्दोर्थकामावनुधर्मौनश्यतीतिदर्शयति तमनुगौःस्वर्गादिशब्दवाच्योलोकोनश्यति साधकाभावात् । देहमनुमानिनोऽमलंयशोनश्यतिध्रुवंतत्रनसंशयइत्यर्थः । अर्थकामयशआदिनाशेगौर्दृष्टिर्ज्ञानंनश्यति । तांदृष्टिमनुमानिनःपुंसोध्रुवंनित्यसुखानुभवलक्षणोगोर्मोक्षोनश्यतीतिवा । स्वतोनृतस्यापिकंसस्यएवंविधंज्ञानंसच्चेतनावेशादुपपद्यतेइतिक्षुद्रबाधानवका शःगौर्दृष्टिर्दीधितिःस्वर्गइतिहलायुधः २३ भावात्कर्मणः । भावोलीलाक्रियाचेष्टाइतियादवः । स्वयंप्रभुर्ज्ञानित्वाभिमानी स्वमनसैवसमर्थइतिवा । वैरानुबंधवित् वैरंअनुबंधंस्नेहंचवेत्तीतिवैरमनु स्नेहंकरोतीतिवा । विदकृतावितिधातुः । अनेननिरंतरतांचिंतयास्नेहस्तकर्पते ननुतात्त्विकः स्वतएवप्रधानोद्वेषइतिच्वनयतिनिरंतरंवैरकृद्वा २४ तच्चिंताप्रकारंदर्शयति आसीनइति संविशन्शया नः हृषिरानंदःसएवकेशोयस्यसतथातं यद्वा हृषीकानामिंद्रियाणामीशइति तत्तत्पदार्थस्यकृष्णात्मकत्वमाशंक्यतन्मयत्वं २५ २६ तत्रशंकरादिभिःसमेतोब्रह्माज्ञानिसुगमगुणविशिष्टंविष्टरश्रवसमभि ष्टौति सत्यव्रतमिति वयंत्वांशरणंप्रपन्नाइत्यन्वयः कीदृशंत्वांसत्यव्रतंपूर्णानंदज्ञानलक्षणंसत्यंतदेवव्रतंव्यावृत्तंरूपंयस्यसतथातंसद्वयःपृथिव्यग्नेजोभ्यःत्ययोर्वाय्वाकाशयोःपरत्वाद्विलक्षणत्वात्सत्यपर

त्रयाणांवेदानांसत्यत्वान्मुख्यार्थत्वाच्चसत्यः तं सत्यस्याबाधितप्रपंचस्ययोनिंमूलकारणंसत्येजगत्यंतर्नियामकत्वेनानिहितं । सत्यस्यविश्वस्योत्तमानंदज्ञानदंसत्यंसत्यस्यप्रपंचस्यनेत्रंनेतारंसत्यात्मकं सत्यस्यप्रपंचस्यभर्तृत्वादादानाच्चसत्यात्मकः तं कप्रत्ययःप्रशंसायां उतशब्दःसमुच्चयार्थः । सच्छब्दउत्तमंब्रूयादित्यादिनाऽक्षरार्थोज्ञातव्यः प्रामाणिकत्वात्ग्राह्यमेतदितिसिद्धं यद्वा अनृतापियवर्ज नंयथार्थकथनंसत्यंतदेवव्रतंनियमोयस्यसतथातं अजस्यावक्रतेजसइतिहिश्रुतिः । सत्यसंहितावैदेवाइतिच । सत्यपरंधर्मपालकं सत्यंधर्मउदाहृतइत्याभिधानं । सत्यपरंसत्तिरवसादनंतस्मादपरम न्यंतद्राहितमित्यर्थः । अविनाशीवाअरेयमात्मेतिश्रुतेः । त्रिषुलोकेषुसत्यंतेषुनष्टेष्वप्याविनष्टमित्यर्थः । सत्यस्यमुख्यप्राणस्ययोनिमुत्पादकं आत्मनएषप्राणोजायतइतिश्रुतिः । सत्येमुख्यप्रा णेनिहितंसन्निहितं सप्राणमसृजतेतिश्रुतिः सत्यमेवनेत्रंनयनंयस्यसतथा सत्यस्यप्रपंचस्यप्रकाशनात्निरुपमचारितत्वेनअबाधितं अद्वैतंपरमार्थतइतिश्रुतिः सत्यादेवास्तेनेत्रंशिष्यादिषुनेतारोयस्य सतथा । तंदेवाःप्राणयंतेतिश्रुतिः सत्यमबाधितमात्मनःकंसुखंयस्यसतथा तंअबाधितस्वरूपसुखं एषह्येवपरमानंदइतिश्रुतिरिति ॥ २७ ॥ ननुप्रपंचोऽयंकेचिज्जीवकर्तृकःकेचित्प्रधानकर्तृकइत्यादि संगिरंतेतत्राह एकायनइति अत्रयत्रशब्दमध्याहृत्यान्वेतव्यं असावादिवृक्षोयत्रस्थितस्तंत्वांशरणंप्रपन्नाइतिपूर्वेणान्वयः चेतनस्यमनुष्यस्यपुरुषार्थत्वादादिभूतमंतरंगसाधनंज्ञानंतेनादिनावृक्ष्यतइ त्यादिवृक्षःप्रपंचः । आदेर्हरेरधीनोवृक्षइतिवा मुक्तामुक्तप्रपंचपक्षीकरणायदूरस्थस्याप्यदस्शब्देनपरामर्शः । ऋचोअक्षरेपरमेव्योमन्यस्मिन्देवाअधिविश्वेनिषेदुःउतामृतत्वस्येशानइत्यादिश्रुतिःएकाचे तनाचेतनात्मकलक्षणाप्रकृतिरयनंआश्रयोयस्यसएकायनः यत्किंचजगत्यांजगदितिश्रुतिः द्वेफलेप्रवृत्तिनिवृत्तिलक्षणेयस्यसद्विफलः सत्वादिगुणामूलानियस्यसःत्रिमूलः चत्वारोरसाधर्मादिमोक्षांता यस्यसचतूरसः तत्रप्रवृत्तफलस्यधर्मादयस्त्रयोरसाः निवृत्तफलस्यमोक्षएकोरसइतिविभागःपंचमात्राःशब्दादयःशिफायस्यसपंचशिफः अस्तिजायतेपरिणमतेविवर्धतेअपक्षीयतेविनश्यतीतिषड्विकारानाप्रो

एकायनोऽसौद्विफलस्त्रिमूलश्चतूरसःपंचशिफःषडात्मा ॥ सप्तत्वगष्टविटपोनवाक्षोदशच्छदीद्विखगोह्यादिवृक्षः २८ त्वमेकएवास्यसतःप्रसूतिःस्थानंनि धानंत्वमनुग्रहश्च ॥ त्वन्माययासंवृतचेतसस्त्वांपश्यंतिनानानविपाविश्चितोये २९

तीतिषडात्मा त्वक्चर्ममांसरुधिरमेदोमज्जास्थीनित्वग्रूपेणवर्ततेयस्यससप्तत्वक् देवगंधर्वदानवराक्षसपिशाचतिर्यङ्मानुषस्थावरलक्षणाअष्टविटपायस्यसोष्टविटपः नवाक्षाइंद्रियाधिष्ठानभूतायस्यसनवा क्षः अक्षोरथांगआधारेव्यवहारेबिभीतके शकटेपाशकेकर्षेद्यूतभेदेऽक्षइंद्रियेइतियादवः दशच्छदाःपत्रस्थानीयानींद्रियाणिअस्यसंतीतिदशच्छदी प्रवृत्तिमार्गस्थानिवृत्तिमार्गस्थाइतिद्विप्रकाराःखगाः पुण्यापुण्यफलभागिनोजीवायस्यसद्विखगः तदुक्तं जगद्वृक्षाश्रयाइत्यादि द्विशब्देनकारणस्यसदसत्त्वात्प्रवाहेणचसन्नसावित्यादिनाजगद्वृक्षस्यसनातनत्वंविष्णुकारणत्वंदर्शयतिहरिरेकएवायनंयस्यासौ सतथा द्वेपुण्यपापेफलेयस्यसतथा तिस्रोजाग्रदाद्याअवस्थायस्य तिस्रोव्याहृतयोवेदावामूलंयस्यसतथा चत्वारोरसाःस्वर्गमोक्षनरकतमोलक्षणायस्यसतथा प्राणापानव्यानोदानसमानाख्याःपंचशिफा अवांतरमूलानियस्यसतथा अशनापिपासाशोकमोहजरामृत्यवःषडात्मानःसहजायस्य सप्तच्छंदांसित्वक्स्थानीयानियस्यअष्टविटपाःपंचमहाभूतानिमनोबुद्ध्यहंकाराः विटपायस्यनवनवाक्षाव्यवहा राअष्टादशभाषायस्यसतथा तंत्रन्यायेननवशब्दस्यएकोच्चारणंपायूपस्थयोरेकत्वेननवेंद्रियाणिवा यस्यदशेंद्रियविषयाःशब्दस्पर्शादयःदशच्छदाअस्यसंतीति द्वौखगौजीवपरमात्मानौयस्य आदिरद नयोग्यःहरेरन्यभूतःप्रपंचःसएववृक्षःआदिवृक्षः अनेनजगद्वृक्षस्यहरेरधीनत्ववर्णनेनहरेरत्युत्तमत्वमुक्तंभवतीति ॥ २८ ॥ ननुब्रह्मादेवानांप्रथमःसंबभूवविश्वस्यकर्ताभुवनस्यगोप्ता एकोरुद्रो नद्वितीयोऽवतस्थेइत्यादिनेतरेषामपिजगदाश्रयत्वप्रतीतेर्हरेरेवतल्लक्षणंकथंस्यादितितत्राह त्वमेकएवेति अस्यसतःसत्यजगतःप्रसूयतइतिप्रसूतिःकारणं तिष्ठत्यस्मिन्निति स्थानं निधीयतेस्मिन्निति नि धानंअनुगृह्णातिरक्षतीत्यनुग्रहः संवृतचेतसआवृतज्ञानाःत्वांनानापश्यंति येविपश्चितःतेनपश्यंतीत्यनेनहरेरेवोक्तलक्षणंनान्यस्येतिनिरणायि २९

तत्तत्कालप्राप्तानर्थपरिहारलक्षणपालनंचावतारलक्षणस्वरूपग्रहणेनेत्याह बिभर्षीति अवबोधात्मन्ज्ञानस्वरूपत्वव्यापकरणइत्यनेनशुक्र...
रिहारलक्षणपालनाय क्षेमोनाशप्तरक्षायामितियादवः सत्वोपपन्नानिबलज्ञानसमाहारयुक्तानि सतामस्माकंसुखकराणि कंसादिखलानामभद्राणि तमआद्यमंगलकराणि ३० सतांसुखा
वहानीत्येतद्विवृणोति त्वयीति अखिलसत्वधाम्निसदासर्वगुणानामाधारभूतेत्वयिसमाधिनाउपास्त्याआवेशितचेतसःतत्क्षप्तचित्ताःयेपुरुषाःतेमहत्कृतेनतयैवोपास्त्या यथा महद्भिस्तीर्णभवतित
थाविरचितेनपुवेनभवाब्धिसंसारसागरंघोरगोवत्सपदंकुर्वांति यथावत्सचरणभारकृतनिम्नस्थितजलमयक्षेनतरंतितथेत्यन्वयः ३१ नन्वस्तुगोवत्सपदोपमोभवाब्धिर्महांतःतेतमुत्तीर्यकुत्रयांतीति
तत्राह स्वयंसमुत्तीर्योति हेद्युमन्तेजोमूर्ते येअदभ्रसौहृदाःस्वस्वयोग्यभक्तिपूर्णाःस्वयमकृत्रिमयाभवत्पदांभोरुहनावादुस्तरंभवार्णवंसमुत्तीर्यतीर्त्वास्थितास्तेत्रयोग्यादिषुशिष्यादिषुउपदेशेननि
धायतांभवत्पदांभोरुहनावमेवयाताः नान्यत्रातामवंतीति यदतोभवान्सतएवानुगृह्णातीतिसदनुग्रहोनामेत्यर्थः ननुसत्वोपपन्नानीत्यादौसत्वगुणात्मकत्वप्रतीतेस्तीर्त्वापुनस्तत्प्राप्तिःकथंमुक्तिः
स्यात्तस्यानिर्गुणरूपत्वादुच्यते अत्रसत्वशब्देननसत्वगुणविवक्षा किंतुज्ञानादिगुणसामग्री प्रामाणिकत्वात् तदुक्तं सदासर्वगुणाढ्यत्वादित्यादि त्वत्पादपोतेनेत्यनेनभगवद्भक्तस्यशिवादिपादपो
तपुरुषाद्वैशिष्ट्यंज्ञाप्यते तदुक्तं भगवत्पादपोतोसावित्यादि ननु लोकेनौतीर्णस्यतांविहायदेशांतरगतिदर्शनात्कथंतामेवाश्रिताइतियुज्यतइतिचेन्न भगवत्पादनावोवैलक्षण्यादर्थवैलक्षण्यस्यसंभवात्

बिभर्षिरूपाण्यवबोधआत्मन्क्षेमायलोकस्यचराचरस्य ॥ सत्वोपपन्नानिसुखावहानिसतामभद्राणिमुहुःखलानाम् ३० त्वय्यंबुजाक्षाखिलसत्वधाम्नि
समाधिनावेशितचेतसोये ॥ त्वत्पादपोतेनमहत्कृतेनकुर्वंतिगोवत्सपदंभवाब्धिम् ३१ स्वयंसमुत्तीर्यसुदुस्तरंद्युमन्भवार्णवंभीममदभ्रसौहृदाः ॥ भवत्प
दांभोरुहनावमत्रतेनिधाययाताःसदनुग्रहोभवान् ३२ येन्येरविंदाक्षविमुक्तमानिनस्त्वय्यस्तभावादविशुद्धबुद्धयः ॥ आरुह्यकृच्छ्रेणपरंपदंततःपतंत्यधो
नादृतयुष्मदंघ्रयः ३३ तथानतेमाधवतावकाःक्वचिद्भ्रश्यंतिमार्गात्त्वयिबद्धसौहृदाः ॥ त्वयाभिगुप्ताविचरंतिनिर्भयाविनायकानीकपमूर्धसुप्रभो ३४ सत्वं
विशुद्धंश्रयतेभवान्स्थितौशरीरिणांश्रेयउपायनंवपुः ॥ वेदक्रियायोगतपःसमाधिभिस्तवार्हणंयेनजनःसमीहते ३५

तदुक्तंभगवत्पादनौकायाइत्यादि अस्यार्थः यामगवत्पादनौकाइयंअन्यनौकोपमानभवति कुतःतयाभवगत्पादनावाभवाब्धितीर्त्वाश्रीहरिपादनावंतांप्राप्यसुखांतिष्ठंतीतियस्मात्तस्मादिति लोकेचकर्ण
धारादयःतयाब्धितीर्त्वातत्तीरएवतामाश्रित्यतिष्ठंतोदृश्यंतेइत्यतोऽविषमोदृष्टांतइतिसंतोष्टव्यं ३२ खलानामित्युक्तंविवृणोति येन्येइति रविंदंअंधकारः सनभवतीत्यरविंदंप्रकाशःज्ञानमितियावत्अं
धकारोरविंदांधतिमिरंतमउच्यतइत्युत्पलमाला । येसद्वचोऽन्येखलाःतेततःपरमपदात्योगारूढाःपतंतीत्यन्वयः पतनेकारणमाह अनादृतेति । अधिरधिलंघिगत्यार्थइतिधातोःअनुपासितभगवज्ज्ञा
नाः ज्ञानाभावेकारणमाह त्वयीति । त्वय्यस्तभावात्त्वद्विषयभक्त्यभावात्अविशुद्धबुद्धयःदुष्टांतःकरणाःदुष्टज्ञानावा किंकृत्वापतंतीतितत्राह आरुह्येति । कृच्छ्रेणमहतायासेनपरंपदंभगवत्प्राप्तिनिमित्त
योगमारुह्यसंन्यासाश्रमंप्राप्यतदनुष्ठानसामर्थ्याभावात्पतंतीत्यर्थः योगप्रवाप्यतद्भंशेनिमित्तमाह विमुक्तेति । विमुक्तावयमित्यभिमानोयेषामस्तीति ताच्छीलिकोणिनिः हेविमुक्तेतिवा अभिमानएवभ्रं
शेकारणमित्यर्थः ३३समःसमाधिःप्रकृतेइतिनेत्याह तथानेति करावलंबबाहुल्यात्उत्तमाश्रमान्भ्रश्यंतीत्यर्थः विनायकाःविघ्नाःश्रेयःप्रतिबंधिनःतेषामनीकंसैन्यंतत्पतयः । विनायकानीकपाःतेषांमूर्ध
सुउपरितनानतिक्रम्यश्रेयसएवयतंतइत्यर्थः३४अधुनाकस्मिन्नधिष्ठानेस्थितोहरिःपूज्यःकैःसाधनैरितितत्स्पष्टयति सत्वमितिस्थितावितिसप्तमीचतुर्थ्यर्थेस्थितौज्ञानस्थिरीकरणायभवान्विशुद्धसत्वंवपुः
रजस्तमोभ्यामस्पृष्टंब्रह्मादिशरीरंश्रयते । विशिनष्टि शरीरिणामिति ज्ञानार्थिनांजीवानांश्रेयउपायनंश्रेयःसाधनम्। जनोयेनब्रह्मादिशरीरेस्थितेनहरिणोपदिष्टमार्गेणवेदादिभिस्त्वदर्हणंपूजांसमीहतेक

तिअतस्त्वत्प्रसाद.दवाप्तंज्ञानमेवस्थितंभवतीत्यर्थः विशुद्धसत्वंब्रह्मादेरितिवचनादुक्तएवार्थः३५ ब्रह्मादिदेहसन्निहितहरिप्रसादोत्पन्नज्ञानंपुरुषार्थसाधनमित्युक्तंतदनंगीकारेबाधकमाह सत्वमिति भो धातरिदंनिजमात्मीयंविज्ञानंविशिष्टंज्ञानंयस्मात्तत्तथास्वयंचज्ञानरूपं सत्वंब्रह्मादिदेहाख्यं अज्ञानभिदापमार्जनं अज्ञानान्यथाज्ञाननिवर्तकंनभवेच्चेद्यदितर्हिविमतंज्ञानंकेनचिज्जनितंकार्यत्वात्घटवदिति सत्वगुणोत्पन्नज्ञानैर्भवाननुमीयतेतदनुमितोनस्यात् यदिनस्यात्तर्हिअगुणोभवान्यस्यकस्ययेनकेनवासाधनेनप्रकाशतेज्ञायतेएतदुक्तंभवति यदिब्रह्मादिदेहसन्निहितश्रीनारायणप्रसादात्यज्ज्ञानमज्ञाननिवर्त्तकत्वेनश्रेयःसाधनंनस्यात्तर्हितज्ज्ञानाभावेनतद्विषयेलिंगस्थानंनस्यात् तद्यदिनस्यात्तर्हित्वज्ज्ञानाभावेनत्वत्पूजाविधानंनस्यात् तन्नस्याद्यदिजगदांध्यंस्यात्नचेदमुपपन्नं कश्चिन्मां वेत्तितत्त्वतः । प्रियोहिज्ञानिनोऽत्यर्थमित्यादिवाक्यप्रामाण्यान्यथानुपपत्त्यात्वज्ज्ञानमज्ञाननिवर्त्तकत्वेनपुरुषार्थसाधनंभवतीतिसिद्धं तदुक्तं सत्वंब्रह्मादिदेहाख्यमित्यादिकमस्मिन्नर्थेमानं यद्वा धातृदेहसंनिहितत्वाद्धातरितिसंबुद्धिः । हरेयोभवान्गुणप्रकाशैरनुमीयते अत्रसन्निहितहरिप्रसादादिदंज्ञानमभूत्तस्मादत्रहरिःसन्निहितइतितस्यतवेदंसत्वंनिजंनित्यसन्निधानयोग्यंनभवेच्चेत्तर्हिततउत्पन्नमज्ञानभिद्विज्ञानंमार्जनंस्वरूपतोनाशमाप । यद्येवंतर्हिगुणोज्ञानानंदादिगुणपूर्णोभवान् यस्ययेनवाप्रकाशते नकस्याप्याविर्भूतोनभवति साधनसामग्र्यभावात् यद्वा यस्यतवगुणोनुग्रहलक्षणःप्रकाशतेयेनत्वयागुणोवाप्रकाश्यते यश्चभवान्गुणप्रकाशैरनुमीयतेतस्यतवेदंसत्वंब्रह्माद्यन्यतमाप्रधृष्यंबलंनिजंनभवेच्चेत्तर्ह्यज्ञानभिदामापयतीत्यज्ञानभिदापंविज्ञानमार्जनंवरादिनापादितंभवति नत्वौत्पत्तिकमतोऽप्रतिमंतवसत्वमित्यर्थः इतिगुणप्रकाशैरिंद्रियज्ञानैः । एतदर्थद्वयंसिद्धांताविरुद्धत्वादाचार्यचित्ताव्याकृताकाशांतर्गतमितिज्ञातव्यं श्रोतुर्मतिमवेक्ष्यनोद्गलितमिदमिति ३६ गुणप्रकाशैः तव

सत्वंनचेद्धातरिदंनिजंभवेद्विज्ञानमज्ञानभिदापमार्जनम् ॥ गुणप्रकाशैरनुमीयतेभवान्प्रकाशतेयस्यचयेनवागुणः ३६ ननामरूपेगुणकर्मजन्मभिर्निरूपितव्येतवतस्यसाक्षिणः ॥ मनोवचोभ्यामनुमेयवर्त्मनोदेवक्रियायाःप्रतियंत्यथापिहि ३७ शृण्वन्गृणन्संस्मरयंश्चचिंतयन्नामानिरूपाणिचमंगलानिते ॥ क्रियासुयस्त्वच्चरणारविंदयोराविष्टचित्तोनभवायकल्पते ३८

सद्भावानुमानंयथातथातवनामरूपानुमानेनापित्वत्सद्भावज्ञानंकिंनस्यादत्राह ननामेति । त्वन्नामरूपाभ्यांत्वत्सद्भावज्ञानसंभवात्किमायाससाध्येनपरिशेषप्रमाणेनेत्यतोवात्राह ननामेति । शुक्लभास्वरं तेजइतिगुणेनकृपीटयोनिरग्निरितिजन्मनादहनोग्निरितिकर्मणायथाग्निर्निरूप्यते । तथातवनामरूपेनानिरूपितव्येनिरूपयितुमशक्येलोकप्रसिद्ध्यभावात् अप्राकृतत्वात्सत्वाद्यभावात्अक्लिष्टकारित्वान्नित्यत्वात् नचनामादिकंमिथ्येत्याह तस्येति । तस्यनामादेःसाक्षिणःसाक्षाद्द्रष्टुर्नहीश्वरज्ञानगोचरस्यमिथ्यात्वंवक्तुंयुक्तं तथासतिसर्वत्रानाश्वासप्रसंगःस्यात्तस्माद्वाचारंभणंविकारइतिश्रुत्यवष्टंभेननामरूपयोर्मिथ्यात्वेनहरेस्तेनस्तइतिनवक्तव्यं किंत्वलौकिकार्थसन्नाम्नांतद्वाच्यरूपाणांवाऽनंतत्वादनामादिवचनमितिज्ञानिमनसाचानुमेयानिनामरूपाणिसंति सर्वनामासर्वकर्मारुक्मवर्णंकर्तारमीशमित्यादिश्रुतेरित्याशयेनाह मनोवचोभ्यामिति यद्ययमनामास्यात्तर्हिशब्दावाच्यःस्यात् नचतथा अहमेवेत्यादिश्रुतेरित्यादि ननुज्ञानाभावान्नास्त्येवनामादिकमितित्राह प्रतियंतीति अथापियद्यप्यनंतत्वाज्ज्ञातुमशक्यानिबथापिप्रतियंतिजानंतिज्ञानिनइतिशेषः तज्ज्ञानंचनस्वनियतमित्याह देवेति देवस्यसर्वत्रद्योतमानस्यहरेःक्रियायाःप्रेरणालक्षणायाःश्रीनारायणप्रसादादित्यर्थः लोकसिद्धार्थनाम्नःसइत्यारभ्यजानंतिपरमर्षयइत्यंतमाचार्योक्तेरुक्तार्थसिद्धिरिति अस्तुनामरूपप्रसिद्धिःततःकिंतत्राह हीति हिशब्दोहेतौ ३७ यस्मान्नामादयःसंतितस्मात्क्रियमाणासुक्रियासुप्रेरकत्वेनपूज्यत्वेननामानिशृण्वन्गृणन्रूपाणिचिंतयन्नास्ते सत्वच्चरणारविंदयोःआविष्टचित्तःपुरुषःभवायसंसारायनकल्पतइत्यन्वयःचशब्देन सर्वक्रियासुकर्तृत्वपूज्यत्वेनजनार्दनं योवेत्तिनैतिसंसारंतत्प्रसादान्नसंशयइतिस्मृतेर्नश्रवणादिनापूर्यते किंतु तज्ज्ञानंचावश्यमपेक्षितंभवति ३८

इदानीमवतारप्रयोजनंविज्ञापयंति दिष्ट्येति तवजन्मनाभवतःपदःभवच्चरणस्थानायापाःभुवःभुरकृतभारापनीतइतियत्तादृष्ट्या सवस्यपुत्रस्यमृतपुत्रवा पुत्रादृष्ट्यापजायामातयादव· ववापुकापतेअपुक
पाविषयांद्यांचद्रक्ष्यामःदिष्ट्येत्यभ्यासआदरार्थं पदाद्याश्रयणाद्विष्णोःपृथिव्यादिपदादिकमित्यादिस्मृतिसिद्धंभूमेर्विष्णुपदत्वं ३९ लोकानुग्रहमंतरेणान्यदवतारप्रयोजनंनास्तीतिविज्ञापयन्नीत्याह
नेति नविद्यतेभवःशुक्रशोणितसंपर्कलक्षणंजन्मपरंयतस्तथास्यभवस्यभद्ररूपजन्मादिदोषरहितस्येत्यर्थः भवोभद्रहरेप्राप्तोसत्तारंतारजन्मस्वितियादवः ननुकर्मभेलीयतइवहरेर्जन्मादिमत्वंसत्यमित्या
यातंतथाचतस्यकर्माधीनप्रवृत्तत्वेनेश्वरत्वहानेर्नमोक्षार्थतदुपासनंविधेयमितितत्राह भवइति त्वयीतिषष्ठ्यर्थेसप्तमीअभवाश्रयश्चायमात्माचेत्यभवाश्रयात्मामोक्षाश्रयःस्वामी । तस्यमुक्ताश्रयस्यस्वरूपस्य
वा । तवकृताअंगीकृताःभवादयोविद्ययात्वत्स्वरूपाज्ञानेनसत्याइतिनरामन्यंतेइति यतइतिशेषः । अस्यस्वस्यविद्ययाइच्छयाकृताःसत्यामन्यंतेइति यतस्तस्मात्स्वरूपानादित्वेनईश्वरत्वहान्यभा
वेनत्वदुपासनमेवाविधेर्यमितिभावः अज्ञानादेवमन्यंतेविष्णोर्जन्ममृतीनराः । स्थितिस्वरूपस्यचान्यस्मात्स्थितिमोक्षाश्रयस्यहीतिवचनान्नेंद्रजालमितिमंतव्यमिति ४० भक्तसंकटपरिहारमंतरेणा
न्यदवतारप्रयोजनंनतवास्तीतियतइतोनिकृष्टोत्कृष्टजातिग्रहणेनत्रिभुवनमपादित्युपसंहरतीत्याह मत्स्येति अश्वोहयग्रीवः कच्छपःकूर्मः विप्रोजामदग्न्यःत्रिभुवनंपास्यथाइतिलकारव्यत्ययः त

दिष्ट्याहरेऽस्याभवतःपदोभुवोभारोऽपनीतस्तवजन्मनेशितुः ॥ दिष्ट्यांकितांत्वत्पदकैःसुशोभनैर्द्रक्ष्यामगांद्यांचतवानुकंपिताम् ३९ नतेभवस्येशभवस्य
कारणंविनाविनोदंबततर्कयामहे ॥ भवोनिरोधःस्थितिरप्यविद्ययाकृतायतस्त्वय्यभवाश्रयात्मनि ४० मत्स्याश्वकच्छपनृसिंहवराहहंसराजन्यविप्र
विबुधेषुकृतावतारः ॥ त्वंपासिनस्त्रिभुवनंचतथाधुनेशभारंभुवोहरयदूत्तमवंदनंते ४१ दिष्ट्यांबतेकुक्षिगतःपरःपुमानंशेनसाक्षाद्भगवान्भवायनः ॥
मामूभृद्भयंभोजपतेर्मुमूर्षोर्गोप्तायदूनांभवितातवात्मजः ॥ ४२ ॥ श्रीशुकउवाच ॥ इत्यभिष्टूयपुरुषंयदूपमनिदंयथा ॥ ब्रह्मेशानौपुरोधायदेवाःप्रतिययुर्दि
वम् ४३ ॥ इतिश्रीभा०म०दशमस्कंधेतृतीयोऽध्यायः ३ ॥ श्रीशुकउवाच ॥ अथसर्वगुणोपेतःकालःपरमशोभनः ॥ यर्ह्येवाजनजन्मर्क्षःशांतर्क्षग्रहतारकः
१ दिशःप्रसेदुर्गगनंनिर्मलोडुगणोदयम् ॥ महीमंगलभूयिष्ठपुरग्रामव्रजाकरा २ नद्यःप्रसन्नसलिलाह्रदाजलरुहश्रियः ॥ द्विजालिकुलसन्नादस्त
बकावनराजयः ३ ववौवायुःसुखस्पर्शःपुण्यगंधवहःशुचिः ॥ अग्नयश्चद्विजातीनांशांतास्तत्रसमिंधत ४ मनांस्यासन्प्रसन्नानिसाधूनामसुरद्रुहाम् ॥
जायमानेऽजनेतस्मिन्नेदुर्दुंदुभयोदिवि ५ जगुःकिन्नरगंधर्वास्तुष्टुवुःसिद्धचारणाः ॥ विद्याधराश्चनृतुरप्सरोभिःसमंमुदा ६

थासातिकार्येकृतेप्यस्माभिरेतावदेवानुष्ठीयतेकृतप्रतिनिध्यभावादित्याह यदूत्तमेति अस्त्वतिशेषः ४१ भगवद्भक्तबहुमानातिशयेनापिभागवतोधर्मइतिप्रदर्शनायदेवकीमाह दिष्ट्येति दिष्ट्यामंग
लं दिष्ट्यास्यान्मंगलादिष्वितियादवः साक्षात्तुर्यःजाग्रदाद्यवस्थातिक्रांतः भविताभविष्यति ४२ यद्रूपमनिदंप्रत्यक्षसिद्धंजगद्विलक्षणंतपुरुषंपूर्णयथायथावदभिष्टूययद्वायद्रूपंयथाऽनिदंप्रतीयतेतादृशै
र्विशेषणैरभिष्टूय ४२ ॥ इतिश्रीभावतेमहापुराणेदशमस्कंधेविज०कृतटी०तृतीयोऽध्यायः ॥ ३ ॥ भगवद्भक्तयर्थतदवतारप्रयोजनंसमयेनाविर्भूतपूर्वकालादिगुणैर्विलासमाह श्रीशुकइति सर्वेषांग्रहा
णामुच्चस्थानगतत्वादिगुणविशिष्टः सर्वगुणोपेतः परमंशोभनंयस्मात्सतथा अजननजन्मर्क्षंराद्दिणीयत्रसतथा शांतानिप्रसन्नानिऋक्षाणिग्रहाश्चतारकायस्मिन्सतथा यर्हियदैवंविधःकालः १ तदादिशःप्रसे
दुरित्यादिकमभूत् निर्मलोडुगणस्यउदयोयस्मिन्सतथा । मंगलपूर्णाःपुराणिग्रामाव्रजाकराश्चयस्यांसातथा २ जलरुहाणांपद्मानांश्रियोयेषुतथा वनराजयःवनपंक्तयः ३ समिंधतज्वलिताः ४ ५ ६

सुमनांसिपुष्पाणि अनुसागरंसमुद्रस्योपांते ७ जायमानइतिद्विर्वचनंजन्मवैलक्षण्यप्रदर्शनपरम् देवस्यहरेरूपंअस्यामस्तीतिदेवरूपिणीतस्यां ८ ९ शंखगदेआदीयेषांतानिशंखगदादीनितानिचोत्कृष्टानिचायुधानियस्यसतथातं श्रीवत्सलक्ष्मंश्रीवत्सलांछनं सांद्रपयोदसौभगंसांद्रपयोदस्यजलपूर्णमेघस्येवसौभगंकांतिविशेषोयस्यसतथातं १० महार्हाणिअनर्घ्याणिवैदूर्यमयकिरीटकुंडलानि महार्हवैदूर्यकिरीटकुंडलानितेषांत्विषाशोभयाकिरीटंचकुंडलेचकिरीटकुंडलानिपरिष्वक्ताआलीढाःसहस्रकुंतलायस्यसतथा ११ अस्पृशत्दास्यामीतिमनसासंकल्पवान् मुदाप्लुतः १२ कृतधीःशिक्षितबुद्धिःपंडितइत्यर्थः गतभीत्वेनिमित्तंप्रभावविदिति १३ प्रकृतेःपरत्वेनकेवलानुभवानंदस्वरूपत्वेनसर्वबुद्धिसाक्षित्वेनचपुरुषःषड्गइतिभवान्पूज्यस्त्वंविदितोसिसाक्षान्नोपचारमात्रं १४ ननुसाक्षित्वेनोदासीनश्चेज्जगत्सृष्टाकइतितत्राह सएवेति तदनुसृष्टेरनंतरंबहिरपिविद्यमानत्वात् अप्रविष्टःपूर्णस्वरूपात्प्रविष्टःसर्वगतस्यप्रवेशाप्रवेशौउपचारतोनतुदेवदत्तवन्मुख्यावित्यतइवशब्दः बहिश्चविद्यमानत्वादप्रविष्टोजगत्पतिः प्रविष्टवच्चतत्रैवपूर्णरूपत्वतोविभुरित्यादेः सर्वगतरूपेणाप्रवेशः पुरुषरूपेणप्रवेशः जलेप्रतीयमानाकाशादिवदितिवा हिशब्दोऽसंगत्वमाह १५ सृष्टिप्रकारंदर्शयति यइति यएतेसप्तावि

मुमुचुर्मुनयोदेवाःसुमनांसिमुदान्विताः ॥ मंदंमंदंजलधराजगर्जुरनुसागरम् ७ निशीथेतमउद्भूतेजायमानेजनार्दने ॥ देवक्यांदेवरूपिण्यांविष्णुःसर्वगुहाश्रयः ८ प्रादुरासीद्यथाप्राच्यांदिशींदुरिवपुष्कलः ९ श्रीशुकउवाच ॥ तमद्भुतंबालकमंबुजेक्षणंचतुर्भुजंशंखगदाद्युदायुधम् ॥ श्रीवत्सलक्ष्मंगलशोभिकौस्तुभंपीतांबरंसांद्रपयोदसौभगम् १० महार्हवैदूर्यकिरीटकुंडलत्विषापरिष्वक्तसहस्रकुंतलम् ॥ उद्दामकांच्यंगदकंकणादिभिर्विरोचमानंवसुदेवऐक्षत ११ सविस्मयोत्फुल्लविलोचनोहरिंसुतंतिलोक्यानकदुंदुभिस्तदा ॥ कृष्णावतारोत्सवसंभ्रमोऽस्पृशन्मुदाद्विजेभ्योऽयुतमाप्लुतोगवाम् १२ अथैनमस्तौदवधार्यपूरुषंपरंनतांगःकृतधीःकृतांजलिः ॥ स्वरोचिषाभारतसूतिकागृहंविरोचयंतंगतभीःप्रभाववित् १३ वसुदेवउवाच ॥ विदितोऽसिभवान्साक्षात्पुरुषःप्रकृतेःपरः ॥ केवलानुभवानंदस्वरूपःसर्वबुद्धिदृक् १४ सएवस्वप्रकृत्येदंसृष्ट्वायत्त्रिगुणात्मकम् ॥ तदनुत्वंह्यप्रविष्टःप्रविष्टइवभाव्यसे १५ यएतेऽविकृताभावाःसप्ततेविकृतैःसह ॥ नानावीर्याःपृथग्भूताविराजंशयनंतव १६ सन्निपत्यसमुत्पाद्यदृश्यंतेऽनुगताइव ॥ प्रागेवविद्यमानत्वान्नतेषामिहसंभवः १७

कृताः महदहंकारपंचतन्मात्राणिभावाःपदार्थास्ते विकृतैः स्थूलीभूतैः पृथिव्यादिभिर्जन्यप्राणिकामकर्मादिभिर्वासहसन्निपत्यान्योन्यंमिलित्वाविराजंब्रह्मांडंसमुत्पाद्यअनुगताः प्रविष्टाइवदृश्यंते बहिरपिविद्यमानत्वात् कथंभूताभावाःपृथग्भूताविश्लिष्टाः नानावीर्याःअवकाशदानादिशक्तीनांनानाविधत्वाद्विभक्तशक्तित्वात्तदभिमानिदेवानामितिशेषः ननुतर्हिमेलनकर्ताकइतितत्राह शयनमिति तवशयनस्थानीयत्वात्त्वमेवमेलनकर्तेत्यर्थः १६ व्यक्तिविशेषादंडेप्रवेशमात्रमेवोत्पत्तिर्ननुसाक्षादित्याह प्रागेवेति इहब्रह्मांडेसंभवःसाक्षादुत्पत्तिर्नास्ति किंतु व्यक्तिविशेषेणप्रवेशमात्रमेव कुतः प्रागेवविद्यमानत्वात् लब्धसत्ताकत्वात्पूर्वमेवोत्पन्नत्वादित्यर्थः प्रकृतिविकृतत्वमंतरेणावांतरविकृतत्वाभावात् महदादयोऽविकृताइत्युच्यंते महदादिस्तवविकृतइत्यारभ्यांडेत्वेषामभिव्यक्तिर्जानिरित्यभिधीयतेइत्यंतेनसम्यग्व्याख्यातमाचार्यैरितिभाव्यं १७

सइत्यनुवर्तते । यथातत्त्वानामचेतनत्वेनतदभिमानिनांविभक्तशक्तित्वेनचतेषामन्यस्त्वंमेलयितृत्वेनभाव्यःसएवंशरीरमुत्पाद्यसमुत्पत्तेःप्राक्पश्चादपिनिर्दोषत्वेनवर्तमानोभवान्ग्राह्यैरनुमेयैर्गुणैरिंद्रियविषयैःउत्पन्नयाबुद्ध्याज्ञानाख्यलिंगेनानुमेयानिलक्षणानिस्वातंत्र्यादीनियस्यसतथा तेषामिंद्रियाणांगुणाग्रहःविषयज्ञापकोन्योस्तीतिज्ञायते । क्षेत्रज्ञः पुरुषोह्यात्मेत्यत्रक्षेत्रज्ञानस्यजीवानेष्टत्वेनदर्शनान्नारायणनिष्टत्वेनोच्यतइतिकथंतत्राह अपीति । ग्राह्यगुणेष्वस्वातंत्र्यप्रतीतेरिदंजानामीतिजीवसमवेतग्रहणशक्तिरपितन्नियतेति । तदुक्तमाचार्यैः ग्राह्यगुणेत्यादि सत्सर्वस्यज्ञातृत्वेनवर्त्तमानइति वातदुक्तं । ज्ञातापिसर्वभावानामिति उपहितस्यैवबाहिरंतर्विभागोनसर्वज्ञस्यभवेदित्याह अनावृतत्वादिति अव्यवधानेनद्रष्टृत्वात् । तदुक्तं सर्वत्राव्यवधानेनद्रष्टृत्वात्सर्ववस्तुनइति कुतोनास्तीतितत्राह सर्वस्येति । सर्वस्यपूर्णस्यहेतोरनुग्राहकमाह सर्वात्मनइति नह्यव्याप्तस्यसर्वस्यात्तृत्वंदेवदत्तस्येवयुज्यतेतस्मात्सर्वभक्षकत्वान्यथानुपपत्त्याऽपरिच्छिन्नत्वमेष्टव्यं नन्वपरिच्छिन्नस्यएकोदेवःसर्वभूतेषुगूढइत्यन्याश्रयत्वेनअवस्थानंकथमितितत्राह आत्मवस्तुनइति आत्मन्येववसतिनपरस्मिन्नशक्तित्वेनेत्यात्मवस्तुतस्पूर्णसामर्थ्यात् सर्वात्मात्वंभक्षणादितिच १८ ज्ञानलिंगेनशरीरेंद्रियादिभ्योभेदेनज्ञायसेइत्युक्तंतत्राज्ञानिनएवंमन्यंतइत्याह यदात्मनइति यदात्मनः परमात्मनःप्रत्यगात्मनःदृश्यगुणेषुशरीरेंद्रियादिषुसन्निधेः प्रवेशलक्षणसन्निधानादबुधैरस्वव्यतिरेकतःस्वाभेदेनव्यवस्यसेनिश्चित्यज्ञायसेइतियत्तदनुवादमनुकूलंवेदवचनंविनानमनीषितंनैवांगीकारयोग्यं कुतइतितत्राह सम्यगितिपुमान्पुरुषःपर्यंकशयनोविष्णुःव्यक्तंसंशयनिरासकरणंसम्यग्वचःअपौरुषेयत्वेननिर्दोषवेदवाक्यंउपाददत्स्वीकृतवानाहेत्यन्वयःपरमात्मनोऽपिशरीरेसन्निधानादबुधैरस्वव्यतिरेकतोज्ञायसइत्यादेरयमर्थःसिद्धः यदिदंजगदेकंएकीभूतंमामभियातितद्यहमेकएवानेषट्सनितरांसहमानोभियोद्धास्मि ।

एवंभवान्बुद्धचनुमेयलक्षणोग्राह्यैर्गुणैःसन्नपितद्गुणाग्रहः ॥ अनावृतत्वाद्बहिरंतरंनतेसर्वस्यसर्वात्मनआत्मवस्तुनः १८ यदात्मनोदृश्यगुणेषुसन्निधेर्व्यवस्यसेऽस्वव्यतिरेकतोऽबुधैः ॥ विनानुवादंनचतन्मनीषितंसम्यग्वचोव्यक्तमुपाददत्पुमान् १९ त्वत्तोऽस्यजन्मस्थितिसंयमान्विभोवदंत्यनीहादगुणादविक्रियात् ॥ त्वयीश्वरेब्रह्मणिनोविरुध्यतेतदाश्रयत्वादुपचर्यसेगुणैः २०

अथवाद्यावभियातस्तावप्येवमेव । अथवात्रयएतादृशामाममभ्येत्यकिमुकरांतिकिंकुर्वंति त्वांप्रतीतिवार्तामाभूत् । अहमेवहन्मीत्याह खलेनेति पर्षान्धान्यानिकुलित्थादीनिखलेनखलइव भूरीणिशत्रुभूतानिजगंतिप्रतिहन्मिहनिष्यामित्यद्धननशक्त्यभावेपितवदुर्भगजीवाभेदवचनेनत्वांनिंदंतीतितत्राह किमिति । शत्रवोमामांकिंनिंदंति सर्वगुणाकरत्वेनदोषलेशस्पर्शाभावात् स्वतोदोषाभावेपि बलादापादयंतिहीतितत्राह अनिंद्राइति । असमर्थाइत्यर्थः प्रविष्टत्वाच्छरीरेषुजीवएवेतिदुर्धियः मन्यंतेपरमात्मानंनतन्मतमनुव्रजेदित्यादेः । तर्हिनिंदाफलंकिमिति अस्याप्येतदेवोत्तरमाह अव्यक्तमिति अव्यक्तंअप्रकाशलक्षणंव्यक्तिशून्यमंधंतमः यांतीतिचवेदवचनमुपादत्ते ऐक्यात्मज्ञानतोयांतितमइति । तर्हिभेदज्ञानस्यकिंफलमित्यस्यापीदमेवोत्तरमित्याह व्यक्तमिति विगतांजनंनिर्दोषभेदज्ञानंमुक्तिसाधनमुपाददत् भेदात्परंपदं । स्वातंत्र्यपारतंत्र्यादिज्ञानंभेदहशिर्भवेदितिवचनं १९ कुलालघटयोरिवकार्यकारणयोर्जगद्ब्रह्मणोर्भेदःपारमार्थिकइतिज्ञापनायसृष्टिप्रकारंस्पष्टयति त्वत्तइति । अस्यप्रपंचस्यकुलालवदायासग्रस्ततयाकर्तानायंकिंतुपूर्णानंदत्वेनेत्याशयेनाह अनीहादिति अनीहादक्लिष्टकारित्वादिति अनीहत्वेनकर्तात्वेन्मृद्वद्विकारित्वंहरेरितितत्राह अविक्रियादिति । तथाऽविकृतएवसन्सर्वंकरोतीति नन्विषंसृष्टिःगुणपूर्विकासृष्टित्वात्पटसृष्टिवदितितत्राह अगुणादिति । नन्वियंप्रतीतिविरुद्धासृष्टिर्निष्क्रियस्यक्रियात्वंअगुणस्यगुणवत्त्वमविकारिणोविकारित्वमितितत्राह त्वयीति । ईश्वरेब्रह्मणीतिपदद्वयंहेतुगर्भं ऐश्वर्यात्पूर्णशक्तिकइतिवचनात् । नन्वयमीश्वरःसृष्ट्यादौप्रवर्त्तमानोगुणमपेक्षतेनवा प्रथमेगुणित्वंद्वितीयेसृष्ट्याद्यनुपपत्तिरितितत्राह तदाश्रयत्वादिति

१अभी२दमेकमेकोअस्मिनिःशालमिद्वाकिमुत्तयःकरंति ॥ खलेनपर्षान्प्रतिहन्मिभूरीर्किमांनिंदतिशत्रवोऽनिंद्राःइतिश्रुतिः ।

गुणैःसत्वादिभिःसृजासिनतत्रसंदेहः । तर्हिनिर्गुणस्यगुणित्वापातइतिशंकामाभूदिति तदाश्रयत्वाद्गुणानांजडत्वेनस्वतःप्रवृत्त्यनुपपत्तेस्तत्प्रवृत्त्यर्थंतत्प्रेरणाद्गुणीत्युपचर्यसे नतुमुख्यतोगुणी केवलो निर्गुणश्चेतिश्रुतेः ननुसगुणागुणवचनस्यकाङ्क्षाप्रस्तर्हीत्यस्यापीदमुत्तरं तदाश्रयत्वादिति ज्ञानादिगुणैः क्लृप्तदेहत्वात्सत्वादिगुणविधुरइत्युपचर्यसे उपसंगम्यसेज्ञायसेइत्यर्थः तेषांसत्वादिगुणाना माश्रयत्वादैश्वर्यादिगुणपूर्णत्वाद्वासगुणइत्युपचर्यसेसंभाव्यसइत्यर्थः । अगुणोगुणदेहत्वात्सगुणोगुणधारणात् ऐश्वर्यादिगुणित्वाद्वावासुदेवइतीर्यतेइतिवचनात् अर्थविशेषोज्ञायतइति २० त दाश्रयत्वंप्रपंचयति सत्वमिति अयमर्थः यदात्रिलोकस्थितयेत्रैलोक्यरक्षणायसत्वगुणंवर्धयन्नास्ते । तदाहयग्रीवादिरूपंशुक्लवर्णंनिर्मुक्तकलंकानूनबिंबचंद्रवद्धवलवर्णंबिभर्षि जगतांवर्धयन्सत्वंयदा रक्षतिकेशवइत्यादेःखल्वलंकृतोयमर्थः । यदासर्गायतत्तत्स्वभावाभिव्यक्तयेरजोवर्धयंस्तदारजसोपबृंहितंरजोगुणशक्तिव्यंजकंरक्तंजामदग्न्यादिरूपंबिभर्षिखलु वर्धयंस्तुरजोयेनजगदुत्पादयेद्धरिरित्या देः । जनस्यात्ययेप्रलयेअत्ययइतिपाठेआत्तिःसंहृतिःतस्यै यदालोकेतमोवर्धयन्तदातमसोपबृंहितंतमोगुणप्रवर्तकंकृष्णंयादवादिरूपंबिभर्षिखलु । येनविनाशयेत् वर्धयंस्तुतमोलोकेतत्कृष्णंयादवादि कमितिवचनात् । ननुसर्वत्रसर्वशक्त्यभावादपूर्णताहरेरित्यस्यापिइदमुत्तरंखल्विति । जिज्ञासालक्षणावीप्साकर्तव्या तथाहि यच्छुक्लरूपंसत्त्ववर्धयन्बिभर्षि तद्रूपंत्रिलोकस्थितयेखलुनभवतिकिंतुसर्गसंहा राभ्यांबिभर्षि । रजोवर्धयन्रक्तरूपंबिभर्षितत्सर्गायखलुनभवतिकिंतुतत्स्थितिसंहराभ्यांचबिभर्षियत्तमोवर्धयन्कृष्णंरूपंबिभर्षितज्जनात्ययएवखलुनभवति । किंतुत्रिलोकास्थितिसर्गाभ्यांचाबिभर्षि इतिमंदमतीनांविस्पृष्टतयाभ्यासोक्तं सर्वत्रसर्वंकुरुतेविक्षेपस्तत्रकीर्तितइत्यादेः तत्तात्पर्यार्थपरतयाश्लोकार्थोज्ञातव्यः षड्लृविशरणगत्यवसादनेष्वित्यादेर्धातोःसृष्टिसंहारावितिसत्वशब्देनज्ञातव्यौ

सत्वंत्रिलोकस्थितयेस्वमायया बिभर्षिशुक्लंखलुवर्णमात्मनः ॥ सर्गायरक्तंरजसोपबृंहितंकृष्णंचवर्णंतमसाजनात्यये २१ त्वमस्यलोकस्यविभोरिरक्षिषुर्गृ हेऽवतीर्णोसिममाखिलेश्वर ॥ राजन्यसंज्ञासुरकोटियूथपैर्निर्व्यूह्यमानांनिहनिष्यसेचमूम् २२ अयंतमस्यस्तवजन्ममेगृहेश्रुत्वाऽग्रजांस्तेन्यहनत्सुरेश्वर ॥ सतेऽवतारंपुरुषैःसमर्पितंश्रुत्वाधुनैवाभिसरत्युदायुधः २३ ॥ श्रीशुकउवाच ॥ अथैनमात्मजंवीक्ष्यमहापुरुषलक्षणम् ॥ देवकीतमुपाधावत्कंसाद्भीताशुचिस्मिता २४ ॥ देवक्युवाच ॥ रूपंयत्तत्प्राहुरव्यक्तमाद्यंब्रह्मज्योतिर्निर्गुणंनिर्विकारम् ॥ सत्तामात्रंनिर्विशेषंनिरीहंसत्वंसाक्षाद्विष्णुरध्यात्मदीपम् २५

रजोरागेइतिधातोःरागशब्दस्यानेकार्थत्वेनस्थितिसंहारार्थोपिज्ञातव्यः तमुग्लानइतिधातोःग्लानशब्दस्यसृष्टिस्थितिविरोधिज्ञापकत्वेनतत्परत्वेनार्थोबोद्धव्यः । निर्गुणस्यगुणोपरक्तत्वंकथमित्यत उक्तं स्वमाययेति स्वेच्छयानुगुणाद्विष्णुर्नानारूपान्करोत्यजइत्यादिच । निषेधेवागलंकारेजिज्ञासानुनयेखल्वित्यमरः निषेधेवागलंकारेवीप्सानेनुनयेखल्वितियादवः २१ सर्वरूपेषुसर्वशक्तिरस्तीत्या शयेनस्तौति त्वमस्येति त्वदवतारेणसंहारकारणेनरक्षाकथंकारास्यादित्याशंक्यासतांहननेसतांतारतम्येनसुखसमृद्धिःस्यादित्याशयेनाह राजन्येति निर्व्यूह्यमानांप्रतिव्यूह्यमानांनिहनिष्यसेनि हनिष्यसि गमयिष्यसि सतांसुखानुभवमिति शेषः चरभक्षणइतिधातोः सतांसुखाविवृद्धचर्थमसतांपीडनंहरेरित्यादेश्च २२ स्वात्मनिस्वभक्तेषुद्वेषवृद्धिकरत्वेनद्वेषात्मकंतमोभवतीत्यतस्तदुपादायत्वत्प्र वर्तनमित्याशयेनाह अयंतमस्यइति तमस्यःस्वभक्तद्वेषमूर्तेः तदुक्तं तमोद्वेषात्मकंशुद्धंसत्वात्मकमुदीर्यतइतिवा जन्मभविष्यतीतिस्वपुरुषैःसमर्पितं अभिसरत्यभ्यागच्छति उदायुधःधृतायुधः २३ उपाधावत्गुणस्मरणपूर्वंकंतुष्टाव २४ भगवदनुग्रहपात्रत्वाद्वेदांतनिर्णीतगुणविशिष्टंस्तौति रूपमिति यच्चस्यतद्रूपंएवंविधंमाहुः वेदांताइतिशेषः परोक्षत्वात्तदित्युच्यते कथंभूतं अव्यक्तं आराधने पिस्वप्रसादमतेरेणाप्रत्यक्षं तदव्यक्तमाह अव्यक्तमचलंध्रुवं तर्हिशून्यंनेत्याह आद्यंआदौविद्यमानं आत्मावाइदमेकएवाग्रआसीत् किमस्यसंज्ञेत्यत्राह ब्रह्मेति ब्रह्मविदाप्नोतिपरंअथकस्मादु च्यतेब्रह्मेतिबृहंतोस्मिन्गुणाः संज्ञांतरमाह ज्योतिरिति परंज्योतिरूपसंपद्यस्वेनरूपेणाभिनिष्पद्यते यद्वा गुणित्वेपिचेतनत्वंमाभूद्धटवदित्यत्राह ज्योतिर्ज्ञानलक्षणप्रकाशरूपं सुवर्णज्योतिः ।

साक्षीचेताच गुणाःसत्वादयःकिंनेत्याह निर्गुणं केवलोनिर्गुणश्च उत्पन्नक्षणेसर्वकार्याणांनिर्गुणत्वंउत्तरक्षणेनास्तीत्यादावकारः।कस्यादित्यत्राह नावकार नावकाराऽक्षरःशुद्धः अक्षराणांवर्णानां
नगुणः किंनस्याज्जीवगुणवदितितत्राह सत्तामात्रम् सर्वाशुभनिर्मुक्तगुणैकरूपम् सर्वाशुभविनिर्मुक्तगुणमात्रोपबृंहितः सत्तामात्रमतःप्राहुःएवंविधमन्यन्नास्तीत्याहनिर्विशेषंनिर्गतोविशेषाद्विशेषो यायस्मा
त्तन्निर्विशेषंनिर्विशेषोस्खिलोत्तमः एकमेवाद्वितीयं निरीहमात्मकर्तृत्वाभिमानादिरहितं ननुक्रियाशून्यम् सइमांल्लोकानसृजतेतिश्रुतेः अनादराभिरीहश्चसेहःसर्वकृतीयतः ससाक्षात्त्वंअन्योन विद्व
ज्जनोक्तलक्षसंज्ञाभ्यामयंनारायणइतिप्रत्येत्यतःप्राकृतजनप्रत्ययोत्पत्तयेतत्सिद्धसंज्ञामाह विष्णुःणकरोवर्णेपकारःप्राणआत्मासयोहेतौणकारपकारावनुसंहितमृचोवेद योगिभिर्ध्येयंवस्त्विदमेवना
न्यदित्याशयेनाह अध्यात्मदीपम् आत्मानमधिकृत्यवर्तमानदेहेंद्रियादिप्रकाशकंअध्यात्मयोगाधिगमनदेवंमत्वावीरोहपशोकौजहाति ॥ यत्तदितिसामानाधिकरण्येनप्रकृतेयदित्यस्यषष्ठीत्यंगीकारेकिं
नियामकम् उच्यते सइतिपुल्लिंगेनपरामर्शात्तद्रूपमित्यभ्युपेयते।सइतिपुनरुक्तेः । प्रथमायाःषष्ठ्यर्थत्वंनदृष्टमितिचेन्न सप्तसुप्रथमेतिसूत्रात् २५ निर्गुणत्वादिकंतल्लक्षणमेवेत्याह नष्टइति द्विपरार्धावसाने
ब्रह्मणः शतायुर्लक्षणःकालःद्विपरार्धस्तस्यावसानेलो केनष्टइतिसामान्येनोक्तविशिनष्टि पंचमहाभूतेषुपृथिव्यादिषु अहंकारद्वाराआदिभूतंमहत्तत्त्वंगतेषुव्यक्तेमहत्तत्वेअव्यक्तंप्रधानंगतेसति अशेषसंज्ञः

नष्टलोकेद्विपरार्धावसानेमहाभूतेष्वादिभूतंगतेषु ॥ व्यक्तेव्यक्तंकालवेगेनयातेभवानेकःशिष्यतेऽशेषसंज्ञः२६ योऽयंकालस्तस्येतव्यक्तबंधोचेष्टामाहुश्चेष्टते
येनविश्वम् ॥ निमेषादिर्वत्सरांतोमहीयांस्तंत्वेशानंक्षेमधामप्रपद्ये २७ मर्त्योमृत्युव्यालभीतःपलायन्लोकान्सर्वान्निर्भयंनाध्यगच्छन् ॥ त्वत्पादाब्जंप्रा
प्ययदृच्छयाद्यस्वस्थःशेतेमृत्युरस्मादपैति २८ सत्वंघोराद्युग्रसेनात्मजान्नस्त्राहित्रस्तान्भृत्यविद्रासहासि ॥ रूपंचेदंपौरुषंध्यानाधिष्ण्यमप्रत्यक्षंमादृशां
त्वंकृषीष्ठाः २९ जन्मतेमय्यसौपापोमाविद्वान्मधुसूदन ॥ समुद्विजेभवद्धेतोःकंसादहमधीरधीः ३० उपसंहरविश्वात्मन्नदोरूपमलौकिकम् ॥ शंख
चक्रगदापद्मश्रियाजुष्टंचतुर्भुजम् ३१ विश्वंयदेतद्स्वतनौनिशांतेयथावकाशंपुरुषःपरोभवान् ॥ बिभर्तिसोयंममगर्भगोभूदहोनृलोकस्यविडंबनंमहद्
३२॥ श्रीभगवानुवाच ॥ त्वमेवपूर्वसर्गेऽभूःपृश्निःस्वायंभुवेसति ॥ तदायंसुतपानामप्रजापतिरकल्मषः ३३ युवांवैब्रह्मणादिष्टौप्रजासर्गेयदाततः ॥
सन्नियम्येंद्रियग्रामंतेपाथेपरमंतपः ३४ वर्षवातातपहिमघर्मकालगुणाननु ॥ सहमानौश्वासरोधविनिर्धूतमनोमलौ ३५

अशेषाःसंज्ञाःयस्यसतथा नामानिसर्वाणिविशंतीतिश्रुतेः २६ कालवेगेनयातइत्यत्रप्रतीतंकालस्वातंत्र्यंनिवारयति योयामिति निमेषादिर्वत्सरांतोयोऽयंकालःतंकालंयश्चाशेषसंज्ञस्तस्येतवचेष्टा
माहुरित्यन्वयः अव्यक्तबंधोमुख्यप्राणबंधो येनत्वयायेनकालेनवा क्षेमधामनिर्भयस्थानंअभयंप्रतिष्ठांविंदतइतिश्रुतिः २७ क्षेमधामत्वंदर्शयति मर्त्यइति मृत्युरेवव्यालः तस्माद्भीतःपलायन्
पलायमानःअस्मान्मर्त्यात् २८ भृत्यवित्त्रासहा भृत्यानांविविधभयनाशकोसिमादृशामप्रत्यक्षंकृषीष्ठाःप्रत्यक्षंनकुरु ध्यानधिष्ण्यंध्यानविषयम् २९ अप्रत्यक्षकरणेकारणमाह जन्मेति मांविद्वान्न
जानातु समुद्विजेबिभेमि अधीरधीःचंचलबुद्धिः ३० ३१ हरेर्गर्भवासादिदुःखानुभवोनास्तीत्याशयेनाह विश्वमिति निशांतेरात्रिमध्येयथावकाशंअवकाशमनतिक्रम्य यथासादृश्यइति
समासः ३२ अहंयुवयोस्तपःप्रभावादाविर्भावमकरंनतुकर्माधीनत्वेनेतिपूर्वजन्मसंचीर्णतपोमाहात्म्यंकथयति त्वमेवेति अयंवसुदेवः ३३ प्रजासर्गे तादर्थ्येसप्तमी ततस्तदा ३४ अनुक्रमेणवर्षा
दिगुणान्सहमानौ श्वासरोधःप्राणायामस्तेन ३५

शीर्णपर्णवायुनापातितपत्रं कामान्पुत्रादिलक्षणान् ३६ वांयुवयोः ३७ ३८ वरदराट्वरदराजः कामदित्सयाअभीष्टदानेच्छया ३९ अजुष्टग्राम्यविषयौअननुभूतमैथुनादिविषयौ ४० ४१ शीलं वृत्तं औदार्यमाहात्म्यम् ४२ वामनत्वात्सुंदरत्वात्ह्रस्वत्वाद्वा ४३ तृतीयेभवेजन्मनि ४४ मद्भवज्ञानंमज्जन्मविषयज्ञानं मर्त्यलिंगेनमनुष्यशरीरेण ४५ यास्येथेगमिष्यथः ४६ प्राकृतवत्न तुप्राकृतः ४७ इयेषगंतुमैच्छत् नंदजाययानंदजायायां तर्हितदा ४८ योगमायायाहृताःप्रत्ययानांज्ञानहेतूनांइंद्रियाणांसर्ववृत्तयोयेषुतेतथातेषुनिद्रयामुग्धेष्वित्यर्थः चशब्दात्पौरेषुनिद्रांयापितेषुप्रा पितेषुसत्सु मंत्रौषधादिभिर्दुरत्ययाः सर्वाद्वारश्चबृहत्कपाटायसकीलशृंखलैःपिहिताः बृहद्भिःकपाटैःअयोमयैःअर्गलैःशृंखलैश्च ४९ कृष्णवाहेकृष्णंबिभ्राणेताःकपाटद्वारःव्यशीर्यंतविवृताः यथातमः

शीर्णपर्णानिलाहारावुपशांतेनचेतसा ॥ मत्तःकामानभीप्संतौमदाराधनमीहतुः ३६ एवंवांतप्यतोर्भद्रेतपःपरमदुष्करम् ॥ दिव्यवर्षसहस्राणिद्वादशेयु र्मदात्मनोः ३७ तदावांपरितुष्टोऽहममुनावपुषानघे ॥ तपसाश्रद्धयानित्यंभक्त्याचह्रदिभावितः ३८ प्रादुरासंवरदराट्युवयोःकामदित्सया ॥ ब्रियतां वरइत्युक्तेमादृशोवांवृतःसुतः ३९ अजुष्टग्राम्यविषयावनपत्यौचदंपती ॥ नवव्राथेऽपवर्गेमेमोहितौममम्मायया ४० गतेमयियुवांलब्ध्वावरंमत्स दृशंसुतम् ॥ ग्राम्यान्भोगानभुजीथांयुवांप्राप्तमनोरथौ ४१ अदृष्ट्वान्यतमंलोकेशीलौदार्यगुणैःसमम् ॥ अहंसुतोवामभवंपृश्निगर्भइतिस्मृतः ४२ तयोर्वांपुनरेवाहमदित्यामासकश्यपात् ॥ उपेंद्रइतिविख्यातोवामनत्वाच्चवामनः ४३ तृतीयेऽस्मिन्भवेऽहंवैतेनैववपुषानघे ॥ जातोभूयस्तयोरेवंस त्यंमेव्याहृतंसति ४४ एतद्वांदर्शितंरूपंप्राग्जन्मस्मरणायमे ॥ नान्यथामद्भवज्ञानंमर्त्यलिंगेनजन्यते ४५ युवांमांपुत्रभावेनब्रह्मभावेनचासकृत् ॥ चिंत यंतौकृतस्नेहौयास्येथेमद्गतिंपराम् ४६ ॥ श्रीशुकउवाच ॥ इत्युक्त्वासीद्धरिस्तूष्णींभगवानात्ममायया ॥ पित्रोःसंपश्यतोःसद्योबभूवप्राकृतःशिशुः ४७ ततश्चशौरिर्भगवत्प्रचोदितःसुतंसमादायसूतिकागृहात् ॥ यदाबहिर्गंतुमियेषतर्ह्यजायागोगमायाऽजनिनंदजायया ४८ तयाहृतप्रत्ययसर्ववृत्तिषुद्वाः स्थेषुपौरेषुचयापितेष्वथ ॥ द्वारस्तुसर्वाःपिहितादुरत्ययाबृहत्कपाटायसकीलशृंखलैः ४९ ताःकृष्णवाहेवसुदेवआगतेस्वयंव्यशीर्यंतयथातमोरवेः ॥ ववर्षपर्जन्यउपांशुगर्जितःशेषोऽन्वगाद्वारिनिवारयन्फणैः ५० मघोनिवर्षत्यसकृद्यमानुजागंभीरतोयौघजवोर्मिफेनिला ॥ भयानकावर्तशताकुलानदी मार्गेददौसिंधुरिवश्रियःपतेः ५१ नंदव्रजंशौरिरुपेत्यतत्रतान्गोपान्सुषुप्तानुपलभ्यनिद्रया ॥ शिशुंयशोदाशयनेनिधायतत्सुतामुपादायपुनर्गृहानगात् ५२ देवक्याःशयनेन्यस्यवसुदेवोऽथदारिकाम् ॥ प्रतिमुच्यपदोर्लोहमास्तेपूर्ववदावृतः ५३

रवेरुदये उपांशुरहसि अन्वगात्पृष्ठतआयासीत्फणाशब्दउभयलिंगः फणाद्वयोरित्यमरः ५० मघोनिइंद्रे यमानुजायमुना तोयौघजवःजलप्रवाहवेगस्तद्युक्ताऊर्मयोयस्यांसातथाफेनिलाफेनवतीगंभीरा चतोयौघजवोर्मिश्चफेनिलाचसातथेति भयानकाभयंकरा आवर्ताःपयसांभ्रमास्तेषांशतैराकुला श्रियःपतेर्दाशरथीरामस्य सिंधुःसमुद्रइव ५१ नंदव्रजंनंदगोकुलं उपलभ्यदृष्ट्वा निद्रयादुर्गयासुषुप्तान् गृहानितिबहुवचनेपुल्लिंगः गृहाःपुंसिचभूम्न्येवेत्यमरः गृहशब्दस्यभार्यावाचित्वेननपुंसकत्वंतद्व्यावृत्त्यर्थंबहुवचनम् ५२ दारिकांकन्यकाम् ५३

परंकेवलंजातमबुध्यततस्यजातस्यालिंगंस्त्रीपुरुषाविवैकलक्षणनाशासात् तत्रनामचक्रेह पारश्चातात प्रभूतवचनयादवशपः ॥ ५४ ॥ इतश्रीमागवतमहापुराणदशमस्कंधावजयध्वजकृतटीकायां चतुर्थोऽध्यायः ॥ ४ ॥ देवानांदेवस्वभावोऽसुराणामसुरस्वभावोमध्यमानांमिश्रस्वभावोदुस्त्यजइत्येतदर्थंकंसादिपुसंतोऽसंतइतिद्विजीवाः संति तदुक्तं पूतनाकंस नरकशिशुपालादिषुद्विधा जीवाःसंतस्त्वसंतश्चतत्रबंध्वादिरूपिणः विष्णोःसंतइतिज्ञेयाअसंतःशत्रुरूपिणः शुभजीवप्रकाशेनकदाचिच्छुभबुद्धयइत्यादि तत्रासतांस्वभावंदर्शयितुमुपक्रमते बहिरंतइति बालध्वनिंरोदनम् १ यस्माद्भर्मात्उद्विग्नःभीतः २ सूतीगृहमितिदीर्घश्छांदसः वैलक्षण्यद्योतकोवा ३ करुणंदयाजनकं वचनमितिशेषः स्नुषापुत्रभार्या ४ दैवेननिसृष्टेनप्रेरितेन ५ चरमांप्रजांअवरसं

यशोदानंदपत्नीचजातंपरमबुध्यत ॥ नतल्लिंगंपरिश्रांतानिद्रयापगतस्मृतिः ॥ ५४ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेपूर्वार्धेश्रीकृष्णावतारवर्णनं नामतुर्थोऽध्यायः ॥ ४ ॥ श्रीशुकउवाच ॥ बहिरंतःपुरद्वारःसर्वाःपूर्ववदावृताः ॥ ततोबालध्वनिंश्रुत्वागृहपालाःसमुत्थिताः १ तेतुतूर्णमुपव्रज्यदेव कयागर्भजन्मतत् ॥ आचख्युर्भोजराजाययदुद्विग्नःप्रतीक्षते २ सतल्पात्तूर्णमुत्थायकालोऽयमितिविह्वलः ॥ सूतीगृहमगाच्छीघ्रंप्रस्खलन्मुक्तमूर्धजः ३ तमाहभ्रातरंदेवीकृपणाकरुणंसती ॥ स्नुषेयंतवकल्याणस्त्रियंमाहंतुमर्हसि ४ बहवोहिंसिताभ्रातःशिशवःपावकोपमाः ॥ त्वयादैवनिसृष्टेनपुत्रिकैकाप्रदीयताम् ५ नन्वहंतेह्यवरजादीनाहतसुताप्रभो ॥ दातुमर्हसिमंदायाअंगेमांचरमांप्रजाम् ६ श्रीशुकउवाच ॥ उपगुह्यात्मजामेवंरुदंत्यादीनदीन वत् ॥ याचितस्तांविनिर्भर्त्स्यहस्तादाचिच्छिदेखलः ७ तांगृहीत्वाचरणयोर्जातमात्रांस्वसुःसुताम् ॥ अपोथयच्छिलापृष्टेस्वार्थोन्मूलितसौहृदः ८ सातद्धस्तात्समुत्पत्यसद्योदेव्यंबरंगता ॥ अदृश्यतानुजाविष्णोःसायुधाष्टमहाभुजा ९ दिव्यस्रगंबरालेपरत्नाभरणभूषिता ॥ धनुःशूलेषुचर्मासिशं खचक्रगदाधरा १० सिद्धचारणगंधर्वैरप्सरःकिन्नरोरगैः ॥ उपाहृतोरुबलिभिःस्तूयमानेदमब्रवीत् ११ किंमयाहतयामंदजातःखलुतवांतकः ॥ यत्रक चित्पूर्वशत्रुर्माहिंसीःकृपणांवृथा १२ इतिप्रभाष्यतंदेवीमायाभगवतीभुवि ॥ बहुनामनिकेतेषुबहुनामाबभूवह १३ तयाभिहितमाकर्ण्यकंसःपरमवि स्मितः ॥ देवकींवसुदेवंचविमुच्यप्रश्रितोऽब्रवीत् १४ अहोभगिन्यहोभाममयावांबतपाप्मना ॥ पुरुषादैरिवाभ्येत्यबहवोहिंसिताःसुताः १५ सत्वहं त्यक्तकारुण्यस्त्यक्तज्ञातिसुहृत्खलः ॥ हाकान्लोकान्गमिष्यामिब्रह्महेवमृतःश्वसन् १६ दैवमप्यनृतंवक्तिनमर्त्याएवकेवलम् ॥ यद्विश्रंभादहंपापःस्वसु र्निहतवान्सुतान् १७ माशोचथांमहाभागावात्मजान्स्वकृतंभुजः ॥ जंतवोनसदैकत्रदैवाधीनाःसहासते १८

ततिम् ६ आचिच्छिदेआकृष्टवान् ७ अपोथयत्अताडयत् स्वार्थेनस्वप्रयोजनेनउन्मूलितंउत्पाटितंसौहृदंस्नेहलक्षणंयस्यसतथा ८ अदृश्यतजनेनेतिशेषः ९ १० उरवःबलयःपूजायैस्तेतथातैः ११ त्वयाहतयामृतयातवकोर्थइतिशेषः कुतइत्यत्राह जातइति खलुविचारशून्यस्त्वम् १२ मायाभगवतीदुर्गा इतिशब्दआदिवचनः इत्यादीत्यर्थः इतिहेतुप्रकरणप्रकारादिसमाप्तिष्वितियादवः १३ सतां स्वभावंदर्शयति तयाभिहितमिति १४ बतखेदे बहवोराक्षसाः यत्क्रूरकर्मकुर्वंतिसंभूयतन्मयैकनकृतमित्यतःपुरुषादैरितिबहुवचनम् १५ ब्रह्महाब्राह्मणंहतवान् मृतःश्वसन्जीवन्मृतः १६ १७ स्वकृ तंभुजःस्वकृताद्दष्टभुजइतियत्तन्माशोचेथां इतोपिशोकोनकर्त्तव्यइत्याह जंतवइति । कीटादिप्राणिनः १८

नन्वेवंतर्हिदेहस्थस्यपरमात्मनोऽप्यागमनापायौस्यातामितितत्राह भुवीति । यथाभुविभौमानिपार्थिवानिभूतानिचतुर्विधान्यायांत्यपयांतिच तथैतेषुभूतेषुस्थितोयमात्मापरमात्मानविपर्येति आगमापायौनाप्नोति । कथंयथाभूरागमनापायौनाप्नोतितथेत्यर्थःयथाभूतानिउद्भूतानिभौमानिरजांसिआयांत्यपयांति वायुनेतिशेषः । अयमात्मातथान अनन्याधीनत्वात्अन्वयदृष्टांतमाह यथाभूःपृथ्वी कठिनत्वेनस्थिरत्वादितिशेषः १९ जंत्वागमागमवत्पुत्रादिकंविपर्येतिभुवआगमापायाभाववत्परमात्मानविपर्येतीति यदितर्हीदंज्ञानंकस्मान्नोदेतीत्याशंक्यभगवन्मायया मुग्धचेतस्त्वेनपरमात्मविषयाभेदज्ञानबाहुल्यात् । अनेनसंसरानिवृत्तिस्तमःप्राप्तिश्चस्यातामित्याह यतइति अस्वपरविवेकबुद्धयुत्पत्तिप्रभृतिपरमात्मविषयोऽभेदोऽनेकविधोऽहंब्रह्मास्मीत्यादिकोजीवस्यप्रतीयतइति । यतस्तेनाविपरीतज्ञानेनदेहयोगादिलक्षणा वास्तवीयथार्था संसृतिर्ननिवर्ततइति । यतःआत्मविपर्ययःस्वस्यतमआद्यनर्थप्राप्तिश्चयतस्तस्मादात्मनिर्स्थितिंकृत्वामानुशोचेत्यन्वयः । अहंब्रह्मास्मिदेवोस्मिनास्मिकेवलमानुषइत्यादेःसिद्धोयमर्थः । अभेदप्रतीतिःअसुरजातेरेव तल्लक्षणैर्विहीनःसन्ब्रह्मदेवोस्मिवापित्वित्यादेः सर्वःस्वकृतमदृष्टंभुंक्तइतियस्मात्तस्मात् ब्रह्मास्मीत्यादिचेतनंतर्हिकस्येत्यतःस्वयो

भुविभौमानिभूतानियथायांत्यपयांतिच ॥ नायमात्मातथैतेषुविपर्येतियथैवभूः १९ यतोऽनेकविधोऽभेदोयतआत्मविपर्ययः ॥ देहयोगवियोगश्च संसृतिर्ननिवर्त्तते २० तस्माद्भद्रेस्वतनयान्मयाव्यापादितानपि ॥ मानुशोचयतःसर्वःस्वकृतंविंदतेऽवशः २१ यावद्धतोऽस्मिहतास्मीत्यात्मानंमन्यतेऽस्वदृक् ॥ तावत्तदभिमान्यज्ञोबाध्यबाधकतामियात् २२ क्षमध्वंममदौरात्म्यंसाधवोबंधुवत्सलाः ॥ इत्युक्त्वाऽश्रुमुखःपादौश्यालःस्वस्रोरथाग्रहीत् २३ मोक्षयामासनिगडाद्विस्रब्धःकन्यकागिरा ॥ देवकींवसुदेवंचदर्शयन्नात्मसौहृदम् २४ भ्रातुर्वचनमाश्रुत्यक्षांत्वारोषंचदेवकी ॥ व्यसृजद्वसुदेवश्चप्रहस्यतमुवाचह २५ एवमेतन्महाराजयथावदसिदेहिनाम् ॥ अज्ञानप्रभावाहंतिस्वपरेतिभिदायतः २६ शोकहर्षभयद्वेषलोभमोहमदान्विताः ॥ मिथोघ्नंतिनपश्यंतिभावैर्भावान्पृथग्दृशः २७ कंसएवंप्रसन्नाभ्यांविस्रब्धःप्रतिभाषितः ॥ देवकीवसुदेवाभ्यामनुज्ञातोऽविशद्गृहम् २८ श्रीशुकउवाच ॥ तस्यांरात्र्यांव्यतीतायांकंसआहूयमंत्रिणः ॥ तेभ्यआचष्टतत्सर्वंयदुक्तंयोगनिद्रया २९ आकर्ण्यभर्तुर्गदितंतमूचुर्दैवशत्रवः ॥ देवान्प्रतिकृतामर्षादैतेयानातिकोविदाः ३०

ग्यानामेवतद्युक्तम् । परब्रह्मणएकस्यब्रह्मास्मीतिविचिंतनमित्यादेः । सर्वःपरमात्मास्वकृतंपूर्णंस्वमानंदंविंदते यतोऽवशःअवगतपरमानंदः सर्वःशर्वःशिवःस्थाणुरितिच सर्वःदेवादिश्चस्वकृतंदेवोस्मीत्यादियथार्थज्ञानफलंभुंक्ते अवशोविष्ण्वधीनः २० २१ तर्ह्यस्यकियंतंकालंसंसारानुवृत्तिरितितत्राह यावदिति । अस्वदृगनात्मानंदेहंआत्मत्वेनपश्यतीति । तदभिमानीदेहाभिमानी २२ २३ २४ २५ परमात्मानविपर्येतिपुत्रादिकंविपर्येतीतिजीवपरभेदज्ञानंमुक्तिसाधनमन्यत्तमःसाधनंयथावदसिएतदेवसत्यम् एतदेवद्रढयति देहिनामिति देवोऽहंमानुषोवेतिविशेषंतत्रवापित्वित्यादेःयातनाशब्दमध्याहृत्यव्याख्येयम् अहंदेवाद्यन्यतमः । परमात्मामदादिजीवराशेःसत्तादिप्रदत्वेनात्यंतंश्रेष्ठइतियाभिदातज्ज्ञानंदेहिनामज्ञानप्रभवायातनाहंतीतियतइत्यन्वयः ननूत्तरश्लोकेपृथग्दृशइतिभेदज्ञानिनिंदावचनदित्राप्तसएवार्थःकिंनस्यादुच्यते पृथग्दृशइति पृथक्शब्दप्रयोगबलादन्योर्थस्तस्यतर्हिसकइत्युच्यते भगवद्दर्शनविरोधियद्दर्शनंतत्पृथग्दर्शनम् भगवद्दर्शनाद्यस्यविरोधाद्दर्शनंपृथगित्यादेः स्वरूपभेदोहिपरजीवयोर्जीवगोमिथः परस्परेणवस्तूनांविशेषःशास्त्रदर्शितइत्यादेः उक्तएवार्थइतिसंतोष्टव्यम् २६ २७ २८ २९ ३०

अनिर्दशान् अनिर्गतानिदशाहानियेस्तेतथातानननतिक्रांतदशाहानित्यर्थः निर्दशानातिक्रांतदशाहान् ३१ ३२ अस्यतःक्षिपतः ३३ कक्ष्याकांची कक्ष्याकरिवरत्रायांकांच्यांगेहेप्रकोष्ठकेइतिपादवः ३४ ३५ क्षेमशूरैःअसंयुगाविकत्थनैःरणादन्यत्राविविधजल्पैः रहोजुषाएकांतसेविना वेदशिरःप्रतिपाद्येनवा वनौकसाकैलासशिखरकांतारमंदिरेण यद्वा भासामाश्रयेणतेजोमूर्तिनेत्यर्थःओकसीमं दिराश्रयाविवितियादवः वनंभास्यप्सुकाननइतिच ३६ तेषांमूलोत्पाटने ३७ अंगेशरीरे आमयः कुष्ठादिःकृछ्रंपदंन्यायंस्थानंयेनसः ३८ कःसाक्षात्मूलमित्यत्राह मूलमिति तस्यविष्णोर्मूलं

एवंचेत्तर्हिभोजेंद्रपुरग्रामव्रजादिषु ॥ अनिर्दशान्निर्दशांश्चहनिष्यामोऽद्यबालकान् ३१ किमुद्यमैःकरिष्यंतिदेवाःसमरभीरवः ॥ नित्यमुद्विग्नमनसोज्याघो षैर्धनुषस्तव ३२ अस्यतस्तेशरव्रातैर्हन्यमानाःसमंततः ॥ जिजीविषवउत्सृज्यपलायनपरायणाः ३३ केचित्प्रांजलयोभीतान्यस्तशस्त्रादिवौकसः ॥ मुक्त कक्ष्याशिखाःकेचिद्भीताःस्मइतिवादिनः ३४ नत्वंविस्मृतशस्त्रास्त्रान्विरथान्भयसन्नतान् ॥ हंस्यन्यासक्तमनसोभग्नचापानयुध्यतः ३५ किंक्षेमशूरैर्बबु धैरसंयुगविकत्थनैः ॥ रहोजुषार्किंहरिणाशंभुनावावनौकसा ३६ किमिंद्रेणाल्पवीर्येणब्रह्मणावातपस्यता ॥ तथापिदेवाःसापत्न्यान्नोपेक्ष्याइतिमन्महे ॥ ततस्तन्मूलखननेनियुंक्ष्वास्माननुव्रतान् ३७ यथाऽमयोंऽगेसमुपेक्षितोनृभिर्नशक्यतेरूढपदश्चिकित्सितुम् ॥ यथेंद्रियग्रामउपेक्षितस्तथारिपुर्महाल ब्धबलोनचाल्यते ३८ मूलंविष्णुर्हिदेवानांयत्रधर्मःसनातनः ॥ तस्यचब्रह्मगोविप्रास्तपोयज्ञाःसदक्षिणाः ३९ तस्मात्सर्वात्मनाराजन्ब्राह्मणान्ब्रह्मवादि नः ॥ तपस्विनोयज्ञशीलान्गाश्चहन्मोहविर्दुवाः ४० विप्रागावश्चवेदाश्चतपःसत्यंदमःशमः ॥ श्रद्धादयातितिक्षाचक्रतवश्चहरेस्तनूः ४१ साहिसर्वसुराध्य क्षोह्यसुरद्विट्गुहाचरः ॥ तन्मूलादेवताःसर्वाःसेश्वराःसचतुर्मुखाः ४२ अयंचतद्बधोपायोयद्दृषीणांविहिंसनम् ॥ एवंदुर्मंत्रिभिःकंसःसहसंमंत्र्यदुर्मतिः४३ ब्रह्महिंसांहितंमेनेकालपाशावृतोऽसुरः ॥ संदिश्यसाधुलोकस्यकदनेकदनप्रियान् ॥ कामरूपधरान्दिक्षुदानवान्गृहमाविशत् ४४ तेवैरजःप्रकृतयस्तम सामूढचेतसः ॥ सतांविद्वेषमाचेरुरारादागतमृत्यवः ४५ आयुःश्रियंयशोधर्मंलोकानाशिषएवच ॥ हंतिश्रेयांसिसर्वाणिपुंसोमहदतिक्रमः ४६ इति श्रीभागवतेम०दशमस्कंधेअसुरमंत्रेपंचमोऽध्यायः ॥ ५ ॥ श्रीशुकउवाच ॥ नंदस्त्वात्मजउत्पन्नेजाताह्लादोमहामनाः ॥ आहूयविप्रान्दैवज्ञान्स्नातः शुचिरलंकृतः १ वाचयित्वास्वस्त्ययनंजातकर्मात्मजस्यवै ॥ कारयामासविधिनापितृदेवार्चनंतथा २

हन्मःहनिष्यामःहविर्दुवाःयज्ञयोग्यंधृतंदुहंतीः । छंदसिहकारस्थानेघकारः ४० ४१ ४२ ४३ आरात्समीपे ४४ ४५ विष्ण्वादिमहदतिक्रमफलमाह आयुरिति ४६ ॥ इतिश्रीभागवतेमहापुराणे दशमस्कंधेविजयध्वजकृतटीकायांपंचमोऽध्यायः ॥ ५ ॥ भगवदवतारतद्दृष्टमनसोनंदस्यभगवद्भक्त्यतिशयेनचित्तविश्रमणेनसद्भक्तानांभगवद्भक्तिर्यद्वोदयइवसमुद्रवृद्धिःस्वाभाविकीतिप्रकाश्यतेऽस्मिन ध्याये जाताह्लादः प्रादुर्भूतानंदः १ स्वस्त्ययनंमांगल्यवचनंतथापितृदेवगंधर्वार्चनंकारयामासनंदयामास २

शातकुंभांतरावृतान् गर्भीकृतशातकुंभान् ३ स्वकृतस्तुतिपाठकाःसूताः परकृतस्तुतिजीविनोमागधाःप्रबंधस्तुतिपाठकाबंदिनः ४ द्वारंचअजिरंचगृहांतरंचद्वाराजिरगृहांतराणिसंमृष्टानिसंशोधितानिसंसिक्तानिचंदनजलादिनाप्रोक्षितानिद्वारादीनियासांतास्तथा चित्रध्वजपताकयास्रक्चैलपल्लवैश्चैवयुतास्तोरणायासांतास्तथा ५ विचित्रधातवःबर्हस्रजःपिच्छमालावस्त्राणिकांचनमालाश्चयेषांसंतीतिविचित्रधातुबर्हस्रग्वस्त्रकांचनमालिनः ६ महार्हाणिमहायोग्यानिवस्त्राणिआभरणानिकंचुकानिकवचानिउष्णीषाणिशिरोवेष्टनवस्त्राणिभूषणानियेषांतेतथा ७ आकल्पंआभरणं ८ नवकुंकुमकिंजल्कानिअभिनवकुंकुमपुष्पकेसराणीवमुखपंकजभूतयः मुखकमलश्रियोयासांतास्तथा बलिभिर्युताः पृथुश्रोण्यःविशालकटितटाः ९ व्रजतीःव्रजंत्यः लोलत्वंकुंडलादीनांगमनविशेषेण

धेनूनांनियुतेप्रादाद्विप्रेभ्यःसमलंकृतः ॥ तिलाद्रीन्सप्तरत्नौघान्शातकुंभांतरावृतान् ३ सौभंगल्यगिरोविप्राःसूतमागधबंदिनः ॥ गायकाश्चजगुर्नेदुर्भेर्योदुंदुभयोमुहुः ४ प्रजाःसंमृष्टसंसिक्तद्वाराजिरगृहांतराः ॥ चित्रध्वजपताकास्रक्चैलपल्लवतोरणाः ५ गावोवृषाश्चवत्साश्चहरिद्रातैलरूषिताः ॥ विचित्रधातुबर्हस्रग्वस्त्रकांचनमालिनः ६ महार्हवस्त्राभरणकंचुकोष्णीषभूषिताः ॥ गोपाःसमाययूराजन्नानोपायनपाणयः ७ गोप्यश्चाकर्ण्यमुदितायशोदायाःसुतोद्भवम् ॥ आत्मानंभूषयांचक्रुर्वस्त्राकल्पांजनादिभिः ८ नवकुंकुमकिंजल्कमुखपंकजभूतयः ॥ बलिभिस्त्वरितंजग्मुःपृथुश्रोण्यश्चलत्कुचाः ९ गोप्यःसुमृष्टमणिकुंडलनिष्ककंठ्यश्चित्रांबराःपथिशिखाच्युतमाल्यवर्षाः ॥ नंदालयंसवलयाव्रजतीर्विरेजुर्व्यालोलकुंडलपयोधरहारशोभाः १० ताआशिषःप्रयुंजानाश्चिरंपाहीतिबालके ॥ हरिद्राचूर्णतैलाद्भिःसिंचंत्योऽजनमुज्जगुः ११ अवाद्यंतदिविचित्राणिवादित्राणिमहोत्सवे ॥ कृष्णेविश्वेश्वरेऽनंतेनंदव्रजमुपेयुषि १२ गोपाःपरस्परंहृष्टादधिक्षीरघृतांबुभिः ॥ आसिंचंतोविलिंपंतोनवनीतैश्चचिक्षिपुः १३ नंदोमहामनास्तेभ्योवासोलंकारगोधनैः ॥ सूतमागधबंदिभ्योयेऽन्येविद्योपजीविनः १४ तैस्तैःकामैरदीनात्मायथोचितमपूजयत् ॥ विष्णोराराधनार्थायस्वपुत्रस्योदयायच १५ रोहिणीचमहाभागानंदगोपाभिनंदिता ॥ व्यचरद्दिव्यवासःस्रक्कंठाभरणभूषिता १६ ततआरभ्यनंदस्यव्रजःसर्वसमृद्धिमान् ॥ हरेर्निवासानुगुणैरमाक्रीडमभून्नृप १७ गोपान्गोकुलरक्षायांनिरूप्यमथुरांगतः ॥ नंदःकंसस्यवार्षिक्यंकरंदातुंकुरूद्वह १८ वसुदेवउपश्रुत्यभ्रातरंनंदमागतम् ॥ ज्ञात्वादत्तकरंराज्ञेययौतदवलोकनः १९ तंदृष्ट्वासहसोत्थायदेहःप्राणमिवागतम् ॥ प्रीतःप्रियतमंदोर्भ्यांसस्वजेप्रेमविह्वलः २० पूजितःसुखमासीनःपृष्ट्वानामयमादितः ॥ प्रसक्तधीःस्वात्मजयोरिदमाहविशांपते २१ दिष्ट्याभ्रातःप्रवयसइदानीमप्रजस्यते ॥ प्रजाशायानिवृत्तस्यप्रजायत्समजायत २२

सवलयाःसकटकाःसापांगनयनाः १० हरिद्रातैलचूर्णाद्भिर्जनंसिंचंत्यः अजनंकृष्णमितिकेचित् ११ उपेयुषिप्राप्नवति १२ १३ तेभ्योगोपेभ्यःयथोचितंदत्वाअपूजयत् येअन्येविद्योपजीविनः तेभ्यश्चयथोचितंदत्वा १४ किंफलमुद्दिश्येतित्राह विष्णोरिति १५ १६ रमाक्रीडंलक्ष्मीविहारस्थानं क्रियाविशेषणंवा १७ वार्षिक्यंप्रतिवत्सरंदेयं १८ तदवलोकनःतस्यनंदस्यदर्शनेच्छुः १९ २० २१ प्रवयसःवृद्धस्य इदानींप्रजासमजायतेतियत् अतोदिष्ट्या २२

इदंचैकमंगलमभूदित्याह दिष्टयेति पुनःपुनर्भवतीतिपुनर्भवःतस्मिन् किंचोचमितित्राह दुर्लभमिति २३ दुर्लभत्वमुपपादयति नैकत्रेति प्रियसंवासःहर्षणनिवासः प्रियैःसहसंवासोवा चित्रक
र्मणांनानाविधपुण्यपापवतां स्रोतसोनद्यःओघेनप्रवाहेणव्यूह्यमानानांविविधंनीयमानानां प्लवानांकाष्ठादीनांपोतानांवा २४ कच्चिदितिसानुनयप्रश्नः पशव्यंपशुहितं निरुजंनीरोगकरं २५
नंदस्यकृष्णोममसुतइतिभ्रांतिंनिवारयति भ्रातरिति २६ त्रिवर्गोधर्मादिःपुंसःविहितोवेदेइतिशेषः ससुहृदामनिमित्तबंधूनांजनानामनुभावतः प्रभावान्निश्चयाद्भवति हियस्मात्तस्मात् तेषुसु
हृत्सुक्लिश्यमानेषुसत्सुत्रिवर्गोर्थायप्रयोजनायनकल्पतेसमर्थोनभवति २७ सुतास्तेपिसुखिनःकच्चिदितिशेषः २८ वसुदेवस्यस्वस्यतत्त्वज्ञानमस्तीतिसूचयति नूनमिति नूनंप्रायःअयंजनःदृष्टप्रत्यक्षे
कार्येनिष्ठानितरांस्थितिर्यस्यसतथाहि एवंअदृष्टपरमोनदृष्टमेवजानातिनादृष्टमित्यर्थः अत्रयआत्मनःअदृष्टमव्यक्तंतत्त्वंवेदसपुमान्नमुह्यतिविपरीतज्ञानीनभवति यथातत्त्वंजानातीत्यर्थः २९ नून

दिष्ट्यासंसारचक्रेऽस्मिन्वर्तमानःपुनर्भवे ॥ उपलब्धोभवानद्यदुर्लभंप्रियदर्शनम् २३ नैकत्रप्रियसंवासःसुहृदांचित्रकर्मणाम् ॥ ओघेनव्यूह्यमानानांप्लवानांस्रोतसोयथा २४ कच्चित्पशव्यंनिरुजंभूर्यंबृतृणवीरुधम् ॥ बृहद्वनंतदधुनायत्रास्तेत्वंसुहृद्वृतः २५ भ्रातर्ममसुतःकच्चिन्मात्रासहभवद्व्रजे ॥ तातंभवंतंमन्वानोभवद्भ्यामुपलालितः २६ पुंसस्त्रिवर्गोविहितःसुहृदांह्यनुभावतः ॥ नतेषुक्लिश्यमानेषुत्रिवर्गोऽर्थायकल्पते २७ ॥ नंदउवाच ॥ अ
होतेदेवकीपुत्राःकंसेनबहवोहताः ॥ एकावशिष्टावरजाकन्यासापिदिवंगता २८ नूनंहिदृष्टनिष्ठोयंनादृष्टपरमोजनः ॥ अदृष्टमात्मनस्तत्त्वंयोवेदनसमु
ह्यति २९ ॥ वसुदेवउवाच ॥ करोवैवार्षिकोदत्तोराज्ञेदृष्टावयंचवः ॥ नेहस्थेयंबहुर्दिनंसंत्युत्पाताश्चगोकुले ३० इतिनंदादयोगोपाःप्रोक्तास्तेशौरिणाय
युः ॥ अनोभिरनडुद्युक्तैस्तमनुज्ञाप्यगोकुलम् ३१ इतिश्रीभागवतेदशमस्कंधेनंदवसुदेवसंगमेषष्ठोऽध्यायः ॥ ६ ॥ श्रीशुकउवाच ॥ नंदःपथिवचः
शौरेर्नमृषेतिविचिंतयन् ॥ हरिंजगामशरणमुत्पातागमशंकितः १ कंसेनप्रहिताघोरापूतनाबालघातिनी ॥ शिशूंश्चचारनिघ्नंतीपुरग्रामव्रजादिषु २
नयत्रश्रवणादीनिरक्षोघ्नानिस्वकर्मसु ॥ कुर्वंतिसात्वतांभर्तुर्यातुधान्यश्चतत्रहि ३ साखेचर्येकदोपेत्यपूतनानंदगोकुलम् ॥ गोपित्वामाययात्मानंप्रा
विशत्कामचारिणी ४ तांकेशबंधव्यतिषक्तमल्लिकांबृहन्नितंबस्तनकृच्छ्रमध्यमाम् ॥ सुवाससंकंपितकर्णभूषणत्विषोल्लसत्कुंतलमंडिताननाम् ५ व
ल्गुस्मितापांगविसर्गवीक्षितैर्मनोहरंतींवनितांव्रजौकसः ॥ अमंसतांभोजकरेणरूपिणींगोप्यःश्रियंद्रष्टुमिवागतांपतिम् ६

मिदानीमस्मिन्कालेचउत्पाताअनर्थसूचकाः ३० अनडुद्युक्तैःवृषभयुक्तैः ३१ इतिश्रीभावतेमहापुराणेदशमस्कंधेविजयध्वजकृतटीकायांषष्ठोऽध्यायः ॥६॥ गुणश्रवणवत्पराक्रमश्रवणमपिज्ञानसा
धनमितिप्रतिपादयति पूतनावधलक्षणंतच्चरितमस्मिन्नध्याये तत्रोत्पातपरिहारोनारायणशरणप्राप्त्याभवतीत्याशयेनाह नंदइति १ प्रहिताप्रेषिता पुरंराजमंदिरं नानाजनाधिवासोग्रामः व्र
जोगोकुलं २ यातुधान्यः राक्षस्यः सात्वतांभर्तुःश्रवणादीनिरक्षोघ्नानिइतरेषामितिशेषःनसंति । साक्षात्कृष्णोयत्रवसतितत्रकाशंकेतिभावः ३ गोपित्वापिधाय ४ केशपाशेकेशभारेव्यति
षक्तानिगूढामल्लिकायस्यांसातथा बृहन्नितंबेनकलशस्तनाभ्यांचकृच्छ्रोभग्नोमध्यमोयस्याःसातथातां ५ अपांगविसर्गःकटाक्षमोक्षःवनितासंभाजनीयां व्रजौकसोगोप्यः व्रजौकसामितिपाठेमनो
हरंतीमितिसंबंधः श्रियमिवनतुश्रियं अमंसतमेनिरे ६

बालग्रहीबालकमारिका असदंतकं भसिभस्मनि विचिन्वतीमृगयंती ७ बालकमारिकाग्रहंबालानांमृत्युभूतग्रहंसुरत्वेपूर्णैश्वर्ये देवदेवत्वेवा सुरैश्वर्यइतिधातुः महीत्यतिप्रशस्तोत्सवः महामपी श्वरत्वेपिवा ईश्वरत्वाप्रकटनेवचनाभावेचबालभावप्रकाशनहेतुः ८ अथसात्विकस्त्रियःस्वभावप्रकटनानंतरम् यद्वा राक्षस्याःस्वभावःप्रारभ्यते यद्वायतोनिशाचरी अथतस्मादजानाना मंग लानंतरारंभप्रश्नकात्स्न्यैष्वथोअथेति अथातोनंतराप्यथेविकल्पारंभमंगलइत्यमरयादवौ हरेःपूतनावृत्तचेष्टिताज्ञानंनास्तीत्याशयेनोक्तंनिसर्गेति ज्ञानाविर्भावतिरोभावौनस्तइतिद्योतनायनिसर्गे तिपदंदेवदत्तज्ञानवत्कतिपयंपदार्थज्ञानविषयंनेश्वरज्ञानमित्यतोजगदिति हरिशब्दस्यअनेकार्थत्वेनात्रकिंचिद्विवक्षितमित्यतउक्तं अनंतमिति एककुंडलोनंतइत्यस्यापिसंदिग्धार्थत्वमित्यतउक्तम् अंतकमिति रुद्रोमाविशांतकवचनात् उक्तशंकाऽनिस्तारादित्यतोनिसर्गेति इदंलक्षणंनारायणस्यैवनान्यस्य अहंरुद्रायधनुरातनोमियःसर्वज्ञइत्यादेः पूतनाऽनंतबालंअंकमारोपयदित्यन्वयः हंतुमितिशेषः नकेवलंहरिमजानमानाऽपितुतमात्मनोंतकंअजानमानापरिमितांकारोपणंच तमनंतमपरिच्छिन्नंमरणशून्यंवा तमजानमानाचेत्यर्थः कथमित्यत्रदृष्टांतमाह अबुद्ध्याअज्ञानेनरज्जु रियमितिधीर्ज्ञानंयस्याःसातथासुप्तमुरगंअंकमारोपयति अबुद्धिश्चरज्जुधीश्चेतिविग्रहः तथाचाबुद्धिरज्ञानीयथासुप्तमंतकमंकमारोपयति रज्जुधीःसुप्तमुरगमितिविभागः केचिदुष्टांतकंसुप्तंनाम्नानं

बालग्रहीतत्रविचिन्वतीशिशून्यदृच्छयानंदगृहेऽसदंतकम् ॥ बालंप्रतिच्छन्ननिजोरुतेजसंददर्शतल्पेऽग्निमिवाहितंभसि ७ विबुध्यतांबालकमारिकाग्र हंचराचरात्मासनिमीलितेक्षणः ॥ महीसुरत्वेपिचबालभावंविभावयन्किंचिदुवाचनप्रभुः ८ अजानमानाथनिशाचरीहरिंनिसर्गविज्ञातजगद्विचेष्टितम् ॥ अनंतमारोपयदंकमंतकंयथोरगंसुप्तमबुद्धिरज्जुधीः ९ तांतीक्ष्णचित्तामतिवामचेष्टितांवीक्ष्यांतराकोशपरिच्छदासिवत् ॥ वरास्त्रियंतत्प्रभयाचधर्षिता निरीक्षमाणाजननीअतिष्ठत् १० तस्मिन्नस्तनंदुर्जरवीर्यमुल्बणंघोरांकमादायशिशोर्ददावथ ॥ गाढंकराभ्यांभगवान्प्रपीड्यतत्प्राणैःसमंरोषसमन्वितो पिबत् ११ सामुंचमुंचेतिगिराप्रभाषिणीनिष्पीड्यमानाखिलजीवमर्मिणी ॥ विवृत्यनेत्रेचरणौभुजौमुहुर्विक्षिन्नगात्राक्षिपतीरुरावहि १२ तस्याःस्व नेनातिगभीररंहसासाद्रिर्महीद्यौश्चचचालसग्रहा ॥ रसादिशःखंप्रतिनेदिरेजनाःपेतुःक्षितौवज्रनिपातशंकया १३ निशाचरीत्थंव्यथिताव्यसुःक्षितौ विकीर्यकेशांश्चरणौभुजावपि ॥ प्रसार्यगोष्ठेनिजरूपमास्थितावज्राहतोवृत्रइवापतन्नृप १४

तमुरगमित्युरगविशेषोवा काचिन्निशाचरीउलूपिका सुप्तंहरिंसिंहंशिवाबुद्ध्येतिशेषः ध्वांक्षारातिर्निशाटनइत्यमरः ९ अतिवामचेष्टिताम् अधिकक्रूरव्यापाराम् अतिस्यादधिकार्थोंक्तौप्रशंसायाम तिक्रमइतियादवः वामःक्रूरेमनोहरइतिच अंतरामध्येकोशएवपरिच्छदः परिकरभूषणलक्षणोयस्यसोंतराकोशपरिच्छदः सएवासिरंतराकोशपरिच्छदासिःसइवगूढाकारबाह्याभ्यंतरकोशालंकृत खड्गवत्स्थितेत्यन्वयः अंतराकोशपरिच्छदः वर्जितकोशलक्षणालंकारोसिर्यथातथावामचेष्टिताभितिवा तस्याःपूतनायाःप्रभयावरोद्भूतलक्षणयाधर्षितावित्रुलिता तस्यकृष्णप्रभयावा इदानींमे वपूतनाप्राणवियोगसूचनायजननीअतिष्ठदितिसंधिकार्याकरणम् वैदिकप्रयोगानुकरणंवा १० तस्मिन्कालेदुर्जरवीर्यैर्जीर्णीकर्त्तुमशक्यंवीर्यैर्यस्यसतथा अतएवोल्बणंदुःसहक्रौर्योपेतम् अथशब्दो विकल्पार्थः अथस्तनंददाविति विषमितितस्याःप्राणैः ११ अखिलजीवमर्मिणीसमस्तप्राणापहारिणी रुरावरोदनमकरोत् हिशब्दोहेतौश्रोतृणामनुकंपाजनकः १२ रसापातालंप्रतिनेदि रेप्रतिशब्दंचक्रः १३ व्यसुःविगतप्राणा १४

त्रिगव्यूत्यंतरेषट्क्रोशमध्येयेद्रुमाःवृक्षाःतान् गव्यूतिःस्याक्रोशयुगमित्यमरः १५ ईषामात्रेग्रदंष्ट्रास्यंगिरिकंदरनासिकम् ॥ गंडशैलस्तनंरौद्रंप्रकीर्णारुण
सेतुवत् स्थिराभुजोर्वंघ्रयोयस्यतत्तथा भुजोऊरुचअंघ्रीचभुजोर्वंघ्रयः शून्यंतोयंयस्मिन्शून्यतोयः सन्हृदइवउदरंयस्यतत्तथा १७ संतत्रसुःभीताअभूवन् तस्याःनिस्वनितेनअशनिवत्क्रूरशब्देनभिन्नानि
हृत्कर्णमस्तकानियासांतास्तथा १८ तूर्णंशीघ्रम् १९ २० गोरजसागोरेणुना गोशकृतागोमयसहितेन केशवादिनामभिःललाटादिद्वादशावयवेषु २१ संस्पृष्टसलिलाःआचांताःअंगेषुन्यस्य

पतमानोपितद्देहस्त्रिगव्यूत्यंतरद्रुमान् ॥ चूर्णयामासराजेंद्रमहदासीत्तदद्भुतम् १५ ईषामात्रेग्रदंष्ट्रास्यंगिरिकंदरनासिकम् ॥ गंडशैलस्तनंरौद्रंप्रकीर्णारुण
मूर्धजम् १६ अंधकूपगभीराक्षंपुलिनारोहभीषणम् ॥ बद्धसेतुभुजोर्वंघ्रिशून्यतोयन्हदोदरम् १७ संतत्रसुःस्मतद्वीक्ष्यगोपागोप्यःकलेवरम् ॥ पूर्वंतुतन्निः
स्वनितभिन्नहृत्कर्णमस्तकाः १८ बालंचतस्याउरसिक्रीडंतमकुतोभयम् ॥ गोप्यस्तूर्णंसमभ्येत्यजगृहुर्जातसंभ्रमाः १९ यशोदारोहिणीभ्यांताःसमंबाल
स्यसर्वशः ॥ रक्षांविदधिरेसम्यग्गोपुच्छभ्रमणादिभिः २० गोमूत्रेणस्नापयित्वापुनर्गोरजसार्भकम् ॥ रक्षाचक्रुर्गोशकृताद्वादशांगेषुनामभिः २१ गो
प्यःसंस्पृष्टसलिलाअंगेषुकरयोःपृथक् ॥ न्यस्यात्मन्यथबालस्यबीजन्यासमकुर्वत २२ अव्यादजोंऽघ्रिमणिमांस्तवजान्वथोरुयज्ञोऽच्युतःकटितटंज
ठरंहयारयः ॥ हृत्केशवस्त्वदुरईशइनस्तुकंठंविष्णुर्भुजंमुखमुरुक्रमईश्वरःकम् २३ चक्रयग्रतःसहगदोहरिरस्तुपश्चात्त्वत्पार्श्वयोर्धनुरसीमधुहाऽजनश्च ॥
कोणेषुशंखउरुगायउपर्युपेंद्रस्तार्क्ष्यःक्षितौहलधरःपुरुषःसमंतात् २४ इंद्रियाणिहृषीकेशःप्राणान्नारायणोऽवतु ॥ श्वेतद्वीपपतिश्चित्तंमनोयोगेश्वरोऽवतु
२५ पृश्निगर्भस्तुतेबुद्धिमात्मानंभगवान्परः ॥ क्रीडंतंपातुगोविंदःशयानंपातुमाधवः २६ व्रजंतमव्याद्वैकुंठआसीनंत्वांश्रियःपतिः ॥ भुंजानंयज्ञभु
क्पातुसर्वग्रहभयंकरः २७ डाकिन्योयातुधान्यश्चकूष्मांडायेऽर्भकग्रहाः ॥ भूतप्रेतपिशाचाश्चयक्षरक्षोविनायकाः २८ कोटरारेवतीज्येष्ठापूतनामातृ
कादयः ॥ उन्मादायेह्यपस्मारादेहप्राणेंद्रियद्रुहः २९ स्वप्नदृष्टामहोत्पाताबृहद्बालग्रहाश्चये ॥ सर्वेनश्यंतुतेविष्णोर्नामग्रहणभीरवः ३० इतिप्रणयबद्धाभि
र्गोपीभिःकृतरक्षणम् ॥ पाययित्वास्तनंमातासंन्यवीविशदात्मजम् ३१ तावन्नंदादयोगोपामथुरायाव्रजंगताः ॥ विलोक्यपूतनादेहंबभूवुरतिविस्मिताः
३२ नूनंबतर्षिःसंजातोयोगेशोवासमासतः ॥ सएवदृष्टोह्युत्पातोयथाहानकदुंदुभिः ३३ कलेवरंपरशुभिश्छित्वातत्तेव्रजौकसः ॥ दूरेक्षिप्त्वाऽवयवशोदद
हुःकाष्ठवेष्टितम् ३४ दह्यमानस्यदेहस्यधूमश्चागुरुसौरभः ॥ उत्थितःकृष्णनिर्भुक्तसपद्याहतपाप्मनः ३५

पृथक्करयोश्चन्यस्यआत्मनिमध्येदेहेचन्यस्य अथानंतरंमंगलकरंबालस्यबीजन्यांसंअष्टाक्षरन्यासम् अकुर्वत २२ अत्राजादयोमूर्तिविशेषाः अंघ्रिअंघ्री जानुजानुनीअंघ्रिमित्यन्वयः अणिमान्ग
रिमानित्यर्थः २३ मधुसूदनादयश्चत्वारःचतुर्षुकोणेषु २४ २५ आत्मानंमध्यम् २६ २७ अर्भकग्रहाःबालग्रहाः २८ २९ ३० प्रणयबद्धाभिःबद्धस्नेहाभिः संन्यवीविशत् संवेशंनिद्रामकारयत्
३१ ३२ वसुदेवःऋषिःत्रिकालदर्शी योगेशःकपिलान्यतमःसमासतःसंक्षेपतः संकोचंकृत्वा जातः दृष्टःअस्माभिरितिशेषः ३३ ३४ ३५

पूतनाविष्टोवैश्री सद्गतिंस्वर्गं पूतनात्वसद्गतिंनरकं षड्विंशरणगत्यवसादनेष्वितिधातुः ३६ रक्ताअनुरक्ताः ३७ ३८ अपिस्वर्गंगर्हितंस्वर्गंनरकमित्यर्थः अपिःपदार्थसंभावनान्ववसर्गगर्हासमुच्चयेष्वि तिपाणिनिः जनेयेनीचास्तैर्गम्यतइतिजननीगतिः स्पष्टोन्योर्थः यद्वाजनन्याइगतिंविचित्रगतियोग्यतानुसृतगतिमित्यर्थः इविंचित्रेस्मरेपुमानितियादवःअनेनापिपूतनायानरकगतिःउर्वश्याःस्वर्गग तिरितिसूचितं नुसविकल्पांगतिं योग्यतयेतिशेषः यद्वाअनुयोग्यतासदृशीं नुपृच्छायांविकल्पेचपश्चात्सादृश्ययोरान्वित्यमरः ३९ ४० सुतेक्षणंपुत्रदर्शनम् ४१ कटधूमस्यशवधूमस्य अन्येत्रजौकसः४२ ४३ प्रोष्यप्रवासंकृत्वा ४४ फलमाह यइति ४५ ॥ इतिश्रीभागवतेमहापुराणे दशमस्कंधेवि०टीकायांसप्तमोध्यायः॥७॥ भगवतिभक्तिकरणार्थंअनन्यसाध्यमाहात्म्यंवर्ण्यतेस्मिन्नध्याये ॥ तत्रशुकःपरि

पूतनालोकबालघ्नीराक्षसीरुधिराशना ॥ जिघांसयापिहरयेस्तनंदत्वापसद्गतिम् ३६ किंपुनःश्रद्धयाभक्त्याकृष्णायपरमात्मने ॥ यच्छान्प्रियतमांकिंचे द्रक्तास्तन्मातरोयथा ३७ पद्भ्यांभक्तहृदिस्थाभ्यांवंद्याभ्यांलोकवंदितः ॥ अंगंयस्याःसमाक्रम्यभगवानपिबत्स्तनम् ३८ यातुधान्यपिसास्वर्गमवापजन नीगतिम् ॥ कृष्णभुक्तस्तनक्षीरात्किमुगावोनुमातरः३९ पयांसियासामपिबत्पुत्रस्नेहस्नुतान्यलम् ॥ भगवान्देवकीपुत्रःकैवल्याद्यखिलार्थदः ४०तासाम विरतंकृष्णेकुर्वतीनांसुतेक्षणम् ॥ नपुनःकल्पतेराजन्संसारोऽज्ञानसंभवः ४१ कटधूमस्यसौरभ्यमवघ्रायव्रजौकसः ॥ किमिदंकुतएवेतिवदंतोव्रजमाययुः ४२ तेतत्रवर्णितंगोपैःपूतनागमनादिकम् ॥ श्रुत्वातन्निधनंस्वस्तिशिशोरासन्सुविस्मिताः ४३ नंदःस्वपुत्रमादायप्रेष्यागतउदारधीः ॥ मूर्ध्न्युपाघ्रायपर मांमुदंलेभेकुरुद्वह ४४ यएतत्पूतनामोक्षंकृष्णस्यार्भकचेष्टितम् ॥ निशम्यश्रद्धयामर्त्योगोविंदेलभतेरतिम् ४५ ॥ इतिश्रीभागवतेमहापुराणेपूर्वार्धे दशमस्कंधे पूतनामोक्षोनामसप्तमोध्यायः ॥ ७ ॥ श्रीशुकउवाच ॥ एवंसवृधेविष्णुर्नंदगेहेजनार्दनः ॥ कुर्वन्ननिशमानंदंगोपालानांसयोषिताम् १ राजोवाच ॥ येनयेनावतारेणभगवान्हरिरीश्वरः ॥ करोतिकर्णरम्याणिमनोज्ञानिचनःप्रभो २ यच्छृण्वतोपैत्यरतिर्वितृष्णासत्वंविशुध्यत्यचिरेणपुंसः ॥ भक्तिर्हरौतत्पुरुषेषुसख्यंतदेवसारंवदमन्यसेतद् ३ अथान्यदपिकृष्णस्यतोकाचरितमद्भुतम् ॥ मानुषंदेहमासाद्यतज्जातिमनुरुंधतः ४ विस्तरेणेहकारुण्या त्सर्वपापप्रणाशनम् ॥ वक्तुमर्हसिधर्मज्ञदयालुस्त्वामितिप्रभो ५ श्रीशुकउवाच ॥ कदाचिदुत्थापनकौतुकाप्लवेजन्मर्क्षयोगेसमवेतयोषिताम् ॥ वादित्रगी तद्विजमंत्रवाचकैश्चकारसूनोरभिषेचनंसती ६

क्षितःप्रश्नबीजमुत्थापयन्वृत्तानुवादसूचनपूर्वकंकृष्णकथामाह एवमिति एवमुक्तप्रकारेणजनार्दनःदुष्टजनानदर्यातिहिनस्तीति अर्दहिंसायामितिधातुः १ कर्णरम्याणिश्रोत्रसुखजनकानि मनोज्ञानिमनः प्रीतिजनकानि २ अरतिस्तत्रवितृष्णाविशिष्टतृष्णा विषयेषुरागबुद्ध्यभावोवा सत्त्वमंतःकरणं ३ तोकाचरितंबालचरितं ४ ननुवक्रेमह्यंकिंददासीति तत्राह दयालुरिति ५ उत्थापनकौतुकाप्लवे बहिर्निष्क्रमणोत्सवसंभ्रमणेउत्सवहेतुकःप्लवइतस्ततःप्लुतिर्यस्मिन्सतथातस्मिन् जन्मर्क्षयोगे कृष्णस्यजन्मनक्षत्रसंयोगोयस्मिन्ततस्मिन्दिवसेइतिशेषः कासांप्लवइतित्राह समवेतेति संमीलितस्त्रीणां क मनिम्नगहीभागेकविप्लुतिस्वगप्लवाइतियादवः स्त्रीणांमध्येसतीप्रशस्तकर्मा ६

अन्नाद्यवासआदयोयेषांतेतथातैःविप्रैःकृतस्वस्त्ययनंमांगल्यवचनंयस्यसतथा संजातानिद्रायस्यास्तेतथातेअक्षिणीयस्यसतथातं अशीशयत्शायितवती शयनगतमकारयदित्यर्थः ७ कदातुउत्थान कंउत्सुकपतिपश्यतीतिउत्थानकौत्सुक्यं स्वार्थेष्यञ्प्रत्ययः तादृशंमनोयस्याःसातथा मनस्विनीप्रशस्तमनाः उदक्षिपत्क्षिप्तवान् ८ अथउत्क्षेपानंतरं अनःशकटंव्यवर्तताविपरीतमधोमुखमपतत् अल्प कौअणुतरौप्रवालवन्मृदूअंघ्रीअल्पकप्रवालमृदूंघ्रीताभ्यांहतंपीडितं ध्वस्तानिइतस्ततोविक्षिप्तानिनानारसपूर्णकुप्यात्मभाजनानियस्मिन्तत्तथा कुप्यानिद्वीपांतरस्थमृद्विशेषरचितानि चक्रंरथांगंवृत्तदा रु अक्षोनामचक्रप्रोतदारुविशेषः कूबरोयुगंधरः व्यत्यस्तौन्यंचितौचक्राक्षौविभिन्नोविशीर्णःकूबरश्चयस्यतत्तथा ९ तद्विपर्यगात्विपरीतंगतं १० अव्यक्तमतीनानिश्चितबुद्धीन् नव्यक्तामतिर्येषांतेऽ

नंदस्यपत्नीकृतमज्जनादिकंविप्रैःकृतस्वस्त्ययनंसुपूजितैः ॥ अन्नाद्यवासःस्रगभीष्टधेनुभिःसंजातनिद्राक्षमशीशयच्छनैः ७ औत्थानिकौत्सुक्यमनामन स्विनीसमागतान्पूजयतीव्रजौकसः ॥ नैवाशृणोद्वैरुदितंसुतस्यसारुदन्स्तनार्थीचरणावुदक्षिपत् ८ अनःशयानस्यशिशोरथाल्पकप्रवालमृदंघ्रिहतंव्यव र्तत ॥ विध्वस्तनानारसकुप्यभाजनंव्यत्यस्तचक्राक्षविभिन्नकूबरम् ९ दृष्ट्वायशोदाप्रमुखाव्रजस्त्रियऔत्थानिकेकर्मणियाःसमागताः ॥ नंदादयश्चाद्भुतदर्श नाकुलाःकथंस्वयंवैशकटंविपर्यगात् १० इतिब्रुवंतोऽतिविषादमोहिताजनाःसमंतात्परिवव्रुरार्तवत् ॥ऊचुस्तदव्यक्तमतीन्गोपान्गोपीश्चबालकाः॥ रुदता नेनपादेनक्षिप्तमेतन्नसंशयः११ नतेश्रद्दधिरेगोपाबालभाषितमित्युत ॥ अनंतस्याप्रमेयस्यबलंतस्यनवैविदुः १२ रुदंतंसुतमादाययशोदाग्रहशंकिता ॥ कृतस्वस्त्ययनंविप्रैःसूक्तैःस्तनमपाययत् १३ पूर्ववत्स्थापितंगोपैर्बलिभिःसपरिच्छदम् ॥ विप्राहुत्वार्चयांचक्रुर्दध्यक्षतकुशांबुभिः १४ येस्तेयान्तृ तदंभेर्ष्याहिंसामानविवर्जिताः ॥ नतेषांसत्यशीलानामाशिषोविफलाःक्वचित् १५ इतिबालकमानीयसामग्र्यजुरुपाकृतैः ॥ जलैःपवित्रौषधिभिरभि षिच्यद्विजोत्तमैः १६ वाचयित्वास्वस्त्ययनंनंदगोपःसमाहितः॥हुत्वाचाग्निंद्विजातिभ्यःप्रादादन्नंमहागुणम् १७ गाश्चसर्वगुणोपेतावासःस्रग्युक्ममालिनीः पुत्रस्याभ्युदयार्थायप्राग्जातेश्चान्वयुंजत १८ विप्रामंत्रविदोयुक्तास्तैर्याःप्रोक्तास्तथाशिषः ॥ तानिष्फलाअविष्यंतिनकदाचिदपिस्फुटम् १९ एकदारोह मारुढंलालयंतीसुतंसती ॥ गरिमाणंशिशोर्वोढुंनसेहेगिरिकूटवत् २० भूमौनिधायतंगोपीविस्मिताभारपीडिता ॥ महापुरुषमादध्यौजगामाशुचकर्म सु २१ दैत्योनाम्नातृणावर्त्तःकंसभृत्यःप्रचोदितः ॥ चक्रवातस्वरूपेणजहारासीनमर्भकम् २२ गोकुलंसर्वमावृण्वन्मुष्णंश्चक्षूंषिरेणुभिः ॥ ईरयन्सुमहा घोरशब्देनप्रदिशोदिशः २३ मुहूर्त्तमभवद्गोष्ठंरजसातमसावृतम् ॥ सुतंयशोदानापश्यत्तस्मिन्न्यस्तवतीयतः २४

व्यक्तमतयः तान्कुलवृद्धान् ११ बालभाषितवत्बालभाषितमितिविकल्प्यसंशय्य उताप्यर्थविकल्पयोरित्यमरः १२ १३ स्थापितमनइतिशेषः बलिभिःप्राणशक्तिमद्भिः सपरिच्छदंसपरिकरम् १४ इतिकृत्वास्थिताएवविप्राःसत्याशिषइत्याह यइति १५ उपाकृतैःसंस्कृतैः १६ १७ पुत्रस्याभ्युदयार्थायअभ्युदयप्रयोजनाय जातेःप्राक्संकल्पिताइतिशेषः प्राग्जातेरग्रजस्यबलभद्रस्यवा १८ १९ २० २१ २२ ईरयन्शब्दयुक्ताःकुर्वन्नित्यर्थः २३ यतोयत्रन्यस्तवतीतास्मिन्स्थले २४

शर्कराभिःअणुतरशिलाभिः २५ इतिशब्दःप्रकारवचनःआदिवचनोवा इतिहेतुप्रकारादिसमाप्तिष्वित्यमरः खरश्चंडःपवनोवायुःतेनचक्रपांसवःमंडलीकृतरजांसितेषांवर्षेसमूहे सुतपदवींअविचक्षमाणा विगतदर्शनाअपश्यंतीत्यर्थः पुत्रमनुस्मरंतीनिरंतरसंचिंतनोपेताअतएवभुविपतिताअबलाअतिकरुणमशोचदित्यन्वयः २६ उपारतःउपरतःशांतःपांसुवर्षवेगोयस्यपवनस्यसतथातस्मिन्सत्यपिकृष्ण स्यअंतरिक्षगमनात्भुव्यदर्शनं उपरिचक्षुर्दौर्बल्यादित्यर्थः २७ ननुमूर्तद्रव्यादर्शनंदेशांतरसंयोगादेशांतरप्रवेशलक्षणसंयोगाद्वेत्युभयथासंभाव्यतेअत्रकथमितिस्त्रीणांशंकामपनेतुमुपक्रमते तृणावर्तइति शांतरयःनिवृत्तवेगः २८ अश्मानंश्वेतपाषाणं २९ निर्गतलोचनः निष्क्रांतनेत्रमांसपिंडः अव्यक्तवाक्यःवचनावृत्तिरहितः ३० पुरंत्रिपुरसंज्ञम् ३१ ३२ ३३ समत्वेनगुणेनअधोनक्षीयतेजातुयस्मात्त

नापश्यत्कश्चनात्मानंपरंचापिविमोहितः ॥ तृणावर्तनिसृष्टाभिःशर्कराभिरुपद्रुतः २५ इतिखरपवनचक्रपांसुवर्षेसुतपदवीमबलाविचक्षमाणा ॥ अतिकरुणमनुस्मरंत्यशोचद्भुविपतितामृतवत्सकायथागौः २६ रुदितमनुनिशम्यतत्रगोप्योभृशमनुतप्तधियोऽश्रुपूर्णमुख्यः ॥ रुरुदुरनुपलभ्यनंद सूनुंपवनउपारतपांसुवर्षवेगे २७ तृणावर्तःशांतरयोवात्यारूपधरोहरन् ॥ कृष्णंनभोगतोगंतुंनाशक्नोद्भूरिभारभृत् २८ तमश्मानंमन्यमानआत्मनो गुरुमत्तया ॥ गलेगृहीतउत्स्रष्टुंनाशक्नोदद्भुतार्भकम् २९ गलग्रहणनिश्चेष्टोदैत्योनिर्गतलोचनः ॥ अव्यक्तवाक्योन्यपतत्सहबालोव्यसुर्व्रजे ३० तमं तरिक्षात्पतितंशिलायांविशीर्णसर्वावयवंकरालम् ॥ पुरंयथारुद्रशरेणविद्धंस्त्रियोरुदंत्योददृशुःसमेताः ३१ आदायमात्रेप्रतिहृत्यविस्मिताःकृष्णंचतस्यो परिलंबमानम् ॥ तंस्वस्तिमंतंपुरुषादनीतंविहायसामृत्युमुखात्प्रमुक्तम् ३२ गोप्यःसगोपाःकिलनंदमुख्यालब्ध्वापुनःप्रापुरतीवमोदम् ॥ अहोबता त्यद्भुतमेषरक्षसाबालोनिवृत्तिंगमितोऽभ्यगात्पुनः ३३ हिंस्रःस्वपापेनविहिंसितःखलःसाधुःसमत्वेनभयाद्विमुच्यते ॥ किंनस्तपश्चीर्णमधोक्षजार्चनंपूर्ते ष्टदत्तंकिमुभूतसौहृदम् ॥ यःसंपरेतःपुनरेवबालकोदिष्ट्यास्वबंधून्प्रणयन्नुपस्थितः ३४ दृष्ट्वाद्भुतानिबहुशोनंदगोपोबृहद्वने ॥ वसुदेववचोभूयोमानयामास विस्मितः ३५ एकदार्भकमादायस्वांकमारोप्यभामिनी ॥ प्रस्नुतंपाययामासस्तनंस्नेहपरिप्लुतम् ३६ पीतप्रायस्यजननीसुतस्यरुचिरस्मितम् ॥ मुखंला लयतीराजन्जृंभतोददृशेइदम् ३७ खंरोदसीज्योतिरनीकमाशाःसूर्येंदुवह्निश्वसनांबुधींश्च ॥ द्वीपान्नगांस्तद्दुहितॄर्वनानिभूतानियानिस्थिरजंगमानि ३८ संवीक्ष्यविश्वंसहसाराजन्संजातवेपथुः ॥ संमील्यमृगशावाक्षीनेत्रेआसीत्सुविस्मिता ॥ ३९ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेशकटतृणावर्तभं गोनामाष्टमोऽध्यायः ॥ ८ ॥ श्रीबादरायणिरुवाच ॥ गर्गःपुरोहितोराजन्यदूनांसुमहातपाः ॥ व्रजंजगामनंदस्यवसुदेवप्रचोदितः १

स्मादधोक्षजइतिभारतवचनादधोक्षजशब्दोनिरुक्तः वापीकूपतडागादिपूर्त अग्निहोत्रंतपःसत्यंवेदानांचानुपालनं आतिथ्यंवैश्वदेवंचइष्टमित्यभिधीयते शरणागतसंत्राणंभूतानांचाप्यहिंसनं बहिर्वेदिचय दानंतदत्तमभिधीयते प्रणयंस्नेहंकुर्वन् प्रणयःप्रसरःसमावित्यमरः ३४ ३५ भामिनीतेजस्विनी ३६ इदंवक्ष्यमाणंददृशेआस्यइतिशेषः ३७ रोदसीद्यावापृथिव्यौज्योतिरनीकंज्योतिर्गणं तेषांपर्वताना दुहितॄःनदीः ३८ मृगशावाक्षीमृगबालाक्षी ३९ इतिश्रीभा०म०दशम०विजयध्वजकृतटिकायांअष्टमोऽध्यायः ८ हरेस्तत्तदवतारेतत्तद्योनिविहितंकर्मकर्तव्यमितिदेवजनाशिक्षणार्थंताद्विधीयतेस्मिन्नध्याये १

आनर्च पूजितवान् २ सूनृतयापथ्यथमधुरया पूर्णस्यकृतकृत्यस्य ३ महतांपुंसांविचलनंगमनम् ४ ज्योतिषामयन ग्रहाणांराशीराश्यंतरगमनंगोचरज्यौतिःशास्त्रंज्ञायतअनेनादेज्ञानं अतींद्रियंत्रिकालविषयं परावरंअतीतानागतविषयम् ५ संस्कारान्गर्भाधानादीन् संस्कारकर्तामदन्यःकिंनस्यादितित्राह नृणामिति ६ तत्रनंदंगर्गोवक्तीत्याह गर्गइति चशब्दोहिशब्दार्थः योहंयदूनामाचार्यइति सर्वतोभुविख्यातोहिततःकिं कंसेनज्ञातेऽनर्थोभविष्यतीति सकइत्याह सुतमिति ७ कंसोहिंसायामितिधातोः हिंसाशीलः अतएवपापमतिः । तर्हितंकृष्णंहंताह निष्यतितदानोमहाननयोऽन्यायोऽपराधोभविष्यतीतिशेषः कथमयंकंसोमयासंस्कृतंतेसुतंदेवकीसुतंमन्यते निमित्तमाह सख्यमिति तवानकदुंदुभेश्चसख्यमस्तीतिजानातिअतोनयोःसुतविनिमयो भविष्यतीतिमन्यते निमित्तांतरमप्यस्तीत्याह देवक्याइति यश्चितयन्निति हेतोः तवहंताकश्चिज्जातइतिनिश्चायकेनकन्यावचसापितस्यतद्धननानिवृत्तिर्नभवतीत्याशयेनाह श्रुत्वेति गताशंकोनष्टहनन

तंदृष्ट्वापरमप्रीतःप्रत्युत्थायकृतांजलिः ॥ आनर्चाधोक्षजधियाप्रणिपातपुरःसरम् २ सूपविष्टंकृतातिथ्यंगिरासूनृतयामुनिम् ॥ नंदयित्वाब्रवीद्ब्रह्मन्पूर्णस्य करवामकिम् ३ महद्विचलनंनृणांगृहिणांदीनचेतसाम् ॥ निःश्रेयसायभगवन्कल्पतेनान्यथाक्वचित् ४ ज्योतिषामयनंसाक्षाद्यत्तज्ज्ञानमतींद्रियम् ॥ प्रणीतंभवतायेनपुमान्वेदपरावरम् ५ त्वंहिब्रह्मविदांश्रेष्ठःसंस्कारान्कर्त्तुमर्हसि ॥ बालयोरनयोर्नृणांजन्मनाब्राह्मणोगुरुः ॥ ६ ॥ गर्गउवाच ॥ यदूनामहमाचार्यःख्यातश्चभुविसर्वतः ॥ सुतंमयासंस्कृतंतेमन्यतेदेवकीसुतम् ७ कंसःपापमतिःसख्यंतवचानकदुंदुभेः ॥ देवक्याअष्टमोगर्भोनस्त्रीभवितुमर्हति ८ इतिसंचिंतयञ्श्रुत्वादेवकीदारिकावचः ॥ अपिहंतागताशंकस्तर्हितन्नोऽनयोमहान् ९ नंदउवाच ॥ अलक्षितेऽस्मिन्रहसिमामकैरपिगोव्रजे ॥ कुरुद्विजातिसंस्कारंस्वस्तिवाचनपूर्वकम् १० श्रीशुकउवाच ॥ एवंसंप्रार्थितोविप्रःस्वचिकीर्षितमेवतत् ॥ चकारनामकरणंगूढोरहसिबालयोः ११ अयंहिरोहिणीपुत्रोरमयन्सुहृदोगुणैः ॥ आख्यास्यतेरामइतिबलाधिक्याद्बलंविदुः १२ यदूनामपृथग्भावात्संकर्षणमुशंत्युत ॥ आसन्वर्णास्त्रयोह्यस्यगृह्णतोऽनुयुगंतनूः १३ शुक्लोरक्तस्तथापीतइदानींकृष्णतांगतः ॥ प्रागयंवसुदेवस्यक्वचिज्जातस्तवात्मजः १४ वासुदेवइतिश्रीमानभिज्ञाःसंप्रचक्षते ॥ बहूनिसंतिनामानिरूपाणिचसुतस्यते १५ गुणकर्माणिरूपाणितान्यहंवेदनोजनाः ॥ एषवःश्रेयआधास्यद्गोपगोकुलनंदनः १६ अनेनसर्वदुर्गाणियूयमंजस्तरिष्यथ ॥ पुरानेनव्रजपतेसाधवोदस्युपीडिताः १७ अराजकेऽरक्ष्यमाणाजिग्युर्दस्यून्समेधिताः ॥ यएतस्मिन्महाभागाःप्रीतिंकुर्वंतिमानवाः १८ नारयोऽभिभवंत्येतान्विष्णुपक्षानिवासुराः ॥ तस्मान्नंदात्मजोऽयंतेनारायणसमोगुणैः १९

शंकःआगताशंकोपिवा ८ ९ मामकैरप्यलक्षितेअज्ञातेअस्मिन्व्रजेतत्रापिरहसि १० आशीर्वचनपूर्वकंनामकरणप्रकारमाह चकारेति ११ १२ यदूनांमध्यउशंतिइच्छंति तनूःशरीराणि १३ क्वचिन्मथुरायांनिग्रहगृहे १४ अभिज्ञाःतद्धितप्रत्ययविवेकज्ञाः नकेवलमस्यवर्णनिमित्तंनामगुणानुगुणानिनामानिसंतीत्याह बहूनीति १५ कृषिर्भूवाचकःशब्दइतिवचनात् गुणानुगुणंकृष्णेतिनाम मधुहननकर्मानुरूपंमधुसूदनेति यदियूयममुमभिजिष्यंस्तर्हियुष्माकंतुश्रेयआधास्यत्अकरिष्यदाशास्यतीतिवा १६ अंजःसम्यक् १७ पृथ्ववतारेअराजकेराष्ट्रे अरक्ष्यमाणाः १८ विष्णुपक्षान्विष्णुसहायान् पक्षःपार्श्वगरुत्साध्यसहायबलमित्तिष्वितियादवः १९

इत्यादि आत्मानंनंदं आत्मानंस्वम् २० व्रजतागच्छतारंगमाणौचेष्टमानौवा २१ सरीसृपंतौपुनःपुनःभृशंगच्छंतौसर्पंतौघोषाणांकिंकिणीनांप्रघोषेणप्रकृष्टनशब्देनरुचिरःघोषप्रघोषरुचिरःसचासौत्र जःतस्यकर्दमेषु आभीरपल्लीकिंकिण्योर्घोषोगोपालशब्दयोरितिवचनात् तन्नादेनकिंकिणीस्वरेणहृष्टमनसौमुग्धप्रभीतवत्लोकंबहिर्जनमनुसृत्यविडंब्यमात्रोःयशोदारोहिण्योः अंतिअंतिकेसमीपेउपे यतुःप्राप्तवंतौ २२ घृणयादयया स्तन्यंस्रवंत्यौ अंगरागश्चंदनं मुग्धंकोमलंस्मितंमंदहासश्च अल्पदशनाअणुतरादंतायस्यतत् मुग्धस्मितंबाल्यदशनाश्चास्मिन्निति वा २३ अतिरमणीयाःकुमारलीलाः बालक्रीडाःययोस्तौतथातौ यर्हियदाअंतर्व्रजेव्रजमध्येआगताआगतौ द्वासुपर्णौतिवत् तदबलाःव्रजयोषितःतदाप्रेक्ष्यंत्यउत्स्मृतगृहाः विस्मृतगृहव्यापाराः २४ शृंगिगोगवादयः दंष्ट्रिणःसारमे यप्रभृतयः गृह्याणिगृहकर्माणि अनवस्थांव्याकुलताम् २५ नघृष्टानिअघृष्टानितानिचजानूनियेषांतेतथातैः विचक्रमतुःपादविक्षेपंचक्रतुः २६ २७ रुचिरंचतददीनंउदारंचतत्कुमारभावोचि

श्रियाकीर्त्यानुभावेनगोपायस्वसमाहितः ॥ इत्यात्मानंसमादिश्यगर्गेचस्वगृहंगते ॥ नंदःप्रमुदितोमेनेआत्मानंपूर्णमाशिषम् २० कालेनव्रजतालल्पे नगोकुलेरामकेशवौ ॥ जानुभ्यांसहपाणिभ्यांरिंगमाणौविचेरतुः २१ तावंघ्रियुग्ममनुकृष्यसरीसृपंतौघोषप्रघोषरुचिरव्रजकर्दमेषु ॥ तन्नादहृष्ट मनसावनुसृत्यलोकंमुग्धप्रभीतवदुपेयतुरंतिमात्रोः २२ तन्मातरौनिजसुतौघृणयास्रवंत्यौपंकांगरागरुचिरावुपगृह्यदोर्भ्याम् ॥ दत्वास्तनंप्रपिबतोःस्म मुखंनिरीक्ष्यमुग्धस्मितालल्पदशनंययतुःप्रमोदम् २३ यर्ह्यागतातिरमणीयकुमारलीलावंतर्व्रजेतदबलाःप्रगृहीतपुच्छैः ॥ वत्सैरितस्ततउभावनुकृष्यमा णौप्रेक्ष्यंत्यउत्स्मृतगृहाजगृहुर्हसंत्यः २४ शृंग्यग्निदंष्ट्र्यहिजलद्विजकंटकेभ्यःक्रीडापरावतिबलौस्वसुतौनिषेद्धुम् ॥ गृह्याणिकर्तुमपियत्रनतज्जनन्यौशे कातआपतुरलंमनसोऽनवस्थाम् २५ कालेनाल्पेनराजर्षेरामःकृष्णश्चगोकुले ॥ अघृष्टजानुभिःपद्भिर्विचक्रमतुरंजसा २६ ततश्चभगवान्विष्णुर्वयस्यै र्व्रजबालकैः ॥ सहरामोव्रजस्त्रीणांचिक्रीडेजनयन्मुदम् २७ कृष्णस्यगोप्योरुचिरादीनकौमारचापलाः ॥ शृण्वंत्याःकिलतन्मातुरितिहोचुःसमागताः २८ वत्सान्मुंचन्क्वचिदसमयान्क्रोशसंजातहासःस्तेयंस्वाद्वत्त्यथदधिपयःकल्पितैःस्तेययोगैः ॥ मर्कान्भोक्ष्यन्विभजतिसचेन्नास्तिभांडंभिनत्तिद्रव्यालाभेसुभृशकुपितोयात्युपक्रोश्यतोकान् २९ हस्ताग्राह्यैरचयतिविधिंपीठकोलूखलाद्यैश्छिद्रंह्यंतर्निहितवयुनेशिक्यभांडेषुतद्वित् ॥ ध्वांतागारेधृतमणि गणंस्वांगमर्थप्रदीपंकालेगोप्योयर्हिगृहकृत्येषुसुव्यग्रचित्ताः ३०

तंचपलत्वंयासुतास्तथा तन्मातुःशृण्वंत्याः ताइतिवक्ष्यमाणप्रकारेणोचुः २८ असमयानप्राप्तदोहनवेलान् अस्मदादीनांक्रोशेनसंजातोहासोयस्यसतथा अथकदाचित्स्वेनकल्पितैःस्तेययोगैः चौर्योपायैःस्तेयंचौर्यापन्नंदधिपयश्चस्वाद्वत्तिपिबतिच सकृष्णःमर्कंबालंमार्जारंवावानरंवाभोक्ष्यन्भोजयिष्यन्विभजतिविभागंकरोति नास्तिचेन्नवनीतादिभांडंभिनत्ति कदाचिदुपायानांभावेऽभावेचद्र व्यालाभेदध्यादिद्रव्याप्राप्तौकुपितः ताडनादिनाबालाननुक्रोश्यरोदयित्वायातीत्यन्वयः मर्कोमनसिवायौचतोकेमार्जारकीटयोरितिच २९ स्तेययोगंदर्शयति हस्तेति ह्रस्वत्वेनहस्ताग्राह्येसतिह स्तेनग्रहणार्थंपीठकाद्यैर्विधिंउपायंप्रकाररंरचयति शिक्यास्थितभांडेषुमध्येअंतर्निहितवयुनेअंतर्निक्षिप्तनवनीतभांडेतद्वित्यथालब्धुंसुशकंतथाछिद्रंलगुडादिनाविवरंकरोतीत्यन्वयः गृहांधकारेकउपायइ तितत्राह ध्वांतागारइति अंधकारावृतगेहेधृतमणिगणं धृतसूर्यादिप्रकाशाधिकप्रकाशरत्नगणसंवीतंस्वांगंस्वदेहं अर्थप्रदीपंपदार्थप्रकशकं कृत्वेतिशेषः कस्मिन्समयेइत्यत्राह कालइति ३०

एवंधाष्टर्याद्विशतिकुरुतेमेहनादीनिवास्तौस्तैयोपायैर्विरचितकृतिःसुप्रतीकोयथास्ते ॥ इत्थंस्त्रीभिःसभयनयनश्रीमुखालोकिनीभिर्व्याख्यातार्थप्रहसितमुखीनह्युपालब्धुमैच्छत् ३१ एकदाक्रीडमानास्तेरामाद्यागोपबालकाः ॥ कृष्णोमृदंभक्षितवानितिमात्रेन्यवेदयन् ३२ सागृहीत्वाकरेकृष्णमुपालभ्य हितैषिणी ॥ यशोदामयसंभ्रांतप्रेक्षणाक्षमभाषत ३३ कस्मान्मृदमदीनात्मन्भवान्भक्षितवान्रहः ॥ वदंतितावकाह्येतेकुमारास्तेऽग्रजोप्ययम् ३४ श्रीभगवानुवाच ॥ नाहंभक्षितवानंबसर्वेमिथ्याभिशंसिनः ॥ यदिसत्यंगिरस्तर्हिसमक्षंपश्यमेमुखम् ३५ यद्येवंतर्हिव्यादेहीत्युक्तःसगभवान्हरिः॥व्या दत्ताव्याहतैश्वर्यःक्रीडामनुजबालकः ३६ सातत्रददृशेविश्वंजगत्स्थास्नुचखंदिशः ॥ साद्रिद्वीपाब्धिभूगोलंसवाय्वग्नींदुतारकम् ३७ ज्योतिश्चक्रंजलं तेजोनभःस्वर्वियदेवच ॥ वैकारिकाणींद्रियाणिमनोमात्रागुणास्त्रयः ३८ एतद्विचित्रंसहजीवकालस्वभावकर्माशयलिंगभेदम् ॥ सूनोस्तनौवीक्ष्यविदा रितास्येव्रजंसहात्मानमवापशंकाम् ३९ किंस्वप्नएतदुतदेवमायाकिंवामदीयोबतबुद्धिभेदः ॥ अथोअमुष्यापिममार्भकस्ययःकश्चनौत्पत्तिकआत्म योगः ४० अदोयथातन्नवितर्कगोचरंचेतोमनःकर्मवचोभिरंजसा ॥ यदाश्रयंयेनयतःप्रतीयतेसुदुर्विभाव्यंप्रणताऽस्मितत्पदम् ४१

एवंतदाधाष्टर्याद्विशतिकुरुतेमेहनादीनिवास्तौस्तैयोपायैर्विरचितकृतिःसुप्रतीकोयथास्ते इत्थंस्त्रीभिःसभयनयनश्रीमुखालोकिनीभिर्व्याख्यातार्थप्रहसितमुखीनह्युपालब्धुमैच्छत् एकदाक्रीडमानास्तेरामाद्यागोपबालकाः कृष्णोमृदंभक्षितवानितिमात्रेन्यवेदयन् सागृहीत्वाकरेकृष्णमुपालभ्य हितैषिणी यशोदामयसंभ्रांतप्रेक्षणाक्षमभाषत कस्मान्मृदमदीनात्मन्भवान्भक्षितवान्रहः वदंतितावकाह्येतेकुमारास्तेऽग्रजोप्ययम् श्रीभगवानुवाच नाहंभक्षितवानंबसर्वेमिथ्याभिशंसिनः यदिसत्यंगिरस्तर्हिसमक्षंपश्यमेमुखम् यद्येवंतर्हिव्यादेहीत्युक्तःसगभवान्हरिः व्या दत्ताव्याहतैश्वर्यःक्रीडामनुजबालकः सातत्रददृशेविश्वंजगत्स्थास्नुचखंदिशः साद्रिद्वीपाब्धिभूगोलंसवाय्वग्नींदुतारकम् ज्योतिश्चक्रंजलं तेजोनभःस्वर्वियदेवच वैकारिकाणींद्रियाणिमनोमात्रागुणास्त्रयः एतद्विचित्रंसहजीवकालस्वभावकर्माशयलिंगभेदम् सूनोस्तनौवीक्ष्यविदा रितास्येव्रजंसहात्मानमवापशंकाम् किंस्वप्नएतदुतदेवमायाकिंवामदीयोबतबुद्धिभेदः अथोअमुष्यापिममार्भकस्ययःकश्चनौत्पत्तिकआत्म योगः अदोयथातन्नवितर्कगोचरंचेतोमनःकर्मवचोभिरंजसा यदाश्रयंयेनयतःप्रतीयतेसुदुर्विभाव्यंप्रणताऽस्मितत्पदम्

वा वियद्ब्राह्मंसर्वगतंवा वैकारिकाणींद्रियाधिष्ठातृदेवतानि ३८ स्वभावःसात्विकादिः कर्मअदृष्टम् आशयःसंस्कारःलिंगंलक्षणम् सूक्ष्मशरीरंवा बुद्ध्यादिसमूहोवा भेदःतत्तद्वस्तुव्यावर्तकधर्मः ३९ शंकांप्रकटयति किमिति औत्पत्तिकः स्वाभाविकः आत्मयोगः आत्मैश्वर्यातिशयः ४० ब्रह्मविदाप्नोतिपरमितिउपनिषद्वेद्यंब्रह्मैवममपुत्रतांप्राप्तमितियस्मात्तस्मान्मयाबोद्धुमशक्य मितिनदूषणंकिंतुब्रह्मादिभिःसुदुर्विभाव्यमित्याशयेनाह अदइति अदोवस्तुयथायादृशंतत्तादृशमितिचेतोमनःकर्मवचोभिः चेतोब्रह्मा मनोरुद्रः कर्मपुष्करनामादेवःइंद्रोवा वचोवह्निःबृहस्पति र्वाउमावा अंजसासाक्षादेतैःकृतविविधतर्कगोचरंविरचितनानानुमानविषयंनभवतिविरुद्धतर्कगोचरंनभवतीतिकिमितियोज्यम् नन्विदंतर्हिशून्यप्रायमितितत्राह यदाश्रयमिति यत्पदंआश्रयोयस्यत द्यदाश्रयंजगदितिशेषः प्रलयेब्रह्माश्रयत्वेनतिष्ठतीत्यनेनजगद्ब्रह्मणोर्भेदः सिद्धः स्थितिकालेचयेनजीवनंसिध्यति सृष्टिकालेचयतःप्रतीयतेऽभिव्यज्यतेउत्पद्यतइत्यर्थः यतोवाइमानिभूतानिजायंतेयेन जातानिजीवंति यत्प्रयंत्यभिसंविशंतीतिश्रुतिः अनेनजन्मादिकारणत्वंस्वलक्षणमित्युक्तंभवति ननुघटादिवत्किमितिनज्ञायतइतितत्राह सुदुर्विभाव्यमिति सुखेनदुःखेनचविभाव्यंविशिष्टत्वेनविरुद्धत्वेन

चङ्ग्रेयम् सृदुःशोभनदुःखयोरितियादवःनैषातर्केणमतिरापनेयाप्रोक्तान्येनैवसुज्ञानायप्रेष्ठेतिश्रुतेःद्वैतवादिभिःसम्यक् अद्वैतवादिभिःअसम्यक्ब्रह्मज्ञेयं तत्रद्वैतवादिनःसम्यग्ज्ञानेनस्वयोग्यामुक्तिःअद्वैतवादिनःप्रमाणविरुद्धज्ञानेनतमइतिविवेकः अन्यमीशस्यमहिमानमितिवीतशोकः तांस्तेप्रेत्याभिगच्छंतियेकेचात्महनोजनाइत्यादिश्रुतेः त्वमुभयविधेषुकेतितत्राह प्रणतेति पद्यतइतिपदंस्वरूपम् तस्पनेतृभावस्यभेदनिष्ठत्वेनद्वैतनिष्ठैवाहमित्यर्थः ४१ नित्यपरतंत्रेआत्मनिस्वातंत्र्यबुद्धिरभेदबुद्धिरित्याशयेनाह अहमिति व्रजेश्वरस्यनंदस्याखिलवित्तानिपातिरक्षतीति अखिलवित्तपायस्यहरेर्मायया इच्छयाइत्थंकुमतिःआत्मनःस्वातंत्र्यबुद्धिरहमभूवंअतःसहरिर्मेगतिः मत्स्वातंत्र्यबुद्धिमपनुद्यस्वस्वातंत्र्यज्ञापकत्वेनाश्रयोस्त्वित्यन्वयः ४२ प्रजास्नेहमयींपुत्रस्नेहमयींपुत्रस्नेहरूपाम् ४३ प्रवृद्धस्नेहकलिलहृदयाऽभूदितिशेषः ४४ प्रजास्नेहमयींमायांशृंगग्राहिकतयैवदर्शयति त्रय्येति त्रय्याऽग्निमीळइत्यादिकया उपनिषद्भिःएषपंथाइत्यादिकाभिः सत्ववान्हरिःतद्विषयैःसात्वतैःसांख्ययोगैःपंचरात्रा

अहंममासौपतिरेषमेसुतोव्रजेश्वरस्याखिलवित्तपासती ॥ गोप्यश्चगोपाःसहगोधनाश्चयेयन्मायायेत्थंकुमतिःसमेगतिः ४२ इत्थंविदिततत्त्वायांगोपिकायांसईश्वरः ॥ वैष्णवींव्यतनोन्मायांप्रजास्नेहमयींविभुः ४३ सद्योनष्टस्मृतिर्गोपीस्वारोप्यारोहमात्मजम् ॥ प्रवृद्धस्नेहकलिलहृदयासायथापुरा ४४ त्रय्याचोपनिषद्भिश्चसांख्ययोगैश्चसात्वतैः ॥ उपगीयमानमाहात्म्यंहरिंसाऽमन्यतात्मजम् ४५ राजोवाच ॥ नंदःकिमकरोद्ब्रह्मन्श्रेयएवंमहोदयम् ॥ यशोदाचमहाभागापपौयस्याःस्तनंहरिः ४६ पितरौनान्वविंदेतांकृष्णरामार्भकेहितम् ॥ गायंत्यद्यापिकवयोयल्लोकशमलापहम् ४७ श्रीशुकउवाच ॥ द्रोणोवसूनांप्रवरोधरयासहभार्यया ॥ करिष्यमाणआदेशंब्रह्मणस्तमुवाचह ४८ जातयोर्नौमहादेवेभुविविश्वेश्वरेहरौ ॥ भक्तिःस्यात्परमालोकेययांऽजोदुस्तरंतरेत् ४९ अस्त्वित्युक्तःसएतेनव्रजेद्रोणोमहयशाः ॥ जज्ञेनंदइतिख्यातोयशोदासाधराभवत् ५० ततोभक्तिर्भगवतिपुत्रभूतेजनार्दने ॥ दंपत्योर्नितरामासद्गोपगोपीषुभारत ५१ कृष्णोब्रह्मणआदेशंसत्यंकर्तुंव्रजेभुवि ॥ सहरामोवसंश्चक्रेतेषांप्रीतिंस्वलीलया ५२ इतिश्रीभागवतेदशमस्कंधेबालक्रीडावर्णनोनामनवमोऽध्यायः ॥ ९ ॥ ॥ बादरायणिरुवाच ॥ एकदागृहदासीषुयशोदानंदगेहिनी ॥ कर्मांतरनियुक्तासुनिर्ममंथस्वयंदधि १ यानियानीहगीतानितद्बालचरितानिच ॥ दधिनिर्मथनेकालेस्मरंतीतान्यगायत २

दिशास्त्रैः यद्वा सांख्ययोगैःयथार्थज्ञानप्रतिपादकैःब्रह्मतर्कादिभिः सात्वतैःपंचरात्रादिवैष्णवतंत्रैः ४५ श्रेयःपुण्यंपूर्वजन्मनीतिशेषः स्याद्धर्ममस्त्रियांपुण्यश्रेयसीसुकृतंवृषइत्यमरः महानुदयः फलंयस्मात्तत्तथा महान्भागोभाग्यंयस्याःसामहाभागा भागोभाग्यांशतुर्यांशाइतियादवः ४६ कृष्णरामनाम्नोरर्भकयोःबालयोःईहितंचेष्टितं विंदतिलाभार्थोप्यत्रज्ञानार्थः चेष्टानुकूलज्ञानलाभेनाभुंक्तावितिविदज्ञानेतुवेत्तीतिविद्लृलाभेतुविंदतीतिवचनात् लोकशमलापहंजनपापहरम् ४७ प्रत्यारभ्यतेकथांतरमितिशेषः प्रत्यारंभप्रसिद्धेहेतियादवः ४८ महादेवइत्यनेनशंकरोऽप्युच्यतेइतिशंकाव्यावृत्यर्थं विश्वेति लोकेजनमध्ये ४९ ५० गोपगोपीषुमध्येनितराम् ५१ ५२ इतिश्रीभागवतेमहापुराणेविजयध्वजकृतटीकायांनवमोऽध्यायः ॥९॥ अत्रातीताध्यायसंगतिरनुसंधेया नंदस्यगेहिनीभार्या १ दध्नोनिर्मथनंयस्मिन्सतथा तस्मिन्काले २

क्षुमनामकुमितंतुनाकृतंक्षौमं सूत्रेणकांच्यानद्धंबद्धंपुत्रस्नेहातिशयेनस्नुतयोःक्षरितयोःकुचयोःपुगं पुनःकीदृशं जातःआविर्भूतःकंपश्चलनंयस्यतत्तथातत् शोभनेभ्रुवौयस्याःसासुभ्रूःबद्धयारज्ज्वा आकर्षःतेनोत्पन्नःश्रमःआलस्यंतेनोपेतयोर्भुजयोश्चलंतौकंकणौक्वणक्वणायमानशब्दयुक्तत्वात्तथाविधौ स्विन्नंस्वेदजलोपेतं कबरात्केशबंधात्विगलंतीमालतीमल्लिकायस्याःसाकबरविगलन्मालती अत्रद्वितीयांतपदस्याबिभ्रतीत्यनेनान्वयः पृथुविशालम् ३ न्यषेधत्निवारितवान् ४ अतृप्तमलंबुद्धिमप्राप्तं अधिश्रितेचुल्ल्यांनिहिते अधिकंपाकंप्राप्तेवा पर्यसिउत्सिच्यमानेउद्रिच्यमानेसतिप यःअवरोपयितुमितिशेषः ५ दद्भिःदंतैः दधिमंडभाजनंदाधिमस्तुपूर्णपात्रं दधिमंडोभवेन्मस्त्वितिहलायुधः दृषदश्मनाशिलापुत्रकेण मृषाश्रुःअविद्यमाननेत्रजलः दुःखोत्पन्नबाष्पोनभवतीत्य र्थः हैय्यंगवंनवनीतं अंतरंबहिर्भावंअंतर्धानंवागृहांतरंवा अंतरंपरिधानीयेबाह्येस्वीयेंतरात्मनि क्रतुमध्येवकाशेचतादर्थ्येवसरेऽवधौ विशेषविवरांतार्धिष्ववसानविनार्थयोरितियादवः ६ उत्तार्य

क्षौमंवासःपृथुकटितटेबिभ्रतीसूत्रननद्धंपुत्रस्नेहस्नुतकुचयुगंजातकंपंचसुभ्रूः ॥ रज्ज्वाकर्षश्रमभुजचलत्कंकणौकुंडलेचस्विन्नंवक्त्रंकबराविगलन्मालती निर्ममंथ ३ तांस्तन्यकामआसाद्यमथ्नंतींजननींहरिः॥ गृहीत्वादधिमंथानंन्यषेधत्प्रीतिमावहन् ४ तमंकमारूढमपाययत्स्तनंस्नेहस्नुतंसस्मितमीक्षती मुखम् ॥ अतृप्तमुत्सृज्यजवेनसाययावुत्सिच्यमानेपयसित्वधिश्रिते ५ संजातकोपःस्फुरितारुणाधरंसंदश्यदद्भिर्दधिमंडभाजनम् ॥ भित्त्वामृषाऽश्रुर्दष दृशनारहोजघासहैयंगवमंतरंगतः ६ उत्तार्यगोपीसुश्रृतंपयःपुनःप्रविश्यसंदृश्यचदध्यमत्रकम् ॥ भग्नंविलोक्यस्वसुतस्यकर्मतज्जहासतंचापिनतत्रपश्य ती ७ उलूखलांघ्रेरुपरिव्यवस्थितंमर्कायकामंददतंयथेप्सितम् ॥ हैय्यंगवंचौर्यविशंकितेक्षणंनिरीक्ष्यपश्चात्सुतमागमच्छनैः ८ तामात्तयष्टिंप्रसमीक्ष्य सत्वरस्ततोऽवरुह्याभिससारभीतवत् ॥ गोप्यन्वधावन्नयमासयोगिनांक्षमंप्रवेष्टुंतपसेरितंमनः ९ अन्वंचमानाजननीबृहच्चलच्छ्रोणीभराक्रांतगतिः सुमध्यमा ॥ जवेनविभ्रंशितकेशबंधनच्युतप्रसूनानुगतिःपरामृशत् १० कृतागसंतंप्ररुदंतमक्षिणीकषंतमंजन्मषिणीस्वपाणिना ॥ उद्वीक्ष्यमा णंभयविह्वलेक्षणंहस्तेगृहीत्वाभिषयंत्यवागुरत् ११ त्यक्त्वायष्टिंसुतंभीतंविज्ञायार्भकवत्सला ॥ इयेषकिलतंबद्धुंदाम्नाऽतद्वीर्यकोविदा १२

चुल्ल्याअन्यत्रनिधाय दध्यमत्रकं दधिभांडं भग्नंभिन्नं स्वसुतस्यतत्कर्मविलोक्यालोक्य ७ उलूखलांघ्रेःउलूखलबुध्नस्यचौर्येणाविशंकितोकिंचिदुन्मीलनमीलनेकुर्वाणेईक्षणेयस्यसतथातं पश्चात्पृष्ठतः ८ अभिससारगमनंप्रारब्धवानित्यर्थः गोप्याःकृष्णानुधावनंनतत्त्वबुद्ध्याकृतंकिंतुभ्रांतिबुद्धचेत्याशयेनाह नयमिति तपसेरितंप्रेरितं क्षमंसमर्थं ९ अन्वंचमानाजवंविहायशनैरनुगच्छती अंचुग तिपूजनयोरितिधातुः हंसवद्गमनवतीत्यर्थः शनैर्गमनेनिमित्तमाह बृहदिति बृहत्योःस्थूलयोश्चलत्योःश्रोण्योर्भरेणाक्रांतास्तब्धगतिर्यस्याःसातथा विभ्रंशितात्विस्रस्तात्केशबंधात्च्युतानांप्र सूनानांअनुगतिर्यस्याःसातथा परामृशत्पस्पर्श जग्राहवा १० अंजन्मषिणीअंजितामषिःअंजनंययोस्तेअंजन्मषिणी अक्षिणीनेत्रेकषंतंनिष्पीडचकलुषयंतं भीषयंती अवागुरत्ताडनार्थं हस्तमुद्धृतवती ११ दाम्नावत्सपाशेन अतद्वीर्यकोविदाकृष्णमाहात्म्यमजानती १२

यशोदायाअज्ञानंप्रकटयितुंतत्स्वरूपंनिरूपयति नचेति यस्यांतःस्वतंत्रंवस्तुनैवास्ति यस्यबहिश्चवस्तुनास्ति सर्वत्रसत्वेनांतर्बाह्यविशेषाभावात् यस्मात्पूर्वमपरंनास्त्येव अविनाशित्वेनासिद्धत्वात्त यः कृष्णःजगतःपूर्वमपरंबहिरंतश्चवर्ततइतिशेषः जगतोविनाशित्वात्परिच्छिन्नत्वाच्च यश्चजगन्मयः । तत्सत्तायाअपितदधीनत्वेनतत्त्वव्यपदेशः १३ तदव्यक्तंब्रह्मसंज्ञंकृष्णमर्भकमणुतरबालंमत्वा तदव्यक्तमाहहीतिसूत्रं मर्त्यलिंगंमनुष्यलक्षणशरीरं अक्षजमिंद्रियजंज्ञानंतदधःकृतंयस्मात्सतथा इंद्रियागोचरमित्यर्थः अनेनाव्यक्तपदंविवृतामितिज्ञातव्यम् १४ अनेनापिकृष्णस्यब्रह्मत्वंनिश्चयितुं शक्यमित्याशयेनाह तद्दामेति ॥ येनबबंधतद्दामद्व्यंगुलोनमभूदित्यन्वयः गोपिकायदातेनद्व्यंगुलोनेनान्यद्दामसंदधेतदापिन्यूनमासीदिति १५ १६ एवंस्वगेहसमस्तदामसंचयसमाप्तौसुतमाहा त्म्यंदृष्ट्वास्मयंती मंदहसंतीविस्मिताभवदित्यन्वयः १७ अणिमालघिमायोगशक्तिःस्वाभाविकीहरेरित्यभिप्रेत्याह स्वमातुरिति मातृविषयकृपयास्वबंधनआसीत् स्वयमेवबद्धोभूदित्यन्वयः

नचांतर्नबहिर्यस्यनपूर्वंनापिचापरम् ॥ पूर्वापरंबहिश्चांतर्जगतोयोजगन्मयः १३ तंमत्वार्भकमव्यक्तंमर्त्यलिंगमधोक्षजम् ॥ गोपिकोलूखलेदाम्नाव बंधप्राकृतंयथा १४ तद्दामबध्यमानस्यस्वार्भकस्यकृतागसः ॥ द्व्यंगुलोनमभूत्तेनसंदधेऽन्यच्चगोपिका १५ यदासीत्तदपिन्यूनंतेनान्यदपिसंदधे ॥ तद पिद्व्यंगुलंन्यूनंयद्यदादत्तबंधनम् १६ एवंस्वगेहदामानियशोदासंदधत्यपि ॥ गोपीनांसुस्मयंतीनांस्मयंतीविस्मिताभवत् १७ स्वमातुःस्विन्नगात्राया विस्रस्तकबरस्रजः ॥ दृष्ट्वापरिश्रमंकृष्णःकृपयासीत्स्वबंधने १८ एवंसंदर्शिताह्यंगहरिणाभक्तवश्यता ॥ स्ववशेनापिकृष्णेनयस्येदंसेश्वरंवशे १९ नेमंवि रंचिर्नभवोनश्रीरप्यंगसंश्रया ॥ प्रसादंलेभिरेगोप्योयत्तत्प्रापविमुक्तिदात् २० नायंसुखाप्योभगवान्देहिनांगोपिकासुतः ॥ ज्ञानिनांचात्मपोतानांयथा भक्तिमतामिह २१ कृष्णस्तुगृहकृत्येषुव्यग्रायांमातरिप्रभुः ॥ अद्राक्षीदर्जुनौपूर्वंगुह्यकौधनदात्मजौ २२ पुरानारदशापात्तौवृक्षतांप्रापितौमदात् ॥ नलकूबरमणिग्रीवाविति ख्यातौश्रियान्वितौ २३ इतिश्रीभागवतेदशमस्कंधेउलूखलबंधनंनामदशमोऽध्यायः ॥ १० ॥ राजोवाच ॥ कथ्यतांभग वन्नेतत्तयोःशापस्यकारणम् ॥ यत्तद्विगर्हितंकर्मयेनदेवर्षेस्तमः १ ॥ श्रीशुकउवाच ॥ रुद्रस्यानुचरौभूत्वासुदृप्तौधनदात्मजौ ॥ कैलासोपवनेरम्ये मंदाकिन्यांमदोत्कटौ २ वारुणींमदिरांपीत्वामदाघूर्णितलोचनौ ॥ स्त्रीजनैरनुगायद्भिश्चेरतुःपुष्पितेवने ३ अंतःप्रविश्यगंगायामंभोजवनराजिनि ॥ चिक्रीडतुर्युवतिभिर्गजाविवकरेणुभिः ४ यदृच्छयाचदेवर्षिर्भगवांस्तत्रकौरव ॥ अपश्यन्नारदोदेवौक्षीबाणौसमबुध्यत ५

१८ १९ यत्ततत्पंतं २० निरंतरनिरतिशयभक्तिग्रमदैवभगवत्कर्षणनिपुणेत्याशयेनाह नायमिति आत्मैवपरमात्मैवपोतोनौर्येषांतेतथातेषाम् २१ पूर्वजन्मनिगुह्यकौ अधुनाअर्जु ननाम्नाककुभवृक्षौ २२ शापानिमित्तमाह मदादिति किंनामानाविततत्राह नलेति मदकारणमाह श्रियेति २३ इतिश्रीभागवतेदशमस्कंधेविज०टी०दशमोऽध्यायः ॥१०॥ हरेरेवससारान्मोक्षइतिदर्श यितुनलकूबरमणिग्रीवयोःशापमोक्षप्रकारंनिरूपयत्यस्मिन्नध्याये तत्रराजाशुकंपृच्छति राजेति यद्विगर्हितंनिंदितंकर्मतत्कथ्यताम् येनकर्मणादेवर्षेस्तमोगुणकार्यक्रोधोभूत् १ २ वारुणींवारु णाज्जाताम् अंभोजवनराजिनिजलइतिशेषः ४ क्षीबाणौमत्तौ अश्लीलवचनौवा ५

पर्यधुःसंवेष्टितवत्यः ६ ७ किंतद्गीतमितितत्राह नहीति विषयान्जुषतःसेवमानस्यपुंसःजोष्यात्सेव्यात्विषयात् श्रीमदात्श्रियाधनसंपदोत्पन्नमदादाभिजात्यादेरभिजननिमित्तमदात् विद्यानिमित्तमदाच्चान्यःबुद्धिभ्रंशः ज्ञाननाशकरोरजोगुणःरजोविकारोनास्ति विषयादिरेवज्ञाननाशकरइत्यर्थः तत्कथमत्राह यत्रेति यत्रविषयाभिजात्यधनमदेषुस्त्रियोद्यूतमासवंअसुतर्पणंमद्य पानंभवति हिशब्दोऽवधारणे हिहेतावेवधारणेइतियादवः अन्योनास्त्येव मद्यपानादयोभवंत्येवेत्यर्थः आसवइतिपाठेमद्यमित्यर्थः ८ संतुरुयादयःततःकिमत्राह हन्यंतइति यत्ररुपा दिषुःसुइमंनश्वरंदेहमजरामृत्युनश्वरंजरामृत्युरहितंमन्यमानैःपशवोभूतानि हननमत्रबहुविधंदेहवियोगकरणंधनापहरणंदेशोच्चाटनंअभिमानभंगकरणमित्यादि ९ यज्ञेपश्वालंभनवत्परलो कविषयत्वेनपुण्यसाधनायेदंहिंसनंकिंनस्यादित्यत्राह भूतधुगिति नार्थस्वार्थःकिंतुपारलौक्यप्राप्तानंदइत्यत्राह किमिति किंशब्दःआक्षेपार्थः प्रश्नेक्षेपेविकल्पेकिमितियादवः दैनंदिनजीवनमंतरे णकिमपिनजानातीत्यर्थः किमितिनवेदंतितत्राह निरयइति यतोनिर्गमनरहितंतमोभवतीत्यर्थःअयगतावितिधातुः हिंसामात्रेणतमसोऽभावेपिहिंसाविशेषेणतमःस्यात् तथाहि नित्यभूतत्वात्स त्वोद्भूतंब्रह्मतद्द्रोहःसर्वेशस्यब्रह्मणोऽनीशेनदुःखिनाजीवेनसहैकत्वकथनोपासनेप्रथमहिंसा सार्वज्ञ्यादिगुणान्श्रुतानपहायनिर्गुणत्वचिंतनं द्वितीया तदवताराणांदुःखश्रमाज्ञानादिकल्पनंतृतीया

तंदृष्ट्वाव्रीडितादेव्योविवस्त्राःशापशंकिताः ॥ वासांसिपर्यधुःशीघ्रंविवस्त्रौनैवगुह्यकौ ६ तौदृष्ट्वामदिरामत्तौश्रीमदांधौसुरात्मजौ ॥ तयोरनुग्रहा र्थायशापंदास्यन्निदंजगौ ७ नह्यन्योजुषतोजोष्याद्बुद्धिभ्रंशोरजोगुणः ॥ श्रीमदादाभिजात्यादेर्यत्रस्त्रीद्यूतमासवम् ८ हन्यंतेपशवोयत्रनिर्दयैरजि तात्मभिः ॥ मन्यमानैरिमंदेहमजरामृत्युनश्वरम् ९ देवसंज्ञितमप्यंतेकृमिविड्भस्मसंज्ञितम् ॥ भूतधुक्कुरुतेस्वार्थंकिंवेदनिरयोयतः १० देहःकिम न्नदातुःस्यान्निषेक्तुर्मातुरेववा ॥ मातुःपितुर्वाबलिनःक्रेतुरग्नेःशुनोपिवा ११ एवंसाधारणंदेहमव्यक्तप्रभवाप्ययम् ॥ कोविद्वानात्मसात्कृत्वाहंतिजंतूनृ तेऽसतः १२ मन्यमानैरिमंदेहमजरामृत्युनश्वरम् ॥ देवसंज्ञितमप्यंतेकृमिविड्भस्मसंज्ञितम् १३ असतःश्रीमदांधस्यदारिद्र्यंपरमांजनम् ॥ आत्मौप म्येनभूतानिदरिद्रःपरमीक्षते १४ यथाकंटकविद्धांगोजंतोर्नेच्छतितांव्यथाम् ॥ जीवसाम्यंगतोलिंगैर्नतथाविद्धकंटकः १५

प्रत्यक्षादिप्रमाणसिद्धस्यप्रपंचस्यतद्विवर्तत्वकथनंचतुर्थीत्यादिकंएवंविधस्यतमःप्राप्तिःस्यादितिनिरूप्यतइत्यर्थः १० ननूत्तरश्लोकेदेहस्यानिर्वाच्यत्वमुच्यतेदेहस्यजगदंतःपातित्वेनजगद्ब्रह्मविवर्त्त मितिकथयतःकथंतमइत्याशंक्यात्रसाधारणत्वमेवोच्यतेप्राप्तिसद्भावादित्याशयेनाह देहइति अन्नदातुःपोषयितुः निषेक्तुःगर्भाधानकर्तुः मातुःपितुःमातामहस्य विक्रेतुःद्रव्यादिप्रदानेन बलिनःबला त्कारेणग्रहीतुः ११ अव्यक्तात्प्रकृतेःप्रभवउत्पत्तिःअव्यक्तेअप्ययःप्रलयोयस्यसतथातं आत्मसात् आत्मत्वेन असतःऋते १२ प्रसंगात्प्रागुक्तंस्मारयति मन्यमानैरिति कीदृशंमथमंदेवसंज्ञितंमरणे कृम्यादिसंज्ञितंभवति देवोयंभट्टारकोयं कृमिक्लिन्नः विष्ठाकुलः भस्मितइति १३ ननुश्रीमदांधस्यांध्यपरिहारायकिमौषधंतर्हीतितत्राह असतइति असतः हननादिकर्तुःदारिद्र्यंद्ररिद्रभावः कथंत दंजनंआंध्यनाशनमभूदितितत्राह आत्मेतिआत्मौपम्येनआत्मसाम्येन भूतानिसुखासुखसंसक्तानि १४ अत्रदृष्टांतमाह यथेति तांकंटकव्यथांजंतोरात्मव्यतिरिक्तस्यतल्लिंगैःसुखदुःखविकासकाष्ठर्चादि सूचकैर्जीवेषुसुखादिमत्तयासाम्यसाधर्म्यंगतोज्ञातवानविद्धकंटकस्तथान १५

ननुदारिद्र्यंपरमंसुखमित्युक्तंतस्यापिदुःखानुभवःप्रतीयतेतत्कथमितितत्राह दारिद्र्यइति निरहंस्तंभःअहंमानवर्जितः विद्यादिसर्वमदैर्मुक्तःदारिद्र्यःयदृच्छयादैवेच्छयायत्कृच्छ्रमाप्नोतितत्कृच्छ्रमस्यदारिद्र्यस्य परंतपोभवति एतद्वैपरंतपोयद्व्याधितस्तप्यतइतिश्रुतिर्हिशब्दगृहीता १६ ननुकृच्छ्रानुभवःकथंकारंतपोभवतीत्याशंक्यतंप्रकारं दर्शयति नित्यमिति अनुशुष्यंतिदेहशोषमनुशोषंगच्छंति इंद्रियभाव ल्यदौर्बल्येप्रवृत्तिनिवृत्तीस्यातांतेचाक्षसत्ताभावादिनास्यातां अन्नाभावादिंद्रियप्राबल्यसाध्याहिंसालक्षणाप्रवृत्तिर्नश्यतीत्यर्थः १७ ततःकिमतआह दारिद्र्यस्येति युज्यंते संगम्यंते सत्संगतिर्भवतीत्य र्थःतत्फलमाह सद्भिरात रसोप्यस्यपरंदृष्ट्वानिवर्ततइतिस्मृतेः विषयतृष्णानिवर्ततइत्यर्थः ततःविषयतृष्णानिवृत्तेरारात्क्षिप्रंसिध्यतिमुक्तोभवतीति आराद्दूरसमीपयोरितिचं १८ सच्छिक्षयाविद्यादिमदां धानामपिदरिद्रस्यैवश्रेयःकिंनस्यादित्याशंक्यसतामुपेक्षणीयत्वेनसत्संगत्याश्रेयःसिद्धिर्दवीयसीत्याशयेनाह साधूनामिति धनमानमपहरतांदर्शनस्तंभगुणैः श्रावण्यगुणरहितैः असतामाश्रयभूतैः १९

दरिद्रोनिरहंस्तंभोमुक्तःसर्वमदैरिह ॥ कृच्छ्रंयदृच्छयाप्नोतितद्धितस्यपरंतपः १६ नित्यंक्षुत्क्षामदेहस्यदरिद्रस्यान्नकांक्षिणः ॥ इंद्रियाण्यनुशुष्यंतिहिंसा पिविनिवर्तते १७ दरिद्रस्यैवयुज्यंतेसाधवःसमदर्शिनः ॥ सद्भिःक्षिणोतितत्तर्षंततआराद्विसिध्यति १८ साधूनांसमचित्तानांमुकुंदचरणैषिणाम् ॥ उपेक्ष्यैःकिंधनस्तंभैरसद्भिरसदाश्रयैः १९ तदहंमत्तयोर्माध्व्यावारुण्याश्रीमदांधयोः ॥ तमोमदंहरिष्यामिस्त्रैणयोरजितात्मनोः २० यदिमौलोकपा लस्यपुत्रौभूत्वातमःश्रुतौ ॥ नविवाससमात्मानंविजानीतःसुदुर्मदौ २१ अतोऽर्हथःस्थावरतांस्यातांनैवंयथापुनः ॥ स्मृतिःस्यान्मत्प्रसादेनतत्रापिमद नुग्रहात् २२ वासुदेवस्यसान्निध्यंलब्ध्वादिव्यशरच्छते ॥ वृत्तेस्वर्लोकतांभूयोलब्ध्वाभक्तौभविष्यथः २३ श्रीशुकउवाच ॥ सएवमुक्त्वादेवर्षिर्ग तोनारायणाश्रमम् ॥ नलकूबरमणिग्रीवावासतुर्यमलार्जुनौ २४ ऋषेर्भागवतमुख्यस्यसत्यंकर्तुवचोहरिः ॥ जगामशनकैस्तत्रयत्रास्तांयमालार्जुनौ २५ देवर्षिर्मेप्रियतमोयदिमौधनदात्मजौ ॥ तत्तथासाधयिष्यामियद्गीतंतन्महात्मना २६ इत्यंतरेणार्जुनयोःकृष्णस्तुयमयोर्ययौ ॥ आत्मनिर्वेशमात्रेण तिर्यग्गतमुलूखलम् २७ बालेननिष्कृष्टमुलूखलंतद्दामोदरेणतरसोत्कलितांघ्रिबंधौ ॥ निष्पेततुःपवनविक्रमितातिवेलस्कंधप्रवालविटपैःकृतचंड शब्दौ २८ तत्रश्रियापरमयाककुभःस्फुरंतौसिद्धावुपेत्यकुजयोरिवजातवेदौ ॥ कृष्णंप्रणम्यशिरसाखिललोकनाथंबद्धाजलीविरजसाविदमूचतुःस्म २९

नन्वस्तुप्रकृतेभवैततयोःकिंक्रियतेदंडउतउपेक्षावाइत्याशंक्यदंडएवक्रियतइत्याह तदहमिति माध्व्यामधुकृतया २० तमःश्रुतौअज्ञानावृतौ विवाससंवस्त्रहीनंआत्मानंनविजानीतइतियतोऽतः २१ स्थावरतांप्राप्तुमर्हथः तत्रस्थावरत्वेपि २२ स्मृतेःफलमाह वासुदेवस्येति २३ यमलार्जुनौसहोत्पन्नार्जुनौ २४ २५ २६ अंतरेणमध्येआत्मनिर्वेशमात्रेणवृक्षयोर्मध्येप्रवेशमात्रेण आत्मनःसान्निध्यमात्रे णवा तिर्यग्गतंतिरश्चीनम् २७ यदाबालेनदामोदरेणतदुलूखलंनिष्कृष्टमाकृष्टंतदातावर्जुनौनिष्पेततुः कीदृशौउत्कलितांघ्रिबंधौउन्मूलितमूलौ पवनस्यतदानींमुद्भूतवायोर्विक्रमितेनपराक्रमेणातिवेलैः वेलांसीमानमतिक्रांतैःस्कंधैःप्रवालैर्विटपैः अतिस्यादधिकार्थोक्तौप्रशंसायामतिक्रमइति २८ तत्रतस्यामवस्थायांकुजयोर्वृक्षयोःजातवेदौअग्नीइवउपेत्यअभिव्यज्यविरजसौशापमोक्षेणसत्वस्वभावमाप्तौब द्धांजलीसिद्धौयक्षौशिरसाऽखिललोकनाथंकृष्णंप्रणम्यइदंवक्ष्यमाणमूचतुःस्म गुणस्मरणपूर्वकमुक्तवंतावित्यन्वयः स्मृतौवृत्तनिषेधस्मेतिच ककुभोदिशःस्फुरंतौप्रकाशयंतौ २९

व्यक्ताव्यक्तंकार्यकारणात्मकम् रूप्यत्वात्प्रतिमात्वेनसन्निधियोग्यत्वाद्रूपमुच्यते नतुसाक्षाद्रूपम् रूप्यत्वात्पुजगद्रूपंविष्णोःसाक्षात्पुस्वात्मकमित्यादिस्मृतेः ब्राह्मणाःवेदिकाः ३० सन्निधियोग्यंदर्शयति त्व
मिति सर्वभूतानांदेहे आत्मनोमनसइंद्रियाणामीश्वरःस्वविषयशक्तिप्रदः नकेवलमंतरेवप्रवर्तकःबहिरपिसर्वशक्तिमत्त्वात्तत्तच्छक्तिप्रबोधकइतिभावेनाह त्वमिति तदुक्तं विष्णुःसर्वगुणोद्रेकात्कालइत्यभिधी
यतेइति कलकामधेनाविितिधातुः विष्णुःव्यापनशीलः व्याप्तस्याकाशवदुत्पत्तिविनाशौस्याताामिति नेत्याह अव्ययइति जातस्यहिध्रुवोमृत्युरितिस्मृतेः अंतर्यामीतिवा आत्मांतर्यामीति ३१ प्रकृत्या
देरचेतनत्वेनस्वतःप्रवृत्त्यनुपपत्तेः तत्सत्तायाअपितदधीनत्वेनतत्त्वव्यपदेशोयुक्तइतिभावेनस्तौति त्वमिति महान्महत्तत्त्वं पूर्णगुणत्वेनपुरुषशब्दवाच्योपित्वमेवेत्याह त्वमिति अध्यक्षःसाक्षी साक्षित्वं
व्यनक्तिसर्वेति सर्वक्षेत्राणांकारणभूतानिप्राणाश्रद्धार्थःखंवायुरित्यादीनिविकारशब्दवाच्यानिवेत्तिजानातितत्त्वेनपश्यतीतिसर्वक्षेत्रविकारवित् ३२ नन्वव्यक्तोहरिरितिपुरस्तादुदीरितंतत्कथंदृश्यतेत्वग्र
याबुद्ध्येतींद्रियविषयत्वोक्तेरत्राह गृह्यमाणइति स्वयमेवस्वात्मानंगृह्णातिनत्वन्यइत्यर्थः तदुक्तं स्वात्मनागृह्यमाणइति किमेवंविवेकःक्रियतइतितत्राह अग्राह्यइति विकारैःप्राकृतैःमहदहंकाराद्यभिमा
निभिःब्रह्मादिभिरग्राह्यः ननुनित्यसमीपस्थाभिर्दुर्गादिभिर्ग्राह्यएवेत्यत्राह गुणैरिति सत्त्वादिभिर्गुणाभिमानिनीभिरपि ननुवेदाहमेतंपुरुषंमहांतमितिश्रुतेःब्रह्माद्यवेद्यःकथमुच्यतइतितत्राह कइति अत्र
संस्थितिशब्देनउत्पत्तिर्लक्ष्यते स्थितेरुत्पत्त्यपेक्षत्वात् इहजीवराशौकःपुमान्गुणभूतस्यहरेःक्रीडापार्थतरंगस्यजगतःस्थितेरुत्पत्तेःप्राक्सिद्धम् आनीदवातंस्वधयातदेकमितिश्रुतिसिद्धम् ब्रह्मविज्ञातुमर्हति

कृष्णकृष्णमहायोगिन्त्वमाद्यःपुरुषःपरः ॥ व्यक्ताव्यक्तमिदंविश्वंरूपंतेब्राह्मणाविदुः ३० त्वमेकःसर्वभूतानांदेहआत्मेंद्रियेश्वरः ॥ त्वमेवकालोभगवान्
विष्णुरव्ययईश्वरः ३१ त्वंमहान्प्रकृतिःसूक्ष्मारजःसत्वतमोमयी ॥ त्वमेवपुरुषोऽध्यक्षःसर्वक्षेत्रविकारवित् ३२ गृह्यमाणैस्त्वमग्राह्योविकारैःप्राकृतैर्गुणैः ॥
कोन्विहार्हतिविज्ञातुंप्राक्सिद्धंगुणसंस्थिते ३३ तस्मैतुभ्यंभगवतेवासुदेवायवेधसे ॥ आत्मद्योतैर्गुणैश्छन्नमहिम्नेब्रह्मणेनमः ३४ यस्यावताराज्ञायंतेश
रीरेष्वशरीरिणः ॥ तैस्तैरतुल्यातिशयैस्तिर्यग्योनिष्वसंगतैः ३५

शक्नोतिअर्हतिचेत्कएवब्रह्मजानाति स्त्रियःसतीरितांउमेपुंसआहुरित्यादिश्रुतिः इदमपिदर्शनंतत्प्रसादेनेत्यंगीकर्तव्यंयमेवैषवृणुतेतेनलभ्यइतिश्रुतेःयद्वाउत्पत्तेःप्राक्सिद्धंनिरंजनत्वेनस्थितंकोनुज्ञातुमर्ह
तिलिंगाभावात् कथंगुणानांज्ञापकानांलिंगानांसंस्थितेःविनाशनात् जगतोनष्टत्वादिति ३३ ननुतद्विषयज्ञानाभावेतदुपासनाभावेनमोक्षाशाव्यर्थेत्याशंक्य नमइत्येवकार्यंतस्यापितत्प्रीतिजनकत्वप्रती
तेरितिभावेनाह तस्माइति किंनिमित्तमेतद्विज्ञापनमितितत्राह आत्मेति आत्मनात्वयाद्योतंतेकार्येशक्तिमत्तयाप्रकाशंतइत्यात्मद्योता तैर्गुणैःसत्त्वादिभिश्छन्नोगूहितः महिमायस्यसतथातस्मैतुच्छेनाभ्वपि
दितंयदासीत्तपसस्तन्महिनाजायतैकमितिश्रुतेः पिहितत्वमितरापेक्षयानस्वस्यअपरिच्छिन्नत्वेनानाच्छाद्यत्वादितिभावेनाह ब्रह्मणइति तदुक्तं छन्नोन्येषांनतुस्वस्यभगवान्पुरुषोत्तमइति वेधसेकर्त्रे ३४
इदानींकृष्णोनामसाक्षान्नारायणावतारएवनेदवदत्तवत्कश्चिच्छरीरीतिज्ञापयितुंहरेर्विविधावतारादेहरथाअदेहस्याइति तत्रदेहरथाअंतर्याम्यादयोमत्स्याद्याःअदेहस्याइतिभावेनाह यस्येति यस्यहरेरव
तारा :शरीरेष्वंतर्यामित्वेनज्ञायंते अशरीरेषुशरीरव्यतिरिक्तबाह्यस्थलेषुअशरीरिणःमत्स्यादिरूपत्वेनज्ञायंते कैःसाधनैरित्यत्राह तैस्तैरितियेयेमनसोनियमादयःशास्त्रविहिताःतैस्तैरतुल्यैःअन्यातिशयैर
धिकैर्मनोनियमादिभिः अतुल्यातिशयत्वंकथमत्राह तिर्यग्योनिष्विति तिर्यग्योनिषुवराहादिसंबंधिनीषुअसंगतैःअसंभाव्यैः तदुक्तं परयावतारादेहरथाअदेहरथाइतिद्विधेत्यादि यद्वा तैस्तैरतुल्यातिश
यैःमाहात्म्यविशेषैःभूम्युद्धरणमंदरधारणगोवर्द्धनोद्धारणलक्षणैरिति ३५

सन्नादशोभवान्जनस्यभवायपुण्यश्लोकणभद्राय प्रभवायमहत्त्ववर्धनाय सांप्रतंयदुकुलेऽवतीर्णोसीत्यन्वयः आशिषांशुभानांपतिःपालयितादाताच भागेनांशेन ३६ इदमेवरूपंमूलरूपादन्यूनमहिमेतिभावेनाह नमइति ३७ भूमन्अनवच्छिन्नज्ञानानंदस्वभाव सदानुचरावनुगतावुक्तकारिणौचतौ अनुजानीहि अनुज्ञांकुरु यदृच्छयाप्राप्तमहत्संगमोभवद्दर्शनसाधनमभूत्किंपुनर्बुद्धिपूर्वकमितिभावेनाह दर्शनमिति ३८ इतःपरंश्रीमदादिकमावयोर्नभवितव्यं यतइंद्रियाणांविषयव्यापारःस्यात्सनस्यात्किंतुतवगुणादावेववाण्यादींद्रियव्यापारःस्यादितिप्रार्थयते वाणीति ३९ ४० सानुग्रहःशापःमोक्षलक्षणानुग्रहसहितः ४१ मत्कृतात्मनांमय्येवसन्निहितमनसाम् ४२ नरवाहोवैश्रवणःतस्यनिकेतनंगृहम् ४३ बद्धोलूखलंउलूखलबद्धंश्रीकृष्णम् ४४ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेविज० कृत

सभवान्सर्वलोकस्यभवायप्रभवायच ॥ अवतीर्णोऽशभागेनसांप्रतंपतिराशिषाम् ३६ नमःपरमकल्याणनमस्तेविश्वमंगल ॥ वासुदेवायशांताययदूनां पतयेनमः ३७ अनुजानीहिनौभूमन्सदानुचरकिंकरौ ॥ दर्शनंनौभगवतोऋषेरासीदनुग्रहाद् ३८ वाणीगुणानुकथनेश्रवणौकथायांहस्तौचकर्मसुमनस्तवपादयोर्नौ ॥ स्मृत्यांशिरस्तवसुरप्रवरप्रणामेदृष्टिःसतांदर्शनेऽस्तुभवत्तनूनाम् ३९ ॥ श्रीशुकउवाच ॥ इत्थंसंकीर्तितस्ताभ्यांभगवान्गोकुलेश्वरः ॥ दाम्नाचोलूखलेबद्धःप्रहसन्नाहगुह्यकौ ४० ॥ श्रीभगवानुवाच ॥ ज्ञातंमयापुरैवैतद्दृषिणाकरुणात्मना ॥ यच्छ्रीमदांधयोर्वाग्भिःशापःसानुग्रहःकृतः ४१ साधूनांसमचित्तानांसुतरांमत्कृतात्मनाम् ॥ दर्शनान्नोभवेद्बंधःपुंसोऽक्ष्णोःसवितुर्यथा ४२ तद्गच्छतंमत्परमौनरवाहनिकेतनम् ॥ संजातोमयिभावोवामीप्सितःपरमोत्सवः ४३ ॥ श्रीशुकउवाच ॥ इत्युक्तौतंपरिक्रम्यप्रणम्यचपुनःपुनः ॥ बद्धोलूखलमामंत्र्यजग्मतुर्दिशमुत्तराम् ४४ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेयमलार्जुनभंगोनामैकादशोऽध्यायः ॥ ११ ॥ श्रीशुकउवाच ॥ गोपानंदादयःश्रुत्वाद्रुमयोःपततोरवम् ॥ तत्राजग्मुःकुरुश्रेष्ठनिर्घातरवशंकिताः १ भूम्यांनिपतितौतत्रददृशुर्यमलार्जुनौ ॥ बभ्रमुस्तदविज्ञायलक्ष्यंपतनकारणम् २ उलूखलंविकर्षंतंदाम्नाबद्धंचबालकम् ॥ कस्येदंकुतआश्चर्यमुत्पातभयकातराः ३ बालाऊचुरनेनेतितिरश्चीनमुलूखलम् ॥ विकर्षतामध्यगेनपुरुषावप्यचक्ष्महि ४ नतेतदुक्तंजगृहुर्नघटेतेतितस्यतत् ॥ बालस्योत्पाटनंतर्वोःकेचित्संदिग्धचेतसः ५ उलूखलंविकर्षंतंदाम्नाबद्धंस्वमात्मजम् ॥ विलोक्यनंदःप्रहसद्वदनोविमुमोचह ६ गोपीभिःस्तोभितोनृत्यन्भगवान्बालवत्क्वचित् ॥ उद्गायतिक्वचिन्मुग्धस्तद्वशोदारुयंत्रवत् ७ बिभर्तिक्वचिदाज्ञप्तःपीठकोन्मानपादुकम् ॥ बाहुक्षेपंचकुरुतेस्वानांचप्रीतिमावहन् ८

टीकायांएकादशोऽध्यायः ॥ ११ ॥ हरेर्बालक्रीडाचरितचारुतरनिरवद्यमहिमश्रवणमननोपासनानिमुक्तिसाधनानिज्ञानसाधनत्वेनभवंतीतिभावेनतन्माहात्म्यमस्मिन्नध्यायेनिरूप्यते तत्रादौपूर्वाध्यायोक्तयमलार्जुनभंगलक्षणमहिमाशेषंवक्ति गोपाइत्यादिना निर्घातरवशंकिताः मेघानिर्घोषशंकिताः १ कस्यागामिफलसूचकंकुतआश्चर्यसहसादृश्यमानंयदद्भुतंभविष्यदनिष्टसूचकंअदृष्टमात्रप्रयुक्तंउत्पातस्तन्निमित्तभयेनकातराः व्याकुलचित्ताः उत्पातइति कातराइतिकेचित्पठंति २ ३ द्वौपुरुषौअचक्ष्महिदृष्टवंतः ४ तदुक्तंबालोक्तं ५ ६ ७ उन्मानंप्रस्थंपादुकंपादपीठं पादरक्षणंवा ८

तद्विदंभगवानेवायमवतीर्णइतिजानतांनारदादीनाम् ९ १० तत्रनंदादिषु ११ इतउत्थातव्यं १२ अनश्वशकटश्च १३ १४ असौकृष्णोबालकः कृष्णादन्यतमोबालकोनाम्रियेतेति यत्तदप्यच्युतरक्षणंअन्यबालकस्यमरणाभावः १५ औत्पातिकःउत्पातसंबंधीअनर्थकरः इतोबृहद्वनात् तावत्ततःपूर्वमेव १६ पशव्यंपशुभ्योहितं पुण्याद्रयःपुण्यवृक्षाः तृणानिवीरुधगुल्मा निलतत्तथातद्वीरुधशब्दोऽकारांतोप्यस्ति पर्वताद्रीनगावगाविंतिच १७ युङ्ध्वंयोगंकुरुध्वं १८ १९ २० नोपेयातांसमीपंनागतौ २१ अजोहवीत्आह्वयामास २२ २३ २४ व्र

दर्शयंस्तद्विदांलोकआत्मनोभक्तवश्यताम् ॥ व्रजस्योद्वाहयन्हर्षंभगवान्बालचेष्टितैः ९ गोपवृद्धामहोत्पाताननुभूयबृहद्वने ॥ नंदादयःसमागम्यव्रज कार्यमचिंतयन् १० तत्रोपनंदनामाहगोपोज्ञानवयोधिकः ॥ देशकालार्थतत्त्वज्ञःप्रियकृद्रामकृष्णयोः ११ उत्थातव्यमितोऽस्माभिर्गोकुलस्याहितैषिभिः ॥ आयांत्यत्रमहोत्पाताःप्रजानांनाशहेतवः १२ मुक्तःकथंचिद्राक्षस्याबालघ्याबालकोप्यसौ ॥ हरेरनुग्रहाच्चूनमनश्चोपरिनापतत् १३ चक्रवातेननीतोऽयंदैत्येनवियदूह्यता ॥ शिलायांपतितस्तत्रपरित्रातःसुरेश्वरैः १४ यन्नम्रियेतद्वुमयोरंतरंप्राप्यबालकः ॥ असावन्यतमोवापितच्चाप्य च्युतरक्षणम् १५ यावदौत्पातिकोरिष्टोव्रजंनाभिभवेदितः ॥ तावद्बालानुपादाययास्यामोऽद्यैवसानुगाः १६ वनंवृंदावनंनामपशव्यंनवकाननम् ॥ गोपगोपीगवांसेव्यंपुण्याद्रितृणवीरुधम् १७ तत्तत्राद्यैवयास्यामःशकटान्युङ्ध्वमाचिरम् ॥ गोधनान्यग्रतोयांतुभवतांयदिरोचते १८ तच्छ्रुत्वैकधियो गोपाःसर्वेनंदपुरोगमाः ॥ उपनंदवचोराजन्प्रतिनंद्यगृहान्ययुः १९ सरित्तीरगतंकृष्णंभग्नार्जुनमथाह्वयत् ॥ रामंचरोहिणीदेवीक्रीडंतौबालकैर्भृशम् २० नोपेयातांयदाहूतौक्रीडासंगेनपुत्रकौ ॥ यशोदांप्रेषयामासरोहिणीपुत्रवत्सला २१ क्रीडंतंस्वसुतंबालैरतिवेलंसहाग्रजम् ॥ यशोदाऽजोहवीद्वीक्ष्यपुत्रस्नेह स्नुतस्तनी २२ कृष्णकृष्णारविंदाक्षतातएहिस्तनंपिब ॥ अलंविहारैःक्षुत्क्षांतस्तद्भवान्भोक्तुमर्हति २३ हेरामागच्छताताशुसानुजःकुलनंदन ॥ प्रातरेवकृताहारःक्रीडाश्रांतोऽसिपुत्रक २४ प्रतीक्षतेत्वांदाशार्होभोक्ष्यमाणोव्रजाधिपः ॥ एह्यावयोःप्रियंधेहिस्वगृहान्यातबालकाः २५ जन्मर्क्षंतेऽद्यभ वताविप्रेभ्योदेहिगाःशुचिः ॥ धूलिधूसरितांगस्त्वंतातमज्जनमावह २६ पश्यपश्यवयस्यांस्तेमातृमृष्टान्स्वलंकृतान् ॥ त्वंचस्नातःकृताहारोविहरस्वस्व लंकृतः २७ इत्थंयशोदातमशेषशेखरंमत्वासुतंस्नेहनिबद्धधीर्नृप ॥ हस्तेगृहीत्वासहराममच्युतंनीत्वास्ववाटंकृतवत्ययोदयम् २८ अथनंदःसमा हूयगोपानिदमभाषत ॥ श्वोऽतोवृंदावनंयामोयत्ताभवथमाचिरम् २९ तच्छ्रुत्वैकाधियोगोपाःसाधुसाध्वितिवादिनः ॥ रथान्स्वान्स्वान्समायुज्यय यूरूढपरिच्छदाः ३०

जाधिपःनंदगोपः धेहिदेहि हेबालकाः २५ धूलिधूसरितांगःधूलिधूसरितसर्वशरीरः २६ २७ स्ववाटंस्वव्रजं २८ २९ तदुपनंदस्यवचनं एकधियःएकस्मिन्नर्थेगतबुद्धयः रूढपरि च्छदाः शकट्याधिष्ठितभांडादिसाधनाः ३०

अनःसु शकटेषु ३१ ३२ नृत्यत्सुकुचेषुकुंकुमादिकांतिर्यासांतास्तथा स्निग्धकंठ्यःकंठगुणोपेताः ३३ ३४ अर्धचंद्रवत् अर्धचंद्राकारवत् ३५ ३६ ३७ अविदूरेसमीपे ३८ क्षेपणैः अश्मयंत्रैः पदैःपादैः कृत्रिमगोवृषैःमृद्दारुकृतगोवृषैः ३९ वृषायमाणौवृषवद्धर्धमानौनर्दंतौवृषभशब्दंकुर्वंतौ अनुकृत्याविदंव्य ४० ४१ ४२ अपरपादाभ्यांग्राहिणोत् ४३ कपित्थैःकपित्थशाखायुक्तफलैः कृष्णोपरि ४४ ४५ सप्रातराशौप्रातर्भोजनसहितौ ४६ जलाशयाभ्याशंजलस्थानंमहासरइत्यर्थः स्थानेभिप्रायआशयइति महासत्त्वंमहान्सत्वःपराक्रमोव्यवसायोवा

वृद्धान्बालान्स्त्रियोराजन्सर्वोपस्करणानिच ॥ अनःस्वारोप्यगोपालायत्ताआत्तशरासनाः ३१ गोधनानिपुरस्कृत्यशृंगाण्यापूर्यसर्वतः ॥ तूर्यघोषेणमहतायय्युःसहपुरोहिताः ३२ गोप्योरूढरथानृत्यत्कुचकुंकुमकांतयः ॥ कृष्णलीलांजगुःप्रीताःस्निग्धकंठ्यःसुवाससः ३३ तथायशोदारोहिण्यावेकंशकटमास्थिते ॥ रेजतुःकृष्णरामाभ्यांतत्कथाश्रवणोत्सुके ३४ वृंदावनंसंप्रविश्यसर्वकालसुखावहम् ॥ तत्रचक्रुर्व्रजावासंशकटैरर्धचंद्रवत् ३५ वृंदावनंगोवर्धनंयमुनापुलिनानिच ॥ वीक्ष्यासीदुत्तमाप्रीतीराममाधवयोर्नृप ३६ एवंव्रजौकसांप्रीतिंयच्छंतौबालचेष्टितैः ॥ कलवाक्यैश्चकालेनवत्सपालौबभूवतुः ३७ अविदूरेव्रजभुवःसहगोपालबालकैः ॥ चारयामासतुर्वत्सान्नानाक्रीडापरिच्छदौ ३८ क्वचिद्वादयतोवेणून्क्षेपणैःक्षिपतःक्वचित् ॥ क्वचित्पदैःकिंकिणीभिःक्वचित्कृत्रिमगोवृषैः ३९ वृषायमाणौनर्दंतौयुयुधातेपरस्परम् ॥ अनुकृत्यरुतैर्जंतून्चेरतुःप्राकृतौयथा ४० कदाचिद्यमुनातीरेवत्सांश्चारयतोःस्वकैः ॥ वयस्यैःकृष्णबलयोर्जिघांसुर्दैत्यआगमत् ४१ तंवत्सरूपिणंवीक्ष्यवत्सयूथगतंहरिः ॥ दर्शयन्बलदेवायशनैर्मुग्धइवासदत् ४२ गृहीत्वाऽपरपादाभ्यांसहलांगूलमच्युतः ॥ भ्रामयित्वाकपित्थाग्रेप्राहिणोद्गतजीवितम् ४३ सकपित्थैर्महाकायःपात्यमानैःपपातह ॥ तंवीक्ष्यविस्मिताबालाःशशंसुःसाधुसाध्विति ४४ देवाश्चोपरिसंतुष्टाववर्षुःपुष्पवर्षिणः ॥ तौवत्सपालकौभूत्वासर्वलोकैकपालकौ ४५ सप्रातराशौगोवत्सांश्चारयंतौविचेरतुः ॥ स्वंस्वंवत्सकुलंसर्वेपाययिष्यंतएकदा ४६ गत्वाजलाशयाभ्याशंपाययित्वापपुर्जलम् ॥ तेतत्रददृशुर्बालामहासत्त्वमवस्थितम् ४७ तत्रसुर्वज्रसंभिन्नगिरेःशृंगमिवच्युतम् ॥ सवैबकोनाममहानसुरोबकरूपधृक् ४८ आगत्यतरसाकृष्णंतीक्ष्णतुंडोऽग्रसद्बली ॥ कृष्णंमहासुरग्रस्तंदृष्ट्वारामादयोऽर्भकाः ॥ बभूवुरिंद्रियाणीवविनाप्राणैर्विचेतसः ४९ तंतालुमूलंप्रदहंतमग्निवद्गोपालसूनुंपितरंजगद्गुरोः ॥ चच्छर्दसद्योऽतिरुषाऽक्षतंबकस्तुंडेनहंतुंपुनरभ्यपद्यत ५० तमापतंतंसनिगृह्यतुंडयोर्दोर्भ्यांबकंकंससखंसतांगतिः ॥ पश्यत्सुबालेषुददारलीलयामुदावहोवीरणवद्दिवौकसाम् ५१

यस्यसतथातं सत्वोस्त्रीजंतुपुच्छीबेव्यवसायेपराक्रमे आत्मभावेपिशाचेचद्रव्येसत्तास्वभावयोरितियादवः ४७ समहासत्वोमहासुरो वैएव स्युरेवंतुपुनर्वैवेत्यवधारणवाचकाइत्यमरः ४८ विचेतसःज्ञानहीनाः पाषणकल्पाः ४९ जगद्गुरोर्हिरण्यगर्भस्यपितरंअक्षतंपुनःअतिरुषातुंडद्वयेनकृष्णंहंतुंअभ्यपद्यत ५० कटस्योपादानंवृणंवीरणं वीरणंश्रीवृणंविदुरिति ५१

विसिस्मरे विस्मिताः ५२ पूर्वस्थितमाश्रमस्थानंप्रणीयनीत्वा तद्बकासुरहिंसनलक्षणंकृष्णचरितम् ५३ कृष्णेअतिशयेनप्रियेणआदरेणयुताःसृपितेक्षणाःअलंबुद्धिरहितत्राः५४ बतखेद यतःयस्याभय
तेषांविप्रियंकृतमासीदपिस्वित् ५५ अथापितथापिएतेएनंनाभिभवंतिमत्युतजिघांसयाहननेच्छयाएनमासाद्याग्नौपतंगइवशलभइवनश्यंति ५६ पुरुषेणब्रह्मज्ञानमेवापाद्यमितिभावेनाह अहोइति
असत्यानाभूवन्निितिकुतोज्ञायतइतित्राह गर्गइति ५७ भववेदनांसंसारदुःखम् ५८ कौमारैः कुमारावस्थासंबंधिभिःविहारैः क्रीडाविशेषैःकौमारंजहौकृष्णः तत्रापंचमाब्दाद्बाल्यम् आनवव
र्षात्पौगंडम् आषोडशवर्षात्कैशोरम् कश्चित्स्तंभमूलेनिलीयतिष्ठतिअन्यस्तुअन्विष्यतंदृष्ट्वागृह्णातीतियाक्रीडातान्निलायनम् हस्तेनस्वशरीरेणवामृत्तिकयावाजलनिवारणंसेतुबंधः यथामर्कटोवा
नरोविटपाद्विटपांतरंउत्प्लवतिउत्प्लवतितथाऽकाशेउच्चंमृत्तिकात्तांशिंशुमाराकारोपरिशिरसिपदंनिधायपतनमुत्प्लवनम् पांशुमित्तौमार्णेनिधायतदुपरिहस्तंनिदधातिएकः एकस्त्वन्विष्यगृह्णातीत्या

तदाबकारिंसुरलोकवासिनःसमाकिरन्नंदनमल्लिकादिभिः ॥ समीडिरेचानकशंखसंस्तवैस्तद्वीक्ष्यगोपालसुताविसिस्मिरे ५२ मुक्तंबकास्यादुपलभ्यबा
लकारामादयःप्राणमिवेंद्रियोगणः ॥ स्थानागतंतंपरिरभ्यनिर्वृताःप्रणीयवत्सान्व्रजमेत्यतज्जगुः ५३ तच्छ्रुत्वाविस्मितागोपागोप्यश्चातिप्रियादृताः ॥
प्रेत्यागतमिवौत्सुक्यादीक्षंतदृषितेक्षणाः ५४ अहोबतास्यबालस्यबहवोमृत्यवोऽभवन् ॥ अप्यासीद्विप्रियंतेषांकृतंपूर्वंयतोभयम् ५५ अथाप्यभिभवं
त्येनंनैवतेघोरदर्शनाः ॥ जिघांसयैनमासाद्यनश्यंत्यग्नौपतंगवत् ५६ अहोब्रह्मविदांवाचोनामृत्याःसंतिकर्हिचित् ॥ गर्गोयदाहभगवानन्वभावितथैवतत् ५७ इतिनंदादयोगोपारामकृष्णकथामुदा ॥ कुर्वंतोरममाणाश्चनाविंदन्भववेदनाम् ५८ एवंविहारैःकौमारैःकौमारंजहतुर्व्रजे ॥ निलायनैःसेतुबंधैर्मर्कटो
त्प्लवनादिभिः ५९ इतिश्रीभागवतेमहापुराणेदशमस्कंधेजिघांसुबकासुरवधोनामद्वादशोऽध्यायः ॥ १२॥ श्रीशुकउवाच ॥ ततश्चपौगंडवयःश्रितौव्रजे
बभूवतुस्तौपशुपालसंमतौ ॥ गाश्चारयंतौसखिभिःसमंपदैर्वृंदावनंपुण्यमतीवचक्रतुः १ तन्माधवोवेणुमुदीरयन्वृतोगोपैर्गृणद्भिःस्वयशोबलान्वितः ॥
पशून्पुरस्कृत्यपशव्यमाविशद्विहर्तुकामःकुसुमाकरंवनम् २ तन्मंजुघोषालिमृगद्विजाकुलंमहन्मनःप्रख्यपयःसरस्वता ॥ वातेनजुष्टंशतपत्रगंधिनानि
रीक्ष्यरंतुंभगवान्मनोदधे ३ सतत्रतत्रारुणपल्लवश्रियाफलप्रसूनोरुभरेणपादयोः ॥ स्पृशच्छिखान्वीक्ष्यवनस्पतीन्मुदास्मयन्निवाहाग्रजमादिपूरुषः ४

दिशब्दगृहीतम् ५९ इतिश्रीभाग०दशमस्कंधेविजयध्वजकृतटीकायांद्वादशोऽध्यायः ॥ १२ ॥ श्रवणमननाभ्यांदुरितहरणायहरेःपौगंडवयसिक्रियमाणंविक्रमंनिरूपयत्यस्मिन्नध्याये ततःकौमा
रात्पौगंडवयःनववर्षलक्षणंवयःश्रितौप्राप्तौ पशुपालत्वेनसंमतौयोग्यौ १ उदीरयन् ध्वनयन् कुसुमाकरंकुसुमोत्पत्तिस्थानम् २ मंजवःमनोहराःघोषायेषाम् अलयश्चमृगाश्चद्विजाश्चमंजुघोषैःअ
लिमृगद्विजैःआकुलम् महतांनारायणचरणारविंदानिरंतरमनसांमनःप्रख्यंमनस्तुल्यंनिर्मलंपयोजलंयस्यतत्तथा महन्मनःप्रख्यपयश्चतत्सरश्चमहन्मनःप्रख्यपयःसरस्तदस्यास्तीतिमहन्मनःप्रख्यप
यःसरस्वान्तेन शतपत्राणांपद्मानांगंधोस्यास्तीतिशतपत्रगंधीतेनवातेनवायुना २ पल्लवारुणश्रियायुक्तयोःपादयोःप्रसूनोरुभारेणस्पृशंत्यःशिखाएवकराग्रकोटयोयेषांतेतथा तान्वनस्पतीन्वृक्षान्दृष्ट्वा
अत्रभक्तिभरभुग्नग्रीवाःपुरुषाःयथापुष्पनिचयादिनामुकुंदचरणारविंदमर्चयंति तथावृक्षाश्चपुष्पभरोपनतशाखाकराग्रैःपूजयंतीत्याक्षिप्तःशेषार्थोबोद्धव्यः ४

इममेवार्थंविशदयति अहोइति देववर यद्वा देववरा ब्रह्मादयःअमरादेवाःएतैरर्चितंसुमनःफलार्हणैःपुष्पफलोपायनैः आत्मनःस्वस्यतमोपहत्यैअज्ञाननिमित्तपापनिरासाय तरुषुजन्मयेनतमोनिमित्तपापेन ५ यतोयथादेवादयोमनुष्यलिंगमवाप्यभगवंतंसेवंतेतथाएतेभ्रमराअपितेष्वेतेषु तस्मात्त्वच्चरणपद्मसेवानवरतंनहातव्यामुमुक्षुभिरितिभावेनाह एतइति अलिनोभ्रमराःभ्रमराणां पक्षयूलमलमाहुर्मनीषिणइति अखिललोकतीर्थं समस्तजनस्यस्नानलक्षणंकीर्तनयोग्यंशुद्धिजननस्थानीयंशास्त्रेष्वंभसिपावनेइतिच अखिलः अनल्पः लोकः प्रकाशःज्ञानंयेषांतेतथातेषां सेवायोग्यशास्त्रस्थानीयम् लुकप्रकाशइतिधातुः अनुपथंपथगतावितिधातुःयत्रगच्छसित्यंतत्रानुगमनलक्षणसवांकुर्वंतीत्यर्थः अनुपदंवा मुनिगणाःसर्वज्ञानांदेवादीनांगणाः वेत्तावेद्यस्य सर्वस्य मुनिःसद्भिरुदाहृतइत्युत्पलमाला त्वदीयेषुवैष्णवेषुमुख्यागूढंमनुष्यलिंगधरंनजहातिनित्यजंति ॥ ओहाकृत्यागइतिधातुः जहातीतिपाठेवा व्यत्ययोबहुलमितिसूत्रान्निर्णयः अमराणामात्मदैवंकुलदैवं अनघात्मदैवमितिपाठे अनघानांनिर्दुःखानांमुक्तानांआत्मदैवंमुक्तानांपरमागतिः दुःखैनोव्यसनेष्वघमित्यमरः अनघेतिपृथक्पदंवा ६ पूर्वोक्तमतिदिशति नृत्यंतीति शिखिनोमयूराःअन्यत्रकेशशिखाधारिणःतापसाःहरिण्यःमृगस्त्रियःअन्यत्रहिरण्मयवत्तपस्तेजसाज्वलंतः आसांभारोऽस्तीतिहरिण्यः परोपदेशसंबंधेनहरिभक्तजनतापहरिण्यइत्युच्यंते महेशाज्ज्ञानम

श्रीभगवानुवाच ॥ अहोअमीदेववरामरार्चितंपादांबुजंतेसुमनःफलार्हणैः ॥ नमंत्युपादायशिखाभिरात्मनस्तमोपहत्यैतरुजन्मयत्कृतम् ५ एतेऽलिनस्तवयशोऽखिललोकतीर्थंगायंतआदिपुरुषानुपथंभजंते ॥ प्रायोअमीमुनिगणाभवदीयमुख्यागूढंवनेपिनजहत्यमरात्मदैवम् ६ नृत्यंत्यमीशिखिन ईड्यमुदाहरिण्यःकुर्वंतिगोप्यइवतेप्रियमीक्षणेन ॥ सूक्तैश्चकोकिलगणागृहमागतायधन्यावनौकसइयान्हिसतांनिसर्गः ७ एवंवृंदावनंकृष्णःश्रमित्प्रतिमनाःपशून् ॥ रेमेसंचारयन्द्रेःसरिद्रोधःसुसानुगः ८ क्वचिद्गायतिगायत्सुमदांधालिष्वनुव्रतैः ॥ उपगीयमानचरितःसखिसंकर्षणान्वितः ९ क्वाचिच्चकलहंसानामनुकूजतिकूजितम् ॥ अभिनृत्यतिनृत्यंतंबर्हिणंहासयन्क्वचित् १० मेघगंभीरयावाचानामभिर्दूरगान्पशून् ॥ क्वचिदाह्वयतिप्रीत्यागोगोपालमनोज्ञया ११ चकोरक्रौंचचक्राह्वभारद्वाजालिबर्हिणाम् ॥ अनुरौतिस्मसत्त्वानांभीतवद्व्याघ्रसिंहयोः १२

न्विच्छेन्मोक्षमिच्छेज्जनार्दनादितिस्मृतेः हरिणीसाहिरण्मयीत्यभिधानम् तेतवेक्षणेनप्रियंकुर्वंति कोकिलगणाश्चमूक्तैःकर्णरम्यैःवचनैःप्रियंकुर्वंतीति अन्यत्र कः ब्रह्माऽशिवःतयोःकिलवार्ताकीर्तनंसंभावनाचयेषांतेकोकिलाःइंद्रादयःपरभृतःइतरप्राणिरक्षार्थंप्राणधारिणः नस्वार्थं परमभागवताइत्यर्थःस्मार्तन्यायः गृहमिति गृहमागतायातिथयेगृहिणार्घ्यपाद्यादिकंदातव्यमितियत्तस्मात् वनौकसोमृगादयोवावानप्रस्थादयोवा धन्याकृतार्थाः स्वंस्वंनिवासमागतंत्वांसभाजयंति अयंसतांजातिस्वभावइत्याह सतांनिसर्गः नितरांस्वभावः इयान्एतावान्हियस्मात्तस्मादिदमुचितमितिभावः वैश्वानरःप्रविशत्यतिथिर्ब्राह्मणोगृहान् तस्यैतांशांतिंकुर्वंतिहरवैवस्वतोदकम् आशांप्रतीक्षेसंगतंसूनृतांचेष्टापूर्तेपुत्रपशूंश्चसर्वान् एतद्वृंकेपुरुषस्याल्पमेधसोयस्यामश्नन्वसतिब्राह्मणोगृहेइति वार्तासंभावयोःकिलेतियादवःईड्यसर्वकर ७ कृष्णएवंविधमाहात्म्यं वृंदावनमवाप्यरेमेइत्यन्वयः अद्रेःपादेषुसरितोनद्यः रोधःसु तीरेषुपशून्संचारयन् ८ रतिप्रकारंदर्शयति क्वचिदितिअनुव्रतैरनुचरैःसखिभिःसंकर्षणेनचान्वितःअनुगतः ९ हासयन्हासंजनयन् १० नामभिःप्रसूतिवारप्रयुक्तादिलक्षणैः गवांगोपालानांमनोंतःकरणंज्ञापयंत्याबोधयंत्यामनोरमयावा ११ व्याघ्रशार्दूलसिंहयोःसकाशात्भीतवत्स्वयमपिभीतोभवति १२

गोपस्य उत्संगोकंधउपबर्हणंशिरःपीठंयस्यसतथातम् आर्यज्येष्ठंपादसंवाहनादिभिःविश्रामयंते क्रीडाभाश्रकुशंनाशयंति १३ रामकृष्णानंतनादकुर्वाणान्गोपालान्नृत्यादावशंसाविषयेषुप्रशशंसतुः स्खलनादिविषयेहसंतौवल्गतःउत्प्लवतः १४ निपुद्वंबाहुवल्लीग्रहणादिद्वंद्वयुद्धं १५ १६ महात्मनःकृष्णस्यमनोहराणि स्नेहेनक्लिन्नाआर्द्राधियोयेषांतेतथा १७ बाललीलामुपसंहरति एवमिति स्व मायायास्वेच्छयैवनिगूढात्ममतिःप्रच्छन्नस्वरूपानुभवः अन्यापेक्षयेतिशेषःग्राम्यैःमूर्खजनैः किमर्थमेवंकृतमत्राह ग्राम्यवदिति धर्मइतिशेषः १८ शुकःपरीक्षितमाह धन्येयमिति कस्माद्धन्येत्यत्राह तृ णवीरुधइति तस्यकृष्णस्यपादौस्पृशंतीतितत्पादस्पृशःकरजैर्नखैःअभिभृष्टाअभित.श्रिताःलूनाइत्यर्थः नद्यादयोदयासाहितैरवलोकैरवलोकिताः गोप्यःश्रीर्यदुजयोरंतरंवक्षस्थलंस्पृहयतीतियत्स्पृहात स्मिन्भुजयोरंतरेणमध्येआलिंगिताइतियत्तस्मादियंपृथिवीतद्गताःपदार्थाश्चधन्याइत्यर्थः १९ यदेवकार्यार्थमवतीर्णोहरिणातच्छंवक्तुमुपक्रमते श्रीदामेति सुबलश्चाशोकश्चकृष्णश्चाद्यायेषांतेतथातान्

क्वचित्क्रीडापरिश्रांतंगोपोत्संगोपबर्हणम् ॥ स्वयंविश्रामयत्यार्यंपादसंवाहनादिभिः १३ नृत्यतोगायतोवापिवल्गतोयुद्ध्यतोमिथः ॥ गृहीतहस्तौ गोपालान्हसंतौप्रशशंसतुः १४ क्वचित्पल्लवतल्पेषुनियुद्धश्रमकर्शितः ॥ वृक्षमूलाश्रयःशेतेगोपोत्संगोपबर्हणः १५ पादसंवाहनंचक्रुःकेचिदस्यमहा त्मनः ॥ अपरेहतपाप्मानोव्यजनैःसमवीजयन् १६ अन्येतदनुरूपाणिमनोज्ञानिमहात्मनः ॥ गायंतिस्ममहाराजस्नेहक्लिन्नधियःशनैः १७ एवंनिगू ढात्ममतिःस्वमायायागोपात्मजत्वंचरितैर्विडंबयन् ॥ रेमेरमालालितपादपल्लवोग्राम्यैःसमंग्राम्यवदीशचेष्टितम् १८ श्रीशुकउवाच ॥ धन्येयमद्यधरणी तृणवीरुधस्तत्पादस्पृशोद्रुमलताःकरजाभिमृष्टाः ॥ नद्योऽद्रयःखगमृगाःसदयावलोकैर्गोप्योंतरेणभुजयोरपियत्स्पृहाश्रीः १९ श्रीदामानामगोपालो रामकेशवयोःसखा ॥ सुबलाशोककृष्णाद्यान्गोपान्प्रेम्णेदमब्रवीत् २० रामराममहाबाहोकृष्णदुष्टनिबर्हण ॥ इतोविदूरेसुमहद्वनंतालालिसंकुलम् २१ फलानितत्रभूरीणिपतंतिपतितानिच ॥ संतिकिंत्ववरुद्धानिधेनुकेनदुरात्मना २२ सोऽतितीव्रोऽसुरोरामहेकृष्णखरूपधृक् ॥ आत्मसाम्यबलैरन्यै र्ज्ञातिभिर्बहुभिर्वृतः २३ तस्मात्कृतनराहाराद्रीतैर्नृभिरमित्रहन् ॥ नसेव्यंतेपशुगणैःपक्षिसंघविवर्जितम् २४ विद्यंतेऽभुक्तपूर्वाणिफलानिसुरभीणिच ॥ एषवैसुरभिर्गंधोविषूचीनोविगृह्यते २५ प्रयच्छतानिनःकृष्णगंधलोभितचेतसाम् ॥ वांछासीन्महतीरामगम्यतांयदिरोचते २६ एवंसुहृद्वचःश्रुत्वा सुहृत्प्रियचिकीर्षया ॥ प्रहस्यजग्मतुर्गोपैर्वृतौतालवनंप्रभू २७ बलःप्रविश्यबाहुभ्यांतालान्संपरिकंपयन् ॥ फलानिपातयामासमतंगजइवौजसा २८

२० दुष्टनिबर्हणदुष्टजनोन्मूलन अविदूरेनिकटे तालानांआल्यापंक्त्यासंकुलंनिबिडं २१ तत्रखरतालवने फलान्यपरिपाकंप्राप्तानीतिनेत्याह पतितानीति संतुतान्यानीयभुज्यंतामितितत्राह किंत्वि ति २२ तीव्रःक्रूरः खररूपंगर्दभदेहंधारयतीतिखरूपधृक् असहायश्चेत्निष्कासनीयइतिनेत्याह आत्मेति २३ कृतःनराणामाहारोयेनसतथातस्मात् २४ नृभिरभुक्तपूर्वाणिविष्वक्सर्वत्रांचतीतिवि षूचीनःसर्वत्रव्याप्तिमानित्यर्थः विशेषेणगृह्यतेघ्राणेंद्रियेणेतिशेषः २५ लोभआकांक्षा लुभगार्ध्येगृधुअभिकांक्षायामितिधातुः अदनाकांक्षाचेत्कालांतरेआनेष्यामीतितत्राह वांछेति २६ २७ मतंगजः वारणःओजसाबलेनअवष्टंभेनवा ओजोवष्टंभबलयोरिति २८

रासभःगर्दभः नगैर्वृक्षैःपर्वतैश्चसहितम् २९ काशब्दंगर्दभजातिजं कर्णानिष्ठुरशब्दं पर्यचरच्चपरितोवर्तत ३० उपक्रोष्टुंक्रोशतिरत्रक्षेपार्थः क्षेतुंपराक्स्थितःप्राङ्मुखः ३१ पदोःपादयोःभ्रामणेनपरिभ्रमणकरणेन ३२ तेनखरूपासुरशरीरेण बलेनपार्श्वस्थंतालंकंपयन्भग्नोभूत् किंचसचपार्श्वस्थःअन्यंतालंसोन्योप्यपरंतालमित्येवंपरंपरया ३३ बलस्यलीलयाकर्मणा उत्सृष्टेनउत्क्षिप्तेनखरदेहेनहतताहताः ३४ अन्यस्यचित्रमपिरामस्यैतत्कर्मचित्रंनभवतीतिशुकःपरीक्षितमाह नैतदिति हिशब्दोधरास्थिलेयंननुसर्षपयतीतिप्रसिद्धेःद्योतयति ३५ क्रोष्टारःक्षेतुकामाः ताच्छीलिकस्तृन्प्रत्ययः स्वजातिरवंकुर्वाणावा ३६ ३७ फलप्रकरसंकीर्णातालफलसमूहेनव्याप्ता ३८ तयोःरामकृष्णयोः ३९ आदन्भक्षितवंतः ४० ४१ गोरजसाच्छुरितकुंतलैःछुरितकेशपाशैःबद्धानिबर्हवन्यप्रसूनानिपिच्छवन

फलानांपततांशब्दंनिशम्यासुररासभः ॥ अभ्यधावत्क्षितितलंसनगंपरिकंपयन् २९ समेत्यतरसादृत्यद्वाभ्यांपद्भ्यांबलंबली ॥ निहत्योरसिकाशब्दंमुंचन्पर्यचरद्बलम् ३० पुनरासाद्यसंरब्धउपक्रोष्टुंपराक्स्थितः ॥ चरणावपरौराजन्बलायप्राहिणोद्रुषा ३१ सतंगृहीत्वाथपदोर्भ्रामयित्वैकपाणिना चिक्षेपतृणराजाग्रेभ्रामणत्यक्तजीवितम् ३२ तेनाहतोमहातालःपतमानोबृहच्छिराः ॥ पार्श्वस्थंकंपयन्भग्नःसवान्यंमोपिचापरम् ३३ बलस्यलीलयोत्सृष्टखरदेहहताहताः ॥ तालाश्चकंपिरेसर्वेमहावातेरिताइव ३४ नैतच्चित्रंभगवतिह्यनंतेजगदीश्वरे ॥ ओतप्रोतमिदंयस्मिंस्तंतुष्वंगयथापटः ३५ ततःकृष्णंचरामंचज्ञातयोधेनुकस्यये ॥ क्रोष्टारोऽभ्यद्रवन्सर्वेसंरब्धाहतबांधवाः ३६ तांस्तानापततःकृष्णोरामश्चनृपलीलया ॥ गृहीतपश्चाच्चरणान्प्राहिणोत्तृणराजसु ३७ फलप्रकरसंकीर्णादैत्यदेहैर्गतासुभिः ॥ रराजभूःसतालाग्रैर्घनैरिवनभस्तलम् ३८ तयोस्तत्सुमहत्कर्मनिशम्यविबुधादयः ॥ मुमुचुःपुष्पवर्षाणिचक्रुर्वाद्यानितुष्टुवुः ३९ अथतालफलान्यादन्मनुष्यागतसाध्वसाः ॥ तृणंचपशवश्चेरुर्हतधेनुककानने ४० कृष्णःकमलपत्राक्षःपुण्यश्रवणकीर्तनः ॥ स्तूयमानोऽनुगैर्गोपैःसाग्रजोव्रजमागमत् ४१ तंगोरजश्छुरितकुंतलबद्धबर्हवन्यप्रसूनरुचिरेक्षणचारुहासम् ॥ वेणुंक्वणंतमनुगैरुपगीतकीर्तिंगोप्योदिदृक्षितदृशोप्यगमन्समेताः ४२ पीत्वामुकुंदमुखसारघमक्षिभृंगैस्तापंजहुर्विरहजंव्रजयोषितोऽह्नि ॥ तत्सत्कृतिंसमधिगम्यविवेशगोष्ठंसव्रीडहासविगमोयदपांगमोक्षः ४३ तदायशोदारोहिण्यौपुत्रयोःपुत्रवत्सले ॥ यथाकालंयथाकामंव्यधत्तांपरमाशिषः ४४ विगताध्वश्रमौ तत्रमज्जनोन्मर्दनादिभिः ॥ नीवींवसित्वारुचिरांदिव्यस्रग्गंधमंडितौ ४५ जनन्युपहृतंप्राश्यस्वाद्वन्नमुपलालितौ ॥ संविश्यमृदुशय्यायांसुखंसुषुपतुर्व्रजे ४६ एवंसभगवान्कृष्णोवृंदावनचरःक्वचित् ॥ ययौराममृतेराजन्कालिंदीसखिभिर्वृतः ४७

भवपुष्पाणियस्यसतथा गोरजश्छुरितकुंतलबद्धबर्हवन्यप्रसूनश्च रुचिरेईक्षणेचारुहासश्चयस्यसतथातम् ४२ मुकुंदस्यमुखमेवसारघंमधु सरघायोग्यंसारघं सरघामधुमक्षिकाप्रोक्ताइतिहलायुधःअह्नि विरहजंतापंयासामपांगमोक्षःकटाक्षनिरीक्षणंव्रीडयासहितःसव्रीडश्चासौहासश्चसव्रीडहासःतस्यविगमोराहित्यंविशेषेणप्राप्तिर्वायस्यसतथा तासांसत्कृतिंसत्कारंसमधिगम्यप्राप्य ४३ ४४ मज्जनं स्नानं उन्मर्दनं शरीरमलोद्वर्तनं नीवींवस्त्रंवासित्वाआच्छाद्य ४५ प्राश्यपीत्वा संविश्यशयित्वा ४६ इदानींकथांतरंवक्तुमुपक्रमते एवमिति ४७

निदाघातपःग्रीष्मर्तुभवरविकिरणभवउष्णविशेषःतेनपीडिताः ४८ उपस्पृश्यआचम्यपीत्वाच ४९ ५० तथाभूतान् मृतप्रायानईक्षयादृष्ट्यासंप्रतीतस्मृतयःसम्यक्प्राप्तप्रत्यभिज्ञानाः ५१ विषंविषामिश्रजलंपीत्वापरेतस्यमृतस्यस्यात्मनःपुनरुत्थानंगोविंदस्यानुग्रहयुक्तनिरीक्षणकृतमन्वमंसतन्यरूपयन् ॥ ५२ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधे विजध्वजकृतटीकायांत्रयोदशोध्यायः ॥ १३ ॥ हरौभक्तिमतांसंसारविषंनिर्वीर्यंभवतीतिनिदर्शयितुंअनंतरातीताध्यायेसंक्षिप्योक्तंकालियनागमर्दनमहिमानंप्रपंचयत्यस्मिन्नध्याये तत्रराज्ञःप्रश्नमुत्थापयितुमाह विलोक्येति कृष्णांयमुनां कृष्णाहिनाकृष्णसर्पेण उदवासयत्ततोन्यत्रावासमकारयत् १ अगाधेअतलस्पर्शेन्यगृह्णात्निगृहीतवान् प्रसह्यगृहीतवानित्यर्थः यथायेनप्रकारेणासीत्सप्रकारः २ ३ श्रप्यमाणंक्वाथ्यमानंपयोजलंयस्मिन्ह्रदेसतथा यस्मिन्ह्रदे ४ विषुष्मताविशेषेणदहता पुषसुपदाहेइतिधातुः विषेणविशिष्टमुदंविषोदंतेनयुक्ताऊर्मयःविषोर्मयःयस्यसतथासचासौमारुतःविषोदोर्मिमारुतःतेनाभिम

अथगावश्चगोपाश्चनिदाघातपपीडिताः ॥ दुष्टंजलंपपुस्तस्यास्तृषार्तावि षदूषितम् ४८ विषाभिमर्शदुपस्पृश्यदैवोपहतचेतसः ॥ निपेतुर्व्यसवःसर्वेभू छितावैकुरूद्वह ४९ वीक्ष्यतान्वैतथाभूतान्कृष्णोयोगेश्वरेश्वरः ॥ ईक्षयाऽमृतवर्षिण्यास्वनाथान्समजीवयत् ५० तेसंप्रतीतस्मृतयउत्थायचज लांतिकात् ॥ आसन्सुविस्मिताःसर्ववीक्षमाणाःपरस्परम् ५१ अन्वमंसततद्राजन्गोविंदानुग्रहेक्षितम् ॥ पीत्वाविषंपरेतस्यपुनरुत्थानमात्मनः ५२ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेत्रयोदशोऽध्यायः ॥ श्रीशुकउवाच ॥ विलोक्यदूषितांकृष्णांकृष्णःकृष्णाहिनाविभुः ॥ तस्याविशुद्धिमन्विच्छ न्सर्पंतमुदवासयत् १ राजोवाच ॥ कथमंतर्जलेगाधेन्यगृह्णाद्भगवानहिम् ॥ सवैबहुयुगावासीयथासीद्विप्रकथ्यताम् २ ब्रह्मन्भगवतस्तस्यभूम्नःस्वच्छंद वर्तिनः ॥ गोपालोदारचरितंकस्तृप्येतामृतंजुषन् ३ श्रीशुकउवाच ॥ कालिंद्यांकालियस्यासीद्ह्रदःकश्चिद्विषाग्निना ॥ श्रप्यमाणपयोयस्मिन्पतंत्युपरिगाः खगाः ४ विषुष्मताविषोदोर्मिमारुतेनाभिमर्शिताः ॥ म्रियंतेतीरगायस्यप्राणिनःस्थिरजंगमाः ५ तंचंडवेगविषवीर्यमवेक्ष्यतेनदुष्टांनदींचखलसंयम नावतारः ॥ कृष्णःकदंबमधिरुह्यततोऽतितुंगादास्फोटयद्गाढरशनोन्यपतद्विषोदे ६ सार्पह्रदःपुरुषसारनिपातवेगसंक्षोभितोरगविषोच्छ्वसितांबुरा शिः ॥ पर्यक्रुतोविषकषायविभीषणोर्मिभीमोधनुःशतमनंतबलस्यकिंतत् ७ तस्मिन्ह्रदेविहरतोभुजदंडघूर्णवार्घोषमंगवरवारणविक्रमस्य ॥ आश्रु त्यतत्स्वसदनाभिभवंसपत्न्यश्चक्षुःश्रवाःसमसरत्तममृष्यमाणः ८

शितआवृत्यगृहीताःयस्यह्रदस्य ५ तेनकालियेन खलानांसंयमनार्थंनिग्रहार्थंअवतारोयस्यसतथा आस्फोटयद्विगुणीकृतहस्तप्रहारंकृत्वा गाढरशनःदृढबद्धकक्षप्रदेशः विषोदेविषमिश्रितजले ह्रदइतिशेषः ६ सर्पस्यनिवासभूतह्रदःसार्पह्रदः पुरुषसारस्यपुरुषवरस्यपुरुषश्रेष्ठस्यपुरुषोत्तमस्येत्यर्थः निपातवेगेनसंक्षोभितस्यसंचालितस्यस्वस्थानस्थितिक्लिष्टस्योरगस्यविषेणसहउच्छ्वसितःउद्गिरितःअंबुराशिर्यस्यह्रदस्यसतथा विषकषायेणविषक्काथेनविषरागेणवाविभीषणोर्मिभिःभयंकरतरंगैर्भीम भयजनकः रागेकाथेकषायोस्त्रीनिर्यासेसौरभेरसेइतियादवः एवंविधोह्रदोधनुःशतंतीरस्थानमुल्लंघ्यपर्यक्रुतःपरितःउद्गिरन्यगतः हरेरेतन्नचित्रमित्याह अनंतबलस्येति लक्षयोजनविस्तारायामपरिमितभूप्लावनेपिनचोत्थंकिमुतधनुःशतमित्यर्थः ७ अंगनृपशृणुवरवारणविक्रमस्यगजेंद्रविक्रमस्य यद्वा अंगैरवयवैःवरणीयस्यवारणस्यविक्रमइवविक्रमोयस्यसतथा तस्यहरेर्भुजदंडाभ्यांघूर्णस्यमंद्रध्वनितयाक्षुब्धस्यवारःजलस्यघोषमाश्रुत्यतस्मात्स्वसदनाभिभवोयस्तममृष्यमा

णःअसहमानः चक्षुश्रवाःसर्पःतंकृष्णंसमसरत्संसृतवान्बाधितुमागतवानित्यर्थः वरोनारूपजामात्रोर्देवादेरीप्सितेवृतइति ८ अवदातःश्यामलः अवदातोरुणेपीतेश्वेतेश्यामेनिरामयइतिच चछाद आच्छादितवान् आवृतवानित्यर्थः ९ परिवीतंपरिवेष्टितं अदृष्टचेष्टंनिश्चेष्टं १० वत्सतर्यःगर्भाधानयोग्यवयसः ११ त्रिविधाइत्युक्तंविव्रियते दिवीत्यादिना दिविउत्पाताः आदित्यमंडलेकबंधादिदर्शनं निर्घातादिभिः भुविकंपादिकं आत्मनिदेहेवामनेत्रस्फुरणादि आसन्नभयशंसिनःसमीपभयसूचकाः १२ १३ १४ पशुवत्वृत्तिर्येषांतेतथा दृष्टमात्रव्यवहारिणः १५ माधवो मधुकुलोद्भवः १६ भगवल्लक्षणैर्हरेःपद्मध्वजादिलक्षणोपेतैःपदैश्चरणन्यासैःसूचितयासूचयंत्या पदव्यामार्गेण १७ वैशद्यायपुनरुक्तंविवृणोति तइति यवोव्रीहिविशेषः अशनिर्वज्रं दंभोलिरशनिर्द्वयोरित्यम

वि०अ० १४

तंप्रेक्षणीयसुकुमारघनावदातंश्रीवत्सपीतवसनंस्मितसुंदरास्यम् ॥ क्रीडंतमप्रतिभयंकमलोदरांघ्रिंसंदश्यमर्मसुरुषाभुजगश्चछाद ९ तंनागभोगपरिवीतमदृष्टचेष्टमालोक्यतत्प्रियसखाःपशुपाभृशार्ताः ॥ कृष्णेर्पितात्मसुहृदर्थकलत्रकामादुःखानुशोकभयमूढधियोनिपेतुः १० गावोवृषावत्सतर्यःक्रंदमानाःसुदुःखिताः ॥ कृष्णन्यस्तेक्षणाभीतास्तूष्णीमासन्कृतस्तवाः ११ अथव्रजेमहोत्पातास्त्रिविधाह्यतिदारुणाः ॥ उत्पेतुर्दिविभूम्यात्मन्यासन्नभयशंसिनः ॥ १२ तानालक्ष्यभयोद्विग्नागोपानंदपुरोगमाः ॥ विनारामेणगाःकृष्णंज्ञात्वाचारयितुंगतम् १३ तैर्दुर्निमित्तैर्निधनंमत्वाप्राप्तमतद्विदः ॥ तत्प्राणास्तन्मनस्काश्चदुःखशोकभयातुराः १४ आबालवृद्धवनिताःसर्वेगपशुवृत्तयः ॥ निर्जग्मुर्गोकुलाद्दीनाःकृष्णदर्शनलालसाः १५ तांस्तथाकातरान्वीक्ष्यभगवान्माधवोबलः ॥ प्रहस्यकिंचिन्नोवाचप्रभावज्ञोनुजस्यसः १६ तेऽन्वेषमाणादयितंकृष्णंसूचितयापदैः ॥ भगवल्लक्षणैर्जग्मुःपदव्यायमुनातटम् १७ तेतत्रतत्राब्जयवांकुशाशनिध्वजोपपन्नानिपदानिविश्पतेः ॥ मार्गेगवामन्यपदांतरांतरेनिरीक्षमाणाययुरंगसत्वराः १८ अंतर्ह्रदेभुजगभोगपरीतमारात्कृष्णंनिरीहमुपलक्ष्यजलाशयांते ॥ गोपांश्चमूढधिषणान्परितःपशूंश्चसंक्रंदतःपरमकश्मलमापुरार्त्ताः १९ गोप्योनुरक्तमनसोभगवत्यनंतेतत्सौहृदस्मितविलोकगिरःस्मरंत्यः ॥ ग्रस्तेऽहिनाप्रियतमेभृशदुःखतप्ताःशून्यंप्रियव्यतिहृतंददृशुस्त्रिलोकम् २० ताःकृष्णमातरमपत्यमनुप्रविष्टांतुल्यव्यथाःसमनुगृह्यशुचःस्रवंत्यः ॥ त्रस्तावजप्रियकथाःकथयंत्यआसन्कृष्णाननेर्पितदृशोमृतकप्रतीकाः २१ कृष्णप्राणान्निर्विशतोनंदादीन्वीक्ष्यतंह्रदम् ॥ प्रत्यषेधत्सभगवान्रामःकृष्णानुभावविद् २२

रः विश्पतेःप्रजापतेःकृष्णस्य गवांमार्गेकृष्णपादेनान्यस्यगोपस्यअन्यासांगवांपादेनांतरांतरेमध्येमध्येमिश्रितइतिशेषः गवांपादेनान्यपदेनवज्रादिलक्षणेनपदेनइतरलक्षणेनपदेनांतरांतरेमध्याविनाभूतेवा १८ जलाशयांतेह्रदसमीपे परितःस्थितान्गोपानुपलक्ष्यपरमंकश्मलंमोहम् १९ तस्यकृष्णस्यसौहृदंचस्मितंचविलोकश्चगिरश्चतत्सौहृदस्मितविलोकगिरःताःस्मरंत्यः प्रियव्यतिहृतंविरहितम् २० अपत्यमनुप्रविष्टांआत्मनापुरस्थितह्रदेप्रविष्टांशरीरेणतीरेस्थितांकृष्णमातरंयशोदांसमनुगृह्यपरिरभ्ययशोदादुःखतुल्यव्यथाः शुचःशोकादश्रूणिस्रवंत्यः बाष्पधारयानदींकुर्वंत्यः याः पूर्वंव्रजप्रियस्यकृष्णस्यकथाःकथयंत्यःआसन्ताअधुनात्रस्ताःकृष्णाननेर्पितनेत्राःगोप्योमृतकप्रतीकाविज्ञाताअनेनेतिशेषः २१ कृष्णएवप्राणोयेषांतेतथातान्ह्रदंनिर्विशतःप्रवेष्टुकामान् २२

आज्ञायज्ञात्वा उरगबंधात्सर्पकृतबंधनात् उदतिष्ठत्उत्थितोभूत् २३ भगवत्युत्थितेसर्पःकिंक्रियोभूदित्यत्राह तत्प्रथ्यमानेति तेनकृष्णेनप्रथ्यमानवपुषावध्यमानशरीरेणव्याधतःआत्मभागः स्वशरीरंयस्यसतथाअतएवकुपितोऽतएवश्वसन्दीर्घश्वासंकुर्वन् श्वसनरंध्रनासिकाछिद्रेविषांबरीषंविषभ्राष्ट्रंयस्यसतथा क्लीबंबरीषंभ्राष्ट्रोनाकंदुर्नास्वेदिनीस्त्रियामित्यमरः स्तब्धेक्षणउल्मुकमुखश्चस्तब्धे ईक्षणेउल्मुकेमुखेयस्यसतथा अंगारेलातउल्मुकइत्यमरः एवंविधोभुजंगोहरिमीक्षमाणस्तस्थावित्यन्वयः २४ तंअमुंसर्पपरिसमारपरितश्चचार द्वेसृक्किणीओष्ठांतभागौ ससर्पोप्यपसरन्तिर्यग्गच्छ न्बभ्रामचतुर्दिशंपरिवर्त्तमानोभूत् २५ हतौजसंक्षीणबलं आनम्यआनम्यग्रहीकृत्य अमृतकलस्यचंद्रस्याधिगुरुःपरमगुरुःअमृतकलानामधिकोगुरुः उद्गिरणशीलइतिभावःइदंविषौषधज्ञाना

इत्थंस्वगोकुलमनन्यगतिंनिरीक्ष्यसस्त्रीकुमारमतिदुःखितमात्महेतोः ॥ आज्ञायमर्त्यपदवीमनुवर्तमानःस्थित्वामुहूर्तमुदतिष्ठदुरंगबंधात् २३ त त्प्रथ्यमानवपुषाव्यथितात्मभोगस्त्यक्तोन्नमय्यकुपितःस्वफणान्भुजंगः ॥ तस्थौश्वसन्श्वसनरंध्रविषांबरीषस्तब्धेक्षणोल्मुकमुखोहरिमीक्षमाणः २४ तंजिह्वयाद्विशिखयापरिलेलिहानंद्वेसृक्किणीअतिकरालविषाग्निदृष्टिम् ॥ क्रीडन्नमुंपरिससारयथाखगेंद्रोबभ्रामसोप्यपसरन्प्रसमीक्ष्यमाणः २५ एवंपरि भ्रमहतौजसमुन्नतांसमानम्यतत्पृथुशिरस्यधिरूढआद्यः ॥ तन्मूर्धरत्ननिकरस्पर्शातिताम्रपादांबुजोऽमृतकलाधिगुरुर्ननर्त २६ तंनर्तुमुद्यतमवेक्ष्यतदात दीयगंधर्वसिद्धमुनिचारणदेववध्वः ॥ प्रीत्यामृदंगपणवानकवाद्यगीतपुष्पोपहारनुतिभिःसहसोपसेदुः२७य द्यच्छिरोननमतेगरकालशीर्ष्णस्तत्तन्ममर्दस्व लदंडधरोंऽघ्रिपातैः ॥ क्षीणेबलेभगवतोल्बणमाशुवक्त्राद्रक्तंवमन्परमकश्मलमापनागः २८ तस्याक्षिभिर्गरलमुद्वमतःशिरस्सुयद्यत्समुन्नमतिनिःश्वसतो रुषोच्चैः ॥ नृत्यन्पदानुनमयन्सयदाबभूवपुष्पैःस्तुतोथभगवान्पुरुषःपुराणः २९ तच्चित्रतांडवविरुग्णफणातपत्रोरक्तंमुखैरुरुवमन्नृपभग्नगात्रः॥ स्मृत्वाच राचरगुरुंपुरुषंपुराणंनारायणंतमरणंमनसाजगाम ३० कृष्णस्यगर्भंजगतोतिभरावसन्नपार्ष्णिप्रहारपरिरुग्णफगातपत्रम् ॥ दृष्ट्वाऽहिराजमुपसेदुरमु ष्यपत्न्यआर्ताःश्लथद्वसनभूषणकेशबंधाः ३१ तंताविपन्नमनसोथपुरस्कृतार्हाःकार्यंनिधायभुविभूतपतिंप्रणेमुः ॥ साध्व्यःकृतांजलिपुटीःपरम स्यभर्तुर्मोक्षेच्छवःशरणदंशरणंप्रपन्नाः ॥ ३२ ॥ नागपत्न्यऊचुः ॥ न्याय्योहिदंडःकृतकिल्बिषेऽस्मिंस्तवावतारःखलनिग्रहाय ॥ रिपोःसुतानामपितु ल्यदृष्टेर्धत्सेदमंफलमेवानुशंस्यम् ३३

र्थमुक्तम् २६ उपसेदुःउपस्थिताः २७ गरकालशीर्ष्णःविषेणनीलशिरसःसर्पस्य मूर्छातुकश्मलंमोहइत्यमरः २८ शिरस्सुमध्येयद्यच्छिरः समुन्नमतितत्तच्छिरः अनुनमयन्नृत्यन्बभूव २९ अंघ्रिपातविशेषेणरुग्णंभुग्नम् अरणंशरणं क्षीरसागरशायीयस्तम् ३० गर्भंजठेरजगद्यस्यसगर्भंजगत्तस्यकृष्णस्यातिभरेणावसन्नः पीडितःपार्ष्णिःपादपृष्ठभागोयःतेनकृतेनप्रहारेणपरिरु ग्णंफणातपत्रंयस्यसतथातम् ३१ पुरस्कृतार्हाःअग्रेकृतपूजनाःपरमस्यसकाशात् पत्युर्मोक्षेच्छवः ३२ दंडःशासनंन्याय्योयुक्तं रिपोःसुतानामितिषष्ठीसप्तम्यर्थेरिपोःसुतेष्वपितुल्यदृष्टेः त्वंतेषूभयेष्वप राधेषुदमंदंडंधत्से कथंधत्सइतितत्राह फलमिति अनुशंस्यंअपराधानुरूपंफलंअनुग्रहलक्षणंदंडंकरोषीत्यन्वयः ३३

ननुनिगृह्णतःकथमनुग्रहोभवतीत्यत्राह अनुग्रहइति हिशब्दएवार्थेभवतासर्वपूज्येनत्वया नः अस्माकंअयमनुग्रहएवकृतोनतुविरोधःकृतः तेत्वयाक्रियमाणोदंडोऽसतामसाधुभावानांदुष्टकर्मणांतामसयो निंप्राप्तानांकल्मषापहः खलुपापपरिहारकएव अमुष्यासत्त्वंकथमत्राह यदिति अमुष्यकालियनाम्नोदंदशूकत्त्वंतत्तत्प्राणिदंशनशीलयोनित्वमभूत् इतिज्ञायते यद्यस्मात्तस्मादसत्त्वंयोग्यंतथा अ तस्तेतवक्रोधःक्रोधकारणदंडोयोग्यस्यदेहिनोनुग्रहःसंमतःअस्माभिःप्रतिपन्नइत्यन्वयः दंडोपिभगवच्चीर्णोममैषोनुग्रहःकृतइत्यादिस्मृतेर्भक्तिमतएवायंविशेषइतिज्ञायते ३४ यद्दंशूकत्वमपिनदुष्कर्मनिमि त्तमपितुपूर्वजन्मन्यत्युत्कटत्वद्विषयतपआदिप्रभावोपनतमितिमन्यामहे अत्युत्कटैःपुण्यपापैरिहैवफलमश्नुते यतोस्यगवादिप्राणिद्रोहत्वदंशनोत्पन्नपापपरिहारायतवलक्ष्म्यादिसर्वदेवतावांछितसेवाचरणस रोजरेणुमंदिरमूर्धाभूदितिभावेनवदंति तपइत्यादिना भूदानादिलक्षणोधर्मः सर्वेषांजीवानांप्राणभूतःसर्वान्जीवयतीतिवा ३५ तपआदिषुकस्यपुण्यस्यानुभावोयंप्रभावः अध्यवसायोवा काम्यंतइ तिकामाःविषयास्तान् ३६ कीदृशाविषयाइतिभावेनतानाहुः ननाकेति नाकस्यपृष्ठसुकृतेनुभूत्वाइमंलोकंहीनतरंवाविशंतीति पारमेष्ठ्यंसत्यलोकः सार्वभौमंचक्रवर्तिपदं इमारामाःसरथाःसतु र्याइत्यादिलक्षणंरसाधिपत्यंअखिलस्वर्गविभवम् योगसिद्धिरणिमादिलक्षणाः अपुनर्भवंअपक्वभक्तिलभ्यंमोक्षम् अपुनर्भवमात्राद्धिहरिसामीप्यमुत्तममित्यादिस्मृतेः ३७ किंबहुवक्तव्यमितिभावेन

अनुगृह्णेयंभवताकृतोहिनोदंडोऽसतांतेखलुकल्मषापहः ॥ यद्दंदशूकत्वममुष्यदेहिनःक्रोधोपितेनुग्रहएवसंमतः ३४ तपःसुतप्तंकिमनेनपूर्वंनिरस्तमानेन चमानदेन॥धर्मोऽथवासर्वजनानुकंपयायतोभवांस्तुष्यतिसर्वजीवः ३५ कस्यानुभावोऽस्यनदेवविद्महेतवांघ्रिरेणुस्पर्शाधिकारः ॥ यद्वांछयाश्रीर्ललनाच रत्तपोविहायकामान्सुचिरंधृतव्रता ३६ ननाकपृष्ठंनचपारमेष्ठ्यंनसार्वभौमंनरसाधिपत्यम् ॥ नयोगसिद्धीरपुनर्भवंवावांछंतित्वत्पादरजःप्रपन्नाः ३७ त दीशनाथापदुरापमन्यैस्तमोजनिःक्रोधवशोऽप्यनीशः ॥ संसारचक्रेभ्रमतःशरीरिणोयदीप्सितंस्याद्धि भवत्समक्षम् ३८ नमस्तुभ्यंभगवतेपुरुषाय महात्मने ॥ भूतावासायभूतायपरायपरमात्मने ३९ ज्ञानविज्ञाननिधयेब्रह्मणेऽनंतशक्तये ॥ अगुणायाविकारायनमस्तेऽप्राकृतायच ४० का लायकालनाभायकालावयवसाक्षिणे ॥ विश्वायतदुपद्रष्ट्रेतत्कर्त्रेविश्वहेतवे ४१ भूतमात्रेंद्रियप्राणमनोबुद्ध्यशयात्मने ॥ निर्गुणेनाभिमानेनगूढस्वा त्मानुभूतये ४२

वदंति तादिति ईशनाथशंकरस्वामिन् यद्भवत्समक्षम् भवतःसाक्षात्करणंतदापदुरापम् नचक्षुषापश्यतिकश्चिदेनंनान्यैर्देवैर्मनसानापिवाचेत्यादिश्रुतेः साधनसामग्रीमंतरेणदुष्प्रापमित्यर्थःतमसा गुणेनजनिर्जन्मयस्यसतथा अतएवक्रोधस्वभावः तथाप्यनीशोऽसमर्थः ३८ दंडोपिभगवच्चीर्णइतिस्मृत्यर्थमात्मनिज्ञापयितुंकृष्णंस्तुवंति नमइत्यादिना भूतावासायेत्यनेनभूतनाशेननाशःस्य दित्युच्यतेइतिशंकांनिवारयति भूतायेति सर्वदाविद्यमानाय भूसत्तायामितिधातुः ३९ अविकारायेत्युक्तंसमर्थयतेअप्राकृतायेति ४० कालायभक्तकामधेनवे कालनाभायकालाश्रयाय विश्वायस्वा धीनप्रपंचाय तस्यविश्वस्योपद्रष्ट्रेअध्यक्षाय तस्यकर्त्रे अवांतरकारणाय प्रकृतेर्मूलकारणत्वंनिवारयति विश्वहेतवइति प्रपंचस्यमूलकारणाय विश्वस्यतदधीनत्वाद्विश्वंविष्णुरुदीर्यतइत्यादिस्मृतेः विश्वायविराट्पुरुषाय तत्कर्त्रेविश्वस्योत्पादनमायाप्रेरकायइत्यादिरर्थोनयुक्तःआप्तामाणिकत्वादिति ४१ विश्वस्यभगवदधीनत्वंविवृणोति भूतेति भूतानिपंचमात्राःशब्दादयःइंद्रियाणिश्रोत्रादीनि प्राणाःदश मनःसंकल्पविकल्पलक्षणम् बुद्धिर्निश्चयहेतुरेषामाशयःस्थानंआत्मास्वभावोयस्यसतथातस्मै आत्मायत्नोधृतिर्बुद्धिःस्वभावोब्रह्मवर्म्मचेत्यमरः स्थानेभिप्रायआशयइतियादवः निर्गुणेनसत्त्वा दिगुणजन्मरहितेनाभिमानेनज्ञानेनगूढाअप्रकाशितास्वात्मानुभूतिर्यस्यसतथातस्मै ४२

अनंतायनित्यायसर्वगताय सूक्ष्मायइंद्रियाविषयाय नित्यंविभुंसर्वगतंसुसूक्ष्ममितिश्रुतेः कूटस्थायशश्वदेकप्रकाराय विपश्चितसर्वज्ञायानंतपुण्यबुद्धयवा नानावादानांसद्धातानांअनुराधायअनुकूलवर्तमानाय वाच्यार्थः तस्यप्रतिपाद्यत्वेयोग्यत्वंवाच्यशक्तिःवाचकःशब्दःतस्यार्थप्रतिपादनसामर्थ्यंतद्वयंयस्यसतथातस्मै ४३ प्रमाणमूलायप्रत्यक्षादिप्रमाणप्रतिष्ठापकायकवयेअतिक्रांतदर्शिनेशास्त्रं वेदःयोनिर्ज्ञप्तिकारणंयस्यसतथातस्मै योनिःस्त्रीणांभगेस्थानेकारणेताम्रकेपणेइतिपादवः निर्देशकारणायइंकुर्यादिदंनकुर्यादितिविधिकर्त्रे निर्देशग्रंथयोःशास्त्रमित्यमरः प्रवृत्तायप्रवृत्तिमार्गप्रवर्तकाय निवृत्तायनिवृत्तिमार्गप्रवर्तकायच सृष्टौप्रवृत्तायप्रलयेनिवृत्तायेतिवा उभयेषांनिगमायमार्गायविषयायेत्यर्थः अयनंपदवीमार्गःपद्याचविनिगद्यतेनिगमइतिहलायुधः वेदमूर्त्तयेवा निश्चायकायवा निगमो निश्चयेवेदेपरेपथिवणिक्पथइतियादवः ४४ कृष्णायउत्कृष्टानंदरूपाय भक्तजनदुरितकर्षणशीलायवाशत्रूणामग्रयेवानीलवर्णायवा कृष्णःसीसाद्यलोहेपुकृष्णोनीऽलेनलेकलौ शूद्रेकाकेपिकेव्यासे ध्वांतेपक्षेर्जुनेहरावितिच रामायरामनाम्नेअभिरामायवाप्रकृष्टद्युत्पामेयाय पद्मा प्रकृष्टधानाय प्रद्युम्नंद्रव्यंद्रविणमितिहलायुधः । अनिरुद्धायज्ञानिनांनिरोधरहिताय ४५ गुणाःसत्त्वादयः । भक्तिज्ञानादयोवा तेषांप्रदीपायज्ञापकाय गुणात्माप्रकृतिः तस्यांस्थितःउदयःस्वरूपंयस्यसतथातस्मै गुणैःश्रोत्रादींद्रियजन्यज्ञानैःप्रत्युपलक्ष्यायअनुमेयस्वरूपाय गुणद्रष्टेगुणसाक्षिणे स्वसंविदेस्वयंप्रकाशाय तद्ब्रह्म वेदाहंब्रह्मास्मीतिश्रुतिः अनेनाप्यस्याप्यन्योद्रष्टातस्याप्यन्यइत्यनवस्थानिरस्तेतिज्ञातव्यं ४६ अव्याकृताःव्याहर्तुमशक्याःसृष्ट्यादिविहारायस्यसतथातस्मै ननुव्याहर्तुमशक्यविहारश्चेत्कथंतर्हितज्ज्ञानमत्राहुः सर्वेति सर्वैर्व्याकृताविवृतासिद्धिः स्वरूपज्ञानंयस्यसतथा स्वानुग्रहेणज्ञापितस्वरूपइत्यर्थःतस्मै पद्मा सर्वव्याकृतसिद्धयेनामरूपात्मकंजगत्सर्वव्याकृतं

नमोऽनंतायसूक्ष्मायकूटस्थायविपश्चिते ॥ नानावादानुरोधायवाच्यवाचकशक्तये ४३ नमःप्रमाणमूलायकवयेशास्त्रयोनये ॥ प्रवृत्तायानिवृत्तायनिगमायनमोनमः ४४ नमःकृष्णायरामायवसुदेवसुतायच ॥ प्रद्युम्नायानिरुद्धायसात्वतांपतयेनमः ४५ नमोगुणप्रदीपायगुणात्मस्थोदयायच ॥ गुणप्रत्युपलक्ष्यायगुणद्रष्ट्रेस्वसंविदे ४६ अव्याकृतविहारायसर्वव्याकृतसिद्धये ॥ हृषीकेशनमस्तेस्तुमुनयेमौनशीलिने ४७ परावरगतिज्ञायसर्वाध्यक्षायतेनमः ॥ अविश्वायचविश्वायतद्रष्ट्रेविश्वहेतवे ४८ त्वंह्यस्यजन्मस्थितिसंयमान्विभोगुणैरनीहोऽकृतकालशक्तिधृक् ॥ तस्मात्स्वभावात्प्रतिबोधयस्वनःसमीक्षयामोघविहारईहसे ४९

तस्यासिद्धिरुत्पत्तिर्येनसतथातस्मै मुनयेसर्वज्ञानाय मौनशीलिने असंभावितभाषणशीलरहिताय ४७ परावरगतिज्ञायकार्यकारणस्थितिज्ञाय सर्वाध्यक्षायसर्वेषामुपरिगताय अविश्वायाविश्वेभ्योजीवेभ्योन्यस्मै शरीरेषुप्रविष्टत्वाद्विश्वोजीवउदीर्यतइत्यादिस्मृतिः तात्पर्यात्पुनरुक्तमाहुः विश्वायेति जीवस्यजगदंतःपातित्वोपिचेतनत्वेनस्वातंत्र्यशंकानिवारणार्थंपृथग्जीवग्रहणं जीवस्यतदधीनत्वाद्विश्वोविष्णुरितिस्मृतः अस्योत्पन्यादिहेतुत्वाद्विश्वहेतुश्चकीर्तितइति ४८ प्रातिस्विकजीवाभीष्टदातृत्वाच्चद्रष्टृइतिप्रपंचस्यमूलकारणंहरिरित्युक्तंतत्स्पष्टयितुमाह त्वंहीति सत्यधर्मासत्यकर्माइतिश्रुतेः अमोघविहारस्त्वं अतएवानीहोक्लिष्टकर्मात्वंसत्वादिगुणैरस्यजगतोजन्मादीनीहसे हियस्माद्देवस्यैषस्वभावोयमाप्तकामस्यकास्पृहेतिश्रुतेः तस्मात्तवसत्यप्रपंचस्रष्टृत्वस्वभावात् समीक्षयासम्यग्ज्ञानेननोस्मान्प्रतिबोधयस्वेत्यन्वयः यथातवजगत्स्रष्टृत्वंस्वभावस्तथास्मत्प्रतिबोधनमपिस्वभावोस्त्वित्याशयः लोकेस्वरूपशक्त्यभावाद्वरादिनामाययावान्यसहाये नवाश्रमेणकर्तृत्वंनतथातवेत्याशयेनाह अकृतेतिकालःकारणंज्ञानंवा अकृतावरादिना नान्यनिमित्तंस्वरूपमितियावत् एवंविधांशक्तिंधारयसीतिस्वरूपभूतज्ञानक्रियाशक्तिधरइत्यर्थः तदुक्तं हरेःस्वरूपशक्तिर्याकालशक्तिरुदीर्यतेसदासर्वगुणात्मत्वादिति यथा स्वाधीनत्वात्सत्त्वादिगुणैःसृष्टिंकरोषितथास्वनियतदुर्गावायुभ्यांसंहारस्थितीकरोषीत्याशयेनोक्तं अकृतेति तयोरपिकालाधीनत्वेनकालशब्दवाच्यत्वादित्यर्थःतदुक्तं दुर्गाचाप्यवरावतःसर्वसंहारकारित्वाद्वायुःसर्वस्यजीवनात् कालाभिमानिनावेतौदुर्गावायुश्चकीर्तितावितिच ४९

विश्वायेत्यादिनाहरेर्जगदात्मकत्वमुक्तमितिमंदाशंकानिरासायस्थावराज्जंगमस्यपृथक्कृत्यत्रैविध्यकथनेनमिथोपिभेदस्तात्विकइतिदर्शनार्थंतस्यभगवत्प्रतिमात्वेनतत्स्वतःस्तवनेनहरेरतिशयितप्रीतिर्भवतीतिभावेनाहुः तस्यैवेति यस्त्वंनमस्तुभ्यंभगवतेइत्यादिनाप्रसक्तस्तस्यतेतवैवामूस्तनवःप्रतिमास्थानीयाःशांताअशांतामूढयोनयउतेतियास्त्रिधाभिन्नाअमूरित्यर्थः त्रिलोक्यांजंगमसंज्ञाइतिशेषःअत्रापितारतम्यमस्तीत्याहुः शांताइतिसुखांतंसुखस्वभावमेवाप्नुवंतीतियत्तस्मात्शांतादेवाःसतामप्यवितुःतेतवप्रियाः परापूर्वेषांसख्यावृणक्तिवितर्तुराणोअपरेभिरेतीतिश्रुतिः प्रियस्यापितारतम्यविशेषद्योतकोहिशब्दः प्रियंद्विविधंअंतर्बहिश्चेति तत्रांतःप्रियाःसंतः बहिःप्रियाअसंतः अत्रापिकश्चनविशेषः संहारहेतुत्वादसंतईषदंतःप्रियाइवस्थितिहेतुत्वात्संतोविशेषांतःप्रियाइत्यतोधुनेतिविशेषणं तदुक्तं अंतःप्रियंबहिश्चेतिद्विधाप्रियमुदाहृतमित्यादिदेवादीनांशांतत्वादिकंसुखांतंप्राप्नुयुर्यस्माद्देवाःशांताउदीरिताइत्यादिस्मृतिसिद्धं अशांताःमानुषाःप्रोक्ताःमूढयोनयोऽसुराइत्यर्थःअवनादिकर्मप्रवर्तनंचप्राणमुखेनेत्याहुः स्थातुरिति कर्मप्रवर्तनार्थंसर्वशरीरेषुस्थातुरीहतःईहचेष्टायामितिधातुः चेष्टकत्वमीहशब्दस्यप्रवृत्तिनिमित्तं अवनशब्दस्यापितदेवातईहतःप्राणस्यसकाशात्कर्मपरीप्सयाकर्मपालने

तस्यैवतेमूस्तनवस्त्रिलोक्यांशांताअशांताउतमूढयोनयः ॥ शांताःप्रियास्तेह्यधुनाऽवितुःसतांस्थातुश्चतेकर्मपरीप्सयेहतः ५० अपराधःसकृद्ब्रह्मन्सोढव्यःस्वप्रजाकृतः ॥ क्षंतुमर्हसिशांतात्मन्मूढस्यत्वामजानतः ५१ अनुगृह्णीष्वभगवन्प्राणांस्त्यजतिपन्नगः ॥ स्त्रीणांनःसाधुशोच्यानांपतिःप्राणःप्रदीयताम् ५२ विधेहितेकिंकरीणामनुष्ठेयंतवाज्ञया ॥ यच्छ्रद्धयानुतिष्ठन्वैमुच्यतेसपुमान्भयात् ५३ ॥ श्रीशुकउवाच ॥ इत्थंसनागपत्नीभिर्भगवान्समभिष्टुतः॥मूर्छितंभग्नशिरसंविससर्जांघ्रिकुट्टनैः५४ प्रतिलब्धेंद्रियप्राणःकालियःशनकैर्हरिम् ॥ कृच्छ्रात्समुच्छ्वसन्दीनःकृष्णंप्राहकृतांजलिः ५५ वयंखलाःसहोत्पत्त्यातामसादीर्घमन्यवः ॥ स्वभावोदुस्त्यजोनाथभूतानांयदसद्ग्रहः५६त्वयासृष्टमिदंविश्वंधातुर्गुणविसर्जनम् ॥ नानास्वभाववीर्याणांजोयोनिबीजाशयाकृति ५७ वयंचतत्रभगवन्सर्पाजात्युरुमन्यवः ॥ कथंत्यजामस्त्वन्मायांदुस्त्यजांमोहिताःप्रभो ५८ भवान्हिकारणंतत्रसर्वज्ञजगदीश्वर ॥ अनुग्रहंनिग्रहंवामन्यसेतद्विधेहिनः ५९ श्रीशुकउवाच ॥ इत्याकर्ण्यवचःप्राहभगवान्कार्यमानुषः ॥ नात्रस्थेयंत्वयासर्पसमुद्रंयाहिमाचिरम् ६० सज्ञात्यपत्यदाराढ्योगोनृभिर्भुज्यतेनदी ॥ यएतत्संस्मरेन्मर्त्यस्तुभ्यंमदनुशासनम् ॥ कीर्तयन्नुभयोःसंध्योर्नयुष्मद्भयमाप्नुयात् ६१ योऽस्मिन्स्नात्वामआक्रीडेदेवादींस्तर्पयेज्जलैः ॥ उपोष्यमांस्मरन्नर्चेत्सर्वपापैःप्रमुच्यते ६२

च्छयापालनंप्रवर्तनंतदिच्छयाप्राणस्यसकाशात्कर्मप्रवर्तनामिच्छातिभगवानित्यतःसमहाविभुरित्यर्थः तदुक्तं वायोःसकाशाज्जगतःप्रवृत्तिकामयत्यजइत्यादिप्राणस्यप्राणमितिश्रुतिश्चशब्दगृहीता ५० सोढव्यःक्षंतुमर्हसीतिद्विर्वचनमादरार्थंस्वचापल्यप्रकटनार्थंच शांतानांदेवानामात्मन्स्वामिन् मूढस्येत्यस्यविवरणंत्वामजानतइति ५१ ५२ ५३ अंघ्रिकुट्टनैःअंघ्रिमर्दनैः ५४ ४५ यदसद्ग्रहोयोदुराग्रहः ५६ धातुर्हिरण्यगर्भस्यसकाशात्गुणभूतंसर्जनंसृष्टिरस्यजगतः प्राधान्येनविष्णोरेषासृष्टिः विष्णुःप्रधानतः स्रष्टागुणस्रष्टाचतुर्मुखइतिवचनात् नानास्वभावाअग्नेरूर्ध्वज्वलनंवायोस्तिर्यग्गमनमित्यादिनानाविधाः स्वभावाः वीर्याणिपराक्रमादीनि ओजोवष्टंभः बीजंशुक्रादि आशयोऽभिप्रायः एषामाकृतिःस्वरूपंयस्यतत् ५७ ५८ ५९ देवकार्यार्थंमानुषविडंबः ६० संध्योःसंध्ययोः ६१ ममाक्रीडेक्रीडास्थाने ६२

त्वंपूर्वंयस्यसुपर्णस्यभयात्नान्नारमणकंद्वीपंहित्वाएतद्ह्रदमुपाश्रितःअथसुपर्णोमत्पादलक्षणंमत्पादलांछनमिवलांछनंयस्यसतथातंत्वांनाद्यात् नभक्षयेत् ६३ ६४ परार्घ्यैरनर्घ्यत्वेनोत्तमैः ६५ ६६ ६७ ६८ ॥ इतिश्रीभागवते महापुराणेविजयध्वजकृतटीकायांचतुर्दशोध्यायः ॥ १४ ॥ असमंजसंअपराधम् १ उपहार्यैःउपहारकैः गरुडादीनांपूजकैरन्यजनेनपूज्यैर्वा सर्पजनैरिहयोबलिः मासिप्रतिमासंक्रियतइतिशेषः कीदृशःवानस्पत्यः सोमेवनस्पतिंगतेक्रियमाणः अमावास्यायांक्रियमाणइत्यर्थः यद्वा वनस्पतौक्रियमाणःसबलिःप्राङ्नागानामैकमत्येनात्मरक्षणार्थंनिरूपितइत्यन्वयः २ आत्मनः गोपीथायगोपनायआत्मरक्षणाय ३ कद्रोरपत्यंकाद्रवेयः जातिज्ञानार्थमिदमुक्तं कदर्थीकृत्यधिक्कृत्य तांबलिंपूजाम् बलिशब्दःपूजार्थःस्त्रीलिंगः पूजायांस्त्रीबलिर्दै

द्वीपंरमणकंहित्वाऽहदमेतदुपाश्रितः ॥ यद्भयात्ससुपर्णस्त्वांनाद्यान्मत्पादलांछनम् ६३ श्रीशुकउवाच ॥ एवमुक्तोभगवताकृष्णेनाद्भुतकर्मणा ॥ तं पूजयामाससमुदानागपत्न्यश्चसादरम् ६४ दिव्यांबरस्रङ्मणिभिःपरार्घ्यैरपिभूषणैः ॥ दिव्यगंधानुलेपैश्चमहत्योत्पलमालया ६५ पूजयित्वाजगन्नाथंप्रसाद्यगरुडध्वजम् ॥ नागराजोऽभ्यनुज्ञातःपरिक्रम्यप्रणम्यच ६६ सकलत्रसुहृत्पुत्रोद्वीपमध्येजगामह ॥ तदैवसाऽमृतजलायमुनानिर्विषाभवत् ६७ अनुग्रहाद्भगवतःक्रीडामनुजरूपिणः ६८ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेकालियमर्दनोनामचतुर्दशोऽध्यायः ॥ १४ ॥ राजोवाच ॥ नागालयंरमण कंकस्मात्तत्याजकालियः ॥ कृतंकिंवासुपर्णस्यतेनैकेनासमंजसम् १ श्रीशुकउवाच ॥ उपहार्यैःसर्पजनैर्मासिमासीहयोबलिः ॥ वानस्पत्योमहाबाहो नागानांप्राङ्निरूपितः २ स्वंस्वंभागंप्रयच्छंतिनागाःपर्वणिपर्वणि ॥ गोपीथायात्मनःसर्वैसुपर्णायमहात्मने ३ विषवीर्यमदाविष्टःकाद्रवेयस्तुकालियः ॥ कदर्थीकृत्यगरुडंस्वयंतंबुभुजेबलिम् ४ तच्छ्रुत्वाकुपितोराजन्भगवान्भगवत्प्रियः ॥ विजिघांसुर्महावीर्यैकालियंसमुपाद्रवत् ५ तमापतंतंतरसाविषायुधःप्रत्यभ्ययादुद्धृतनैकमस्तकः ॥ दद्भिःसुपर्णंव्यदशद्दायुधःकरालजिह्वोच्छ्वसितोग्रलोचनः ६ तंतार्क्ष्यपुत्रःसनिरस्यमन्युमान्प्रचंडवेगोमधुसूदनासनः ॥ पक्षेणसव्येनहिरण्यरोचिषाजघानकद्रूसुतमुग्रविक्रमः ७ सुपर्णपक्षाभिहतःकालियोऽतीवविह्वलः ॥ ह्रदंविवेशकालिंद्यास्तदगम्यंदुरासदम् ८ तत्रैकदाजलचरंगरुडोभक्ष्यमीप्सितम् ॥ निवारितःसौभरिणाप्रसह्यक्षुधितोऽहरत् ९ मीनान्सुदुःखितान्दृष्ट्वादीनान्मीनपतौहते ॥ कृपया सौभरिःप्राहतत्रतत्क्षेममाचरन् १० अत्रप्रविश्यगरुडोयदिमत्स्यान्सखादति ॥ सद्यःप्राणैर्वियुज्येतसत्यमेतद्ब्रवीम्यहम् ११

त्यभेदेनाकरएवचेति ४ विजिघांसुःहंतुकामः ५ विषमेवायुधंयस्यसतथा उद्धृतनैकमस्तकःउद्धृतानेकफणः दद्भिःदंतैः व्यदशत्दंशितवान् दंताएवायुधंयस्यसतथा करालजिह्वश्चउच्छ्वसितोग्रलोचनश्चतथा उच्छ्वसितःदीर्घश्वासोपेतः उग्रलोचनेयस्यसतथा ६ जघानअहनत् अत्मपादैस्ताडितवानित्यर्थः ७ कालिंद्याःयमुनायाः तेनगरुडेनअगम्यंदुरासदंपश्वादीनामितिशेषः ८ गरुडस्यागम्यत्वेनिमित्तमाह तत्रेति भक्ष्यतइतिभक्ष्यम् ९ तत्क्षेमंतेषांशिष्टानांक्षेमंयोग्यरक्षाम् १० खादति भक्षति प्राणवियोगंमरणमाप्नोतु ११

तत्कालियःपरंवेदनान्यःकश्चित्सलेलिहा ॥ अवात्सीद्गरुडाद्रीतःकृष्णेनचविवासितः १२ कृष्णंह्रदाद्विनिष्क्रांतंदिव्यस्रग्गंधमंडितम् ॥ महामणिगणा कीर्णजांबूनदपरिष्कृतम् १३ उपलभ्योत्थिताःसर्वेलब्धप्राणाइवप्रजाः ॥ प्रमोदनिभृतात्मानोगोपाःप्रीत्याभिरेभिरे १४ यशोदारोहिणीनंदोगोपा गोप्यश्चकौरव ॥ कृष्णंसमेत्यलब्धेहाआसन्लब्धमनोरथाः १५ रामश्चाच्युतमालिंग्यजहासास्यानुभाववित् ॥ नरागावोवृषावत्सालेभिरेपरमांमुदम् १६ नंदंविप्राःसमागम्यगुरवःसकलत्रकाः ॥ ऊचुस्तेकालियग्रस्तोदिष्ट्यामुक्तस्तवात्मजः १७ यशोदाचमहाभागानष्टलब्धप्रजासती १८ परिष्वज्यां कमारोप्यमुमोचाश्रुकणान्बहून् १८ ततश्चास्तंगतेभानौकृष्णोवासमकल्पयत् ॥ सरामःसहगोपालैर्मात्रापित्रासगोधनैः १९ तांरात्रिंतत्रराजेंद्रक्षुत्तृड्भ्यांश्रमकर्शिताः ॥ ऊषुर्व्रजौकसोगावःकालिंद्याउपकूलतः २० एतस्मिन्नेवकालेतुव्रजेकौरवसत्तम ॥ घोरःशुचिबलोद्भूतोदावाग्निःसर्वतोद्वतः २१ सुप्तान्निशीथआवृत्यप्रदग्धुमुपचक्रमे ॥ ततउत्थायसंभ्रांतादह्यमानाव्रजौकसः २२ कृष्णंययुस्तेशरणंमायामनुजमीश्वरम् ॥ कृष्णकृष्णमहा भागहेरामामितविक्रम २३ एषघोरतमोवह्निस्तावकान्ग्रसतेहिनः ॥ सुदुस्तरान्नःस्वान्पाहिकालाग्नेःसुहृदःप्रभो २४ नशक्तुमस्त्वच्चरणंसंत्यक्तुमकुतोभयम् ॥ इत्थंस्वजनवैक्लव्यंनिरीक्ष्यजगदीश्वरः २५ तमग्निमपिबत्तीव्रमनंतोऽनंतशक्तिधृक् ॥ अथकृष्णःपरिवृतोज्ञातिभिर्मुदितात्मभिः २६ अनुगीयमानोन्यविशद्व्रजंगोकुलमंडितम् २७ इतिश्रीभागवतेमहापुराणेदशमस्कंधेपंचदशोऽध्यायः ॥ १५ ॥ श्रीशुकउवाच ॥ व्रजेविक्रीडतोरेवंगोपालच्छद्मरूपिणोः ॥ ग्रीष्मोनामर्तुरभवन्नातिप्रेयांश्छरीरिणः १ सचवृंदावनगुणैर्वसंतइवलक्षितः॥ यत्रास्तेभगवान्साक्षाद्रामेणसहकेशवः २ यत्रनिर्झरनि र्ह्रादनिवृत्तस्वनझिल्लिकम् ॥ शश्वत्तच्छीकरैर्जुष्टंद्रुमापिप्पलमंडितम् ३

तिश्रीभागवतेमहापुराणेदशमस्कंधेविजयध्वजकृतटीकायांपंचदशोऽध्यायः ॥ १५ ॥ हरेर्भूभारहरणस्ययदंतरंगंकर्तुमवतीर्णशेषेणतद्वक्तुमुपक्रमते व्रजइत्यादिना गोपालच्छद्मरूपिणोःगोपाला वितिकपटशब्दिनोःरूपंशब्देपशौग्रंथेशोकेवृत्तौहितादिषु सौंदर्येचस्वभावेचेतियादवः नातिप्रेयान्नातिप्रियतरः धर्महेतुत्वात् १ २ वसंततुल्यत्वेनिमित्तमाह यत्रेति यत्रवृंदावने निर्झ रस्यनिर्ह्रादेनशब्देननिवृत्तस्वनाःप्रतिलब्धस्वराःझिल्लिका.कीटविशेषा यस्मिन्तत्तथा तस्यनिर्झरस्यसीकरैः वायुशीर्णवारिबिंदुभिः ३

सरित्नदी सरोदेवखातः एतयोः प्रस्रवणंनिझरं ऊर्मिस्तरगः एतत्संबंधिवायुनाच कह्लारंसौगंधिकं कंजपद्मं उत्पलनीलोत्पल एषारेणुभःपराग हारेणामनाहरण यद्वा रेणूनाहाराहरणअस्यास्ता तिहारीतेन निदाघवन्ह्यर्केभ्योभवउत्पत्तिर्यस्यसतथादवस्तापःदवपरितापइतिधातुः अत्रप्रत्यपेएतस्सिद्ध्यति वनाग्निरित्यर्थंगीकारेवह्नीत्येतद्व्यर्थभवति अतिशाद्वलेकोमलतरतृणोपेतं ४ विषवदु ल्बणाःचंडांशुकराःसूर्यरश्मयःयत्रशाद्वलितंबालतृणनिबिडंभुवोगतंरसंजलंनानिगृह्णते किंकारणमत्राह अगाधेति अगाधंतोयंयस्याःसाअगाधतोया साचन्हदिनीनदीतस्यास्तटरुहै तीरजातैर्वृक्षैःसमं ततःद्रवंत्याःस्यंदमानायाःपुलिन्याविभक्तनद्याःशास्त्रानद्याइत्यर्थः पुलिनैर्नेमित्तैःसर्वदाद्रवीभूतस्थलत्वादित्यर्थः ५६ विरणयन्विविधैःस्वरैर्ध्वनयन्कृष्णःतद्वनमाविशदित्यन्वयः ७ धातुर्गैरिकः ८ ९ १० भ्रामणैःमंडलाकारेणतित्तिरैर्लघनैर्देशपदान्युत्पतनैःक्षेपैःआक्षेपवचनैःपाषाणक्षेपणैर्वा आस्फोटनैःएकंहस्तंद्विगुणीकृत्यैतरेणपाणिनास्फालनानिआस्फोटनानितैःपरस्परैःपाणिनापाणिमवलं

सरित्सरःप्रस्रवणोर्मिवायुनाकह्लारकंजोत्पलरेणुहारिणा ॥ नविद्यतेयत्रवनौकसांदवोनिदाघवह्न्यर्कभवोतिशाद्वले ४ अगाधतोयन्हादिनतिटेरुहैर्द्रवत्पुलिन्याःपुलिनैःसमंततः ॥ नयत्रचंडांशुकराविषोल्वणाभुवोरसंशाद्वलितंनिगृह्णते ५ श्रीमद्वनंकुसुमितंनदद्विजमृगद्विजम् ॥ गायन्मयूरभ्रमरंकूजत्कोकिलसारसम् ६ क्रीडिष्यमाणस्तत्कृष्णोभगवान्बलसंयुतः ॥ वेणुंविरणयन्गोपैर्गोधनैःसंवृतोऽविशत् ७ प्रवालबर्हस्तबकस्रग्धातुकृतभूषणाः ॥ रामकृष्णादयोगोपानट्टतुर्युयुधुर्जगुः ८ कृष्णस्यनृत्यतःकेचिज्जगुःकेचिदवादयन् ॥ वेणुंपाणितलैःशृंगैःप्रशशंसुरथापरे ९ गोपजातिप्रतिच्छन्नादेवागोपालरूपिणः ॥ ईडिरेकृष्णरामौचनटाइवनटंनृप १० भ्रामणैर्लंघनैःक्षेपैरास्फोटनविकर्षणैः ॥ चिक्रीडितुर्नियुद्धेनकाकपक्षधरावुभौ ११ क्वचिन्नृत्यत्सुचान्येषुगायकौवादकौस्वयम् ॥ शशंसतुर्महाराजसाधुसाध्वितिवादिनौ १२ क्वचिद्विल्वैःक्वचित्कुंभैःक्वचामलकमुष्टिभिः ॥ अस्पृश्यनेत्रबंधाद्यैःक्वचिन्मृगखगेहया १३ क्वचिच्चदर्दुरप्लावैर्विविधैरुपहासकैः ॥ क्वचित्तथांदोलिकयाकर्हिचिन्नृपचेष्टया १४ एवंतौलोकसिद्धाभिःक्रीडाभिश्चेरतुर्वने ॥ नद्याद्रिद्रोणिकुंजेषुपुलिनेषुसरस्सुच १५ पशूंश्चारयतोर्गोपैस्तद्वनेरामकृष्णयोः ॥ गोपरूपीप्रलंबोऽगादसुरस्तज्जिघांसया १६ तंविद्वानपिदाशार्होभगवान्सर्वदर्शनः ॥ अन्वमोदततत्सख्यंवधंतस्यविचिंतयन् १७ तत्रोपहूयगोपालान्कृष्णःप्राहविहारवित् ॥ हेगोपाविहरिष्यामोद्वंद्वीभूययथायथम् १८ तत्रचक्रुःपरिवृढौगोपारामजनार्दनौ ॥ कृष्णसंघट्टिनःकेचिद्गोपारामस्यचापरे १९

व्याकर्षणम् विकर्षणंनियुद्धेनमल्लयुद्धेन काकपक्षधरौअकृतचौलकेशधारिणौ त्रिवृत्कृतवेणीधारिणावित्यर्थः ११ १२ कुंभैःकुभफलैःवर्तुलाकारैःकुंभोलूखलकेक्कीवेकौशिकोगुरगुलःपुमानित्यमरः पृष्ठतोधावनात्स्पष्टुमशक्यंत्वंमांस्पृशेत्युक्त्वापुरतोलीलयाधावतीतियत्तदिदमस्पृश्यक्रीडनम् वस्त्रेणनेत्रमाच्छाद्यमांस्पृशेतिनिगद्यंतमुक्त्वापुरतोभ्रमणंनेत्रबंधलीला दूरांतरमदेशेस्थितंवृक्षंलक्षीकृत्योभाभ्यां प्राग्वृक्षस्यस्पर्शोविजयीस्यादितीयंक्रीडाधावनसंज्ञेत्यादिकमादिपदगृहीतम् १३ दर्दुरप्लावैःमंडूकवदुत्पतनैः १४ द्रोणीनिम्नसानुस्थलम् अंतर्लतानिबिडोहस्वादिकुंजः निकुंजकुंजौवाक्रीबेलतादि पिहितोदरेइत्यमरः १५ १६ १७ यस्ययोविहारस्तंवेत्तीति १८ परिवृढौनायकौ कृष्णसंघट्टिनःकृष्णपक्षीयाः १९

वाह्यवाहकत्वंविशदयति तत्रेति उवाहकृष्णोभगवानित्यत्रव्यत्ययेननेतव्यः श्रीदामाकृष्णमुवाहेति कृतएवंकिल्प्यते हरिवंशादिवचनात् तथाप्ययंदुराग्रहइतिनवक्तव्यं बहुमानविरोधेतुव्यत्यासःशब्दतोर्थतइत्यादिनिर्णयवचनात् २० २१ २२ २३ प्रलंबःकृष्णंविहायरामंवहत्तत्रकिंकारणमत्राह अविषह्यमिति २४ धरणिधरेंद्रःपर्वतराजस्तद्वद्गौरवंअतिभारवत्त्वंयस्यसतथातम् पुरटपरिच्छदःस्वर्णालंकारः तडिताद्द्युमताआदित्येनचसंयुक्तःतडिद्युमान् उडुपतिश्चंद्रःतद्वानंबुदइतीयमाशंकाअभूतोपमा यद्वा तडिद्द्युमान्तडितायुक्तोमेघस्थानेप्रलंबः तडित्स्थानेपुरटपरिच्छदः चंद्रस्थानीयोरामः २५ अंबरेचरामित्यलुक् २६ अथकृष्णस्तवानंतरंआगतस्मृतिः उपात्तमूलस्मरणः वज्ररंहसावज्रवेगेन २७ महारवंसमीरयन्व्यसुःगतप्राणः

आचेरुर्विविधाःक्रीडावाह्यवाहकलक्षणाः ॥ तत्रारोहंतिजेतारोवहंतिचपराजिताः २० वहंतोवाह्यमानाश्चचारयंतश्चगोधनम् ॥ भांडीरकंनामवटंजग्मुः कृष्णपुरोगमाः २१ रामसंघट्टिनोयेतुश्रीदामवृषभादयः ॥ क्रीडायांजयिनस्तांस्तानूहुःकृष्णादयोनृप २२ उवाहकृष्णोभगवान्श्रीदामानंपराजितः ॥ वृषभंभद्रसेनस्तुप्रलंबोरोहिणीसुतम् २३ अविषह्यंमन्यमानःकृष्णंदानवपुंगवः ॥ वहन्द्रुततरंप्रागादवरोहणतःपरम् २४ तमुद्वहन्धरणिधरेंद्रगौरवंमहासुरोविगतरयोनिजंवपुः ॥ सआस्थितःपुरटपरिच्छदोबभौतडिद्द्युमानुडुपतिमानिवांबुदः २५ निरीक्ष्यतद्वपुरलमंबरेचरंप्रदीप्तदृग्भ्रकुटितटोग्रदंष्ट्रकम् ॥ ज्वलच्छिखंकटककिरीटकुंडलत्विषाद्भुतंहलधरईषदत्रसत् २६ अथागतस्मृतिरभयोरिपुंबलोविहायसोर्ध्वंचहरंतमात्मनः ॥ रुषाहनच्छिरसिदृढेनमुष्टिनासुराधिपोगिरिमिववज्ररंहसा २७ सआहतःसपदिविशीर्णशीर्षकोमुखाद्वमन्रुधिरमपस्मृतोऽसुरः ॥ महारवंव्यसुरपतत्समीरयन्गिरिर्यथामघवताऽऽयुधाहतः २८ दृष्ट्वाप्रलंबंनिहतंबलेनबलशालिना ॥ गोपाःसुविस्मिताआसन्साधुसाध्विति रावि णः २९ आशिषोऽभिगृणंतस्तेप्रशशंसुस्तदर्हणम् ॥ प्रेत्यागतमिवाश्लिंग्यप्रेमविह्वलचेतसः ३० पापेप्रलंबेनिहतेदेवाःपरमनिर्वृताः ॥ अभ्यवर्षन्बलंमाल्यैःशशंसुःसाधुसाध्विति ३१ इतिश्रीभागवतेमहापुराणेदशमस्कंधेप्रलंबासुरवधोनामषोडशोऽध्यायः ॥ १६ ॥ श्रीशुकउवाच ॥ क्रीडासक्तेषुगोपेषुतद्गावोदूरचारिणीः ॥ स्वैरंचरंत्योविविशुस्तृणलोभेनगह्वरम् १ अजागावोमहिष्यश्चनिर्विशंत्योवनाद्वनम् ॥ मुंजाटवींनिविविशुःक्रंदंत्योदावतर्षिताः २ तेऽपश्यंतःपशून्गोपाःकृष्णरामादयस्तदा ॥ जातानुतापानविदुर्विचिन्वंतोगवांगतिम् ३ तृणैस्तत्खुरदच्छन्नैर्गोष्पदैरंकितैर्गवाम् ॥ मार्गमन्वगमन्सर्वेनष्टजीवाविचेतसः ४

२८ बलशालिनारामेण रावि णः वादिनः २९ ३० माल्यैःपुष्पैः ३१ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेविजयध्वजकृतटीकायांषोडशोऽध्यायः ॥ १६ ॥ स्वभक्तजनसंसारविनाशनहरेरेवंसुशकंनान्यस्येतिनिदर्शनायदावाग्निपानप्रकटितमाहात्म्यमस्यवक्तुमुपक्रमतेऽस्मिन्नध्याये तेषांगोपानांगावःदूरचारिणीःदूरगामिन्यःस्वैरंस्वेच्छयागह्वरंगंभीरकक्षं १ मुंजाटवींईषिकाटवींशराटवीं वा उभयंचप्रचुरंतत्रेत्यर्थः शरोगुंजइतीरितइतिहलायुधः दावेनतापेनतर्षिताःजलंपातुकामाः २ अपश्यंतः अनुतापःपश्चात्तापः विचिन्वंतःअन्वेषमाणाः ३ तासांगवांखुरैःदद्भिःदंतैश्छिन्नैरंकितैःभूतलैः नष्टजीवाःजीवन्मृताः विचेतसःइतोगताःअत्रगताइतिविविधबुद्धयः वैदैवेगतंचेतोयेषांतेतथा येदैवमेवचेतसावचसाचशरणंगच्छंतइत्यर्थः ४

भ्रष्टमार्गंमार्गंहित्वेतस्ततोगतं ततोमुंजाटव्याःसंन्यवर्त्तयन्गतमार्गमेवागंतुकामाभवन्नित्यर्थः ५ ततःकृष्णनाकमकारीतितत्राह ताइति प्रावनदुःप्रत्याक्राशचक्रुः ६ ससारस्तुसदादुः
खाकरइतिदर्शनार्थमेकदुःखशमनानंतरं दुःखांतरंवर्दति ततइति ततःगोदर्शनानंतरं धूमकेतुःअग्निःसारथिनावायुनासमीरितःप्रेरितोवर्धितः उल्बणोल्मुकैःक्रूरतरज्वालाभिःस्थिरजंग
मान् विलेलिहानःविशेषेणास्वादयन् ७ प्रपन्नाःशरणमितिशेषः ८ ९ नूनमिदानीं १० ११ १२ १३ योगमायानुभावितंस्वरूपसामर्थ्येनप्रभावितं अमरंजरामरणशून्यंनारायणं
मेनिरे १४ सायाह्नेसंध्याकाले १५ यथायावान्युगशतंकालः यासांगोपीनांयेनगोविंददर्शनेनविनाक्षणःकालस्तावानभवत् १६ किंतत्कर्मेतितत्राह दावाग्नेरिति चशब्दःसमुच्चये दावाग्नि

मुंजाटव्यांभ्रष्टमार्गंक्रंदमानाःस्वगोधनम् ॥ अप्राप्यतृषितायातास्ततस्तेसंन्यवर्तयन् ५ ताआहूताभगवतामेघगंभीरयागिरा ॥ स्वनाम्नांनिनदंश्रु
त्वाप्रतिनेदुःप्रहर्षिताः ६ ततःसमंताद्वनधूमकेतुर्यदृच्छयाभूत्क्षयकृद्वनौकसाम् ॥ समीरितःसारथिनोल्बणोल्मुकैर्विलोलिहानःस्थिरजंगमान्महान् ७ तमापतंतंपरितोदवाग्निंगोपाश्चगावःप्रसमीक्ष्यभीताः ॥ ऊचुःस्मकृष्णंसबलंप्रपन्नायथाहरिंमृत्युभयार्दिताजनाः ८ कृष्णकृष्णमहावीर्यहेरामामोघ
विक्रम ॥ दावाग्निनादह्यमानान्प्रपन्नांस्त्रातुमर्हथः ९ नूनंत्वद्बांधवाःकृष्णनचार्हंत्यवसीदितुम् ॥ वयंहिसर्वधर्मज्ञत्वन्नाथास्त्वत्परायणाः १० ॥ श्रीशुक
उवाच ॥ वचोनिशम्यकृपणंबंधूनांभगवान्हरिः ॥ निमीलयतमाभैष्टलोचनानीत्यभाषत ११ तथेतिमीलिताक्षेषुभगवानग्निमुल्बणम् ॥ पीत्वामुखे
नतान्कच्छ्राद्योगाधीशोऽयमोचयत् १२ ततश्चतेऽक्षीण्युन्मील्यपुनर्भांडीरमाश्रिताः ॥ निशम्यविस्मिताआसन्नात्मानंगाश्चमोचिताः १३ कृष्णस्ययो
गवीर्यंतद्योगमायानुभावितम् ॥ दावाग्नेर्गात्मनःक्षेमंवीक्ष्यतेमेनिरेऽमरम् १४ गाःसंनिवर्त्यसायाह्नेसहरामोजनार्दनः ॥ वेणुंविरणयन्गोष्ठमगाद्गोपै
रभिष्टुतः १५ गोपीनांपरमानंदआसीद्गोविंददर्शने ॥ क्षणंयथायुगशतंयासांयेनाविनाभवत् १६ ॥ श्रीशुकउवाच ॥ तयोस्तदद्भुतंकर्मदावाग्नेर्मोक्ष
मात्मनः ॥ गोपास्त्रीभ्यःसमाचख्युःप्रलंबवधमेवच १७ गोपद्वाश्चगोप्यश्चतदुपाकर्ण्यविस्मिताः ॥ मेनिरेदेवप्रवरौकृष्णरामौव्रजंगतौ १८ इति
श्रीभागवतेमहा०दश०सप्तदशोऽध्यायः ॥ १७ ॥ श्रीशुकउवाच ॥ ततःप्रावर्ततप्रावृट्सर्वसत्त्वसमुद्भवा ॥ विद्योतमानपरिधिर्विस्फूर्जितनभस्तला
१ सांद्रनीलांबुदैर्व्योमसविद्युत्स्तनयित्नुभिः ॥ अस्पष्टज्योतिराच्छन्नंब्रह्मेवसगुणंबभौ २

मोक्षंप्रलंबवधंचेतिद्वयमेवेत्यर्थः १७ एकश्चशब्दः समाहारे चोन्वाचयेसमाहारइतियादवः व्रजंगतौकृष्णरामौदेवप्रवरौमेनिरेइत्यन्वयः १८ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेविजयध्वजकृ
तटीकायांसप्तदशोऽध्यायः ॥ १७ ॥ नारायणभक्तिवैशद्यावैशद्यदृष्टांतत्वेनप्रावृड्ऋतुंवर्णयत्यस्मिन्नध्याये ततःग्रीष्मर्त्वनंतरं सर्वेषांसत्वानांस्थावरजंगमलक्षणानांपदार्थानांसमुद्भवोयस्यांसात
था सत्वं द्रव्येसत्तास्वभावयोरितियादवः विद्योतमानाः तडिदंतरेप्रकाशमानाः परिधयःपरिवेषायस्यांसातथा विस्फूर्जितंअशनिगर्जनोपेतंनभस्तलंयस्यांएवंविधाप्रावृट्प्रावर्त्ततइत्यन्वयः १ प्रावृडु
णांतरंदर्शयति सांद्रेति जलेनसांद्रनीलांबुदैराच्छन्नंव्योमनभोबभौ विद्युतास्तनयित्नुनागर्जितेनसहितैः अतएवास्पष्टसर्वज्योतिः परायणंज्योतिरेकंतंतमितिश्रुतिःकथमिवसगुणंचतुर्मुखाख्यंब्रह्मेव २

अष्टौमासानितिद्वितीयासप्तम्यर्थेकालाध्वनोरत्यंतसंयोगेतिसूत्रात् संवत्सरमधीते क्रोशंकुटिलानदीतिप्रयोगः उदमयंजलात्मकंवसुवस्तुभूम्यांविद्यमानं स्वगोभिःस्वरश्मिभिःपीतंताभिरेवमोक्तुंप्रारब्धवान्पर्जन्योगर्जन्मेघः अभिमन्यमानेनाभिमानीसवितालक्ष्यते पर्जन्योगर्जदभ्रेभ्रध्वनिशक्रेक्षयंत्रिकइति स्वगोभिरित्युक्तयासवितेतिगम्यते अग्रौप्रास्ताहुतिःसम्यगादित्यमुपतिष्ठते आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततःप्रजाइतिच ३ प्रचंडश्वसनवेपिताःकंपिताः जीवनंजीवनसाधनं करुणयंतीतिकरुणाः यद्वा कृष्णस्यकरुणाइव अनेनभक्तिसामग्रीमतांज्ञानांवुवर्षतिकृष्णकटाक्षाइति सूचितंभवति ४ ग्रीष्मेतमःकृशासूर्यतपनेनकार्श्यंगता देवेनसवित्रामीढासोचिता वर्षीयसीवृद्धाअपिवृद्धिंगता काइवकाम्यतपसःपुंसःतनुस्तत्फलंकाम्यतपःफलंप्राप्यसंपदावर्धते अनेनप्रवृत्तिप्रकारमार्गोदर्शितः ५ निशामुखेषुसंध्यासुसूर्यादिग्रहाःनभांति पापेनकर्मणा अनेनदुर्जनवृद्ध्यासज्जनाभिभवोदर्शितः ६ पर्जन्यनिनदंमंदगर्जन्मेघनादं प्राक्पूर्वं तूष्णींशयानाः मंडूकाः नियमोनाममौनेनजपादिकस्तस्यात्ययेअवसानेवेदाध्ययनशीलाभवंति अनेनविष्ण्वनुग्रहमाकांक्षमाणैःकालोवंध्योनकर्तव्यइतिदर्शितम् ७ ग्रीष्मेशुष्यतीःशोषंगच्छंत्यःक्षुद्रनद्यःफल्गुजलाः अनुग्रीष्मानंतरंवर्षासुउत्पथवाहिन्यःजलाभिवृद्ध्यातीरमुद्रिच्यस्यंदमानाबभूवुः अस्वतंत्रस्यविषयरागादिवशंगतस्यपुंसोदेहोवनितादिभोगेनवर्धते अनेनरजोगुणस्वभावःसूचितः ८ हरिभिः

अष्टौमासान्निपीतंयद्भूम्यामुदमयंवसु ॥ स्वगोभिर्मोक्तुमारेभेपर्जन्यःकालआगते ३ तडित्वंतोमहामेघाश्चंडश्वससनवेपिताः ॥ प्राणिनांजीवनंह्यंबुमुमुचुःकरुणाइव ४ तपःकृशादेवभीढाआसीद्वर्षीयसीमही ॥ तथैवकाम्यतपसस्तनुःसंप्राप्यतत्फलम् ५ निशामुखेषुखद्योतास्तमसाभांतिनग्रहाः ॥ यथापापेनपाखंडानहिवेदाःकलौयुगे ६ श्रुत्वापर्जन्यनिनदंमंडूकाव्यसृजन्गिरः ॥ तूष्णींशयानाःप्राग्यद्वद्ब्राह्मणानियमात्यये ७ आसन्नुत्पथवाहिन्यः क्षुद्रनद्योऽनुशुष्यतीः ॥ पुंसोयथाऽस्वतंत्रस्यदेहोद्रविणसंपदा ८ हरिताहरिभिःशष्पैरिंद्रगोपैश्चलोहिता ॥ उच्छिलींध्रकृतच्छायानृणांश्रीरिवभूरभूत् ९ क्षेत्राणिसस्यसंपद्भिःकर्षकाणांमुदंददुः ॥ मानिनामनुतापंवाविपत्तिंतदजानताम् १० जलस्थलौकसःसर्वेनववारिनिषेवया ॥ अबिभ्रन्रुचिरंरूपंयथाहरिनिषेवया ११

श्यामैःशष्पैःबालतृणैःहरिताश्यामला इंद्रगोपैःआषाढसमयेउत्पद्यमानैःजपाकुसुमवर्णैः कृमिविशेषैर्लोहितारक्ताच उत्कृष्टैःउत्पलैःशिलींध्रैःगुल्मविशेषपुष्पैःछत्राकैर्वा कृतच्छायाकृतशोभा भूनृणां श्रीरिवसंपदिवबहुविधाभूदित्यन्वयः अनेनभूमिवदेकएवचेतनोगुणविकारेणनानास्वभावमापन्नइवप्रतीयतइति संसारस्यासारत्वज्ञानेनहेयत्वेनहरौभक्तिःकर्तव्येतिसूच्यते ९ कर्षकाणामुल्लेखनादिक्रिययावर्त्तमानानांक्षेत्राणिकेदाराःसस्यानांसंपद्भिःफलोद्रेकाऽभिमुखलक्षणाभिर्मुदंददुः वाशब्दश्चार्थे तदजानतांकृषिक्रियाविशेषमजानतांमानिनां कृष्याद्यभिमानवतांपुंसांतान्येवक्षेत्राणि अतिवृष्ट्यनावृष्टिमेदुरसाम्याद्यभावादिनासस्यनाशेनविपत्तिमनुतापंचददुः पुनरुत्पत्तिनाशेनबीजंनष्टमित्यनुतापं इंद्रियाणिविषयजालादाकृष्यहरिचरणारविंदएवमनोनिदधतांक्षेत्राणिपुण्यस्थानानिसस्यसंपद्भिःज्ञानसमुद्रैकैःमुदंददति तान्येवपुण्यस्थानानितदजानतांस्नानादिक्रियाविशेषमबुध्यमानानांमानिनामहंकारिणांपुंसांअयोग्यानांविपत्तिदुःखलक्षणां बहुलवित्तव्ययेननकिमपिफलंप्राप्नुइत्यनुतापंचददतीत्यतोमुमुक्षुणास्वयंविचक्षणेभ्योवाश्रुत्वाज्ञात्वाहरिचरणसरोजेभक्तिःकर्तव्येतिसूचितम् १० जलौकसःपातालवासिनः स्थलौकसःभूलोकवासिनः किंच सर्वेअंतरिक्षादिलोकवासिनः सर्वेषांसंसारदुःखंनिवारयतीतिवारिज्ञानंनवंनिर्दोषंवारितस्यनितरांसेवयाऽभ्यासलक्षणयारुचिरंनिर्दोषंरूपमबिभ्रन्नाबिभ्रति कथंकारंजातया यथा यथावद्धरिनिषेवयाजातया ११

अपक्वयोगिनः अपक्वःपरिपाकमप्राप्तःयोगोस्यास्तीत्यपक्वयोगीतस्य गुणयुक्तरजोगुणयुक् यद्वा गुणेषुविषयेषुयुंक्तइति अतएवकामार्तं १२ नविव्यथुःनविलीनाबभूवुःकुतःगिरयःगिरणो द्विरणसमर्थत्वाद्व्यथाभावमात्रेनिदर्शनम् नतुबुद्धिमत्त्वविवक्षायाम अनेनसर्वसहनशक्तिर्हरिभक्तानामेवेतिदर्शितम् १३ असंश्रिताजनैरनाक्रांताः अनेनसच्छास्त्रांनिरंतरमभ्यसनीयंज्ञानो त्पत्तयेइतिव्यतिरेकनिदर्शनम् १४ चलसौहृदाश्चंचलस्वभावाः विद्युतःलोकोपकारित्वाल्लोकबंधुपुमेघेषुस्थैर्यंस्थिरास्थितिंनचक्रुःनापुरित्यन्वयः कामिन्यःगुणिषुविविधेषुपुरुषेषुइव यथा स्थैर्यंनकुर्वंतितथा विद्युद्वच्चंचलभक्तिर्नकर्त्तव्या किंतुपूर्ववत्स्थिराइतिभावः चलसौहृदाःचलस्नेहाःमानुषस्वभावोदर्शितइतिवा १५ गुणिनिशब्दगुणोपेते नीलिमगुणयुक्तेवा वियतिमहेंद्रस्यवि द्यमानंनिर्गुणंज्यारहितंधनुःअभात्भाति कथमिव गुणव्यतिकरेजगत्सर्जनेव्यक्तेप्रवृत्तेपुरुषोनारायणोयथागुणवान्सत्वादिगुणैःप्रवर्त्तमानोभाति सृष्टेःपूर्वनिर्गुणःसत्वादिगुणप्रवृत्तिशून्यःगुणवान् प्रशस्तज्ञानानंदादिगुणपूर्णोवा निर्गुणः देहरहितः गुणव्यतिकरेगुणवान्देहवान्पुरुषोहिरण्यगर्भोयथेतिवा १६ स्वपाज्योत्स्नयाराजितैःसंध्यारागंप्राप्तैर्घनैश्छन्नउडुपश्चंद्रः नरराजस्वरूपाभिव्यक्तिं नाप स्वभासास्वयंप्रकाशज्ञानेनभासितयाऽभिव्यक्तया अहंमत्याऽहंकाररूपया पुरुषःसंसारीयथाभिव्यक्तस्वरूपोनभवति भगवत्प्रसादानुगृहीतज्ञानलक्षणप्रकाशेनाभिव्यक्तस्वरूपःपुरुषःस्याद्यथा

सरिद्भिःसंगतःसिंधुश्चुक्षोभश्वसनोर्मिमान् ॥ अपक्वयोगिनश्चित्तंकामार्तंगुणयुग्यथा १२ गिरयोवर्षधाराभिर्हन्यमानानविव्यथुः ॥ अभिभूयमानाव्य सनैर्यथाधोक्षजचेतसः १३ मार्गाबभूवुःसंदिग्धास्तृणैश्छन्नाअसंश्रिताः ॥ नाभ्यस्यमानाःश्रुतयोद्विजैःकालहताइव १४ लोकाबंधुषुमेघेषुविद्युतश्चल सौहृदाः ॥ स्थैर्यंनचक्रुःकामिन्यःपुरुषेषुगुणिष्विव १५ धनुर्वियतिमाहेंद्रंनिर्गुणंचगुणिन्यभात् ॥ व्यक्तेगुणव्यतिकरेगुणवान्पुरुषोयथा १६ नरराजो डुपश्छन्नःस्वज्योत्स्नाराजितैर्घनैः ॥ अहंमत्याभासितयास्वभासापुरुषोयथा १७ मेवागमोत्सवाहृष्टाःप्रत्यनंदञ्छिखंडिनः ॥ गृहेषुतप्तानिर्विण्णायथा च्युतजनागमे १८ पीत्वापःपादपाःपद्भिरासन्नात्ममूर्त्तयः ॥ प्राक्क्षामास्तपसाश्रांतायथाकामानुसेवया १९ सरःस्वशांतरोधस्सुह्यूषुरंगापिसारसाः गृहेष्वशांतकृत्येषुग्राम्याइवदुराशयाः २० जलौघैर्निरभिद्यंतसेतवोवर्षतीश्वरे ॥ पाखंडवामश्रुतयोद्यैर्वेदमार्गाःकलौयुगे २१

तथाशरदादिलक्षणप्रकाशेनप्रकाशितमंडलश्चंद्रइतिसूचितंभवति १७ शिखंडिनोमयूराः मेघानामागमएवोत्सवः तेनहृष्टाः रोमांचत्वंप्राप्ताः कुटुंबभरणादिनातप्ताः सज्जनदर्शनाभावाद्भिन्नावा अतएवनिर्विण्णाःविरक्ताःसंसारहेयबुद्धियुक्ताः १८ पद्भिर्मूलैः फलैःपुष्पैःनम्रात्ममूर्तयः शाखोपशाखाभिर्नतस्वरूपाःग्रीष्मेतपसातपोमासोर्जिततापेनक्षामाःकृशाः यथाकामानामनुसेव याजातेनश्रमेणश्रांताःइंद्रियदौर्बल्यमाप्ताः प्राक्कुटुंबव्यवस्थायांक्षामाः पादेनग्रासेनआत्मानंपांतिरक्षंतीतिपादपाःतपस्विनःगतिसाधनत्वंत्पद्भिः शास्त्रैःअपुरुषार्थावाप्तिहेतुत्वात्ज्ञानरसान्पीत्वा स्वाद्यनम्रावरुद्धावशंकृतात्मनःपरमात्मनोमूर्तिर्विग्रहविशेषोयैस्तेतथेतिभावः यद्वाप्राक्क्षामावनिताद्यभावेनतपसाकामाग्नितापेनश्रांताजनाः कामानुसेवया पश्चादेववनितादिलाभेनानिरंतरकामभो गेनपुत्रतत्पुत्रपुष्पफलादिनानम्रात्ममूर्त्तयः परायणनिजशरीरायथाभवंतितथेति १९ अंगहेपरीक्षित् सारसाश्चक्रवाकाःअशांतानिजजैःपूर्णानिरोधांसितीराणियेशांतानितथा तेषुसरःस्वपि ऊषुर्हिजलप्रवाहाभिभूततीरवासस्याशक्यत्वेपितत्रैवोषुरित्यर्थः दुराशयाःग्राम्याःप्राकृतजनाःअशांतकृत्येषुअनुपरतकर्तव्येषुगृहेष्वेववयथावसंति अनेनानित्यसंसारिस्वभावोदर्शितः २० पाखंडादिमतज्ञा नेनरकसाधकमितिज्ञातव्यम् २१

वायुभिर्नुन्नाःप्रेरिताः अमृतंजलंद्विजैरीरिताःप्रेरिताः विट्पतयोराजानःविशःप्रजाउद्दिश्यकालेकालेकालगुणंज्ञात्वाऽमृतंहेमाविमुंचंति प्रयच्छंति अमृतंव्योम्निदेवान्नेयज्ञशेषेरसायने अयाचितंजलेदु ग्धेमोक्षेन्नेहेन्निगोरसइतियादवः यद्वाषष्ठमंशइतिब्राह्मणोक्तं विशोवैश्याविश्पतिभ्योराजभ्यःयथाकालमंमृतंकरात्मकंधनंददतीति २२ वर्षिष्ठंप्रभूतवर्षोपेतं २३ स्नुतस्तनीःक्षरितस्तन्यः २४ वनौकसोगाव मृगादयोवागुहाःददृशुरित्यन्वयः कथंभूताःप्रमुदिताःप्रकृष्टानंदाः वनेराजीराजनंयासांताःवनराज्यःमधुच्युतःमधुवन्मधुरंक्षीरंच्यवंतीतिमधुच्युतः गंभीरश्चासौसन्नादश्चगभीरसन्नादःते नसन्नादेनसहवर्तमानः यद्वावृष्ट्यभावसमयेमधुच्युतः वनराजीर्वनपंक्तीः ददृशुःवृष्टौसत्यांगुहादददृशुरिति वनौकसःकिरातावागिरेर्हेतोःसन्नादाराक्षसाःसन्नादाः भावप्रधानोनिर्देशःनष्टराक्षसत्वेन नादसहिताः २४ अभिवर्षतिसतिवनस्पतिक्रोडेगुहायांचैवनिर्विशन्उपभुंजानः २६ संभोजनीयैःसहभोक्तव्यैः २७ २८ आत्मशक्त्युपबृंहितांसंवर्धिताम् २९ व्यभ्राविगतमेघा स्वच्छांबुतस्य

व्यमुंचन्वायुभिर्नुन्नाभूतेभ्योह्यमृतंधनाः ॥ यथाविशोविट्पतयःकालेकालेद्विजेरिताः २२ एवंवनंतद्वर्षिष्ठंपक्वखर्जूरजंबुमत् ॥ गोगोपालैर्वृतोरंतुंसबलः प्राविशद्धरिः ॥ २३ धेनवोमंदगामिन्यऊधोभारेणभूयसा ॥ ययुर्भगवताहूताद्रुतंप्रीत्यास्नुतस्तनीः २४ वनौकसःप्रमुदितावनराजीर्मधुच्युतः ॥ गिरेर्गंभीरसन्नादसन्नादाददृशुर्गुहाः २५ ॥ क्वचिद्वनस्पतिक्रोडेगुहायांचाभिवर्षति ॥ निर्विशन्भगवान्रेमेकंदमूलफलाशनैः २६ दध्योदनमुपानीतंशिलायांसलिलांतिके ॥ संभोजनीयैर्बुभुजेगोपैःसंकर्षणान्वितः २७ शाद्वलोपरिसंविश्यसर्वतोमीलितेक्षणान् ॥ वृषान्वत्सान्वत्सतरान्गाश्चस्वोधोभरश्रमाः २८ प्रावृट्श्रियंहतांवीक्ष्यसर्वभूतमुदावहाम् ॥ भगवान्पूजयांचक्रे आत्मशक्त्युपबृंहिताम् २९ एवंनिवसतोस्तत्ररामकेशवयोर्व्रजे ॥ शरत्समभवद्व्यभ्रास्वच्छांबुसुषितानिला ३० शारद्यानीरजोत्पत्त्यानीराणिप्रकृतिंययुः ॥ भ्रष्टानामिवचेतांसिपुनर्योगनिषेवया ३१ व्योम्नोऽदमभ्रशाबल्यंभुवःपंकमपामलम् ॥ शरज्जहाराश्रमिणांकृष्णभक्तिर्यथाऽशुभम् ३२ सर्वस्वंजलदाहित्वाविरेजुःशुभ्रवर्चसः ॥ यथात्यक्तैषणाःशांतामुनयोमुक्तकल्मषाः ३३ गिरयोमुमुचुस्तोयंक्वचिन्नमुमुचुःशिवम् ॥ यथाज्ञानामृतंकालेज्ञानिनोददतेनवा ३४ नैवाविंदन्क्षीयमाणंजलंगाधजलेचराः॥ यथायुरन्वहंक्षय्यंनरामूढाः कुटुंबिनः ३५

विसुषितेनविसुषाबिदुनायुतःअनिलःस्वच्छांबुसुषितानिलःसयस्यांसातथा ३० शारद्याशरत्संबंधिन्यानीरजानांपद्मानांउत्पत्त्या प्रकृतिंस्वच्छतां योगभ्रष्टानांपुनर्योगनिषेवयायोगाभ्यासेन ३१ शरद्व्योम्नःअब्दं अर्थिभ्योजलस्यदातारंमेघंजहार वर्षाकालोविरतइत्यर्थः ततोभ्रशाबल्यंअभ्रंजलंदधत्मेघःनतुवर्षणंकुर्वंत्तान्निमित्तंशाबल्यंव्योम्नःनिःस्रवणंजहार अभ्रच्छायाभावात् भुवःपंकंकर्दमंअपांमलंकालुष्यंचअहरत् तत्तदाश्रमोक्तानुष्ठानंयथावत्स्थितिसूचनायाश्रमिणामित्युक्तं अशुभंपातकम् ३२ सर्वस्वंजलं शुभ्रवर्चसःधवलवर्णाःत्यक्ताःपुत्रादिदुष्टैषणायैस्तेतथा ३३ शिवंजलं जान्वानूपानूपस्थलभेदाभिप्रायेण निरीक्षणांजनमाक्षामोक्षौज्ञानिनाम् ज्ञानदानादानेयोग्यायोग्यमुहुर्तामुहुर्त्तकालभेदविवक्षयेतिज्ञातव्यं ३४ गाधजलेचराःअल्पजलनिवासिनोमत्स्यादयः प्राणिनः क्षीयमाणं शुष्यमाणंजलंदृष्ट्वासुखंनैवाविंदन् अन्वहंक्षय्यंक्षीयमाणंअंतंगच्छदायुःअनेनसंसारस्यानित्यत्वेनअसारत्वंसंसूचितवान् ३५

शरदर्कःशरदृतुसंबंधीसूर्यःतस्माज्जातःशरदर्कजःतं । कुटुंबसंबद्धंतापम् ३६ वीरुधः आसन् अंकुरिताः । अनात्मन्यात्मरक्तपुजडाध्वत्यर्थः ३७ उपरतउपरतावषयव्यापार आत्मानमन सि यद्वाउपेशर्वाधिपेहरौरतेसति उपरतागमः निवृत्तशास्त्रश्रवणादिकः समाधिस्थइत्यर्थः ३८ केदारेभ्यःकेदारार्थमाणैरिंद्रियैःतेषामिंद्रियाणांनिरोधेनप्रत्याहारेण ३९ अहंदेहइतिदेहाभि मानोदेहविषयंज्ञानंतस्माज्जातंदेहाभिमानजंतापम् । बोधआत्मज्ञानम् मुकुंदोयथेतिशेषः दृष्टांतद्वयम् ४० खमाकाशंशरदाविमलानेविशदानितारकाणियस्मिंस्तथा । सत्वेनव्यवसायेनयु क्तंसत्वगुणोपेतंवा शब्दात्मकंब्रह्मवेदस्तस्यमुख्यवाच्यःश्रीनारायणस्तंदर्शयतीतिशब्दब्रह्मार्थदर्शनम् शब्दब्रह्महिरण्यगर्भःतस्यार्थोहेतुःकारणमितिवा ४१ अखंडमंडलंपूर्णमंडलम् ४२ मारुतं शरदमितिशेषःअर्कजनितंतापं गोप्यःकामार्कजनितंतापंनजहुः । तत्रनिमित्तं कृष्णाहृतचेतसःकृष्णेनाहृतंचेतोयासांतास्तथा ४३ पुष्पिण्यःगर्भिण्यःऋषभैरितिपाठः वृषभैरितिपाठेमातृस

गाधवारिचरास्तापमविदञ्छरदर्कजम् ॥ यथादरिद्रःकृपणःकुटुंब्यविजितेंद्रियः ३६ शनैःशनैर्जहुःपंकंस्थलान्यासंश्चवीरुधः ॥ यथाहंममतांधीराःशरी रादिष्वनात्मसु ३७ निश्चलांवुरमूत्तूष्णींसमुद्रःशरदागमे ॥ आत्मन्युपरतेयद्वन्मुनिर्व्युपरतागमः ३८ केदारेभ्यस्त्वपोगृह्णन्कर्षकाद्दृढसेतुभिः ॥ यथा प्राणैःस्वविज्ञानंतन्निरोधेनयोगिनः ३९ शरदर्कांशुजंतापंभूतानामुडुपोऽहरत् ॥ देहाभिमानजंबोधोमुकुंदोव्रजयोषिताम् ४० खमशोभतनिर्मेघंशर द्विमलतारकम् ॥ सत्त्वयुक्तंयथाचित्तंशब्दब्रह्मार्थदर्शनम् ४१ अखंडमंडलव्योम्निरराजोडुगणैःशशी ॥ यथायदुपतिःकृष्णोवृष्णिचक्रैर्वृतोभुवि ४२ आश्लिष्यसमशीतोष्णंप्रसूनवनमारुतम् ॥ जनास्तापंजहुर्गोप्योनकृष्णाहृतचेतसः ४३ गावोमृगाःखगानार्यःपुष्पिण्यःशरदाभवन् ॥ अन्वीयमाना ऋषभैःफलैरीषत्क्रियाइव ४४ उदहृष्यन्वारिजानिसूर्येणकुमुदंविना ॥ राज्ञातुनिर्भयोलोकोयथादस्यून्विनानृप ४५ पुरग्रामेष्वाश्रमिणामिंद्रयागम होत्सवैः ॥ बभौभूःपक्वसस्याढ्याकलाभ्यांनितरांहरेः ४६ वणिजोनगरात्स्वीयान्निर्गम्यार्थान्प्रपेदिरे ॥ वर्षरुद्धायथासिद्धाःस्वपिंडान्कालआगते ४७ इतिश्रीभागवतेमहापुराणेदशमस्कंधेअष्टदशोऽध्यायः ॥ १८ ॥

होडरीविवेकज्ञानशून्यत्वात्तथोक्तामित्यर्थःफलैर्बीजैरन्वीयमानाःउप्यमानाःईषत्क्रियाःशनैःक्रियमाणाःकृषिक्रियाइवफलैःस्वर्गादिलक्षणैःअनुगताईषक्रियाऊनातिरेकपरिहारार्थाःविलंबमानयागक्रिया इव लाभनिष्पत्तिभोगेषुबीजेफलधनेफलइतिवा ४४ ४५ इंद्रयागमहोत्सवैःइंद्रदेवत्याग्रायणेष्टिलक्षणोत्सवैःहरेःकलाभ्यांनितरांबभौ आश्रमिणांअग्निमतांगृहस्थमात्राणांवा ४६ प्रावृषिवर्षेणरुद्धाःशरदि स्वीयान्नगरात्पत्तनान्निर्गत्यार्थान्देयादेयविषयान्प्रपेदिरे वर्षेणाब्देनतल्लक्षितंकालेनेत्यर्थः रुद्धाःसाधनसामग्रीसंपत्तिपर्यंतकालेनप्रतिबद्धाःसिद्धाः मंत्रौषधतपःसंपन्नाःपुरुषाःकालेफलदानाभिमुखलक्ष णेआगतेआसन्नेस्वीयान्नगरात्स्वत्वेनाभिमतादेहान्निर्गत्यस्वपिंडान्निजफलानुभवयोग्यान्देहान्यथाप्रपद्यंतइत्यन्वयः वर्षोस्त्रीभारताद्यंबुवृष्टिपुप्रावृषिस्त्रियामितियादवः ४७ इतिश्रीभागवतेमहापुराणेवि जयध्वजकृतटीकायांअष्टादशोऽध्यायः ॥ १८ ॥

स्वयोग्यतानुसारेणहरौज्ञानसाधनंभक्तिःकर्तव्येत्यभिप्रैत्यस्मिन्नध्याये तत्रगोपस्त्रीणांकृष्णेस्नेहातिशयंवक्तुमुपक्रमते इत्थंशरत्स्वच्छजलमित्यादिना पद्माकराणांसुगंधोस्यास्तीतिपद्माकरसुगंधीते न वायुनावीतंपरिवृतंइत्थमुक्तविधिना शरदास्वच्छंनिर्मलंजलंयस्मिंस्तत्तथा अनेनवायोःशैत्यंसूचितं न्यविशत्वनमितिशेषः नेर्विशइतिसूत्रेणलौकिकस्यात्मनेपदविधानंनतुछांदसस्य अच्युत इत्यनेनवनक्रीडाद्यभावेपिसुखच्युतिर्नास्तीतिसूचयति १ अत्रवनशब्देनवृक्षसमुच्चयउच्यतेकुसुमिताःपुष्पितोपेताःवनराजयःवृक्षपंक्तयोयास्मिंस्तत्तथा शुष्मिभिर्मत्तैःस्वजातिश्रेष्ठैर्वा भृंगैर्द्विजगणैः पक्षिगणैश्चघुष्टानिशब्दितानिसरांसिअखाततटाकाः सरितःस्यंदमानानद्यःमहीध्राःपर्वतायस्मिंस्तत्तथा मधुपतिर्माधवःएवंविधंवनमवगाह्यवेणुंचुकूजेत्यन्वयःकूजनंसुरतमंत्रणंकामवर्धनं सीत्कारोद्रवं श्रोत्रीणांगोपीनांकर्षणार्थमेवमुक्तं २ महः कामःतस्योदयःअंकुरीभावःयस्मात्तन्महोदयं स्मरोदयमितिकेचित्पठंतितद्वेणुगीतमाश्रित्यकाश्चिद्व्रजास्त्रियःपरोक्षंकासांचिददृष्टश्रुतंकृष्णस्यचरितं स्वसखीभ्योन्यवेदयन्नित्यन्वयः ३ वर्णयितुंकीर्तयितुं ४ हरेस्तदाकारदर्शनंचसुखहेतुरितिभावेनतस्यस्वरूपप्रकारंवक्ति बर्हापीडमित्यादिना बर्हंपिच्छमेवापीडंशेखरोत्तंसंयस्मिन्तत् । नटवत्वर वपुःशुभाकारं बिभ्रदितिप्रत्येकंसंबंधयितव्यं स्वपदेनस्वपादेनरमतइतिरमणंरमयत् रंध्रान्सुषिराणि ५ बर्हमेवापिच्छोयस्यसतथा वनचरवपुःकिराताकारइवाकारोयस्यसतथा शुभाकारेतनौवपु

श्रीशुकउवाच ॥ इत्थंशरत्स्वच्छजलंपद्माकरसुगंधिना ॥ न्यविशद्वायुनावीतंसगोगोपालकोऽच्युतः १ कुसुमितवनराजिशुष्मिभृंगद्विजकुलघुष्टसरः सरिन्महीध्रम् ॥ मधुपतिरवगाह्यचारयन्गाःसहपशुपालबलश्चुकूजवेणुम् २ तद्व्रजस्त्रियआश्रुत्यवेणुगीतंमहोदयम् ॥ काश्चित्परोक्षंकृष्णस्यस्वसखीभ्योन्ववेदयन् ३ तद्वर्णयितुमारब्धाःस्मरंत्यःकृष्णचेष्टितम् ॥ नाशकन्स्मरवेगेनविक्षिप्तमनसोनृप ४ बर्हापीडंनटवरवपुःकर्णयोःकर्णिकारंबिभ्रद्वासःकनककपिशंवैजयंतींचमालाम् ॥ रंध्रान्वेणोरधरसुधयापूरयन्गोपवृंदैर्वृंदारण्यंस्वपदरमणंप्राविशद्गीतकीर्तिः ५ बर्हापिच्छोवनचरवपुःकर्णयोःकर्णिकारःसव्येबाहौनिहितवदनःसज्जमन्यत्रहस्ते ॥ भ्रूविन्यासांगुलिभिरणयन्गापयन्गोपवृंदान्भूतग्रामंतर्हिरमयन्ब्रह्मगांधर्वमेव ६ इतिवेणुरवंराजन्सर्वभूतमनोहरम् ॥ श्रुत्वाव्रजस्त्रियःसर्वावर्णयंत्योभिरेभिरे ७ गोप्यऊचुः ॥ अक्षण्वतांफलमिदंनपरंविदामःसख्यःपशूनभिनिवेशयतोर्वयस्यैः ॥ वक्त्रंव्रजेशसुतयोरनुवेणुजुष्टंयैर्यैर्निपीतमनुरक्तकटाक्षमोक्षम् ८

रीतिच वनचरागोपावा कर्णयोःकर्णिकारइत्येकंपदं कंठेकालइतिवत् भ्रूवोर्विन्यासःभ्रूभंगाविशेषःतेनसहांगुलीभिःअन्यत्रहस्तेसज्जंसक्तंरणयन्वेणुमितिशेषः अंगुलीभीरणयन्नितिवक्तव्येह्रस्वत्वंछंदोभंगभयात्कृतं गांधर्वब्रह्मैवभरतशास्त्रोक्तप्रकारमेव गोपवृंदान्गापयन्नितिद्विकर्मकोऽयंधातुः भूतग्रामंप्राणिसमूहंरमयन्वृंदावनंप्राविशदितिपूर्वेणान्वयः ६ अभिरेभिरेइत्यत्रयारातिःसामुख्यतः श्रियएवतद्वीतरसाविशेषज्ञत्वात्तदन्यासांतदभावात्तस्मादौपचारिकमभिरमणं तदुक्तं श्रीदेवीवेणुमाश्रित्यरेमेकृष्णमुखांबुजेइत्यादि सुराइतरभांडगाइत्यत्रइतरभांडानिवेणुमंतरेणान्यभूषणानिगताआविष्टाइत्यर्थः इतरेषांरामादीनांवा वेणुमूलेधनेपात्रेभांडंभूषाश्चभूषयोरितियादवः वनचरागोपावा ७ गोपस्त्रीणांवर्णनप्रकारंदर्शयति अक्षण्वतामित्यादिना यैर्यैर्व्रजेशसुतयोःरामकृष्णयोर्वक्त्रंनितरांपीतंदृष्टिभिरितिशेषः तेषांतेषामक्षण्वतांचक्षुष्मतांचक्षुषामिदंफलंलाभंविदामोनपरंनान्यत्फलं अन्यस्यनरकदुःखफलहेतुत्वात् हेसख्यःकीदृशयोर्वयस्यैःपशूनभिनिवेशयतोःअनुसंध्यंगोष्ठइतिशेषः अनुवेणोःपश्चाद्भागेजुष्टंचुंबितंअनुरक्तःस्निग्धःकटाक्षमोक्षोयस्मिंस्तत्तथा ८

चूतस्यप्रवालादिभिः अनुरक्तपरिधानेनविचित्रःनानाविधःवेषोयस्यारतातथा अनुरक्तअनुरागोऽस्त पशुपालगोष्ठस्था गोपगोष्ठस्यामध्य गवांसमीपःसवातागोष्ठयशालायकथ्यतइत्युत्पलमाला क चक्रचित्रस्थलेगायमानौतिष्ठतइतिशेषः ९ हेगोप्यःअयंवेणुःकिंकुशलंतपोलक्षणंआचरत् स्मेतिस्मरणंकर्तव्यंकिमप्यस्तीतिवृत्तंपूर्वजन्मनिचीर्णंवा स्मृतौवृत्ते निषेधेस्मेतिच योवेणुःदामोदरस्याधरोष्ठः सएवसुधातयासरसंसरागमग्र्यंगेयंयस्मिन्सःसरागमग्र्यगेयः तंरसंभुंक्तेआस्वादयति सदर्भाःदर्भाकुरैःसहिताःतरवःहृष्टत्वचः अस्मद्वंश्योयमितिरोमांचितसर्वगात्राःयेनवेणुनापीतावशिष्टोयोरसःत स्यौघःप्रवाहोयस्मिन्सयदवशिष्टसारसौघः तस्मिन्मार्गेकृष्णेनसंचारितेऽध्वनि अश्रुआनंदजलंमुमुचुरित्यन्वयः सदर्भाः सकुशावा १० भुवोभूमेःहेसखियद्वृंदावनंदेवकीसुतस्यपादांबुजाभ्यांलब्धा लक्ष्मीःश्रीर्येनतत्देवकीसुतपदांबुजलब्धलक्ष्मि लक्ष्मेतिकेचित् लक्ष्मचिह्नंगोविंदस्यवेणुमनुवेणुस्वरानुकूलमेघनादशंकयावेणुस्वरानुकारेणवामत्तानांमयूराणांनृत्यंदृष्ट्वा आहताःसादराश्चअनुकूलंचरि तंयेषांतेतथा कृष्णचरितानुकूलचरिताश्चान्येमनुष्यविजातीयाःसमस्ताःसत्वाजंतवोयस्मिंस्तदाहतानुचरितान्यसमस्तसत्वं सत्वोऽस्त्रीतिवचनात्पुल्लिंगोप्ययंदन्दः आहतौसादरार्चितावितिच ११

चूतप्रवालबर्हस्तबकोत्पलाब्जमालानुरक्तपरिधानविचित्रवेषौ ॥ मध्येविरेजतुरलंपशुपालगोष्ठ्यां रंगेयथानटवरौक्वचगायमानौ ९ गोप्यःकिमाचरदयंकुशलंस्मवेणुर्दामोदराधरसुधासरसाग्र्यगेयम् ॥ भुंक्तेस्वयंयदवशिष्टरसौघमार्गेहृष्टत्वचोऽश्रुमुमुचुस्तरवःसदर्भाः १० वृंदावनंसखिभुवोवितनोति कीर्तिंयद्देवकीसुतपदांबुजलब्धलक्ष्मि ॥ गोविंदवेणुमनुमत्तमयूरनृत्यंप्रेक्ष्यादृतानुचरितान्यसमस्तसत्वम् ११ धन्याःसुमूढमतयोपिहरिण्यएतायन्नंदनंदनमुपात्तविचित्रवेषम् ॥ आपीयवेणुरचितंचसकृष्णसाराःपूजांदधुर्विरचितांप्रणयावलोकैः १२ कृष्णंनिरीक्ष्यवनितोत्सवरूपसारंश्रुत्वाचतत्क्वणित वेणुविचित्रगीतम् ॥ देव्योविमानगतयःस्मरनुन्नसाराश्चश्यत्प्रसूनकबरामुमुहुर्विनीव्यः १३ गावश्चकृष्णमुखनिर्गतवेणुगीतंपीयूषमुत्तभितकर्णपुटैःपि बंत्यः ॥ सानंदनम्रतनवःकवलाःस्मतस्थुर्गोविंदमात्मनिदृशाश्रुकणान्स्रवंत्यः १४ प्रायोबतांबमुनयोविहगावनेस्मिन्कृष्णेक्षणास्तदुदितंकलवेणुगीतम् आरुह्ययेद्रुमभुजान्रुचिरप्रवालान्शृण्वंत्यमीलितदृशोविगतान्यवाचः १५

सुष्ठुमूढाविवेकरहितामतिर्यासांतास्तथा कृष्णसारानुसारेणपुंमृगेण कांतमृगेणवासहिताःनंदस्यनंदनं वेणोराचितंनिःसृतंस्वरंचापीयास्वाद्यप्रणयेनसहितैःअवलोकनैःदर्शनैःउन्नतमस्तकत्वाद्धुरि ति १२ वनितानामुत्सवभूतंरूपसारंस्थिरसौंदर्यंयस्यसतथातं तत्सौंदर्येचस्वभावेचेति सारोबलेस्थिरांशेचेतियादवः तेनक्वणितात्वातेनशब्दिताद्वेणोर्वितंनिर्गतंचित्रंसप्तस्वरामिश्रगीतं वीगता वितिधातुः चित्रमाश्चर्यलेखयोरितियादवः देव्योदेवस्त्रियःस्मरेणनुन्नंनष्टंसारोधैर्यंयासांतास्तथाश्रश्यत्प्रसूनकबराःविगलितपुष्पकेशभराः विगताःस्रस्ताःनीव्यःवस्त्राणवस्त्रग्रंथयोवायासांतास्त था नीवीवस्त्रांशुकग्रंथ्योरितिच १३ उत्तभितकर्णपुटैःनिश्चलकर्णरंध्रभागै :कवलाःकवलसहिताः गोविंदमात्मनिहृदिस्मरंत्यःदृशानेत्रेणअश्रुबिंदून्स्रवंत्यः शावस्नुतस्तनपयःकवलाइतिकेचित् शावावत्साः तेषांस्मरणेनस्नुताः संस्रुताःक्षीराणिकवलाःशष्पग्रासाःयासांतास्तथा तस्थुरित्यन्वयः कवलाःआसांसंतीतिकवलाः अर्शआद्यच् आजाद्यतष्टाबितिटाप्प्रत्ययेकृतेकवलेतिरूपं सिद्धंभवति जायाशब्दवदितिवा १४ विगतास्त्यक्ताःस्वजातिसिद्धावाचोयैस्तेविगतान्यवाचोधृतमौनाइत्यर्थःबतआश्चर्यमिदं हेअंबपक्षिणांमुनीनांचमौनत्वसामान्यादेवमुच्यते १५

यद्यदामुकुंदेनगीतंतदातदुपधार्यतद्ध्यवधार्य आवर्तेनांभसांभ्रमेणलक्षितेनमनोभवेनकामेनभग्नोवेगोयासांतास्तथा ऊर्मयएवभुजाःआलिंगनेनस्पर्शलक्षणेनप्रमुदिताऊर्मिभुजाः आलिंगनप्रमुदितो र्मिभुजाःतैःकमलमेवोपहारोयासांतास्तथा १६ अंबुदःश्यामवर्णसाम्यात्सख्युःमुरारेःस्ववपुषातपत्रंव्यधात् कुसुमावलीभिःनंदनवनपुष्पराजिभिःसह यद्वा जलकणानिकरैःसह पुष्पंमेघपुष्पमित्य भिधानात् प्रेम्णाप्रवृद्धंसमुद्रिक्तंहृषितंहर्षणंरोमांचलक्षणंयस्यसतथा अभिमान्यपेक्षयैतत् १७ पुलिंद्यःशबरस्त्रियःतस्मात्कामादुत्पन्नमार्धिमनोदुःखंजहुरित्यन्वयः कीदृशाःपूर्णाःकृतकृत्याःतस्य कृष्णस्यदर्शनेनजातस्मरएवरुक्रोगोयासांताः क्रीडासमयेतृणेषुरूषितेनादिग्धेनदयितायाःप्रियतमायाः गोप्यास्तनमंडितेनस्तनयोःघट्टितेनउरुगायस्यहरेःपादाब्जयोःस्वतःअरुणयोरपिरागज ननार्थंलिप्तेनश्रीमताकुंकुमेनाननकुचेषुलिंपंत्यइति १८ हंतआश्चर्यं अयमद्रिर्गोवर्धनोहरिदासवर्यःभगवद्भक्तश्रेष्ठः कुतः ययोःरामकृष्णयोश्चरणस्पर्शादाविर्भूतप्रमोदोयोऽद्रिःसहगोगणयोस्तयोः पानीयादिभिःमानंपूजांतनोति यद्यस्मादिदमेवहिभक्तश्रेष्ठत्वम् सुयवसंशोभनोग्रासःदैर्घ्यंछादसम् सूयवसाद्गवतीहीतिदर्शनात् कंदरंगुहाग्रहम् वृष्टौस्थातुंयोग्यम् कंदंसूरणम् मूलंअकंडूयमानंदीर्घा

नद्यरतदातदुपधार्यमुकुंदगीतमावर्तलक्षितमनोभवभग्नवेगाः ॥ आलिंगनप्रमुदितोर्मिभुजैर्मुरारेर्गृह्णंतिपादयुगलंकमलोपहाराः १६ दृष्ट्वातपेव्रजपशू न्सहरामगोपैःसंचारयंतमनुवेणुमुदीरयंतम् ॥ प्रेमप्रवृद्धहृषितःकुसुमावलीभिःसख्युर्व्यधात्स्ववपुषांऽबुदआतपत्रम् १७ पूर्णाःपुलिंद्यउरुगायपदाब्ज रागश्रीकुंकुमेनदयितास्तनमंडितेन ॥ तद्दर्शनस्मररुजस्तृणरूषितेनलिंपंत्यआननकुचेषुजहुस्तदाधिम् १८ हंतायमद्रिरबलाहरिदासवर्योयद्रामकृ ष्णचरणस्पर्शप्रमोदः ॥ मानंतनोतिसहगोगणयोस्तयोर्यत्पानीयसूयवसकंदरकंदमूलैः १९ गागोपकैरनुवनंनयतोरुदारवेणुस्वनैःकलपदैस्तनुभृत्सु सख्यम् ॥ अस्पंदनंगतिमतांपुलकंतरूणांनिर्योगपाशकृतलक्षणयोर्विचित्रम् २० एवंविधाभगवतोयावृंदावनचारिणः ॥ वर्णयंतोमिथोगोप्यःक्रीडास्त न्मयतांययुः २१ इतिश्रीभागवतेमहापुराणेदशमस्कंधेवेणुगीतवर्णनंनामैकोनविंशोध्यायः ॥ १९ ॥ श्रीशुकउवाच ॥ हेमंतेप्रथमेमासिनंदव्रजकुमारिकाः ॥ चेरुर्हविष्यंभुंजानाःकात्यायन्यर्चनव्रतम् १ आप्लुत्यांभसिकालिंद्याजलांतेचोदितेरुणे ॥ कृत्वाप्रतिकृतिंदेवीमानर्चुर्नृपसैकतीम् २

कारंकंदम् १९ गोपकैःसहानुवनंगाःनयतोःसंचारयतोःतनुभृत्सुशरीरिषुजंतुषुसख्यंविचित्रमिदंचितमपिचित्रम् किंतदिति कलपदैरुदारवेणुस्वनैः विवशानांगतिमतांजंगमानाम् अस्पंदनंस्थावरधा र्मभजनम् तरूणांस्थावराणाम् पुलकंजंगमधर्मरोमांचभजनंविचित्रंपश्यतेतिशेषः कथमेतद्युज्यतइतितत्राह निर्योगेति नितरांयोगपाशेनयोगशक्तिलक्षणपाशेनकृतंलक्षणंअस्पंदनस्पंदमानाख्यंयये स्तौतयोः यद्वा निर्योगपाशःक्षेपणाख्यःतेनकृतंयोगचिह्नंययोः २० वृंदावनचारिणोहरेरेवंविधाःयाःक्रीडास्तास्ताःमिथोवर्णयंत्योगोप्यः तन्मयतांतत्स्वामितांययुरित्यन्वयः २१ ॥ इतिश्रीभाग वतेमहापुराणेदशमस्कंधेविजयध्वजकृतटीकायांएकोनविंशोऽध्यायः ॥ १९ ॥ भक्तिरेवभगवत्प्रसादजननीतिदर्शयितुंगोपकुमारीणांकृष्णेभक्तिंनिरूपयत्यस्मिन्नध्याये तत्रतासांहरेःसर्वकार्याणामंतरंगं कात्यायनीतितदर्चनव्रतकरणेनश्रीकृष्णःप्रसन्नोभवतीतितदर्चनाविधिंकथयति हेमंतइति कार्तिकमार्गशीर्षमासौहेमंतऋतुः तत्रप्रथमेमासिकार्तिकमासे व्रतनियमम् १ कालिंद्याःयमुनायाःजलांते जलसमीपे चशब्दएवार्थः उदितेअरुणेअरुणोदयएव सैकतींसिकतानिर्मितांप्रतिमामानर्चुःपूजांचक्रुः २

बलिभिःपरिवारदेवताविषयपूजाभिः ३ कात्यायनिकृत्यानामुन्मादके महतीमायामाहात्म्यंयस्यांसातथा तस्याःसंबुद्धिः महामायेमहान्योगउपायोऽस्याअस्तीतिमहायोगिनी तत्संबोधनंमहायोगिनि अधिगतेश्वरितेतुम्यंनमोस्तु ४ इतिसमाप्तं एवंप्रकारंवा उपसिद्राह्येमुहूर्ते ५ ६ नंदस्तुपाभूयाःस्मइत्येवंसंकल्प्यनदीमागत्यनदींप्राप्य भूयात्नंदसुतःपतिरित्यपिपाठः ७ योगेश्वरेश्वरइत्यनेनदूरश्रवणदर्शनादिशक्तिःसूच्यतेतासांकर्मसिद्धयेसंकल्पव्रतसिद्धचर्थं ८ नीपमजुनं परितोहासोयस्मिन्तद्वचनंपरिहासम् ९ १० ११ क्ष्वेलितंसिंहवन्नादितं परिहासेनोदितंवां नानिर्ययुः जलादितिशेषः

गंधैर्माल्यैःसुरभिभिर्बलिभिर्धूपदीपकैः ॥ उच्चावचैश्चोपचारैःप्रवालफलतंदुलैः ३ कात्यायनिमहामायेमहायोगिन्यधीश्वरि ॥ नंदगोपसुतंदेविपतिं मेकुरुतेनमः ४ इतिमंत्रंजपंत्यस्ताःपूजांचक्रुःकुमारिकाः ॥ उषस्युत्थेत्यताःस्वैरमन्योन्याबद्धबाहवः ५ कृष्णमुच्चैर्जगुर्यांत्यःकालिंद्यांस्नातुमन्वहम् ॥ एवंमासव्रतंचेरुःकुमार्यःकृष्णचेतसः ६ भद्रकालीसमानर्चुर्भूयांनंदसुपाइति ॥ नदींकदाचिदागत्यतीरेनिक्षिप्यपूर्ववत् ॥ वासांसिकृष्णंगायंत्यो विजह्रुःसलिलेमुदा ७ भगवांस्तदभिप्रेत्यकृष्णोयोगेश्वरेश्वरः ॥ वयस्यैरागतस्तत्रवृतस्तत्कर्मसिद्धये ८ तासांवासांस्युपादायनीपमारुह्यसत्वरः ॥ हसद्भिःप्रहसन्बालैःपरिहासमुवाचह ९ अत्रागत्यबलाःकामंस्वंस्वंवासःप्रगृह्यताम् ॥ सत्यंब्रवाणिनोनर्मयद्यूयंव्रतकर्शिताः १० नमयोदितपूर्वंवैअनृतं तदिमेविदुः ॥ एकैकशःप्रतीच्छंतुसहैवोतसुमध्यमाः ११ तस्यतत्क्ष्वेलितंदृष्ट्वागोप्यःप्रेमपरिप्लुताः ॥ व्रीडिताःप्रेक्ष्यचान्योन्यंजातहासाननिर्ययुः १२ एवंब्रुवतिगोविंदेनर्मणाक्षिप्तचेतसः ॥ आकंठमग्नाःशीतोदेवेपमानास्तमब्रुवन् १३ मानयंत्योवयंत्वांतुनंदराजसुतंप्रियम् ॥ जानीमोऽगव्रजश्लाघ्यंदेहि वासांसिवेपिताः १४ श्यामसुंदरतेदास्यःकरवामतवोदितम् ॥ देहिवासांसिधर्मज्ञवेपितानांमहाबल ॥ शीतार्दितानांबालानांनोचेद्राज्ञेब्रुवामहे १५ श्रीभगवानुवाच ॥ भवंत्योयदिमेदास्योमयोक्तंवाकरिष्यथ ॥ अत्रागत्यस्ववासांसिप्रतीच्छतसुमध्यमाः १६ नोचेन्नाहंप्रदास्येकिंक्रुद्धोराजाकरिष्यति ॥ ततोजलाशयात्सर्वादारिकाःशीतवेपिताः १७ पाणिभ्यांयोनिमाच्छाद्यप्रोत्तेरुस्तीरमंगनाः ॥ भगवानथतावीक्ष्यमुग्धभावप्रसादितः ॥ स्कंधेनिधाय वासांसिप्रीतःप्रोवाचसस्मितः १८ यूयंविवस्त्रायदपोधृतव्रताव्यगाहतैतत्तदुदेवहेलनम् ॥ बद्धांजलिंमूर्ध्न्यपनुत्तयेंऽहसःकृत्वानमोऽधोवसनंप्रगृह्यताम् ॥ १९ एकेनपाणिनानेमुरेकेनाच्छाद्यचांगनाः ॥ तावीक्ष्योवाचभगवान्भूयोधर्म्यमिदंवचः २० एकेनपाणिनायोवैप्रणमेद्देवमच्युतम् ॥ तस्यदंडःकरच्छेदइतिधर्मविदोविदुः २१ तस्माद्बुभाभ्यांपाणिभ्यांप्रणमेत्स्वामिनंनरः ॥ तथाचयूयंकुरुततन्मेप्रियतरंभवेत् २२

१२ नर्मणागर्हितस्नेहविनोदवचनेन १३ शीतजलेस्थित्यावेपिताःवयम् १४ तेतवदास्यःस्यामभवाम राज्ञेनंदगोपाय १५ १६ दारिकाःकुमार्यः १७ मुग्धभावेनमधुरस्वभावेनप्रसादितः प्रसादं गमितः १८ यूयंवस्त्रहीनापोजलंव्यगाहतेतियत्तदेतत् उतापकारणंदेवहेलनंदेवतापराधःअतस्तस्यांहसःअपराधस्यपरिहारायउतापेऽव्ययमीशेचेतियादवः १९ २० २१ २२

विवस्त्राप्लुवनंदिगंबरस्नानं व्रतच्युतिंनियमभ्रंशं तत्पूर्तिकामाःतस्यव्रतस्यपूर्णतांकामयमानाः तासामशेषकर्मणांसाक्षात्कृतंसाक्षीभूतंकृष्णंनेमुः अनेनकिंप्रयोजनमत्राह अवद्यमिति उज्झितुं उन्मूलयितुं २३ करुणःदयाशीलः २४ तासांकृष्णेभक्त्यतिशयंकथयति दृढमिति प्रलब्धाःवंचितवत्कारिताःहापितास्त्याजिताःमुक्तलज्जाःकारिताः प्रस्तोभिताःचाटुवचनजालंप्रापिताः क्रीडनवद्दारुयंत्रवत् अथापितथापि अमुंकृष्णंप्रति गुणेषुदोषाविष्करणमसूया तत्रहेतुमाह प्रियेति प्रियेणकृष्णेनसहसंकथनलक्षणसंगेननिर्वृताः २५ प्रेष्ठस्यकृष्णस्यसंगमेसाज्जिताः सन्नद्धाः नउच्चेलुः स्थितप्रदेशादितिशेषः लज्जयाईषन्निमील्यप्रेषितानीक्षणानियासांताः यद्वा लज्जयाइषितानिगतानीक्षणानियासांतास्तथा इषुगताविति धातुः २६ पादंशरीरं उत्तमानांश

इत्यच्युतेनाभिहिताव्रजाबलामत्वाविवस्त्राप्लुवनंव्रतच्युतिम् ॥ तत्पूर्तिकामास्तदशेषकर्मणांसाक्षात्कृतंनेमुरवद्यमुज्झितुम् २३ तास्तथावनतादृष्ट्वाभगवान्देवकीसुतः ॥ वासांसिताभ्यःप्रायच्छत्करुणःस्नेहतोषितः २४ दृढंप्रलब्धास्त्रपयाचहापिताःप्रस्तोभिताःक्रीडनवच्चकारिताः ॥ वस्त्राणिचैवापहृतान्यथाप्यमुंनैवाभ्यसूयन्प्रियसंगनिर्वृताः २५ परिधायस्ववासांसिप्रेष्ठसंगमसज्जिताः ॥ गृहीतचित्तानोच्चेलुस्तस्मिन्नलज्जेषितेक्षणाः २६ तासांविज्ञायभगवान्स्वपादस्पर्शकाम्यया ॥ धृतव्रतानांसंकल्पमाहदामोदरोऽबलाः २७ संकल्पोविदितःसाध्व्योभवतीनांमदर्चने ॥ मयानुमोदितःसोऽसौसत्योभवितुमर्हति २८ नमय्यावेशितधियांकामःकामायकल्पते ॥ भर्जिताक्वथिताधानाप्रायोबीजायनेष्यते २९ यातबलाव्रजंसिद्धामयेमारंस्यथक्षपाः ॥ यदुद्दिश्यव्रतमिदंचेरुरार्यार्चनंसतीः ३० ॥ श्रीशुकउवाच ॥ इत्यादिष्टाभगवतालब्धकामाःकुमारिकाः ॥ ध्यायंत्यस्तत्पदांभोजंकृच्छ्रान्निर्विविशुर्व्रजम् ३१ अथगोपैःपरिवृतोभगवान्देवकीसुतः ॥ वृंदावनाद्गतोदूरंचारयन्गाःसहानुजः ३२ निदाघार्कातपेतिग्मेछायाभिःस्वाभिरात्मनः आतपत्रायितान्वीक्ष्यद्रुमानाहव्रजौकसः ३३ हेस्तोककृष्णहेअंशोश्रीदामन्सुबलार्जुन ॥ विशालर्षभतेजस्विन्देवप्रस्थवरूथप ३४ पश्यतैतान्महाभागान्परार्थैकांतजीविनः ॥ वातवर्षातपहिमान्सहंतोवारयंतिनः ३५ अहोयेषांवरंजन्मसर्वप्राण्युपजीवनम् ॥ सुजनस्येवयेषांवैविमुखायांतिनार्थिनः ३६ पत्रपुष्पफलच्छायामूलवल्कलदारुभिः ॥ गंधनिर्यासभस्मास्थितोकैमैःकामान्वितन्वते ३७ एतावज्जन्मसाफल्यंदेहिनामिहदेहिषु ॥ प्राणैरर्थैर्धियावाचाश्रेयआचरणंसदा ३८ इतिप्रवालस्तबकफलमूलदलोत्करैः ॥ तरूणांनम्रशाखानांमध्येनयमुनांगतः ३९

रीरंतुपादशब्देनभण्यतइति २७ यन्मदर्चनंतस्मिन्कृतःनंदसुतःपतिर्भूयादितिसंकल्पः अनुमोदितःअनुज्ञातः २८ मत्संभोगलालसानांभवतीनांविषयौत्सुक्यंपुनःसंसारवर्तनायस्यात्अतोस्मत्संकल्पोनिद्यइतिशंकामाभूदित्याशयेनाह नेतिकामायविषयेच्छाप्ररोहाय तत्रदृष्टांतमाह भर्जितेति धानाबीजं बीजायअंकुरोत्पादनशक्तिमते २९ आर्यार्चनं कात्यायनीपूजांसतीःसत्यः ३० ३१ ३२ व्रजौकसःआहेत्यन्वयः तिग्मेतीव्रे ३३ ३४ परार्थायपरोपकरायएकांतेननियमेनजीवनंस्वायूरक्षणंयेषांतेतान् नःवारयंतिक्षुधितानस्मांस्तर्पयंति ३५ सुजनस्यजन्मनःसाफल्यमेतावत् अर्थिनोयेषांविमुखा नयांतीति येअस्मासारेणतोक्मैःअंकुरैःसाफल्यमेतावत् ३६ ३७ ३८ ३९

४० ४१ इतिश्रीभागवतेमहापुराणेदशमस्कंधेविजयध्वजकृतटीकायांविंशोऽध्यायः ॥ २० ॥ कृष्णभक्तौयोग्यतेवबलीयसीनशास्त्रज्ञानामत्यतत्कथयत्यांस्मन्नध्याय तत्रगोपानांकृष्णस्यचप्रश्नभात
वचनेकथयति शुकइति दुष्टनिबर्हणदुष्टजनोन्मर्दन क्षुत्भोकुमिच्छाबाधतेक्लिश्नाति अस्याःक्षुधःशांतिप्रशमम् शांतिःप्रशममंगलइतियादवः १ विप्रभार्यायाःपतित्यक्तायाःजातावेकवचनम् भ
क्ताःयाइतिच्छेदोवा २ देवयजनंयज्ञवाटम् सत्रंबहुकर्तृकम् आंगिरसंअंगिरसावृहस्पतिनाकथितंबृहस्पतिसवनमित्यर्थः आसतेकुर्वते अनेकार्थत्वाद्धातूनां हिशब्दोहेतौ यस्मात्सत्रेअद्यदेयंत
स्मात्प्रयात ३ अस्मद्भिसर्जिताःनियुक्ताःनिर्मुक्तावायुष्माकंकावातत्रलज्जा ननुअस्माकंगोपालत्वेनापात्रत्वात्किमितदाख्यंतीतितत्राह कीर्तयंतइति आर्यस्यश्रेष्ठस्यरामस्याभिधांना
म ४ निराधारोदंडोयथापतति ५ हेभूमिदेवाःब्राह्मणाःभूमिदेवोद्विजोत्तमइतिहलायुधः ६ लषतोऽभिलषतइच्छतः श्रद्धाआस्तिक्यम् अभिलाषोवा श्रद्धास्तिक्याभिलाषयोरितियादवः ७

तत्रगाःपाययित्वापःसुमृष्टाःशीतलाःशिवाः ॥ ततोनृपस्वयंगोपाःकामंस्वादुपपुर्जलम् ४० तस्याउपवनेकामंचारयंतःपशूनृप ॥ कृष्णरामावुपागम्य
क्षुधार्ताइदमब्रुवन्४१ इतिश्रीभागवतेमहापुराणेदशमस्कंधेकात्यायनीव्रतकथनंनामविंशोऽध्यायः ॥ २०॥ श्रीशुकउवाच ॥ रामराममहाबाहोकृष्ण
दुष्टनिबर्हण ॥ एषावैबाधतेक्षुन्नस्तच्छांतिंकर्तुमर्हथः १ इतिविज्ञापितोगोपैर्भगवान्जगदीश्वरः ॥ भक्तायाविप्रभार्यायाःप्रसीदन्निदमब्रवीद् २ श्रीकृष्ण
उवाच ॥ प्रयातदेवयजनंब्राह्मणाब्रह्मवादिनः ॥ सत्रमांगिरसंनामह्यासतेस्वर्गकाम्यया ३ तत्रगत्वौदनंगोपायाचतास्माद्विसर्जिताः ॥ कीर्तयंतोभगव
तआर्यस्यममचाभिधाम् ४ इत्यादिष्टाभगवतागत्वाऽयाचंततेतथा ॥ कृतांजलिपुटाविप्रान्दंडवत्पतिताभुवि ५ हेभूमिदेवाःशृणुतकृष्णस्यादेशकारि
णः ॥ प्राप्तान्जानीतमद्रंवोगोपान्नोरामचोदितान् ६ गाश्चारयंतावतिदूरओदनंरामाच्युतौवोलषतोबुभुक्षितौ ॥ तयोर्द्विजाओदनमर्थिनोर्यदिश्रद्धाचवो
यच्छतधर्मवित्तमाः ७ दीक्षायाःपशुसंस्थायाःसौत्रामण्याश्चसत्तमाः ॥ अन्यत्रदीक्षितस्यापिनान्नमश्नन्हिदुष्यति ८ इतितेभगवद्यांच्ञांशृण्वंतोऽपिनशु
श्रुवुः ॥ क्षुद्राशाभूरिकर्माणोबालिशाःवृद्धमानिनः ९ देशकालपृथग्द्रव्यमंत्रतंत्रर्त्विजोऽग्नयः ॥ देवतायजमानश्चक्रतुर्धर्मश्चयन्मयः १० तंब्रह्म परमंसाक्षा
द्भगवंतमधोक्षजम् ॥ मनुष्यदृष्ट्यादुष्प्रज्ञामर्त्यात्मानोनमेनिरे ११

ननुदीक्षितान्नंनभोक्तव्यमितिशास्त्रविरोधंपरिहरति दीक्षायाः व्रतसंग्रहरूपायाःवर्त्तमानायाःसत्याःपशुसंस्थायाअग्नीषोमीयपश्वालंभादूर्ध्वंदीक्षितस्यान्नमश्नन्सौत्रामण्यास्तथासौत्रामणीनाम्न्याइष्टेश्चा
न्यत्रकर्मांतरेदीक्षितस्यचान्नंनदुष्यति ८ इतिहेतुपूर्वंभगवद्यांच्ञांअश्रवणेतेषांबुद्धिविशेषमाह क्षुद्राशाइति क्षुद्राशाःतुच्छफलेच्छवःतदर्थंभूरिकर्माणःकिमेतेभ्रांताइतिसत्यमित्याह बालिशाइति बालि
शामूर्खाःबालिशोबालमूर्खयोरिति एतदेवद्रढयति वृद्धेतिवृद्धाइत्यभिमानोयेषामस्तीति ९ देशःकृष्णसारसंचारविषयः कालःवसंतादिःपृथग्द्रव्यंचरुपुरोडाशादि मंत्रोदेवताप्रसादप्रकाशकोंकारादिः
तंत्रमनुष्ठानविधिःऋत्विजोऽध्वर्युप्रभृतयःअग्नयआहवनीयादयःदेवताइंद्रादिशब्दवाच्याः क्रतुःसंकल्पःयजमानोविकारीधर्मोऽदृष्टं यन्मयः यत्प्रधानप्रतिपाद्यः १० मर्त्यात्मानं देहोहमितिबुद्धियुक्ताः
नमेनिरेनज्ञातवंतः ११

तथोभयंओमितिननेतिच १२ लौकिकींगतिंलोकसिद्धांरीतिम् १३ दानेकारणमाह मयीति धियामय्युषिताःमामेवचिंतयंत्यइत्यर्थः १४ द्विजसतीःद्विजपत्नीः १५ चरतावुभुक्षितेन ताच्छीलिकस्तृप्रत्ययः चरगतिभक्षणयोरितिधातुः १६ १७ १८ चतुर्विधंभक्ष्यभोज्यलेह्यचोष्यपानात्मकं बहुगुणंमधुरादिगुणोपेतम् १९ दीर्घश्रुतेनबहुकालश्रवणेनभगवतिभृताशयोयाभिस्ताः कदानुद्रक्ष्यामइत्यभिप्रायआशयः २० २१ किंगुणविशिष्टंदद्दशुरितितत्राह श्यामंहिरण्यपरिधिंसुवर्णमेखलं सुवर्णवत्पीतांबरंवा वनमाल्येनवनपुष्पेण बर्हेणमयूरपिच्छेन धातुनागैरिकेणप्रवालेननटवेषवद्वेषोयस्यासौतथातं अनुव्रतांसेकस्यचिद्भयस्यस्यस्कंधे कर्णयोरुत्पलेअलकःकुंतलंकपोलेचमुखाब्जेहासोयस्यसतथातं धुनानंपरिरंपर्यंतम् २२ दीर्घकालमारभ्यश्रुतःप्रियतमस्योदयोदीर्घश्रुतप्रियतमोदयःसएवकर्णपूराःकर्णालंकरणानितैः यस्मिन्कृष्णेनिमग्नमनसःअवगाह्यदृढबद्धहृदयाःपूर्वंताःस्त्रियोथतंकृष्णंअक्षिविवरैरंतःप्रविश्यसुचिरंपरिरभ्यआलिं

नतेयदोमितिप्रोचुर्ननेतिचपरंतप ॥ गोपानिराशाःप्रत्येत्यतथोचुःकृष्णरामयोः १२ तदुपाकर्ण्यभगवान्प्रहस्यजगदीश्वरः ॥ व्याजहारपुनर्गोपान्दर्शयन्लौकिकींगतिम् १३ मांज्ञापयतपत्नीभ्यःससंकर्षणमागतम् ॥ दास्यंतिकाममन्नंवःस्निग्धामय्युषिताधिया १४ गत्वाथपत्नीशालायांदृष्ट्वासीनाःस्वलंकृताः ॥ नत्वाद्विजसतीर्गोपाःप्रश्रिताइदमब्रुवन् १५ नमोवोद्विजपत्नीभ्योनिबोधतवचांसिनः ॥ इतोविदूरेचरताकृष्णेनप्रेषितावयम् १६ गाश्चरयन्सगोपालैःसरामोदूरमागतः ॥ बुभुक्षितस्यतस्यान्नंसानुगस्यप्रदीयताम् १७ श्रुत्वाच्युतमुपायातंनित्यंतद्दर्शनोत्सुकाः ॥ तत्कथाक्षिप्तमनसोबभूवुर्जातसंभ्रमाः १८ चतुर्विधंबहुगुणमन्नमादायभाजनैः ॥ अभिसस्रुःप्रियंसर्वाःसमुद्रमिवनिम्नगाः १९ निषिध्यमानाःपतिभिर्भ्रातृभिर्बंधुभिःसुतैः ॥ भगवत्युत्तमश्लोकेदीर्घश्रुतभृताशयाः २० यमुनोपवनेशोकनवपल्लवमंडिते ॥ प्रचरंतंवृतंगोपैर्ददृशुःसाग्रजंस्त्रियः २१ श्यामंहिरण्यपरिधिंवनमाल्यबर्हधातुप्रवालनटवेषमनुव्रतांसे ॥ विन्यस्तहस्तमितरेणधुनानमब्जंकर्णोत्पलालककपोलमुखाब्जहासम् २२ दीर्घश्रुतप्रियतमोदयकर्णपूरैर्यस्मिन्निमग्नमनसस्तमथाक्षिरंध्रैः ॥ अंतःप्रविश्यसुचिरंपरिरभ्यतापंप्राज्ञंयथाभिमतयोविजहुर्नरेंद्र २३ तास्तथात्यक्तसर्वाशाःप्राप्ताआत्मदिदृक्षया ॥ विज्ञायाखिलदृग्द्रष्ट्या प्राहप्रहसिताननः २४ श्रीभगवानुवाच ॥ स्वागतंवोमहाभागाआस्यतांकरवामकिम् ॥ यन्नोदिदृक्षयाभ्येताउपपन्नमिदंहिवः २५ नश्रद्धामधिकुर्वंति कुशलार्थनिदर्शनाः ॥ अहैतुक्यव्यवहितांभक्तिमात्मप्रियेयथा २६

ग्यतापंस्मरनिमित्तंज्वरंजहुः कथमिव यथाप्राज्ञाःसुषुप्त्यवस्थासाक्षिणः प्राज्ञंप्राप्ताभिमतयःइंद्रियवृत्तयःतापंत्यजंति सतासौम्यतदासंपन्नोभवतीतिश्रुतेः यद्वा भगवत्तत्त्वज्ञाननिपुणाःप्राज्ञाःप्राज्ञमितिपाठेपरिरभ्येतिसंबंधः २३ त्यक्तसर्वाशाःत्यक्तसर्वातितृष्णाः आशादिगतितृष्णयोरितिव दृष्ट्याअपरोक्षज्ञानेन तासांभोक्तविज्ञाय अखिलदृक् अखंडज्ञानी २४ अभ्येताःअभ्यागताःयद्यस्मादिदंवःउपपन्नंयुक्तम् २५ एवंकुशलंपुण्यमेवार्थःकुशलार्थस्तस्यनितरांदर्शनंयेषांतेकुशलार्थनिदर्शनाःअर्थीसमर्थोविद्वानधिक्रियतेइतिवचनात् कुशलानिपुणाश्च अर्थनिदर्शनाश्चतेतथा यद्वाकुशलार्थोभगवान्निदर्शनमुदाहरणंयेषांतेतथाकुशलाःस्वार्थदर्शनाइतिपाठः एतेश्रद्धांविषयाभिलाषंनकुर्वंति किंतु आत्मप्रियेभगवतिअहैतुकींनिर्निमित्तां अव्यवहितांनिरंतरीभूतांभगवद्भक्तिमधिकुर्वंति अधिकांकुर्वंतिकथमिव यथात्मप्रियेस्वभर्तरिभगवतीतिशेषः यथाशास्त्रविहितप्रकारेण तदेतत्प्रेष्ठइतिश्रुतेः देहादिभ्योतिप्रियत्वंहरेरेवेतिप्रतिपादयति यद्वास्वार्थदर्शनाःस्वर्गादिफलार्थदृष्ट

यःकुशलाःपञ्चावेद्यानिपुणाः अहैतुक्यव्यवहितांभद्रामास्तिक्यबुद्धिं अव्यधिकेश्वरेनकुर्वीते व्यतिरकदृष्टांतमाह अहतुकीति मक्ताआत्माश्रयमापयथाभक्तकुर्वातनतथाव २६ तवसत्रमा दाधिक्यंकुतइत्यत्राह प्राणेति २७ यस्मादसंडेश्वरेमायिभक्तिकुर्वातिनान्यत्र तस्मान्मदाज्ञांकुरुतेत्याह तदिति गंतव्येनिमित्तमाह पतयइति वःपतयःद्विजातयइति अतःकालक्षेपोनोचितः निमित्तांतरमप्यस्तीत्याह स्वसत्रमिति पारयिष्यंतिसंपादयिष्यंति २८ पातेतिनृशंसंपरुषंगदितुं निगमंनमेभक्तःप्रणश्यतीतिवचनं सत्यंकुरु पदावसृष्टंश्रीपादच्युतं तेनदत्तंवा तुलसीदाम श्रीतुलसीमालांकेशैर्नितरांवोढुंयादमूलंप्राप्ताः २९ कालक्षेपात्द्विजातयअस्मान्नग्रहंतीतिमूचितं तत्रतत्सहायाभावात्पुनर्गमनेतेनैवग्रहंतीत्याहुः ग्रहंतीति ततः शरणंविधेहिकुरु ३० कुतएवचान्यइत्यत्राह लोकाश्चेति ३१ तवपादमूलंप्राप्ताइत्यत्रांगसंगःसूचितस्तत्राह नेति इहनृणामंगसंगोममप्रीतयेनभवति ममानुरागायचनस्यात् तस्मान्मयिमनोयुं

प्राणबुद्धिमनःस्वात्मदारापत्यधनादयः ॥ यत्संपर्कात्प्रियाआसंस्ततःकोन्वपरःप्रियः २७ तद्यातसाध्व्योयजनंपतयोवोद्विजातयः ॥ स्वसत्रंपारयि ष्यंतियुष्माभिर्गृहमेधिनः २८ ॥ द्विजपत्न्यऊचुः ॥ मैवंविभोऽर्हतिभवान्गदितुंनृशंसंसत्यंकुरुष्वनिगमंतवपादमूलम् ॥ प्राप्तावयंतुलसिदामपदाव सृष्टंकेशैर्निवोढुमतिलंघ्यसमस्तबंधून् २९ गृह्णंतिनोनपतयःपितरौसुतावानभ्रातृबंधुसुहृदःकुतएवचान्ये ॥ तस्मात्प्रसीदपदयोःपतितात्मनांनोनान्या भवेद्गतिररिंदमतद्विधेहि ३० श्रीकृष्णउवाच ॥ पतयोनाभ्यसूयेरन्नित्यंभ्रातृसुतादयः ॥ लोकाश्चवोमयोपेतादेवाअप्यनुमन्वते ३१ नप्रीतयेऽनुरा गायह्यंगसंगोनृणामिह ॥ तन्मनोमयियुंजानानचिरान्मामवाप्स्यथ ३२ श्रीशुकउवाच ॥ इत्युक्ताद्विजपत्न्यस्तायज्ञवाटंपुनर्गताः ॥ तेचानसूयवस्ताभिः स्त्रीभिःसत्रमपारयन् ३३ तत्रैकाविधृताभर्त्राभगवंतंयथाश्रुतम् ॥ हृदोपगुह्यविजहौदेहंकर्मानुबंधनम् ३४ भगवानपिगोविंदस्तेनैवान्नेनगोपकान् ॥ चतुर्विधेनाशयित्वास्वयंचबुभुजेप्रभुः ३५ एवंलीलानरवपुर्नृलोकमनुशीलयन् ॥ रेमेगोगोपगोपीनांरमयन्नृपवाक्कृतैः ३६ अथानुस्मृत्यविप्रास्तेज ग्वतप्यन्कृतागसः ॥ यद्विश्वेश्वरयोर्याच्ञामहनन्नृविडंबयोः ३७ दृष्ट्वास्त्रीणांभगवतिकृष्णेभक्तिमलौकिकीम् ॥ आत्मानंचतयाहीनमनुतप्ताव्यगर्हय न् ३८ धिग्जन्मनस्तुधिग्बुद्धिंधिग्वृत्तंधिग्बहुज्ञताम् ॥ धिक्कुलंधिक्क्रियादाक्ष्यंविमुखायेत्वधोक्षजे ३९

ज्ञानाःयूयंक्षिप्रंमामवाप्स्यथेत्यन्वयः अनेनाहंभक्तयैवतुष्टोभवामि नान्येनेतिसूचितम् ३२ इतिशब्दोहेतौ ३३ विधृतापृथक्कृतात्यक्तेत्यर्थः विनिषेधेपृथग्भावेइतियादवः कर्मानुबंधनंकर्मानुगम् ३४ ३५ वाग्भिःकृतैःकर्मभिश्चगोगोपगोपीनांमनांसिरमयन् ३६ नन्वेतेविप्राःसमीचीनाःउतासमीचीनाः नाद्यः अनुभवादर्शनात् नाद्वितीयःकृष्णपरायणानांस्त्रीणांपाणिग्रहणसंबंधदर्शनात् अथकथंनि र्णयइति राज्ञोमानसींशंकांपरिहरति अथेति तेविप्राःअथमंगलाःकुतोन्वतप्यन् यतःकृतागसःकृतापराधत्वात् अपराधसद्भावेकिंप्रमाणामितितत्राह अनुस्मृत्येति अनुस्मरणंप्रमाणमित्यर्थः कोसावप राधइतितत्राह यादिति अहनन्हिंसितवंतः तिरस्कृतवंतइतियत्सइत्यर्थः नृविडंबयोःमनुष्यमनुकुर्वतोः ३७ तेषामनुतापःकथमभूदितितत्राह दृष्ट्वेति ३८ किमाकारोसावितितत्राह धिगिति ततो जन्मादिकंधिक्कुत्सितं धिग्भर्त्सनेकुत्सनेइतिच ३९

शास्त्रज्ञानमप्रयोजकं प्राप्तेकालेफलाभावादतोभगवदनुग्रहएववरीयानित्याशयेनाहुः नूनमितिमायिनांज्ञानिनामपि अत्रहेतुमाह यद्वयमिति गुरवोद्विजातयइत्येतद्वयंमोहासंभवेहेतुः ४० दुरंत भावं अव्यवहितभक्तिं गृहाभिधानान्मृत्युपाशान्छिंद्यात्छिनत्ति ४१ आसांस्त्रीणांद्विजातिसंस्कारःउपनयनलक्षणः गुरौगुरुकुलनिवासोविद्याध्ययनार्थमितिशेषः आत्ममीमांसाब्रह्मविचारः शौचंबाह्याभ्यंतरशुद्धिः शुभाःक्रियायागादिलक्षणाः ४२ ४३ ४४ अन्यथास्मारयितृत्वेनापि तर्हि स्त्रीणांकिमर्थंकृतमितितत्राह ईशस्येति ४५ स्वात्मदोषापवर्गेण अन्यत्रचं चलत्वादिरवकीयदोषपरित्यागेन स्थैर्यस्वभावेनेत्यर्थः ४६ ४७ ४८ ४९ ५० अथाविअनुतप्ताअपिहरिंदिदृक्षवोद्रष्टुकामाश्चनाचलन्नागच्छन् कुतःकंसाद्भीताइति ॥ ५१ ॥ इतिश्रीभागवतेमहापु राणेदशमस्कंधेवि०टीकायांएकविंशोध्यायः ॥ २१ ॥ स्वमहिमानंप्रकटयितुमुत्पथवर्तीपुरुषःसन्मार्गोपदेशेनशिक्षणीयइतिशास्त्रशासनंपश्यन्कृष्णःसन्मार्गदर्शयितुमुपक्रमतइत्याह शुकइति तत्रव्रज

नूनंभगवतोमायामायिनामपिमोहिनी ॥ यद्वयंगुरवोनृणांस्वार्थेमुह्यामहेद्विजाः ४० अहोपश्यतनारीणामपिकृष्णेजगद्गुरौ ॥ दुरंतभावंयश्छिंद्यान्मृ त्युपाशान्गृहाभिधान् ४१ आसांद्विजातिसंस्कारोननिवासोगुरावपि ॥ नतपोनात्ममीमांसानशौचंनाक्रियाःशुभाः ४२ अथापिह्युत्तमश्लोकेकृष्णेयो गेश्वरेश्वरे ॥ भक्तिर्दृढानचास्माकंसंस्कारादिमतामपि ४३ ननुस्वार्थविमूढानांप्रमत्तानांगृहेहया ॥ अहोनःस्मारयामासगोपवाक्यैःसतांगतिः ४४ अन्यथापूर्णकामस्यकैवल्याद्याशिषांपतेः ॥ ईशितव्यैःकिमस्माभिरीशस्यैतद्विडंबनम् ४५ हित्वान्यान्भजतेयंश्रीःपादस्पर्शाशयाऽसकृत् ॥ स्वात्म दोषापवर्गेणतद्याच्ञाजनमोहिनी ४६ देशकालपृथग्द्रव्यमंत्रतंत्रर्त्विजोऽग्नयः ॥ देवतायजमानश्चक्रतुर्धर्मश्चयन्मयः ४७ सएषभगवान्साक्षाद्विष्णुर्यो गेश्वरेश्वरः ॥ जातोभुवीतिशृण्वानायेविमूढानाविद्महे ४८ नमस्तुभ्यंभगवतेकृष्णायाकुंठमेधसे ॥ यन्मायामोहितदृशोभ्रमामःकर्मवर्त्मसु ४९ सवैन आद्यःपुरुषःस्वमायामोहितात्मनाम् ॥ अविज्ञातानुभावानांक्षंतुमर्हत्यतिक्रमम् ५० इतिकृष्णमनुस्मृत्यविप्रास्तेकृतहेलनाः ॥ दिदृक्षवोप्यच्युतयोः कंसाद्भीतानचाचलन् ५१ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेएकविंशोऽध्यायः ॥ २१ ॥ श्रीशुकउवाच ॥ भगवानपितत्रैवबलदेवेनसंयुतः ॥ अपश्यन्निवसन्गोपानिंद्रयागकृतोद्यमान् १ तदभिज्ञोपिभगवान्सर्वात्मासर्वदर्शनः ॥ प्रश्रयावनतोऽपृच्छद्वृद्धान्नंदपुरोगमान् २ कथ्यतांमेपितःकोऽयं संभ्रमोवउपागतः ॥ किंफलंकस्यचोद्देशःकेनवासाध्यतेमखः ३ एतद्वूहिमहान्कामोमह्यंश्रूषवेपितः ॥ नहिगोप्यंहिसाधूनांकृत्यंसर्वात्मनात्विह ४ अस्त्यस्वपरदृष्टीनामित्रोदासाविद्विषाम् । उदासीनोरिवद्वर्ज्यआत्मवत्सुहृदुच्यते ५

एवनिवसन् १ सर्वात्मासर्वदर्शनइत्येतद्वयंतदभिज्ञत्वेहेतुः मश्रयःसेवाशीलता २ कोयंकिंविषयः मखविषयश्चेत्तत्राह किंफलमिति दृष्टमुताद्दृष्टंफलम् यद्वा किमर्थंसंभ्रमः अस्यसंभ्रमस्यकिंफलंसाध्यं मखश्चेदत्राह कस्येति कांदेवतामुद्दिश्यद्रव्यत्यागलक्षणःकेनाधिकारिणा हेतुनावा ३ तदेतत्पृष्टंसर्वंमह्यंब्रूहि किमर्थंमहान्कामः ममतस्मिन्कार्येमहत्याकांक्षावर्तते तुशब्दोभेदार्थःइहवाच्यव्यव हारविशेषे यत्सर्वात्मनाकीर्त्यंवक्तुंयोग्यंतत्साधूनांगोप्यंनहि कुतइत्थंसंकल्प्यतइत्यतःप्रसिद्धत्वादित्याह ह्रीति ४ कथमेतदवगतमितितत्राह अस्तीति निरस्तस्वकीयपरकीयबुद्धीनांशत्रवा दिसद्भावेऽर्थविशेषोदुर्घटइतितत्राह अमित्रेति नविद्यतेमित्रंउदासीनःविद्विट्येषांतेतथातेषांमित्रादिविशेषाभावात्स्वकीयत्वादिबुद्ध्यभावेनसाधूनांगोप्यंनास्तीतिप्रसिद्धमेवेत्यर्थःननुचेतनानांचित्तस्यम

मितत्वेनसाधूनांमित्राद्यभाववचनंकंठोपरिगतवदौपचारिकं परोक्षप्रियाइवहिदेवाः प्रत्यक्षद्विषइतिश्रुतेः षट्कर्णोभिद्यतेमंत्रइतिस्मृतेः अतःकथंगोप्यंनास्तीत्याशंक्ययोग्यतातिरेकेणमित्रादिकंना स्तीतितत्त्वं नतुसर्वात्मना अतोगोप्यंनास्त्येवेति शत्रुःसर्वथावर्ज्यः मित्रविषयेउदासीनोपितथा तस्यशत्रोकथनसंभवादरिवदमुहृद्वर्ज्यआत्मवत्सुहृद्वर्ज्यइत्यभिप्रायेणाह उदासीनइति अतस्त्व त्सुहृत्त्वाद्गोप्यमपिमह्यंब्रूहीतिभावः ५ अस्तुलववक्तव्यं अथाप्यस्माकंफलज्ञानाभावेपिसंध्योपासनादिवदनुष्ठानंघटतइत्याशंक्यसत्यंज्ञानाभावेयुष्माकंफलप्राप्तिर्नस्यादित्याह ज्ञात्वेति कश्चित्ज्ञा त्वानुतिष्ठतेकश्चिदज्ञात्वातत्रवेदुषःकर्मसिद्धिःअनुष्ठानफलंस्यात्अविदुषःकर्मानुष्ठानमजानतःपुंसःयथावत्फलंनभवेत् मंत्रावृत्याद्रव्यसंपत्त्याचऋत्विगनुगुणेनवाकिंचित्संभवेपिपूर्णफलंनस्यादित्यर्थः यथाऽविदुषोनस्यात् तथाविदुषइतिवा ६ अस्त्वन्यत्रप्रकृतेकिमितितत्राह तत्रेति तत्रदेवताकर्मणांमध्येतावत्प्रथमंक्रियायोगाःकर्मानुष्ठानप्रकाराः लौकिकवृद्धव्यवहारादवगताः गतानुगतवद्वा ७ पर्जन्यशब्दस्यगर्जन्मेघेपिवर्त्तनात्तद्व्यावृत्त्यर्थमिंद्रइति तर्हिइंद्रइत्येवालमितिचेन्न अस्यपर्जन्यशब्दस्यमेघाभिमानित्वविशेषद्योतनार्थत्वात् तत्कथमत्राह मेघाइति आत्मवत्देहवन्मूर्तयः हेहाःस्वदेहोयथाभिमन्यमानत्वेनप्रेष्ठस्तथामेघाअपीतिभावः मेघैःकिंप्रयोजनंलोकस्येत्याशंक्यमिहसेचनइतिधातुनिष्पन्नमेघशब्दार्थसूचनपूर्वकंतत्प्रयोजनमाह अभिवर्षंतीति प्राणनंचेष्टाकरणं जी वनंशरीराप्यायनं अनेनप्राणशब्दविवरणंकृतं प्राणिनामितिपाठेपयसोगतेर्हेतुत्वेनपयःशब्दवाच्यत्वेजलस्यपयगतावितिधातोरर्थः ८ यतोमेघालोकोपकारिणःतत्तस्माद्वार्मुचांजलदानांमेघाना

ज्ञात्वाज्ञात्वाचकर्माणिजनोऽयमनुतिष्ठते ॥ विदुषःकर्मसिद्धिःस्याद्यथानाविदुषोभवेत् ६ तत्रतावत्क्रियायोगाभवतार्किविचारिताः ॥ अथवालौकि
कास्तन्मेपृच्छतःसाधुमण्यताम् ७ ॥ नंदउवाच ॥ पर्जन्योभगवानिंद्रोमेघास्तस्यात्ममूर्त्तयः ॥ अभिवर्षंतिभूतानांप्राणनंजीवनंपयः ८ तत्तातवयम
न्येचवार्मुचांपतिमीश्वरम् ॥ द्रव्यैस्तद्रेतसासिद्धैर्यजंतेक्रतुभिर्नराः ९ तच्छेषेणोपजीवंतित्रिवर्गफलहेतवे ॥ पुंसांपुरुषकाराणांपर्जन्यःफलभावनः १०
यएवंविसृजेद्धर्मंपारंपर्यागतंनरः ॥ कामाल्लोभाद्भयाद्द्वेषात्सवैनाप्नोतिशोभनम् ११ ॥ श्रीशुकउवाच ॥ वचोनिशम्यनंदस्यतथान्येषांव्रजौकसाम् ॥
इंद्रायमन्युंजनयन्पितरंप्राहकेशवः १२ ॥ श्रीभगवानुवाच ॥ कर्मणाजायतेजंतुःकर्मणैवप्रलीयते ॥ सुखंदुःखंभयंक्षेमंकर्मणैवाभिपद्यते १३ अस्ति
चेदीश्वरःकश्चित्फलरूपःसकर्मणः ॥ कर्त्तारंभजतेसोपिनह्यकर्तुःप्रभुर्हिसः १४

मित्यर्थः ईश्वरंअयङ्गांशिक्षणसमर्थं तेषांमेघानां रेतसारतिकरलक्षणेनजलेन सिद्धैःउत्पन्नैः अन्येचनराः ९ तच्छेषेणइष्टावशिष्टेन त्रिवर्गफलहेतवेधर्मार्थकामलक्षणपुरुषार्थासिद्धये पुरुषकारा णांपराक्रमसिद्धकर्मणां फलभावनःफलसाधकः १० विपक्षेबाधकमाह यएवमिति कामादुर्विषयाभिलाषात् लोभाद्वित्तव्ययशंकया भयात् राजभयात् द्वेषाद्देवताद्वेषात् ११ मन्युंक्रोधं १२ कर्मफलदातृत्वेनकर्मप्रेरयितृत्वेनकर्मशब्दवाच्यत्वेनचनारायणएवसर्वस्यकर्तेत्यभिप्रेत्यसर्वस्यकारणंकर्मैवेत्याह कर्मणेति १३ ननुप्रवृत्तेर्बुद्धिपूर्वकत्वेनकर्मणोऽचेतनत्वेनतदयोगाज्जगत्तदधीनमिति वक्तुंनयुक्तं किंतुचेतनाधीनमेवचेतनोपिनदेवदत्तवत्साधारणोभवति अपितुविशिष्टएवकश्चिदितिश्रीकृष्णहार्दानभिज्ञस्यनंदगोपस्यमानसींशंकांगूढाभिसंधिःपरिहरति अस्तिचेदिति यदिकश्चिदीश्वरो स्तीतिमतंतर्हिसईश्वरःकर्मणःफलंसुखादिलक्षणंरूपयतिअनुकूलंकरोतिददातीतिफलरूपः सहायकल्पः नस्वतंत्रइत्यर्थः एतदेवद्रढयति कर्तारमिति फलरूपत्वेनप्रयोजकत्वाज्जगतस्तदधीनत्वमाया तंइत्यतोवाह कर्तारमिति सत्वदभिमतईश्वरोपिकर्मकर्त्तारंभजतेफलदातृत्वेनानुवर्त्तते नाकर्मकर्त्तारं कुतइत्यतआह नहीति सईश्वरःकर्माकर्तुःफलदानेप्रभुःसमर्थोनहि कस्मात्सामर्थ्याभावइत्यत्राह हीति उद्रेककारणाभावात् १४

अवांतरेश्वरत्वमभ्युपगमेदमुदितं इदानीमीश्वरएवत्वदभीष्टोनापेक्षितः वस्तुतस्तु स्वभावविहितकर्मणएवफलदातृत्वोपपत्तेः पयःस्यंदनादिवदित्याशयेनेश्वरमाक्षिपति किमिंद्रेणेति स्वस्माद्भावःसत्ताय स्यसतथा नपराधीनसत्ताकःयद्वास्वतंत्रोभावः स्वभावः तेननारायणेन विहितंकथितं अन्यथाकर्तुमनीशेनासमर्थेन १५ ननुयदिस्वभावेनैवकर्मक्रियतेतर्हिकर्तामृद्दंडसलिलादिबाह्यद्रव्यांकिमर्थमपेक्ष तइत्याशंक्यतदपिस्वभावानियतामित्यतःसर्वंस्वभावाधीनमित्याह स्वभावेति हिशब्देनषयःस्यंदनादिकमपिनारायणकृतमित्यभिप्रैति एतस्यवाअक्षरस्यप्रशासनेगार्गिप्राच्योन्यानद्यःस्यंदंतेइति श्रुतेः स्वभावादिशब्दवाच्यस्यहरेरधीनमिदंसर्वमित्यभिप्रायेणावांतरेश्वरएवात्रनिषिध्यते नतुमुख्येश्वरइत्यत्रआचार्यैःफलरूपःसकर्मणइत्याद्यवांतरेश्वरविषयमित्यभिधायि स्वभावेकर्मणेचयःसत्त्वादि षुगुणेषुच स्थितोविष्णुःसर्वकर्तापृथक्संस्थश्चसर्वगइत्यादिप्रमाणंचकृष्णहार्दतात्पर्यार्थउदाहारि यद्वासईश्वरःकर्मणोहरेःफलरूपोज्ञानात्माकर्तारंकर्मभजते अकर्तुःअकर्मणःप्रभवतीतिप्रभुः तदुक्तं तेन जातंफलंयस्मात्कर्मणःफलमीर्यतइति अस्त्ववांतरेश्वरःकर्मफलरूपःप्रकृतेकिमायातमितितत्राह किमिति स्वस्वकर्मज्ञानविषयांबिंबभूतंभगवंतअनुवर्तिनांप्रतिबिंबानां ननुत्रैलोक्येश्वरमिंद्रंकथंकर्मफल भागितितुच्छीकरोषीतितत्राह अनीशेनेति अस्मदभिमतंकर्मशब्दवाच्यंवस्तुकर्मफलभाक्नभवतीत्याशयेनस्वाभावेत्युक्तं स्वःस्वाधीनःभावःक्रियायस्यस्वस्वभावः तदुक्तं नचासौकर्मफलभाङ्नास्यंकि चिन्नशक्यतइत्यादि एतदेवोपपादयति स्वभावतंत्रइति हिशब्देनतेषामवांतरेशानांविष्णुवशत्वमंतरेणान्यकर्मवशत्वंनास्तीतिदर्शयति नान्यकर्मवशत्वंतुतेषांविष्णुंविनाक्वचिदिति स्वभावस्थमिदंसर्वमि त्यनेनसर्वशब्दवाच्यत्वंस्वभावस्यहरेरितिसूचितंसचब्राह्मणगिर्यादिनामाविष्णुरजःपरइत्यादिस्मृतेः १६ ननुविष्णोःसर्वनामवत्त्वेएकस्यैवोच्चनीचदेहयोगवियोगप्राप्त्यादेवदत्ताद्विशेषाभावेनसर्वतदधीन

किमिंद्रेणेहभूतानांस्वस्वकर्मानुवर्तिनाम् ॥ अनीशेनान्यथाकर्तुंस्वभावविहितंनृणाम् १५ स्वभावतंत्रोहिजनः स्वभावमनुवर्तते ॥ स्वभावस्थमिदंसर्वं सदेवासुरमानुषम् १६ देहानुच्चावचान्जंतुःप्राप्योत्सृजतिकर्मणा ॥ शत्रुर्मित्रमुदासीनःकर्मैवगुरुरीश्वरः १७ तस्मात्सुपूजयेत्कर्मस्वभावस्थःस्वकर्मकृत् ॥ अजंसायेनवर्त्ततदेवास्यहिदैवतम् १८ वर्तेतब्रह्मणाविप्रोराजन्योरक्षयाभुवः ॥ वैश्यस्तुवार्तयाजीवेच्छूद्रस्तुद्विजसेवया १९ कृषिवाणिज्यगोरक्षा कुसीदंतुर्यमुच्यते ॥ वार्ताचतुर्विधातत्रवयंगोवृत्तयोऽनिशम् २०

मितिवक्तुंनशक्यतेइतितत्राह देहानिति दुःखयतीतिदुःखीतदुःखस्वातंत्र्यात्तच्छब्दवाच्यत्वम् नतुतदनुभवतःअतःसर्वनामस्वंयुज्यतेउत्सृजतित्यजतिसृजति आपादयति जातस्यशत्रुत्वादिभावश्चहरिणैवे त्याह शत्रुरिति सुखंदुःखंभवोभावइत्यादिस्मृतेः यद्वायथातत्तच्छक्तिप्रेरकत्वेनब्राह्मणादिशब्दवाच्यस्वंहरेस्तथाशत्रुत्वादिशब्दवाच्यत्वमित्याह शत्रुरिति कर्मशब्दवाच्योहरिरेवशत्रुत्वादिःपूज्य त्वात्तच्चोपदेशेनगुरुरैश्वर्यादियोगादीश्वरः १७ यस्माद्विरतिसर्वमितिगिर्यादिनामाहरिस्तस्मात्स्वविहितकर्मकृत् स्वभावस्थः नारायणार्पितसर्वेंद्रियवृत्तिःपुरुषः क्रियापतनयोःकर्मेत्यभिधानात् क्षितिधृत्यादिक्रियाश्रयत्वेनजगत्सर्जनादिक्रियाश्रयत्वेनवापरोक्षापरोक्षज्ञानविषयत्वेनवाकर्मसुपूजयेदित्यन्वयः तदुक्तं एतस्मात्कारणात्कृष्णःशक्रस्यविमदायच गिर्यादिस्थितमात्मानंपूजयामासब ल्लवैरिति स्वकर्मकृदित्युक्तविवृणोतिरिति अंजसेति येनांजसातत्त्वेनयोवर्तेत अस्यतदेवदैवतंकुलदैवम् हिलोकप्रसिद्धम् अंजसात्वारितेतत्त्वेमहदद्भुतखेदयोरितियादवः अनेनयच्छास्त्रेविघ्नेश्वरादिनामाख्या तंतदप्यस्यहरेर्नामेतिसिद्धम् १८ यस्ययत् किंकिमितितत्राह वर्तेतेतिब्रह्मणावेदेनविहितेनयागादिना यद्वायोयेनकर्मणाअंजसासहितोवर्तेत अस्यतदेवकर्मदैवतमान्यांहि तोहिविप्रादेःकिंकर्मविहितमित्य त्राह ब्रह्मणेति कृच्छ्रचांद्रायणादिलक्षणेनतपसा ब्रह्मवेदस्तपस्तस्यमित्यमरः वार्तयाकृष्यादिलक्षणयाचतुर्विधया १९ कृषिर्भुवउल्लेखनादिक्रिया वाणिज्यंसत्यानृतलक्षणक्रियादि गोरक्षापशुपाल नं वृद्ध्यर्थद्रव्यप्रयोगःकुसीदम् तत्रकृष्यादिषुगोभिर्वृत्तिराजीवनंयेषांतेतथा २०

प्रकारांतरेणेंद्रमाक्षिपति सत्त्वमित्यादिना विश्वंसमस्तं अन्योन्यंनिमित्तीकृत्येतिशेषः २१ मेघानामिंद्रोनियोजकइत्यत्राह रजसेति रंजयतिसर्वमितिरजोभगवानभिहितः नत्वचेतनस्यरजोगुणस्य मेघेप्रेरकत्वंसंजाघटीतीति सिध्यंतिसंपन्नकार्याभवंतिकिंकरिष्यतिनकिमपीत्यर्थःप्रश्नेक्षपेविकल्पेकिमितिपादवः २२ इतोप्यस्मत्कुलदेवतात्वाभावादिंद्रयागोनोचितइत्याशयेनाह ननइति पुरःपुराणिग्राम स्थितिमुपादायगृहिणःसपत्नीकाः २३ एकतरंबहूनांसिद्धांतानांमध्येएकंभावंसिद्धांतमाजीव्योपजीव्यान्यंभावमुपधावतिउपास्ते सपुरुष तस्माद्भावात्क्षेमंसुखंनलभते यौवनंजरयतीतिजारः असतीबहु

सत्त्वंरजस्तमइतिस्थित्युत्पत्त्यंतहेतवः ॥ रजसोत्पद्यतेविश्वमन्योन्यंविविधंजगत् २१ रजसाचोदितामेघावर्षंत्यंबूनिसर्वतः ॥ प्रजास्तैरेवसिध्यंतिम हेंद्रःकिंकरिष्यति २२ ननःपुरोजनपदानग्रामगृहिणोवयम् ॥ वनौकसस्तातनित्यंकाननाद्रिनिवासिनः २३ आजीव्यैकतरंभावंयस्त्वन्यमुपधावति ॥ नतस्माद्विंदतेक्षेमंजारंनार्यसतीयथा २४ तस्माद्भवांब्राह्मणानामेद्रश्चारभ्यतांमखः ॥ यइंद्रयागसंभारास्तैरयंसाध्यतांमखः २५ पच्यंतांविविधाः पाकाःसूपांधःपायसादयः ॥ संयावापूपशष्कुल्यःसर्वदोहश्चगृह्यताम् २६ हूयंतामग्नयःसम्यग्ब्राह्मणैर्ब्रह्मवादिभिः ॥ अन्नंबहुगुणंतेभ्योदीयतांधेनुद क्षिणाः २७ अन्येभ्यश्चश्वचांडालपतितेभ्योयथार्हतः ॥ यवसंचगवांदत्त्वागिरयेदीयतांबलिः २८ स्वलंकृताभुक्तवंतःस्वनुलिप्ताःसुवाससः ॥ प्रद क्षिणंचकुरुतगोविप्रानलपर्वतान् २९ एतन्ममममतंतातक्रियतांयदिरोचते ॥ अयंगोब्राह्मणाद्रीणांमह्यंचदयितोमखः ३०॥ श्रीशुकउवाच ॥ कालात्म नाभगवताशक्रदर्पजिघांसया ॥ प्रोक्तंनिशम्यनंदाद्याःसाध्वगृह्णंततद्वचः ३१ तथाचविदधुःसर्वेयथाहमधुसूदनः ॥ वाचयित्वास्वस्त्ययनंद्रव्यैर्गोवि प्रभूभृताम् ३२ उपहृत्यबलीन्सर्वानादृतायवंसगवाम् ॥ गोधनानिपुरस्कृत्यगिरिंचक्रुःप्रदक्षिणाम् ३३ अनास्यनड्युक्तानितेचारुह्यस्वलंकृताः ॥ गोप्यश्चकृष्णवीर्याणिगायंत्यःसद्विजाशिषः ३४ कृष्णस्त्वन्यतमंरूपंगोपविश्रंभणंगतः ॥ शैलोऽस्मीतिब्रुवन्भूरिबलिमादद्बृहद्वपुः ३५ तस्मैनमोव्रजज नैःसचक्रेह्यात्मनात्मने ॥ अहोपश्यतशैलोऽसौरूपीनोऽनुग्रहंव्यधात् ३६ एषोऽवजानतोमर्त्यान्कामरूपीवनेचरः ॥ हंतिह्यस्मैनमस्यामःशर्मणेआत्म नोगवाम् ३७ इत्यद्रिगोद्विजमखंवासुदेवप्रचोदिताः ॥ यथाविधायगोपालाःसहकृष्णाव्रजंययुः ३८ इतिश्रीभागवतेदशमस्कंधेद्वाविंशोऽध्यायः ॥ २२ ॥

भर्तृका २४ २५ सूपोमुद्गान्नं अंधःकेवलान्नं संयावःभिन्नयवकृतःमुद्गभिन्नौदनोवा अपूपंपिष्टकृतम् शष्कुलीपैष्टिकामंडलाकृतिः सर्वदोहःक्षीरदधितक्रादिकः २६ बहुगुणंषड्रसोपेतं २७ यवसंतृणचू चिका गिरयेगिरिसन्निहितायतस्मान्नेहरये २८ २९ ३० शक्रदर्पजिघांसयाशक्रादिदेवानांअसुरावेशादर्पादिकंभवतितदनुग्रहार्थंतद्दर्पादिहननेच्छया तदुक्तं अत्यल्पस्त्वसुरावेशोदेवानांचभाविष्यतीति ३१ ३२ ३३ ३४ गोपविश्रंभणंगोपानांविश्वासकरं आदत्भक्षितवान् ३५ तस्मैआत्मनेपर्वतरूपिणेसंकल्प्यनमनमितितत्राह अहोइति ३६ ३७ ३८ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधे विजयध्वजकृतटीकायांद्वाविंशोध्यायः ॥ २२ ॥ ॥ ७ ॥ ॥

गोवर्धनोद्धरणेनस्वनाथाःसगोधनागोपालाःइंद्रकृतापदोरक्षिताः एवंभक्तिज्ञानसंपन्नान्संसारार्तान्प्राणिनोरक्षत्येवाधोक्षजइतिप्रतिपादयितुमयमध्यायआरभ्यते तत्रमुख्यप्राणमेकमंतरेणान्येषांदेवादी नामत्यल्पासुरावेशस्तस्मिन्गतेप्रकृतिभावश्चेत्युभयंदर्शयितुमुपक्रमते इंद्रइति विहतांनिराकृतां कृष्णएवनाथोयेषांतेतथातेभ्यः क्रुधद्रुहेर्ष्यासूयार्थानांयंप्रतिकोपइतिचतुर्थी कृष्णंप्रतिचकोपंकृतवानितिसूचनायेदंविशेषणं असुरावेशंप्रकटयतीतिज्ञायतेनेन हेत्यनेनशक्रकोपेनकृष्णमाहात्म्यमेवप्रकाश्यते १ अंतकारिणांप्रलयंकुर्वतामित्यनेनभगवंतमंतरेणान्यानिवर्त्यत्वमाह सांवर्तकमिति अमुनैवजगत्क्षयकरत्वेसूचितेप्यंतकारिणामितिततदेवविशेषितं प्राचोदयत्प्रेरितवानित्यर्थः ईशंकृष्णमुद्दिश्यमन्युनाकोपेन अहमेवेशोनान्यइतिमन्युनादैत्याभिमानेनवा मन्युर्दैन्यंकृतौकुधीतियादवः २ मर्त्यंमरणधर्मत्वेनानित्यंकृष्णमुपाश्रित्यसर्वस्मादधिकाश्रयोयमितिकृत्वादेवस्यत्रैलोक्यपाक्षेनुःममहेलनंअवज्ञांकृतवंतइति अनेनेशमन्युनेत्येतद्विवृतम् ३ देवस्वभावत्वादसुरा

श्रीशुकउवाच ॥ इंद्रस्तदात्मनःपूजांविज्ञायविहतांनृप ॥ गोपेभ्यःकृष्णनाथेभ्योनंदादिभ्यश्चुकोपह १ गणंसांवर्तकंनाममेघानांचांतकारिणाम् ॥ इंद्रःप्राचोदयत्क्रुद्धोवाक्यंचाहेशमन्युना २ अहोश्रीमदमाहात्म्यंगोपानांकाननौकसाम् ॥ कृष्णंमर्त्यमुपाश्रित्ययेचक्रुर्देवहेलनम् ३ यथाऽदृढैःकर्ममयैःक्रुध्वैज्ञानमानिनः ॥ विद्यामान्वीक्षिकींहित्वातितीर्षंतिभवार्णवम् ४ वाचालंमानिनंमत्तमज्ञंपंडितमानिनम् ॥ कृष्णंमर्त्यमुपाश्रित्यगोपामेचक्रुरप्रियम् ५ एषांश्रियाऽवलिप्तानांकृष्णेनाप्यायितात्मनाम् ॥ धुनुतश्रीमदस्तंभंपशून्नयतसंक्षयम् ६ अहंचैरावतंनागमारुह्यानुव्रजेव्रजम् ॥ मरुद्गणैर्महावेगैर्नंदगोष्ठजिघांसया ७ श्रीशुकउवाच ॥ इत्थंमघवताज्ञप्तामेघानिर्मुक्तबंधनाः ॥ नंदगोकुलमासारैःपीडयामासुरोजसा ८ विद्योतमानाविद्युद्भिर्नदंतःस्तनयित्नुभिः ॥ तीव्रैर्मरुद्गणैर्नुन्नावर्षुर्जलशर्कराः ९ स्थाणुस्थूलावर्षधारामुंचत्स्वभ्रेष्वभीक्ष्णशः ॥ जलौघैःप्लाव्यमानाभूर्नादृश्यतनतोन्नतम् १० अत्यासारातिवातेनपशवोजातवेपनाः ॥ गोपागोप्यश्चशीतार्तागोविंदंशरणंययुः ११ शिरस्सुतांश्चकायेनप्रच्छाद्यासारपीडिताः ॥ वेपमानाभगवतःपादमूलमुपाययुः १२ कृष्णकृष्णमहाभागत्वन्नाथंगोकुलंप्रभो ॥ त्रातुमर्हसिदेवान्नःकुपिताद्भक्तवत्सल १३ शीतवर्षातिवातेनहन्यमानमचेतनम् ॥ निरीक्ष्यभगवान्मेनेकुपितेंद्रकृतंहरिः १४ अपर्त्तावुल्बणंवर्षमतिवातंशिलामयम् ॥ तन्मखेविहतेऽस्माभिरिंद्रोनाशायवर्षति १५

वेशोपितत्त्वमेवकथ्यतइत्याशयेनाह यथेति अदृढैरसारैःअन्यत्रक्षरद्दारुकृतैः कर्ममयैःबहुव्यापारसाध्यैःअन्यत्रतत्क्षणादिबहुकर्मसाधितैःकुत्सितैरल्पप्रयोजनैर्वाप्लवैः क्षुःपापेल्पार्थकुत्सयोरितियादवः आन्वीक्षिकीं स्वानुकूलबिंबदर्शनात्मिकांविद्यां आत्मज्ञानमित्यर्थः ४ वाचालं अस्तिचेदीश्वरःकश्चिदित्यादिशास्त्रकुत्सितभाषणं अतएववर्तंतब्रह्मणेत्यादिमानंप्रमाणमस्यास्तीतिमानिनं रजसाचोदितामेघाइत्यादिनामत्तत्वमज्ञत्वंचलभ्यते आजीव्येकतरंभावमित्यादिनापंडितमानित्वम् ५ अवलिप्तानांदृप्तानांआप्यायितात्मनांवर्धितमनसां धुनुतनिराकुरुत ६ नागंगजम् ७ निर्मुक्तबंधनाः विगलितनिगडाः त्यक्तजलस्तंभाइत्यर्थः आसारैर्धारासंपातैः वेगवद्भिर्वैरित्यर्थः ओजसास्वशक्तिलक्षणबलेन ८ स्तनयित्नुभिर्गर्जितैः स्तनयित्नुर्हिगर्जितइतियादवः जलान्येवशर्कराःश्वेतपाषाणशिलाः ९ स्थाणुवत्स्थूलाः नतोन्नतंनिम्नोच्चस्थलम् १० ११ स्वकायेनशिरश्चसुतांश्चप्रच्छाद्य १२ १३ अचेतनंनिःसंज्ञम् १४ अपर्तौअनृतौअवृष्टिसमयइत्यर्थः १५

मातावार्थपरिहारम् आत्मयोगेन आत्मसामर्थ्येन स्वनिर्मितोपायेनवा तमोऽज्ञानम् १६ अज्ञानहरणंनाकप्रयोजनामित्याशक्यससारबधनानिमित्ताहंकारनाशनार्थमित्याशयेनाह नहीति मद्भावयुक्तानांमद्भक्तियुक्तानाम् इत्थमर्थश्चेत्पाठोप्येवंकिनस्यादितिचेन्न भक्तिशब्दार्थविवरणार्थत्वात् तथाहि भावोलीलाक्रियाचेष्टाभक्त्यादिष्वर्थेषुभावशब्दप्रवृतेः भगवल्लीलादिप्रत्वप्रदर्शनेनस र्वकालंभगवत्येवमनोवृत्तिरितिप्रकाशनेनभक्तेस्तामितत्वमुक्तंस्यादिति ईशोहमितिस्मयोऽत्युल्बणदर्पोनहि सतांस्वभावमाह मत्तइति प्रशमायप्रकृष्टमन्निष्ठायै १७ ममार्थंजयस्तंभइत्याह तस्मा दिति अहमेवपरिग्रहोमूलंयस्यसतथा पत्नीस्वीकारशपथमूलेष्वपिपरिग्रहः इतिव्रतोनियमोजयस्तंभः गोपायेपालयामि १८ कृत्वाउन्मूल्यकृतीछेदने छत्राकंशिलींध्रं यथोपजोषंयथासुखम् ग र्त्तबिलम् १९ २० वातवर्षनिमित्तंभयंअलंनिवारितम् अलंतुभूषणेशक्तौपर्याप्तोविनिवारणेइतियादवः तत्राणंतस्माद्भयाद्रक्षणम् २१ कृष्णेनाश्वासितमानसाः आप्यपितमनोरथाः सोप

तत्रप्रतिविधिंसम्यगात्मयोगेनसाधये ॥ लोकेशमानिनोमौढ्याद्वरिष्येश्रीमदंतमः १६ नहिमद्भावयुक्तानांसुराणामीशविस्मयः ॥ मत्तःसतांमानभंगः प्रशमायोपपद्यते १७ तस्मान्मच्छरणंगोष्ठंमन्नाथंमत्परिग्रहम् ॥ गोपायेस्वात्मयोगेनसोऽयंमेव्रतआहितः १८ इत्युक्त्वैकेनहस्तेनकृत्वागोवर्धनाच लम् ॥ दधारलीलयाकृष्णश्छत्राकमिवबालकः १९ अथाहभगवान्गोपान्हेंऽबतातव्रजौकसः ॥ यथोपजोषंविशतगिरिगर्तंसगोधनाः २० नन्नासइहवः कार्योमद्वस्ताद्विनिपातनात्॥ वातवर्षभयंचालंतत्राणंविहितंहिवः २१तथानिर्विविशुर्गर्तंकृष्णाश्वासितमानसाः॥यथावकाशंसंधानाःसप्रजाःसोपजीवनाः २२ क्षुत्तृड्व्यथांसुखापेक्षांहित्वातैर्व्रजवासिभिः ॥ वीक्ष्यमाणोदधारार्द्रिसप्ताहंनाचलत्पदात् २३ श्रीशुकउवाच ॥ कृष्णयोगानुभावंतंनिशम्येंद्रोऽतिवि स्मितः ॥ निस्तंभोभ्रष्टसंकल्पःस्वान्मेघान्सन्यवारयत् २४ खंव्यभ्रमुदितादित्यंवातवर्षंचदारुणम् ॥ निशम्योपरतंगोपान्गोवर्धनधरोऽब्रवीत् २५ नि र्यातत्यजतत्रासंगोपाःसस्त्रीधनार्भकाः ॥ उपारतंवातवर्षंव्युदप्रायाश्चनिम्नगाः २६ ततस्तेनिर्ययुर्गोपाःस्वंस्वमादायगोधनम् ॥ शकटाटोपकरणंस्त्रबिाल स्थविराःशनैः २७ भगवानपितंशैलंस्वस्थानेपूर्ववत्प्रभुः ॥ पश्यतांसर्वभूतानांस्थापयामासलीलया २८ तंप्रेमवेगान्निभृताव्रजौकसोयथासमीयुःप रिरंभणादिभिः ॥ गोप्यश्चसस्नेहमपूजयन्मुदादध्यक्षताद्भिर्युयुजुस्तथाशिषः २९ यशोदारोहिणीनंदोरामश्चबलिनांवरः ॥ कृष्णमालिंग्ययुयुजुराशिषः स्नेहकातराः ३० दिविदेवगणाःसर्वेसिद्धगंधर्वचारणाः ॥ तुष्टुवुर्मुमुचुःसर्वेपुष्पवर्षाणिभारत ३१

जीवनाःव्रीहितंदुलादिशरीरयात्रासाधनैःसहिताः २२ सुखापेक्षाम् शयनासनवसनादिसुखसाधनश्रद्धाम् हित्वात्यक्त्वा २३ योगानुभावंयोगैश्वर्यं अनुभावःप्रभावेस्यान्निश्चयेभावसूचकइति महापुरुषान्दृष्ट्वास्थाणुवत्प्रावण्यराहित्यंस्तंभः तद्रहितोनिस्तंभः भ्रष्टसंकल्पःगलितमनोरथः २४ व्यभ्रंविगतमेघम् वातश्चवर्षश्चवातवर्षंएकवद्भावः २५ व्युदप्रायाःविगतजलप्रायाः २६ शकटाटोप करणंशकटगतमुपकरणंजीवनसाधनम् शकटाटोपकरणंचादाय गतौशकटपरिवर्तनेनाटोपकरणंसंभ्रमविधिर्यथा भवतितथेति २७ २८ प्रेमवेगात्प्रेमोद्रेकात्निभृताःनिश्चलाःपूर्णानंदावा समीयुः समाजं प्राप्ताः २९ स्नेहकातराः स्नेहकलिलांतःकरणाः ३० ३१

३२ त्वदिस्पृशःमनोहराः त्वद्भुभ्यामुपसंख्यानमित्यलुक् ३३ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेविजयध्वजकृतटीकायांत्रयोविंशोऽध्यायः ॥ २३ ॥ अनुस्मरणार्थंमाग्रेस्वाश्रितवयःसप्तवर्षपर्यंतं बालचरितमनुक्रम्यतेऽस्मिन्नध्याये तत्रश्रीशुकोगोपानांसंकथनप्रकारंकथयति एवंविधानीति येगोपाःकृष्णस्यैवंविधानिकर्माणिवीक्ष्यतत्रतत्रसाक्षाद्दृष्ट्वापितस्यकृष्णस्यवीर्यंमाहात्म्यंविदंतिजानंतितेतद्वीर्यविदोनभवंति तेगोपाःसमेत्यसंभूयप्रोचुःव्याकुर्वन्नित्यन्वयः १ बालस्यैतानिकर्माण्यत्यद्भुतानि वक्तुमशक्यानिवा इतियत्तस्मादसावात्मनःस्वस्यजुगुप्सितंग्राम्येषुविषयिजनेषुजन्म कथमर्हतिनिरूप्यमाणेनयोग्यइत्यन्वयः २ कानितानिकर्माणीतितत्राहुः यतइति बिभ्रत्अबिभ्रत् पुष्करंपद्मम् ३ तोकेनशिशुना आमीलिताक्षेण ईषत्फुल्लनेत्रेण महौजसःमहाबलायाःअधृष्या

शंखदुंदुभयोनेदुर्दिविदेवप्रचोदिताः ॥ जगुर्गंधर्वपतयस्तुंबुरुप्रमुखानृप ३२ ततोऽनुरक्तैःपशुपैःपरिश्रितोराजन्सगोष्ठंसबलोऽविशद्धरिः ॥ तथाविधान्यस्यकृतानिगोपिकागायंत्यईयुर्मुदिताहृदिस्पृशः ३३ इतिश्रीभागवतेमहापुराणेदशमस्कंधेत्रयोविंशोऽध्यायः २३ श्रीशुकउवाच ॥ एवंविधानिकर्माणिगोपाःकृष्णस्यवीक्ष्यते ॥ नतद्वीर्यविदःप्रोचुःसमुपेत्यसुविस्मिताः १ बालकस्ययदेतानिकर्माण्यत्यद्भुतानिवै ॥ कथमर्हत्यसौजन्मग्राम्येष्वात्मजुगुप्सितम् २ यःसप्तहायनोबालःकरेणैकेनलीलया ॥ कथंबिभ्रद्गिरिवरंपुष्करंगजराडिव ३ तोकेनामीलिताक्षेणपूतनायामहौजसः ॥ पीतंस्तनंसहप्राणैःकालेनेवयस्तनोः ४ हिन्वतोऽधःशयानस्यमास्यस्यचरणावुदक् ॥ अनोऽपतद्विपर्यस्तंरुदतःप्रपदाहतम् ५ एकहायनआसीनोह्रियमाणोविहायसा ॥ दैत्येनयस्तृणावर्तमहन्कंठग्रहातुरम् ६ क्वचिद्धैयंगवस्तैन्येमात्राबद्धउलूखले ॥ गच्छन्नर्जुनयोर्मध्येबाहुभ्यांतावपातयत् ७ वनेसंचारयन्वत्सान्सरामोबालकैर्वृतः ॥ हंतुकामंबकंदोर्भ्यांमुखतोऽरिमपाटयत् ८ वत्सेषुवत्सरूपेणप्रविशंतंजिघांसया ॥ हत्वान्यपातयत्तेनकपित्थानिच लीलया ९ हत्वारासभदैतेयंतद्बंधूंश्चबलान्वितः ॥ चक्रेतालवनंक्षेमंपरिपक्वफलोचितम् १० प्रलंबंघातयित्वोग्रंबलेनबलशालिना ॥ अमोचयद्व्रजपशून्गोपांश्चारण्यवह्नितः ११ आशीविषंमहारौद्रंदमित्वाविमदंह्रदात् ॥ प्रसह्योद्वास्ययमुनांचक्रेऽसौनिर्विषोदकाम् १२ दुस्त्यजश्चानुरागोऽस्मिन्सर्वेषांनोव्रजौकसाम् ॥ नंदतेतनयेऽस्मासुतस्याप्यौत्पत्तिकःकथम् १३ क्वसप्तहायनोबालःक्वमहाद्रिविधारणम् ॥ ततोनोजायतेशंकाव्रजनाथतवात्मजे १४ नंदउवाच ॥ श्रूयतांमेवचोगोपाव्येतुशंकाचवोऽर्भके ॥ एनंकुमारमुद्दिश्यगर्गोमेयदुवाचह १५

वष्टंभायावा ओजोवष्टंभबलयोरिति स्तनंपीतम् वयमद्राक्ष्मेतिशेषः कालेनांतकेन ४ चरणावुदक्ऊर्ध्वंहिन्वतः उत्क्षिपतःमास्यस्यमासमात्रवयस्कस्य प्रपदेनपादाग्रेणहतंपीडितम् ९ एकएवहायनोवर्षवत्सरोयस्यसतथा तृणावर्तमहान्नितियत्कर्मतदपि ६ हैयंगवम् हैयंगवीनम् सद्योदधिमंथनेजातंनवनीतम् तस्यस्तैन्येचौर्येसति बाहुभ्यांगच्छन्नितिसंबंधः ७ मुखतः मुखेगृहीत्वेतिशेषः अपाटयत् व्यदारयत् ८ तेनदैत्येनकपित्थानिकपित्थबीजानि फलेलुक् ९ क्षेमंप्राप्तरक्षणम् १० ११ दमित्वानिगृह्यउद्वास्यउच्चाटयित्वा १२ अनुरागोहृदयंगमः औत्पत्तिकः उत्पत्तिसिद्धःकथम् १३ ततोनोजायतेशंकेत्यादिनानतद्वीर्यविददितिस्पष्टीकृतम् १४ व्येतुविगताभवतु वःयुष्माकम् प्रसक्तकथांप्रत्यंतरंगत्वेनकथांतरमारभ्यतइतिसचनायहकारः प्रत्यारंभेप्रसिद्धौहठाविष्कारश्चथानिर्णितश्च १५

वर्णाःशुक्लाद्याः १६ क्वचिन्मथुरायांवसुदेवस्यसकाशात् अभिज्ञाः वसुदेवस्यापत्यमितितद्धितप्रत्ययज्ञानपटवः १७ नकेवलमेतदेवनामरूपत्रयमेवअपित्वन्यान्यापिसंतीत्याह बहूनीति नारायणादीनि गुणानुरूपाणि मधुसूदनादिकर्मानुरूपाणि १८ आधास्यत्आधास्यति यद्वा यदियंयमस्मिन्भक्तपुद्रिक्तंचित्तमकरिष्यन्तद्ध्येयंवःपुरुषार्थलक्षणमाधास्यत् लिङ्निमित्तेलङ्क्रियातिपत्तावितिसूत्रात्अ र्थविधिः १९ २० २१ २२ २३ आनर्चुःपूजयामासुः २४ श्रीशुकःप्रथमभागसमाप्तिसूचनायस्वेष्टदेवतांकृष्णमभिष्टुवन् ततआत्मरक्षामाशास्ते देवइति यज्ञविप्लवःयज्ञभंगइत्यर्थः तस्मादुत्पन्नयारुषा वज्राश्मवत् वज्रपाषाणवत्कर्कशैर्वर्षैःअनिलैश्चास्त्रियासहसीदंतःकंपमानाःबालाश्चपशवश्चयस्मिंस्तत्सीदद्बालपशु आत्माशरणंरक्षितायस्यतत्तथा अनुकंपीहृदयद्रवीभावयुक्तः उत्स्मयःउ द्गतस्मयः निरस्तदर्पः उत्कष्टमंदहासोवामहेंद्रस्यमदंगर्वमिनत्तिनिर्मूलयतीतिमहेंद्रमदभित् अबलोऽस्थूलः अणुर्बालःलीलासाधनमुत्फुल्लंशिलींध्रंयथा तथैकेनहस्तेनशैलंशिलोच्चयंपर्वतमुत्पाट्यबिभ्रत्

वर्णास्त्रयःकिलास्यासन्गृह्णतोऽनुयुगंतनूः ॥ शुक्लोरक्तस्तथापीतइदानींकृष्णतांगतः १६ प्रागयंवसुदेवस्यक्वचिज्जातस्तवात्मजः ॥ वासुदेवइतिश्रीमा नभिज्ञाःसंप्रचक्षते १७ बहूनिसंतिनामानिरूपाणिचसुतस्यते ॥ गुणकर्मानुरूपाणितान्यहंवेदनोजनः १८ एषवःश्रेयआधास्यद्गोपगोकुलनंदनः ॥ अनेनसर्वदुर्गाणियूयमंजस्तरिष्यथ १९ पुरानेनव्रजपतेसाधवोदस्युपीडिताः ॥ अराजकेरक्ष्यमाणाजिग्युर्दस्यून्समेधिताः २० यएतस्मिन्महाभा गेप्रीतिंकुर्वंतिमानवाः ॥ नारयोऽभिभवंत्येतान्विष्णुपक्षानिवासुराः २१ तस्मान्नंदकुमारोऽयंनारायणसमोगुणैः ॥ श्रियाकीर्त्यानुभावेनतत्कर्मसुन विस्मयः २२ इत्यद्वामांसमादिश्यगर्गेचस्वगृहंगते ॥ मन्येनारायणस्यांशंकृष्णमक्लिष्टकारिणम् २३ इतिनंदवचःश्रुत्वागर्गगीतंव्रजौकसः ॥ दृष्टश्रु तानुभावास्तेकृष्णस्यामिततेजसः ॥ मुदितानंदमानर्चुःकृष्णंचगतविस्मयाः ॥ २४ ॥ श्रीशुकउवाच ॥ देवेवर्षतियज्ञविप्लवरुषावज्राश्मवर्षानिलैः सीदद्बालपशुस्त्रियात्मशरणंदृष्ट्वानुकंप्युत्स्मयः ॥ उत्पाट्यैककरेणशैलमबलोलीलोच्छिलींध्रंयथाबिभ्रद्गोष्ठमपान्महेंद्रमदभित्प्रीयान्नइंद्रोगवाम् २५ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेचतुर्विंशोऽध्यायः ॥ २४ ॥ श्रीशुकउवाच ॥ गोवर्धनेधृतेशैलेआसाराद्रक्षितेव्रजे ॥ गोलोकादाव्रजत्कृष्णंसुरभिः शक्रएवच १ विविक्तउपसंगम्यव्रीडितःकृतहेलनः ॥ पस्पर्शपादयोरेनंकिरीटेनार्कवर्चसा २ दृष्टश्रुतानुभावोऽस्यकृष्णस्यामिततेजसः ॥ नष्टत्रिलो केशमदइदमाहकृतांजलिः ३

गवामिंद्रोगोविंदोनोऽस्मभ्यंप्रीयात्प्रीणोभवत्वित्यन्वयः पायान्नइतिपाठेनोस्मान्रक्षत्वित्यर्थः गोस्वामी गोविंदोऽधिकृतोगवामित्यमरः ॥ २५ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेविजयध्वजकृ तटीकायांचतुर्विंशोऽध्यायः ॥ २४ ॥ तस्मिन्नप्यसुरावेशेगतेप्रकृतिरेवत्रितिवचनात् देवस्वभावप्रकटनपूर्वंकंसुरभिक्षीराभिषेकेणशक्रस्तुत्याचहरिमाहात्म्यस्यातिसिद्धत्वान्मुमुक्षुभिस्तस्मिन्नतिशयितं प्रेमाविधेयमित्यस्याध्यायस्यारंभः तत्रसुरभिंद्रियोरागमनंकथयति गोवर्धनइति गोलोकाद्वाप्यधिकृतस्थानात्सुरभिः इंद्रस्तुस्वर्गलोकात् दिग्दृष्टिदीधितिस्वर्गवज्रवाग्बाणवारिषु भूमौपशौचविद्वद्विर्गो शब्दोदशसुस्मृतइतिहलायुधः योहरेर्विरोधमाचरत्सएवात्रजदित्यन्वयः १ विविक्तेएकांते विजिरूपृथग्भावइतिधातुः जनसंमर्दराहित्यस्थलइत्यर्थः२ इदानींदृष्टःपूर्वंश्रुतोऽनुभावोयेनसतथा इंद्रइदमाह ३

कीदृशंतत्राह विशुद्धेति अहंतवधामगृहस्थानीयंस्वरूपंशरणंप्रपद्यइतिशेषः अनंतपदार्थराशिंगृह्णातीतिगृहं ननुगृहवत्सत्त्वादिगुणदारुभीरचितंचेत्कालांतरेजीर्णंस्यादित्यत्राह विशुद्धेति विगतंशुद्धसत्त्वंरजसस्तमोमिश्ररहितंकेवलसत्त्वगुणोयस्मात्तथा चारुतरपदार्थै कुशलपुरुषेणरचितंनचेन्नयनसुभगंनस्यादित्यत्राह शांतमिति 'शांतंमंगलंशांतिःप्रशममंगलइति अतएवसुखनिष्ठत्वाक्षोभरहितंवा नन्वेवंचेत्पाषाणाकल्पमित्यत्राह तपोमयमिति ज्ञानात्मकंयदासत्त्वमापिनसंबध्यतेतदारजःसंबंधोनास्तीतिकिंवक्तव्यमितिभावेनाह ध्वस्तेति अत्रलिंगमाह मायामयइति यत्रत्वयिअयंमायामयः भगवादिच्छानिमित्तगुणसंप्रवाहः त्रिगुणसंबंधोनविद्यते यस्मात्तस्मादितिशेषः विदसत्तायामितिधातोः जीववत्तत्संबंधोनास्ति किंतुसृष्ट्यादौप्रेरकत्वसंबंधोस्तीतिकृत्वानविद्यतइति कीदृशःअग्रहणानुबंधःअग्रहणमाग्रहःसएवानुबंधोगुणभूतोयस्यसतथा यद्वायत्रगुणसंप्रवाहेअग्रहणंअज्ञानमनुबध्नातीत्यग्रहणानुबंधः अनेनकार्याभावेकारणाभावोऽनुमीयतेइतिसूचितं ४ ननुखलेनपर्षान्प्रातिहन्मिभूरिकिंमानिंदंतिशत्रवोनिंद्राइतिश्रुतेः हरेःकामक्रोधादिदर्शनालोभाद्यभावःकथंकथ्यतइत्यत्राह कुतइति तेगुणाः हेतवोनिमित्तानियेषांतेतद्धेतवः नविद्यंतइतिकुतोनुकिंवक्तव्यमित्यर्थः यद्वातस्यसंसारहेतवःकुतःकल्प्यंतइतिशेषः अबुधस्याज्ञानिनःलिंगभावाःलक्षणभूताः अत्रकारणाभावात्कार्याभावानुमानंचद्रष्टव्यमित्यर्थःयद्यपितवगुणानिमित्ताःकामादयोनसांतितथापिशास्त्रविहिताअदोषकरत्वात्संतीत्याशयेनाह अथापीति दंडंशासनंहिंसावा दंडोऽस्त्रीशासनेराज्ञांहिंसायांलगुडेगुणइतियादवः विशुद्धसत्वंनिर्मलसत्वगुणयुक्तंइत्याद्यपव्याख्यानप्रत्याख्यानायविगतशुद्धसत्वमित्यादिव्याख्यातमाचा

इंद्रउवाच ॥ विशुद्धसत्त्वंतवधामशांततपोमयंध्वस्तरजस्तमस्कम् ॥ मायामयोयंगुणसंप्रवाहोनविद्यतेतेऽग्रहणानुबंधः ४ कुतोनुतद्धेतवईशमन्युलोभादयोयेऽबुधलिंगभावाः ॥ अथापिदंडंभगवान्बिभर्तिधर्मस्यगुप्त्यैखलनिग्रहाय ५ पितागुरुस्त्वंजगतामधीशोदुरत्ययःकालउपात्तदंडः ॥हितायचेच्छातनुभिःसमीहसेमानंविधुन्वन्जगदीशमानिनाम् ६ येमद्विधाःस्युर्जगदीशमानिनस्त्वांवीक्ष्यकालेऽभयमाशुतंमदम् ॥ हित्वार्यमार्गंप्रभजंत्यपरमयाईहाखलानामपितेऽनुशासनम् ७ सत्वंममैश्वर्यमदप्लुतस्यकृतागसस्तेऽविदुषःप्रभावम् ॥ क्षंतुंप्रभोयार्हसिमूढचेतसोमैवंपुनर्मन्मतिरीशमेऽस्तु ८ तवावतारोऽयमधोक्षजेहभुवोभराणामुरुभारजन्मनाम् ॥ चमूपतीनामभवायदेवभवाययुष्मच्चरणानुवर्तिनाम् ९ नमस्तुभ्यंभगवतेपुरुषायमहात्मने ॥ वासुदेवायकृष्णायसात्वतांपतयेनमः १० स्वच्छंदेनात्तदेहायविशुद्धज्ञानमूर्त्तये ॥ सर्वस्मैसर्वबीजायसर्वभूतात्मनेनमः ११

यैः सत्वगुणांगीकारेमायामयोयंगुणसंप्रवाहोनविद्यतइत्येतद्वचाहतंस्यादितिपश्यद्भिरितिअसच्छासनेनधर्मस्थापनंप्रयोजनंसच्छिक्षणेनकिंफलंस्यात् किंचउभयेषांशासकाउभयेतौनैकइतीयंशंका असतांचसतांचैवहरिरेवानुशासकः सतांतुश्रेयसेसैवह्यनुशास्तिर्भविष्यतीत्याग्नेयवचनेनपरिहर्तव्येति ५ पितृत्वाद्गुरुत्वात्स्वामित्वाच्चहरेरेकस्यैवानुशासकत्वंनान्यस्येत्याशयेनाह पितेति पुण्यपापफलपाचकत्वेनउपात्तदंडःगृहीतशासनः हितायसतामितिशेषः गुरुरात्मवतांशास्ताशास्तारोजादुरात्मनां इहप्रच्छन्नपापानांशास्तावैवस्वतोयमइत्येतन्निरस्तमितिज्ञातव्यम् ६ सतामनुशासनंश्रेयसइत्यभिप्रेतंतदिदानींव्यक्तमाह यइति हेजगदीशमद्विधामानिनःस्युःतेकालेअसुरावेशनिर्मोकसमयेप्राप्तेअभयंत्वांवीक्ष्य अस्मन्मदनिर्मूलनवीर्यंत्वांदृष्ट्वायेनमदेनत्वदपराधमकार्ष्म तंमदंहित्वाअपस्मयाः निरस्तगर्वाः आर्यमार्गंविद्वज्जनासिद्धांतंप्रभजंति नकेवलमस्माकंतवेहानुशासनं खलानामपीत्याह ईहेति ७ तत्रकर्तव्यंप्रार्थयते सत्वमिति अविदुषःअज्ञस्य ८ सतांभवायपुण्यलक्षणभद्रायदेवदत्तवज्जननंभजतोहरेरवतारःकथंभवायस्यादितीदं आवेशोवसुदेवादौदेहादानंहरेःस्मृतमित्यादिपाद्मवचनेनपरिहर्तव्यम् ९ १० नकेवलंग्रंथांतरासिद्धमिदंअत्रापीत्याशयेनाह स्वच्छंदेनेति स्वच्छंदेनस्वेच्छया सर्वस्मै सर्वव्यापिने सर्वबीजायसर्वस्यमूलकारणाय ११

आसारसहितवायुभिः १२ ध्वस्तस्तंभःनिरस्तस्थूलस्वभावः १३ मघानाइंद्रण १४ ऊकारेकृतः हमघवन्इंद्र १५ पणव्यवहारइतिधातोः हानादिव्यवहारसाधनत्वात्पाणःहस्तः दंडपाणयमया भ्रंशयामिविस्रस्तंकरोमि चशब्दएवार्थे अनुग्रहमेव नान्याद्वित्तादिकं अनुग्रहानंतरमविनश्वरसंपदश्चेतिसमुच्चयेवा ऐश्वर्यमीश्वरत्वं गवादिसमृद्धिःश्रीराभ्यामुद्धतेनमदेनांधः ज्ञानलक्षणचक्षूरहितः १६ मयिमनसायुक्तैः अनित्यैश्वर्यादौविस्रंभवर्जितैःभवद्भिःस्वाधिकारेषुत्रैलोक्यरक्षणादिपुस्थीयताम् १७ अथशब्दःकथारंभे मनस्विनीशुद्धमनाः स्वसंतानैःस्ववंशजातगोभिः सहेतिशेषः १८ वि श्वात्मन्विश्वव्यापिन् सनाथाःकृताःस्मइति १९ नोऽस्माकं परमकं अत्युत्तममिष्टदेवं इंद्रःईश्वरः देवानांदेवजातीनां येचसाधवःऋष्यादयःतेषांभवायभद्रलक्षणायश्रेयसे २० नःइंद्रंस्वामिनंत्वाम्२१

मयेदंभगवन्गोष्ठनाशायासारवायुभिः ॥ चेष्टितंविहतेयज्ञेमानिनातीव्रमन्युना १२ त्वयेशानुगृहीतोऽस्मिध्वस्तस्तंभोवृथोद्यमः ॥ ईश्वरंगुरुमात्मानंत्वा महंशरणंगतः १३ एवंसंकीर्तितःकृष्णोमघोनाभगवानमुम् ॥ मेघगंभीरयावाचाप्रहसन्निदमब्रवीत् १४ श्रीभगवानुवाच ॥ मयातेऽकारिमघवन्मख भंगोऽनुगृह्णता ॥ मदनुस्मृतयेनित्यंमत्तस्येंद्रश्रियाभृशम् १५ मामैश्वर्यश्रीमदांधोदंडपाणिं नपश्यति ॥ तंभ्रंशयामिसंपद्भ्योयस्यचेच्छाम्यनुग्रहम् १६ गम्यतांशक्रभद्रंतेक्रियतांमेऽनुशासनम् ॥ स्थीयतांस्वाधिकारेषुयुक्तैर्विस्रंभवर्जितैः १७ अथाहसुरभिःकृष्णमभिवंद्यमनस्विनी ॥ स्वसंतानैरुपामंत्र्यगोपरूपिणमीश्वरम् १८ सुरभिरुवाच ॥ कृष्णकृष्णमहायोगिन्विश्वात्मन्विश्वसंभव ॥ भवतालोकनाथेनसनाथावयमच्युत १९ त्वंनःपरमकंदैवंत्वंन इंद्रोजगत्पते ॥ भवायभवगोविप्रदेवानांयेचसाधवः २० इंद्रंनस्त्वाभिषेक्ष्यामोब्रह्मणाचोदितावयम् ॥ अवतीर्णोऽसिविश्वात्मन्भूमेर्भारापनुत्तये २१ एवंकृष्णमुपामंत्र्यसुरभिःपयसात्मनः ॥ जलैश्चाकाशगंगायाऐरावतकरोद्धृतैः २२ इंद्रःसुरर्षिभिःसाकंचोदितोदेवमातृभिः ॥ अभ्यषिंचतदाशार्हंगोविं दइतिचाभ्यधात् २३ तत्रागतास्तुंबुरुनारदादयोगंधर्वविद्याधरसिद्धचारणाः ॥ जगुर्यशोलोकमलापहंहरेःसुरांगनाःसंननृतुर्मुदान्विताः २४ तंतुष्टुवुर्देवनिकायकेतवोव्यवाकिरंश्चाद्भुतपुष्पवृष्टिभिः ॥ लोकाःपरांनिर्वृतिमाप्नुवंस्त्रयोगावस्तदागामनयन्पयोद्रुताम् २५ नानारसौघाःसरितोवृक्षाआसन्मधुस्रवाः ॥ अकृष्टपच्यौषधयोगिरयोऽबिभ्रन्नुन्मणीन् ॥ कृष्णेभिषिक्तएतानिसर्वाणिकुरुनंदन २६ निर्वैराण्यभवंस्तात क्रूराण्यपिनिसर्गतः २७ इति गोगोकुलपतिंगोविंदमभिषिच्यसः ॥ अनुज्ञातोययौशक्रोवृतोदेवादिभिर्दिवम् २८ इतिश्रीभागवतेमहापुराणेदशमस्कंधेपंचविंशोध्यायः ॥ २५ ॥ ॥

सुरभिःआत्मनःपयसा २२ दाशार्हंदशार्हकुलतिलकं दाशंसुस्रादिदानमर्हतीतिवा अभ्यषिंचतदेवमातृभिश्चोदितइंद्रश्चसुरर्षिभिःसार्धमाकाशगंगायाजलैःकृष्णमभ्यषिंचदित्यन्वयः गोविंदः गोर्विंदोलाभोयस्यसः आलभतइतिवा गोविंदइत्यभ्यधात् अभिधानंकृतवांश्च २३ संननृतु समीचिनंनृत्यंचक्रुः २४ देवनिकायानांकेतवः श्रेष्ठाः गांभूमिंपयसाद्रुतांपरिद्रुतां अनयन्प्रापयामासुः २५ मधुमधुररसंस्रवंत्यः ॥ उन्मणीन्अबिभ्रन्भृतवंतः २६ २७ २८ इतिश्रीभागवतेमहापुराणेदशमस्कंधेविजयध्वजकृतटीकायांपंचविंशोध्यायः ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥

भक्तजनानुकंपार्थोयमवतारोनात्मार्थइतिदर्शयितुंवरुणपाशान्नंदगोपमोचननंदादीनांस्वलोकप्रदर्शनंचकथयत्यास्मिन्नध्याये शुकइति तत्रवरुणपाशग्रहणंकथंनंदस्याभूदितीदंवक्तुमारभते एकादश्यामिति व्रतघ्नाहारोनास्तीतिनिराहारः १ आसुरींवेलांनिशीथकालम् २ वरुणभृत्येनाहृतमपिवरुणाहृतामितिवचनम् वरुणस्यस्वामित्वात् भृत्यापराधेस्वामिनोदंडइतियथातथायुज्यतइत्यर्थः ३ ४ मेमयाविधृतोदेहोऽद्यसफलोजातइतिशेषः अर्थःपुरुषार्थःकथंतदितितत्राह यत्पादेति अध्वनःपारंसंसारसमुद्रस्यमार्गस्यतीरांतरम् अद्धावात्यनेनेत्यध्वा ५ ब्रह्मणेदेशादितोऽपरिच्छिन्नाय लोकदृष्टिविकल्पयतीतिलोकदृष्टिविकल्पना विपरीतज्ञानापादिकेत्यर्थः मायाबंधकशक्तिःपरमात्मनेउत्कृष्टानंदस्यदात्रे ६ अकार्यवेदिनाकार्यज्ञानीनभवतीति ७ ८ बंधूनांचमुदमवहत् ९ अतींद्रियंइंद्रिया विषयम् १० नंदवर्णितकृष्णमाहात्म्यंश्रुत्वागोपानांबुद्धौकिमन्ववर्ततततत्राह तइति तुशब्दोवधारणार्थोविशेषार्थोवा औत्सुक्यधियः पूर्वस्माद्विशिष्टभक्त्याहृतबुद्धयः तेगोपाःतंकृष्णमधीश्वरं

श्रीशुकउवाच ॥ एकादश्यांनिराहारःसमभ्यर्च्यजनार्दनम् ॥ स्नातुंनंदस्तुकालिंद्याद्वादश्यांजलमाविशत् १ तंगृहीत्वानयद्भृत्योवरुणस्यासुरोऽतिकम् अविज्ञायासुरींवेलांप्रविष्टमुदकंनिशि २ गोपालास्तमपश्यंतःकृष्णरामेतिचुक्रुशुः ॥ भगवांस्तदुपश्रुत्यपितरंवरुणाहृतम् ३ तदंतिकंगतोराजन्स्वानामभयदोविभुः ॥ प्राप्तंवीक्ष्यहृषीकेशंलोकपालःसपर्यया ४ महत्यापूजयित्वाहतद्दर्शनमहोत्सवः ॥ वरुणउवाच ॥ अद्यमेविधृतोदेहअद्यार्थोऽधिगतःप्रभो ॥ यत्पादभाजोभगवन्नवापुःपारमध्वनः ५ नमस्तुभ्यंभगवतेब्रह्मणेपरमात्मने ॥ नयत्रश्रूयतेमायालोकदृष्टिविकल्पना ६ अजानतामामकेनमूढेनाकार्यवेदिना ॥ जानतोऽयंतवपितातत्प्रभोक्षंतुमर्हसि ७ गोविंदनीयतामेषपितातेमामकाहृतः ॥ ममाप्यनुग्रहंकृष्णकर्तुमर्हस्यशेषदृक् ८ श्रीशुकउवाच ॥ एवंप्रसादितःकृष्णोभगवानखिलेश्वरः ॥ आदायागात्स्वपितरंबंधूनांचावहन्मुदम् ९ नंदस्त्वतींद्रियंदृष्ट्वालोकपालमहोदयम् ॥ कृष्णेचसन्नतितेषांज्ञातिभ्योविस्मितोऽब्रवीत् १० तेत्वौत्सुक्यधियोराजन्मत्वागोपास्त्वधीश्वरम् ॥ अपिनःस्वगतिंसूक्ष्मामुपाधास्यदधीश्वरः ११ इतिस्वानांसभगवान्विज्ञायाखिलदृक्स्वयम् ॥ संकल्पसिद्धयेतेषांकृपयेदमचिंतयत् १२ जनोवैलोकएतस्मिन्नविद्याकामकर्मभिः ॥ उच्चावचासुगतिषुनवेदस्वगतिंभ्रमन् १३ इतिसंचिंत्यभगवान्महाकारुणिकोविभुः ॥ दर्शयामासलोकंस्वंगोपानांतमसःपरम् १४ तेतुब्रह्महृदंनीतामग्नाःकृष्णमचक्षत ॥ ददृशुर्ब्रह्मणोलोकंयत्राऽक्रूरोध्यगात्पुरा १५

ब्रह्मादेरप्यधिकंईश्वरमेवंमत्वाज्ञात्वा एषोधीश्वरोनोस्माकंइष्टमकरिष्यत् तर्हिसूक्ष्मामतींद्रियांस्वगतिंस्वस्थानमप्युपाधास्यददर्शयिष्यदिति ११ बुद्ध्यामनीषितंएवंकथमवगतमित्यतःकृष्णचिंतनेनावसीयतइत्याशयेनाह इतीति स्वानामितिसर्वनामसंज्ञामंतरेणप्रयोगोज्ञानित्वविशेषद्योतनाय स्वानांज्ञातीनांहार्दंविज्ञाय तत्रहेतुरखिलदृगिति १२ सन्निहितत्वादिदमित्युक्तंविवृणोति जनइति एतस्मिन्लोकेसांसारिकसंचारस्थानेअविद्याकामकर्मादिभिर्भ्रमन्परिवर्तमानोतएवउच्चावचासुउत्कृष्टापकृष्टासुगतिषुपतितोजनःस्वांगतिंगम्यतइतिगतिः स्वींबंबभूतोनारायणस्तंस्वस्वरूपंचनवेद नजानातीति १३ संचिंत्यगोपानुद्दिश्यलोकंवैकुंठं कीदृशंतमसप्रकृतेःपरंव्यतिरिक्तं अप्राकृतमित्यर्थः १४ तेगोपास्तंलोकंददृशुः कस्येत्यतउक्तंब्रह्मणइति अनेनकृष्णब्रह्मणोरैक्यंसूचितं शून्यागारमिवापश्यन्निततत्राह कृष्णमिति तस्मिन्लोकेकृष्णंचापश्यन्नित्यर्थः १५

किंविशिष्टकृष्णमित्यतस्त्राह सत्यमिति सत्यमबाधितम् जानातीतिज्ञानस्वरूपं अतस्त्रपशून्य भावनाशंका यत् ब्रह्मवाक्यशिष्टसत्यज्ञानमनन्तब्रह्मातिरिक्तं पञ्चज्यातिःस्वयमकाशमानपरज्योतिः रूपंसंपद्येतिश्रुतिवेदितं यच्चसनातनंसदैकप्रकारं अजोनित्यःशाश्वतोऽयंपुराणइतिश्रौतं यच्चसमाहिताःमुनयोगुणापायेसत्त्वादि गुणनिवृत्तौआवरणाभावात्पश्यंति हिरण्मयेपरेकोशेविरजंब्रह्मनिष्कलं तच्छुभंज्योतिषांज्योतिस्तद्यदात्मविदोविदुरित्यादिश्रुतिशतंहिशब्देनगृहीतं एवंविधगुणविशिष्टंब्रह्मशब्दवाच्यंकृष्णमचक्षतेतिसंबंधः किंविशिष्टागोपाःपुराऽक्रूरोयत्रह्रदेमग्नः ब्रह्मकृष्णात्मकंअध्य गात्अधिगतवान् चक्षुषाऽपश्यत् द्रक्ष्यतीतिभूतपूर्वत्वेनव्यपदेशःकथायाश्चकवद्वर्त्तमानार्थस्तस्माद्ब्रह्मसौम्यधानात्ह्रदान्मग्नाःस्नाताः अत्रेतिहासमाचक्षते यदिपरब्रह्मत्वंतर्हिनःस्वलोकंदर्श येतिगोपैःप्रार्थितेनकृष्णेनचउक्तंयदियुष्माकंमल्लोकदिदृक्षातर्हिशुद्धेनचक्षुषाभाव्यंतदर्थमस्याः कालिंद्याःह्रदेमज्जनानंतरंद्रक्ष्यथेत्युदितास्तेतथाकृत्वाशुद्धचक्षुषातल्लोकंतत्रस्थितंसत्यादिगुणविशिष्टं ब्रह्माभिन्नंकृष्णमपश्यन्निति १६ एतदेवस्पष्टमाह नंदादयइति तुशब्दोयमभेदंव्यक्ति १७ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेविजयध्वजकृतटीकायांषड्विंशोऽध्यायः ॥ २६ ॥ निर्दोषभक्तिजनितब्र ह्मज्ञानमेवमुक्तिसाधनमितियाशास्त्रतात्पर्यार्थनिधारणातदर्थमर्थवादंवदत्यास्मिन्नध्याये तत्रवैकुंठदर्शनानंतरंकःकथाप्रसंगइतितत्राह भगवानपीति यद्रात्रिमुखेलोकदर्शनंतांरात्रिं शारदेनशरद्भ

सत्यंज्ञानमनंतंयद्ब्रह्मज्योतिःसनातनम् ॥ यद्विपश्यंतिमुनयोगुणापायेसमाहिताः १६ नंदादयस्तुतंदृष्ट्वापरमानंदनिर्वृताः ॥ कृष्णंचतत्रच्छंदोभिःस्तूय मानंसुविस्मिताः १७ इतिश्रीभागवतेमहापुराणेदशमस्कंधेपूर्वार्धेषड्विंशोध्यायः ॥ २६ ॥ श्रीशुकउवाच ॥ भगवानपितांरात्रिंशारदोत्फुल्लमल्लिकाम् ॥ वीक्ष्यरंतुंमनश्चक्रेयोगमायामुपाश्रितः १ तदोडुराजःककुभःकरैर्मुखंप्राच्याविलिंपन्नरुणैश्वशंतमैः ॥ सचर्षणीनामुदगाच्छुचोमृजन्प्रियःप्रियायाइव दीर्घदर्शनः २ दृष्ट्वामुकुंदस्तमखंडमंडलंरामाननाभंनवकुंकुमारुणम् ॥ वनंचतत्कोमलगोभिरंजितंजगौकलंवामदृशांमनोरमम् ३ निशम्यगीतंतदनंगवर्ध नंव्रजस्त्रियःकृष्णनिषिक्तमानसाः ॥ आजग्मुरन्योन्यमलक्षिताशयाःसयत्रकार्तस्वरलोलकुंडलाः ४

संबंधिनाकालेनउत्फुल्लाविकसितामल्लिकानवमल्लिकायस्यांसातां योगमायांस्वरूपसामर्थ्यं १ उडुराजश्चंद्रःप्राच्याःककुभोदिशःमुखंशंतमैःसुखकरैःकुंकुमपुष्पवदरुणैः कुभमंदायांगतावितिधातोः ककुबितियोगात्मकःशब्दः भृशंमंदगामिन्याःप्राच्याःसौंदर्यातिशयेनपूज्यायास्त्रियोमुखंयौवनातिशयेन उडुकल्पस्यजनस्यानुरागजनकत्वेनराजशब्दवाच्यःपुरुषःशंतमेनारुणेनकरेणहस्तेनकलहो द्भूतदुःखाश्रुकलिलंयथाविलिंपतिनिर्माष्टितथेतिशब्दाक्षिप्तइतिशेषः कीदृशःउडुराजःचर्षणीनांसस्यानां खरकिरणसंतापम्लानलक्षणाःशुचःमृजन्परिहरन्हिमकिरणकरेणपाणिनावा दीर्घदर्शनः दीर्घकालादर्शनंयस्यसतथा अन्यत्रबहुकालप्रवासेनदृष्टिमार्गंप्राप्तःप्रियोभर्तादर्शनीयोवा २ मुकुंदःअखंडमंडलंपूर्णमंडलं रामस्यबलभद्रस्याननमिवशोभमानंरामाणामाननमिवरमणीयंनवकुं कुमपुष्पवदरुणम् तमुडुराजंदृष्ट्वातरयचंद्रस्यकोमलगोभिःमृदुतररश्मिभिःरंजितंमंडितम् वामदृशांस्त्रीणांमनोरमंमनोहरम् वनंसेवायोग्यस्थलंचदृष्ट्वाकलमव्यक्तमधुरस्वरंजगवित्यन्वयः ३ अनंगवर्ध नंकामोद्रेककारणम् अन्योन्यंपरस्परमलक्षिताशयाः अज्ञातमनोभावाः पूर्वमदृष्टवनस्थानावा सकृष्णोयत्रास्तेतत्रेतिशेषःकार्तस्वरंसुवर्णंतेनरचितानिलोलानिकुंडलानियासांतास्तथा ४

तदातासांभावविशेषंकथयति दुहंत्यइति दोहनक्रियांदोहनपात्रंवाअधिश्रित्यपयःश्रपयितुंचुल्ल्यामारोप्य संयावंकथदन्नमनुद्वास्यअनवरोप्य ५ परिवेषयंत्यःभुंजानानांपात्रेषुभोक्तव्यंविनिक्षिपंत्यः तत्परिवेषणम् पाययंत्यःस्तनादिकमितिशेषः पादमर्दनादिनाशुश्रूषंत्यः ६ प्रमृजंत्यःशरीरोन्मार्जनंकुर्वत्यः स्थानसंमार्जनंवा अंजंत्योमण्यादिना मुखकंठादिष्वाभरणादिदधानाः कंठादिषुवस्त्राणिवसा नाइतिव्यत्यस्तवस्त्राभरणाः ७ वार्यमाणानिरोध्यमानागोविंदेनापत्दताआकृष्टाआत्मानोमनांसियासांतास्तथा ८ अलब्धविनिर्गमाःनलब्धंविनिर्गमनंयाभिस्तास्तथा तस्यकृष्णस्यभावनयाभक्तिसंस्कारे णयुक्ताः ९ काश्चनताःस्त्रियःगुणमयंसत्त्वादिगुणविकृतदेहंजहुरित्यन्वयः अयंदेहत्यागःसंसारिणइवनकिंतुमुच्यमानस्येवेत्याह सद्यइति बंधनध्वंसोपिप्रारब्धपुण्यपापप्रणाशेनदृष्टत्वात्तत्रापितथै वेत्याह दुःसहेतिदुःसहःसोढुमशक्यःप्रेष्ठत्यकृष्णस्यविरहःसांसारिकोवियोगस्तेनोत्पन्नस्तीव्रतापः अत्युत्कटज्वरानुभवःतेनधुताशुभाःनिरस्तपापाः ध्यानेनप्राप्तःअच्युतस्याश्लेषःध्यानप्राप्ताच्युताश्लेषः तेनउद्भूतयानिर्वृत्यास्वरूपानंदाविर्भावलक्षणयाक्षीणानिप्रारब्धानिमंगलानिपुण्यानियाभिस्ताःतथा १० अनारब्धफलानांकुतोनिर्वृतिरितितत्राह तमितिजारउपपतिःपत्युरप्यधिकइतिसंभावितस्तंकृष्णं परमात्मानंनारायणमेवसंगताःसम्यग्ज्ञातवत्यः अनेनबिंबभूतहरिज्ञानेनप्रारब्धप्रणाशइतिसूचितं ११ जारबुद्ध्यापिसंगताइत्युक्तंस्यतात्पर्यमजानन्निवराजापृच्छति कृष्णमिति गोप्यःकृष्णंपरंकां

दुहंत्योऽभिययुःकाश्चिद्दोहंहित्वासमुत्सुकाः ॥ पयोऽधिश्रित्यसंयावमनुद्वास्यापराययुः ५ परिवेषयंत्यस्तद्धित्वापाययंत्यःशिशून्पयः ॥ शुश्रूषंत्यःपती न्काश्चिदश्नंत्योऽपास्यभोजनम् ६ लिंपंत्यःप्रमृजंत्योन्याअंजंत्यःकाश्चलोचने ॥ व्यत्यस्तवस्त्राभरणाःकाश्चित्कृष्णांतिकंययुः ७ तावार्यमाणाःपतिभिः पितृभिर्भ्रातृबंधुभिः ॥ गोविंदापहृतात्मानोनान्यवर्तंतयोषितः ८ अंतर्गृहगताःकाश्चिद्गोप्योऽलब्धविनिर्गमाः ॥ कृष्णंतद्भावनायुक्तादध्युर्मीलितलोच नाः ९ दुःसहप्रेष्ठविरहतीव्रतापधुताशुभाः ॥ ध्यानप्राप्ताच्युताश्लेषनिर्वृत्याक्षीणमंगलाः १० तमेवपरमात्मानंजारबुद्ध्यापिसंगताः ॥ जहुर्गुणमयंदेहंसद्यःप्र क्षीणबंधनाः ११ ॥ राजोवाच ॥ कृष्णंविदुःपरंकांतंनतुब्रह्मतयामुने ॥ गुणप्रवाहोपरमस्तासांगुणधियांकथम् १२ ॥ श्रीशुकउवाच ॥ उक्तंपुरस्तादेतत्ते चैद्यःसिद्धिंयथागतः ॥ द्विषन्नपिहृषीकेशंकिमुताधोक्षजप्रियाः १३

तंजारंपतिंविदुःब्रह्मतयाश्रुतिशतगीतपरब्रह्मत्वेननविदुःअनधिकारित्वात् याएवंविधास्तासांगुणेषुविषयेषुधीर्बुद्धिर्यासांतास्तथा गुणप्रवाहोपरमःसंसारप्रवाहनिवृत्तिःकथंसंभाव्यतेनिवृतिमार्गलभ्या प्रवृत्तिमार्गेणकथंसंसारनिवृत्तिःस्यादिति उत्तिष्ठतजाग्रतेतिश्रुतेः १२ भक्त्यासंततमधुमथनमहिमासंस्मरणसमुदितसंविदानिवृत्तियोग्यामुक्तिर्नतुकामादिना तेनस्वर्गादिप्राप्तिरेवकृष्णकामास्तदागो प्यस्त्वक्त्वादेहंदिवंगताइत्यादिस्मृतेरित्यभिप्रायंहृदिकृत्वार्थवादस्यापिस्वार्थसाधनसमर्थकत्वात्तेनचोद्यंपरिहरतिशुकः उक्तमिति द्वेमुक्तीच्छानंदानुभवलक्षणानित्यदुःखानुभवलक्षणेवि तेऽपिसिद्धि शब्दोक्ते तत्रयथाशास्त्रविहितमंगीकर्तव्यमिति तदुक्तम् सदाद्वेषिणामधरंतमःइतिमुक्तिशब्दोदितंचैद्यप्रभृतावित्यादि लोकसंग्रहार्थंकिमुताधोक्षजप्रियाइति अन्यथाकाम्यस्त्वशुभकृच्चापिभक्त्या विष्णोःप्रसादकृदित्यादिनोदाहरिष्यत् जगत्प्रपितामहेविष्णौजारबुद्धिःकथंघटतइतिचेत् अतएवजारबुद्ध्यापीत्यत्रापिपदेनजारबुद्धिंगर्हयामास स्त्रीणांजारेहिप्रेष्ठत्वबुद्धिःसापिनघटतइतिचेत्तनस वैषांहरौप्रेष्ठत्वबुद्धेरविगाहतयावृत्तेस्तदेतत्प्रेयइतिश्रुतेः अयंभावःकृतोवगतइतिचेन्न जगत्प्रपितामहेजारबुद्धिर्नयुक्तेत्याचार्यवचनात् १३

नन्वाचार्यस्यापियथास्थितग्रंथाभिप्रायकथनंविनावक्रगत्याव्याख्यानेकोभिप्रायइत्याशंक्योत्तरग्रंथानुकूल्यादित्याशयेनाह नृणामिति व्यक्तिरवतारःअन्यथावतारोनघटतइत्यत्रहेतुमाह अव्यक्तस्येति ज्ञानादिगुणात्मनः भगवतोव्यक्तिर्नकेवलमसुरनिर्हरणार्थायकिंतुमोक्षलक्षणपुरुषार्थाय पुरुषार्थस्तुभगवत्प्रसादनस्यात्सचभक्त्या साहरेर्यथास्वरूपविज्ञानेन स्वरूपविज्ञानंचगुणोत्कर्षज्ञानपूर्वकं नत्वन्यथा गुणोत्कर्षज्ञातारियादृशीस्यादितिश्रुतेः तस्माद्वेषादिनानित्यसुखानंदानुभवलक्षणमोक्षोवर्धानस्येनापिनस्यात् १४ नन्वेवंतर्हिद्वेषादिनाकांसिद्धिमाप्नोतीतितत्राह कामामिति येहरौ कामादिकंविदधतउपासतेतेतन्मयतांयांति कामाद्यात्मतामाप्नुवंतिनतुभगवन्मयतां नित्यस्तिमितानंदवारिधेःहरेः कामाद्यभावाद्विशब्दो यंयंवापिस्मरन्भावंत्यजत्यंतेकलेवरं तंतमेवैतिकौंतेयसदात द्भावभावितइत्यादिस्मृतिसूचयति अवधारणार्थोवा कामिनःकामित्वमेवक्रोधिनःक्रोधित्वमेवेत्यादि तदुक्तं विमुक्तावपिकामिन्योविष्णुकामाव्रजस्त्रियः द्वेषिणश्चहरौनित्यंद्वेषिणस्तमसिस्थिताइति विशेषद्योतकोवा तदुक्तं भक्त्याहिनित्यकामित्वंनतुभक्तिंविनाभवेत् अंतःकांततयावापिमुक्तिर्भक्तिमतांहरावितिच मनुष्यविशेषवद्देवविशेषद्योतनार्थोपिभवति स्नेहभक्ताःसदादेवाःकामित्वेनाप्सरस्त्रियइत्यादेर्भक्त्यैवमोक्षोनान्येनसाधनेनेममर्थंविशेषंचवक्ति भक्त्यावाकामभक्त्यावामोक्षोनान्येनकेनचिदित्यतःकामभक्त्यामोक्षंस्त्रीणांवक्ति कामभक्त्याप्सरस्त्रीणामित्यादेःउपासनायाःविशेषो स्तीतिसूचयति उपास्यःश्वशुरत्वेनदेवःस्त्रीणांजनार्दनइत्यादेः तत्तद्योग्यतोपासनामंतरेणमुक्तिःकस्यापिनस्यादितीमंव्याचष्टेः योग्योपासांविनानैवमोक्षःकस्यापिसेत्स्यतीत्यादेः पतित्वपितृमत्त्वादि

नृणांनिःश्रेयसार्थायव्यक्तिर्भगवतोनृप ॥ अव्यक्तस्याप्रमेयस्यनिर्गुणस्यगुणात्मनः १४ कामंक्रोधंभयंमोहंस्नेहंसौहृदमेववा ॥ नित्यंहरौविदधतोया तितन्मयतांहिते १५ नचैवंविस्मयःकार्योभवताभगवत्यजे ॥ योगेश्वरेश्वरेकृष्णेयतएतद्विमुच्यते १६ तादृङ्नातिकमायाताभगवान्व्रजयोषितः ॥ अव दद्वदतांश्रेष्ठोवाचःपाशैर्विमोहयन् १७ ॥ श्रीकृष्णउवाच ॥ स्वागतंवोमहाभागाःप्रियंकिंकरवाणिवः ॥ व्रजस्यानामयंकच्चिद्भूतागमनकारणम् १८ र जन्येषाघोररूपाघोरसत्त्वनिषेविता ॥ प्रतियातव्रजंनेहस्थेयंस्त्रीभिःसुमध्यमाः १९ मातरःपितरःपुत्राभ्रातरःपतयश्चवः ॥ विचिन्वंतोह्यपश्यंतोमा कृद्वंबंधुसाध्वसम् २०

विशेषंसूचयति पतित्वेनश्रियोपास्योब्रह्मणामपितेतिचेत्यादेः गुरुत्वविशेषमापिबूते गुरुःश्रीब्रह्मणोर्विष्णुःसुराणांचगुरोगुरुरितत्यादेः सर्वेषामपिज्ञानेनगुरुत्वंब्रह्मणउपास्यदैवत्वंविष्णोरि तीमंचाह गुरुर्ब्रह्मास्यजगतोदैवंविष्णुःसनातनइत्यादेः १५ यथाहिशब्दोपक्षिप्तावहवोविशेषाःशास्त्रांतरसिद्धाःसंतितस्माद्भगवतिविस्मयोनकार्यइत्युपसंहराति नचैवमिति विस्मयःआश्चर्यबुद्धि र्भगवताप्येवमकारिकिमुतास्माभिरितिदर्पोवा चित्रेदर्पेचविस्मयइतियादवः भगवत्यैश्वर्यादिगुणसामग्रीमतीत्ययंहेतुरौत्पत्तिकलक्षणइत्याह अजइति नजायतेइत्यजःसौभर्यादियोगेश्वराअपियो गबलेनातिमानुषंकुर्वंति किमुततदीश्वरोयमितिभावनाह योगेश्वरेश्वरइति कृष्णविषयःप्रश्नःपरिहारोन्यविषयइवेयते अतःकथंसंशयनिस्तारइतिशंकानिरासाभिप्रायेणाह कृष्णइति हेत्वंतर माह यतइति यतोयस्मात्कृष्णादेतज्जगद्विमुच्यतेसंसारमुक्तंभवति यस्यप्रसादात्परमार्तिरूपादस्मात्संसारान्मुच्यतेनापरेणेतिश्रुतेः १६ परीक्षित्प्रश्नंपरिहृत्यबुभुत्सितकथाशेषंवक्ति ताइति वाचःप रिभाषणादुदितैःपाशैःस्नेहलक्षणैः वदतांव्यक्तवाचांकवीनांश्रेष्ठः प्रशस्ततमः १७ वःकिंप्रियंकरवाणियुष्माकंमयाभीष्टं कर्तव्यंतत्किंतदभीष्टंजानन्नप्यज्ञइवपृच्छतिव्रजस्येति कच्चिद्व्रजस्यस्थानं अनामयं नआमयोरोगोयस्मिन्तत्तथा १८ ननुयात्किंचिन्निमित्तमपेक्षतेभवदागमनंअन्यथास्मावस्थायांनोचितमितितत्राह रजनीति घोरसत्त्वाराक्षसादयः १९ विचिन्वंतःमृगयंतः कृद्वंकुरुध्वं साध्वसंभयं २०

राकेशश्चंद्रः यमुनायाश्चनिलेनवायुना।निर्भयेनएजद्भिःकंपमानैःतरुपल्लवैः शोभितं पद्वा यमुनानिलानीतनीरेणैजद्भिः २१ ततोयुष्मानपश्यंतोबंधवोभयमवाप्नुवंतियस्मात्तस्मात् सतीःस त्यः २२ ब्रूतागमनकारणमित्ययुक्तमुक्तंरागमूलत्वात्प्रवृत्तेरितितत्राह अथवेति मदभिस्नेहान्मदधिकरणस्नेहात् यंत्रिताशयाःबद्धांतःकरणाःनियमिताभिप्रायावा हियस्मात्तस्मादागमनमुपप न्नं तत्कथमत्राह म्रियंतइति ममम्रियमाणस्यसतःसर्वेपिम्रीणंतिनचेत्तवेत्यन्वयव्यतिरकाभ्यांप्रमितत्वात् २३ किंचअन्यदेकंशास्त्रविहितंवदामीत्याशयेनाह भर्तुरिति स्त्रीणाममायायाअवंचनया भर्तुःपत्युःशुश्रूषणंधर्मोहिलोकवेदसिद्धः भर्तरिसन्निहितोनारायणइतिबुद्धचाशुश्रूषणंपरोधर्मोहियस्मात्तस्मात्तस्यभर्तुःबंधूनांकल्याणंचश्रेयइतिच नकेवलंतद्बंधूनांश्रेयः अपितुप्रजानांसं ततिलक्षणानांचानुपोषणं समृद्धिकरणंचभवतीत्यर्थः २४ पत्युःदौःशील्यादिदोषसद्भावेपिस्त्रीभिस्तत्त्यागोनविहितइत्याह दुःशीलइति दुःशीलःकलहादिशीलसंपन्नः दुर्भगोनिवीर्यैःकांति विहीनोवा वृद्धःगतवयाः जडःस्वकार्यमूढःरोगीभग्नांगोऽल्पांगः कुष्ठादिव्याधिपीडितोवा ब्रह्महत्यादिदोषसद्भावेकथंनहातव्यइतितत्राह लोकइति दौःशील्यादिदोषसद्भावेपिब्रह्महत्यादिपंचमहापात करहितश्चेत्पतिःशुचिरेवनहातव्योऽन्यथाविदोषइतिभावेनलोकइत्युक्तम् २५ कामस्यपुरुषार्थत्वेनपतिदोषेणतदप्राप्याजन्मनोनिष्प्रयोजनत्वमापन्नमितिप्रकारांतरेणसाफल्यमापादनीयं हीति वि

दृष्टंवनंकुसुमितंराकेशकररंजितम् ॥ यमुनानिलनीरैजत्तरुपल्लवशोभितम् २१ तद्यातमाचिरंगोष्ठंशुश्रूषध्वंपतीन्सतीः ॥ क्रंदंतिवत्साबालाश्चताम्पायय तदुह्यत २२ अथवामदभिस्नेहाद्भवंत्योयंत्रिताशयाः ॥ आगताह्युपपन्नंतत्प्रीयंतेममजंतवः २३ भर्तुःशुश्रूषणंस्त्रीणांपरोधर्मोह्यमायया ॥ तद्बंधूनां चकल्याणंप्रजानांचानुपोषणम् २४ दुःशीलोदुर्भगोवृद्धोजडोरोग्यधनोपिवा ॥ पतिःस्त्रीभिर्नहातव्योलोकेशुचिरपातकी २५ अस्वर्ग्यमयशस्यंचफल्गु कृच्छ्रंभयावहम् ॥ जुगुप्सितंचसर्वत्रऔपपत्यंकुलस्त्रियः २६ श्रवणादर्शनाद्ध्यानान्मयिभावोऽनुकीर्तनात् ॥ नतथासन्निकर्षेणप्रतियाततोगृहान् २७ ॥ श्रीशुकउवाच ॥ इतिविप्रियमाकर्ण्यगोप्योगोविंदभाषितम् ॥ विषण्णाभग्नसंकल्पाश्चिंतामापुर्दुरत्ययाम् २८ न्यकृत्यवक्त्रवनजान्यतिताप शुष्यद्बिंबाधराणिचरणेनमहींलिखंत्यः ॥ अस्रैरुपात्तमषिभिःकुचकुंकुमानितस्थुर्मृजंत्यउरुदुःखभराःस्मतूष्णीम् २९

पक्षेबाधकमाह अस्वर्ग्यमिति चशब्दएवार्थे उपपतिःपत्युःप्रतिनिधिःउपपतिःजारस्तत्संबंधिकर्मग्राम्यलक्षणंतत्कुलस्त्रियः सर्वत्रपत्युरुत्तमाधममध्यमेषुपुरुषेषुजुगुप्सितमेवेत्यन्वयः कथं तदुच्यते अस्वर्ग्यंस्वर्गविरोध्येवनभवति किंतुअयशस्यं इहामुत्रचदुष्कीर्तिकरंच तथापिनबहुलफल्गुतुच्छफलं अल्पकालविषयत्वात् कृच्छ्रंकष्टं स्यात्कष्टंकच्छ्रमित्यमरःकृच्छ्रंकर्तुःश्रमसा धनंवा मरणादिभयजनकम् २६ ननुतवमुख्यभर्तृत्वात्त्वत्सेवनंजारसेवनवदस्वर्ग्यंनभवति किंतुपतिसेवनान्मुख्यसाधनमेवस्यादित्याशंक्यसत्यंतथापिमच्छ्रवणादिनायुष्माकंमयिभक्तिःस्यात् नतथाममसान्निकर्षनिषेवणेनयस्मात्तस्माद्भवतीभिःगृहानवाप्यमयिभक्तिःकर्त्तव्येत्याह श्रवणादिति २७ प्रतियातव्रजंनेहस्थेयंस्त्रीभिःसुमध्यमाइतिगोविंदभाषितंअधुनाविप्रियं पश्चाद्विशेषतः प्रियंचितामनसिदुःखचर्याविचारं चिंताचर्चिक्ययोश्चेति २८ दुःखंलक्षयितुमाह न्यकृत्येतिवक्त्रवनजानिमुखकमलानिन्यकृत्यअधःकृत्वाबिंबफलतुल्यान्यधराणिबिंबाधराण्यंतर्गतशोका ग्र्यतितापेनशुष्यंतिबिंबाधराणियेषुतानितथा कामबाणप्रविद्धांगास्त्वत्रयोनिर्वैरांगना पादांगुष्ठनखेनाधोवदनालिखतीक्षितिमितिकामशास्त्रात्प्रसिद्धभावंदर्शयति चरणेनेत्यादिना उपात्तमषिभिरंगी कृतांजनैरस्त्रैर्बाष्पैः उरूणांदुःखानांभारोयासांतास्तथास्मकृष्णवावयाभिप्रायंसंस्मृत्य कामस्यदहनास्त्रैस्तुदग्धांगोत्पादिताश्रुभिः नेत्रद्वारेणनिर्यातिदुःखमंतर्गतंत्रियइति २९

तदर्थकृष्णकृतविनिवर्तितःसर्वकामोपासातास्तथारुदितेनरोदनेन उपहतक्लिष्टसंरंभणप्रणयकोपनगद्गदपदंस्वलदक्षरपदंयासांतास्तथा ३० तथावेचायांकमब्रुवांस्तत्राह मैवंमात नृशंसपरुषवचन
मेवंगदितुंवक्तुंनार्हसि कुतइत्यत्राह संत्यज्येति हेदुरवग्रह अवग्रहोवधोविघातःतद्रहितःभक्ताभीष्टवर्षणशीलेत्यर्थः शब्दादिसर्वविषयान् संत्यज्यभक्त्यातवपादमूलंभजेमेतेवितुमवाप्ताइतियत्तस्मात्मास्मा
न्त्यज अत्रदृष्टांतमाह देवइति ३१ शुश्रूषध्वंपतीनितियदुदितंतत्राहुः यत्पतीति हेअंगस्त्रीधर्मशास्त्रविदात्वयास्त्रीणांपत्यादीनामनुवर्तनंस्वधर्मइतियत्तदस्त्येवनसंदिग्धंतर्हितान्विसृज्यात्रकिमर्थमागतामि
तितत्राह तदपीति देववरेअस्मत्पित्रादीनांजामातृस्थानीयेत्वयितदापिक्रियतइतिशेषः देवानांवरणीयेवा देवाद्यभीष्टदातरिवा नकेवलंपतिस्थानीये ईशेऐश्वर्यादिगुणसंपन्नेतस्माद्वरणीयइत्यर्थःपरमानंद
विषयेपिहिपतिरयंकथंतद्विषयइत्याशंक्यनकेवलमस्माकमेवपरमानंदगोचरःअपितुसर्वेषामितिभावेनाह प्रेष्ठइति अस्माकंविशेषतोपिप्रेष्ठइत्याह बंधुरिति बंधुरूपःपरमात्माकिलतथापुरातनवार्ता वा
र्तासंभाव्ययोःकिलेति यद्वात्मभूतोबंधुः ३२ इतोपित्वमेवास्माकंमुख्यःपतिरित्याशयेनाहुःकुर्वतीति कुशलाःसारासारविवेकपटवः स्वेआत्मन् अनिमित्तबंधावात्मनिस्वामिनिवात्वयिरतिंकुर्वंति
नोस्माकंनित्यात्प्रियैःपत्यादिभिःकिंप्रयोजनमितिशेषःनित्यात्प्रियत्वंकथमितितत्राहुःआर्तिदैरिति अनेनक्रंदंतिवत्साःइत्येतत्परिरुदितम् ततःकिमत्राहुःतन्नइति यस्मात्त्वंमुख्योभर्ताऽतस्तस्मात्तर्हिकिं

प्रेष्ठंप्रियेतरमिवप्रतिभाषमाणंकृष्णंतदर्थविनिवर्तितसर्वकामाः ॥ नेत्रेविमृज्यरुदितोपहतेस्मकिंचित्संरंभगद्गदगिरोब्रुवतानुरक्ताः ३० ॥ गोप्यऊचुः ॥
मैवंविभोर्हतिभवान्गदितुंनृशंसंसंत्यज्यसर्वविषयांस्तवपादमूलम् ॥ भक्त्याभजेमदुरवग्रहमात्यजास्मान्देवोयथादिपुरुषोभजतोमुमुक्षून् ३१ यत्पत्य
पत्यसुहृदामनुवृत्तिरंगस्त्रीणांस्वधर्मइतिधर्मविदात्वयोक्तम् ॥ अस्त्येवतत्तदपिदेववरेत्वयीशेप्रेष्ठोभवांस्तनुभृतांकिलबंधुरात्मा ३२ कुर्वंतिहित्वयिरतिंकु
शलाःस्वआत्मन्नित्याप्रियैःपतिसुतादिभिरार्तिदैःकिम् ॥ तन्नःप्रसीदवरदेश्वरमास्मच्छिंद्याआशांधृतांत्वयिपरामरविंदनेत्र ३३ चित्तंसखेनभवतापहृतंगृ
हेषुयन्निर्विशत्युतकरावपिगृह्यकृत्ये ॥ पादौपदंनचलतस्तवपादमूलाद्यामःकथंव्रजमथोकरवामकिंवा ३४ सिंचांग नस्त्वदधरामृतपूरकेणहासावलोककल
गीतजहृच्छयाग्निम् ॥ नोचेद्वयंविरहजाग्न्युपयुक्तदेहाध्यानेनयामपदयोःपदवींसखेते ३५ यर्ह्यंबुजाक्षतवपादतलंरमायादत्तक्षणंक्वचिदरण्यजनप्रिय
स्य ॥ अस्प्राक्ष्मतत्प्रभृतिनान्यसमक्षमंगस्थातुंत्वयाविरहिताबतपारयामः ३६

रूपःप्रसादइत्यत्राहुः मास्मेति आशामतिवृष्णाम् आशादिगतिवृष्णयोरितियादवः ३३ प्रतियातेत्यस्योत्तरमाहुः चित्तमिति हेसखेनोयाचित्तंउततदपिगृहेषुनिर्विशति उपभोगत्वेननस्मर
तिकुतइत्यत्राहुः भवतेति भवतापहृतंतस्मादितिशेषः सहिसर्वमनोवृत्तिप्रेरकःसमुदात्हृतइतिवचनात् करावपिकर्मसाधनेऽपिगृह्यकृत्येगृहयोग्यकार्येसंमार्जनोपलेपनादिलक्षणेनतिष्ठतइतिशेषः अस्म
त्पादौगमनसाधनेऽपितवपादमूलात् पदंएकपादन्यासमात्रमपिनचलतइत्यथोतस्मात्कथंव्रजंयामःकिंवाकरवामइतिनज्ञायतेइतिशेषः ३४ तर्हिभवतीनांकिमभीष्टमित्यत्राहुःसिंचेति पूरकेणप्रवाहेण
हासंहितावलोकेन कलगीतेनमधुरगानेनजातोहृच्छयःकामःसएवाग्निःतांसिंचअभिषिंचशमय नोचेत्नशमयसिचेत् विरहाज्जातेनाग्निनाउपयुक्तोगृहीतोदेहोयासांतास्तथा ३५ यर्हियदाकचिद्व
नेदत्तक्षणंदत्तावसरम् अस्माक्ष्म स्पृष्टवंत्यः अरण्यजनःसंन्यस्तजनः तत्प्रभृतितदानीमारभ्य अन्यसमक्षंअन्यजनाभिमुखेनपारयामः नशक्नुमःबतअद्भुतमाश्चर्यंतवमहिमा अनेनत्वदंगस्पर्शनानंतर
मन्यांगस्पर्शनशंकानिवारिता ३६

अद्यापिलक्ष्म्यातवपादपद्मद्वंद्वधूलिनिषेवणंकांक्षितंकिमुतास्माकमितिभावेनाहुः श्रीरिति अन्येषांसुराणांब्रह्मादीनांप्रयासःप्रयत्नःयस्याःश्रियःस्ववीक्षणकृतःस्वनिरीक्षणार्थकृतः साश्रीर्वीक्षसिपदंलब्ध्वापितुलस्याः पदंयस्यतवपदांबुजरजःचकमे कामितवतीयथा वयंचतद्वत्तथातस्यतवपादरजोनिषेवणायप्रपन्नाइत्यन्वयः स्ववीक्षणकृतइतिपाठेस्वदर्शनार्थमित्यर्थः ३७ वृजिनार्दनदुःखनाशनवसतीःगृहान् त्वदुपासनेआशाश्रद्धायासांतास्तथा सुंदरंचतत्स्मितंचसुंदरस्मितंतन्निरीक्षणेन उद्भूतेनतीव्रेणकामाग्निनातप्तआत्मादेहोयासांताः पुरुषभूषणपुरुषतिलक ३८ हेवीक्ष्यदर्शनीय वयंतवदास्योभवामेत्यन्वयः आशिषिलिङ्लोटाविति आशिषिलोट् दासीभूत्वाशिषंकामयामहइत्यर्थःदासीभावेकारणमाहुः अलकेति कुंडलश्रियायुक्तंगंडस्थलंअधरसुधाचयस्यतत्तथा हसितेनयुक्तमवलोकंचप्रतिजनंदत्ताभयं भुजदंडयोर्युगंच श्रियएकरमणं प्रधानरतिस्थानं वक्षश्चविलोक्यदृष्ट्वाविचार्यवीक्ष्येतिवा ३९ अस्मत्स्मरशमनंचनचित्रमितिभावेनाहुः कास्त्रीति तेतवकलपदैःअव्यक्तमधुरशब्दावयवैः अमृतंश्रवणानंदकरंयद्वेणुगीतंवंशपानंतेनसंमोहितात्रिलोक्यांत्रिलोक्येकास्त्रैलोक्यसौभगमलंकारभूतमिदंरूपंसुंदरतरावयवोपक्लप्तमाकारंचनितरांदृष्ट्वाआर्याणांसतांचरितान्मार्गादितिशेषःनचलेत्स्खलितानभवतीत्यन्वयःइदंनाचित्रमित्याहुः यदिति यद्यस्माद्वेणुगानात्यस्यरूपस्यस्पर्शादिनावागवादयोंतःप्रज्ञाश्चेतनराशयःपुलकानिरोमांचानि अबिभ्रन्दधुरिति ४० सर्व

श्रीर्यत्पदांबुजरजश्चकमेतुलस्यालब्ध्वापिवक्षसिपदंकिलभृत्यजुष्टम् ॥ यस्याःस्ववीक्षणकृतोऽन्यसुरप्रयासस्तद्वद्वयंचतवपादरजःप्रपन्नाः ३७ तन्नःप्रसीदवृजिनार्दनतेंऽघ्रिमूलंप्राप्तावसृज्यवसतीस्त्वदुपासनाशाः ॥ त्वत्सुंदरस्मितनिरीक्षणतीव्रकामतप्तात्मनांपुरुषभूषणदेहिदास्यम् ३८ वीक्ष्यालकावृतमुखंतवकुंडलश्रीगंडस्थलाधरसुधंहसितावलोकम् ॥ दत्ताभयंचभुजदंडयुगंविलोक्यवक्षःश्रियैकरमणंचभवामदास्यः ३९ कास्त्र्यंगतेकलपदामृतवेणुगीतसंमोहितार्यचरितान्नचलेत्त्रिलोक्याम् ॥ त्रैलोक्यसौभगमिदंचनिरीक्ष्यरूपंयद्गोद्विजद्रुममृगाःपुलकान्यबिभ्रन् ४० व्यक्तंभवान्व्रजभयार्तिहरोऽभिजातोदेवोयथादिपुरुषःसुरलोकगोप्ता ॥ तन्नोनिधेहिकरपंकजमार्तबंधोतप्तस्तनेषुचशिरस्सुचकिंकरीणाम् ४१ श्रीशुकउवाच ॥ इतिविक्लवितंतासांश्रुत्वा योगेश्वरेश्वरः ॥ प्रहस्यसदयंगोपीरात्मारामोन्यरीरमत् ४२ ताभिःसमेताभिरुदारचेष्टितःप्रियेक्षणोत्फुल्लमुखीभिरच्युतः ॥ उदारहासद्विजकुंददीधितिर्व्यरोचतैणांकइवोडुभिर्वृतः ४३ उपगीयमानउद्गायन्वनिताशतयूथपः ॥ मालांबिभ्रद्वैजयंतींव्यचरन्मंडयन्वनम् ४४ नद्याःपुलिनमाविश्यगोपीभिर्हिमवालुकम् ॥ रेमेतत्तरलानंदिकुमुदामोदवायुना ४५

स्यस्वामित्वेनभर्तृगुणयोगादस्मत्कुलेऽभिजातत्वेनबंधुत्वेनसंबंधयोग्यत्वादस्माकंत्वत्संबंधेनजारसंसर्गदोषागमनेननिंद्यत्वंदूरोत्सारितंस्यादितिभावेनाहुः व्यक्तमिति भगवान्यथासुरलोकगोप्तावामनतयाभिजातः तथादिपुरुषोदेवोभवान्व्रजभयार्तिहरोभिजातइतिव्यक्तं इदमसंदिग्धमितियत्तत्तस्माद्यथायस्मादितिवा कामाग्नितप्तेषुउभयत्रयोज्यम् ४१ विक्लवंचितांकामार्तवचनं न्यरीरमत् नितरांरमयामास ४२ समेताभिःमिलिताभिःउदारःउत्कृष्टःहासःद्विजादंताःकुंदामल्लिकाआसांदीधितिःकांतिर्यस्यसः द्विजाएवकुंदाःद्विजकुंदाः उदारहासेनाविवृतानांद्विजकुंदानांदीधितिर्यस्यसइतिवा एणांकश्चंद्रः एणःकुरंगोहरिणइतिहलायुधः ४३ शतशब्दोऽनेकवाची वैजयंतींविजयावहां ४४ हिमवालुकंशीतलसैकतं तस्यानद्याः तरलैः मंदकल्लोलैः आनंदयितुंशीलमस्यास्तीतितरलानंदी कुमुदानामामोदस्यवायुस्तत्तरलानंदीकुमुदामोदवायुः तेन यद्वा तयानद्यातरलानिनृत्यंतीवस्थितानिचतान्यानंदीनिउत्फुल्लानिकुमुदानितत्तरलानंदिकुमुदानितेषामामोदेनसौरभेणसंपक्तेनवायुना ४५

पारंभआलिंगनतदंवकरालकेलीताद्रक्काडातस्यानीविविस्रंग्रंथस्तस्यास्तनपुआलंभननर्मनखच्छेदनर्मणोहास्यात्तयोर्च करांग्रणीनखानांपातःउल्लेखलक्षणश्च क्ष्वेलावलोकहासितैः बालसिंह
नादनिरीक्षणमंदहासैश्च रतिपतिंकाममुत्तंभयन् उज्जृंभयन् उल्लोलयन्नित्यर्थः रमयांचकाररेमे बाहुपीडनकुचग्रहणाद्यैराहितेननखदंतनिखातैः बोधितस्तनुशय स्तरुणीनामुन्मिषंमालशनकैरपिमारइ
तिम.घः ४६ भुविस्त्रीणांमध्येस्वात्मानमधिक्येनाभ्यधिकंमेनिरे ४७ सौभगमदं सौभाग्यनिमित्तंमदं मानमहंकारंमदाहंकारयोःप्रशमायनाशायप्रसादायानुग्रहायच प्रकर्षेणप्रसादजननायच अंतरधीय
त तासांदृष्ट्वाअदृश्योऽभवदित्यर्थः४८॥इतिश्रीभागवतेमहापुराणेदशमस्कंधविजयध्वजकृतटीकायांसप्तविंशोऽध्यायः॥२७॥ हरेरेवयोगैश्वर्यमौत्पात्तिकंनान्यस्येतिज्ञापनभावेनगोपस्त्रीणांश्रीकृष्णेभक्तप
तिशयंकथयत्यस्मिन्नध्याये तत्रगोपीनांसंतापादिप्रकारंप्रवक्तिशुकः अंतर्हितइति यूथपंगजेंद्रम् १ गत्याबालसिंहखेलनगमनेनअनुरागेणस्नेहेनउदितानिस्मितानितैःरंजितानिसंपर्कगतानीक्षितानिनि

बाहुप्रसारपरिरंभकरालकेलीनीवीस्तनालभननर्मकराग्रपातैः ॥ क्ष्वेलावलोकहसितैर्व्रजसुंदरीणामुत्तंभयन्नरतिपतिरमयांचकार ४६ एवंभगवतःकृष्णा
लब्धमानामहात्मनः ॥ स्वात्मानंमेनिरेस्त्रीणामाधिक्याभ्यधिकंभुवि ४७ तासांतत्सौभगमदंवीक्ष्यमानंचकेशवः ॥ प्रशमायप्रसादायतत्रैवांतरधीय
त ४८ इतिश्रीभागवतेमहापुराणेदशमस्कंधेसप्तविंशोऽध्यायः ॥२७॥ श्रीशुकउवाच ॥ अंतर्हितेभगवतिसहसैवव्रजांगनाः ॥ अतप्यंस्तमचक्षणाःकरि
ण्यइवयूथपम् १ गत्यानुरागस्मितरंजितेक्षितैर्मनोरमालापविहारविभ्रमैः ॥ आक्षिप्तचित्ताःप्रमदारमापतेस्तास्तथाविचेष्टाजगृहुस्तदात्मिकाः २ गति
स्मितप्रेक्षणभाषणादिषुप्रियाःप्रियस्यप्रतिरूढमूर्तयः ॥ असावहंन्वित्यबलास्तदात्मिकानावेदिषुःकृष्णविहारविभ्रमाः ३ गायंत्यउच्चैरमुमेवसंगताव
चेरुन्मत्तकवद्वनाद्वनम् ॥ पप्रच्छुराकाशवदंतरंबहिर्भूतेषुसंतंपुरुषंवनस्पतीन् ४ दृष्टोवःकच्चिदश्वत्थप्लक्षन्यग्रोधकिंशुक ॥ नंदसूनुरिहागार्त्किसहहासा
वलोकनैः ५ कच्चित्कुरबकाशोकनागपुन्नागचंपक ॥ रामानुजोमानिनीनांदोग्धानंदस्यचात्मजः ६ कच्चित्तुलसिकल्याणिगोविंदचरणप्रिये ॥ सहत्वा
लिकुलैर्बिभद्दृष्टस्तेऽतिप्रियोऽच्युतः ७ मालत्यदर्शिवःकच्चिन्मल्लिकेजातियूथिके ॥ प्रीतिंवोजनयन्यातःकरस्पर्शेनमाधवः ८

रीक्षणानिअनुरागस्मितरंजितेक्षितानितैःमनोरमैआलापविहारौतयोर्विभ्रमैःशृंगारैः आक्षिप्ताचित्ताः आकृष्टमनसः यायाभगवतारचितावीशिष्टचेष्टास्तास्ताजगृहुः न्यरूरुपन् तस्मिन्कृष्णेआत्मामनो
यासांतास्तथा ग्रहणंअनुकरणंयत्तदात्मिकाः तदाकारमिताइतिपाठार्थोसुष्ठुतामादधाते २ एतदेवविशिनष्टि गतीति प्रियस्यकृष्णस्यगत्यादिषुप्रतिरूढाअंकुरिता अंगीकृतामूर्तिर्यासांतास्तथातत्रानि
मित्तंदर्शयति असाविति असौकृष्णोऽहंवानुइतिविकल्प्यान्योन्यंपृष्ट्वावातदात्मिकाःतद्गतचित्ताः प्रश्नेविकल्पेनुस्विच्चेतियादवः नावेदिषुःआत्मानमितिशेषः कृष्णविहारविभ्रमवद्विभ्रमोयासांतास्त
था अनेनापितदात्मकत्वंविवृतम् ३ संगताःमिलिताः आकाशवद्भूतेषुबहिरंतरसंतंबाह्याभ्यंतरदेशयोर्वर्तमानं अंतर्बहिश्चतत्सर्वव्याप्यनारायणःस्थितइतिश्रुतिः ४ उन्मत्तत्वंस्पष्टयति दृष्टइति हेशब्दः
प्रत्येकमभिसंबध्यते हेन्यग्रोधवट न्यक्अधःरोधःआवरणंयस्यसः पादैरधोभूमिमावृणोतीति किंशुकपलाशश पलाशःकिंशुकेपर्णेइत्यमरः रक्तपुष्पवान् ५ कुरबकःकरंजःनागःनागकेसरः पुन्नागः
पुरुषस्तुंगइति दोग्धाजिह्वामधुरः ६ ७ मालतीजातिभेदः वोयुष्माभिरदर्शिदृष्टः यूथिकाशतपत्रिका ८

प्रियालोराजादनःदेवदारुर्वा कोविदारःकांचनारकः असनःपीतसारकः अक्षंशुकनासम् परार्थभविनःलोकोपकारार्थमुत्पन्नाः यमुनाकूलसमीपेजाताः रहितआत्मास्वामीकृष्णोयासांतास्तथाताम् ९ हेक्षितितेत्वयाकिंशुभंतपोलक्षणंकृतम् पर्याप्तमंगोपांगपूर्णशुभंतेतवकिंबतामंत्रितं सत्कारपूर्वकंव्यावृत्तमस्तीत्यर्थः युगक्षयांतेपर्याप्तेकृतंकृत्स्नंबेहितेर्थवादितियादवः खेदानुकंपासंतोषविस्मयामंत्रणेवतेत्यमरः अस्तीतिकथमवगम्यतेइत्यत्राह केशवेति केशवस्य सुकेशभारस्यांघ्र्योःस्पर्शएवोत्सवस्तेनउत्पुलकितैःऊर्ध्वमुखोल्लसितैःअंगरुहैःरोमलक्षणैर्वृक्षैःविभासियत्तस्मादितिशेषः यद्वा केशवांघ्रिस्पर्शेनोत्सवाप्रकृष्टप्रसवासतीत्वमंगरुहैर्वृक्षैःउत्पुलकितारोमांचिताविभासियद्वाअंघ्रिस्पर्शनलक्षणेनोत्सवेनोत्पुलकितांगरुहैरंकुरितपुष्पितफलितैर्वृक्षैः हेअंघ्रिसंभवेनारायणश्रीपादसंभवेउत्पन्नेअपिपद्मचांभूमिरितिश्रुत्यालोकसंभाविते उरुक्रमस्यत्रिविक्रमस्यविक्रमात्पादविक्रमणात् अंगरुहैःउत्पुलकितैर्विभासिवा अहोस्वत्वराहवपुषानारायणेनकृतेनपरिरंभणेनालिंगनेनोद्धृतिलक्षणेनकेशाद्वेन्यतरस्यामितिसूत्रेणशोभमानाःकेशाअस्यसंतीतिमत्वर्थेवमत्ययोविधीयतेअर्थांतरविवक्षायांगोपीनामनभीष्टत्वम् १०हेएणपत्निमृगजाये तेईश्वरःकयाचित्प्रिययाप्रियतमयाइहोपगतःसामीप्यमाप्तःकिंकीदृशः हेसखिमृगभार्ये गात्रैराननादिशरीरावयवैःवोयुष्माकंदृशांसुनिर्वृतिंतन्वन्नपिविस्तारयन् प्रश्नेनिमित्तमाह कांतेति कांतायाःकमनीयायाःअंगसंगादालिंगनलक्षणात्संक्रांतकुचकुंकुमेनरंजितायाअनुरागीकृतायाः अस्मत्कुलपतेःकृष्णस्यांसावलंबिन्याः कुंदस्रजः कुंदपुष्परचितमालायागंधइहवातिआगच्छतीतियत्तस्मादितिशेषः वागतिगंधनयोरितिधातुः यद्वा कांतस्यभगवतोंगसंगसंयोगोयस्याः

चूतप्रियालपनसासनकोविदारजंब्वर्कबिल्वबकुलाम्रकदंबनीपाः ॥ येऽन्येपरार्थभविनोयमुनोपकूलाःशंसंतुकृष्णपदवींरहितात्मनांनः ९ किंतेकृतंक्षितिशुभंबतकेशवांघ्रिस्पर्शोत्सवोत्पुलकितांगरुहैर्विभासि ॥ अप्यंघ्रिसंभवउरुक्रमविक्रमाद्वाआहोवराहवपुषापरिरंभणेन १० अप्येणपत्न्युपगतःप्रिययेहगात्रैस्तन्वन्दृशांसखिसुनिर्वृतिमीश्वरोवः ॥ कांतांगसंगकुचकुंकुमरंजितायाःकुंदस्रजःकुलपतेरिहवातिगंधः ११ बाहुंप्रियांसउपधायगृहीतपद्मोरामानुजस्तुलसिकालिकुलैर्मदांधैः ॥ अन्वीयमानइहवस्तरवःप्रणामंकिंवाभिनंदतिचरन्प्रणयावलोकैः १२ पश्यतेहलताबाहूनप्याश्लिष्टावनस्पतेः ॥ नूनंतत्करजस्पर्शाद्विभ्रत्युत्पुलकान्यहो १३ एवंकृष्णंपृच्छमानावृंदावनलतास्तरून् ॥ व्यचक्षतवनोद्देशेपदानिपरमात्मनः १४

सातथा अत्रस्त्रीशब्दोध्याहार्यः साकांतांगसंगात्प्रीतस्याःकुचकुंकुमरंजितायाकुलपतेःकुंदस्रजः गंधोस्यास्तीतिमत्वर्थेअच्प्रत्ययात्गंधवान्वायुरिहवाति वीजयतीति गोपीनामेकवचनबहुवचनाभ्यांभक्त्याधिक्यंसूचितं अतिशयपिशाचीग्रहणंसूचयति यद्वाएणपत्नीतुल्यनेत्रत्वात्सखीत्युपवर्ण्यते वःईश्वरोभर्त्ता मृगःकयाचित्प्रिययाहारिण्याउपगतः आश्लिष्टोपिकिंनभवति गर्हितत्वात् अस्मत्कुलपतिरस्मान्विहायकयाचिदालिंगितइत्याशयेनाहुः कांतेति कांतायाअंगेउरोवयवेसंगोययोस्तौकांतांगसंगौतौकुचौचकांतांगसंगकुचौतयोःकुंकुमेनरंजितायाःअरुणीभूतायाःकुलपतेःकुंदस्रजोगंधइहवाति स्वयंचनहृश्यतेतत्सद्भावोविज्ञायतइतिव्यंग्यालंकारोक्तिः ११ विटवृत्तिमनुवर्तमानस्यपुंसोमालत्यादिपुष्पादानेच्छयातत्समीपजिगमिषासंभवेनतत्प्रश्नउपयुज्यते अश्वत्थादिप्रश्नःकोपयुज्यतइत्यतःसंभवंदर्शयितुमाहुःबाहुमिति हेतरवःप्रणामप्रदक्षिणादिनाप्रसन्नाःसंसारात्तारयंतीतितरवोऽश्वत्थादयः भगवच्चरणप्रियतुलसिकापुष्पमकरंदलोलैरलिकुलैरन्वीयमानोरामानुजएकंबाहुंप्रिया याअंसेउपधायापरेणगृहीतपद्मःप्रणामंचरन्कुर्वन् प्रणयावलोकैःवःअभिनंदतिकिंवेत्यन्वयः प्रावण्याऽलंकारोक्तिःयद्वाइहचरन्रामानुजः प्रणयावलोकैःवःप्रणाममभिनंदतिकिंचानेनस्थावराणांभक्त्युन्नविःसूचितेति १२नूनंनिश्चयेनयास्तस्यकृष्णस्यकरनखस्पर्शादुत्पुलकितानिपुष्पफललक्षणानिबिभ्रति ताःलताःवनस्पतेःबाहून्शाखाआश्लिष्टाअपिसंभाव्याःपश्यत अहोउन्मुख्योभवतेत्यन्वयःअयंरूपकारलंकारःसुरतसुखस्मारकः १३ उपसंहरति एवमिति वनोद्देशेवनप्रदेशे १४

परमात्मचरणाकृतित्वंकथमवगम्यतइतितल्लक्षणमुच्यते पदानीति लताकल्पलताआदिशब्देनचक्रादिकंगृह्यते पदादीत्यपिपाठः १५ अन्विच्छंत्यःअन्वेषणंकुर्वत्यःवध्वाःकस्याश्चिद्गोपाङ्गियःपदैश्चरणै र्निक्षिप्तैःसुपृक्तानिअंतरालेमिश्रितानि इर्षयार्ताःसमब्रुवन्संलापमकुर्वन्१६ प्रकोष्ठःकरतलमूलभागः करिण्यासहितायाःकरिण्याःपदानियथा स्वांसन्यस्तहस्तायाःकरिण्याःपदैःसंपृक्तानि करिणाकृता निपदानिवा १७ १८ हेआल्यःसख्यःधन्यानिरपेक्षाः आलिःसत्रेसखीपंक्तयोरितियादवः निरपेक्षोगुणैःपूर्णोधन्यइत्युच्यतेबुधैरितिच ब्रह्माद्यामूर्ध्वायान्दधुरितियत्तस्माद्धन्याइत्यर्थः तस्माद्विष्णो रुतयेअभिप्रायसिद्धये रक्षासिद्धयेवा १९ ननुधन्यानांकृष्णपादतलयुक्तानांरेणूनांसंदर्शनंयुष्माकमभूदितःपरंशोकस्यकिंकारणमित्याशंक्यसत्यमथापितदीयपदसंपृक्तमन्यस्त्रीपदंसंदृश्यसंस्मृत्यमहा शोकोजायतइत्याशयेनाहुः तस्याइति गोपीनांमध्येएकागोपीकृष्णमपहृत्यवशीकृत्य अच्युताधरंअच्युतस्यहरेरच्युतंसंततस्यंदमानामृतमधरोष्ठंरहोरहस्येकांतदेशेभुंक्तेयत्ततस्तस्यागोप्याअमूनि पदानि संदृश्याधरपानंसंस्मृत्यउच्चैःक्षोभंचित्तविक्षेपंकुर्वंतितस्माच्छोकइत्यर्थः २० इदमधिकंशोककारणमित्याशयेनाहुः नेति नूनंतर्कएवंकथंतस्याःगोप्याःपदानिनलक्ष्यंतेनदृश्यंते अदर्शनेका

पदानिव्यक्तमेतानिनंदसूनोर्महात्मनः ॥ लक्ष्यंतेहिध्वजांभोजवज्रांकुशलतादिभिः १५ तैस्तैःपदैस्तत्पदवीमन्विच्छंत्योऽग्रतोऽबलाः ॥ वध्वाःपदैःसुपृक्तानिविलोक्यार्ताःसमब्रुवन् १६ कस्याःपदानि चैतानियातायानंदसूनुना ॥ अंसन्यस्तप्रकोष्ठायाःकरिण्याःकरिणायथा १७ अनयाराधितोनूनंभगवान्हरिरीश्वरः ॥ यन्नोविहायगोविंदःप्रीतोयामनयद्रहः १८ धन्याअहोअमीआल्योगोविंदांघ्र्यब्जरेणवः ॥ यान्ब्रह्मेशोरमादेवीदधुर्मूर्ध्नात्तदूतये १९ तस्याअमूनिनःक्षोभंकुर्वंत्युच्चैःपदानियत् ॥ एकाप्रहृत्यगोपीनांरहोभुंक्तेऽच्युताधरम् २० नलक्ष्यंतेपदान्यत्रतस्यानूनंतृणांकुरैः ॥ खिद्यत्सुजातांघ्रितलामुन्निन्येप्रेयसींप्रियः २१ इमान्यधिकमग्नानिपदानिवहतोवधूम् ॥ गोप्यःपश्यतकृष्णस्यभाराक्रांतानिकामिनः २२ अत्रावरोपिताकांतापुष्पहेतोर्महात्मना ॥ अत्रप्रसूनापचयःप्रियार्थेप्रेयसाकृतः २३ प्रपदाक्रमणेएतेपश्यतासकलेपदे ॥ केशप्रसाधनंत्वत्रकामिन्याःकामिनाकृतम् २४

रणमूहयंति तृणांकुरसंबंधेनखिद्यत्परिघातमाप्नुवत्सुजातंललितमंघ्रितलंयस्याःसातथा प्रेयसींउन्निन्ये उद्धृत्यनीतवान् उदूह्यनयनेनभूमिसंबंधाभावात्पदादर्शनमपिअतएवतादृशप्रेमनास्माकंप्राप्त मितिशोकोस्माकम् २१ युष्मत्परित्यागवत्प्रेयसीपरित्यागेनगमनात्तत्पदादर्शनंकिंनस्यादित्यतःकुतउद्धृत्यगमनमनुमीयतइत्यतएतल्लिंगमप्रतिहतमित्याहुः इमानीति धूमाग्न्योरविनाभाववत् भारवहपुरुषपदमज्जनंभारवहनाविनाभूतंप्रत्यक्षसिद्धत्वादुदूह्यागमनमनुमीयतइत्यर्थः मानयितुंशीलमस्यास्तीतिमानी तस्यअधिकशृंगारोक्तिरियम् २२ अवरोहणंस्नेहाधिक्यादित्याशयेनाहुः महात्मनेति कथमिदमवगतंपुष्पनिमित्तादित्यत्राहुः अत्रेतिअपचयःनखादिसंयोगेनयथाम्लानंनभवतितथाम्लानं इदमपिप्रेयसांप्रेमातिशयप्रकटनम् २३ इदमपिचित्रमित्याहुः प्रपदेति हेगोप्यः प्रपदयोःपादाग्रयोराक्रमणंययोरस्तितेप्रपदाक्रमणेएतेपदेपादलांछनेअसकलेअतंपूर्णेउन्नतशास्त्रापुष्पापचयेप्रियकृष्णकरावनमितशास्त्राग्रहणेदुस्थपदत्वाच्चावत्पादप्रमाणरहितेपश्यतेत्यन्वयः केशमार्ज न्याकेशप्रसाधनंकेशसंस्कारः कमुगतावितिधातोः कामआनंदःकामोगतिर्ज्ञानंचास्यस्तइतिकामी पूर्णानंदज्ञानवानित्यर्थः तेनकामिना प्रशस्तेच्छावताचा २४

कांतांस्त्रियंतानिपुष्पाणिचूडयतासंस्कृतकेशपाशेसुदर्शनीर्यंनिदधताकृष्णेनेहस्थलेउपविष्टंपश्यतेतिशेषःइदंध्रुवंनिश्चितं संदेहंनकुरुतेत्यर्थः अयंसर्वस्मादधिकशोकतमइत्याहुःरेमइति तयाकामिन्या रेमेच सुरतलीलामप्यनुबभूव नस्वार्थमितिसूचयंति आत्मरतइति आत्मनिस्वरूपानंदेरतः आत्मन्येवारामःक्रीडायस्यसतथा आत्मरतआत्मक्रीडइतिश्रुतिः अनेनविशेष्णद्वयेनहरेर्विटवृत्तिं निषिध्यंति भगवत्प्रीतिसाधनभक्तिज्ञानादितारतम्यात्प्रीतितारतम्यममूचिइतिज्ञायते तथाचान्यागोप्यइंद्रियवृत्तयःकृष्णनीताकामिनीभक्तिर्बुद्धिर्वाग्राह्येतिबुद्धिमतातत्तत्पदानितत्तदर्थबोधकत्वेन योजनीयानीतिसंग्राह्यमितिसंतोष्टव्यं शोकादिकंचगुणनिमित्तमितिअतएवाखंडितःकामेनेतिशेषः २५ इतिशब्दआदिवचनःप्रकृष्टंकृष्णविषयंप्रलापंकुर्वत्यः विटविषयमनर्थवचनंकुर्वत्यश्चाविशिष्टचेतनाअविपरीतचेतनाश्चकामिनांदुरात्मतांस्त्रीणामेवंदैन्यंदर्शयन्दर्शयंत्यश्च २६ अहंभावःसर्वथात्याज्यइतिदर्शयितुमाह यामिति अनेनराक्षस्याःबुद्धेःस्वभावोदर्शितः २७ अत्यधिकंभजतेति हेत्यनेनविषयलोलुपानांप्रवृत्तिरीदृशीइतिदर्शयति कथांतरारंभंवा तमाह ततइति प्रत्यारंभेप्रसिद्धेहेतियादवः वनोद्देशंविषयप्रदेशं केशवंप्रशस्तकेशपाशं वनेकामिनम् २८ पारयेसमर्थयेपारंगंतुं

तानिचूडयताकांतामुपविष्टमिहध्रुवम् ॥ रेमेतयाचात्मरतआत्मारामोप्यखंडितः २५ इत्येवंप्रलपंत्यस्ताश्चेरुर्गोप्योऽविचेतनाः ॥ कामिनांदर्शयन्दैन्यं स्त्रीणांचैवंदुरात्मताम् २६ यांगोपीमनयत्कृष्णोविहायान्याःस्त्रियोवने ॥ साचमेनेयदात्मानंवरिष्ठंसर्वयोषिताम् २७ हित्वागोपीःकामयानामासौभ जतेइह ॥ ततोगत्वावनोद्देशंदृप्ताकेशवमब्रवीत् २८ नपारयेऽहंचलितुंनयमांयत्रतेमनः ॥ एवमुक्तःप्रियामाहस्कंधआरुह्यतामिति २९ ततश्चांतर्दधेकृष्णःसावधूरन्वतप्यत ॥ हानाथरमणप्रेष्ठक्वासिक्वासिमहाभुज ३० दास्यास्तेकृपणायामेसखेदर्शयसन्निधिम् ॥ अन्विच्छंत्योभगवतोमार्गंगोप्योऽविदूरतः ३१ ददृशुःप्रियविश्लिष्टांमोहितांदुःखितासतीम् ३२ तयाकथितमाकर्ण्यमानप्राप्तिंचमाधवात् ॥ अवमानंचदौरात्म्याद्विस्मयंपरमंययुः ३३ गत्वावनाद्वनंचंद्रज्योत्स्नायावद्विभाव्यते ॥ तमःप्रविष्टमालक्ष्यततोनिवव्रतुःस्त्रियः ३४ तन्मनस्कास्तदालापास्तद्विचेष्टास्तदात्मिकाः ॥ तद्गुणानेवगा यंत्योनात्मागाराणिसस्मरुः ३५ पुनःपुलिनमागत्यकालिंद्याःकृष्णभावनाः ॥ समवेताजगुःकृष्णंतदागमनकांक्षिणीः ३६ इतिश्रीभागवतेमहापुराणे दशमस्कंधेपूर्वार्द्धेअष्टाविंशोऽध्यायः ॥ २८ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

नशक्नोमीतिवा यत्रगंतुं विटगतस्वभावंदर्शयितुमाह एवमिति २९ भक्त्यालभ्योनान्यथेतिभावंदर्शयति ततइति शुद्धबुद्धेःस्वभावोयमितिदर्शयितुमाह सावधूरिति हाविषण्णास्मिवने हाविषादशु भार्तिष्वतिच हेनाथआशाप्रदहेरमणरतिप्रद । हेप्रेष्ठ प्रियतम ३० दास्याः शिक्षायोग्यायाः दासुहिंसायामितिधातुः कृपणायाःकृपाविषयायाःगांदृष्टिंपांतिरक्षंतिदुर्विषयगमनराहित्येनेतिगो प्यइंद्रियवृत्तयःशास्त्रविषयाःअविदूरतःज्ञात्वासमीपेस्थिताः ३१ मुक्तेःपूर्वमपरोक्षबुद्धेःआविर्भावतिरोभावौकचित्स्यातामितिभावदर्शनायोच्यते प्रियेत्यादिना ३२ मानप्राप्तिंअपरोक्षलक्षणमान प्राप्तिम् ३३ यावच्चंद्रज्योत्स्नाविभाव्यतेतावद्वनाद्वनंगत्वाततश्चंद्रचंद्रिकास्तमयानंतरंप्रविष्टंप्राप्तंतमआलक्ष्यदृष्ट्वानिवव्रतुःनिवृत्ताइत्यनेनदुःशास्त्रान्निवृत्यसच्छास्त्राभ्यसनाययत्नंचक्रुरितिसूच्यते स्त्यैष्टचैशब्दसंघातयोरितिधातोः शास्त्रविषयाबुद्धयः ३४ सत्वबुद्धीनांस्वभावंदर्शयति तन्मनस्काइति ३५ समवेताएकविषयीकृताः तस्यकृष्णस्यागमनकांक्षिण्यः ॥ ३६ ॥ इतिश्रीभागवतेमहा पुराणेदशमस्कंधेविजयध्वजकृतटीकायांअष्टाविंशोऽध्यायः ॥ २८ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

वेदांतानधिकारिणांमुमुक्षुविविदिषूणांसमर्थानांहरेःसंकीर्तनमेवतदुपासनंस्यात्तत्प्रसादजनकत्वेनेत्यतः स्त्रीभूतानांगोपीनांउपासनाप्रकारंनिरूपयत्यस्मिन्नध्याये । तत्रगोप्यःविश्वसंनिहितत्वात्संबोध्यागायन् । जयतीति । कृष्णेत्यध्याहार्यम् । हेकृष्ण व्रजंतियस्मिन्निवासंगोपाइति गोपनिवासस्थानंव्रजः । अथंततवजन्मनाअधिकंजयति सर्वोत्कर्षेणवर्तते तत्रेहस्वंदरंचाहुः श्रयतइति । तत्रश्र जेइदिपरमैश्वर्यइतिधातुः इंदिंऐश्वर्यरातिददातीतिनित्यैश्वर्यरूपत्वादिंदिराश्रीः साऽधुनाश्रयते आश्रयतेहिपरमात्मानंस्माच्चेत्यर्थः । तवजन्मनिमित्तंश्रियःश्रयणंच त्वयाऽविनाभूतत्वाच्छ्रयतइतिभावः स्वाभिप्रायंदर्शयंति दयितेति । हेप्रेष्ठभवान्स्वात्मनैवत्वादिदृक्षतांद्रष्टुकामानांदृश्यतांचक्षुर्विषयोभवतु त्वयिगतासवःसमर्पितप्राणाः त्वात्सांविचिन्वते । साकांक्षत्वाद्दर्शनदानंयुक्तमित्यर्थः २ व्रजजन स्यआर्तिहंतिहिनस्तिनाशयतीतिव्रजजनार्तिहातस्यसंबोधनं व्रजजनार्तिहन्वीरशूर निजजनस्यस्मयोगर्वःतंध्वंसिस्मितवत्स्मितंयस्यसतथा तत्संबुद्धिःनिजजनस्मयध्वंसनस्मित युषपूषकामसमृद्धा वितिधातोः योषितां समृद्धिकामानांनःकामसमृद्धिंपारयेतिशेषः कथंकारंपालनमत्राहुः भजेति हेसखेचारुसुंदरंतवजलरुहस्यपद्मस्यसमाननं प्रवृत्तिशून्यस्ययदर्शनेच्छास्यात्ताद क्शक्तिवन्मुखंदर्शयन् त्वंकिंकरीःदासीःनोभजपालयस्मस्मृत्वापत्यादीन्विहायार्यरात्रेवनंप्राप्ताइति भवेभवइतिद्विरावृत्तिःकर्तव्या जन्मनि जन्मनिकिंकरीरित्यर्थः यद्वाभवेतादर्थ्येसप्तमी अस्मद्भद्रार्थमित्यर्थः । यद्वाऽस्म ज्जीवनसत्तायांविवक्षितायांअन्यथामरणमेवास्माकमापद्यतइत्यर्थः २ अलुक्समासन्यायेनशरदुदाशयइत्येकंपदं शरदुदाशयेशरत्कालसंबंधिसरोवरे साधु भूम्याद्युपद्रवमंतरेणजातमुत्पन्नं अतएव स

गोप्यऊचुः ॥ जयतितेधिकंजन्मनाव्रजःश्रयतइंदिरासाधुत्रहि ॥ दयितदृश्यतांत्वादिदृक्षतांत्वयिगतासवस्त्वाविचिन्वते १ व्रजजनार्तिहन्वीर योषितांनिजजनस्मयध्वंसनस्मित ॥ भजसखेभवेकिंकरीःस्मनोजलरुहाननंचारुदर्शयन् २ शरदुदाशयेसाधुजातसत्सरसिजोदरश्रीमुषादृशा ॥ सुर तनाथतेशुल्कदासिकावरदनिघ्नतोनेहकिंवधः ३ विषजलाशयाद्व्यालराक्षसाद्वर्षमारुताद्वैद्युतानलात् ॥ वृषमयाद्वयाद्विश्वतोमुखाद्वृषभतेवयंरक्षितामुहुः ४ सखलुगोपिकानंदनोभवानखिलदेहिनामंतरात्मदृक् ॥ विखनसार्चितोविश्वगुप्तयेसख उदेयिवान्सात्वतांकुले ५ विरचिताभयंवृष्णिवर्यतेशरणमीयु षांसंसृतेर्भयात् ॥ करसरोरुहंकांतकामदंशिरसिधेहिनःश्रीकरग्रहम् ६

त्प्रशस्तंविकसितंयत्सरसिजंपद्मतंस्यउदरंअरुणायमानंअंतर्दलंतस्यश्रियंशोभांमुष्णातीतिशरदुदाशयेसाधुजातसत्सरसिजोदरश्रीमुट्तयादृशा । शुल्कदासिकाःक्रीतदासीः नोनिघ्नतः मारयतःतेऽस्म दाशादिहननेकिंवधोनभवति । खड्गादेरप्यधिकोवधोऽधरात्रेऽस्मत्त्यागइत्यर्थः । सुरतनाथनिधुवनवीर ३ इदानीमपिअस्मद्रक्षाभवताकार्यातथायथापुराकृताइत्याशयेनाहुः विषेति विषजलाशयात् विषयुतयमुनाह्रदात् यद्वा विषजलपानेनआशयोदीर्घनिद्रामरणंतस्मात् व्यालात्सर्पात् राक्षसात्तृणावर्तनाम्नःवर्षयुक्ताद्वायोः वैद्युतानलात्तानिर्घातलक्षणाग्नेःवृषमयाद्वत्सासुरनिमित्ताद्भयात् किंबहु नाहेवृषभश्रेष्ठ विश्वतोमुखाद्भयात्तेत्वयावयंमुहुःरक्षिताइत्यन्वयः ४ गोप्यःस्वतत्त्वज्ञानंविज्ञापयंति सइति गोपिकानंदयतीतिगोपिकानंदनःसःभवान् हेसखेविश्वगुप्तयेजगद्रक्षार्थं सात्वतांयदू नांकुलेउदेयिवान्उदयंगतः जन्मभजनाययोग्योनेत्याशयेनाहुः अखिलेति अखिलदेहिनामंतर्यामित्वेनद्रक्ष्यतिपश्यतीति । यद्वाऽतरात्मानंस्वरूपंपश्यतीति अनश्नन्नन्योअभिचाकशीतीतिश्रुतिः किंच विखनसार्चितःब्रह्मणापूजितःविरिंचिगुरुरित्यर्थः । यद्वा यःसात्वतांकुलेउदेयिवान्सभवन्गोपिकानंदनःखलुनभवतीत्यर्थःनिषेधेवागलंकारेवीप्सनेनुनयेखल्विति च अलंखल्वोःप्रतिषेधयोःप्राचा क्तेतिक्तायोगआक्षेपापेक्षिकः । तर्हिकइतितत्राहुः अखिलेति । नखल्वितिपाठेवाक्यालंकारार्थः ५ विरिंचिगुरुश्चेदपेक्षितांशेषपुरुषार्थप्रदःस्यात्तत्रकथंनिर्णयइत्याहुः विरचितेति । श्रियःकरंगृह्णातीति श्रीकरग्रहंशरणमीयुषांपुसांधेहिनिधेहि । हेकांतकमनीय ६

नकेवलंकरानिधानेनपूर्यते । अपितुकुचेषुचरणनिधानंचापेक्षितमित्याहु । प्रणतेति तृणचरान्पशून्अनुगच्छतीतितृणचरानुगं फणिफणेष्वर्पितंकृणुकुरु । हृच्छयंकामं कृंद्धिछिंद्धि ७ वल्गूनिम नोहराणिवाक्यानिनिराकांक्षाणिपदात्मकानियस्यांसातथा । तथाबुधानांविदुषांमनोज्ञयाहृद्यया । मधुरयेत्यनेनप्राप्तांबालभाषणशंकांनिराकरोतिविधिकरीःदासीः । अधरसीधुनाअधरामृतेन । आ प्याययस्वसेचयजीवयवा । मुह्यतीःमोहंगच्छतीः ८ तप्तान्जीवयतीतितप्तजीवनंश्रवणमात्रेणमंगलं श्रीमत्समृद्धिमत् । आततंविस्तृतंभुवियेजनाःतवकथामृतंगृणंतिपानादिना । तेभूरिबहुलंदुःखं द्यंतिखंडयंतीति । भूरीणिहिरण्यादीनिददतीतिवा भूरिस्वर्णजातरूपंहिरण्यंरा:कल्याणंहेमरुक्मंसुवर्णमिति भवंतीतिशेषः ९ तवकथामृतंतप्तजीवनादिफलदंचेत् अधरसीधुनाप्यायनंकिमर्थमित्या शंक्यतवहसितादिनामुग्धावयंतवाधरसीधुंप्रार्थयामहइत्याशयेनाहुः प्रहसितामिति हेप्रियप्रेम्णावीक्षणंध्यानमंगलं विहरणंविहारः विक्रमलक्षणः हृदिस्पृशःहृदयंगमाः । संविदःसंभाषणादयः । संविच्छुद्धेप्रतिज्ञायांसंकेताचारनामसु संभाषणेक्रियाकारेविज्ञानेतोषणेपिचेतिवचनात् एतेसर्वेपिसुरतेसंभवंति । कुहकधूर्तेतिप्रणयकोपेहियस्मात्तस्मात् अधरामृतपानप्रार्थनम् १० त्वच्चरितंज्ञानि

प्रणतदेहिनांपापकर्शनंतृण चरानुगंश्रीनिकेतनम् ॥ फणिफणार्पितंतेपदांबुजंकृणुकुचेषुनःकृंद्धि हृच्छयम् ७ मधुरयागिरावल्गुवाक्ययाबुधमनोज्ञया पुष्करेक्षण ॥ विधिकरीरिमावीरमुह्यतीरधरसीधुनाप्याययस्वनः ८ तवकथामृतंतप्तजीवनंकविभिरीडितंकल्मषापहम् ॥ श्रवणमंगलंश्रीमदाततंभु विगृणंतितेभूरिदाजनाः ९ प्रहसितंप्रियप्रेमवीक्षणंविहरणंचतेध्यानमंगलम् ॥ रहसिसंविदोयाहृदिस्पृशःकुहकनोमनःक्षोभयंतिहि १० चलसियद्र जाच्चारयन्पशून्नलिनसुंदरंनाथतेपदम् ॥ शिलतृणांकुरैःसीदतीतिनःकलिलतांमनःकांतगच्छति ११ दिनपरिक्षयेनीलकुंतलैर्वनरुहाननंबिभ्रदावृतम् ॥ वनरजस्वलंदर्शयन्मुहुर्मनसिनःस्मरंवीरयच्छसि १२ प्रणतकामदंपद्मजार्चितंधरणिमंडनंध्येयमापदि ॥ चरणपंकजंशंतमंचतेरमणनस्तनेष्वर्पयाधिहन् १३ सुरतवर्धनंशोकनाशनंस्वरितवेणुनासुष्ठुचुंबितम् ॥ इतररागविस्मारणंनृणांवितरवीरनस्तेऽधरामृतम् १४ अटतियद्भवानह्निकाननंत्रुटिर्युगायतेत्वामपश्यताम् ॥ कुटिलकुंतलंश्रीमुखंचतेजडवदीक्षतांपक्ष्मकृद्दृशाम् १५

नामपिदुर्बोधकंकिमुतास्माकमितिभावेनाहुः चलसीति । पशूंश्चारयन्यद्यदाव्रजाच्चलसिगच्छसि तदाशिलतृणांकुरैःछिन्नशिखरत्वेनपरुषैरिषीकादितृणाग्रैःशिलाःशर्करास्ताभिस्तृणांकुरैश्चवा सीदतिः व्यथतीति कलिलतांनारायणोन्योवेतिसंशयपंकिलताम् ११ ननुव्याकुलचित्तानांकामोद्बोधायोगात्कृंद्धिहृच्छयमितिकथमुक्तं अत्रवदंति दिनेति । दिनपरिक्षयेसंध्याकालेवनादागच्छान्निति शेषः वनरजस्वलंवनभूमौसतागोरजसायुक्तंदर्शयन् नीलकुंतलैरावृतम् । वनरुहंजलजंकमलंतद्वच्छोभमानमाननंबिभ्रत् त्वंनोमनसिस्मरंकामंमुहुरनिशंनूतनम् १२ धरणिभंडनंभूमिभूषणं सर्वापदिध्ये यंपद्मजार्चितंब्रह्मणाराधितम् । शंतमंसुखतमं आधिहन्मनोदुःखनाशन । तेचरणपंकजंनःस्तनेष्वर्पयनिधेहीत्यन्वयः १३ स्तनतटेषुचरणार्पणादुद्बुद्धज्वलितकामाग्निज्वालाशमनायतवाधरामृ तंपिपासुभ्योऽस्मभ्यंदेहीत्याहुः सुरतेति । सुरतंग्राम्यधर्मः स्वरितवेणुनाध्वनियुक्तवेणुना रागोरसःइतरेषांरसानांआस्वादनसुखंविस्मारयतीतिइतररागविस्मारणं इतरेषुमधुरेषुवस्तुषुरा गंस्नेहंविस्मारयतीतिइतररागविस्मारणंवा वितरदेहि । विश्राणनंवितरणंस्पर्शनंप्रतिपादनमितिहलायुधः १४ किंच अहोरात्रमस्माकंत्वत्संचिंतनमेवान्योव्यापारोनेष्यतेइत्याशयेनाहुः अटतीति । यद्यदायस्मिन्नह्निकाननमटतिगच्छतितदातस्मिन्नह्नित्रुटिः त्रुटीतिप्रातिपदिकग्रहणंतेनविभक्त्यंतंपदंलक्षयति । अणुद्वयलक्षणः परमाणुः त्रयःपरमाणवस्त्रसरेणुः । त्रयस्त्रसरेणवस्त्रुटिःसः

कालावयवः । नःत्वामपश्यतामस्माकंयुगायतयुगवदाचरति । दिव्यद्वादशसहस्रपरिमितसमानावर्त्तत पक्ष्मनुदातव्ययतातपक्ष्मनुदः । तादृश्यादृशाधारतारतथा । तासामानामपनत्राणातव
मुखमीक्षतांईक्षमाणानामस्माकंमवृत्तिर्जडवदचेतनवन्निश्चेष्टनमित्यर्थः । अनेनबहुकालोपिनुटितुल्यइतिसूच्यते । नुर्दृशामितिपाठेनुर्मानवस्यतवमुखमीक्षतांदृशांपक्ष्मजडवदुत्क्षेपावक्षेपलक्षणप्रवृत्ति
शून्यमित्यर्थः । अनेनमानवस्याप्यनिमिषत्वंसूच्यते १५ भगवदुन्मुखस्मरणमुग्धागोप्योरतिविहारसमयोयमितिनिरूप्यसुरतसंविदाधिक्षिपंति पतीति । तेतवसकाशमागताहियस्मात् हेकितवकः
पुरुषःनिशियोषितस्त्यजेदित्यन्वयः आगमनेहेतुंवदंति गतिविदइति । गतिविदःआकर्षलक्षणगानज्ञस्यतवोद्गीतेनस्थितोत्थानकरणेनमोहिताःमूर्च्छांप्रापिताः १६ किंबहुनोक्तेनास्मदवस्थेयंही
तिविज्ञापयंति रहसीति हृच्छयस्योदयोयस्मात्तत्तथा वीक्ष्यनिरूप्य अतिस्पृहाअतिशयितस्पृहयामुह्यते विभक्तिव्यत्ययश्छांदसः बृहतिदधातीतिबृहत् श्रियःनिवासस्थानमितिशेषःयद्वाबृहदुरःश्रिय
इत्येकंपदंबहुवचनंद्रष्टृणामनुक्षणंकांतिविशेषबाहुल्यद्योतकम् १७ यदिभवानस्मदापदंनपरिहरिष्यतितर्ह्ययमवतारोव्यर्थोभविष्यन्नचतच्युक्तं अतोस्मद्दुःखंभवताअवश्यंपरिहरणीयमितिभावेनाहुः व्रजे
ति । भोअंगतेतवेयंव्यक्तिरवतारलक्षणाव्रजौकसांगोपानां मार्गौकसांतीर्थसार्थानांवा निवहौकसांग्रामवासिनांवावनौकसांवनवासिनां । संन्यासिनांवावानप्रस्थानांवाजलाश्रयाणांवा अलमत्यर्थं वृ

पतिसुतान्वयभ्रातृबांधवानतिविलंघ्यतेह्यच्युतागताः ॥ गतिविदस्तवोद्गीतमोहिताःकितवयोषितःकस्त्यजेन्निशि १६ रहसिसंविदंहृच्छयोदयंप्रहसि
ताननंप्रेमवीक्षणम् ॥ बृहदुरःश्रियोवीरवीक्ष्यतेमुहुरतिस्पृहामुह्यतेमनः १७ व्रजवनौकसांव्यक्तिरंगतेत्वाजिनहंत्यलंविश्वमंगलम् ॥ मजमनाक्कचनस्त्व
स्पृहात्मनांस्वजनहृद्रुजांयन्निषूदनम् १८ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेगोपीगीतंनामैकोनात्रिंशोऽध्यायः ॥ २९ ॥ श्रीशुकउवाच ॥ इतिगोप्यः
प्रगायंत्यःप्रलपंत्यश्चचित्रधा ॥ रुरुदुःसुस्वरंराजन्कृष्णदर्शनलालसाः १ तासामाविरभूच्छौरिःस्मयमानमुखांबुजः ॥ पीतांबरधरःस्रग्वीसाक्षान्मन्मथ
मन्मथः २ तंविलोक्यागतंप्रेष्ठंप्रीत्युत्फुल्लदृशोबलाः ॥ उत्तस्थुर्युगपत्सर्वास्तन्वःप्राणमिवागतम् ३ काचित्करांबुजंशौरेर्जगृहेऽजालिनामुदा ॥ काचि
द्दधारतद्बाहुमंसेचंदनरूषितम् ४ काचिदंजलिनागृह्णात्तन्वीतांबूलचर्वितम् ॥ एकातदंघ्रियुगलंसंतप्तस्तनयोरधात् ५ एकाभ्रुकुटिमाबध्यप्रेमसंरंभवि
ह्वला ॥ प्रत्यवैक्षत्कटाक्षेणनिर्दष्टदशनच्छदा ६ अपराऽनिमिषद्दृग्भ्यांजुषाणातन्मुखांबुजम् ॥ आपीतमपिनातृप्यत्संतस्तच्चरणंयथा ७

जिनहंत्रीदुःखनाशिनी यद्यस्मात्त्वयिस्पृहायस्यसत्वत्स्पृहःआत्मायासांतास्तथातासां नश्चक्षुर्विषयंमनाक्कुर्ईषदपिभज सामान्योक्त्यापुनरुक्तंकुर्वंति स्वजनेति विश्वमंगलंयद्व्यक्तंरूपंस्वजनस्यहृद्रुजां
अंतर्गतरोगाणांनिषूदनंनिर्मूलकरं तस्मादस्माकंस्वजनैकत्वादभीष्टंभवताकर्तव्यामितिभावः १८ इतिश्रीभागवतेमहापुराणेदशमस्कंधेवि०कृतटीकायांएकोनात्रिंशोऽध्यायः॥ २९॥ यथागोपीनामात्मानं
प्रकाशयन् भगवांस्तथासाधनसामग्र्याज्ञानिनामपीतीममर्थंदर्शयितुमस्याध्यायस्यप्रारंभः । तत्रशुकः रोदनादिकमपिभक्त्युद्रेकलक्षणमितिदर्शयितुंगोपीनांरोदनप्रकारंकथयति इतीति । चित्रधाना
नाविध्येन सुस्वरंयथाश्रोतृसुखकरंभवति तथास्वरंकुर्वत्यः अनेनपरिदेवनादिकंव्यावर्तयति १ भक्त्युद्रेकोद्भूतरोदनफलमाह तासामिति । मनोमथ्नातीतिमन्मथःकामःसाक्षात्स्पष्टीकृतसर्वांगसुंदरइं
द्रतुल्यस्तस्यापिमन्मथःमदमथनः । मदनोमन्मथोमारः कामइतिरुद्रः । अनेनैवंविधभगवदुपासनासामर्थ्यात्समुद्भूतःसौंदर्यसागरःकामइतिसूचितंभवति २ तन्वःभोगायतनशरीराणि ३ गोपीनांकरा
दिग्रहणादिषुहरेःकरादानादिना भक्त्यैकलभ्यः श्रीनारायणइति निदर्शयंस्तत्प्रवृत्तिंकथयति कांचिदित्यादिना । चंदनरूषितंलिप्तम् ४ चर्वितंभक्षितोच्छिष्टंअयात् दधार ५ प्रेमसंरंभाविह्वला प्रण
यकोपाकुलिता भ्रुकुटिललाटशिरांआबध्यमकाश्य निर्दष्टदशनच्छदानितरांदष्टोष्ठपुटा ६ अनिमिषंनिमेषलक्षगव्यापारशून्यमितिक्रियाविशेषणं जुषाणःसेवमाना ७

त्वदिस्थितंकृत्वापुलकांगीरोमांचितगात्रा उपगुह्यालिंग्य आनंदनिर्भरापरमानंदपूर्णा ८ जनःशोकाकुलःसंसारीवा प्राज्ञंपंडितम् । दुःखशमनबोधकंपरमात्मानंवा प्राज्ञेनात्मनान्वारूढइतिश्रुतिः ९ पुरुषोविष्णुः शक्तिभिःलक्ष्मीविभूतिभिः १० अनिलश्चषट्पदाश्चानिलषट्पदाः विकसतोःकुंदमंदारयोःसुष्ठुरताःक्रीडावंतःअनिलषट्पदाःयस्मिंस्तत्तथा ११ शरत्कालचंद्रांशूनांसदोहेननिरंतरराज्याध्वस्तंनिरस्तंदोषातमःरात्र्यंधकारोयस्मिंस्तत्तथा । कृष्णायाःयमुनायाःईहयाप्रवाहलक्षणचेष्टया आयस्ताःआयासंप्राप्ताः । तरलाअणुतरंगाएतैराचितानिआसिक्तानिचकोमलानिचवालुकानिसैकतानियत्रतत्तथोक्तं यद्वा कृष्णेहयाश्रीकृष्णमूर्तिक्रीडयाआयस्तानिचतरलानिचंचलानिचातएवाचितानिइतस्ततोविकीर्णानिचशेषंसमम् । अणुस्तरंगोलोलःस्याच्चरलाकुरलस्तथेतिगोपालः आचितंछन्नसिक्तयोरितिच १२ मनोरथांतंप्रार्थितार्थपूर्तिं मनोरथानामर्थानामंतंनिर्णयहेतुंपरमात्मानम् । रथगताविति धातुःश्रुतिविषयेतस्यब्रह्मणोदर्शनेनाविषयीकरणलक्षणेनजाताह्लादेनपूर्णार्थलक्षणेनावधूताहृद्रुजोविषयीकरणलक्षणायासांतास्तथा उत्तरीयैःप्रावरणीयवस्त्रैः । आसनंविमलोत्कर्षणीज्ञानेत्यादिक्ष्मामिवपीठम् । अन्यत्रात्मनोवायोर्बंधवे । सतोबंधुमसतिनिरविंदन्निति श्रुतिः ॥ १३ ॥ गोपीपरिषद्गतःगोपस्त्रीसमूहमध्यवर्ती । त्रैलोक्यलक्ष्मीणांत्रैलोक्यसौंदर्याणामेकंपदं स्थानम् त्रिलोकिजनसेव्यालक्ष्मीःश्रीस्तस्याएकंकेवलंपदंभोगयोग्याश्रमंवा ॥ १४ ॥

तंकाचिन्नेत्ररंध्रेणहृदिकृत्यनिमील्यच ॥ पुलकांग्युपगुह्यास्तेयोगीवानंदनिर्भरा ८ सर्वास्ताःकेशवालोकपरमोत्सवनिर्वृताः ॥ जह्युर्विरहजंतापंप्राज्ञंप्राप्ययथाजनः ९ ताभिर्विधूतशोकाभिर्भगवानच्युतोनृप ॥ व्यरोचताधिकंतातपुरुषःशक्तिभिर्यथा १० ताःसमादायकालिंद्यानिर्विश्यपुलिनंविभुः॥ विकसत्कुंदमंदारसुरतानिलषट्पदम् ११ शरच्चंद्रांशुसंदोहध्वस्तदोषातमःशिवम् ॥ कृष्णेहायस्ततरलाचितकोमलवालुकम् १२ तद्दर्शनाह्लादविधूतहृद्रुजोमनोरथांतंश्रुतयोयथाययुः ॥ स्वैरुत्तरीयैःकुचकुंकुमांकितैरचीक्लृपन्नासनमात्मबंधवे १३ तत्रोपविष्टोभगवान्सईश्वरोयोगेश्वरांतर्हृदिकल्पितासनः ॥ चकासगोपिपरिषद्गतोर्चितस्त्रैलोक्यलक्ष्म्येकपदंवपुर्दधत् १४ सभाजयित्वातमनंगदीपनंसहासलीलेक्षणविभ्रमभ्रुवः ॥ संस्पर्शनोत्कांककृतांगहृच्छयं संरतभ्यईषत्कुपीताबभाषिरे १५॥ गोप्यऊचुः॥ भजतोऽनुभजंत्येकएकएतद्विपर्ययम्॥ नोभयांश्चभजंत्यन्यएतन्नोब्रूहिसाधुभो १६ श्रीभगवानुवाच॥ मिथोभजंतियेसख्यःस्वार्थैकांतोद्यमाहिते ॥ नतत्रसौहृदंधर्मःस्वार्थंतद्धित्तनान्यथा १७ भजंत्यभजतोयेवैकरुणाःपितरोयथा ॥ धर्मोनिरपवादोऽत्र सौहृदंचसुमध्यमाः १८

अनंगंकामंदीपयतीत्यनंगदीपनः तंलीलयालालित्येनईक्षणंहाससहितंसहासंसहासलीलेक्षणेनविभ्रमंत्योऽनुदिशंसंफलंत्यःभ्रुवोयासांतास्तथा संस्पर्शनेनोत्पन्नाउत्काउत्कंठासैवांऽकंलक्षणंतेनकृतःपूर्णःअंगेशरीरेहच्छयःकामःसंस्पर्शनोत्कांककृतांगतद्दच्छयःतम् । संस्तभ्यकरचरणाद्यंगस्पर्शनेनाभिव्यक्तंकामंनिरुध्येत्यर्थः १५ गोप्यःशास्त्रतत्त्वमजानंत्योहेररकृतज्ञताकरणाभिप्रायेणपृच्छंति भजतइति । एकेकेचिद्भजतः सेवमाननुभजंतिसेवानुकूलफलसमर्पणेनसेवंते एकेकेचित् । एतस्योक्तस्यविपर्ययंकुर्वंति फलोद्देशेनासेवमानान विशिष्टफलदानेनानुवर्तते अन्नेनोभयांश्चानुवर्तते । यदेतत्पक्षत्रयंअत्रसाधु निर्दोषपक्षमस्माकंब्रूहिविविच्यकथयेत्यर्थः १६ तत्रपरिहारंवक्तुमुपक्रमते मिथइति । हेसख्यःयेमिथोभजंति उपकारप्रत्युपकारलक्षणांसेवांकुर्वंति तेस्वार्थैकांतोद्यमाहिस्वप्रयोजननियतप्रयत्नायस्मात्तस्मात्तेषुसौहृदंअनिमित्तत:स्नेहलक्षणोधर्मोनास्ति । ननुतर्हिकिमास्तितत्राह स्वार्थमिति । स्वप्रयोजनार्थं वित्तजानीध्वम् । विपक्षंप्रतिषेधति नेति १७ येअभजत:फलोच्छिन्ननुगतान्भजंति फलंमर्षयंति तत्रकारणमाह करुणाइतिकरुणयंतिप्राणिनोदृष्ट्वाद्रवीकृतहृदयाभवंतीतिकरुणाः । तत्रदृष्टांतः लोकानुग्रहकरणशीलाःपितरोयथाबालादीन्दृष्ट्वागुणांतरंचास्तीत्याह धर्मइति हेसुमध्यमाः अत्रतेषुजनेषुसौहृदलक्षणोधर्मश्चनिरपवादः निर्दोषःइदंसंप्रज्ञातसमाधिस्थस्यलक्षणम् १८

असंप्रज्ञातसमाधिस्थस्यलक्षणमाह भजतोपीति । अत्रकेचिज्जनाःभजतोपिफलार्थितयासेवमानानापिनभजंति स्वप्रयोजनाभावात् कथंतदित्यत्राह आत्मेति । आत्मनिपरमात्मन्येवारामःक्रीडायेषां तेतथा बाह्यप्रवृत्तिशून्याइत्यर्थःतदपिकथमित्याशंक्यसुखार्थेहिप्रवृत्तिः सुखंतुस्वतएवपूर्णमित्याशयेनाह आप्तकामाइति । काम्यतइतिकामःआनंदःहिशब्दोहेतौ । आनंदाप्तौनिमित्तमाह अकुतेति अकृतंपरमात्मानंजानंतीति तज्ज्ञानंचनिष्पापत्वादित्याह गुरुद्रुहइति । गुरूनिपापानिद्रोहितवंतोनाशितवंतइतिनास्त्यकृतःकृतनेतिश्रुतिः नराणांक्षणिपापानामितिस्मृतिः । कीदृशाःकृतघ्नाइत्यतो वाहभजतोपीति येकेचिद्भजतःशरणार्थितयासेवमानानापिनभजंति ग्रहणलक्षणांसेवांनकुर्वाति अभजतःकुतोभजंतितत्कारणमाह आत्मारामाइतिपरमात्माविषयमतिरहितादेहलक्षणात्मनिनितरांरताश्च तर्हिकुत्ररातिरित्यत्राह आप्तेति आप्तेविस्रब्धेस्त्रीजनेकामोयेषांतेतथाएतादृशाःकृतघ्नाहिकृतंनजानंतिनाशयंतिच अतएवगुरुद्रुहः देवाहिगुरूणांद्रोग्धाइत्युच्यंते हविराद्यदानात् १९ अहमेष्वेकई तिभवतीनाभाशंकामाभूदित्याह नाहमिति अपिसमुच्चयेतुशब्दोविशेषप्रकाशकः अहंभजतःफलार्थितयासेवमानानभजतोपिफलार्थितयाअसेवमानान्नभजामि तदिच्छयाफलंनदास्यामि यमेवैषवृणु तेतेनलभ्यइति ममविजयशिक्षामणेः ततःप्रयोजनाभावात् तेभ्यःप्रयोजनंनममेत्यर्थःतर्हेषांसेवानिष्फलाकिंनेत्याह अमीषामिति अमीषामुभयेषांयथायथासेवाःस्युःतथातथामत्तःउच्चावचाःसेवाफ लसंपदःस्युरेवअर्थिनांयोग्यानामधिकारिणांकल्पवृक्षाद्यथाफलानितथेत्यर्थः २० भगवान्गोपीनांसेवास्तवनव्याजेनस्वोपासनाप्रकारंदर्शयति यथेति यथाअधनोधनहीनः दरिद्रःदैवाल्लब्धधने

भजतोपिनवैकेचिद्भजंत्यभजतःकुतः ॥ आत्मारामाह्याप्तकामाह्यकृतज्ञागुरुद्रुहः १९ नाहंसख्योभजतोपिजंतून्भजाम्यमीषामनुवृत्तयेयथा ॥ तथै
वमत्तःफलसंपदःस्युरुच्चावचाःकल्पतरोरिवार्थिनाम् २० यथाऽधनोलब्धधनेविनष्टेतच्चिंतयान्यन्निभृतंनवेद ॥ एवंमदर्थार्पितलोकवेदस्वानांहिवोमय्य
नुवृत्तयोऽबलाः ॥ मयापरोक्षंभजतातिरोहितंसामूयितुंनार्हथमांप्रियंप्रियाः २१ नपारयेहंनिरवद्यसंयुजांसुसाधुकृत्यंविबुधायुषापिवः ॥ योमांभजेदुर्जर
देहशृंखलाःसंवृश्चयद्वद्धिप्रतियातिसोधुना २२ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेपूर्वार्द्धेत्रिंशोऽध्यायः ॥ ३० ॥ ॥ छ ॥

नष्टेतच्चिंतयानष्टधननियतरतमनस्कत्वेननितरांभृतंगृहीतंअन्यन्नवेद यद्वा निभृतंस्तिमितंनिश्चलंस्थिरंपुरोवर्त्यन्यद्वस्तु हेअबलाःएवंमदर्थमामुद्दिश्यअर्पितेलोकवेदस्वेलौकिककर्मवैदिककर्मलक्षणसर्वस्वे यासांतास्तथा तासांवोयुष्माकंअनुवृत्तयःसेवालक्षणाउपासनाअविषयानस्युरित्यन्वयः तर्हिकिमर्थंभवतांतरधायीत्याशंक्यास्माकंस्वभावोयमित्याशयेनाह मयेति अत्रभजतेतिशतृप्रत्ययः इच्छावाचीपरोक्षंभजताव्यवधानमिच्छतामयातिरोहितं पारोक्ष्यंकृतं परोक्षप्रियाइवहिदेवाइतिश्रुतिः व्यवधानमस्मत्प्रियंयस्मात्तस्मात् हेप्रियाःयूयंप्रियंमांसासूयितुंअसूयासहितांमर्तिकर्तुंनार्हथेत्य न्वयः संनिकर्षोहिमर्त्यानामनादरणकारणमितिस्मृतेश्चाशिक्षणायाप्येवंकृतं २१ ननुयुष्मदनुग्रहाभावात्तत्कथमित्याशंक्यानुग्रहविशेषंकथयति नेति विबुधायुषादिव्यवस्सरकल्पितजीवनलक्षणेनापि अहंनिरवद्यसंयुजांनिर्दुष्टमनोयोगवृत्तीनांवःसुसाधुकृत्यंयुष्माकंसर्वेसंमतंनिर्दोषंकर्मप्रतिकर्तुनपारयेनशक्नोमीत्यनेनगोपीष्वधिकोनुग्रहोस्तीतिदर्शितं नकेवलंयुष्मास्वनुग्रहविशेषोममनिर्व्याजभक्त्या भजमानेकस्मिंश्चिदपिस्यादित्याशयेनाह योमामिति योमांभजेन्मामुद्दिश्यभक्तिंकरोतिसपुरुषः स्त्रीजनोवाधुनास्मिन्जन्मन्येव दुर्जरदेहशृंखलाःभक्तिज्ञानेविनाजरयितुंशिथिलीकर्तुमशक्याः लिंगशरीरल क्षणशृंखलाःसंवृश्चयच्छित्त्वा वृद्धिंस्वरूपभूतानंदलक्षणांप्रतियाति तस्यतावदेवचिरमित्यादिश्रुतेः यद्वादह्यतेसिच्यतेइतिदेहः दुर्जराद्दुरुच्छेदाः पुत्रमित्रादिनिबद्धस्नेहलक्षणाःशृंखलाःसंवृश्चयम भजेत्संवेत सोधुनैवभक्तिज्ञानादिसाधनसामग्रीलक्षणांवृद्धिंप्रतियातीत्यन्वयः २२ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेविजयध्वजकृतटीकायांत्रिंशोऽध्यायः ॥ ३० ॥

भक्तिरसत्रभगवत्प्रीतिरेवानंदानुभवेकारणंनान्यत्साधनमितिनिदर्शयितुंरासक्रीडांवर्णयत्यस्मिन्नध्याये सतत्रपर्यंतिजक्षन्क्रीडन्रममाणइत्यादिश्रुतिः तत्रगोपीनांकृष्णविरहसमुद्भूतसंतापप्रणाशंवक्ति इत्थमितितापत्यागेनिमित्तमाह तत्संगेति हरेरंगसंगलक्षणसेवनेनउपचिताःफलरूपेणपरिणताःआशिषःप्रार्थनायासांतास्तथा यद्वा उपचिताःसंचिताःसमृद्धिंगताःआशिषःशुभानियासांतास्तथा १ समृद्धफलशुभानुभवप्रकारंवक्तुमुपक्रमते तत्रेति तत्रवनेतस्यामवस्थायांअन्योन्याबद्धबाहुभिःइति रासक्रीडाप्रकारंदर्शयति समतलमतृणप्रदेशेवितस्तिमात्रोन्नतशंकुसंस्थाप्य तत्परितः सर्वैः स्वपादमवष्टभ्यवृत्ताकारेणस्थित्वैकस्यावामहस्तंअन्यस्यानिकटवर्तिन्यादक्षिणपाणिनांसंगृह्य स्वशक्त्यावष्टंभनवतुलाकारभ्रमणंचक्रवत्क्रियारासक्रीडा २ नृत्यादिषुभरतरीतिसंज्ञेषुगा तुमुपक्रांतेषुयोधिरसोल्लासोजायतेसरसः तत्संबंधीरसोरासःतदुद्रेकेणक्रीडा नृत्यविशेषःएवंविधोरासक्रीडोत्सवःकृष्णेनसम्यक्प्रवृत्तइत्यन्वयः कीदृशोगोपीनांतासांमंडलेनवलयेनमंडितोलंकृतः कथंभूतेन तासांगोपीनांमध्यंप्रविष्टेन मध्येशंकुस्थापनात्कथंमध्यप्रवेशःसंगतइतित्राह द्वयोरिति वलयस्थितानांतासांद्वयोर्द्वयोर्मध्येप्रविष्टेन एकस्यैदंकथंघटतइत्यतोयोगेश्वरेणेति योगैश्वर्या देकस्यबहुत्वंघटतइतिभावः कीदृशानांकृष्णेनकंठेगृहीतानां तत्रैवंविशेषः कृष्णदक्षिणभागस्थितायाःकृष्णदक्षिणांसग्रहणं वामभागस्थितायास्तस्यवामस्कंधग्रहणं स्वनिकटस्थस्त्रियःकंठेगृहीतेन तेनैवरासोत्सवःसंप्रवृत्तइतिगतेनान्वयइत्यर्थः ३ नन्वेवंकृष्णेरासक्रीडाकारिणिकेसाक्षिणइतित्राह यन्मन्येतेति कृष्णोयदारासक्रीडांकर्तुमन्येतन्यरूरुपदितिव्यत्ययः तावत्तदानभः औत्सुक्येनानि

श्रीशुकउवाच ॥ इत्थंभगवतोगोप्यःश्रुत्वावाचःसुपेशलाः ॥ जहुर्विरहजंतापंतत्संगोपचिताशिषः १ तत्रारभतगोविंदोरासक्रीडामनुव्रतैः ॥ स्त्रीरत्नै रन्वितःप्रीतैरन्योन्याबद्धबाहुभिः २ रासोत्सवःसंप्रवृत्तोगोपीमंडलमंडितः ॥ योगेश्वरेणकृष्णेनतासांमध्येद्वयोर्द्वयोः ॥ प्रविष्टेनगृहीतानांकंठेस्वनिक टस्त्रियः ३ यन्मन्येतनभस्तावद्विमानशतसंकुलम् ॥ दिवौकसांसदाराणामौत्सुक्यनिभृतात्मनाम् ४ ततोदुंदुभयोनेदुःखात्पेतुःपुष्पवृषयः ॥ जगुर्गंध र्वपतयःसस्त्रीकास्तद्यशोऽमलम् ५ वलयानांनूपुराणांकिंकिणीनांचयोषिताम् ॥ सप्रियाणामभूच्छब्दस्तुमुलोरासमंडले ६ तत्रापिशुशुभेताभिर्भगवा न्देवकीसुतः ॥ मध्येमणीनांहैमानांमहामरकतोयथा ७ पादन्यासैर्भुजविधुतिभिःसस्मितैर्भ्रूविलासैर्भज्यन्मध्यैश्चलकुचपटैःकुंडलैर्गंडलोलैः ॥ स्विद्य न्मुख्यःकबररशनाग्रंथयःकृष्णवध्वोगायंत्यस्तंतडितइवतामेघचक्रेविरेजुः ८

भृतात्मनांनिश्चलमनसां सदाराणांसभार्याणांदिवौकसांविमानशतसंकुलंआसेतिशेषः ४ ततःरासोत्सवप्रारंभानंतरम् ५ ६ तत्रापिरासक्रीडायामपि यद्वा तत्रापिनभस्यपि रासमंडलेएवंचे त्सप्रियाणामितिपदंपूर्णार्थंलभते अन्यत्रकृष्णव्यतिरेकेणप्रियाभावात् अस्मिन्पक्षेप्रियेणबहुरूपंगतेनकृष्णेनसहितानां तत्रापिशब्दसामर्थ्यात्पारवश्यात् शिक्षार्थंनभस्यपिरासक्रीडाप्रवृत्तेतिप्रत कर्यं हैमानांहिमवत्संभूतानांमणीनांमाणिक्यानांमध्येमरकतश्याममणिरिव अनंतरत्नप्रभवस्येत्युक्तं रत्नजातीनामुत्पत्तिर्हिमवद्गिरेरितिप्रसिद्धं यद्वा हैमानांहेमकारसंभूतानांतत्रत्यानांमणीनांनिर्मल त्वेनकांत्यतिशयात् ७ तत्रनृत्यप्रकारंकथयति पादेति पादन्यासैर्वक्रस्थापितपादविक्षेपविशेषैः भुजानांविधुतिभिः कंपनविशेषैः भ्रूविलासैःभ्रूभंगैः चलकुचतटैरितिकेचित् कबरेत्यादौश्लथदितिप दमध्याहार्यं श्लथंत्यः कबररशनाग्रंथयःबंधविश्लेषाःयासांतास्तथा यद्वा कबररशनानामग्रंथयःअबंधनानियासांताः मुच्यमानकबरकांच्यइत्यर्थः स्तनितरसनाग्रंथयइतिकेचित् स्तनष्टनइतिधातुः कृष्णवध्वःकृष्णपरिग्रहाः कृष्णयुक्ताःगोपस्त्रियइतिवा भावैःपुरुषान्बध्नंतीतिबध्वः समस्तभावैःखलुबंधनंस्त्रियइत्युक्तेः तंकृष्णं गायंत्योयाएवंविधास्ताः मेघचक्रेमेघमंडलेतडितइवेतिकांतिविशेष द्योतनार्थंदृष्टांतोपादानं नतुपादन्यासादिविशेषप्रकाशनार्थं अचेतनत्वात्तडितां यद्वा यत्तडितइति तडितोयथाप्रकाशनाऽप्रकाशनेतथापादविन्यासाद्यावर्त्तनामितिदर्शनाय तडगतावितिधातोःतडंतिक्षि

प्रतिरोधानंगच्छंतीति क्षिप्रतिरोधानगमनशीलार्थेइत्यत्ययः ८ रक्तकंठ्यःरागपुक्तकंठगुणाः अभिमर्शःकामकलोद्रोधककरस्पर्शोविशेषः यासांगीतनइदंजगदावृतव्याप्त देवसाक्षकत्वात्९ आमाश्रताः
स्वरांतरानंतरिताः स्वरजातीःषड्जादिस्वरभेदान् उन्निन्येउत्कृष्टत्वेनगीतवतीमूर्च्छयामासच निषादर्षभगांधारषड्जमध्यमधैवताः पंचमश्चेत्यमीसप्ततंत्रीकंठोत्थिताःस्वराइत्यमरः १० कृष्णोपितदेवगी
तंध्रुवमुन्निन्ये व्यक्तवर्णेनप्लावयामास तेनतस्यैवसमंगायंत्यै अत्रसमगानंनामतत्प्रशंसार्थं मुकुंदनतद्गानानुसारेणगीतमितिज्ञातव्यम् अन्यथात्रिजगतिमुकुंदगायनसमोगायनज्ञःकोस्तिस्वविभूतिमंतरे
ण स्रवंतीश्लथयंतीकबरबद्धमल्लिकायस्याःसातथा ११ उत्पलसौरभंउत्पलमालयासुगंधितम् १२ नाट्येननृत्येनविक्षिप्तयोःकिंचित्स्रस्तयोःकुंडलयोः त्विषेणरोचिषाभूषितेमंडिते त्विषदीप्तावितिधातोः
अविकृतेत्विषइतिरूपंभवति गंडखंडे गंडमंडले समूहेमंडलेखंडमाहुःशब्दविशारदाइत्युत्पलमाला अभिदधत्यःसपत्न्याःकोपोद्रोधायपार्किंचिन्मंत्रयंत्याः १३ अधाद्धौ शिवंसुखयतीतिसुखम् १४
गृहीतकंठ्यआलिंगितकंठ्यः एकांतवल्लभंनिर्णीतनियतभर्तारम् विजह्रिरेक्रीडांचक्रुः १५ कर्णोत्पलंअलकःकुंतलकश्चकर्णोत्पलालकौताभ्यांविटंकंकपोलंकपोलस्याविटंकोलंकारःधर्मस्तेनस्वेदज

उच्चैर्जगुःकृतमदारक्तकंठ्योरतिप्रियाः ॥ कृष्णाभिमर्शमुदितायद्गीतेनेदमावृतम् ९ काचित्समंमुकुंदेनस्वरजातीरमिश्रिताः ॥ उन्निन्येपूजितातेनप्रीय
तासाधुसाध्विति १० तदेवध्रुवमुन्निन्येतस्यैमानंचबह्वदात् ॥ काचिद्रासपरिश्रांतापार्श्वस्थस्यगदाभृतः ॥ जग्राहबाहुनास्कंधंस्रवत्कबरमल्लिका ११ तत्रै
कांसगतंबाहुंकृष्णस्योत्पलसौरभम् ॥ चंदनालिप्तमाघ्रायहृष्टरोमाचुचुंबह १२ कस्याश्चिन्नाट्यविक्षिप्तकुंडलत्विषभूषिते ॥ गंडखंडेऽभिदधत्याआदात्तांबू
लचर्वितम् १३ नृत्यंतीगायतीकाचित्कूजन्नूपुरमेखला ॥ पार्श्वस्थाच्युतहस्ताब्जंश्रांताऽधात्स्तनयोःशिवम् १४ गोप्योलब्ध्वाऽच्युतंकांतांश्रियएकां
तवल्लभम् ॥ गृहीतकंठ्यस्तद्दोर्भ्यांगायंत्यस्तंविजह्रिरे १५ कर्णोत्पलालकविटंककपोलघर्मवक्त्रश्रियोवलयनूपुरघोषवाद्यैः ॥ गोप्यःसमंभगवतानृतुः
स्मकेशस्रस्तस्रजोभ्रमरगायकरासगोष्ठ्याम् १६ एवंपरिष्वंगकराभिमर्शस्निग्धेक्षणोद्दामविलासहासैः ॥ रेमेरमेशोव्रजकामिनीभिर्यथास्वतंत्रःप्रतिघंवि
दंबयन् १७ तदंगसंगप्रमुदाकुलेंद्रियाःकेशान्दुकूलंकुचपट्टिकांवा ॥ त्यक्तुंपतिंवोदुपलेव्रजस्त्रियोविस्रस्तमाल्याभरणाःकुरुद्वह १८ कृष्णविक्रीडितंवी
क्ष्यव्यमुह्यंतसुरस्त्रियः ॥ कामार्दिताःशशांकश्चसगणोविस्मितोऽभवत् १९ कृत्वातावंतमात्मानंयावतीर्गोपयोषितः ॥ रराभभगवांस्ताभिरात्मारामोपि
लीलया २०

लंलक्ष्यते कपोलालंकारस्वेदजलेनचवक्त्राणांश्रीःशोभायासांतास्तथा वलयनूपुरलक्षणवाद्यधोषैःसमंभगवताचसमंभ्रमराएवगायकाःअनुस्वरदानकरायस्यांसातथा भ्रमरगायकारासगोष्ठीरासक्री
डा तस्याम् १६ स्वतंत्रईश्वरोविधिनिषेधाद्यविषयःप्रतिघंविधिनिषेधविवर्जितंपुरुषमनुकुर्वन्यद्वाप्रवृत्तिधर्मविध्याद्यगोचरेकोपेप्रवृत्तेप्रतिघंविदुरितिच १७ तस्यकृष्णस्यांगसंगेनोत्पन्नेनप्रमोदेना
नंदेनाकुलानिपूर्णानींद्रियाणियासांतास्तथा केशादीन्त्रोढुंपतिंकृष्णंवात्यक्तुंअलंपर्याप्ताः शक्तिवर्जिताआसन्नित्यर्थः अपपरीवर्जनइतिसूत्रात् यद्वाशक्त्याभावेपिनिवारिता अलंतुभूषणेशक्तौपर्या
प्तौशक्तिवारणेइति प्रेमकामात्मत्वात् वहनादिशक्त्यभावइत्यर्थःकुरुद्वहेतिविशेष्यसंबोधनेनकृष्णस्यभक्तिभामिनीलोलत्वंपश्येत्यभिमुखीकरणेनभक्तेरावश्यकर्तव्यत्वंसूचयति १८ सगणःरोहि
ण्यादिनक्षत्रगणेनसहितः यद्वा गणनंसंख्यानंतेनसाहेतः १९ किमत्रसंख्येयमत्राह कृत्वेति यद्वायोगैश्वर्यात्बहुरूपग्रहेणनबह्वीभिः स्त्रीभिरमणंघटतइतिराज्ञःसिद्धत्वेपिमंदाशंकांपरिहरति याव
तीर्यावत्यः रराभेतिव्यत्ययेनपरदाराभिमर्शनेनदोषोनास्तीतिवक्ष्यमाणमर्थमिहैवसूचयति यद्वा रराभचिक्रीडे रासक्रीडाविरामसूचनार्थोवा २०

इदंचभक्तपारवश्यंहरेरजस्रंस्मरेदित्याशयेनहरिचरितंवक्ति तासामिति प्रामृजत्संमार्जितवान् २१ ऋषभस्यप्रवृद्धानुन्मथितवीर्यस्यहरेःस्फुरतोश्चलतोर्मकरकुंडलयोःकुंतलानांत्विषादीप्त्यादीप्तगंडश्रियायुक्तसुरतयोग्यहासोपेताभीष्टांगनिरीक्षणेनानंदमात्मनोदधत्यःतस्यहरेःकररुहाणांनखानांस्पर्शेनस्मरोल्लासजनकलक्षणेननखक्षतेनाभिव्यक्तःप्रमोदःप्रकृष्टआनंदोयासांतास्तथा २२ वनक्रीडांनिरूप्यजलक्रीडांवक्ति ताभिरिति कृष्णस्यांगसंगेनध्वस्ताःस्रस्ताःस्रजोयासांताः सुकुचानांकुंकुमरजोभिरंजितारागिताःयाःताभिर्गोपीभिः आगच्छंतिआवृत्यगच्छंतीत्यंगास्तरंगास्तत्संगेनध्वस्तानिरस्ताःस्रजोयस्याःसातथा तस्याःसकुचकुंकुमरेणुभिरंजितायाः यमुनायाःवाःवार्योविशदित्यन्वयः गंधर्वाणांपालिभिःश्रेणिभिःश्रांतःभिन्नसेतुरितिद्वयंइभराड्विशेषणं यद्वा श्रुहिंसायामितिधातोःश्रांतःनित्यनिरस्तमृत्युःभिन्नसेतुर्विशेषितलोकमर्यादः भेदोविशेषेदलनइति अत्रविशेषोनामव्यावर्तकोधर्मोपिलक्ष्यते पृथक्पृथक्स्थापिततत्सेतुरितिवा एःकामस्यभांदीप्तिंराजयतीतीभराट् कामस्यभांराजतिक्षिपतीतिवाइभराट्कृष्णःगोपीविषये गजगजिशब्दइतिधातोःगजीभिःशब्दयंतीभिःयद्वाभिन्नसेतुरित्यनेनगजस्यमदातिरेकसूचनेनकृष्णस्यतात्कालिकहर्षातिरेकंव्यंजयति भिन्नवेदविहितधर्ममर्यादइत्यर्थःकृष्णेस्वधामोपगतेधर्मःकंशरणंगतइत्यादिस्वोक्तिविरुद्धस्यादितिनासांवंगीकर्तुयोग्यइति २३ स्वस्मिन्स्वेनवारतिर्नपराच्चनपरेणवायस्यसतथेत्यनेनतत्तत्कोलरमणकथनंलोकमोहनायविशेषस्मर

तासांरतिविहारेणश्रांतानांवदनानिसः ॥ प्रामृजत्करुणःप्रेम्णाशंतमेनांगपाणिना २१ गोप्यःस्फुरन्मकरकुंडलकुंतलत्विड्गंडश्रियासुरतहासनिरीक्षणेन ॥ मानंदधत्यऋषभस्यजगुःकृतानिपुण्यानितत्कररुहस्पर्शप्रमोदाः २२ ताभिर्ययौश्रममपोहितुमंगसंगध्वस्तस्रजःसुकुचकुंकुमरंजितायाः ॥ गंधर्वपालिभिरनुद्रुतआविशद्वाःश्रांतोगजीभिरिभराडिवभिन्नसेतुः २३ सोंतर्जलेयुवतिभिःपरिषिच्यमानःप्रेमेक्षितप्रहसिताभिरभिष्टुतांगः ॥ वैमानिकैःकुसुमवर्षिभिरीड्यमानोरेमेस्वयंस्वरतिरत्रगजेंद्रलीलः २४ ततश्चकृष्णोपवनेजलस्थलप्रसूनगंधानिलजुष्टदिक्तटे ॥ चचारभृंगप्रमदागणावृतोयथामदच्युद्विरदःकरेणुभिः २५ एवंशशांकांशुविराजितानिशाःससत्यकामोनुरताबलागणः ॥ सिषेवआत्मन्यवरुद्धसौभगःसर्वाःशरत्काव्यकथारसाश्रयाः २६ राजोवाच ॥ संस्थापनायधर्मस्यप्रशमायेतरस्यच ॥ अवतीर्णोहिभगवानंशेनजगदीश्वरः २७ सकथंधर्मसेतूनांवक्ताकर्ताभिरक्षिता ॥ प्रतीपमाचरद्ब्रह्मन्परदाराभिमर्शनम् २८

णायवेतिगमयितव्यम् २४ कृष्णायाःयमुनायाउपवनेजलप्रसूनानिकुमुदादीनिस्थलपुष्पाणिसौगंधिककुंदादीनितेषांगंधमिश्रवायुनाजुष्टाः परिमालिताःदिक्तटाःदिगंताःयस्यसतथातस्मिन् मदच्युन्मदजलस्रवी अन्यत्रदुष्टगर्वनाशनःरदलेखनइतिधातोः पुण्यपापयोरदोलेखनंयेनसद्विरदः चित्रगुप्तेनपुण्यपापलेखनकर्त्रेत्यर्थः करेहस्तविषयेअणुभिःलतावत्दंडायतबाहुभिरित्यर्थःभृंगवद्वापमानप्रमदागणपरिवृतःयद्वाभृंगस्त्रियःतासांगणेनसंवृतः २५ उपसंहरति एवमिति अनुरताबलागणः अनुरतस्त्रीगणः तादृच्छानुकूलरमितस्त्रीजनोवा नितरांशंसुखंयासुताःनिशाःरात्रीः एकोपिक्षणोरतिक्रियांविनानहापितइति शरत्काललक्षणवर्णनेनयेकाव्यकथायांसंयाताःरसाःशृंगारहास्यादिरूपाः एतेषामाश्रयः आश्रयाइतिपाठेनिशाविशेषणं रसानाश्रयंतीतिरसाश्रयाः आत्मन्यवरुद्धांनरुद्धं सौभगंसौरतंनिर्दुष्टरेतोलक्षणंवीर्यंयेनसतथा सुरतक्रियावीर्यंनिरुध्यक्रियतइत्यर्थः यद्वावशीकृतयोगैश्वर्यः यद्वा आत्मनिदेहविकाशीकृतसौंदर्यः २६ ज्ञातशास्त्रतात्पर्यार्थोपिपरीक्षित्स्वनाम्नोर्थसफलंकुर्वन् तथाश्रोतृजनविद्वज्जनाचित्तसंदेहप्रहाणायपृच्छति संस्थापनायेति इतरस्याधर्मस्य हिशब्देन यदायदाहिधर्मस्यग्लानिर्भवतिभारतेत्यादिवाक्यंप्रमाणयति २७ प्रतीपंप्रतिकूलंकिमकारीत्यत्राह अभिमर्शनं अविचार्यग्रहणम् २८

विषयभोगलोभ्यात्कृतांकिंनेत्याह आत्मारामइति कोभिप्रायोऽस्यमच्चरितंचरेत् मदुक्तमेवचरेन्मचरितंचरेदितिचेति नःपरिसरवर्तिजनस्य २९ नारायणानुग्रहसुधापात्राणांस्मृतिविहितधर्मव्यति
क्रमोनदोषायदृष्टःकिमुतदूरीकृतविधिनिषेधबंधस्यहरेरित्याशयेनप्रश्नंपरिहरति धर्मेति चशब्दःकैमुत्यद्योतकः यद्यथोवा यद्यपीश्वराणांयोगैश्वर्यपारंगतानांसाहसःहेतुशून्योधर्मव्यतिक्रमःशास्त्र
विहिताचारविरुद्धाचारोऽजीगर्तस्यपुत्रविक्रयः विश्वामित्रस्यश्वभक्षणप्रवृत्तिः सप्तर्षीणांशवभक्षणोद्योगइत्यादिलक्षणोदृष्टःशास्त्रेतथापिसतेषांनदोषायधर्मप्रतिबंधकायनभवति तत्कृतइतिहेतुगर्भ
विशेषणमाह तेजीयसामिति तेजोबलेप्रभावेचज्योतिष्पर्चिषिरेतसि नवनीतेदुर्गइतियादवः तत्रदृष्टांतमाह वह्नेरिति अमेध्यादिदहनलक्षणोपेतस्याग्नेः ३० नन्वेवंचेत्श्रेष्ठाचरितत्वेनाश्रेष्ठस्यपरा
वराचरणप्रसंगः यद्यदाचरतिश्रेष्ठइत्यादिस्मृतेश्चेतितत्राहनेतिस्मृतिः सत्कर्मणः आचारमनुजानातिनत्वसत्कर्मणः लोकसंग्रहमेवापिसंपश्यन्कर्तुमर्हसीतिविधानाच्चेतीममर्थंहिशब्देनविशिनष्टि हिस्याद्धि
शेषणेहेताविति यादवः मनसापिनाचरेत्किमुतकायेन विपक्षेबाधकमाह नश्यतीति णशअदर्शनइतिधातोः समूलमुच्छिन्नोभवतीत्यर्थः अदर्शनंलोपइति सूत्रात् लुपछेदनइतिधातोः मौढ्यात्क्रोधोद्रेकात्
मौर्ख्याद्वा मोहकान्मौर्ख्यमूढतइति मोहोमोहनिंद्रितइति कालांतरेसंजातेननिवर्तनेननाशोनस्यादित्यतः आश्विति किंचित्कालमवसरंनददातीत्यर्थः व्यतिरेकंदर्शयति यथेति यथारुद्रोविषम
पिबत् तथाहमपिविषंपास्यामीतितत्पानेननश्यति तस्मात्तन्नकर्तव्यमित्यर्थः विषपानेनाशुनाशःस्यादितिदर्शनायतदुक्तं नतुसमूलतरुच्छेदविषये विषपानान्मृतिंदृष्ट्वा अन्यस्यनिवृत्तिसंभवात् नतथा

आत्मारामोयदुपतिःकृतवान्वैजुगुप्सितम् ॥ किमभिप्रायएतन्नःसंशयंछिंधिसुव्रत २९ ॥ श्रीशुकउवाच ॥ धर्मव्यतिक्रमोदृष्टईश्वराणांचसाहसः ॥ ते
जीयसांनदोषायवह्नेःसर्वभुजोयथा ३० नैतत्समाचरेज्जातुमनसापिह्यनीश्वरः ॥ नश्यत्याश्वाचरन्मौढ्याद्यथारुद्रोऽपिबद्विषम् ३१ ईश्वराणांवचःसत्यंतथै
वाचरितंक्वचित् ॥ तेषांयत्स्ववचोयुक्तंबुद्धिमान्नैतदाचरेत् ३२ कुशलाचरितेनैषामिहचार्थोनविद्यते॥विपर्ययेणचानर्थोनिरहंकारिणांप्रभो ३३ किमुताखि
लसत्वानांतिर्यङ्मर्त्यादिवौकसाम् ॥ ईशितुश्चेशितव्यानांकुशलाकुशलान्वयः ३४यत्पादपंकजपरागनिषेवतृप्तायोगप्रभावविधुताखिलकर्मबंधाः ॥ स्वै
रंचरंतिमुनयोपिननह्यमानास्तस्येच्छयात्तवपुषःकुतएवबंधः ३५ गोपीनांतत्पतीनांचसर्वेषामपिदेहिनाम् ॥ योंतश्चरतिसोध्यक्षएषक्रीडनदेहभाक् ३६

मकृतइति ३१ यद्येवंतर्ह्यस्मत्त्वेनेश्वरोक्तमपिग्राह्यमित्यायातमितितत्राह ईश्वराणामिति सत्यंपरमार्थत्वेनाभिष्टज्ञापकं परमार्थेर्थवत्सत्यमितियादवःतद्वचनमेवसत्यंचेत्कुर्याद्विद्वांस्तथासक्तश्चिकी
र्षुर्लोकसंग्रहमितिविधानंव्यर्थमितितत्राह तथैवेति क्वचिदित्युपहासादिव्यावृत्तये अनुवर्तिनांवैदिककर्ममार्गप्रदर्शनार्थंयदाचरणंतदपिसत्यंफलदर्शनात्तर्हिवचनंसत्यंकिनेत्याह तेषामिति अ
युक्तंवेदोऽप्रमाणलक्षणमित्यादिलक्षणंप्रतीतिकार्यंविषयं यद्वास्ववचसोऽयुक्तंविरोधि तेषांयदाचरितंबुद्धिमानेतन्नाचरेदितिश्रुतिश्च ३२ इतोपिशुष्कजलनारिकेलफलवन्निर्मुक्तशरीराभिमानानां
दूरीकृतकुशलाकुशलानांफलवत्त्वाद्धर्मव्यतिक्रमोनदोषायेत्याशयेनाह कुशलेति इहसंसारमंडलेअर्थः प्रयोजनंप्रारब्धकर्मनाशेनापातकदेहत्वादभीष्टत्वाच्च विपर्ययेणविपर्ययाचरणेनानर्थोनरकपा
तादिलक्षणःअत्रहेतुमाह निरहंकारिणामिति ३३ उपसंहरति किमुतेति अखिलसत्त्वानांसमस्तप्राणिनामित्यस्यविवरणं तिर्यङ्मर्त्येत्यादिना ईशितव्यानांनियम्यानांईशितुर्नियामकस्य चसमु
च्चये ईशितव्यानामचेतनानांच कुशलाकुशलान्वयः पुण्यपापफललेपःकिमुत ३४ कथांतरात्कैमुत्यन्यायंदर्शयति यत्पादेति भक्तियोगप्रभावेनविधुतोविध्वस्तोखिलबंधोयेषांतेतथा ननह्यमाना
अतएवपुत्रस्नेहेनबध्यमानानभवंति कर्मभिर्वा ३५ क्रीडनंक्रीडासाधनंदेहंभजतीतिक्रीडनदेहभाक् अध्यक्षःसाक्षी अयंचबंधाभावेहेतुः ३६

स्वेच्छाविग्रहस्वीकरोनिस्पृहस्यकिंप्रयोजनमित्यतआह अनुग्रहायेतिताद्दशींमानुषदेहक्रीडांचरितंश्रुत्वा तत्परःभगवानेवपरोयस्यसतथा तस्मिन्तात्पर्ययुक्तोवा यद्वा सपुरुषइवजन्ममृत्युशून्योभवेत् ३७ स्वैरिणीवृत्तिमाश्रितानांगोपीनांग्रहणंतद्भर्तृभिःकथंचकृतं कथंचकृष्णेदोषाविष्करणमकृतमत्राह नेति गुणेदोषाविष्करणमसूया क्रुधदुहेर्ष्यासूयार्थानांयंप्रतिकोपइतिचतुर्थी ३८ ब्रह्मरात्रे ब्राह्ममुहूर्त्ते ३९ संसरानिवृत्तिहेतुत्वादस्मिन्कृष्णविक्रीडितेश्रद्धादिकंकार्यमितिविधायकफलमाह विक्रीडितमिति चशब्दःश्रद्धातिशयजननार्थः पूर्वोक्तविक्रीडितानियथासंसारनिवर्तकानितथेदं चेति आशुभक्तिंप्रतिलभ्यानुदिनंकृत्वाहृद्रोगंकाममनिष्टंअपहिनातिप्रतित्यजति दुष्टकामत्यागएवसंसारनिवृत्तिरित्यर्थः ४० ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेविजयध्वजकृतटीकयांएकत्रिंशोध्यायः ॥ ३१ ॥ मुकुंदभक्त्यासंसाराहिग्रासमोक्षस्यज्ञानरत्नदानस्यनिदर्शनायनंदस्यसर्पान्मोक्षंशंखचूडंहत्वाबलभद्रायताच्छिरोरत्नदानंचानिरूपयत्यस्मिन्नध्याये तत्रप्रथमतोगोपानांयात्राप्रकारंकथ

अनुग्रहायभक्तानांमानुषंदेहमाश्रितः ॥ भजतेतादृशींक्रीडांयांश्रुत्वातत्परोभवेत् ३७ नासूयन्नृपकृष्णायमोहितास्तस्यमायया ॥ मन्यमानाःस्वपार्श्वस्थान्स्वान्स्वान्दारान्व्रजौकसः ३८ ब्रह्मरात्रउपावृत्तेवासुदेवानुमोदिताः ॥ अनिच्छंत्योययुर्गोप्यःस्वगृहान्भगवत्प्रियाः ३९ विक्रीडितंव्रजवधूभिरिदंचविष्णोःश्रद्धान्वितोनुशृणुयादथवर्णयेद्यः ॥ भक्तिंपरांभगवतिप्रतिलभ्यकामंहृद्रोगमाश्वपहिनोत्यचिरेणधीरः ४० ॥ इतिश्रीभागवतेमहापुराणे दशमस्कंधेएकत्रिंशोऽध्यायः ॥३१ ॥ श्रीशुकउवाच ॥ एकदादेवयात्रायांगोपालाजातकौतुकाः ॥ अनोभिरनडुद्युक्तैःप्रययुस्तेंऽबिकावनम् १ तत्रस्नात्वा सरस्वत्यांदेवंपशुपतिंप्रभुम्॥ आनर्चुरर्हणैर्भक्त्यादेवींचनृपतेंऽबिकाम् २ गावोहिरण्यवासांसिमधुमध्वन्नमादृताः ॥ ब्राह्मणेभ्योददुःसर्वेदेवोनःप्रीयतामिति ३ ऊषुःसस्वस्तीतीरेजलंप्राश्ययतव्रताः ॥ रजनींतांमहाभागनंदसंनंदकादयः ४ कश्चिन्महानहिस्तस्मिन्विपिनेतिबुभुक्षितः ॥ यदृच्छयागतोनंदंशयानमुरगोग्रसीत् ५ सचुक्रोशाहिनाग्रस्तःकृष्णकृष्णमहानयम् ॥ सर्पोमांग्रसतेतातप्रपन्नंपरिमोचय ६ तस्यचाक्रंदितंश्रुत्वागोपालाःसहसोत्थिताः ॥ ग्रस्तंचदृष्ट्वासंभ्रांताःसर्पंविव्यधुरुल्मुकैः ७ अलातैर्हन्यमानोपिनामुंचत्तमुरंगमः ॥ तमस्पृशत्पदाभ्येत्यभगवान्सात्वतांपतिः ८ सवैभगवतःश्रीमत्पादस्पर्शहताशुभः ॥ भेजेसर्पवपुर्हित्वारूपंविद्याधरार्चितम् ९ तमपृच्छद्ऋषीकेशःप्रणतंसमुपस्थितम् ॥ दीप्यमानेनवपुषापुरुषंहेममालिनम् १० कोभवान्परयालक्ष्म्यारोचतेऽद्भुतदर्शनः ॥ कथंजुगुप्सितामेतांगतिंवाप्रापितोऽवशः ११ सर्पउवाच ॥ अहंविद्याधरःकश्चित्सुदर्शनइतिश्रुतः ॥ श्रियास्वरूपसंपत्त्याविमानेनाचरंदिशः १२ ऋषीन्विरूपानंगिरसःप्राहसंरूपदर्पितः ॥ तैरिमांप्रापितोयोनिंप्रलब्धःस्वेनपाप्मना १३

यति एकदेति अंबिकामाहात्म्यविषयांकिंवदंतीमाकर्ण्यजातकौतुकाउत्पन्नकुतूहलबुद्धयःअंबिकावनंदुर्गावासस्थानंवनं अनडुद्युक्तैःवृषभयुक्तैःअनोभिःशकटैः १ पशवोजीवास्तेषांपतिंप्रभुंसमर्थं समर्थेधिपतौप्रभुरितिच तत्रवनेसरस्वत्यांस्यंदमानायां अर्हणैःपुष्पोपहारादिसाधनैः २ मध्वन्नं यद्वा मधुरान्नं मधुक्षौद्रम् ३ ४ यदृच्छयातस्मिन्वनेआगतोभूत् आगमनेनिमित्तमाह अतिबुभुक्षितइति शयानंनिद्रांकुर्वंतम् ५ प्रकर्षेणापन्नंविपदंगतं शरणागतंवा ६ ७ ८ ९ १० ११ १२ पाप्मनाअपराधेनप्रलब्धउपलब्धोविप्रलब्धोवा विरूपान्सौंदर्यराहितान् सौंदर्येचस्वभावेचरूपशब्दंप्रचक्षतइति अंगिरसःपुत्राअंगिरसः १३

१४ आपृच्छेआज्ञांप्रार्थये अमीवहन् दोषनाशन १५ १६ १७ चात्तंस्तुत्वा दाशार्हंकृष्णम् १८ निशाम्यदृष्ट्वा १९ २० विरजांबरौधौतवस्त्रौ २१ मल्लिकागंधास्वादनेनमत्ताआलिनो भ्रमराःयस्मिन् मल्लिकागंधमत्तालि २२ जगतुःगानंकृतवंतौ कथंकारमितितत्राह तावितिं स्वरमंडलमूर्च्छनां सप्तानांस्वराणांमंडलानांसमूहानांमूर्च्छनामेकविंशतिलक्षणांकल्पयंतौ युगपदेकस्मिन्क्षणे यद्वामंडलमावृत्तिलक्षणंसप्तस्वरात्रयोग्रामाएकविंशतिमूर्च्छनाइतिभरतः २३ २४ २५ तौनाथौयस्यसतन्नाथःतं कालनंद्रावगम् २६ स्वपरिग्रहंस्वस्त्रीजनं दस्युनाव्याघ्रेणग्रस्ताः

शापोमेनुग्रहार्थैवकृतस्तैःकरुणात्मभिः ॥ यदहंलोकगुरुणापादस्पृष्टोहताशुभः १४ तंत्वाहंभवभीतानांप्रपन्नानांभयापहम् ॥ आपृच्छेशापनिर्मुक्तः पादस्पर्शादमीवहन् १५ प्रपन्नोस्मिमहायोगिन्महापुरुषसत्पते ॥ अनुजानीहिमांकृष्णसर्वलोकेश्वरेश्वर १६ ब्रह्मदंडाद्विमुक्तोहंसद्यस्तेऽद्भुतदर्शनात् यन्नामगृह्णन्नखिलाञ्छ्रोतॄनात्मानमेवच १७ सद्यःपुनातिकिंभूयस्तस्यस्पृष्टःपदाहिते ॥ श्रीशुकउवाच ॥ इत्यनुज्ञाप्यदाशार्हंपरिक्रम्याभिवाद्यच ॥ सुदर्शनादिवंयातःकृच्छ्रान्नंदश्चमोचितः १८ निशाम्यकृष्णस्यतदात्मवैभवंव्रजौकसोविस्मितचेतसस्ततः ॥ समाप्यतस्मिन्नियमंपुनर्व्रजंनृपाययुस्तत्कथयंतआदृताः १९ कदाचिदथगोविंदोरामश्चाद्भुतविक्रमः ॥ विजह्रतुर्वनेराज्यांमध्यगौव्रजयोषिताम् २० उपगीयमानौललितंस्त्रीजनैर्बद्धसौहृदैः ॥ स्वलंकृतानुलिप्तांगौस्रग्विणौविरजांबरौ २१ निशामुखंमानयंतावुदितोडुपतारकम् ॥ मल्लिकागंधमत्तालिजुष्टंकुमुदवायुना २२ जगतुःसर्वभूतानांमनः श्रवणमंगलम् ॥ तौकल्पयंतौयुगपत्स्वरमंडलमूर्च्छनाम् २३ गोप्यस्तद्गीतमाकर्ण्यमूर्च्छितानाविदन्नृप ॥ श्लथद्दुकूलमात्मानंस्रस्तकेशस्रजंततः २४ एवंविक्रीडतोःस्वैरंगायतोःसंप्रमत्तवत् ॥ शंखचूडइतिख्यातोधनदानुचरोभ्यगात् २५ तयोर्निरीक्षतोरेवतन्नाथंप्रमदाजनम् ॥ क्रोशंतंकालयामासदिश्युदीच्यामशंकितः २६ क्रोशंतंकृष्णरामेतिविलोक्यस्वपरिग्रहम् ॥ यथागादस्युनाग्रस्ताभ्रातरावन्वधावताम् २७ माभैष्टेत्यभयारावौतालहस्तौमनस्विनौ ॥ आसेदतुस्तंत्वरितंगुह्यकाधमम् २८ सवीक्ष्यतावनुप्राप्तौकालमृत्यूइवोद्विजन् ॥ विसृज्यस्त्रीजनंमूढःप्राद्रवज्जीवनेच्छया २९ तमन्वधावद्गोविंदोयत्रयत्रसधावति ॥ जिहीर्षुस्तच्छिरोरत्नंतस्थौरक्षन्महाबलः ३० अविदूरइवाभ्येत्यशिरस्तस्यदुरात्मनः ॥ जहारमुष्टिनैवांग सहचूडामणिंविभुः ३१ शंखचूडंनिहत्यैवंमणिमादायभासुरम् ॥ अग्रजायाददत्प्रीत्यापश्यंतीनांचयोषिताम् ३२ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेविद्याधरशापविमोचनशंखचूडहननंनामद्वात्रिंशोऽध्यायः ॥ ३२ ॥

क्रोशंतीःगायथा तथाक्रोशंतंविलोक्य दस्युतस्करशार्दूलौहंतारौगांतृहिंसकावितिच २७ माभैष्टभीतामाभवंत्वित्यभयवाक्ययुक्तौ तालोगीतांगवाद्यविशेषः यद्वा तालस्तृणराजः सहस्तेययोस्तौतथा मनस्विनौविशिष्टमनोयुक्तौ तरसाबलेनतरस्वीबलरंहसीइति २८ मरणकालः कश्चिदसुरोवा मृत्युर्यमः उद्विजन्बिभ्यत् २९ ३० ३१ ॥ ३२ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेविजयध्वजकृतटीकायांद्वात्रिंशोऽध्यायः ॥ ३२ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

स्त्रीणांउपासनाप्रकारईदृशइतिदर्शयितुंगोपीनांभगवल्लीलानुस्मरणंकथयत्यस्मिन्नध्याये तत्रप्रथमतस्तासांकृष्णेभक्तिलक्षणंवक्ति गोप्यइति प्रकृष्टगानेनाहृतचेतस्त्वंभक्तेर्लक्षणंसूचयति १ द्वौद्वौ ग्रंथौ एकस्यागीतंतद्वाभ्यांद्वाभ्यांश्लोकाभ्यामन्वयः एकागोपीगोप्यंतराणिसंबोधयति हेगोप्यःशृणुतेतिशेषः वामबाहुमूलेकृतंवामकपोलंयेनसतथा वल्गितानर्तिताभ्रूर्यस्यसतथा अधरोष्टेअर्पितोवेणुर्येनसतथा मुकुंदोयत्रयदाकोमलांगुलिभिःआश्रितमार्गेआच्छादितरंध्रेवेणुमीरयतिगायतीत्यर्थः २ तदासिद्धैःसह व्योमयानवनिताः विमानस्थाः स्त्रियः तद्गीतमुपधार्यश्रुत्वा विस्मिताः अनंतरंस्वयमशक्ताःसलज्जाःकामबाणेनसमर्पितंविद्धंचित्तंयासांतास्तथा अपस्मृतानीवीवस्त्रग्रंथिर्यासांताः मुच्यमानवस्त्रग्रंथिस्मरणरहिताः कश्मलंमूर्छांययुरित्यर्थः ३ हारेणभासतइतिहारभासः हारवद्विशदोहासोयस्यसतथेतिपाठार्थो उरसिस्थितविद्युत् विद्युदिवविष्णुंद्योतयतिश्रीवत्साकनामेति यर्हियदाकूजितवेणुर्भवति ४ तदाएत्यसमेत्यव्रजवृषादयःलिखितचित्रमिवनिश्चेष्टाआसन्नित्यन्वयः धृतकर्णाःनिश्चलकर्णाःकवलस्तृणग्रासःनिद्रिताःकार्यांतररहिताः ५ हेआलिसखि कर्हिचित्कदाचित् यत्रयदायस्मिन्देशेस्थित्वागाःसमाह्वयति ६ तर्हितदातस्मिन्देशेस्थिताः सरितस्तीरेपयसिवाऽनिलनीतंतत्पदांबुजरजः आमृशन् अस्पृशन्वैइत्यन्वयः कथंभूतः बर्हिणस्यमयूरस्यस्तबकैःपिच्छबंधविशेषैःधातुभिर्गैरिसंभवैः मनःशिलादिभिःपलाशैःपल्लवैः बद्धस्यमल्लपरिबर्ह

श्रीशुकउवाच ॥ गोप्यःकृष्णेवनंयातेतमनुद्रुतचेतसः ॥ कृष्णलीलांप्रगायंत्योनिन्युर्दुःखेनवासरान् १ ॥ गोप्यऊचुः ॥ वामबाहुकृतवामकपोलोवल्गितभ्रुरधरार्पितवेणुः ॥ कोमलांगुलिभिराश्रितमार्गंगोप्यईरयतियत्रमुकुंदः २ व्योमयानवनिताःसहसिद्धैर्विस्मितास्तदुपधार्यसलज्जाः ॥ काममार्गणसमर्पितचित्ताःकश्मलंययुरपस्मृतनीव्यः ३ हंताचित्रमबलाःशृणुतेदंहारभासउरसिस्थितविद्युत् ॥ नंदसूनुरयमार्तजनानांशर्मदोयर्हिकूजितवेणुः ४ वृंदशोव्रजवृषामृगगावोवेणुवाद्यहृतचेतसएत्य ॥ दंतदष्टकवलाधृतकर्णानिद्रितालिखितचित्रमिवासन् ५ बर्हिणस्तबकधातुपलाशैर्बद्धमल्लपरिबर्हविडंबः ॥ कर्हिचित्सबलआलिसगोपैर्गाःसमाह्वयतियत्रमुकुंदः ६ तर्हिभग्नगतयःसरितोवैतत्पदांबुजरजोनिलनीतम् ॥ आमृशन्पयसिवाबहुपुण्याःप्रेमवेपितभुजाहृतवेगाः ७ अनुचरैःसमनुवर्णितवीर्यआदिपूरुषइवाचलभूतिः ॥ वनचरोगिरितटेषुचरंतीर्वेणुनाह्वयतिगाःसयदाहि ८ वनलतास्तरवआत्मनिविष्णुंव्यंजयंतइवपुष्पफलाढ्याः ॥ प्रणतभारविटपामधुधाराःप्रेमहृष्टतनवःससृजुःस्म ९

स्यमल्लपुरुषशिरःपरिकरस्यविडंबोनुकारोयस्यसतथा मयूरोबर्हिणोबर्हीनीलकंठोभुजंगभुगित्यमरः किंच बहूनिअनेकानिपुण्यानियासांतास्तथा विपुलानेकयोर्बहुरितियादवः प्रेम्णाकामोन्नतस्नेहनवेपिताःकंपिता भुजास्तरंगलक्षणायासांतास्तथा अतएवहृतवेगाः मंदीकृतस्यंदनलक्षणजवाः अतएवभग्नगतयःस्तिमितप्रवाहाःआसन्नित्यनुषंगः अनेनसरंतीतिसरितइतिसरिच्छब्दार्थोलुप्तइतिदर्शितम् ७ अनुचरैःसनकादिभिःअन्यत्रगोपैः अचलभूतिःस्थिरश्रीः भूतिःश्रीजन्मभस्मस्थितियादवः वनचरःकक्षेसंचरन् अन्यत्रवनेचरणंशयनंजलशयनइत्यर्थः यदावेणुनाध्मातवेणुध्वनिनागिरितटेषुचरंतीः तृणभक्षणंकुर्वंतीः अन्यत्रवायोस्तटवद्भिस्तृतेमुखेवर्तमानागाःपशून् अन्यत्रवेदवाणीराह्वयतिसनकादिभिःस्तूयमानोजलशयानः आदिपुरुषोवायुमुखेवर्तमानश्रुतीस्तदर्थकथनपूर्वकमुपदिशति ८ तदात्मनिस्थितंविष्णुंव्यंजयंतइवपुष्पफलाढ्याः अतएवप्रणतंप्रणमनंबिभ्रतीतिप्रणतभाराः अणुप्रत्ययः विटपाःशाखायेषांतरूणांयासांलतानांवातेतास्तथा यद्वा पुष्पफलभारेणप्रणताविटपायेषांतेतथा प्रेम्णाहृष्टरोमांचितास्तनवोयेषांयासांवातेतास्तथाएवंविधावनलतास्तरवश्च मधुधारारसधाराःससृजुःस्म स्मृत्वासृष्टवंतइत्यर्थः अन्यत्रआत्मनिहृदयेस्थितंविष्णुंव्यंजयंतः अपरोक्षीकुर्वंतइवज्ञानपुष्पेणजीवन्मुक्त्यवस्थाफलेनाढ्याः प्रणतस्यभारोभरणंयेषांतेप्रणतभाराःतेविटपाभुजायेषांतेतथामूर्ध्न्यरोपितांजलिपुटाइत्यर्थः अतएवभक्त्युद्रेकेणरोमांचितगात्राः

वनेअरण्येरतानिवृत्तिधर्ममनुतिष्ठंतोवनेभासि ग्रीष्मेपंचाग्निज्वालासेवायां वर्षतौकाननेवनेजले हिमतौकंठलग्नसलिलेवसंतः वनंभास्यप्युकाननशतियादवः तरवःसंसारतरणशीलाःतीर्णसंसारा
वा मुमुक्षवोमुच्यमानामुक्ताश्चयथायोग्यमधिकारिणोमधुधाराः स्नानेनेशस्याद्यानंदांबुसंततीः समृजुस्तत्स्वभावावभूवुरित्यर्थः धाराःस्वर्गेबुसंततत्यांसैन्याग्रेस्वर्गतिष्वपीति सर्गःस्वभावनिर्मोकनिश्च
याध्यायसृष्टिष्वितिच अत्रवनचरशब्दसामर्थ्यान्मत्स्याद्यवतारविषयत्वेनापिज्ञातव्यावेतौश्लोकौ शब्दशक्तिविशारदैरितिग्रंथबाहुल्यभयादुपरम्यतइति ९ यर्हियदासंधितवेणुः स्वरेणेतिशेषः
कृष्णःदर्शनीयायाःचक्षुःप्रियायाःविकचैःउत्पलैःनीलोत्पलैःकृतायामालायादिव्यगंधायाःअमानुषपरिमलायाःतुलस्याश्चमधुनापीतेनमत्तैरलिकुलैः अभीष्टंगातुमुपक्रांतं अलघुगंभीरंगीतंआद्रियत्
आर्चत् आदृतौसादरार्चितावितिच १० तदासरसिविहरंतोयेसारसहंसविहंगाःतेपक्षिणःएत्यसंभूय चारुणागीतेनहृतचेतसःआकृष्टबुद्धयःअतएवयतचित्ताःएकाग्रकृतमानसाः अर्धनिमीलितनेत्राः
धृतमौनाःस्वजातिचापल्यरहिताहरिमुपासतेत्यन्वयः ११ हेव्रजदेव्यःबलेनसहितःस्वजामालयाऽवतंसेनकर्णोत्पलेनचविलासःकांतिविशेषोयस्यसतथा यद्वा सगवतंसयोर्विलासोयस्यसतथा
आत्मशोभाजनकत्वेनधृतयोःस्वगवतंसयोःशोभाजनकइत्यर्थः क्षितिभृतोगिरेः सानुपुशिखरेपुस्थितः लोकदृष्ट्यातदानींजातहर्षः आविष्कृतानंदविशेषः कृष्णोयर्हियदावेणुरवेणआह्वयत् गाइति
शेषः विश्वंदेहमाविश्यवर्तमानंप्राणिजातंउपरंभति ऊर्ध्वमुखीकरोति आह्वयतिवा नूतनंकर्तुमुपक्रमतेवा उपरंभस्तूर्ध्वमुखेप्रक्रमेनिर्वृतेतथेतिच १२ तदामेघःमहतोहरेरुच्चैर्गर्जनेनकर्णबाधिर्यजन

दर्शनीयविकचोत्पलमालादिव्यगंधतुलसीमधुमत्तैः ॥ अलिकुलैरलघुगीतमभीष्टमाद्रियद्यर्हिसंधितवेणुः १० सगसिसारसहंसविहंगाश्चारुगीतहृतचेतस
एत्य ॥ हरिमुपाससतेयतचित्ताहंतमीलितदृशोधृतमौनाः ११ सहबलःस्वगवतंसविलासःसानुषुक्षितिभृतोव्रजदेव्यः ॥ आह्वयद्यर्हिवेणुरवेणजातहर्ष
उपरंभतिविश्वम् १२ महदतिक्रमणशंकितचेतामंदमंदमनुगर्जतिमेघः ॥ सुहृदमभ्यवर्षत्सुमनोभिश्छाययाचविदधेवितपत्रम् १३ विविधगोपचरणे
षुविदग्धोवेणुवाद्यमधुरांनिजशिक्षाम् ॥ तवसुतःसतियदाऽधरबिंबेदत्तवेणुरनयत्स्वरजातीः १४ सुमनसस्तदुपधार्यसुरेशाःशक्रशर्वपरमेष्ठिपुरोगाः ॥
कवयआनतकंधरगात्राःकश्मलंययुरनिश्चिततत्त्वाः १५ निजपदाब्जदलैर्ध्वजवज्रनीरजांकुशविचित्रललामैः ॥ व्रजभुवःप्रशमयन्खुरतोदंवर्ष्मधुर्यगतिरी
रितवेणुः १६

कातिक्रमणमतिलंघनंस्यादितिशंकितमनाः मंदंमंदंअनुवेणुरवानुकूलंयथाभवतितथागर्जति किंच सुमनोभिःपुष्पसदृशसलिलबिंदुभिःश्यामवर्णसाम्यात्सुहृदांमित्रंअभ्यवर्षत् किंच छाययाविहितपत्रं
वितपात्आतपात्त्रायतइतिवितपत्रं विदधेचहरेरितिशेषः सितपत्रमितिपाठेश्वेतच्छत्रमित्यर्थः वेणुरवेणव्रजदेवीराह्वयदितिवा १३ हेसतियशोदेविविधानांगवांगीतशब्दानांपतयःगंधर्वाःतेषांचरणेषु
गीतगतिषुविदग्धःसमर्थः यद्वा विविधानांस्वस्वजातिस्वभावचेष्टासुनानाविधानांगोपानांचरणेषुकर्मसुविदग्धकुशलः यद्वा विविधोगोपोरक्षणंतस्यचरणेषुतत्तदापद्रक्षणविधिषुप्रविष्टइत्यर्थः अधरबिंबे
दत्तवेणुः अधरोष्ठबिंबफलेन्यस्तवेणुः तवसुतःयदावेणुवाद्यमधुरांवेणुलक्षणवाद्येकर्णसुखहेतुंनिजशिक्षामात्मीयगानशिक्षां प्रतिस्वरजातीःषड्जादिस्वरसामान्यान्यनयत्प्रार्थयामास १४ तदा
सुमनसोदेवांगनाःसुरेश्वराश्चगीतविषयेकश्मलंमोहंययुरित्यन्वयः कीदृशाःआनतकंधरगात्राः ईषन्नतकंठदेहावयवाःकवयःगानपारज्ञानिश्चिताअप्यनिश्चिततत्त्वाःअभूतपूर्वगीतश्रवणात् गीततत्त्वनिश्च
यरहिताः किंकृत्वा तद्गानमुपधार्यतात्पर्येणश्रुतिंनिधाय १५ ध्वजादयएवविचित्राणि नानाकाराणिललामानिलांछनानियेषांतानितथा यद्वा ललामानितिलकायेषांतानितथा यद्वा ललामानिभूषणानि
येषांतानितथातैः ललामोस्त्रीध्वजेश्रेष्ठभूषायांपुंड्रविह्नयोरितिव निजपदाब्जयोर्दलैःअंगुलीलक्षणैः यद्वा निजानित्यानिअन्येनानर्जितानिपदान्येवपादांकाएवाब्जानियानितेषांदलैर्विभागैःव्रजभुवःगवां

खुरतोदंखुरनिस्रातव्यथां प्रकर्षेणशमयन्परिहरन्वर्ष्मणामहताशरीरेणयुक्तोधुर्योवृषभस्तस्यगतिरिवगतिर्यस्यसवर्ष्मधुर्यगतिः यद्वा वर्ष्मधुर्योगजराजःतदाईरितवेणुःशब्दितवेणुर्यः १६ तेनव्रजमितेनमात्मनेनकृष्णेनसविलासवीक्षणेनविभ्रमोपेतवीक्षणेन अर्पितोमनोभवस्यकामस्यवेगउद्रेकलक्षणःसंस्कारोयासुतास्तथा रात्रिविशेषेवनाद्व्रजगतिंगोष्ठाख्यमंदिरंगमिताःप्रापिताः वयंकश्मलेनमनोभवस्थानलक्षणेनमोहेनस्रस्तंकबरंकेशभारं वसनंवस्त्रंबास्थितिंवानविदामनजानीमइत्यन्वयः कुजगतिमितिपाठेस्थावरस्वभावमित्यर्थः ब्राह्ममुहूर्तादुत्थायकृष्णाज्ञयावनात्प्राप्तव्रजानांपश्चादागतस्य कृष्णस्यपुनर्दर्शनेनमुग्धानांगोपिकानांवचनमिदामितिभावः १७ माणिधरःकौस्तुभरत्नधारी दयितगंधाप्राणप्रियगंधातुलसीयस्यांसातथा तयामालयोपलक्षितः प्रणयिनःस्निग्धतमस्यानुवर्तमानस्यकस्यचिद्गोपस्यांसेभुजशिरसिभुजंप्रक्षिपन्निदधानोगाआगमयन्वनाद्व्रजमावर्तयन् कृष्णःक्वचित्कदाचित्कस्मिंश्चित्कालेयत्रयस्मिन्देशेअगायत १८ तदावंचितचित्ताःप्रलोभितांतःकरणाःकृष्णगृहिण्यःकृष्णमृगपरिग्रहभूताः हरिण्योगुणगणार्णं गुणगणसमुद्रंक्वणितवेणुंकृष्णमनुगम्यउपान्वीयुः उपासतेत्यन्वयः काइव विमुक्तगृहेशाः परित्यक्तनिजपतयः उभयत्रसमानं गोपिकागोपांगनाइव अन्यत्रगोपनशीलाइव १९ हेअनघेयशोदे कुंददाम्नाकुंदपुष्पमालयालंकृतः कौतुकवेषः विवाहकालेवरस्यहस्तेयत्सूत्रंबध्यतेतत्कौतुकंतदीयोवेषः सयस्यसकुंददाम

व्रजमितेनवयंसविलासवीक्षणार्पितमनोभववेगाः ॥ व्रजगतिंगमितानविदामःकश्मलेनवसनंकबरंवा १७ माणिधरःक्वचिदागमयन्गामालयादयितगंधतुलस्या ॥ प्रणयिनोनुचरस्यकदांऽसेप्रक्षिपन्भुजमगायतयत्र १८ क्वणितवेणुमुपवंचितचित्ताःकृष्णमीयुरनुकृष्णगृहिण्यः ॥ गुणगणार्णमनुगम्यहरिण्योगोपिकाइवविमुक्तगृहेशाः १९ कुंददामकृतकौतुकवेषोगोपगोधनवृतोयमुनायाम् ॥ नंदसूनुरनघेतववत्सोनर्मदःप्रणयिनांविजहार २० मंदवायुरुपवात्यनुकूलंमानयन्मलयजस्पर्शेन ॥ बंदिनस्तमुपदेवगणायेवाद्यगीतबलिभिःपरिवव्रुः २१ वत्सलोव्रजगवांयदगाधोवंद्यमानचरणःपथिवृद्धैः ॥ कृत्स्नगोधनमपोह्यदिनांतेगीतवेणुरनुगोद्गतकीर्तिः २२ उत्सवंश्रममपोह्यदृशीनामुद्वहन्खुररजश्छुरितस्रक् ॥ दित्सयैतिसुहृदाशिषएषदेवकीजठरभूरुडुराजः २३

कृतकौतुकवेषः कौतुकंविषयाभेदेहस्तसूत्रेकुतूहलइतियादवः गोपाधिभिःपरिवृतःप्रणयिनांनर्मदःलीलावचनेनआनंददःतदवत्सःबालःनंदसूनुर्यदायमुनायांविजहार २० तदामलयजस्पर्शेनचंदनगंधदानेनकृष्णंमानयन्वायुर्यथानुकूलोभवतितथामंदंमंदंउपवातिवीजयतीत्यन्वयः किंच तदायेउपदेवगणाःदेवसमीपेवर्त्तमानाःगंधर्वाःबंदिनोवंदमानाः यद्वा मंगलपाठकाश्चवाचेनगतिनबलिनाउपहारेणचतंकृष्णंपरिवव्रुः २१ किंचिदुत्पन्नोपयोगज्ञानावदातिवत्सलइति व्रजगवांविषयेवत्सलःगोष्ठगोषुस्निग्धतमः अगाधःगंभीरःअन्याविज्ञातमहिमा पथिज्ञानादिवृद्धैर्वंद्यमानचरणःस्तूयमानपादन्यासः दिनांतेसंध्यायामासन्नायां कृत्स्नंगोधनंसमस्तपशुलक्षणंधनमपोह्यव्यावर्त्य गीतवेणुः गातुमुपक्रांतवेणुःअनुगैर्वयस्यैःउद्गतामणिंपंकादुद्दृत्येवप्रकाशिताकिर्तिर्यस्यसतथा २२ वनपरिश्रमणोत्पन्नंश्रममपोह्यनिरस्यस्वद्रष्टृणांदृशीनांउत्सवंसुखोत्सवंउद्वहन् खुररजश्छुरितस्रक गोखुरसमुत्पन्नधूल्यामिश्रितामालायस्यसतथादेववयाजठरमेवभूर्व्यक्तिस्थानंयस्यसतथा उडुराजश्चंद्रइवलुप्तोपमेयं सयद्यदाव्रजमेतितदाएषकृष्णःसुहृदामनिमित्तबंधूनां आशिषःइष्टफलानिदित्सयादातुमिच्छन्यैवेतइत्यन्वयः चंद्रोपिव्रजगवांअध्वपशूनांपथिकानांवत्संवर्षसामर्थ्यात्कामोद्रेकंलातिरातीतिवत्सलःवत्सोनामकुजेवर्षेइतियादवः गोष्ठाध्वानिव्रजाइतिच अगस्य उदयपर्वतस्यअधःशृंगेवर्त्तमानः उदयस्याधित्यकाशृंगंचंद्रमार्गादूर्ध्वमितिज्योतिषिकाःसंगिरंते वृद्धैःसप्तर्षिभिःपांथेन्योमार्गेदिनांतेरात्रौकृत्स्नगोधनंसमस्तकलासमेधितचंद्रिकाख्यधनमपोह्यपरिपूर्यगीतवेणुःकविभिःवर्णितस्ववंशः अनुगैःअश्विन्यादिनक्षत्रैःउद्गतकीर्तीराश्युपरिकृतगणनःरविकिरणसंसर्गसमुत्पन्नभ्रमंनिर्धूय

उत्सवमित्युभयत्रसमंजननसमयेक्षीराब्धितीरवासुकानवबीपिपुविक्रमंकुर्वतउवैश्रवसःसुररजश्छुरितसकृद्व्रापः २३ श्रीकृष्णप्रशस्यबलभद्रप्रशंसयापसहरावः मदाविघूर्णितलोचनईषन्मानदःस्वसुहृदांवनमाली ॥ बदरपांडुवदनोमृदुगंडंमंडयन्कनककुंडललक्ष्म्या २४ यदुपतिर्द्विरदराजविहारोयामिनीपतिरिवैषदिनांते ॥ मुदितवक्त्रउपयातिदुरंतंमोचयन्व्रजगवांदिनतापम् २५ श्रीशुकउवाच ॥ एवंव्रजस्त्रियोराजन्कृष्णलीलानुगायतीः ॥ रेमिरेहस्सुतच्चित्तास्तन्मनस्कामहोदयाः ॥ २६ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेत्रयस्त्रिंशोध्यायः ॥ ३३ ॥ श्रीशुकउवाच ॥ अथतर्ह्यागतोगोष्ठमरिष्टोवृषभासुरः ॥ महींमहाककुत्कायःकंपयन्खुरविक्षताम् १ रवमाणःखरतरंपदाचविलिखन्महीम् ॥ उद्यम्यपुच्छमभ्राणिविषाणाग्रेणचोद्धरन् २ किंचित्किंचिच्छकृन्मुंचन्मूत्रयन्स्तब्धलोचनः ॥ यस्यनिर्ह्रादितेनांगनिष्ठुरेणगवांनृणाम् ३ पतंत्यकालतोगर्भाःस्रवंतिस्मभयेनवै ॥ निर्विशंतिघनायस्यककुद्यचलशंकया ४ तंतीक्ष्णशृंगमुद्वीक्ष्यगोपागोप्यश्चतत्रसुः ॥ पशवोद्रुद्रुवुर्भीताराजन्संत्यज्यगोकुलम् ५ कृष्णकृष्णेतितेसर्वेगोविंदंशरणंययुः ॥ भगवानथतद्वीक्ष्यगोकुलंभयविद्रुतम् ६ माभैष्टेतिगिराश्वास्यवृषासुरमुपाह्वयत् ॥ सपालैःपशुभिर्मंदत्रासितैःकिमसत्तम ७ बलदर्पहाहंदुष्टानांत्वद्विधानांदुरात्मनाम् ॥ इत्यारफेव्याच्युतोरिष्टंतलशब्देनकोपयन् ॥ सख्युरंसेभुजाभोगंप्रसार्यावस्थितोहरिः ८ सोप्येवंकोपितोरिष्टःखुरेणावनिमुल्लिखन् ॥ उद्यत्पुच्छभ्रमन्मेघःक्रुद्धःकृष्णमुपाद्रवत् ९ अग्रन्यस्तविषाणाग्रःस्तब्धासृग्लोचनोच्युतम् ॥ कट्याक्षिप्याद्रवत्तूर्णमिंद्रमुक्तोऽशनिर्यथा १०

तेमहापुराणेदशमस्कंधेविजयध्वजकृतटीकायांत्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ अरिष्टनामासुरहननलक्षणंविक्रमंदेवकार्यसिद्धिकामुकेननारदेनोद्बोधितस्यासुरजातेःकंसस्यसज्जनोपद्रवोद्योगंचकथयत्यस्मिन्नध्याये । अथशंखचूडवधानंतरंदैत्यांतरनिग्रहलक्षणकथारभ्यते शंखचूडंनिहत्ययदागोपस्त्रीभिःसहव्रजमागतःश्रीकृष्णस्तर्हिंतदा । वृषभासुरःवृषभाकारोदैत्यःमहांतौककुत्कायश्चयस्यसतथा १ रवमाणःरवंकुर्वाणः २ शक्रद्रोमर्यं स्तब्धेस्थूणीकृतेअतिस्थिरेलोचनेयस्यसतथा निर्ह्रादितेनगर्जितेन ३ मासत्रयादर्वाक्गर्भस्रावः ततआसन्नमात्पतनंततःप्रसवःनृणांमनुष्यस्त्रीणां अचलशंकयापर्वतशंकया ४ तत्रसुःत्रस्ताःभीताःआसन् ५ ६ हेमंदनिर्भाग्य ७ भुजाभोगंआभोगभुजंगुद्वृतभूतम् ८ उद्यतिपुच्छेभ्रमंतोमेघायस्यसतथा ९ स्तब्धेनिश्चलेअसृक्कुरुधिरमिवरक्तेलोचनेयस्यसतथा कट्याक्षिप्यकडीस्फिजौआक्षिप्यनिक्षिप्यप्रदर्शैत्यन्वयः कट्याक्षित्वेतिपाठेकटाक्षेणनिरिक्ष्येत्यर्थः अशनिर्वज्रम् १०

प्रत्यपोवाह प्रत्यपातयत्त अभ्याकृष्यपृष्ठतापनीतवानित्यर्थः तिर्यङ्नीतवान्वा ११ १२ अंबरंवस्त्रं कृत्वाउत्कृत्यविषाणमितिशेषः तेनविषाणेन १३ मूत्रशकृती अनिमीलितेक्षणः विवृतनेत्रः निर्गताऋतिर्यस्मात्सतथा निर्ऋतिर्यमःतस्यक्षयंगृहंयमलोकमित्यर्थः १४ ककुद्मिनंवृषासुरं स्वजातिभिः गोपैर्देवैर्वा १५ देवोनारायणः तद्विषयंदर्शनंज्ञानंयस्यसतथा यद्वा देवंदर्शयतीति यद्वादेवानामिवदर्शनंयस्यातींद्रियत्वात्सतथा देवानांयदर्शनंमतंततदेवयस्यदर्शनंसतथेतिवायथाकंसहननंशीघ्रतमंस्यात्तथाहेतिद्योतनार्थःप्रेत्युपसर्गः अनेनदेवकार्यमेवनारदेनसाध्यते नत्वसुरकार्यमितिज्ञायते १६ किमाहेतितत्राह यशोदायाइति कन्यांदुर्गांयशोदायाःसुतां कृष्णंदेवक्याःपुत्रं रामंबलभद्रंरोहिणीपुत्रमाह वसुदेवेनतौकिंकृतावत्राह बिभ्यता त्वदितिशेषः १७ स्वस्य

गृहीत्वाशृंगयोस्तंवाअष्टादशपदानिसः ॥ प्रत्यपोवाहभगवान्गजःप्रतिगजं यथा ११ सोपविद्धोभगवतापुनरुत्थायसत्वरः ॥ आपतत्स्विन्नसर्वांगोनिःश्वसन्क्रोधमूर्छितः १२ तमापतंतंसनिगृह्यशृंगयोःपदासमाक्रम्यनिपात्यभूतले ॥ निष्पीडयामासयथार्द्रमंबरंकृत्वाविषाणेनजघानसोपतत् १३ असृग्वमन्मूत्रशकृत्समुत्सृजन्क्षिपंश्चपादाननिमीलितेक्षणः ॥ जगामकृच्छ्रंनिर्ऋतेरथक्षयंपुष्पैःकिरंतोहरिमीडिरेसुराः १४ एवंककुद्मिनंहत्वास्तूयमानःस्वजातिभिः ॥ विवेशभगवान्गोष्ठंगोपीनांनयनोत्सवः १५ अरिष्टेनिहतेगोष्ठेकृष्णेनाद्भुतकर्मणा ॥ कंसायप्राहभगवान्नारदोदेवदर्शनः १६ यशोदायाःसुतांकन्यांदेवक्याःकृष्णमेवच ॥ रामंचरोहिणीपुत्रंवसुदेवेनबिभ्यता ॥ न्यस्तौस्वमित्रेनंदेवैयाभ्यांतेपुरुषाहताः १७ निशम्यतद्भोजपतिःकोपात्प्रचलितेंद्रियः ॥ निशातमसिमादत्तवसुदेवजिघांसया १८ निवारितोनारदेनतत्सुतौमृत्युमात्मनः ॥ ज्ञात्वालोहमयैःपाशैर्बबंधसहभार्यया १९ प्रतियातेतुदेवर्षौकंसआशास्यकेशिनम् ॥ प्रेषयामासहन्येतांभवतारामकेशवौ २० ततोमुष्टिकचाणूरशलतोशलकादिकान् ॥ अमात्यान्हस्तिपांश्चैव समाहूयाहभोजराट् २१ भोभोनिशम्यतामेतद्वीरचाणूरमुष्टिक ॥ नंदव्रजेकिलासातेसुतावानकदुंदुभेः २२ रामकृष्णौसुतौमह्यंमृत्यूकालनिदर्शितौ ॥ भवद्भ्यामिहसंप्राप्तौहन्येतांमल्ललीलया २३ मंचाःक्रियंतांविविधामल्लरंगपरिश्रिताः ॥ पौरजानपदाःसर्वेपश्यंतुस्वैरसंयुगम् २४ महामात्रनिबोधेदं वचोममहामते ॥ गजःकुवलयापीडःप्रभिन्नकरटामुखः २५ संस्थाप्योद्वारिरंगस्यकरारोपितमुद्गरः ॥ तेनतेतत्रहंतव्यौसुतावानकदुंदुभेः २६ सोप्याकुलमतिःप्राहनिहंतव्यौकथंमया ॥ स्वस्रीयौभोजराजस्यकंसस्यजगतीपतेः २७ इत्युक्तस्तेनकंसस्तुमहामात्रेणदुर्मतिः ॥ उवाचभूयोवचनंसमेताञ्छ्रावयन्नृप २८ कंसउवाच ॥ शृणुध्वमेतद्वचनंमयोदितंनिशम्यसर्वेहृदिधारयंतुतत् ॥ येनाहमेतेष्वसुहृत्त्वमादितश्चरामिबंधुष्वीपतस्यकारणम् २९

मित्रेविश्वसनीयेसुत्हादि याभ्यांकृष्णरामाभ्यांतेतवपुरुषानियोगकारिणः १८ निशातंनिशितंतेजितमित्यर्थः १९ आशास्यसम्यक्शिक्षित्वा भवतामद्भृत्येषुपूज्येन २० २१ २२ मृत्यूमारकौकालेनयमेननितरांदर्शितौ २३ मंचाःउत्तुंगस्तंभादिरचितस्थानानि मल्लरंगस्यपरितःसर्वासुदिक्षुश्रिताःस्थिताः स्वैरसंयुगंयोधाकांक्षापूरकंयुद्धम् २४ हेमहामात्रहस्तिपकुवलयंभूमंडलंआपीडयतीति कुवलयंकैरवं आपीडेशेखरेयस्यसतथेति प्रभिन्नकरटामुखः मदस्राविगंडमुखः २५ मद्गरोलोहदंडः २६ जगतीपतेः राजप्रधानलोकभर्तः जगतीराजप्रधानेपीतिहलायुधः २७ २८ २९

३० ३१ सालानांसर्जानांमंडलेनसमूहेनालंकृते ३२ ३३ नामप्रसिद्धः ३४ सर्वेषांसत्त्वानांप्राणिनांआशयार्थंअभिप्रेतार्थंवेत्तीतिसर्वसत्त्वाशयार्थवित् ३५ ३६ नितांतखेदेनअतिमात्रव्यथ
याआविलोसंकुलोलोचनाशयोयस्याःसातथा ३७ गीर्वाणतुल्याश्चामरवल्लभानुगाश्च अमरवल्लभइंद्रः ३८ जराचविनाशश्चजराविनाशौतौआदीयेषांअखिलानामाधीनांतेजराविनाशाद्य
खिलाधयःतान्भजितुंशीलमेषामस्तीतिजराविनाशाद्यखिलाधिभागिनः तेषांमहदंतरंविशेषः ३९ अस्तुविशेषस्ततःकिंदोषःस्यादितिधियावक्ति इतीति ४० मनुकथमेतदुष्टचेष्टितंकि
मप्यतिक्रम्याकरणाद्वोप्यत्वादितितत्राह इमानिति अवधार्यअवज्ञाय ४१ मलिनत्वंसदृष्टांतमाह गजेनेति अमरैरधमःगर्हितः अधमौगर्हितन्यूनाविविच देवयोनिपुनीचइतिवा ४२ मयाकृतस्य

मातामममहाभागाकदाचित्कमलेक्षणा ॥ विचचारगृहोद्यानेमंदमारुतवीजिते ३० प्रोत्फुल्लाशोकबकुलपूगपुन्नागशोभिते ॥ भ्रमद्भ्रमरसंघातेकूजत्को
किलसंकुले ३१ नृत्यच्छिखंडिनिवहेमर्कटाटोपसुंदरे ॥ वसंतसमयेरम्येसालमंडलमंडिते ३२ चरंतीतत्रमेमातार्चिंतयामाससुव्रता ॥ भर्तारंकाम
संतप्ताऋतुस्नातास्वलंकृता ३३ तत्रैवकश्चिद्गंधर्वोद्रुमिलोनामनामतः ॥ चरन्नंतर्हितःकालेदृष्ट्वातामेकचारिणीम् ३४ विज्ञायचिंतितंतस्याःसर्वसत्त्वाश
यार्थवित् ॥ उग्रसेनवपुर्बिभ्रत्स्मरिमतालापवीक्षितम् ३५ तामाससादकामार्तःकामयानांपतिव्रताम् ॥ अजानमानासाभ्येत्यरेमेतेनसमंवने ३६ सातं
विदित्वारमणेतरंसतीनितांतखेदाविललोचनाशया ॥ उवाचकस्त्वंकितवार्यगर्हितंदुरात्मनायेनकृतंत्वयेदृशम् ३७ इतिब्रुवंतींपरिसांत्वयँच्छनैःसदीर्घ
बाहुर्द्रुमिलोऽभ्यभाषत ॥ वयंहिगंधर्वकुलोद्भवाःप्रियेगीर्वाणतुल्यामरवल्लभानुगाः ३८ भवादृशीनांमनुजांगनानांजानीहिभद्रेसुलभावयंनच ॥ जरा
विनाशाद्यखिलाधिभागिनांनृणांसुराणांमहदंतरंप्रिये ३९ इतिब्रुवंतंसाभूयःप्राहक्रोधाकुलेंद्रिया ॥ किंमांसांत्वयसेभूयःकृत्वेत्थंदुष्टचेष्टितम् ४० इमा
नतिक्रम्यजलाग्निमेदिनीसमीरणाकाशनिशेशसूर्यान् ॥ दिक्कालधर्मानवधार्ययेनदुरात्मनेत्थंमलिनीकृताहम् ४१ गजेनेवमदांधेनपद्मिनीवनम
ध्यगा ॥ विशृंखलेनविमलायेनाहंमलिनीकृता ॥ सत्वंकिमितिमांभूयःसांत्वयस्यमराधम ४२ इतिब्रुवंतींप्रोवाचसभूयःशापशंकितः ॥ अनुलोमःस
रोजाक्षिमनुष्यासुदिवौकसाम् ४३ नराणांदेवकांतासुप्रतिलोमोहिसंगमः ॥ जानीहिनाहमागस्कृतेनपंकजगंधिनि ४४ तस्मात्तेजायतेपुत्रोमद्वीर्येन
वृथाभवेत् ॥ श्रीमान्धीमान्महोत्साहोनमेवाग्जायतेमृषा ४५ इत्येनंवादिनंक्रुद्धामाताममयशस्विनी ॥ प्राहसंत्यज्यसंतप्तापातिव्रत्यंसुदुर्लभम् ४६
निःसेतोर्भिन्नवृत्तस्यपापस्योन्मार्गवर्तिनः ॥ क्रूरस्तेतनयोभूयात्साहसीनिर्दयोऽघृणः ४७

कर्मणःसावद्यत्वेजलाग्न्यतिक्रमणदोषापादनंस्यादेवयोनित्वेनममत्वत्संगमोनुकूलएवविहितत्वादितिछलाभिसंधिराह इतीति दिवौकसांदेवानांमनुष्यासुस्त्रीषुसंगमोऽनुलोमोऽनुकूलः ४३ मनुष्या
णांदेवस्त्रीषुसंगमः प्रतिलोमोविरुद्धः शंतन्वादीनांगंगादिषुसंगमोदृष्टचरोऽतःकथमेतदितिमंदाशंकांपूर्वोऽवस्थामरेश्यदोषाशंकानास्तीतिहिशब्देनपरिपरति ४४ ४५ ४६ निःसेतोरित्य
स्यविवरणं भिन्नवृत्तस्येति वृत्तंचरितं अस्यविवरणं उन्मार्गवर्तिनइति निर्दयःनिर्गताकरुणायस्मात्सतथा अघृणः अकृत्यजुगुप्सारहितः घृणाजुगुप्साकृपयोरितिच दयदानगतिशोषणादि
ष्विातेधातोःयजनादिधर्मशून्यः घृणाकृपातयारहितः ४७

४८ तावकानांदेवानामितिशेषः ४९ ५० बंधुषुदुर्जनान्बंधुभूतान् दुर्जनान्वा ५१ केतेइतितत्राह उग्रसेनमिति ५२ कुतःपितृहत्यादिदोषोनास्तीतितत्राह ममेति ५३ ५४ ५५ ५६ ५७ ५८ विशसंतुसूदयंतु भूतराजायभैरवविग्रहधारिणेरुद्राय मीढुषेसमर्थायअभीष्टदात्रेवा अर्थतत्वज्ञप्रयोजनयाथार्थ्यवेत्तारम् यदुपुंगवंयदुश्रेष्ठम् ५९ दानशब्देनवदान्यालक्ष्यंते ॥ तेषांपते अक्रूर मैत्रंमित्रकर्म ६० सौम्यसुंदर सौम्योविप्रेसोमजीवेसुंदरेसोमदैवतेइतिच कार्यगौरवसाधनम् महतःकार्यस्यसाधनंसमर्थनम् ६१ ६२ निसृष्टःक्षप्तःअभ्युपायनैःसहितैः ६३ वैद्युतोविद्युतोनिर्ग

नानुग्राह्योदेवतानांद्विजानांचतपस्विनाम् ॥ इत्थंवदंत्यांतस्यांसकुद्वायांशापशंकितः ४८ तावकानांभवेच्छत्रुरित्युक्त्वांतरधीयत ॥ गतेतस्मिन्महोद्या
नान्मातामम्मतपस्विनी ४९ केनाप्यज्ञातवृत्तांतागृहानेवाभ्यपद्यत ॥ ततःसागर्भमालंब्यकालेनैवसुषावमाम् ५० इतिमेनारदःप्राहकदाचिद्भगवान्ऋषिः ॥
ततःप्रभृत्यहंवेद्मितानेतान्बंधुदुर्जनान् ५१ यूयंतत्रप्रमाणंहिद्विषंत्येतेपिमांसदा ॥ उग्रसेनंचदुर्बुद्धिमाहुकंचदुराशयम् ५२ वसुदेवंचकितवमन्यांश्च
तदुपाश्रयान् ॥ हत्वानजायतेदोषोममगंधर्वजन्मनः ५३ तेनादेक्ष्यामिपरुषंहन्येतामितितावहम् ॥ ताभ्यांहताभ्यांबालाभ्यांकुंजरेणबलीयसा५४कृ
त्वापारत्रिकींपूजांयांतुतत्पदवीमिमे ॥ वसुदेवोग्रसेनौचतथान्यौनंददेवकौ ५५ गोपालायादवाश्चैवयेचान्येताननुव्रताः ॥ पश्यंतुविवृतैर्नेत्रैर्हन्यमानौस्व
दारकौ ५६ आहूयंतांजनपदाःपश्यंतुममपौरुषम् ॥ महामात्रत्वयाभद्ररंगद्वार्युपनीयताम्५७द्विपःकुवलयापीडोजहितेनममाहितौ ॥ आरभ्यतांधनुर्या
गश्चतुर्दश्यांयथाविधि ५८ विशसंतुपशून्मेध्यान्भूतराजायमीढुषे ॥ इत्याज्ञाप्यार्थतत्त्वज्ञमाहूययदुपुंगवम् ५९ गृहीत्वापाणिनापाणिंतत्राक्रूरमु
वाचह ॥ भोभोदानपतेमह्यंक्रियतांमैत्रमादृतः ॥ नान्यस्त्वत्तोहिततमोविद्यतेभोजवृष्णिषु ६० अतस्त्वामाश्रितःसौम्यकार्यगौरवसाधनम् ॥ यथेंद्रोवि
ष्णुमाश्रित्यस्वार्थमध्यगमद्विभुः ६१ गच्छनंदव्रजंतत्रसुतावानकदुंदभेः ॥ आसातेताविहानेनरथेनानयमाचिरम् ६२ निसृष्टःकिलमेमृत्युर्देवैर्वैकुंठ
संश्रयैः ॥ तावानयसमंगोपैर्नंदाद्यैःसाभ्युपायनैः ६३ घातयिष्यइहानीतौकालकल्पेनहस्तिना ॥ यदिमुक्तौततोमल्लैर्घातयेवैद्युतोपमैः ६४ तयोर्निह
तयोस्तान्वसुदेवपुरोगमान् ॥ तद्बंधून्निहनिष्यामिवृष्णिभोजदशार्हकान् ६५ उग्रसेनंमत्पितरंस्थविरंराज्यकामुकम् ॥ तद्भ्रातरंदेवकंचयेचान्येविद्विषोमम
६६ ततश्चेषामहीमित्रभावित्रीनष्टकंटका ॥ जरासंधोममगुरुर्विदोदयितःसखा ६७ शंबरोनरकोबाणोमय्येवकृतसौहृदाः ॥ तैरहंसुरपक्षीयान्हत्वा
भोक्ष्येमहींनृपान् ६८ एतज्ज्ञात्वानयक्षिप्रंरामकृष्णाविहार्भकौ ॥ धनुर्यागनिरीक्षार्थंद्रष्टुंयदुपुराश्रियम् ६९

तोग्निःतस्योपमायेषांतैः ६४ ६५ मत्पितरएवएतइतिशेषः ६६ मेमित्र भवित्रीभविष्यतिननुत्वत्तोधिकाजरासंधादयःकंटकाःसंतितत्राह जरासंधइति ६७ ६८ आनयनेनिमित्तमाह ध
नुरिति धनुर्यागलक्षणोत्सवार्थं ६९

मनीषितंमनसाकर्तुमिष्टं मरणंज्ञात्वापिपरिहारप्रयत्नोनकृतइतियदतआत्महरपालक्षणंपदवर्धतस्यभार्जनंपरिहरणंभवति फलनिष्पत्तिमज्ञात्वाप्रयत्नोव्यर्थइतिनानिरूप्यइत्याह सिद्धीति फलसिद्धावसि द्धौचहर्षशोकाभ्यांनविषमोभूत्वाकर्मकुर्यादितिविधिशास्त्रं तर्हिफलावाप्तिःकिमधीनेतितत्राह दैवमिति फलभावनंफलकारणम् ७० तर्हीदंनापेक्षितं किंनेत्याह मनोरथानिति जनेनक्रियमाणत्वा त्स्वयाप्यनुष्ठेयमितिभावः यद्यपिफलसिद्धिःहर्षधीनातथापि ७१ ७२ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेविजयध्वजकृतटीकायांचतुस्त्रिंशोऽध्यायः ॥ ३४ ॥ श्रोतॄणांमंतॄणांप्रवक्तॄणांध्यातॄणांचनु द्धरारोहार्थंसंकलय्यभगवद्विक्रमंवर्त्तमानंवर्तिष्यमाणंचकथयत्यस्मिन्नध्याये तत्रादौकेशिदैत्यवधलक्षणंभगवद्विक्रमंवक्तुमाह केशीति निर्दरयन्भिदन्मनोजववत्जवोयस्यसतथा अभ्राणिचविमानानि चअभ्रविमानानि सटाभिःस्कंधदीर्घरोमभिः अवधूतानिअभ्रविमानानि तैःसंकुलंहृषितेनाश्वजातिशब्दितेनभीषितमखिलंयस्यसतथा हेषाह्रेषाचवाजिनामितिहलायुधः १ विकटंविस्तृतंआस्यकोटरं

अक्रूरउवाच ॥ राजन्मनीषितंसम्यक्तवचावद्यमार्जनम् ॥ सिद्ध्यसिद्धयोःसमंकुर्याद्दैवंहिफलभावनम् ७० मनोरथान्करोत्युच्चैर्जनोदैवहतानपि ॥ युज्य तेहर्षशोकाभ्यामथाप्याज्ञांकरोमिते ७१ एवमादिश्यचाक्रूरंमंत्रिणश्चविसृज्यसः ॥ प्रविवेशगृहंकंसस्तथाक्रूरःस्वमालयम् ७२ इतिश्रीभागवतेमहापुरा णेदशमस्कंधेचतुस्त्रिंशोऽध्यायः ॥ ३४ ॥ श्रीशुकउवाच केशीतुकंसप्रहितःखुरैर्महींमहाहयोनिर्दरयन्मनोजवः ॥ सटावधूताभ्रविमानसंकुलंकुर्वन्नभोहे षितभीषिताखिलः १ विशालनेत्रोविकटास्यकोटरोबृहद्गलोनीलमहांबुदोपमः ॥ दुराशयःकंसहितंचिकीर्षुर्व्रजंसनंदस्यजगामकंपयन् २ तंत्रासयंतं भगवान्स्वगोकुलंस्वहेषितैर्वालविघूर्णितांबुदम् ॥ आत्मानमाजौमृगयंतमग्रणीरुपाह्वयत्सव्यनदन्मृगेंद्रवत् ३ सतंनिशम्याभिमुखोनभस्तलंपिबन्निवा भ्यद्रवदत्यमर्षणः ॥ जघानपद्भ्यामरविंदलोचनंदुरासदश्चंडजवोदुरत्ययः ४ तद्वंचयित्वातमधोक्षजोरुषाप्रगृह्यदोर्भ्यांपरिपीड्यपादयोः ॥ सावज्ञमुत्सृ ज्यधनुःशतांतरेयथोरगंतार्क्ष्यसुतोव्यवस्थितः ५ सलब्धसंज्ञःपुनरुत्थितोमुखंव्यादायकेशीतरसापतद्धरिम् ॥ सोप्यस्यवक्त्रेभुजमुत्तरंस्मयन्प्रवेशया मासयथोरगंबिले ६ दंतानिपेतुर्भगवद्भुजस्पृशस्तेकेशिनस्तप्तमयस्पृशोयथा ॥ बाहुश्चतद्देहगतोमहात्मनोयथामयःसंववृधेऽपेक्षितः ७ समेधमाने नसकृष्णबाहुनानिरुद्धवायुश्चरणांश्चविक्षिपन् ॥ प्रस्विन्नगात्रःपरिवृत्तलोचनःपपातलंबंव्यसृजन्क्षितौव्यसुः ८ तद्देहतःकर्कटिकाफलोपमाद्व्यसोरपा कृष्यभुजंमहाभुजः ॥ अविस्मितोऽयंनिहतारिरुस्रियैःप्रसूनवर्षैर्ववृषद्भिरीडितः ९

मुखगर्तंयस्यसतथा दुराशयःदुष्टाभिप्रायःकृष्णहननलक्षणोयस्यसतथा २ वालेनपुच्छेनविघूर्णितोविभ्रांतोंबुदोयस्यसतथातं आजौक्षेपार्थमात्मानंस्वंमृगयंतंविचिन्वंतं अजगतिक्षेपणयोरितिधातुः युद्धेवा इयमपितादर्थ्येसप्तमी अग्रणीस्तस्याभिमुखेस्थितः ३ तंनादं ४ तद्धननं सावज्ञं अवमानसहितमितिक्रियाविशेषणं ५ मुखंव्यादायविदार्य ६ तप्तंअयोनामलोहंस्पृशंतःतप्तमयं तापात्मानंपदार्थंस्पृशंतीतितप्तमयस्पृशइतिवा उपेक्षितःआमयोव्याधिः ७ विक्षिपन्वितस्ततःप्रसारयन् लंबंशकृत् तुरगस्यशकृल्लुंबलंकाप्राकारकोशयोरितिच कोशंवा ८ कर्कटीकर्कंधूलता तत्फलसदृशंउर्वारुकवत्मृदुलमित्यर्थः कर्कटचाःफलंगर्भस्तत्सदृशं प्रसवेस्वपांक्रियतेयथातथा भुजापकर्षेणभृतइत्यर्थः व्यसोर्मृतस्य उस्रियैर्देवैः उस्रियाअमरादेवास्त्रिदिवेशादिवौकसइति च प्रसूनवर्षैःफलपुष्पसमूहैः प्रसूनंफलपुष्पयोरितिच ववृषद्भिरित्यत्रताच्छीलिकःशतृप्रत्ययः अवेत्यत्रअकारलोपश्च तेनअयंवर्षः औत्पत्तिकोगुणोलक्ष्यतइति ९

१० अप्रमेयात्मन्अपरिच्छेद्यस्वभाव नन्वेवंचेदंगुष्ठमात्रःपुरुषइत्यादिपरिमाणवचनस्यकागतिरितितत्राह योगेशेति योगिनांयोगविषयत्वेनस्वेच्छाविग्रहग्रहणेनतदुपपत्तेः योगेशत्वस्यवायुविषयत्वमितिमंदाशंकांनिरस्यति जगदीश्वरेति आत्मनएषप्राणोजायते आकाशाद्वायुःप्राणःश्रद्धाखंवायुरित्यादिश्रुतेः वायोर्जगदंतःपातित्वेनतदीशत्वंनपृथग्वक्तव्यमितिभावः कृष्णशब्दस्यबह्वर्थविषयत्वेनोक्तविशेषणाविशिष्टःकइतिसंशयनिवृत्तिःकथमितितत्राह वासुदेवेति वासुदेवशब्दस्यार्थांतरमाह अखिलेति नन्वेवंचेत्संशयस्तदवस्थइतितत्राह सात्वतामिति नन्वनेनसात्वज्जातिश्रेष्ठइत्येवायातं नतुतदाधिपत्यमित्यतउक्तं प्रभोइति समर्थोधिपतौप्रभुरिति ११ उक्तविशेषणानामन्यत्रापिकथंचिद्वृत्तिसंभवेनापिविष्णुत्वानिश्चयइतितत्राह त्वमिति प्रत्यगात्मांतर्यामीत्यर्थः ईदृशोन्योनास्तीत्याह एकइति एकस्यचबहुष्ववस्थानंकथमितितत्राह ज्योतिरिति मथनादिनाहग्विषयत्वेनाग्नेःसत्ताज्ञायतेनतवेतितत्राह गूढइति कथंगूढत्वमित्यतउक्तं गुहेति हृदयगुहायांशेतइति जीववत्तर्हित्वंसंसारीचेतनःकिंनेत्याह साक्षीति संसारिणामनुष्ठीयमानयोःपुण्यपापयोर्द्रष्टा वायोरंतस्थत्वेनसाक्षित्वेपिमुख्यसाक्षित्वंतवेत्याशयेनाह महापुरुषइति पुरुषोत्तमइत्यर्थः पुरुषोत्तमस्यैवमुख्यसाक्षित्वंयतो

देवर्षिरुपसंगम्यभगवत्प्रवरोनृप ॥ कृष्णमक्लिष्टकर्माणंरहस्येदमभाषत १० कृष्णकृष्णाप्रमेयात्मन्योगेशजगदीश्वर ॥ वासुदेवाखिलावासःसात्वतां प्रवरप्रभो ११ त्वमात्मासर्वभूतानामेकोज्योतिरिवैधसाम् ॥ गूढोगुहाशयःसाक्षीमहापुरुषईश्वरः १२ आत्मनात्माश्रयःपूर्वंमाययासृजसेगुणान् ॥ तैरिदंसत्यसंकल्पःसृजस्यत्स्यवसीश्वरः १३ सत्वंभूभरभूतानांदैत्यप्रमथरक्षसाम् ॥ अवतीर्णोविनाशायसाधूनांरक्षणायच १४ दिष्ट्यातेनिहतोदैत्योलीलयाऽयंहयाकृतिः ॥ अस्यहेषितसंत्रस्तास्त्यजंत्यनिमिषादिवम् १५ चाणूरंमुष्टिकंचैवमल्लानन्यांश्चहस्तिनम् ॥ कंसंचनिहतंद्रक्ष्येपरश्वोहनितेविभो १६ तस्यानुशंखयवनमुराणांनरकस्यच ॥ पारिजातस्यहरणमिंद्रस्यचपराजयम् १७ उद्वाहंवीरकन्यानांवीर्यशुल्कादिलक्षणम् ॥ नृगस्यमोक्षणंपापाद्वारकायांजगत्पते १८ स्यमंतकस्यचमणेरादानंसहभार्यया ॥ मृतपुत्रप्रदानंचब्राह्मणस्यस्वधामतः १९ पौंड्रकस्यवधंपश्चात्काशिपुर्याश्चदीपनम् ॥ दंतवक्रस्यनिधनंचैद्यस्यचमहाक्रतौ २० यानिचान्यानिवीर्याणिद्वारकामावसन्भवान् ॥ कर्ताद्रक्ष्याम्यहंतानिगेयानिकविभिर्भुवि २१ अथतेकालरूपस्यक्षपयिष्णोरमुष्यवै ॥ अक्षौहिणीनांनिधनंद्रक्ष्याम्यर्जुनसारथेः २२

तईश्वरत्वंतस्यैवमुख्यंनपशुपतेरितिभावेनाह ईश्वरइति १२ अलौकिकस्यवस्तुनोऽसाधारणलक्षणेनानिर्णेतुंशक्यतेइतितत्राह आत्मनेति पूर्वंजगदादौआत्मनापरप्रेरणामंतरेण केनोपादानेनेत्यतउक्तं माययेति मायया प्रकृत्या कुलालस्यशालाद्यधिष्ठानदर्शनादस्याकिमधिष्ठानमितितत्राह आत्माश्रयइति सभगवान्कस्मिन्प्रतिष्ठितइतिस्वेमहिम्नीतिश्रुतेः गुणान्महदादीन् १३ अवनमस्कारंदर्शयति सत्वमिति १४ अनिमिषादेवाः सुरमत्स्यावनिमिषाविति च १५ स्वोक्तार्थेवचनंप्रमाणयितुंभाविनमर्थंदिव्यचक्षुषोपलभ्यवक्ति चाणूरमित्यादिना तेतवकरेण १६ यथेदानींकेश्यादिहननंप्रत्यक्षंभवत्येवमेवकालांतरेक्रियमाणमपिकर्मदृग्विषयंभविष्यतीतिभावेनाह तस्येति तस्यकंसस्य अनुअनंतरंशंखादीनांहननमिति शंखःपंचजनासुरः १७ आदिशब्देनलक्ष्यवेधनमाह लक्षणंकालिकेचिह्ननाम्निमुद्रांगसंगयोरितिच १८ १९ २० वीर्याणांअवश्यज्ञेयत्वमाह गेयानीति भुवीतिविशेषणेनवीर्याणांसंसारनिवृत्त्यर्थमेवकृतत्वंसूचयति २१ अथभारतयुद्धेअमुष्य भूवलयस्यावशिष्टंक्षपयिष्णोःक्षीणंकर्तुकामस्य अक्षौहिणीनामष्टादशानामितिशेषः अर्जुनसारथेरित्यनेनभारतयुद्धइतिसूचयति २२

उपास्यरूपंविशिनष्टि विशुद्धेति भगवंतंशरण्यमीमहीत्यन्वयः कीदृशं विशुद्धविज्ञानघनंअप्राकृतज्ञानमूर्तिं स्वसंस्थयास्वव्यवस्थयाअपराधानास्थत्या समाप्तसर्वार्थ समाप्तःसर्वपुरुषार्थ कार्यब्रह्मरूप
र्मायामयीतिसंगिरंतेतत्राह अमोघेति कुतएतत्कथ्यतेइतितत्राह नित्येति नित्यानिवृत्तमायागुणानांप्रकृतिगुणानांप्रवाहःपरंपरायस्मिन्सतथा नन्वेतन्मुक्तानामप्यस्तीतितत्राह स्वतेजसेति स्वप्रभा
वेण तेजोबलेप्रभावेऽन्वइति २२ हेआद्यंतराक्षसनाशकर्तरीश्वरत्वांनतोस्मि ईश्वरत्वंसमर्थयते स्वाश्रयमित्यादिनाआत्माधीनयामायया प्रकृत्यास्वेच्छयावाक्रीडार्थंक्रीडितुं विनिर्मिताशेषकल्पनं विर
चितसमस्तदेवब्राह्मणासुरादितत्तद्वस्तुतारतम्यलक्षणविशेषव्यवस्थानं मनुष्यविग्रहइवविग्रहोयस्यसतथातं मांसदृष्ट्यामनुष्याकारमित्यर्थः मनुष्यदेहस्वीकारेकृत्यमाह धुर्यमिति धुरंवहतियोधुर्यइत्यतो
यदुवृष्णिसात्वतांधुरस्यवोढारं आद्यंतधुर्यमितिविशेषणद्वयेनदुष्टविनिग्रहविशिष्टपालनरक्षणकार्यार्थंमनुष्यविग्रहस्वीकारइतिविज्ञायते आद्यंतोमनुष्यविग्रहोयस्येत्यर्थांगीकारआदिनोराक्षसाःप्रोक्तास्तदं

विशुद्धविज्ञानघनंस्वसंस्थयासमाप्तसर्वार्थममोघवर्तिनम् ॥ स्वतेजसानित्यनिवृत्तमायागुणप्रवाहंभगवंतमीमहि २३ त्वामीश्वरंस्वाश्रयमात्ममायया
विनिर्मिताशेषविशेषकल्पनम् ॥ क्रीडार्थमाद्यंतमनुष्यविग्रहंनतोस्मिधुर्यंयदुवृष्णिसात्वताम् २४ श्रीशुकउवाच ॥ एवंयदुपतिंकृष्णंभगवत्प्रवरोमु
निः ॥ प्राणिपत्याभ्यनुज्ञातोययौतद्दर्शनोत्सवः २५ भगवानपिगोविंदोहत्वाकेशिनमाहवे ॥ पशूनपालयत्पालैःप्रीतैर्व्रजसुखावहः २६ एकदातेपशून्पा
लांश्चारयंतोऽद्रिसानुषु ॥ चक्रुर्निलायनक्रीडांचोरपालापदेशतः २७ तत्रासन्कतिचिच्चोराःपालाश्चकतिचिन्नृप ॥ मेषायिताश्चतत्रैकेविजन्हुरकुतोभयाः
२८ मयपुत्रोमहामायोव्योमोगोपालरूपधृक् ॥ मेषायितानपोवाहप्रायश्चोरायितोबहून् २९ गिरिदर्योविनिक्षिप्यनीतंनीतंमहासुरः ॥ शिलयापि
दधेद्वारंचतुःपंचावशेषिताः ३० तस्यतत्कर्मविज्ञायकृष्णःशरणदःसताम् ॥ गोपान्नयंतंजग्राहवृकंहरिरिवौजसा ३१ सनिजंरूपमास्थायगिरींद्रसदृशं
बली ॥ इच्छन्विमोक्तुमात्मानंनाशक्नोद्ग्रुरुणातुरः ३२ सनिगृह्याच्युतोदोर्भ्यांपातयित्वामहीतले ॥ पश्यतांदिविदेवानांपशुमारममारयत् ३३ गुहापि
धानंनिर्भिद्यगोपान्निःसार्यकृच्छ्रतः ॥ स्तूयमानःसुरैर्गोपैःप्राविशत्स्वगोकुलम् ३४ इतिश्रीभागवतेमहापुराणेदशमस्कंधेपूर्वार्धेपंचत्रिंशोध्यायः ॥३५॥
श्रीशुकउवाच ॥ अक्रूरोपिचतांरात्रिंमधुपुर्यांमहामतिः ॥ उषित्वारथमास्थायप्रययौनंदगोकुलम् १ गच्छन्पथिमहाभागोभगवत्यंबुजेक्षणे ॥ भक्तिपरा
मुपगतएतदेवमाचिंतयत् २ अक्रूरउवाच ॥ किंमयाचरितंभद्रंकितप्तंपरमंतपः ॥ किंवाथाप्यर्हतेदत्तंयद्द्रक्ष्याम्यद्यकेशवम् ३

तत्वाज्जनार्दनइतिवचनांनिरुणाद्धिविशुद्धविज्ञानघनमित्यादिविशेषणानिचोक्तानिव्याहतानिस्युरिति २४ तस्यदर्शनेनोत्सवउत्कृष्टआनंदोयस्यसतथा २५ २६ चोरपालापदेशतः वयंपशूंश्चोरयाम
वयंपालयामइति अपदेशेनछन्नमनसा निलायनक्रीडां निलीनकर्मलक्षणक्रीडाम् २७ २८ चोरायितःचोरवद्वर्तमानः २९ गिरिदर्योपर्वतगुहायाम् ३० हरिःसिंहः ३१ गुरुणामहताहरिणागृहीतइति
शेषः ३२ पशून्मारयतित्यक्तप्राणान्करोति ३३ २४ इतिश्रीभागवतेमहापुराणेदशमस्कंधेविजयध्वजकृतटीकायांपंचत्रिंशोऽध्यायः ॥ ३५ ॥ अज्ञानांभगवद्भक्तिकरणनिदर्शनार्थंगोकुलयात्राकथन
च्छद्मनाऽक्रूरस्यभक्तयुद्रेकःप्रतिपाद्यतेस्मिन्नध्याये मधुपुर्यांमथुरायां यस्यांरात्र्यां न्ययुंक्तांरात्रौ १ २ भद्रंपुण्यंसामान्योक्तौविशिनष्टि किंतप्तमित्यादिना अर्हतेविष्णुभक्त्यादिगुणसंपन्नाय ३

ब्रह्मकीर्तनंवेदाध्ययनं ४ उक्तमनुवदति मैवामीति अहमेवमच्युतदर्शनंदुर्लभमितिआत्मानंमावमंस्यामिनावजानामि कुतइत्यत्राह स्यादिति कथमेतत्संभवतीत्यत्राह ह्रियमाणइति कश्चनविष्णुभक्तिमान् ५ भवोजन्म योगिभिःसनकादिभिः ६ बतआश्चर्ये अद्यअत्यनुग्रहंअधिकानुग्रहंअकृतअकरोत् अतिममात्यनुग्रहमितिपाठे अतिअत्यर्थंसमेकृतवानित्यर्थः प्रहितःप्रेषितःअंघ्रिपद्मंविशिनष्टि कृतावतारस्येति पूर्वंब्रह्मादयोयस्यांघ्रिपद्मस्यनखानांमंडलस्यात्विषातेजसादुरत्ययंतमोऽज्ञानमघंवाशुचंवाअतरन्तीर्णवंतइत्यन्वयः ७ यच्चब्रह्मादिभिःसुरैरर्चितं ससात्वतैःपांचरात्रिकैःसहितैःयच्चगोचारणायगवांतृणचरार्थंअनुचरैःगोपैःसमंवनेभ्रांतं यच्चवनेगोपिकानांकुचकुंकुमेनांकितंमुद्रितंतद्रक्ष्यइतिपूर्वत्रान्वयः ८ नूनंनिश्चयात्स्मितावलोकेऽरुणेकंजसदृशेलोचनेयस्यतत्तथा स्मितसहितोऽवलोकोयस्तेतथागुडाःनिबिडाःअलकाः कुंतलाः तैरावृतं यद्वा गुडाःगुलिकाःतद्वद्वक्राःयद्वा गुडःइक्षुविकारःतद्वत्स्निग्धाअलकास्तैरावृतं दर्शननिश्चयेशकुनंवक्ति प्रदक्षिणमिति वाइत्यनेनअन्येभारद्वाजादिपक्ष्यादयोगृह्यंतेइतिसूचयति गुडःपिंडेक्षुविकृतेस्नुहीगुलिकयोर्गुडइतिच ९ ईयुषःगतवतः उपलंभनंदर्शनं भविताभविष्यति मह्यंममदृशःनेत्रस्यसंसमीचीनंफलंस्यान्ननुस्यादेव समभेदेसमीचीनेइतिच प्रश्नावधारणेनित्यसमीहानुमतेनन्वितिसंदृशइत्येकंवापदं नसंदृशेतिष्ठतीतिश्रुतिः संदर्शनसाधनस्यनेत्रस्येत्यर्थः १० चैतन्यैकरसस्यहरेर्गोपत्वेनावभासनंनचोद्यमितिभावेनाह यइति योहरिः

ममैतदुर्लभंमन्येउत्तमश्लोकदर्शनम् ॥ विषयात्मनोयथाब्रह्मकीर्तनंशूद्रजन्मनः ४ मैवंमामवमंस्यामिस्यादेवाच्युतदर्शनम् ॥ ह्रियमाणःकालनद्यांक्वचित्तरतिकश्चन ५ ममाद्यामंगलंनष्टंफलवांश्चैवमेभवः ॥ यन्नमस्येभगवतोयोगिध्येयांघ्रिपंकजम् ६ कंसोबताद्याकृतमेत्यनुग्रहंद्रक्ष्येऽंघ्रिपद्मंप्रहितोऽमुनाहरेः ॥ कृतावतारस्यदुरत्ययंतमःपूर्वेऽतरन्यन्नखमंडलत्विषा ७ यदर्चितंब्रह्मभवादिभिःसुरैःश्रियाचदेव्यामुनिभिःससात्वतैः ॥ गोचारणायानुचरैःसमंवनेयद्गोपिकानांकुचकुंकुमांकितम् ८ द्रक्ष्यामिनूनंसुकपोलनासिकंस्मितावलोकारुणकंजलोचनम् ॥ मुखंमुकुंदस्यगुडालकावृतंप्रदक्षिणंमेप्रचरंतिवैमृगाः ९ अप्यद्यविष्णोर्मनुजत्वमीयुषोभारावतारायभुवोनिजेच्छया ॥ लावण्यधाम्नोभवितोपलंभनंमह्यंननुस्यात्फलमद्यसंदृशः १० यईक्षिताहंरहितोप्यसत्सतोःस्वतेजसापास्ततमोभिदाभ्रमः ॥ स्वमायया त्मन्यरचितेषुतत्सन्प्राणादिभिर्जंतुषुभातिचित्रधा ११

अविद्यमानंदर्शनंआत्मनियद्यभिमन्येततदाद्युक्तदोषःस्यात्नचासावस्तीत्यर्थः यज्ञदत्तवद्देहस्थस्याज्ञानादिसंभवेनाहंभावशून्यत्ववचनमौपचारिकंकिंनस्यादितितत्राह अपास्तेति अपास्तःनिराकृतः तमोभिदाभ्यामज्ञानान्यथाज्ञानाभ्यांउत्पन्नोभ्रमःप्रवृत्तिर्यस्यसः भ्रमुअनवस्थानइतिधातोः ष्ठागतिनिवृत्तावितिअवस्थानंगत्यभावस्तदभावःकार्येषुप्रवर्तमानमित्यर्थः वस्तुतत्त्वाज्ञानविपरीतंनिमित्तप्रवृत्तियुक्तोनभवतीत्यर्थः यद्वातमसावस्तुतत्त्वाज्ञानेननजातभिदाइदंरजतमित्यन्यथाज्ञानंतदेवभ्रमोभ्रांतिज्ञानंयस्यदूरोत्सारितंसः ननुमुक्तोप्येतादृशइत्यतउक्तं स्वतेजसेति सत्यंकिंतु बलमानंदओजश्चसहोज्ञानमनाकुलं स्वरूपाण्येवजीवस्यव्यज्यंतेपरमाद्विभोरितिश्रुतेरस्यपरप्रभावेणतदात्मानमेववेदाहंब्रह्मास्मीति स्वमाययास्वेच्छया आत्मन् आत्माधारतयारचितेषुजंतुषुप्राणादिभिःसहचित्रधासुरनरतिर्यगादिनानाजातिभिश्चत्वेनभाति ननुतर्हिविकारोपिस्यादित्यत्राह तत्सन्निति तथैवसन्अविकारएवाभ्यर्हितःश्रेष्ठइत्यर्थः सर्वैरभ्यर्हितोवा सत्सत्येभ्यर्हितेश्रेष्ठसाधीयसिभवत्यपीतिच अनेनमूलरूपोहरिर्यथानिर्विकारस्तथारूपांतरवानितिसूचितंभवति हेयदेहित्वेनाभासमानस्यकिंकर्मेतितत्राह ईक्षितेति असत्सतोअशुभशुभयोःईक्षिताद्रष्टा जंतुभिःक्रियमाणस्यपुण्यपापलक्षणस्यकर्मणःसाक्षीत्यर्थः नत्वस्यदर्शनाभिमानलक्षणविकारःआपन्नमुदिश्येतिवा ११

यस्यहरेरखिलामीवहाभिःअखिलानिअमीवानिपापानिघ्नंतीत्यखिलामीवहानितैः अतएवसुमंगलैःगुणकर्मजन्मभिः विमिश्राःसंकलितावाचः श्रीकृष्णकृष्णसखवृष्णिवृषेत्यादिलक्षणाजगत्त्राणं तिआह्लादयंतिजीवयंतिवा शुंभंतिशोभयंतिशुभयुक्तंकुर्वंति पुनंतिपवित्रयंति वैगंगादौप्रसिद्धमित्यन्वयः यावाचस्तैःविष्ण्वादिभिःविरक्ताःशून्याःवर्जिताःस्युस्ताःसद्भिःअशोभनामताः अवबोधिता इत्यन्वयः १२ अस्त्वेवंविधमाहात्म्योभगवांस्ततःप्रकृतेकिमत्राह सचेति चशब्दएवार्थे ईश्वरएवव्रजेआस्तेकिलेत्यन्वयः सात्वतामन्वयेयदुकुलेअवतीर्णःकिंकार्यायेतित्राह स्वसेत्विति स्वेनकृतःसेतु र्मर्यादातांपालयंतिरक्षयंतीतिस्वसेतुपालाः अमराणांवर्याःअमरवर्याःस्वसेतुपालानामप्यमरवर्याणांइंद्रादीनांशर्मकृत् सुखकृत् देवकार्यायावतीर्णइत्यर्थः अत्रकिंप्रमाणमित्यत्राह गायंतीति देवाःव्यासाद यःपुराणादिषु गेयसंभवेगानंयुक्तंतत्कथमित्यत्राह यशइति यद्यशोवितन्वन्व्रजास्ते अशेषाणांमंगलंश्रेयस्करं तद्यशः १३ स्वमानसंप्रतिवक्ति तंत्विति अहमद्यतमेवद्रक्ष्येइत्यन्वयः दृशिमतांचक्षु ष्मतांमहोत्सवं त्रैलोक्यकांतंकमनीयंरूपंदधानं भद्रंकर्णेभिःशृणुयामदेवाभद्रंपश्येमाक्षभिर्यजत्राइतिश्रुतिः प्रभाद्यउपसःप्रभातकालावयवाःक्षणादयः सुदर्शनाःसर्वजगत्पूज्यवस्तुदर्शनप्रदाआसन्नि त्यन्वयः १४ कालाख्यभुजंगस्यरंहसारंहोलक्षणविशेषेण अधास्यत्धास्यति धरिष्यत्यपिकिम् १५ यत्रनिजहस्तपद्मेसमर्हणंजलपूर्वपूजांनिधायदत्त्वाकौशिकःइंद्रःजगत्त्रयेंद्रतामाप महाव

यस्याखिलामीवहाभिःसुमंगलैर्वाचोविमिश्रागुणकर्मजन्मभिः ॥ प्राणंतिशुंभंतिपुनंतिवैजगद्यास्तद्विरक्ताःस्युरशोभनामताः १२ सचावतीर्णःकिल सात्वतान्वयेस्वसेतुपालामरवर्यशर्मकृत् ॥ यशोवितन्वन्व्रजआस्तईश्वरोगायंतिदेवास्तदशेषमंगलम् १३ तंत्वद्यनूनंमहतांगतिंगुरुंत्रैलोक्यकांतंद्दशि मन्महोत्सवम् ॥ रूपंदधानंश्रियईप्सितास्पदंद्रक्ष्येममासन्नुषसःसुदर्शनाः १४ अप्यंघ्रिमूलेपतितस्यमेविभुःशिरस्यधास्यन्निजहस्तपंकजम् ॥ दत्ताभयं कालभुजंगरंहसाप्रोद्विजितानांशरणैषिणांनृणाम् १५ समर्हणंयत्रनिधायकौशिकोमहाबलिश्चापजगत्त्रयेंद्रताम् ॥ यद्वाविहारेव्रजयोषितांश्रमंस्पर्शेनसौ गंधिकगंध्यपानुदत् १६ नमय्युपैत्यप्रियबुद्धिमच्युतःकंसस्यभृत्यःप्रहितोपिविश्वदृक् ॥ योंतर्बहिश्चेतसएतदीहितंक्षेत्रज्ञईक्षत्यमलेनचक्षुषा १७ अप्यंघ्रिमूलेपतितंकृतांजलिंमामीक्षतेसस्मितमार्द्रयादृशा ॥ सपद्यपध्वस्तसमस्तकिल्बिषोवोढामुदंवीतविशंकऊर्जिताम् १८ सुहृत्तमंज्ञातिमनन्यदैवतं दोर्भ्यांबृहद्भ्यांपरिरभ्यतेऽथमाम् ॥ आत्माहितीर्थींक्रियतेतदैवमेबंधश्चकामात्मकउच्छ्वसत्यतः १९

लिश्चतथाइंद्रवत् यद्वस्तपंकजंसौगंधिकस्यकह्लारस्यगंधइवगंधोस्यास्तीति विहारेवनक्रीडायां अपानुदत्निराकरोत् १६ ननुकितवबहुमलापेनपतस्त्वंकंसभृत्यः तत्प्रहितश्चअतस्त्वय्यप्रियबुद्धिंकु र्यादच्युतइतिमंदाशंकांपरिहरन्निवाह नमय्यीति नोपैत्यपिकिं नोपैत्येवेत्याह विश्वदृगिति विश्वदृक्कान्मममनोनैर्मल्यंविजानातीत्यर्थः एतदेवविवृणोति यइतिचेतसएतदीहितंसंकल्पलक्षणंचेष्टित अंतर्बहिश्चस्थितमितिव्याप्तिकथनमात्रेणचेतनस्यचेष्टितसाक्षित्वंसम्यङ्विवृतंस्यादितिक्षेत्रज्ञइत्युपादत्त इदंशरीरंकौंतेयक्षेत्रमित्यभिधीयतेइत्यादिनाक्षेत्रज्ञशब्दार्थःसम्यग्विवृतः १७ दयार्द्र यादृशामांसस्मितमीक्षतेकिं ईक्षणफलमाह सपदीति ईक्षणानंतरमपास्तकिल्बिषः सम्यङ्निराकृताशुभोऽतएववीताविविधाशंकायस्यसवीतशंकोहमूर्जितामुद्रिक्तांमुदंवोढावहिष्यामीत्यन्वयः १८ अ थयदापरिरंभणेहेतुमाह सुहृत्तममिति अन्यद्दैवतमिष्टप्रदंयस्यनास्तिसतथा परिरंभणात्किंफलमाप्तंभवतीतित्राह आत्मेति अतोस्मात्परिरंभणात् आत्मादेहस्तीर्थींक्रियते शुद्धजलवत्क्रियते पात्रीक्रियतेवा ज्ञानदानायपात्रंयोग्योभवतीत्यर्थः अन्येषांभगवद्भक्तोबुद्धचवतारीक्रियतेवा ज्ञानोपदेशायचाधिकारीक्रियतेवा किमतइत्यत्राह बंधश्चेति कामात्मकःविषयतृष्णालक्षणोबंधःउच्छ्वसतिनिर्वा र्यःछिन्नोभवतीत्यर्थःच उच्छेदेपिसमुच्चये अतोदेहहेतुकोवाप्रवाहरूपेणसत्योवा १९

भगवतईक्षणसमयेइदमित्याशयेनवक्ति लब्धांगसंगामिति उरुश्रवाःपूर्णकीर्तिः व्याप्तश्रवणशक्तिमान्वा हेअक्रूरहेता तवत्सेतिसंबोधयतिच यदिजन्मभृतःजन्मनःसाफल्यंमाप्ताः बाधकमाह महर्षिसेति महत्त्वेनभगवतायोनाहतः वागादिनासादरमर्चितोनभवति अमुष्यपुंसोयज्जन्मतत्तधिक्निंदामि निष्फलत्वात् २० अयंश्रीकृष्णःक्षीराब्धिशाय्येवनान्यइतितस्यलक्षणमाह नेति वनस्पति र्दृक्षमात्रेकल्पादौपुष्पवर्जितेइत्युत्पलमालायथायथास्वस्वयोग्यफलदानेन २१ इदानींबलभद्रमुद्दिश्याक्रूरचिंतांव क्ति किंचेति गृहीतसंचितौगृहीतपशुपादबंधनरज्जौ यदूत्तमोग्रजोऽवनतंमानयन् स्मयन्रामः ममस्वबंधुषुवसुदेवादिषु कंसकृतंकर्मसंप्रेक्ष्यतेविचारयिष्यतिकिंचेत्यन्वयः पादबंधनपाशंतुपशूनांस चितिंविदुरितिवररुचिः गृहीतमाननेअग्रजेइतिपाठेसुगमःपंथाः यद्वा यदूत्तमःगृहीता नांफलदानायशुभानांसंचितिःसंग्रहोयेनसतथा तस्मिन्सतिस्मयन्मंदस्मितंकुर्वन्कृष्णःमांसंप्रेक्ष्यतइतिकृष्णविषय गोवा २२ २३ अखिललोकपालानांकिरीटेषुसत्सुचूडामणिषुपादरेणवोयस्यस तथा तस्याक्षितिकौतुकानिभूमिमंगलकराणिपदानिपादतललांछनानिअब्जादिभिर्विलक्षितानिलांछितानि वि वाहहस्तसूत्रेचमंगलेकौतुकंविदुरितिच २४ संभ्रमःभक्त्युद्रेकनिमित्तव्यापारविशेषः

लब्धांगसंगंप्रणतंकृतांजलिंमांवक्ष्यतेऽक्रूरततेत्युरुश्रवाः ॥ तदावयंजन्मभृतोमहीयसा नैवादृतोयोधिगमुष्यजन्मतत् २० नतस्यकश्चिद्दयितःसुहृत्तमो नवाप्रियोद्वेष्योपेक्ष्यएवच ॥ तथापिभक्तान्भजतेयथायथावनस्पतिर्यद्वदुपाश्रितार्थदः २१ किंचाग्रजोमावनतंयदूत्तमोस्मयन्परिष्वज्यगृहीतसंचितौ ॥ गृहंप्रवेश्याप्तसमस्तसत्कृतंसंप्रेक्ष्यतेकंसकृतंस्वबंधुषु २२ इतिसंचिंतयन्कृष्णंश्वफल्कतन योऽध्वनि ॥ रथेनगोकुलंप्राप्तःसूर्यश्चास्तगिरिंनृप २३ पदानि तस्याखिललोकपालकिरीटचूडामणिपादरेणोः ॥ ददर्शगोष्ठेक्षितिकौतुकानिविलक्षितान्यब्जयवांकुशाद्यैः २४ तद्दर्शनाह्लादविवृद्धसंभ्रमःप्रेम्णोत्थरो माश्रुकलाकुलेक्षणः ॥ रथादवस्कंद्यसतेष्वचेष्टतप्रभोरिमान्यंघ्रिरजांस्यहोइति २५ द दर्शकृष्णंरामंचव्रजेगोदोहनंगतौ ॥ पीतनीलांबरधरौशारदांबुरुहे क्षणौ २६ किशोरौश्यामश्वेतौश्रीनिकेतौबृहद्भुजौ ॥ सुमुखौसुंदरवरौबालद्विरदविक्रमौ २७ ध्वजवज्रांकुशांभोजैश्चिह्नितैरंघ्रिभिर्व्रजम् ॥ शोभमानौ महात्मानौसानुक्रोशस्मितेक्षणौ २८ उदारुचिरक्रीडौस्रग्विणौवनमालिनौ ॥ पुण्य गंधानुलिप्तांगौस्नातौविरजवाससौ २९ प्रधानपुरुषावाद्यौजगद्धे तूजगत्पती॥अवतीर्णौजगत्यर्थेस्वांशेनबलकेशवौ ३० दिशोवितिमिराराजन्कुर्वाणौप्रभयास्वया ॥ यथामरकतःशैलोरौप्यश्चकनकाचितौ ३१ रथात्तूर्ण मवप्लुत्यसोऽक्रूरःस्नेहविह्वलः ॥ पपातचरणोपांतेदंडवद्रामकृष्णयोः ३२

उत्थानिरोमाणियस्यसतथा रोमांचितगात्रश्चायं अश्रुकलयाकुलेक्षणश्च आकुलेकलिलेईक्षणेयस्यसतथा अवस्कंद्यअवरुह्य २५ गोदोहनंस्थलमितिशेषः । गोदोहनक्रियांगतावितिवा २६ श्रियो लक्ष्म्याःकांतेर्वानिकेतौमंदिरायमाणौ २७ अनुक्रोशेनदययास्मितेनसहितमीक्षणंययोस्तौतथा २८ उदारामहतीख्यातावादक्षिणावारुचिराचक्रीडाययोस्तौ । उदारेमहतीख्यातेद क्षिणेदानशौंडकइतियादवः । स्नातौशुद्धौ २९ जगत्यर्थंभूमेरर्थे अर्थप्रदाने प्रधानपुरुषावित्यादावुच्यमानागुणाबलभद्रेहरेःसांन्निधानादुच्यंते नत्वौत्पत्तिकः तदुक्तं वैन्यपार्थबलेशादावाविष्टंपुरुषोत्तमं अपेक्ष्यतहुणाःसर्वेइत्यादौ ३० मरकतसदृशः कृष्णः रजतपर्वतसदृशोरामः कनकाचितावित्युभयोःसमं यदेतदादित्यस्यपरंकृष्णरूपमित्यत्रयथादित्यस्यकृष्णप्रभातिमिरापहा कृष्णमरकतश्यामप्रभा पिदिशोवितिमिराःकरोतीतियुक्तमित्यनेनकृष्णप्रभायाअंधकारनिरासकत्वंकथमितिमंदाशंकादूरतोनिरस्तेति ३१ अवप्लुत्यअवरुह्य ३२

आह्लादआनंदः ३३ रथांगचक्रतनाकितेनपाणिना ३४ ३५ मधुपर्कंहिमधुपर्कपूजां मधुपर्कं चसक्षौद्रंदधिमोक्तंमनीषिभिरितितांत्रिकाः आहरत्दत्तवान् ३६ सवाह्यपादावतिशयः ३७
मुखवासैःकर्पूरतांबूलादिभिः ॥ ३८ ॥ इतिश्री०म०द०वि०षट्त्रिंशोऽध्यायः ॥ ३६ ॥ गोचारणायेत्यारभ्यकिंवाग्रजइत्यंतेनग्रंथेनपथियान्मनोरथान्चकारदध्यौतान्लेभेइत्यन्वयः ॥ करण
कारणेकालेसाधनेनुव्रतादिषु स्पष्टाद्युच्चारणेभेदेध्यानपद्मासनादिष्वितियादवः १ ननु मुख्यमनोरथोमोक्षःसोऽनेननलब्धःसंसारानिवृतेरित्यत्राह किमलभ्यमिति तत्परामुख्यभागवतास्त
त्प्रसादमंतरेणान्यंनाकांक्षंतइतिभावः २ सायंतनाशनंरात्रिभोजनं सायंप्रातर्द्विजातीनांभोजनंश्रुतिचोदितमितियाज्ञवल्क्यः सुहृत्सुवसुदेवादिषु वृत्तिंवर्तनं आजीविलक्षणं वृत्तिर्ग्रथाजीवियो
श्चेतिच ३ माधवःमधुकुलोद्भवःयस्यकंसस्यसंदेशोयस्यसतथा यस्यकंसस्यार्थेदूतःयत्प्रयोजनमुद्दिश्येतिवा तस्यकंसस्ययदुषुवैरानुबंधं वैरेणसंततदोषभावंप्रकृतस्यवैरस्यानुवर्तनंवा अनुबं

भगवद्दर्शनाह्लादबाष्पपूर्णाकुलेक्षणः ॥ पुलकांकितऔत्कंठ्याद्याख्यातुंनाशकन्नृप ३३ भगवांस्तदभिप्रेत्यरथांगांकितपाणिना ॥ परिरेभेऽभ्युषाकृष्य
प्रीतःप्रणतवत्सलः ३४ संकर्षणश्चप्रणतमुपगुह्यमहामनाः ॥ गृहीत्वापाणिनापाणिमनयत्सानुजोगृहम् ३५ पृष्ट्वाथस्वागतंतस्मैनिवेद्यपरमासनम् ॥
प्रक्षाल्यविधिवत्पादौमधुपर्कार्हमाहरत् ३६ निवेद्यगांचातिथयेसंवाह्यश्रांतमादृतः ॥ अन्नंबहुगुणंमेध्यंश्रद्धयोपाहरद्विभुः ३७ तस्मैभुक्तवतेप्री
त्यारामःपरमधर्मवित् ॥ मुखवासैर्गंधमाल्यैःपरांप्रीतिंव्यधात्पुनः ३८ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेषट्त्रिंशोऽध्यायः ॥ ३६ ॥ श्रीशुकउवा
च ॥ सुखोपविष्टःपर्यंकेरामकृष्णानुमोदितः ॥ लेभेमनोरथान्सर्वान्पथियान्सचकारह १ किमलभ्यंभगवतिप्रसन्नेश्रीनिकेतने ॥ तथापितत्पराराजन्ने
ववांछंतिकिंचन २ सायंतनाशनंकृत्वाभगवान्देवकीसुतः ॥ सुहृत्सुवृत्तिंकंसस्यपप्रच्छान्यश्चिकीर्षितम् ३ पृष्टोभगवतासर्ववर्णयामासमाधवः ॥ वैरानु
बंधंयदुषुवसुदेववधोद्यमम् ४ यत्संदेशोयदर्थंवादूतःसंप्रेषितःस्वयम् ॥ यदुक्तंनारदेनास्यस्वजन्मानकदुंदुभेः ५ श्रुत्वाऽक्रूरवचःकृष्णोबलश्चपरवीरहा ॥
प्रहस्यनंदंपितरंराज्ञादिष्टंविजज्ञतुः ६ गोपान्समादिशत्सोपिगृह्यतांसर्वगोरसः ॥ उपायनानिगृह्णीध्वंयुज्यंतांशकटानिच ७ यास्यामःश्वोमधुपुरींदा
स्यामोनृपतेरसान् ॥ द्रक्ष्यामःसुमहत्पर्वयांतिजानपदाःकिल ८ एवमाघोषयत्क्षत्रानंदगोपःस्वगोकुले ॥ गोप्यस्तास्तदुपश्रुत्यबभूवुर्व्यथिताशयाः ९
रामकृष्णौपुरींनेतुमक्रूरंव्रजमागतम् ॥ काश्चित्तत्कृतहृत्तापश्वासम्लानमुखश्रियः १० संसदुकूलवलयकेशग्रंथ्यश्चकाश्चन ॥ अन्याश्चतदनुध्याननिवृत्ता
शेषवृत्तयः ११ नाभ्यजानन्निमंलोकमात्मलोकंगताइव ॥ स्मरंत्यश्चापराःशौरेरनुरागस्मितेरिताः १२

धोदोषभावेप्रकृत्यादौविनश्वरे मुख्यानुयायिनिशिशौप्रकृतस्यानुवर्तनइति ४ अस्यकंसस्य नारदेनयदुक्तंतदपिकिंतदुक्ततत्राह स्वजन्मेति ५ विजज्ञतुःविज्ञापयामासतुः ६ ७ रसानाज्यादीन् हेमा
निवा रसोरागेविषेवीर्येतिक्तादौपारदेद्रवे रेतस्यास्वादनेहेम्निनिर्यासेरसशब्दयोरितिच पर्वउत्सवम् । पक्षसंधावुत्सवेवग्रंथौपर्वाविदुर्बुधाइतिदत्तः ८ क्षत्रायंत्रा ९ रामकृष्णौपुरींनेतुंआगतंअक्रूरंश्रु
त्वाज्ञात्वागोपस्त्रियएवमापन्नाबभूवुरित्यन्वयः तत्कथमितिविविच्याह काश्चिदिति । तस्यकृष्णस्यमधुपुरीगमनश्रवणकृताभ्याहतापश्वासाभ्यांम्लानामुखश्रीर्यासांतास्तथा १० संसदुकूलेत्यादाव
पितत्कृतेसंबंधयितव्यं । यद्वा तत्कृतेतिकृष्णकृते । तदनुध्याननिवृत्ताशेषेंद्रियवृत्तयः ११ इमंलोकंदेहं आत्मलोकंमोक्षं । हृदिस्पृशःमनोहराःहृदयंगमाःअनुरागस्मितपूर्वकमीरिताः १२

चित्राणिपदानियासुतास्तथा गतियात्रांचेष्टांअंगविषयां स्निग्धहासेनसहितमवलोकनम् १३ १४ अच्युताशयाःअच्युतबुद्धयः १५ हेविधातःतव क्वचिद्दयानास्ति कथंप्रणयेनदेहिनःजंतून्मैत्र्यामित्रभावेनसंयोज्यएकीकृत्यपुनस्तान्देहिनःअकृतार्थान्अप्राप्तमनोरथानेवावियुनंक्षिवियुक्तदेहान्करोषिअहोइत्यन्वयः । अतस्तेतवचेष्टितंअपार्थकंनिष्फलं कथमिति अर्भकचेष्टितंयथातथेति १६ अत्रमयाकिमवद्यमकारीतितत्राह यस्त्वामिति । यस्त्वंसुकपोलादिविशिष्टंमुकुंदवक्त्रंप्रदर्श्यदर्शयित्वापुनःपारोक्ष्यंपरोक्षविषयंचक्षुरगोचरंकरोषि यस्मात्तेत्वयाकृतमसाध्वमंगलमित्यन्वयः शोकस्यापनोदोनिरासोयेनसःशोकापनोदः स्मितलेशःतथातेनसुंदरंमनोहरं स्मितस्यलेशःस्मितलेशः १७ हेविधातःत्वंअक्रूरसमाख्ययाअनृशंसोयमकठिनोयमितिगुणसमाननाम्नास्मृतःपूर्वं अधुनाक्रूरइतिस्मर्यसे कुतःयेनचक्षुषामधुद्विषएकदेशेमुखाद्येकावयवेतदीयंतस्यतवविद्यमानं अखिलस्याविश्वस्यसर्गेसृष्टौयत्सौंदर्यंतदद्राक्ष्मतत्त्वयाहि एवंदत्तंचक्षुरज्ञवत्कृतघ्नवद्धरसे बतकष्टमित्यन्वयः । क्रूरोभयंकरेकंधेनृशंसेकठिनोष्णयोरितिच यद्वा तस्यमधुद्विषोविद्यमानमखिलंपूर्णसर्गंस्वाभाविकमकृत्रिमंसौष्ठवमन्यत्समं १८ इदानींकृष्णंकटाक्षीकृत्यवदंति नेति स्वकृतेस्वात्मानंकृष्णमुद्दिश्यातुराःक्लिष्टाअपिनोस्मान्नसमीक्षतेनचिंतयति यत्तस्मान्नंदसूनुःक्षणभंगसौहृदःनवप्रियःनूतनप्रियश्च कीदृशीरस्मान् गेहादीन्विहायस्वदास्यमद्धाप्रत्यक्षमुपागताःअद्धासत्यंवा अद्धाप्रत्यक्षसत्ययोरितिच १९ सुखप्रभातत्वेनि

हृदिस्पृशश्चित्रपदागिरःसंमुमुहुःस्त्रियः ॥ गतिंसुललितांचेष्टांस्निग्धहासावलोकनम् १३ शोकपहानिनर्माणिप्रोद्दामचरितानिच ॥ चिंतयंत्योमुकुंदस्यभीताविरहकातराः १४ समेताःसंवशःप्रोचुरश्रुमुख्योऽच्युताशयाः १५ गोप्यऊचुः ॥ अहोविधातस्तवनक्वचिद्दयासंयोज्यमैत्र्याप्रणयेनदेहिनः ॥ तांश्चाकृतार्थान्वियुनंक्ष्यपार्थकंविचेष्टितंतेर्भकचेष्टितंयथा १६ यस्त्वंप्रदर्श्यासितकुंतलावृतंमुकुंदवक्त्रंसुकपोलमुन्नसम् ॥ शोकापनोदस्मितलेशसुंदरं करोषिपारोक्ष्यमसाधुतेकृतम् १७ क्रूरस्त्वमक्रूरसमाख्ययास्मृतश्चक्षुर्हिदत्तंहरसेबताज्ञवद् ॥ येनैकदेशेखिलसर्गसौष्ठवंतदीयमद्राक्ष्मवयंमधुद्विषः १८ ननंदसूनुःक्षणभंगसौहृदःसमीक्षतेनःस्वकृतातुराअपि ॥ विहायगेहान्स्वजनान्सुतान्पतीन्स्वदास्यमद्धोपगतानवप्रियः १९ सुखंप्रभातारजनीयमाशिषःसत्याबभूवुःपुरयोषितांध्रुवम् ॥ याःसंप्रविष्टस्यमुखंव्रजस्पतेःपास्यंत्यपांगोत्कलितस्मितासवम् २० तासांमुकुंदोमधुमंजुभाषितैर्गृहीतचित्तःपरवान्मनस्व्यपि ॥ कथंपुनर्नःप्रतियास्यतेबलाग्राम्याअलज्जाःस्मितविभ्रमद्रुवः २१ अद्यध्रुवंतन्नदृशांमहोत्सवोदाशार्हभोजांधकवृष्णिसात्वताम् ॥ महोत्सवंश्रीरमणंगुणास्पदंद्रक्ष्यंतियेचाध्वनिदेवकीसुतम् २२

मित्तमाहुःयाइति व्रजस्पतेः गोकुलनाथस्यसकारश्छांदसः अपांगेनकटाक्षनिरीक्षणेन उत्कलितमुत्पन्नंअभीष्टवर्षकीकृतंवास्मितमेवासवममृतंपरिमंस्तथा २० इदानींकृष्णमजानंत्योवदंति मनस्वीमहामनाःअपिमुकुंदोमथुरांगतः पुनःनोस्मान्प्रतिकथंप्रतियास्यतेआगमिष्यते नकेनापीत्यन्वयः अनागमनेनिमित्तमाहुः । तासांमधुरांगनानांमधुमंजुभाषितैःमधुवत्पुष्परसवत्मंजुभिःश्रुतिमनोहरैर्वचनैः । गृहीतचित्तोवशीकृतचेताः अतएवपरवान्पराधीनः । परवांस्तुपराधीनोनिघ्नःपरवशःस्मृतइतिहलायुधः तासांमधुरवचनमेवकारणंनत्वन्यदित्याशयेनाहुः अबलाःसुरतधार्ष्ट्यविधुराः । किंच ग्राम्याःअश्लीललीलाःतदपिमुख्यंनेत्याहुः । अलज्जाःलज्जारहिताः । भ्रूविलासोपिसुखसूचकोनेत्याहुः स्मितेनसहविभ्रमंतीभ्रूर्यासांतास्तथा समुद्रोमिवदुन्मथ्यकुविलासेनसुंदरी निद्रितंमदनंपातुबोधयेत्सावरांगनेतिकामंदकः । यद्वा हेअबलास्तामथुरांगनाःग्राम्याःनित्यसुरतकर्मोपेताः स्मितास्फुटीकृताविभ्रमंतीभ्रूर्यासांतास्तथा २१ तत्रमथुरायांदाशार्हादीनांदृशांमहोत्सवोभवितेतिशेषः महानुत्सवआनंदोयस्यसतथातं येदाशार्हादयःदेवकीसूतंद्रक्ष्यंतीतियत्तस्मात् येचाध्वनिद्रक्ष्यंतीतितेषांदृशांचेति २२

इदानीमक्रूरशंपंति मैवादिति एवंविधस्यातिदारुणेकर्मणिप्रवृत्तस्यैतद्विधस्यैतादृशस्यवा २१ कृष्णस्येश्वरत्वंसंवदंते । अनार्द्रधीरिति अनेनानिःसंगत्वंहरेर्दर्शितम् दुर्मदाःउत्तरकार्यांधाःस्थविरैःकुल वृद्धैः २४ नःकिमनिष्टमकरिष्यन् विभ्रंशितानामतएवदीनचेतसाम् २५ हेगोप्यःक्षणदानिद्राबसरदाःसुरतोत्सवप्रदावा राज्यांतमोदुःखम् २६ अह्नःक्षयेसंध्यासमये तंकृष्णमृतेविना कृष्णादरातिशयात् अंबेतिसखीसंबोधनम् भवेमतास्विातिशेषः २७ २८ कृतमैत्र्यादिकःकृतसूर्यमंडलाधिष्ठितनारायणोपासनादिक्रियः २९ ३० प्रत्यादेशंप्रतिवचनम् तिष्ठंतुनायांत्विातिगमनानिषेधपरंवचनंवा ३१

मैतद्विधस्याकरुणस्यनाममूदक्रूरइत्येतदतीवदारुणः ॥ योसावनाश्वास्यसुदुःखितंजनंप्रियात्प्रियंनेष्यतिपारमध्वनः २३ अनार्द्रधीरेषसमास्थितोरथंतम न्वमीचत्वरयंतिदुर्मदाः ॥ गोपाअनोभिःस्थविरैरुपेक्षितंदैवंचनोऽद्यप्रतिकूलमीहते २४ निवारयामःसमुपेत्यमाधवंकिंनोऽकरिष्यन्कुलवृद्धबांधवाः मुकुंदसंगान्निमिषार्धदुस्त्यजाद्दैवेनविभ्रंशितदीनचेतसाम् २५ यस्यानुरागललितस्मितवल्गुमंत्रलीलावलोकपरिरंभणरासगोष्ठ्याम् ॥ नीताःस्मनःक्षणमिवक्षणदाविनातंगोप्यःकथंन्वातितरेमतमोदुरंतम् २६ योह्नःक्षयेव्रजमनंतसखःपरीतोगोपैर्विराज्खुररजश्छुरितालकस्रक् ॥ वेणुंक्वणन्स्मितकटाक्ष निरीक्षणेनचित्तंक्षिणोतितमृतेंऽबकथंभवेम २७ एवंब्रुवाणाविरहातुराभृशंव्रजस्त्रियःकृष्णनिषक्तमानसाः ॥ विसृज्यलज्जांरुरुदुःस्मसुस्वरंगोविंददामोदरमाधवेति २८ स्त्रीणामेवंरुदंतीनामुदितेसवितर्यथ ॥ अक्रूरश्चोदयामासकृतमैत्र्यादिकोरथम् २९ गोपास्तमन्वसज्जंतनंदाद्याःशकटैस्ततः ॥ आदा योपायनंभूरिकुंभान्गोरससंभृतान् ३० गोप्यश्चदयितंकृष्णमनुव्रज्यानुरंजिताः ॥ प्रत्यादेशंभगवतःकांक्षंत्यश्चावतस्थिरे ३१ तास्तथातप्यतवीक्ष्यस्व प्रस्थानेयदूत्तमः ॥ सांत्वयामाससंप्रेष्यैरायास्यइतिदौत्यकैः ३२ यावदालक्ष्यतेकेतुर्यावद्रेणूरथस्यच ॥ अनुप्रस्थापितात्मानोलेख्यानीवोपतस्थिरे ३३ तानिराशानिवृत्तुर्गोविंदविनिवर्त्तने ॥ विशोकाअहनीनिन्युर्गायंत्यःप्रियचोष्टितम् ३४ भगवानपिसंप्राप्तोरामाक्रूरौतथानृप ॥ रथेनवायुवेगेन कालिंदीमघनाशिनीम् ३५ तत्रोपस्पृश्यपानीयंपीत्वामृष्टंमणिप्रभम् ॥ वृक्षखंडमुपव्रज्यसरामोरथमाविशत् ३६ अक्रूरस्तावुपामंत्र्यनिवेश्यचरथोप रि ॥ कालिंद्याह्रदमागम्यस्नानंविधिवदाचरत् ३७ निमज्ज्यतस्मिन्सलिलेजपन्ब्रह्मसनातनम् ॥ तावेवदद्दशेऽक्रूरोरामकृष्णौसमन्वितौ ३८ तौरथस्थौ कथमिहसुतावानकदुंदुभेः ॥ तर्हिस्वित्स्यंदनेनस्तइत्युन्मज्ज्यव्यचष्टसः ३९ तत्रापिचयथापूर्वमासीनौपुनरेवसः ॥ निमज्ज्यदर्शनंमेनेमृषाकिंसलिले तयोः ४० भूयस्तत्रापिसोऽद्राक्षीत्स्तूयमानमहीश्वरम् ॥ सिद्धैर्भुजंगपतिभिरसुरैर्नतकंधरैः ४१ सहस्राशिरसंदेवंसहस्रफणमौलिनम् ॥ नीलांबरंबिस श्वेतंशृंगैःश्वेतमिवस्थितम् ४२ तस्योत्संगेघनश्यामंपतिकौशेयवाससम् ॥ पुरुषंचतुर्भुजंशांतंपद्मपत्रारुणेक्षणम् ४३

समीचीनतयाप्रेषयितुंयोग्यैः दौत्यकैः दूतसंबंधिभिःवाक्यैः ३२ केतुर्ध्वजःलेख्यानिचित्राणि ३३ गोविंदविनिवर्तनेकृष्णदर्शने ३४ ३५ श्यामंमणिप्रभम् ३६ ३७ ब्रह्मअघमर्षणसूक्तम् ब्रह्म वेदस्तपस्तत्त्वमितिच ३८ स्यंदनेरथे नस्तःनाविद्यतेस्वित्किम् ३९ सलिलेतयोः रामकृष्णयोः दर्शनंमृषाकिमितिमेनइतिशेषः ४० असुरैरसुप्त रतैः वशीकृतेंद्रियैरित्यर्थः ४१ विसश्वेतंश्वेतपद्मना लतंतुवद्धवलम् शिखरैःसहश्वेतनामानंपर्वतम् ४२ उत्संगेभोगेवपुरंगंतत्संगहीनोजनार्दनइतिच ४३

सुभ्रूश्चउन्नसश्चसुभ्रून्नसःतम् ४४ तुंगांसश्चउरस्थलश्रीश्चितुंगांसोरस्थलश्रीः तुंगावंसौयस्यसतथा उरस्थलेश्रीर्यस्यसतथातम् वलिमच्चपल्लवंचाकशवच्चउदरंयस्यसतथातम् पल्लवंचप्रकोष्ठेवापिवि
स्तृताविविधवैजयंतीमाला सुंदररेखांकितानंतांडकोटिनिवेशनोदरामित्यर्थः ४५ कनिष्ठिकामूलंकरभःकांचीपदंकटितटंचश्रोणीचकररभवद्दुचिरंमांसलंउरुद्वयंचतानि तैरन्वितः ४६ ४७ ४८
४९ नवाभिःद्विजोत्तमैःकश्यपादिभिः ५० पृथङ्मार्गैःवैदिकतांत्रिकमार्गविषयैः ५१ ५२ भावेनतद्भक्तिस्वभावेन परिक्लिन्नेआनंदाश्रुजलस्नातेआत्मलोचनेयस्यसतथा ५३ सत्वंसत्वगुणम्
आत्मभावंवा ५४ इतिश्रीभागवतेमहापुराणेदशमस्कंधेविजयध्वक्रटीकायांसप्तत्रिंशोऽध्यायः ३७ अक्रूरस्तुतिव्यपदेशेनविद्वद्दर्धिकारयोग्यंभगवदुपासनाप्रकारंनिरूपयत्यस्मिन्नध्याये तत्राक्रूरोभ
गवंतंदृष्ट्वोत्तरंकिंचकारेतिपरीक्षितोमानसींशंकांशुकःपरिहरति एवमिति १ नन्वस्यानन्येवैशिष्ट्यस्यज्ञापनायव्यावर्तकलक्षणमाह अखिलेति कदाचित्कारणंकदाचिन्नेत्यन्यथाप्रतीतिंनिवारय
ति भूतमिति । यदेतान्निमित्तकारणत्वंतत्कदाचिन्नापगच्छतीत्यर्थः अखिलहेतुहेतुमितिपाठेउपादानकारणानामपिकारणमित्यर्थः । किंनामधेयोऽयमितितत्राह नारायणमिति । अरविरुद्धत्वान्नारायणु

चारुप्रसन्नवदनंचारुहासनिरीक्षणम् ॥ सुभ्रून्नसंचारुकर्णंसुकपोलारुणाधरम् ४४ प्रलंबपीवरभुजंतुंगांसोरस्थलश्रियम् ॥ कंबुकंठंनिम्ननाभिंवलिमत्प
ल्लवोदरम् ४५ बृहत्कटितटश्रोणीकरभोरुद्वयान्वितम् ॥ चारुजानुयुगंचारुजंघायुगुलसंयुतम् ४६ तुंगगुल्फारुणनखव्रातदीधितिभिर्वृतम् ॥ नवांगु
ल्यंगुष्ठदलैर्विलसत्पादपंकजम् ४७ महार्हमणिविभ्राजत्किरीटकटकांगदैः ॥ कटिसूत्रब्रह्मसूत्रहारनूपुरकुंडलैः ४८ भ्राजमानंपद्मकरंशंखचक्रगदाधरम् ॥
श्रीवत्सवक्षसंभ्राजत्कौस्तुभंवनमालिनम् ४९ सुनंदनंदप्रमुखैःपार्षदैःसनकादिभिः ॥ सुरेशैर्ब्रह्मरुद्राद्यैर्नवभिश्चद्विजोत्तमैः ५० प्रह्लादनारदवसुमुखैर्भाग
वतोत्तमैः ॥ स्तूयमानंपृथङ्मार्गैर्वचोभिरमलात्मभिः ५१ श्रियापुष्ट्यागिराकांत्याकीर्त्यातुष्ट्येलयाऽजया ॥ विद्ययाऽविद्ययाशक्त्यामायया चनिषे
वितम् ५२ विलोक्यसुभृशंप्रीतोभक्त्यापरमयायुतः ॥ हृष्यत्तनूरुहोभावपरिक्लिन्नात्मलोचनः ५३ गिरागद्गदयास्तौषीत्सत्वमालंब्यसात्वतः ॥ प्रण
म्यमूर्ध्नाऽवहितःकृतांजलिपुटःशनैः ॥५४॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेसप्तत्रिंशोऽध्यायः ॥३७॥ श्रीशुकउवाच ॥ एवंद्भ्रातमक्रूरःप्रसन्नहृदयेंद्रियः ॥ तुष्टावपुंडरीकाक्षंभक्त्यावनतकंधरः १ अक्रूरउवाच ॥ नतोस्म्यहंत्वाखिलहेतुभूतंनारायणंपुरुषमादिमव्ययम् ॥ यन्नाभिजातादरविंदकोशाद्ब्र
ह्माविरासीद्यतएषलोकः २

णास्तेषामयनम् ननुतर्हीकिमयंशब्दगुणाश्रयत्वेनाकाशइतिचेत्तत्राह ॥ पूरुषामिति पूर्णषड्गुणम् आकाशस्यैकगुणत्वान्महान्विशेषः । नन्वाकाशोवैनामरूपयोर्निर्वाहितेतिश्रुतेरविनाशित्वेनाखिल
हेतुत्वंनरसमुदायोनारमितिनरसमुदायादिसर्वपदार्थस्यावकाशप्रदत्वेनाश्रयत्वेननारायणशब्दवाच्यत्वमाकाशस्यैकनस्यादित्यतोवाह पूरुषामिति । पूरुषस्यापिपितृपितामहादिवद्घटमृदादिवद्वाबी
जपरंपरास्यादितितत्राह आदिमिति । वैशेषिकपक्षेयथापरमाणोकारणत्वंपर्याप्तंएवमत्रापित्यर्थःएवंविधस्यापिसगर्भकर्कटवद्विनाशित्वंस्यादितिकनेत्याह अव्ययमिति । नकेवलंस्रष्टृत्वेनास्यकार
णत्वंपर्याप्तमपितुसंहर्तृत्वेनापीतिभावेनाह आदिमिति अदभक्षणइतिधातोः अत्तृत्वादादिमित्यर्थः । संहर्तृत्वमप्यस्मिन्पर्याप्तमितिप्रकटनायेणप्रत्ययप्रयोगः जीवोजीवस्यजीवनमितिन्यायेन अ
त्तुरस्याप्यन्योऽत्तास्यादित्यतोवाह अव्ययमिति सर्वकारणेविरिंचेजाग्रतिपर्याप्तकारणत्वमस्यकथमितितत्राह यन्नाभीति । विरिंचस्यकारणत्वंतर्हीकथमितितत्राह यतइति यतोविरिंचाल्लोको
देवलोकोभूदितिशेषः २

आदित्वंस्पष्टयति भूरिति आत्मनआकाशःसंभूतइतिश्रुतेः आदेर्भूतादेरहंकारः अजाचआदिश्चअजादिः प्रकृत्याख्यकारणमित्यर्थः नकेवलमस्यसमस्ताचेतनहेतुत्वंकिंतुचेतनराशेरित्याशयेन वाह अजादिरिति । ब्रह्मादिचेतनसंघअजादिः येसर्वेअजादयोजगतोहेतवोयथायोग्यंकारणानि तेसर्वेतवांगभूताअंगेभ्योजाताः पद्भ्यांभूमिरितिश्रुतेः ३ त्वदंगजाताजाद्यविज्ञातमाहात्म्यंमर्त्येनम यानज्ञायतइतिकिंवक्तव्यमित्याशयेनाह नेति अवेदनेनिमित्तमाह अन्येति अन्यात्मतयागृहीताः एतेजीवात्मानोमतोन्येइतिभगवतागृहीताः ईश्वरोभ्रांतत्वात्तथागृह्णातीतिचेन्न अहंपरोहि मद्भिन्नाजीवात्मानोल्पशक्तयइत्यादेः । नहीश्वरस्यसर्वज्ञस्यभ्रांतिरुपपद्यते नाहिद्रष्टुर्दृष्टेर्विपरिलोपोविद्यतेइतिश्रुतेः । येतवांगेभ्योजातास्तएतेअजादयःआत्मनस्तवस्वरूपंनविदुरित्यन्वयः । अजो ब्रह्माआदिर्येषांरुद्रादीनांतेअजादयइतितद्गुणसंविज्ञानेबहुव्रीहौब्रह्मणोप्यज्ञानमापद्यते वेदाहमेतंपुरुषमितिश्रुत्यातद्विज्ञानप्रतीतेरतोब्रह्मकारणकारुद्रादयोनविदुरित्यर्थः । किंनस्यादित्यतआह अजइति । अजायागुणैर्बद्धइतिहेतुगर्भंविशेषणं गुणात्परंदूरीभूतं अजादयइत्यत्रअजाशब्देनचित्प्रकृतिरपिग्राह्यातस्याअपिसर्वात्मनातद्विषयज्ञानाभावात् तदुक्तं यथाहरिःस्वमात्मानंवेदतद्वद्र मापिचेत्यादि । अनेनवेदाहमित्यस्यापिगतिरुक्ताभवति । अतईश्वरस्यदुर्ज्ञेयत्वात्साधनानुष्ठानवैयर्थ्यमित्याशंकापरास्ता तत्प्रसादेनयथायोग्यज्ञानसंभवाद्यथाशक्तिस्वहितमनुष्ठेयम् ४ अत्रकिं प्रमाणमित्यतोवृद्धाचारएवप्रमाणमित्याह त्वामिति । अधिष्ठानविशेषमाह साध्यात्ममिति । आत्मशब्दोक्तनरैःसहततोधिकत्वेनवर्तमानं भूतैराकाशादिभिःसहतदुत्तमत्वेनवर्तमानंदेवैर्ब्रह्मादिभिः

भूस्तोयमग्निःपवनःखमादिर्महानजादिर्मनइंद्रियाणि ॥ सर्वेंद्रियार्थाविबुधाश्चसर्वेयेहेतवस्तेजगतोंगभूताः ३ नैतेस्वरूपंविदुरात्मनस्तेअजादयोऽन्या त्मतयागृहीताः ॥ अजोनुबद्धःसगुणैरजायागुणात्परंवेदनतेस्वरूपम् ४ त्वांयोगिनोयजंत्यद्धामहापुरुष मीश्वरम् ॥ साध्यात्मंसाधिभूतंचसाधिदैवंचसाधवः ५ त्रय्याचविद्ययाकेचित्त्वांवैतानिकाद्विजाः ॥ यजंतेवितताँर्यज्ञैर्नानारूपामराख्यया ६ एकेत्वखिलकर्माणिसंन्यस्योपशमंगताः ॥ ज्ञानिनोज्ञानयज्ञेन यजंतिज्ञानविग्रहम् ७ अन्येतुसंस्कृतात्मानोविधिनाविहितेनवै ॥ यजंतित्वन्मयास्त्वांवैबहुमूर्त्येकमूर्तिकम् ८

सहततोविशिष्टगुणत्वेनातिष्ठंतं तत्तदुपासनार्थंतत्तदधिष्ठानेषुतत्तद्गुणमवर्तकत्वेनतत्तदुत्तमत्वे नवर्त्तमानमित्यर्थः । तदुक्तं स्थितोब्रह्मादिदेवेषुस्वादिभूतेषुचेश्वरइत्यादि ५ योगिनोयजंत्यद्धेतिविशेषणा त्केचिदन्यथायजंतीतिध्वनितमर्थमाह त्रय्येति त्रय्याविद्ययावेदविद्ययाकर्मप्रधानप्रकाशिकया वैतानिकायाज्ञिकाः यज्ञकर्मशीलाइत्यर्थः । अग्नीवितानमुल्लोचेविस्ताराध्वरयोःक्षणे त्रिषुशून्येचमंदे चविषाण्युक्षेषुशृंगिष्विति उक्तविशेषणैरयमर्थोविज्ञायतइत्याह विततैरितिविस्तृतैः इंद्रंयजाग्नियजेत्यादिबहुदैवत्यकर्मणामेकविषयत्वंकथंसंगच्छतइत्यत्राह नानारूपेति नानाविधानिशुक्लादिरूपाणि सौंदर्याणिवा स्वभावावायशांसिवायेषांतेनानारूपाः तेचामराःदेवाःनानारूपाअमराःतेषामारूप्यविशिष्टंविष्णुमितिशेषः सर्वदेवेष्वपिहरिःसर्वदेवनियामकइत्यादिवचनबाहुल्यादुपगंतव्यं विष्णोःसर्व नामत्वंअमरेतिविशेषणेनवेदस्यवाच्याभावेनाप्रामाण्यंस्यादितिशंकानिरस्ता इदंचविष्णोरेवमुख्यमिति ६ प्रवृत्तिमार्गेविहितोपासनाप्रकारमुक्त्वाऽधुनानिवृत्तिमार्गेविषयोपास्तिविधानमाह एक इति तुशब्देनएषांमुख्यत्वंदर्शयति उपशमंभगवन्निष्ठाम् ७ वैदिकमतमुक्त्वातांत्रिकमतमाह अन्येत्विति अन्येपांचरात्रिकाः तुशब्देनतत्रापिबाहुविध्यमस्तीतिसूचयति संस्कृतात्मानःशिक्षित बुद्धयः संप्रदायागतप्रज्ञावाशुद्धदेहावाविहितेनविधिना पंचधाकथितेनकालेनवा पंचकालपरायणैरितिवचनात् विधीतुदैवकालौचेतिचत्वमेवमयःसर्वोतमइतिबुद्धेर्येषांवेतथा बहुमूर्त्यावैबहुरूपेणच भक्तानुग्रहार्थंबहुत्वग्रहणम् । निजमेकमेवेत्याह एकमूर्तिकामिति । व्यष्टयासमष्ट्याचत्वामेवयजंतीत्यर्थः ८

ननुशैवागमेषुशिवस्यपष्टव्यत्वेनोक्तत्वात्सर्वैत्वामवयजंतीतिकथंयुज्यतइतितत्राह त्वामेवेति । शिवरूपिणंपुरुषार्थमूर्तिं शिवेरुद्रेरूपंनियामकमस्यास्तीतिशिवांतर्यामिणमित्यर्थः । दधीच्यादिब्रह्मा चार्यविभेदेनशैवपाशुपाद्युपदेष्टृभेदेनवा ९ उपसंहराति सर्वएवेति । सर्वेषांदेवानामीश्वराःइंद्रादयः तेषामपीश्वरःसर्वदेवमहेश्वरः सर्वइति कइतितत्राह यइति येइंद्रादिनानादेवतानांभक्ताः । अतएवतद्भक्तिपूर्त्यर्थमन्याधियःस्वातंत्र्यबुद्धयोयद्यपितथापितवसर्वस्वामित्वंजानंतोदेवास्तद्दत्तबलिंत्वयिसमर्प्यतत्फलार्थंस्वयंस्वीकुर्वंत्यन्यथापश्यतोहरत्वंतेषांस्यादतस्तन्नकुर्वंति किंतु तत्फलमं तवदेवतथाश्रुतत्वादितिभावः यद्वा विष्णोरन्याविलक्षणाधीर्येषांतेतथा यद्यपितथापिपूर्वादृष्टवशान्नानादेवताभक्ताःयेतेत्वत्सर्वोत्तमत्वज्ञानाभावात्तेषामित्यतःप्रभावित्युक्तम् १० एतदेवविशदयति यथेः ति अद्रिभ्यःप्रभवःउत्पत्तिर्यासांताःअद्रिप्रभवाः पर्जन्येनगर्जन्मेघेनआपूरिताः सिंधुंसमुद्रंत्वां गतय पूजामार्गाःपुरुषार्थसाधनानिशास्त्राणिवा यैंततःपूजावसानेब्रह्मार्पणबुद्ध्यावसिताइत्यर्थः ११ ननुपूजादिकंसर्वंभगवद्विषयंचेन्मतभेदःकथमुत्पद्यतइत्याशंक्यसत्त्वादिगुणोपरक्तत्वात्तदाकृष्टबुद्धित्वेनतद्भेदइत्याशयेनाह सत्त्वमिति प्राकृताःप्रकृतिनिमित्तास्तेषुसत्त्वादिषुप्रोताःसम्यक् स्यूताःसंवलिताइत्यर्थः कार्यतेह्यवशइत्यादिहिशब्देनगृहीतम् १२ ननु प्राकृतपदार्थेष्ववस्थितस्यहरेस्ततोविशिष्टत्वमहिमासंभवात्किंविशेषेणप्रणतिःप्रार्थ्यतइतितत्राह तुभ्यमिति तुभ्यंनमोस्तु

त्वामेवान्योशिवोक्तेनमार्गेणशिवरूपिणम् ॥ बह्वाचार्यविभेदेनभगवन्समुपासते ९ सर्वएवयजंतित्वांसर्वदेवमहेश्वरम् ॥ येनानादेवताभक्तायद्यप्यन्य धियःप्रभौ १० यथाद्रिप्रभवानद्यःपर्जन्यापूरिताविभौ ॥ विशंतिसर्वतःसिंधुंतद्वत्त्वांगतयोऽततः ११ सत्त्वंरजस्तमइतिभवंतिप्रकृतेर्गुणाः ॥ तेषुहिप्रा कृताःप्रोताआब्रह्मस्थावरादयः १२ तुभ्यंनमस्तेस्त्वविषक्तदृष्टयेसर्वात्मनेसर्वधियांचसाक्षिणे ॥ गुणप्रवाहोऽयमविद्ययासकृत्प्रवर्ततेदेवनृतिर्यगात्मसु १३ अग्निर्मुखंतेऽवनिरंघ्रिरीक्षणंसूर्योनभोनाभिरथोदिशःश्रुतिः ॥ द्यौःकंसुरेंद्रास्तवबाहवोऽर्णवःकुक्षिर्मरुत्प्राणबलंप्रकल्पितम् १४ रोमाणिवृक्षौषधयः शिरोरुहामेघाःपरस्यास्थिनखानितेऽद्रयः ॥ निमेषणंरात्र्यहनीप्रजापतिर्मेढ्रंतुवृष्टिस्तववीर्यमिष्यते १५ त्वय्यव्ययात्मन्पुरुषेप्रकल्पितालोकाःसपालाबहुजीवसंकुलाः ॥ यथाजलेसंजिहतेजलौकसोप्युदुंबरेवामशकामनोमये १६

यःसात्विकादिनानाजनंकृतपूजाविषयत्वेनोक्तस्तस्मैतेभ्योपिनमोस्त्वित्यन्वादिश्यते प्रतिविशेषणमनुसंधेयमितिद्योतनायवा अविषक्तदृष्टयेअप्रतिहतज्ञानाय एकैकस्यैकैकप्रतिहतेर्दृष्टत्वाद स्यकथमप्रतिहतज्ञानत्वमित्याशंक्य सर्वस्वामित्वेनस्वातंत्र्यप्रतीतिर्ज्ञानप्रतिबंधकाभावोयुक्तइतिभावेनाह सर्वात्मनइति सर्वेषांतत्तच्छक्तिमाकृष्यवशीकृत्यतिष्ठतइत्यर्थः तदेवविशिनष्टि सर्वेति सहिसर्वमनोवृत्तिप्रेरकःसमुदाहृतइत्यादेः यद्वा अनेनासंगत्वंस्पष्टयतइति अस्यसर्वस्वातंत्र्यमस्तीतिकथमवगंतुंशक्यमित्याशंक्य संसारस्यहरीच्छाधीनत्वज्ञानादित्याह गुणप्रवाहइति अस्यहरे र्विद्ययेच्छया अनिषेधेपुमान्विष्णावविचित्रेस्मरेपुमानितिच देवत्वोपाधिविशिष्टआत्मनीतिप्रत्येकमन्वेतव्यम् १३ नानादेवताभक्तैः क्रियमाणंयजनादिकंत्वद्विषयंकथंस्यादित्याशंक्यतेषांत्वदं शोद्भूतत्वेनत्वत्संबंधित्वादितिभावेनतेषांत्वदंगजन्यत्वमाह अग्निर्मुखमिति मुखाज्जातोग्निस्तवमुखमित्युच्यते मुखादिद्रश्चाग्निश्चमाणाद्वायुरजायतेत्यादावितीदंत्वयैवचप्रकल्पितमहंपश्यामीत्येवंयो जनीयं विष्णोरंगसमुद्भूताविष्णोरंगानिदेवताइत्यादेः ईक्षणंनेत्रं कंशिरः पुंसिकःकंशिरोंबुनोरित्यमरः सुरेंद्राःलोकपालाःअर्णवंवदंतीतिशेषः १४ निमेषणंनिमेषोन्मेषौ निमिषोमुकुलीभावोरात्रिरुत्फु ल्लताअहरुन्मेषः प्रजापतिर्दक्षः वीर्यंरेतः १५ संजिहतेसंजायंते जलमेवाश्रित्यतिष्ठंतीतिजलौकसः मत्स्यादयःउदुंबरेजंतुफलेमशकाःपिपीलिकाविशेषाः मनोमयेज्ञानस्वरूपे १६

पुरुषसूक्तोक्तभगवन्मूर्तेर्विशेषंस्तुत्वामत्स्याद्यवतारान्स्तोतुमुपक्रमते यानीति आमृष्टशुचः मार्जितशोकाः परिहृतदुःखाः पूर्वं विद्यमानान्येवरूपाणिबिभर्षिनाविद्यमानानीति इदमर्थद्दिशब्दोवक्ति भृतामेवबिभर्तीशोह्यवतारतनुंसदेत्यादेश्च १७ कारणमत्स्यायमन्वादिरक्षणंनिमित्तीकृत्यमत्स्यवेषधारिणइत्यर्थः असुरमदंस्यतिनाशयतीतिमत्स्यः षोंतकर्मणीतिधातुः मत्स्यानामुदकमेवप रंजीवनमितिसूचनायप्रलयाब्धिचरायेति प्रलयाब्धिचरणमन्यस्यनशक्यमितिईश्वरत्वद्योतनायवा यशब्दोवक्ष्यमाणसमुच्चयेवर्तते मधुकैटभमृत्यवेकेशवाय १८ अकूपारायकूर्मरूपायकूर्मेचा व्यावकूपारइते बृहतेनित्यवृद्धाय किंकृत्यमित्यतउक्तं मंदरेति १९ साधुलोकभयापह देवजनस्यबलयादेःप्राप्तभयमपहंतीति क्रांतत्रिभुवनायत्रिविक्रमाय २० २१ संकर्षणादि पुहरेःसंनिधानविशेषात्तेषामवतारांतर्भावंकृत्वानमनंक्रियते नतुसाक्षादधोक्षजावतारत्वेन तदुक्तं प्रद्युम्नेचानिरुद्धेचबलदेवेचकेशवइत्यादौ २२ बुद्धावतारप्रयोजनंदैत्यमोहनमेवनान्यदिति द्योतयति दैत्येत्यादिना २३ २४ आत्मादेहः आत्मजःपुत्रःअर्थोहिरण्यादिः स्वजनोबंधुजनादिः भ्रमामिभ्रांतिकरोमि २५ अनित्यानात्मदुःखेषुविपर्ययमतिः ॥ अनित्येषुनित्यबुद्धिः

यानियानीहरूपाणिक्रीडनार्थंबिभर्षिहि ॥ तैरामृष्टशुचोलोकामुदागायंतितेयशः १७ नमःकारणमत्स्यायप्रलयाब्धिचरायच ॥ हयशीर्ष्णेनमस्तुभ्यं मधुकैटभमृत्यवे १८ अकूपारायबृहतेनमोमंदरधारिणे ॥ क्षित्युद्धारविहारायनमःशूकरमूर्तये १९ नमस्तेद्भुतसिंहा यसाधुलोकभयापह ॥ वामना यनमस्तुभ्यंक्रांतत्रिभुवनायच २० नमोभृगूणांपतयेदप्तक्षत्रवनच्छिदे ॥ नमस्तेरघुवर्यायरावणांतकरायच २१ नमस्तेवासुदेवायनमःसंकर्षणा यच ॥ प्रद्युम्नायानिरुद्धायसात्वतांपतयेनमः २२ नमोबुद्धायशुद्धायदैत्यदानवमोहिने ॥ म्लेच्छप्रायक्षत्रहंत्रेनमस्तेकल्किरूपिणे २३ भगवन्जीव लोकोयंमोहितस्तवमायया ॥ अहंममेत्यसद्ग्राहोभ्राम्यतेकर्मवर्त्मसु २४ अहंचात्मात्मजागारदारार्थस्वजनादिषु ॥ भ्रमामिस्वप्नकल्पेषुमूढःसुखधिया विभो २५ अनित्यानात्मदुःखेषुविपर्ययमतिर्ह्यहम् ॥ द्वंद्वारामस्तमोविष्टोनजानेत्वांजगत्पते २६ यथाऽबुधोजलंहित्वाप्रतिच्छन्नंतदुद्भवैः ॥ अभ्येतिमृ गतृष्णांवैहित्वाहंत्वापराङ्मुखः २७ नोत्सहेऽहंकृपणधीःकामकर्महतंमनः ॥ रोद्धुंप्रमाथिभिःस्वाक्षैर्ह्रियमाणमितस्ततः २८ सोऽहंतवांघ्र्युपगतोस्म्य सतांदुरापंयच्चाप्यहंभवदनुग्रहमीशमन्ये ॥ पुंसोभवेद्यर्हिसंसरणापवर्गस्त्वय्यब्जनाभसदुपासनयामतिःस्याद् २९ नमोविज्ञानमात्रायसर्वप्रत्ययहेत वे ॥ पुरुषेशप्रधानायब्रह्मणेऽनंतशक्तये ३०

अनात्मन्यात्मबुद्धिः २६ तदुद्भवैःजलोद्भवैःशैवलादिभिः अबुधः मृगतृष्णां मृग्यंतइतिमृगाविषयास्तेतृष्णांच २७ मनोरोद्धुंनोत्सहे २८ तथापिप्रपतइत्याशयेनाह सोहमिति यःमनः समाधानकरणाशक्तःसोहंयच्चतवांघ्र्युपगमनंच अपिशब्दश्चार्थेस्वपदभाक्त्वेनिमित्तंध्वनयति पुंसइति यर्हियद्यसंसरणात्संसारादपवर्गोमोक्षोभवेत् कस्यपुंसस्तदाह हेअब्जनाभसतांपुरुषाणां उपासनयासेवयाहेतुनात्वयिमतिःमननबुद्धिःअवतरतीत्यर्थः २९ मननावषयरूपमाह नमइति ज्ञानस्वरूपंनान्यत् मात्रंकात्स्न्र्येवधारणइतियादवः यद्वा विज्ञानंमात्रामानंप्रमाणंयस्मिन्सतथातस्मै मात्रापरिच्छददेशेप्रवृत्तौकर्णभूषणे अक्षरावयवेमानइतिच नैषातर्केणप्रतिरापनेयेतिचश्रुतिः सर्वेषांज्ञानानांहेतवेकारणाय विरिंचिशंकरयोःमृत्ययहेतुत्वंऔपचारिकमितिभावेनाह पुरुषेति पु रुषेश्वरयोर्विरिंचिशंकरयोरप्युत्तमोत्तमाय एवंविधस्याकिंनामधेयमित्यतउक्तं ब्रह्मणइति सत्यंज्ञानमनंतंब्रह्मेतिश्रुतेः विरिंच्याद्युत्तमत्वेकोहेतुरित्यतउक्तं अनंतेति ३०

वासुदेवमूर्तेर्मोक्षहेतुत्वमितिकृत्वातंनमाते नमइति सर्वभूतक्षयायसर्वभूतनिवासाय शुद्धस्फाटिकसंकाशंवासुदेवंनिरंजनमित्यादेःहृषीकेशइंद्रियेश प्रभोसमर्थ ॥ ३१ ॥ इतिश्रीभागवतेमहा पुराणेदशमस्कंधेविजयध्वजकृतटीकायामष्टत्रिंशोऽध्यायः ॥ ३८ ॥ तस्मिन्निजजन्मनियोग्यतायाअभिभवेनास्ति किंतुसर्वत्राद्भुतत्वमेवयत्तदेतेषुद्वित्राध्यायेषुव्यनक्ति तत्रादावक्रूरदृष्टभगवद्रूप स्यांतर्धानकारणंकृष्णाक्रूरयोःप्रश्नोत्तराभ्यांहरेःसर्वैरचिंत्याद्भुतमाहात्म्यंचवक्ति स्तुवतइति आत्मनोवपुःनटत्वेनदर्शितं नाट्यंनटनविषयंहनुमदादिरूपंयथातिरोधत्तेतथा १ आवश्यकंनित्यकर्म २ दयालुःश्रीकृष्णःआत्मनोमाहात्म्यंतेनवादयितुंअज्ञातवत्पृच्छति तमिति अद्भुतमदर्शं लक्षणैस्त्वांलक्षयामहे व्यावृत्तंपश्यामः ३ अक्रूरःपरिहरति अद्भुतानीति इहभूम्यादौयावंत्यद्भुता निसंति विश्वात्मकेविश्वरूपेत्वयितानिविपश्यतोमे किमदृष्टंसर्वंदृष्टमेव तानिविश्वात्मकेत्वयिसंति तस्मात्त्वांविपश्यतोमेकिमदृष्टमितिवा ४ किंत्वयाद्भुतंदृष्टमितिप्रश्नस्यसर्वंदृष्टमेवेतिपरिहारः

नमस्तेवासुदेवायसर्वभूतक्षयायच ॥ हृषीकेशनमस्तेऽस्तुप्रपन्नंपाहिमांप्रभो ॥ ३१ ॥ इतिश्रीभागवेतमहापुराणेदशमस्कंधेअष्टत्रिंशोऽध्यायः ॥ ३८ श्रीशुकउवाच ॥ स्तुवतस्तस्यभगवान्दर्शयित्वा जलेवपुः ॥ भूयःसमाहरत्कृष्णोनटोनाट्यमिवात्मनः १ सोपिचांतर्हितंवीक्ष्यजलादुन्मज्ज्यस त्वरः ॥ कृत्वाचावश्यकंसर्वंविस्मितोरथमाविशत् २ तमपृच्छद्धृषीकेशःकिंतेदृष्टमिहाद्भुतम् ॥ भूमौवियतितोयेवातथात्वांलक्षयामहे ३ ॥ अक्रूरउवाच ॥ अद्भुतानीहयावंतिभूमौवियतिवाजले ॥ त्वयिविश्वात्मकेतानिकिंमेऽदृष्टंविपश्यतः ४ यत्राद्भुतानिसर्वाणिभूमौवियतिवाजले ॥ तंत्वानुपश्यतोब्रह्म न्किंमेऽदृष्टमिहाद्भुतम् ॥ ५ ॥ श्रीशुकउवाच ॥ इत्युक्त्वाचोदयामासस्यंदनंगांदिनीसुतः ॥ मथुरामनयद्रामंकृष्णंचैवदिनात्यये ६ मार्गेग्रामजनाराजं स्तत्रतत्रोपसंगताः ॥ वसुदेवसुतौवीक्ष्यप्रीताहृष्टिंनचाददुः ७ तावद्व्रजौकसस्तातनंदगोपादयोग्रतः ॥ पुरोपवनमासाद्यप्रतीक्षंतोऽवतस्थिरे ८ तान्समेत्याह भगवानक्रूरंजगदीश्वरः ॥ गृहीत्वापाणिनापाणिंप्रश्रितंप्रहसन्निव ९ भवान्प्रविशतामग्रेसहयानःपुरींव्रज ॥ वयंत्विहावमुच्याथतावद्रक्ष्यामहेपुरीम् १० अक्रूरउवाच ॥ नाहंभवद्भ्यांरहितःप्रवेक्ष्येमथुरांप्रभो ॥ त्यक्तुंनार्हसिमांनाथभक्तंतेभक्तवत्सल ११ आगच्छयामगेहान्नःसनाथान्कुर्वधोक्षज ॥ साग्रजः सहगोपालैःसुहृद्भिश्चसुहृत्तमः १२ पुनीहिपादरजसागृहान्नोगृहमेधिनाम् ॥ यच्छौचेनातितृप्यंतिपितरःसाग्नयःसुराः १३ अवनिज्यांघ्रियुगलमासीद्बलिर्मखे ॥ ऐश्वर्यमतुलंलेभेगतिंचैकांतिनांतुया १४ आपस्तेऽङ्घ्रयवनेजन्यस्त्रींल्लोकाञ्छुचयोऽपुनन् ॥ शिरसाधत्तयाःशर्वःस्वर्यातासगरात्म जाः १५ देवदेवजगन्नाथपुण्यश्रवणकीर्तन ॥ यदूत्तमोत्तमश्लोकनारायणनमोस्तुते १६ श्रीभगवानुवाच ॥ आयास्येभवतोगेहमहमार्यसमन्वितः ॥ यदुवर्गद्रुहंहत्वावितरिष्येसुहृत्प्रियम् १७ श्रीशुकउवाच ॥ एवमुक्तोभगवतासोऽक्रूरोविमनाइव ॥ पुरींप्रविश्यकंसायकर्मावेद्यगृहंययौ १८

कथमागतइत्यतउक्तमेवस्फारयति यत्रेति यत्रभूम्यादौसंतिसर्वाणिअद्भुतानियत्रयस्मिन्त्वयिसंतितंत्वानुपश्यतोमेकिमद्भुतमदृष्टंसर्वमद्भुतंदृष्टमित्यर्थःब्रह्मन्पूर्ण ५ दिनात्ययेअपराह्णे ६ तयोर्वसुदेवसुत यो: लग्नाःप्रीताःप्रसन्नाःदृष्टिंनाददुःप्रत्यादानंनचक्रुः ७ प्रतीक्षंतःपश्यंतः ८ ९ भवानग्रेप्रविशतां पश्चात्त्वंगृहंव्रज अवमुच्यस्कंधावरोहंकृत्वा १० ११ १२ १३ अवनिज्यप्रक्षाल्य एकांतिनांभक्तमुख्या नांयागतिःप्राप्ताम् १४ अपुनन्शुद्धांचक्रुः १५ १६ यदुवर्गद्रुहंकंसम् १७ त्वयोक्तंकर्ममयाकृतमिति १८

ततोपराह्णेभगवान्कृष्णःसंकर्षणान्वितः ॥ मथुरांप्राविशद्गोपैर्दिदृक्षुःपरिवारितः १९ ददर्शतांस्फाटिकतुंगगोपुरांबृहत्स्फुरद्धेमकपाटतोरणाम् ॥ ता
म्रारकोष्ठापरिखादुरासदामुद्यानरम्योपवनालिशोभिताम् २० सौवर्णशृंगाटकहर्म्यनिष्कुटश्रेणीसभाभिर्भवनैरुपस्कृताम् ॥ वैदूर्यवज्रामलनीलवि
द्रुमैर्मुक्ताहरिद्भिर्वलभीषुवेदिषु २१ जुष्टेषुजालामुखरंध्रकुट्टिमेष्वाविष्टपारावतबर्हिनादिताम् ॥ संसिक्तरथ्यापणमार्गचत्वरांप्रकीर्णमाल्यांकुरलाजतंडु
लाम् २२ अपूर्णकुंभैर्दधिचंदनोक्षितैःप्रसूनदीपावलिभिःसपल्लवैः ॥ सद्वृतरंभाक्रमुकैःसकेतुभिःस्वलंकृतद्वारगृहांसपट्टिकाम् २३ तांसंप्रविष्टौवसुदेवनंदनौद्व
तौवयस्यैर्नरदेववर्त्मना ॥ द्रष्टुंसमीयुस्त्वरिताःपुरस्त्रियोहर्म्याणिचैवारुरुहुर्नृपोत्सुकाः २४ काश्चिद्विपर्यकृतवस्त्रभूषणाविस्मृत्यचैकंयुगुलेष्वथापराः ॥ कृतै
कवस्त्रश्रवणैकनूपुरानांक्त्वाद्वितीयंत्वपराःस्वलोचनम् २५ अश्नंत्यएकास्तदपास्यसोत्सवाअभ्यज्यमानाअकृतोपमज्जनाः ॥ स्वपंत्यउत्थायनिशम्यनिः
स्वनंनिपाययंत्योऽर्भमपोह्यमातरः २६ मनांसितामा मरविंदलोचनःप्रागल्भ्यलीलाहसितावलोकनैः ॥ जहारमत्तद्विरदेंद्रविक्रमोदृशादधच्छ्रीरमणोमहा
त्सवम् २७ दृष्ट्वामुहुःश्रुतमनुद्रुतचेतसस्तंतत्प्रेक्षितोत्स्मितसुधोक्षणलब्धमानाः ॥ आनंदमूर्तिमुपगुह्यदृशात्मलब्धंतद्दृष्यत्त्वचोजहुरनंतमरिंदमाधम् २८

तानिद्वाराणियेषांतेतथा स्वलंकृतद्वाराग्रहायस्यांसातथातांकाद्दशैरापूर्णकुंभैः दधिचंदनरसेनचोक्षितैः सिक्तैःप्रसूनानांदीपानांआवलयोयेषुतेतथातैःसपल्लवैःकिसलयसहितमुखैःवृंतेनप्रसवबंधनेनसहि
तासवृंतारंभाकदलीसंवृतरंभा तथाक्रमुकाःपूगाःतैःपट्टिकयाउपर्यातितांवितानवस्त्रेणसहितासपट्टिकाताम् २३ यापूर्वैकर्णाकर्णितसौंदर्यातां नरदेववर्त्मनाराजमार्गेण २४ विपर्ययकृतानिव्यत्यस्तत्वेनालं
कृतानिवस्त्राणिभूषणानियासांताः वस्त्रस्थानेभूषणानि भूषणस्थानेवस्त्राणीतियुगुलेषुमध्येएकंविस्मृत्य एतदेवस्फारयति कृतैकेति वस्त्रंपरिधानमात्रं एकंश्रवणभूषणं एकंनूपुरंचयासांताः एकमंक्त्वाएकं
लोचनंनांक्त्वा अंजितंमषीकृतमकृत्वा २५ अभ्यज्यमानास्तैललेपनंकुर्वाणाःअकृतोपमज्जनाःअकृतजलस्नानाः अर्भबालं अपोह्यातिर्यक्कृत्वा २६ प्रागल्भ्येनधाष्टर्येनलीलासहितहसितेनावलोकने
नकटाक्षनिरीक्षणेन २७ श्रुतंकृष्णरूपसौंदर्यं स्त्रियःएकदापिनदृष्टोयमित्याधिमनःपीडांतदर्शनेनजहुरित्यन्वयः तस्यकृष्णस्यप्रेक्षितंउत्कृष्टंस्मितंचतत्प्रेक्षितोत्स्मितंतेतएवसुधा प्रेक्षितोत्स्मितसुधा
तस्याऽक्षणेनलब्धोमानोयासांतास्तथाआत्मनिमनसिलब्धंस्थितं दृष्यत्त्वचः रोमांचांचिताः २८

सौमनस्यैःसुमनसांपुष्पाणांराशिभिः २८ आनर्चुःपूजयामासुः ३० रंगकारंवर्णकारकम् ३१ ३२ ३३ साक्षेपवाक्यंविवृणोति ईदृशानीतिपरिधत्थ परिधानंकुरुथ ३४ जिजीविषाजीवितुमिच्छालुं पंतिअवच्छेदंकुर्वंति राजकुलानिराज्ञांसमूहाः ३५ ३६ वासःकोशान् वस्त्राख्यराशीन्कोशोस्त्रीकुड्मलेदिव्येशास्त्रेर्थौघयृहेतनाविंतिच वस्त्रकरंडकान्वा ३७ वस्त्रेपरिधानोत्तरीयेविसृज्य ३८ वायकःतंतुवायकःवेषमद्भुतालंकारं एतदेवविशदयति विचित्रेति विचित्रानानाविधावर्णाःनीलरक्तादयोयेषांतेतथातैःशैलेयैःधातुभिःआकल्पैःआभरणैः ३९ लक्षणंमुद्रा पर्वणीवपौर्ण

प्रासादशिखरारूढाःप्रीत्युत्फुल्लमुखांबुजाः ॥ अभ्यवर्षन्सौमनस्यैःप्रमदा बलकेशवौ २९ दध्यक्षतैःसोदपात्रैःस्रग्गंधैरभ्युपायनैः ॥ तावानर्चुःप्रमुदिता स्तत्रतत्रद्विजातयः३० रजकंकंचिदायांतंरंगकारंगदाग्रजः ॥ दृष्ट्वाऽयाचतवासांसिधौतान्यत्युत्तमानिच ३१ देह्यावयोःसमुचितान्यंगवासांसिचार्हतोः ॥ भविष्यतिपरंश्रेयोदातुस्तेनात्रसंशयः ३२ सयाचितोभगवतापरिपूर्णेनसर्वतः ॥ साक्षेपंरुषितःप्राहभृत्योराज्ञःसुदुर्मदः ३३ ईदृशान्येववासांसिनित्यंगिरिवनेचराः ॥ परिधत्थकिमुद्धृताराजद्रव्याण्यभीप्सथ ३४ यताशुबालिशामैवंप्रार्थ्यंयदिजिजीविषा ॥ बध्नंतिघ्नंतिलुंपंतिदृप्तंराजकुलानिच ३५ इत्थंविकत्थमानस्यकुपितोदेवकीसुतः ॥ रजकस्यकराग्रेणशिरःकायादपाहरत् ३६ तस्यानुजीविनःसर्ववासःकोशान्विसृज्यवै ॥ दुद्रुवुःसर्वतोमार्गेवासांसिजगृहेऽच्युतः ३७ वमित्वात्मप्रियेवस्त्रेकृष्णःसंकर्षणस्तथा ॥ शेषाण्यादत्तगोपेभ्योविसृज्यभुविकानिचित् ३८ ततस्तुवायकःप्रीतस्त योर्वेषमकल्पयत् ॥ विचित्रवर्णैःशैलेयैराकल्पैरनुरूपतः ३९ नानालक्षणवेषाभ्यांकृष्णरामौविरेजतुः ॥ अलंकृतौबालगजौपर्वणीवसितेतरौ ४० तस्यप्रसन्नोभगवान्प्रादात्सारूप्यमात्मनः ॥ श्रियंचपरमांलोकेबलैश्वर्यस्मृतींद्रियान् ४१ ततःसुदाम्नोभवनंमालाकारस्यजग्मतुः ॥ तौदृष्ट्वाससमुत्थाय ननामशिरसाभुवि ४२ तयोरासनमानीयपाद्यंचाथार्हणादिभिः ॥ पूजांसानुगयोश्चक्रस्तांबूलानुलेपनैः ४३ प्राहनःसार्थकंजन्मपावितंचकुलंप्रभो ॥ पितृदेवर्षयोमह्यंतुष्टाह्यागमनेनवाम् ४४ भवंतौकिलविश्वस्यजगतःकारणंपरम् ॥ अवतीर्णाविहांशेनक्षेमायचभवायच ४५ नहिवांविषमादृष्टिः सुहृदोर्जगदात्मनोः ॥ समयोःसर्वभूतेषुभजंतंभजतोरपि ४६ शाध्याज्ञापयमांभृत्यंकिमहंकरवाणिवाम् ॥ पुंसोऽत्यनुग्रहोह्येषभवद्भिर्यन्नियुज्यते ४७ इत्यभिप्रेत्यराजेंद्रसुदामाप्रीतमानसः ॥ शस्तैःसुगंधैःकुसुमैर्मालांविरचितांददौ ४८ ताभिःस्वलंकृतौप्रीतौकृष्णरामौसहानुगौ ॥ प्रणतायप्रपन्नायददतुर्वरदौवरान् ४९ सोपिवव्रेऽचलांभक्तिंतस्मिन्नेवाखिलात्मनि ॥ तद्भक्तेषुचसौहार्दंभूतेषुचदयांपराम् ५० इतितस्मैवरंदत्त्वाश्रियंचान्वयवर्धिनीम् ॥ बलमायुर्यशःकांतिंनिर्जगामसहाग्रजः ५१ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेपूर्वार्द्धेएकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥ ॥ छ ॥

मास्यमावास्येइव सितेतरौश्वेतश्यामौ ४० बलंचऐश्वर्यंचस्मृतिश्चइंद्रियंचबलैश्वर्यस्मृतींद्रियाः तान् बलंशरीरशक्तिःरूपंसौंदर्यंवा ऐश्वर्यंअणिमादिःस्मृतिर्भगवत्स्मरणं इंद्रियंज्ञानेंद्रियं ४१ ४२ ४३ सार्थकंसप्रयोजनं पावितंशुद्धीकृतं ४४ ४५ ४६ शाधिशिक्षस्व कर्तव्यमनुजानीहीतिवा एतत्कुर्वितिनियुज्यतेप्रेर्यतइतियदेषः ४७ ४८ ४९ ५० ५१ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेविजयध्वजकृतटीकायांएकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥ ॥ छ ॥

अथनिर्गमनानंतरंयात्रांसैरंध्रींदृष्ट्वापपच्छेत्यन्वयः गृहीतांगविलेपभाजनांगृहीतचंदनपात्रां कुब्जांवक्रशरीरां वयसायुवतींतरुणीं वचसारसप्रदःआनंदप्रदःकामरागप्रदोवा १ हेवरोरु साधुसत्यं निर्दोषेपेशलेसत्येसाधुशब्दंप्रयुंजतइति २ यच्छास्त्रविहितंननुददेव दासी अनुलेपकर्मणिचंदनसौरभ्यकर्मणियंसतांश्रविप्रतिपन्ना अन्यतमःअन्येष्वपिश्रेष्ठतमः ३ धर्षितात्मा अस्ववशमनाःवशीकृतमनावा ४ सुवर्णादितरद्रजतंतेनकर्पूरोलभ्यते कर्पूरसंपर्केणगोभाराशिमलतिशयलक्षणास्यास्तीतिमुवर्णेतरशोभिना भगवच्छरीरकांतिमपेक्ष्यसंप्राप्तः अपरभागोगुणोत्कर्षराहित्यंयेनसतथा तेन ईषद्गुणोत्कर्षप्राप्तेनवा भगवदंगसंगेनसम्यगुत्कर्षप्राप्तेनवा अनुरंजितौस्वकांत्यनुकूलरागशोभांप्राप्तौ ५ ऋज्वीकर्तुंसमीकर्तुं आत्मनोदर्शनेयत्कर्तंतदर्शयन् एष्यत्कंसहननंलोकान्प्रत्यायायानितिभावः ६ कुब्जायाःप्रपदेपादाग्रेस्वपादाभ्यामाक्रम्यावष्टभ्य द्वेअंगुलेउत्तानेयस्मिन्नाणौतेनद्वयंगुलोत्तानपाणिना चुबुकेमुखाधःप्रदेशे आस्यंप्रगृह्यउदनीनमत्उन्नमयांचकार ऊर्ध्वमाकृष्टवा

श्रीशुकउवाच ॥ अथव्रजन्राजपथेनमाधवःस्त्रियंगृहीतांगविलेपभाजनाम् ॥ विलोक्यकुब्जांयुवतींवराननांपप्रच्छधात्रींवचसारसप्रदः १ कात्वंवरोरोवितदिहानुलेपनंकस्यांगनेनयसिनःकथयस्वसाधु ॥ देह्यावयोरंगविलेपमुत्तमंश्रेयस्ततस्तेनचिराद्भविष्यति २ सैरंध्र्युवाच ॥ दास्यस्म्यहंतेसुरवर्यसंमतात्रिवक्रनाम्नीह्यनुलेपकर्मणि ॥ मद्भावितंभोजपतेरतिप्रियंविनायुवांकोऽन्यतमस्तदर्हति ३ रूपपेशलमाधुर्यहसितालापवीक्षितैः ॥ धर्षितात्माददौसांद्रमुभयोरनुलेपनम् ४ ततस्तावंगरागेणसुवर्णेतरशोभिना ॥ संप्राप्तापरभागेनशुशुभातेऽनुरंजितौ ५ प्रसन्नोभगवान्कुब्जांत्रिवक्रांरुचिराननाम् ॥ ऋज्वींकर्तुमनश्चक्रेदर्शयन्दर्शनेफलम् ६ पद्भ्यामाक्रम्यप्रपदेद्वयंगुलोत्तानपाणिना ॥ प्रगृह्यचुबुकेह्यास्यमुदनीनमदच्युतः ७ सातदर्जुसमानांगीबृहच्छ्रोणिपयोधरा ॥ मुकुंदस्पर्शनात्सद्योबभूवप्रमदोत्तमा ८ ततोरूपगुणौदार्यसंपन्नाप्राहकेशवम् ॥ उत्तरीयांतमाकृष्यसस्मयंजातहृच्छया ९ एहिवीरगृहंयामोनत्वांत्यक्तुमिहोत्सहे ॥ त्वयोन्मथितचित्तायाःप्रसीदपुरुषर्षभ १० एवंस्त्रियायाच्यमानःकृष्णोरामस्यपश्यतः ॥ मुखंवीक्ष्यानुगानांचप्रहसंस्तामुवाचह ११ एष्यामितेगृहंसुभ्रुमामाधिविकर्शनम् ॥ साधितार्थोऽगृहाणांनःपांथानांत्वंपरायणम् १२ विसृज्यमाध्व्यावाण्यातांव्रजन्मार्गेवणिक्पथैः ॥ नानोपायनतांबूलस्रग्गंधैःसाग्रजोऽर्चितः १३ ततःपौरान्पृच्छमानोधनुषःस्थानमच्युतः ॥ तस्मिन्प्रविष्टोदद्दशेधनुरैंद्रमिवाद्भुतम् ॥ पुरुषैर्बहुभिर्गुप्तमर्चितंपरमर्धिमत् १४ वार्यमाणोनृभिःकृष्णःप्रसह्यधनुराददे १५

नित्यर्थः ७ ८ उत्तरीयांतं उत्तरीयवस्त्रांचलं सस्मयंसमदं हृच्छयःकामः ९ त्वयाकारणेनउन्मथितचित्तायाः विलोलितमनसः १० हेत्यनेनायामितिहासोलोकेप्रवर्ततामितिसूचयंस्तामाहेतेज्ञाप्यतइति ११ तरुणानांपुंसांआधिविकर्शनंमनःपीडापरिहारनिमित्तंगृहमागमिष्यामि किंतु किंचित्कार्यमस्तीत्याह साधितार्थइति अर्थःकंसवधलक्षणः त्वंसर्वथापरिहारार्थनित्याह अगृहाणामिति अगृहाणांगृहरहितानांवनवासिनामित्यर्थः पांथानांपथिकानांनोस्माकंत्वंपरायणंउत्तमाश्रयः अनेनासंगानामीश्वराणामस्माकम् भक्ताएवपूजादिनाश्रयभूताइतिदर्शितम् १२ माध्व्यामधुरया वणिजांपंथानोयेषांतेतथातैःदर्शनार्थमागतैः पण्यवीथिकास्थितैःवैश्यैश्चार्चितः नानाविधोपायनंतांबूलादिकंयेषांतेतथातैः १३ पृच्छमानःपृच्छन् १४ १५

ज्यंयामौर्व्यासहितंसज्यम् निमिषपरिमितेनकालेनअनिमिषेणनिमेषणरहितेनवा स्तिमितपक्ष्मणानेत्रेणेत्यर्थः मदकरीनित्यमदजलस्रावीगजः मदयुक्तोगजोवा १६ रोदसीद्यावापृथिव्यौ १७ आतता यिनः आयुधान्यातत्यविस्तृत्यागच्छंतः १८ धनुषःद्वेशकलेखंडेआदाय १९ शालामुखाद्धनुर्गृहद्वारात् २० वीर्यपराक्रमम् तेजःबलंप्रभावंवाप्रागल्भ्यंधाष्टर्यं रूपंसौंदर्यंएकवद्भावादेकवचनम् तेजः प्रागल्भ्ययोरूपंचक्षुर्ग्राह्यमिवस्थितमित्यर्थः २१ अस्तंअस्तगिरिं शकटमुपशल्यंस्वावस्थानम् २२ क्षीरोपसेचनंक्षीरोपसेचकभूयिष्ठमन्नम् २३ धनूरक्षिणांवधंप्रेषितस्वबलस्यवधंच किंकृत मितितत्राह गोविंदेति गोविंदरामाभ्यांविक्रीडितम् २४ दीर्घःप्रजागरःनिद्राराहित्यंयस्यसतथा अचष्टअपश्यत् उभयथादैहिकानिबाह्यानिच यद्वा जाग्रतिस्वप्नेच दौत्यकराणिसूचकानि २५ तान्येवव्यनक्ति अदर्शनमित्यादिनाप्रतिरूपेषुछायालक्षणेषुसत्स्वपिस्वशिरसोऽदर्शनम् द्वितीयेचंद्रादावसतिअविद्यमानेपिज्योतिषांचंद्रादीनांद्वैरूप्यंद्विमूर्तित्वंद्वौचंद्रावित्यादिबहुवचनेनदीपा

करेणवामेनसलीलमुद्धृतंसज्यंचकृत्वानिमिषेणपश्यताम् ॥ नृणांविकृष्यप्रबभंजमध्यतोयथेक्षुदंडंमदकर्युरुक्रमः १६ धनुषोभज्यमानस्यशब्दःखंरोद सीदिशः ॥ पूरयामासयंश्रुत्वाकंसत्रासमुपागमत् १७ तद्रक्षिणःसानुचराःकुपिताआततायिनः ॥ ग्रहीतुकामाआवव्रुर्गृह्यतांवध्यतामिति १८ अथता न्दुरभिप्रायान्विलोक्यबलकेशवौ ॥ क्रुद्धौधनुषआदायशकलेतांश्चजघ्नतुः १९ बलंचकंसप्रहितंहत्वाशालामुखात्ततः ॥ निष्क्रम्यचेरतुर्हृष्टौनिरीक्ष्यपु रसंपदः २० तयोस्तदद्भुतंवीर्यंनिशम्यपुरवासिनः ॥ तेजःप्रागल्भ्यरूपंचमेनिरेविबुधोत्तमौ २१ तयोर्विहरतोःस्वैरमादित्योऽस्तमुपेयिवान् ॥ कृ ष्णरामौवृतौगोपैःपुराच्छकटमीयतुः २२ अवनिज्यांघ्रियुगुलंभुक्त्वाक्षीरोपसेचनम् ॥ ऊषतुस्तांसुखंरात्रिंज्ञात्वाकंसचिकीर्षितम् २३ कंसस्तुधनुषो भंगंरक्षिणांस्वबलस्यच ॥ वधंनिशम्यगोविंदरामविक्रीडितंपरम् २४ दीर्घप्रजागरोभीतोदुर्निमित्तानिदुर्मतिः ॥ बहून्यचष्टोभयथामृत्योर्दौत्यकरा णिच २५ अदर्शनंस्वशिरसःप्रतिरूपेषुसत्स्वपि ॥ असत्यपिद्वितीयेचद्वैरूप्यंज्योतिषांतथा २६ छिद्रप्रतीतिश्छायायांप्राणघोषानुपश्रुतिः ॥ स्वर्ण प्रतीतिर्वृक्षेषुस्वपदानामदर्शनम् २७ स्वप्नेप्रेतपरिष्वंगःखरयानंबिसादनम् ॥ यायान्नलदमाल्येकस्तैलाभ्यंगोदिगंबरः ३८ अन्यानिचेत्थंभूतानिस्व प्रजागरितानिच ॥ पश्यन्मरणसंत्रस्तोनिद्रांलेभेनचिंतया २९ व्युष्टायांनिशिकौरव्यमूर्येचाभिसमुत्थिते ॥ कारयामासवैकंसोमल्लक्रीडामहोत्सवम् ३० आनर्चुःपुरुषारंगंतूर्यभेर्यश्चजघ्निरे ॥ मंचाश्चालंकृताःस्वग्भिःपताकाचैलतोरणैः ३१ तेषुपौराजानपदाब्रह्मक्षत्रपुरोगमाः ॥ यथोपजोषंविविशूराजानश्च कृतासनाः ३२ कंसःपरिवृतोऽमात्यैराजमंचउपाविशत् ॥ मंडलेश्वरमध्यस्थोहृदयेनविदूयता ३३

दयोग्राह्याःद्विशिखात्वमित्यादिना २६ छायायांछिद्रप्रतीतिःसुषिरदर्शनम् कर्णेप्रतिष्टब्धेकरेणप्राणघोषस्यशरीरवायोःप्रणवमुच्चरतोमंद्रध्वनेरनुपश्रुतिश्रवणम् वृक्षेषुस्वर्णच्छायादर्शनम् पृथिव्यां स्वपदानांपादलांछनानामदर्शनम् २७ प्रेतपरिष्वंगःमृताश्लिंगनम् स्वप्नेबिसादनंपद्मकंदमक्षणलक्षणम् नलदमालींदक्षिणामुखोव्राजयतीतिश्रुतिः पद्ममालांशिरःकृत्वायोगच्छेद्दक्षिणामुखएवंपश्य न्निशिस्वप्नेतत्क्षणान्मृत्युमेष्यतीतिस्वप्ननिदर्शनइति यद्वा चक्ररक्तपुष्पंमृणालशून्यंवर्षासुजायमानंनलदम् तत्कृतमालाधारी अभयंनलदंसेव्यममृणालंजलाशयमित्यमरः २८ अन्यानि वनभू कर्णसप्तानांपंचनेत्रंविनासिका एकजिह्वेतिपंचत्वलक्षणंविबुधाविदुरित्यादीनि २९ निशिव्युष्टायांनिवृत्तायांअभिसमुत्थितेउदयपर्वताद्दितिशेषः ३० पणवगोमुखादितूर्यं ३१ ब्रह्माणाब्राह्मणाःक्षत्रामं डलेश्वराःपुरोगमामुख्यायेषांतेतथा यथोपजोषंयथासुखम् राज्ञोविशिनष्टि राजानइति ३२ विदूयतातप्यमानेन ३३

मल्लानांतालशब्दोसरेषु उच्चैःश्रावितताल्शब्दोस्त्यर्थः उपाध्यायाःमल्लशिक्षाचार्याःतैःसहिताः ३४ कांश्चिन्मल्लान्नामानिनिर्देशति चाणूरइति येचाणूरप्रभृतयःतएवमल्लेषुप्रधानाःतएवमुपस्थानंरं
गसमीपम् ३५ भोजराजेनसमाहूतापेनंदादिगोपास्तेकिमकुर्वन्निततत्राह नंदगोपादयइति निवेदितोपायनाःदत्तप्रभृताः ३६ इतिश्रीभागवतेमहापुराणेदशमस्कंधेविजयध्वजकृतटीकायांचत्वारिंशोऽ
ध्यायः ४० कृष्णरामाभ्यांनंदादिभिःसहस्थितमुनपृथगितिसंशयनिरासार्थंतत्कर्मकथयति अथेति कृतशौचौमुखप्रक्षालनादिनाप्राप्तशुद्धी यद्वा कृतंपर्याप्तंपूर्णंशौचंशुचेरग्नेःसर्वदहनत्वंश्रयोस्तीअग्नि
वत्सर्वदाहकावित्यर्थः अत्रापिविशेषोस्तीत्याह परंतपाविति शत्रूणामेवतापकौनसर्वेषामित्यर्थः मल्लदुंदुभिनिर्घोषंमल्लयुद्धोचितदुंदुभिध्वनिं मल्लयुद्धद्रष्टुंतत्समीपमाजग्मतुः १ २ परिकरंकक्षाख्य
मुदरबंधंकांचींवाकुटिलालकान्समुह्यएकीकृत्यबद्ध्वा ३ अपक्राम अपसर यमसादनंयमगृहम् ४ बलादाकर्षणेकालः मृत्युर्वा कालोमृत्योर्यमस्यैवेतिसंहारेतकोरुद्रइव रुद्रोमाविशांतकइतिश्रुतिः ७

वाद्यमानेषुतूर्येषुमल्लतालोत्तरेषुच ॥ मल्लाःस्वलंकृताद्दप्ताःसोपाध्यायाःसमाविशन् ३४ चाणूरोमुष्टिकःकूटःशलस्तोशलएवच ॥ तआसेदुरुपस्थानंव
ल्गुवाद्यप्रहर्षिताः ३५ नंदगोपादयोगोपाभोजराजसमाहुताः ॥ निवेदितोपायनास्तएकस्मिन्मंचआविशन् ३६ इतिश्रीभागवतेमहापुराणेदशमस्कं
धेचत्वारिंशोऽध्यायः ४० श्रीशुकउवाच ॥ अथकृष्णश्चरामश्चकृतशौचौपरंतपौ ॥ मल्लदुंदुभिनिर्घोषंश्रुत्वाद्रष्टुमुपेयतुः १ रंगद्वारंसमासाद्यतस्मिन्ग
जमवास्थितम् ॥ अपश्यत्कुवलयापीडंकृष्णोऽवष्टप्रचोदितम् २ बद्ध्वापरिकरंशौरिःसमुह्यकुटिलालकान् ॥ उवाचहस्तिपंवाचामेघनादगभीरया ३ अं
बष्ठांबष्ठमार्गंनौदेह्यपक्राममाचिरम् ॥ नोचेत्सकुंजरंत्वाद्यनयामियमसादनम् ४ एवंनिर्भर्त्सितोऽबष्ठःकुपितःकोपितंगजम् ॥ चोदयामासकृष्णायकालांतक
यमोपमम् ५ करींद्रस्तमभिद्रुत्यकरेणतरसाऽग्रहीत् ॥ कराद्विगलितःसोऽमुंनिहत्यांघ्रिष्वलीयत ६ संकुद्धस्तमचक्षाणोघ्राणदृष्टिःसकेशवम् ॥ परामृश
त्पुष्करेणसप्रसह्यविनिर्गतः ७ पुच्छेप्रगृह्यातिबलंधनुषःपंचविंशतिम् ॥ विचकर्षयथानागंसुपर्णइवलीलया ८ सपर्यावर्तमानेनसव्यदक्षिणतोच्युतः ॥
बभ्रामभ्राम्यमाणेनगोवत्सेनेवबालकः ९ ततोभिमुखमभ्येत्यपाणिनाहत्यवारणम् ॥ प्राद्रवद्यापयामासदृश्यमानःपदेपदे १० सधावन्क्रीड
याभूमौपतित्वासहसोत्थितः ॥ तंमत्वापतितंकुद्धोदंताभ्यांसोऽहनत्क्षितिम् ११ स्वविक्रमेप्रतिहतेकुंजरेंद्रोऽत्यमर्षितः ॥ चोद्यमानोमहामात्रैःकृष्ण
मभ्यद्रवद्रुषा १२ तमापतंतमासाद्यभगवान्मधुसूदनः ॥ प्रगृह्यपाणिनाहस्तंपातयामासभूतले १३

शजननेयमइवास्थितः कालांतकयमोपमःतम् ५ करींद्रकराद्विगलितः विश्लथितःसकृष्णः अमुंकरींद्रंनिहत्यमुष्टिनापहत्यकरींद्रस्यांघ्रिषुपादेष्वलीयतानिलीनोऽभूत् ६अचक्षाणःअपश्यन् घ्राणःदृष्टिर्यस्य
सतथा गजोघ्राणेनपादमध्येनिलीनंकेशवंज्ञात्वापुष्करेणशुंडाग्रेणतंकृष्णंपरामृशत्आकृष्टवान् सकृष्णःपुष्करग्रहणात् प्रसह्यसहसाविनिर्गतः ७ विनिर्गत्यकिंचकारेतितत्राह पुच्छइति पंचविंशद्धनुः
परिमितस्थलपर्यंतम् नागंसर्पम् ८ सोच्युतः सव्यदक्षिणतोबभ्राम पुच्छंगृहीत्वेतिशेषः परिपरितआवर्तमानेनपुनःपुनःसव्यतोदक्षिणतश्चभ्रमतागजेनगृह्यतइति कथमिव बालकोभ्राम्यमाणेनगोपुच्छे
नगृहीतेनभ्रमतियथातथेति ९ ततःकिमनयालीलयेतिमत्वापुच्छंमुक्त्वाकरींद्रस्याभिमुखंगत्वापाणिनावारणंआहत्यप्राद्रवदित्यन्वयः ततःकिमभूदितितत्राह यापयामासेति प्राद्रवन्कृष्णःकरींद्रंया
पयामासस्वपृष्ठतआगमयामासगजोपितमन्वाद्रवदित्यर्थः १० ११ १२ १३

तेनदंतेनहस्तिपान्महामात्रान् १४ द्विपंगजं विषाणोपरक्तेनअसृजारुधिरेणमदजलाबिंदुभिश्च विरूढाविस्तृतास्वेदजलकणिकायस्मिंस्तद्विरूढस्वेदकणिकं तादृशंवदनांबुरुहंययोस्तौतथा १५ १६ मल्लानामशनिरिवभासमानः उपर्यप्येवंयोगिनांपरंतत्त्वंब्रह्म ब्रह्मवेदस्तपस्तत्त्वमितिच भोजपतेःकंसस्यमृत्युरिव नित्यमेवेतियोज्यम् १७ मनस्वीशूरोपिउद्विविजे ओविजीभयचलनयोरितिधातु. भीतोभूत् १८ देहप्रभयानिरीक्षतांमनःक्षिप्तौआकर्षतौ १९ नागराःनगरवासिनःराष्ट्राःजनपदवासिनःप्रहर्षवेगेनउत्कलितमुत्फुल्लमीक्षणमाननंचयेषांतेतथा २० २१ तयोःकृष्णरामयोःरूपगुणः

पतितस्यपदाक्रम्यमृगेंद्रइवलीलया ॥ दंतमुत्पाट्यतेनैवहस्तिपानहनद्धरिः १४ मृतकंद्विपमुत्सृज्यदंतपाणीविरेजतुः ॥ अंसन्यस्तविषाणासृङ्मदार्द्रदुभिरंजितौ १५ विरूढस्वेदकणिकवदनांबुरुहावुभौ ॥ वृतौगोपैःकतिपयैर्बलदेवजनार्दनौ ॥ रंगंविविशतूराजन्गजदंतवरायुधौ १६ मल्लानामशनिर्नृणांनरवरःस्त्रीणांस्मरोमूर्तिमान्गोपानांस्वजनोऽसतांक्षितिभृतांशास्तास्वपित्रोःशिशुः ॥ मृत्युर्भोजपतेर्विधाद्विहितस्तत्त्वंपरंयोगिनांवृष्णीनांचपतिःसदैसवशुशुभेरंगेऽच्युतःसाग्रजः १७ हतंकुवलयापीडंदृष्ट्वातावपिदुर्जयौ ॥ कंसोमनस्व्यपितदाभृशमुद्विविजेनृप १८ तौरेजतूरंगगतौमहाभुजौविचित्रवेषाभरणस्रगंबरौ ॥ यथानटावुत्तमवेषधारिणौमनःक्षिपंतौप्रभयानिरीक्षताम् १९ निरीक्ष्यतावुत्तमपूरुषौजनामंचस्थितानागरराष्ट्रकानृप ॥ प्रहर्षवेगोत्कलितेक्षणाननाःपपुर्नतृप्तानयनैस्तदाननम् २० पिबंतइवचक्षुर्भ्यांलिहंतइवजिह्वया ॥ जिघ्रंतइवनासाभ्यांश्लिष्यंतइवबाहुभिः २१ ऊचुःपरस्परंतेवैयथादृष्टंयथाश्रुतम् ॥ तद्रूपगुणमाधुर्यप्रागल्भ्यस्मारिताइव २२ एतौभगवतःसाक्षाद्धरेर्नारायणस्यहि ॥ अवतीर्णाविहांशेनवसुदेवस्यवेश्मनि २३ सएषकिलदेवक्यांजातोनीतश्चगोकुले ॥ कालमेतंवसन्गूढोववृधेनंदवेश्मनि २४ पूतनाऽनेननीतांतंचक्रवातश्चदानवः ॥ अर्जुनौधेनुकःकेशीगुह्यकोऽन्येचतद्विधाः २५ गावःसपालाएतेनदावाग्नेःपरिमोचिताः ॥ कालियोदमितःसर्पःशक्रश्चविमदःकृतः २६ स साहमेकहस्तेनधृतोऽद्रिप्रवरोऽमुना ॥ वर्षवाताशनिभ्यश्चपरित्रातंचगोकुलम् २७ गोप्यश्चनित्यमुदितहसितप्रेक्षणंमुखम् ॥ पश्यंत्योविविधांस्तापांस्तरंतिस्मश्रमंमुदा २८ वदंत्यनेनवंशोऽयंयदोःसुबहुविश्रुतः ॥ श्रियंयशोमहत्त्वंचलप्स्यतेपरिरक्षितः २९ अयंचास्याग्रजःश्रीमान्रामःकमललोचनः ॥ प्रलंबोनिहतोऽनेनबहवोधेनुकादयः ३० जनेष्वेवंब्रुवाणेषुतूर्येषुनिनदत्सुच ॥ कृष्णरामौसमाभाष्यचाणूरोवाक्यमब्रवीत् ३१ हेनंदसूनोहेरामभवंतौवीर्यसंमतौ ॥ नियुद्धकुशलौश्रुत्वाराज्ञाहूतौदिदृक्षुणा ३२ प्रियंराज्ञःप्रकुर्वंत्यःश्रेयोविंदंतिवैप्रजाः ॥ मनसाकर्मणावाचाविपरीतमतोऽन्यथा ३३

शब्दगुणःमाधुर्यंचतेन यद्वा रूपगुणेनकांतिगुणेनकीर्तिगुणेनवामाधुर्येणावा वाचइतिशेषः प्रागल्भ्येनवैशारद्येनचस्मारिताःस्मृतिंकारिताःरूपंशब्देपशौश्लोकइत्यादेः २१ २३ एतंकालंएतावंतंकालम् २४ अंतंनाशंनीता गुह्यकःशंखचूडः २५ २६ २७ श्रमंचतरंति २८ इतिवदंतिअनेनकृष्णेन २९ ३० ३१ वीर्येणपराक्रमेणसंमतौसम्यक्प्रख्यातौ नियुद्धंबाहुयुद्धंमल्लयुद्धमितियावत् तस्मिन्कुशलौनिपुणौ ३२ ३३

तत्कथमवगतमितितत्राह नित्येति नियुद्धेनक्रीडंतः गोपालावत्सपालाश्चगोवत्सांश्चचारयंतीतिकिंवदंत्यावगतमित्यर्थः ३४ किंकलहेनफलमितितत्राह भूतानांनः ३५ ३६ यूयंभोजपतेःप्रजाः वयंचापिविशेषोस्ति वयंवनेचराःयूयंतत्समीपचराः अतोविशेषमिषाश्च तथापिवयंतस्यनित्यंप्रियंकरवामोनाप्रियमितियत्तस्मान्नःपरमनुग्रहएव ३७ तत्रापिकिंचित्कर्तव्यमस्तीत्याह बालाइति वयंबालाइतियदतस्तुल्यबलैःमल्लैःसमंनियुद्धमिदमित्यर्थंधर्मःअधर्मोमास्पृशेन्नस्पृशतु ३८ चाणूरःकृष्णोकंपरिहरति नेति ३९ अनयोऽन्यायलक्षणःअधर्मः विक्रमविक्रमस्व मुष्टिकोबलेनरामेण सहविक्रमंकरोत्विति ४० इतिश्रीभागवतेमहापुराणेदशमस्कंधेविजयध्वजकृतटीकायामेकचत्वारिंशोऽध्यायः ४१ एवंचाणूरोक्तप्रकारेणचिंतितःसंकल्पोमनोरथोयेनसतथा हेतियुद्धप्रारंभे प्रत्यारंभेप्रसिद्धौहेतिच १ तत्रमल्लयुद्धकरणप्रकारंकथयति हस्ताभ्यामिति आस्फोट्यहस्तौहस्ताभ्यामूरूचैवपरस्परं विसृज्यभूयःसंयुद्ध्यपरिक्रम्यपरस्परमित्येकश्लोकमादित्वेनकेचित्पठंति २

नित्यप्रमुदितागोपावत्सपालास्तथास्फुटम् ॥ वनेपुमल्लयुद्धेनक्रीडंतश्चारयंतिगाः ३४ तस्माद्राज्ञःप्रियंयूयंवयंचकरवामहे ॥ भूतानिनःप्रसीदंतिसर्वभूतम
योनृपः ३५ तन्निशम्याऽब्रवीत्कृष्णोदेशकालोचितंवचः ॥ नियुद्धमात्मनोभीष्टंमन्यमानोभिनंद्यच ३६ श्रीभगवानुवाच ॥ प्रजाभोजपतेर्यूयंवयंचापि
वनेचराः ॥ करवामःप्रियंनित्यंतन्नःपरमनुग्रहः ३७ बालावयंतुल्यबलैःक्रीडिष्यामोययोचितम् ॥ मवेन्नियुद्धंमाऽधर्मःस्पृशेन्मल्लसभासदः ३८ चाणूर
उवाच ॥ नबालोनाकिशोरस्त्वंबलश्चबलिनांवरः ॥ लीलयेभोहतोयेनसहस्रद्विपसत्वभृत् ३९ तस्माद्भवद्भ्यांबलिभिर्योद्धव्यंनानयोऽन्यवै ॥ मयिवि
क्रमवार्ष्णेयबलेनसहमुष्टिकः ४० इतिश्रीभागवतेमहापुराणेदशमस्कंधेएकचत्वारिंशोऽध्यायः ४१ श्रीशुकउवाच ॥ एवंचिंतितसंकल्पोभगवान्म
धुसूदनः ॥ आससादहचाणूरंमुष्टिकंरोहिणीसुतः १ हस्ताभ्यांहस्तयोर्बद्धापद्भ्यामेवचपादयोः ॥ विचकर्षतुरन्योन्यंप्रसह्यविजिगीषया २ अरत्नी
द्वेअरत्निभ्यांजानुभ्यांचैवजानुनी ॥ शिरःशीर्ष्णोरसोरस्तावन्योऽन्यमभिजघ्नतुः ३ परिभ्रामणविक्षेपपरिरंभावपातनैः ॥ उत्सर्पणापसर्पैश्चाप्यन्योन्यं
प्रत्ययुध्यताम् ४ उत्थापनैरुन्नमनैश्चालनैःस्थापनैरपि ॥ परस्परंजिगीषंतावन्योन्यमभिचक्रतुः ५ तद्बालबलवद्युद्धंसमेताःसर्वयोषितः ॥ ऊचुःपर
स्परंप्रेक्ष्यसानुकंपावरूथशः ६ महानयंबताधर्मएषांराजसभासदाम् ॥ येबालबलवद्युद्धंराज्ञोऽन्विच्छंतिपश्यतः ७ क्ववज्रसारसर्वांगौमल्लौशैलेंद्रसन्निभौ
क्वचातिसुकुमारांगौकिशोरौनाप्तयौवनौ ८ धर्मव्यतिक्रमोह्यस्यसमाजस्यध्रुवंभवेत् ॥ यत्राधर्मःसमुत्तिष्ठेन्नस्थेयंतत्रकर्हिचित् ९

३ विक्षेपआकृष्यमोचनं अवपातनमधोमुखेनपातनं उत्सर्पणंउत्क्षेपः अपसर्पःपृष्ठतोगमनं ४ उन्नमनमुत्तानीकरणं अभिचक्रतुःमुख्यनियुद्धंकृतवंतौ मल्लयुद्धंनियुद्धज्ञाविंशद्भेदंप्रचक्षते द्वात्रिंशद्भे
दमपरेचत्वारिंशद्विधतथेतिसंग्रामविजयवचनात् सर्वेनियुद्धविधिदर्शनार्थंभगवतैविक्रीडितंतत्रद्विधापासाभावादयमेवार्थउपरि तैस्तैर्नियुद्धविधिभिर्विविधैरच्युतेतरौ युयुधातइत्यादिनासूच्यतेच ५
बालबलवतोः कृष्णचाणूरयोःयुद्धंतत्प्रेक्ष्य वरूथशःसंघशः ६ राजसभायांसीदंत्युपविशंतीतिराजसभासदःतेषां कोयमधर्मइत्याहुः यइति बालस्यबलवतासहयुद्धमन्विच्छंतिअनुकूलंमन्वते
राज्ञःपश्यतःसतइत्यनेनउभयेषामप्यधर्मःप्राप्तइतिज्ञायते ७ कथंअधर्मआसीदितितत्राहुः क्वेति वज्रवत्सारणिबलाढ्यानिसर्वाणिअंगानिकरचरणादीनियस्यौतथा सारोबलेस्थिरांशेर्थ
पुमान्यायेवरेर्थैर्वंदितिच ८ समाजस्यसभ्यसमूहस्य अर्थतोमन्वादिवाक्यंप्रतीक्षयंति यत्रेति ९

किमित्यप्रवेशइतितत्राहुः अब्रुवन्निति विब्रुवन्विपरीतंब्रुवन् आत्मसर्वांगसंबंधमलंकिल्बिषमुच्यतइतिच अनपायिमलंकिल्बिषमित्यर्थः १० श्रमपर्यासंश्रमवारिव्याप्तंपद्मकोशंपद्ममुकुलं ११ हेसख्यः रामस्यमुखंनपश्यतकिंपश्यंतेत्यन्वयः अमर्षेणसहितोहासःसामर्षहासः तेनसंरंभेणचशोभनंचारुतरं १२ नृणांलिंगेनलक्षणेनगूढःछन्नः अयंकृष्णनामापुराणपुरुषः यद्यासुव्रजभूमिषुविक्रीडयाक्रीडेच्छयाअंचतिगच्छति पादाभ्यामितिशेषः गाश्चारयन्गिरावंचतिच तावज्रजभुवः सगिरिश्चपुण्याःपावनाः बतआश्चर्यावधेःस्थितिः किंविशिष्टःवनेविद्यमानानिविचित्राणिनानावर्णानि माल्यानिपुष्पाणियस्यसतथा गिरावमरैर्देवैरार्थितांघ्रिः व्रजभुविअमरैरमलैःशुद्धांतःकरणैर्गोपालैरर्चितश्रीचरणः १३ अमुष्येश्वरस्ययल्लावण्यसारमथनोत्थंशृंगाररसमथनादुत्पन्नंनचेदंक्वत्रिममित्याह अनन्यसिद्धमिति अन्यस्माद्प्रकृतेर्जातंनभवतीति अन्येषामविद्यमानंवा अनुसवंप्रतिक्षणं अभिनवंनूतनं ज्ञानमंतरेणदुष्प्रापं श्रियोयशसश्चैकांतधामनि यतःस्थानरूपंद्रव्याश्रयलक्षणगुणं

नसभांप्रविशेत्प्राज्ञःसभ्यदोषाननुस्मरन् ॥ अब्रुवन्विब्रुवन्ज्ञोनरःकिल्बिषमश्नुते १० वल्गतःशत्रुमभितःकृष्णस्यवदनांबुजम् ॥ वीक्ष्यतांश्रमपर्यासं पद्मकोशमिवांबुभिः ११ किंनपश्यतरामस्यमुखमाताम्रलोचनम् ॥ मुष्टिकंप्रतिसामर्षहाससंरंभशोभनम् १२ पुण्याबतव्रजभुवोयदयंनृलिंगगूढःपुराणपुरुषोवनचित्रमाल्यः ॥ गाश्चारयन्सहबलःक्वणयंश्चवेणुंविक्रीडयांऽचतिगिरावमरार्चितांघ्रिः १३ गोप्यस्तपःकिमचरन्यदमुष्यरूपंलावण्यसार मथनोत्थमनन्यसिद्धम् ॥ दृग्भिःपिबंत्यनुसवाभिनवंदुरापमेकांतधामयशसःश्रियईश्वरस्य १४ यादोहनेऽवहननेमथनोपजल्पप्रेंखेंखनार्भरुदितो क्षणमज्जनादौ ॥ गायंतिचैनमनुरक्तधियोऽश्रुकंठ्यःपुण्याव्रजस्त्रियउरुक्रमचित्तयामाः १५ प्रातर्व्रजाद्व्रजतआविशतश्चसायंगोभिःसमंक्वणयतोऽस्य निशम्यवेणुम् ॥ निर्गत्यतूर्णमबलाःपथिभूरिपुण्याःपश्यंतिसस्मितमुखंसदयावलोकम् १६ एवंप्रभाषमाणासुस्त्रीषुयोगेश्वरोहरिः ॥ शत्रुंहंतुंमनश्चक्रे भगवान्भरतर्षभ १७ तैस्तैर्न्यायुद्धविधिभिर्विविधैरच्युतेतरौ ॥ युयुधातेतथान्योन्यंतथैवबलमुष्टिकौ १८ अवगद्वाग्रनिष्पातैर्वज्रनिष्पेषनिष्ठुरैः ॥ चाणूरोभज्यमानांगोमुहुर्ग्लानिमवापह १९ सश्येनवेगउत्पत्यमुष्टीकृत्यकरावुभौ ॥ भगवंतंवासुदेवंकुद्धोवक्षस्यताडयत् २० नाचलत्तत्प्रहारेणस्रजाहतइवद्विपः ॥ बाह्वोर्निगृह्यचाणूरंबहुशोभ्रामयन्हरिः २१ भूपृष्ठेपोथयामासतरसाक्षीणजीवितम् ॥ विस्रस्ताकल्पकेशस्रागींद्रध्वजइवापतत् २२ तथैव मुष्टिकःपूर्वंस्वमुष्ट्याऽभिहतेनवै ॥ बलभद्रेणबलिनातलेनाभिहतोभृशम् २३ प्रवेपितःसरुधिरमुद्वमन्मुखतोऽर्दितः ॥ व्यसुःपपातोर्व्युपस्थेवाताहतइवांघ्रिपः २४ ततःकूटमनुप्राप्तंरामःप्रहरतांवरः ॥ अवधील्लीलयाराजन्सावज्रंवाममुष्टिना २५

तद्याःदृग्भिःपिबंतितागोप्यः किंतपःअचरन् चक्रुरित्यन्वयः १४ यागोप्योगोदोहनादावेनंकृष्णंगायंतितागोकुलस्त्रियःपुण्याइत्यन्वयः अवहननेव्रीहिताडनकाले दधिमंथनवेलायां उपजल्पेमिथः संभाषणसमये उपलेपइतिकेचित्पठंति गोमयादिनास्थलेपनकाले प्रेंखेंखनेदोलाचलनकाले अर्भरुदितेबालरोदनकाले उक्षणेप्रांगणसेचनसमये मज्जनेस्नानकाले मार्जनइतिकेचित् आदिशब्देन स्खलनपतनादिकंगृह्यते उरुक्रमचित्तेयामः कालविशेषोयासांतास्तथा उरुक्रमचित्तेनगतोयामोयासांताइतिवा १५ वेणुरवंनिशम्यव्रजान्निर्गत्यपथिस्थित्वा १६ १७ इतरश्चाणूरः १८ ग्लानिंप्राण संदेहक्लेशम् १९ २० २१ २२ २३ उर्व्युपस्थेभूमिपृष्ठे २३ सावज्रंभायासम् २५

२६ २७ संसृज्यसंगम्य वल्गंतौनृत्यंतौतौवीक्ष्य नुतनूपुरौस्तुततुलाकोटी नूतनूपुराविति केचित् तुलाकोटिस्तुनूपुरइति २८ २९ ३० निःसारयतानिर्गमयत ३१ ३२ लघिम्नापक्षिवल्लाघवेन अव्ययःयोगवित्प्रधानरुपुरुषेश्वरइत्यर्थः ३३ मनस्वीधीरः ३४ दुर्विषहेचउग्रेचतेजसीवह्नार्चिषीयस्यसतथेति ३५ उत्तुंगमंचादवपतनादंगभंगःकथंनाभूत्तत्राह विश्वाश्रयइति विश्वमाश्रयोयस्येतिविग्रहेउक्तचोद्यानिस्तारइत्यतउक्तं आत्मतंत्रइति अपरायत्तत्वात् २६ ३७३८ सकंसः चीर्णपुण्यफलादानार्थंकंसेस्थितोवायुःसंसारावस्थायांतदुद्विग्नबुद्धयाभीतबुद्धया अन्यत्रमरणाद्उद्विग्नबुद्धयातमीश्वरंध्यायन्नित्यदाप्यनादौपुनःदैत्यस्यमृत्युसमयेमंचेऽग्रतःस्थितंयदच्युतंअविनाशिनित्यं चक्रंसुदर्शनंआयुधंयस्यसतथा ददर्शहरेरूपमाप आविष्टइत्यर्थः अन्यस्त्वच्युतंचक्रंछत्रवेवायुधंयस्यास्त्वमोदेवतायास्तच्च

तथैवाहिशलःकृष्णपदापहतशीर्षकः ॥ द्विधाविदीर्णस्तोशलकउभावपिनिपेततुः २६ चाणूरेमुष्टिकेकूटेतोशलेशलकेहते ॥ शेषाःप्रदुद्रुवुर्मल्लाःसर्वे प्राणपरीप्सवः २७ गोपान्वयस्यानाकृष्यतैःसंसृज्यविजह्रतुः ॥ वाद्यमानेषुतूर्येषुवल्गंतौनुतनूपुरौ २८ जनाःप्रजह्रुःसर्वेकर्मणारामकृष्णयोः ॥ ऋतेकंसंविप्रमुख्याःसाधवःसाधुसाध्विति २९ हतेषुमल्लवर्येषुविद्रुतेषुचभोजराट् ॥ न्यवारयत्स्वतूर्याणिवाक्यंचेदमुवाचह ३० निःसारयतदुर्वृत्तौवसुदेवात्मजौपुरात् ॥ धनंहरतगोपानांनंदंबध्नीतदुर्मतिम् ३१ वसुदेवस्तुदुर्मेधाहन्यतामाश्वसत्तमः ॥ उग्रसेनःपिताचापिसानुगःपरपक्षगः ३२ एवंविकत्थमानेवैकंसेप्रकुपितोऽव्ययः ॥ लघिम्नोत्पत्यतरसामंचमुत्तुंगमारुहत् ३३ तमापतंतमालोक्यमृत्युमात्मनआसनात् ॥ मनस्वीसहसोत्थायजगृहेसोऽसिचर्मणी ३४ तंखड्गपाणिंविचरंतमाशुश्येनंयथादक्षिणसव्यमंबरे ॥ समग्रहीद्दूर्विषहोग्रतेजायथोरगंतार्क्ष्यसुतःप्रसह्य ३५ निगृह्यकेशेषुचलत्किरीटंनिपात्यरंगोपरितुंगमंचात् ॥ तस्योपरिष्टात्स्वयमज्जनाभःपपातविश्वाश्रयआत्मतंत्रः ३६ कंसोपिकृष्णेनजगत्त्रयैकनिवासभूतेननिपात्यसोऽयः ॥ तेनात्मतंत्रेणचपीडितोऽसुंतत्याजराजन्निमिषांतरेण ३७ कंसंपरेतंविचकर्षभूमौहरिर्यथेभंजगतोविपश्यतः ॥ हाहेतिशब्दःसुमहांस्तदाऽभूदुदीरितःसर्वजनैर्नरेंद्र ३८ सनित्यदोद्विग्नधियातमीश्वरंपिबन्नदन्वाविचरन्स्वपन्श्वसन् ॥ ददर्शचक्रायुधमच्युतंयत्तदेवरूपंदुरवापमाप३९ तस्यानुजाभ्रातरोऽष्टौकंकन्यग्रोधकादयः ॥ अभ्यधावन्नतिक्रुद्धाभ्रातृनिर्वेशकारिणः ४० तथातिरभसांस्तांस्तुसंयत्तान्रोहिणीसुतः ॥ अहन्परिघमुद्यम्यपशूनिवमृगाधिपः ४१ नेदुर्दुंदुभयोव्योम्निब्रह्मेशाद्याविभूतयः ॥ पुष्पैःकिरंतस्तंप्रीताःशशंसुर्ननृतुःस्त्रियः ४२ तेषांस्त्रियोमहाराजसुहृन्मरणदुःखिताः ॥ तत्राभीयुर्विनिघ्नंत्यःस्वशीर्षाण्यश्रुलोचनाः ४३ शयानान्वीरशय्यायांपतीनालिंग्यशोचतीः ॥ विलेपुःसुस्वरंनार्योविसृजंत्योमुहुःशुचः ४४

क्रायुधमन्यथाज्ञानसाध्यं यद्ददर्शतदेवतमोदेवतायाःरूपंनित्यदुःखलक्षणंआप दुरावापमित्युभयत्रसमं चक्रंसैन्येजलावर्तेरथांगेचक्रराष्ट्रयोः संचारेमंडलेवृत्तेछत्रभेदार्थदंभयोरितिच ३९ ४० भ्रातृनिर्वेशोनिष्कृतिरानृण्यंतत्कारिणः सिंहव्याघ्रौमृगाधिपावितिच ४१ विभूतयःहरिविशेषसन्निधानपात्राणि ४२ ४३ वीरशय्यायांरणभूमौविलेपुः विप्रलापंचक्रुः विसृजंत्यःददंत्यःत्यागोविद्यापितंदानमुत्सर्जनंविसर्जनेइतिहलायुधः ४४

करुणयानाथंतेप्रार्थयंतेइतिकरुणानाथास्तेषुवत्सलस्निग्ध तेतवविद्यमानाः येपुरासनाथास्तेवयमितिवा ४५ ४६ ४७ प्रभवउत्पादकः अप्ययःसंहारहेतुः प्रभवाप्ययौहिभूतानामितिश्रुतिः यथासुखंभवतितथानैधतेनवर्धते ४८ संस्थांमृतसंस्कारं ४९ ५० सस्वजातेआलिंगनंकुर्वाते । किंतुबद्धांजलीतस्थतुरित्यर्थः ॥ ५१ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेविजयध्वजकृतटीकायांद्विचत्वारिंशोऽध्यायः ॥ ४२ ॥ मुरारेर्भगवतोबंधनशक्तेःप्रकारःप्रतिपाद्यतेस्मिन्नध्याये तत्रशुकःकंसवधानंतरंश्रीकृष्णेनाकिमकारीतिराज्ञोमानसंप्रश्नंपरिहरति पितराविति उपलब्धःसम्यग्ज्ञातोऽर्थःवस्तुनित्याप्रतिहतंभगवत्स्वरूपंअस्मत्सुतौनेति याभ्यांतौतथाविधौज्ञात्वा माभूज्ज्ञातमत्स्वरूपौमाभूतामितिनिरूप्य निजांमायांबंधकशक्तितानविस्तृतवान् १ प्रीणयन्प्रीतिमुत्पादयन् प्रश्रयेप्रकृष्टसेवायांअवनतोमग्नः २ अस्मन्निमित्तंनित्योत्कंठितयोर्युवयोःपुत्राभ्याआवाभ्यांबाल्यपौगंडकैशोरावयोवस्थाःपित्रोरानंदहेतवोनागमन् युष्मत्पुरतोबाल्याद्युचितालीलान प्राप्ताइत्यर्थः ३ अप्राप्तौनिमित्तमाह नेति दैवहतयोर्भाग्यहीनयोःनौआवयोःभवत्समीपेवासोनलब्धइतियस्मात् येबालास्तेपित्रोर्गृहेस्थितायांमुदंविंदंतेसापिनलब्धेत्यन्वयः विंदतेइतिछांदसः अ

हानाथप्रियधर्मज्ञकरुणानाथवत्सल ॥ त्वयाहतेननिहतावयंतेसगृहप्रजाः ४५ त्वयाविरहितापत्यापुरीयंभरतर्षभ ॥ नशोभतेवयमिवनिवृत्तोत्सवमंगला ४६ अनागसांत्वंभूतानांकृतवान्द्रोहमुल्बणम् ॥ तेनेमांभोदृशांनीतोभूतध्रुक्कोलभेतशम् ४७ सर्वेषामिहभूतानामेषहिप्रभवाप्ययः॥ गोप्ताचतमवज्ञायनतथासुखमेधते ४८ श्रीशुकउवाच ॥ राजयोषितआश्वास्यभगवान्लोकभावनः ॥ यामाहुर्लौकिकींसंस्थांहतानांसमकारयत् ४९ मातरंपितरंचैवमोचयित्वाथबंधनात् ॥ रामकृष्णौववंदातेशिरसास्पृश्यपादयोः ५० देवकीवसुदेवश्चविज्ञायजगदीश्वरौ ॥ कृतसंवंदनौपुत्रौसस्वजातेनशंकितौ ५१ इतिश्रीभागवतेमहापुराणेदशमस्कंधेपूर्वार्धेद्विचत्वारिंशोऽध्यायः ॥ ४२ ॥ श्रीशुकउवाच ॥ पितरावुपलब्ध्यार्थौविदित्वापुरुषोत्तमः ॥ माभूदितिनिजांमायांततानजनमोहिनीम् १ उवाचपितरावेत्यसाग्रजःसात्वतर्षभः ॥ प्रश्रयावनतःप्रीणन्नंबतातेतिसादरम् २ नास्मत्तोयुवयोस्तातनित्योत्कंठितयोरपि ॥ बाल्यपौगंडकैशोराःपुत्राभ्यामगमन्क्वचित् ३ नलब्धोदैवहतयोर्वासोनौभवदंतिके ॥ येबालाःपितृगेहस्थाविंदतेलालितामुदम् ४ सर्वार्थसंभवोदेहोजनितःपोषितःपुनः ॥ नतयोर्यातिनिर्वेशंपित्रोर्मर्त्यःशतायुषा ५ यस्तयोरात्मजःकल्पआत्मनाचधनेनच ॥ वृत्तिंनदद्यात्तंप्रेत्यस्वमांसंखादयंतिहि ६ मातरंपितरंवृद्धंभार्यांसाध्वींसुतंशिशुम् ॥ गुरुंविप्रंप्रपन्नंचकल्पोऽबिभ्रच्छ्वसन्मृतः ७

भयंप्रतिष्ठांविंदतइतिश्रुतिः ४ सर्वेषामर्थानांमोक्षादिपुरुषार्थानांसंभवउत्पत्तिर्यस्मात्सर्वार्थसंभवोदेहोयाभ्यांजनितःपुनःपोषितश्च तयोःपित्रोःशतायुषावर्षसहस्रेणापि निर्वेशंनिष्कृतिंनयातिमर्त्यःअल्पायुः ५ अल्पायुश्चेत्कथंनिष्करोतीत्यतोयावदायुःपित्रुपरिचर्याकार्या अन्यथाऽनर्थःस्यादितिवक्ति यस्तयोरिति यस्तयोःपित्रोःआत्मनाप्रेषितपुरुषमंतरेणस्वयमेवधनेनालंबुद्धिजनकेनचद्रव्येणचवृत्तिजीवनंनदद्यात् तंप्रेत्ययमलोकेस्वमांसंखादयंति यमभटाइतिशेषः आत्मजौरसोपिनिर्धनश्चेत्किंकुर्यादित्यतआह कल्पइति देहेनधनेनचकर्तुसमर्थइत्यर्थः हिनात्रवृद्धौचमातापितरावितिस्मृतिं प्रमाणयति ६ सूचितस्मृतिमर्थतःप्रतीकयति मातरामिति मातरंसर्वावस्थासुमानयोग्यां पितरंवृद्धंजरसाग्रस्तं भार्यांभरणयोग्यामपिसाध्वीं अक्षतव्रतांसुतंशिशुंस्वजीवनप्रवृत्तावसमर्थंगुरुंज्ञानोपदेष्टारंविप्रंज्ञानपूर्णंप्रपन्नंशरणागतंचएतानबिभ्रद्भरणमकुर्वन्सःश्वसन्नपिजीवन्नपिमृतःमृतकल्पइत्यर्थः कंचनवृद्धंकांचसाध्वींकंचनाशिशुंमेखायांशयानंकंचनविप्रमितिपृथग्वान्वेतव्यमिति ७

नन्वेवमस्तुपक्रतोकिमितित्राह तन्नाविति यतएवंशास्त्रार्थस्तस्मात्कंसात्कसिहिंसायामितिधातोः सर्वाहिंसाधिकरणत्वेनतन्नाम्नोभोजपतेर्नित्यमहोरात्रमुद्विग्नचित्तयोःअतएवयामनर्चतोःपरिचर्याम कुर्वतोः अकल्पयोःशक्तिसामग्रीहीनयोःनौआवयोः एतेइतःपूर्वेदिवसाः मोघंव्यतिक्रांताइत्यन्वयः ८ एतदेवविशिनष्टि तत्क्षंतुमिति दुर्हृदोःदुःस्वयुक्तमनसोः दुरशोभनदुःस्वयोरितियादवः ९ वि श्वात्मनःसर्वांतर्यामिणः १० ११ १२ स्वाःप्रजाः अस्मान्नुग्रहुंआग्रहुं यद्वा प्रजास्वासुकांश्चिदस्मानिति ययातिशापात्नृपासनेयदुभिर्नासितव्यंनस्थातव्यमितिशंकांत्यजेतिशेषः १३ शंका त्यागेकैमुत्येननिमित्तमाह मयीति उपासीनेसेवमानेसति १४ विश्वंसर्वंसृजतिददातीतिविश्वसृक् दिग्भ्यआनीय १५ १६ सिद्धाइतिलुप्तोपमायुक्ताइवकृष्णरामाभ्यांगतज्वराःनष्टसंतापाःकृष्णेरामेणर

तन्नावकल्पयोःकंसान्नित्यमुद्विग्नचेतसोः ॥ मोघमेतेव्यतिक्रांतादि वसावामनर्चतोः ८ तत्क्षंतुमर्हथस्तातमातर्नौपरतंत्रयोः ॥ अकुर्वतोर्वांशुश्रूषांक्लिष्टयो र्दुर्हृदोर्भृशम् ९ इतिमायामनुष्यस्यहरेर्विश्वात्मनोगिरा ॥ मोहितावंकमारोप्यपरिष्वज्यापतुर्मुदम् १० सिंचंतावश्रुधाराभिःस्नेहपाशेनसंवृतौ ॥ न किंचिदूचतूराजन्बाष्पकंठौविमोहितौ ११ एवमाश्वास्यपितरौभगवान्देवकीसुतः॥ मातामहंतूग्रसेनंयदूनामकरोन्नृपम् १२ आहचास्मान्महाराजप्रजा स्वाज्ञप्तुमर्हसि॥ ययातिशापाद्यदुभिर्नासितव्यंनृपासने १३ मयिभृत्यउपासीनेभवतोविबुधादयः॥ बलिंहरंत्यवनताःकिमुतान्येनराधिपाः १४ सर्वान्स्वजातिसंबंधान्दिग्भ्यःकंसभयाद्रतान्॥ यदुवृष्ण्यंधकमधुदाशार्हकुकुरार्हकान् १५ सभाजितान्समाश्वास्यविदेशावासकर्शितान् ॥ न्यवासयत्स्व गेहेषुवित्तैःसंतर्प्यविश्वसृक् १६ कृष्णसंकर्षणभुजैर्गुप्तालब्धमनोरथाः ॥ गृहेषुरेमिरेसिद्धाःकृष्णरामगतज्वराः १७ वीक्षंतोऽहरहःप्रीतामुकुंदवदनांबुजम् ॥ नित्यप्रमुदितंश्रीमत्सदयास्मितवीक्षणम् १८ तत्रप्रवयसोप्यासन्युवानोऽतिबलौजसः ॥ पिबंतोऽक्षैर्मुकुंदस्यमुखांबुजसुधांमुहुः १९ अथनंदंसमासाद्य भगवान्देवकीसुतः॥ संकर्षणश्चराजेंद्रपरिष्वज्येदमूचतुः २० पितर्युवाभ्यांस्निग्धाभ्यांपोषितौलालितौभृशम् ॥ पित्रोरप्यधिकाप्रीतिरात्मजेष्वात्मनो पिहि २१ सपितासाचजननीयौपुष्णीतांस्वपुत्रवत् ॥ शिशून्बंधुभिरुत्सृष्टानकल्पैःपोषरक्षणे २२ यातयूयंव्रजंतातवयंचस्नेहदुःखितान्॥ ज्ञातिन्नोद्रष्टुमेष्यामोविधायसुहृदांसुखम् २३ एवंसांत्वय्यभगवान्नंदंसव्रजमच्युतः ॥ वासोऽलंकारकुप्याग्रैरर्हयामाससादरम् २४ इत्युक्तस्तौपरिष्वज्यनंदःप्र णयविह्वलः ॥ पूरयन्नश्रुभिर्नेत्रेसहगोपैर्व्रजंययौ २५ अथशूरसुतोराजन्पुत्रयोःसमकारयत् ॥ पुरोधसाब्राह्मणैश्चयथावद्द्विजसंस्कृतिम् २६ तेभ्योऽदाद क्षिणांगावोरुक्ममालाःस्वलंकृताः ॥ स्वलंकृतेभ्यःसंपूज्यसवत्साःक्षौममालिनीः २७

मणेनरत्यावा १७ १८ तत्रमथुरायांप्रवयसोवृद्धाआपयुवानःआसन् तत्रकिमौपधमितितत्राह पिबंतइति १९ २० आत्मनःस्वस्मादपि २१ पुष्णीतांअपुष्णाताम् पोषणमकुर्वाताम् पोषरक्षणेपोषण रक्षणयोः २२ वयंनोऽस्माकंज्ञातीन्स्नेहानभिक्षेनदुःखितान् युष्मान्द्रष्टुमेष्यामोऽधुनाव्रजंयात इदानीमागंतुककार्यमास्तितत्संसाध्यमित्याह विधायेति २३ सात्वय्यसांत्वयित्वा सव्रजंसगोपम् वासोभिरलंकारैश्च कुप्याग्रैःरजतहेमादिव्यतिरिक्तद्रव्यश्रेष्ठैश्च अकूप्यंकुप्यहेमादेकूप्यमन्यद्धनादिकमितिहलायुधः २४ २५ द्विजसंस्कृतिंब्राह्मणसंस्कारंउपनयनलक्षणम् २६ गावोगाः रुक्मंसु वर्णं क्षौमाणिपुष्पमालाश्चासांसंतीतिक्षौममालिनीः २७

याःकृष्णरामयोःजन्मनक्षत्रेमनसादत्ताःसंकल्पितास्ताश्चाददात् याःकंसेनाधर्मेणहृतास्ताअपि २८ द्विजत्वमुपनीतत्वंप्राप्य लब्धसंस्कारौ लब्धदेहशुद्धी गायत्रंव्रतंगायत्रीजपानियमंब्रह्मचर्यंवा २९ प्रभवौमूलकारणे नान्येत्येकंपदं नगनाकशब्दवत् अन्यस्यसिद्धंनभवतीतिनान्यसिद्धंऔत्पात्तिकम् अतएवामलंयज्ज्ञानंतन्नरेहितैःमनुष्यचेष्टाभिश्छादयंतौ ३० यस्मादथतस्मात्काश्यंकाश्यपगोत्रजातम् ३१ यथावदुपासाद्यसमित्पाणी उपेतोस्मप्रापतुः भक्त्यादेवमिवेत्यनेनयस्यदेवेपराभक्तिर्यथादेवेतथागुरावितिश्रुतिंसूचयति ३२ अंगैःशिक्षादिभिःउपनिषद्भिःवेदांतैस्तदुपयो

याःकृष्णरामजन्मर्क्षेमनोदत्तामहामतिः ॥ ताश्चाददादनुस्मृत्यकंसेनाधर्मतोहृताः २८ ततश्चलब्धसत्कारौद्विजत्वंप्राप्यसुव्रतौ ॥ गर्गाद्यदुकुलाचार्या द्गायत्रंव्रतमास्थितौ २९ प्रभवौसर्वविद्यानांसर्वज्ञौजगदीश्वरौ ॥ नान्यसिद्धामलंज्ञानंगूहमानौनरेहितैः ३० अथोगुरुकुले वासमिच्छंतावुपजग्मतुः ॥ काश्यंसांदीपनिंनामअवंतिपुरवासिनम् ३१ यथोपासाद्यतौदांतौगुरौवृत्तिमनिंदिताम् ॥ ग्राहयंतावुपेतौस्मभक्त्यादेवमिवाद्दतौ ३२ तयोर्द्विज वरस्तुष्टःशुद्धभावानुवृत्तिभिः ॥ प्रोवाचवेदानखिलान्सांगोपनिषदोगुरुः ३३ सरहस्यंधनुर्वेदंधर्मन्यायपथांस्तथा ॥ तथाचान्वीक्षिकींविद्यांराजनीतिं चषड्विधाम् ३४ सर्वंतदमरश्रेष्ठौसर्वविद्याप्रवर्त्तकौ ॥ सकृन्निगदमात्रेणतौसंजग्रहतुर्नृप ३५ अहोरात्रैश्चतुःषष्ट्यासंयातौतावतीःकलाः ॥ ततश्चकृतवि द्यौतौकृतास्त्रौरामकेशवौ ॥ गुरुदक्षिणयाचार्यंछंदयामासतुर्नृप ३६ द्विजस्तयोस्तंमहिमानमद्भुतंसंलक्ष्यराजन्नतिमानुषींमतिम् ॥ संमंत्र्यपत्न्यासमहा र्णवेमृतंबालंप्रभासेवरयांबभूवह ३७ तथेत्यथारुह्यमहारथौरथंप्रभासमासाद्यदुरंतविक्रमौ ॥ वेलामुपव्रज्यनिषीदतुःक्षणंसिंधुर्विदित्वार्हणमाहरत्तयोः ३८ तमाहभगवानाशुगुरुपुत्रःप्रदीयताम् ॥ योसाविहत्वयाग्रस्तोबालकोमहतोर्मिणा ३९ तमाहवरुणोदेवोविनयावनतःस्थितः ॥ नचाहार्षमहंदेवदै त्यःपंचजनोऽहरत् ४० अंतर्जलचरःकृष्णशंखरूपधरोऽसुरः ॥ जलमाविश्यतंहत्वागृह्यतामित्युवाचसः ४१ ततस्तौजलमाविश्यहत्वांऽतर्जलवासि नम् ॥ विदार्यजठरंतस्यनापश्यदुदरेऽर्भकम् ४२ तदंगप्रभवंशंखमादायरथमागमत् ॥ ततःसंयमनींनामयमस्यदयितांपुरीम् ॥ गत्वाजनार्दनःशंखं प्रदध्मौसहलायुधः ४३ शंखनिर्ह्रादमाकर्ण्यप्रजासंयमनोयमः ॥ तयोःसपर्यांमहतींचक्रेभक्त्युपबृंहितः ४४ उवाचावनतःकृष्णंसर्वभूताशयालयम् ॥ लीलामनुष्यहेविष्णोयुवयोःकरवामकिम् ॥ इत्युक्तस्तेनदेवेशोदेवकीनंदनोऽब्रवीत् ४५

गिर्धीरहस्यज्ञानैर्वासहितान् ३३ सरहस्यंप्रयोगोपसंहारसहितं धर्मपथःवर्णाश्रमधर्मलक्षणः पूर्वमीमांसालक्षणोवा न्यायपथान्ब्रह्मतर्कादितर्कशास्त्रलक्षणांश्च आन्वीक्षिकींमीमांसाशास्त्रंवेदेति ह्यासार्थनिर्णायकं संधिचविग्रहंचैवयानमासनमेवच द्वैधीभावंसंश्रयंचषड्गुणान्कवयोविदुरितिषड्विधाम् ३४ सकृन्निगदमात्रेणएकवारंपाठमात्रेण ३५ चतुःषष्ट्यासंख्ययासंख्यातैरहोरात्रैःकालावय वैस्तावतीःतावत्संख्याःकलाःचतुःषष्टिकलाविद्याइत्यर्थः संयातौसम्यक्प्राप्तौ छंदयामासतुःप्रार्थयामासतुः ३६ महार्णवेप्रभासेतीर्थे ३७ वेलांतीरसीमाख्याम् ३८ योसौगुरुपुत्रः त्वयामहतो र्मिणाग्रस्तःसमर्पयतामित्यन्वयः ३९ तंकृष्णं ४० शंखमत्स्यरूपधरः ४१ ४२ ४३ ४४ सर्वभूतानामाशयोहृदयस्थानमालयोपस्यसतथातप ४५

४६ ४७ ४८ गुरुनिष्क्रियागुरुकृतप्रतिक्रियायुष्मद्विधानांपुंसांगुरोःकोनुकामानांमध्येकामोवाशिष्यते सर्वोपिकामःसिद्धोभवतीत्यर्थः ४९ ५० तौअपश्यंत्यः ५१ इतश्रीभागवतमहापुरा
णेदशमस्कंधेविजयध्वजकृतटीकायांत्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥ भगवन्मनोवशीकरणार्थभक्तिरेवप्रधानसाधनमितिदर्शयितुंहरेर्गोपीष्वनुकंपित्वंनिरूपयत्यास्मिन्नध्याये तत्रकृष्णउद्धवंगोकुलं
गमयितुंवक्ति वृष्णीनामिति १ यएवंविधगुणोपेतउद्धवस्तमाह क्वचिद्रहसि २ मद्वियोगेनममविरहेणयआधिस्तंमत्संदेशैर्मदीयाज्ञावचनैः ३ अहमेवप्राणोजीवनंयासांतास्तथा त्यक्तदैहि
काःदूरीकृतदहधर्माःदयितंइष्टस्यदातारंप्रेष्ठंस्वशरीरादेरपिप्रियतमं आत्मानंसंततानुगतरूपं ४ स्वस्वभक्तवात्सल्यंकथयति यइति येयेजनामदर्थेमांनिमित्तीकृत्यत्यक्तलोकधर्माः लोकोदेहस्त
द्धर्माः अशनवसनानुलेपनादिलक्षणास्त्यक्तायैस्तेतथा यद्वा त्यक्ताःस्वर्गादिलोकविषयाः धर्माःयागादिसुकृतलक्षणाःमदर्थेमन्निमित्तेनिवृत्तौवर्तमानायेते यद्वा मामुद्दिश्यत्यक्तादत्तालोकधर्माः

श्रीभगवानुवाच ॥ गुरुपुत्रमिहानीतंनिजकर्मनिबंधनम् ॥ आनयस्वमहाराजमच्छासनपुरस्कृतः ४६ तथेतितेनोपनीतंगुरुपुत्रंयदूत्तमौ ॥ दत्त्वास्व
गुरवेभूयोवृणीष्वेतितमूचतुः ४७ ततःप्रीतमनाराजन्विदंवचनमब्रवीत् ॥ सांदीपनिर्महाभागोरामकृष्णावरिंदमौ ४८ सम्यक्संपादितावत्सौभवद्यां
गुरुनिष्क्रिया ॥ कोनुयुष्मद्विधगुरोःकामानामवशिष्यते ॥ गच्छतंस्वगृहंवीरौकीर्तिर्वामस्तुपावनी ४९ गुरुणैवमनुज्ञातौरथेनानिलरंहसा ॥ आया
तौस्वपुरंतातपर्जन्यनिनदेनवै ५० समनंदन्प्रजाःसर्वादृष्ट्वारामजनार्दनौ ॥ अपश्यंत्योबहुहानिनष्टलब्धधनाइव ५१ इतिश्रीभागवतेमहापुराणेदश
मस्कंधेत्रिचत्वारिंशोध्यायः॥ ४३ ॥ श्रीशुकउवाच ॥ वृष्णीनांप्रवरोमंत्रीकृष्णस्यदयितःसखा ॥ शिष्योबृहस्पतेःसाक्षादुद्धवोबुद्धिसत्तमः १ तमाहभ
गवान्प्रेष्ठंभक्तमेकांतिनंक्वचित् ॥ गृहीत्वापाणिनापार्णिंप्रपन्नार्तिहरोहरिः २ गच्छोद्धवव्रजंसौम्यपित्रोर्नःप्रीतिमावह ॥ गोपीनांमद्वियोगार्धिंमत्संदे
शैर्विमोचय ३ तामन्मनस्कामत्प्राणामदर्थेत्यक्तदैहिकाः ॥ मामेवदयितंप्रेष्ठमात्मानंमनसागताः ४ येत्यक्तलोकधर्माश्चमदर्थेतान्बिभम्यर्हम् ॥ म
यिताःप्रेयसांप्रेष्ठेदूरस्थेगोकुलस्त्रियः ५ स्मरंत्यंगविमुह्यंतिविरहौत्कंठ्यविक्लवाः ॥ धारयंत्यतिकृच्छ्रेणप्रायःप्राणान्कथंचन ६ प्रत्यागमनसंदेशैर्वक्त
व्यामेमदात्मिकाः ॥ इत्युक्तउद्धवोराजन्संदेशान्भर्तुरादृतः ७ आदायरथमारुह्यप्रययौनंदगोकुलम् ॥ प्राप्तोनंदव्रजंश्रीमान्निम्लोचतिविभावसौ ८ छ
न्नयानःप्रविशतांपशूनांखुररेणुभिः ॥ वासितार्थेनियुध्यद्भिर्नादितंशुष्मिभिर्वृषैः ९ धावंतीभिश्चवास्राभिरूधोभारेणवत्सकान् ॥ इतस्ततोवृथद्भिर्गोभि
र्वत्सैश्चगुंफितम् १० गोदोहशब्दाभिरवंवेणूनांनिःस्वनेनच ॥ गायंतीभिश्चकर्माणिशुभानिबलकृष्णयोः ११

जनविषयाः नमनाद्याचारायैस्ते अहंतान्बिभेमितेभ्योभीतोस्मिबिभर्मिरक्षितास्मि मत्सायुज्यमावहंतीतिभक्तवश्यतांदर्शयति बिभर्मिवा ५ विरहेणोत्पन्नमौत्कंठ्यंउत्कंठारागित्वंतेनविक्लवाः ६
प्रत्यागमनसंदेशैःआगमिष्यतियुष्मत्प्रेष्ठःकृष्णइत्यादिवाक्यैः मयिआत्मामातिर्मननशक्तिःमतिर्बुद्धिर्यासांतास्त्वथामत्स्वभावावा ७ विभावसौसूर्येनिम्लोचति अस्तंगच्छतिसतिसूर्यवह्नीवि
भावसूइति दिवाकरइतिकेचित् ८ यानंरथः वासितार्थेसंभोगार्थे वृषकायिनीवासितावाशुष्मंस्थेमादृढंबलमेषामस्तीतिशुष्मिणःतैः ९ ऊधोभारेणयुक्ताभिःवास्राभिर्वत्सलोलुपाभिर्गोभिश्चव
त्सैश्चगुंफितंनादितं गवांयोनिनदोगुंफेतियादवः इतस्ततोवृथद्भिर्गोपैश्चसुविराजितमितिपाठः २५ ववृधद्भिरुत्पतद्भिःनृत्यद्भिर्वा इतस्ततोविलंघद्भिरितिकेचित्पठंति विलंघनंकुर्वद्भिः १० ११

१२ १३ १४ कशिपौशयनतल्पे १५ १६ मुक्तःबंधनक्लेशात् १७ दिष्ट्यादैवेनस्वकृतेन यदूनामितिषष्ठीद्वितीयार्थे कर्मपदमित्यध्याहार्यंवा १८ मातरःमातृः गावोगाः १९ २० २१ क्रियाःगृहादिविषयाः २२ तदात्मतांतस्मिन्नेवव्याप्तताम् २३ महतेअर्थायप्रयोजनाय २४ नागायुतवत्प्राणोबलचेष्टायस्यसतथातम् २५ अंगुष्ठमध्यमेविस्तृतेयत्परिमाणंसतालइत्युच्यते एतादृशतालत्रयपरिमाणं प्रादेशस्तालगोकर्णइति यष्टिइक्षुदंडम् २६ सुरासुराञ्जयंतीतिसुरासुरजितः २७ प्रेमप्रसरेणप्रेमसंदोहेनाविह्वलःविवशः २८ अवास्राक्षीत्निरंतरमुंचत् २९ ३० नूनमिदानीं ३१ नारायणशतावर्यौ ऐरावतोनागरंगइतिवत् नारायणोनामकश्चित्किंनस्यादखिलगुरुश्चपाषाणवादितित्राह एताविति एतौकृष्ण

स्वलंकृताभिर्गोपीभिर्गोवत्सैर्मंडितंसितैः ॥ अग्र्यकातिथिगोविप्रपितृदेवार्चनान्वितैः १२ धूपैर्दीपैश्चमाल्यैश्चगोपावासैर्मनोरमम् ॥ सर्वतःपुष्पितवनं द्विजालिकुलनादितम् ॥ १३ हंसकारंडवाकीर्णैःपद्मखंडैश्चमंडितम् ॥ तमागतंसमालोक्यकृष्णस्यानुचरंप्रियम् १४ नंदःप्रीतःपरिष्वज्यवासुदेवधियाऽर्चयत् ॥ भोजितंपरमान्नेनसंविष्टंकाशिपौसुखम् १५ गतश्रमंपर्यपृच्छत्पादसंवाहनादिभिः १६ नंदउवाच ॥ कच्चिदंगमहाभागसखानःशूरनंदनः ॥ आस्तेकुशल्यपत्याद्यैर्युक्तोमुक्तःसुहृद्वृतः १७ दिष्ट्याकंसोहतःपापःसानुगःस्वेनपाप्मना ॥ साधूनांधर्मशीलानांयदूनांद्वेष्टियःसदा १८ अपि स्मरतिनःकृष्णोमातरःसुहृदःसखीन् ॥ गोपान्व्रजंचात्मनाथंगावोवृंदावनंगिरिम् १९ अप्यायास्यतिगोविंदःस्वजनंसकृदीक्षितुम् ॥ तर्हिद्रक्ष्यामतद्वक्त्रंसुनसंसुस्मितेक्षणम् २० दावाग्नेर्वातवर्षाच्चवृषात्सर्पाच्चरक्षिताः ॥ दुरत्ययेभ्योमृत्युभ्यःकृष्णेनसुमहात्मना २१ स्मरतांकृष्णवीर्याणिलीलापांगनिरीक्षणम् ॥ हसितंभाषितंचांगसर्वानःशिथिलाःक्रियाः२२सरिच्छैलवनौद्देशान्मुकुंदपदभूषितान् ॥ आक्रीडानीक्षमाणानांमनोयातितदात्मताम् २३ मन्येकृष्णंचरामंचप्राप्ताविहसुरोत्तमौ ॥ सुराणांमहदर्थायगर्गस्यवचनंयथा २४ कंसंनागायुतप्राणंमल्लौगजपतिंतथा ॥ अवधीत्लीलयैवपशूनिवमृगाधिपः २५ तालत्रयंमहासारंधनुर्यष्टिमिवेभराट् ॥ बभंजैकेनहस्तेनसप्ताहमदधाद्गिरिम् २६ प्रलंबोधेनुकोरिष्टतृणावर्तबकादयः ॥ दैत्याःसुरासुरजितोहतायेनेहलीलया २७ श्रीशुकउवाच ॥ इतिसंस्मृत्यसंस्मृत्यनंदःकृष्णानुरक्तधीः ॥ अश्रुकंठोऽभवत्तूष्णींप्रेमप्रसरविह्वलः २८ यशोदावर्ण्यमानांनिपुत्रस्यचरितानिच ॥ शृण्वत्यश्रूण्यवास्राक्षीत्स्नेहस्नुतपयोधरा २९ तयोरित्थंभगवतिकृष्णेनंदयशोदयोः ॥ वीक्ष्यानुरागंपरमंनंदमाहोद्धवोमुदा ३० ॥ उद्धवउवाच ॥ युवांश्लाघ्यतमौनूनंदेहिनामिहमानद ॥ नारायणेऽखिलगुरौयत्कृतामतिरीदृशी ३१ एतौहिविश्वस्यचबीजयोनीइमौप्रधानंपुरुषःपुराणः ॥ अन्वीयभूतेषुविलक्षणेषुविज्ञायईशातइमौपुराणौ ३२

रामौविश्वस्यप्रपंचस्यबीजयोनीबिजित्वेनरतिहेतुत्वाद्रेतस्त्वेनोपजीव्यत्वेनवायोनित्वेनस्वमहिम्नारेतोनिधानस्थानत्वेनकारणत्वेनवा कीर्तितावितिशेषः बीजंशुक्रंफलेसस्यान्नेइतियादवः योनिःस्त्रीणांभगस्थानेकारणेताम्रकेपणेइतिच यद्वा विश्वनाम्नोहरेःबीजेफलेनिष्पन्नरूपौयोनीगोवर्धनस्योद्धरणादिकर्मणातत्त्वस्ययोग्यौच योग्ययत्नक्षमारूपधानोपाधिषुवंदनइतिलाभेनिष्पत्तिभोगेचबीजंफल

१ नारायणशब्दार्थमतइतिक्वचित्पाठः ।

धनेफलमितिच यद्यंनविष्णुस्तर्हिगोवर्धनोद्धरणादिकर्मनकुर्यात् मानवबलासाध्यत्वादित्यादिहिशब्दोवक्तिअजामेकांलोहितशुक्लकृष्णां प्रधानादिदमुत्पन्नमित्यादिनाप्रकृतेर्बीजयोनित्वप्रतीतेःकथमेतयोर्युज्यतइतितत्राह इमाविति यस्त्वेषपुरुषःप्रकृतिंरितिश्रुतेः प्रधानंप्रकृतिर्मूलकारणमित्यर्थः अनेनविष्णोरचस्यकारणत्ववाप्यपिचित्प्रयुक्तेत्याशयेनाह पुरुषइति प्रकृतिंपुरुषंचैवप्रविश्यपुरुषोत्तमइत्यादेः तत्कारणत्ववाचोपिगतिरुक्ताभवतीति असंगस्यतत्प्रवेशःकथमित्यतउक्तंपुराणइति पुरमणतिप्राप्नोतीति तदेवानुपाविशदितिश्रुतेरसंगस्यापिप्रवेशोयुज्यतइत्यर्थः यद्वा बीजयोनित्वेहेतुमाह प्रधानमिति प्रधानत्वात्सर्वस्मादुत्तमत्वात् एकमेवाद्वितीयामितिश्रुतेः उत्तमत्वंकुतइत्यत्राह पुरुषइति पुरातनपुरुषत्वात् अन्येषामर्वाचीनपुरुषत्वादित्यर्थः केवलमवतारप्रयोजनंकंसादिहननंनभवति किंतुस्वोपदिष्टज्ञानरक्षणंचेतिभावेनाह अन्वीयेति इमौपुराणौपूर्णानंदौकृष्णरामौविलक्षणेपुविविधलक्षणेपुनानाविधव्यावर्तकधर्मैपुभूतेषुअन्वीयअवतीर्य विज्ञापयन्यासाद्यात्मनाविशिष्टज्ञानमुत्पाद्यासुरजनप्रकृतिजनेनतन्नाशंविज्ञाय तद्धननेनतिरोहितज्ञानोपदेशेनचज्ञानस्पेशातेसमर्थयेतेरक्षतइत्यन्वयः ३२ जन्मादिकंश्रोतव्यंश्रीकृष्णस्यैवमोक्षहेतुत्वात्तस्येतिभावेनाह यस्मिन्निति कर्माशयंश

यस्मिन्जनःप्राणवियोगकालेक्षणंसमावेश्यमनोविशुद्धम् ॥ निर्धूयकर्माशयमाशुयातिपरांगतिंब्रह्ममयोऽर्कवर्णः ३३ तस्मिन्भवंतावखिलात्मयोनौ
नारायणेकारणमर्त्यमूर्तौ ॥ भावंव्यधत्तांनितरांमहात्मन्किवावशिष्टंयुवयोःसुकृत्यम् ३४ आगमिष्यत्यदीर्घेणकालेनव्रजमच्युतः ॥ प्रियंविधास्यतेपि
त्रोर्भगवान्सात्वतांपतिः ३५ हत्वाकंसंरंगमध्येप्रतीपंसर्वसात्वताम् ॥ यदाहवःसमागम्यकृष्णःसत्यंकरोतितत् ३६ माखिद्येतांमहाभागौद्रक्ष्यथःकृष्ण
मंतिके ॥ अंतर्हृदिसभूतानामास्तेज्योतिरिवैधसि ३७ नह्यस्यातिप्रियःकश्चिन्नाप्रियोवास्त्यमानिनः ॥ नोत्तमोनाधमोवापिसमानस्यसमोपिच ३८
नमातानपितातस्यनभार्यानसुतादयः ॥ नात्मीयोनपरश्चास्यनदेहोजन्मकर्मवा ३९ लोकेस्यजन्मकर्माणिसदसन्मिश्रयोनिषु ॥ क्रीडार्थंसोपिसाधूनां
परित्राणायकल्पते ४० सत्त्वंरजस्तमइतिभजतेनिर्गुणोमहान् ॥ क्रीडन्ननीहोऽनुगुणैःसृजत्यवतिहंत्यजः ४१ युवयोरेवनैवायमात्मजोभगवान्हरिः ॥ सर्वे
षामात्मजोह्यात्मापितामातासईश्वरः ४२ दृष्टंश्रुतंभूतभवद्भविष्यत्स्थास्नुचरिष्णुमहदल्पकंच ॥ विनाच्युताद्वस्तुतयानचान्यत्सएवसर्वंपरमार्थरूपः ४३

रीरारंभकर्मसमूहं यस्मिन्मनोवानिगृह्यविनियम्यविनाश्य ब्रह्ममयःज्ञानप्रधानइत्यर्थः अर्कवत्स्फटिकवद्वर्णःप्रकाशोयस्यसतथा अतिस्वच्छइत्यर्थः ३३ भावंभक्तिं यद्वा लीलादिकंवा यद्विषय
मंतरेणकिमपिनास्तीत्यर्थः व्यधत्तांव्यदधातां कृतवंतावित्यर्थः महात्मन्महात्मनिचेतनोत्तमेइत्यर्थः ३४ ३५ प्रतीपंप्रतिकूलम् ३६ अंतिकेकालज्ञेयंविना बालबुद्धिमंतरेणकृष्णस्यदूरस्थःत्वंनास्ती
त्याह अंतर्हृदीतिएधसिकाष्ठे ज्योतिरग्निः ३७ प्रेष्ठानांहृद्येववर्ततेनान्येषामितिनियमोनास्तीतिभावेनाह नहीति अमानिनः अहंममाभिमानरहितस्य योग्यतानुसारेण समानस्यसमोपिचेतिपाठः
३८ ३९ नन्वेवंविधस्यहरेःकथंजन्मादिकमुपपद्यतइतितत्राह लोकइति सदसन्मिश्रयोनिषुसुरनरतिर्यग्योनिषु ४० अनुगुणैस्तत्तत्कर्मानुकूलैःसत्वादिभिः ४१ सम्यक्प्रणिहितेआत्मनिमनासिजाय
तेप्रकाशतइत्यात्मजइत्यध्यात्मम् ४२ युवयोरेकंतत्त्वंसंक्षिप्यवदामीत्याह दृष्टमिति भविष्यत्भूतंभवद्वर्तमानंस्थास्नुस्थावरंचरिष्णुजंगमंअच्युताद्विनाऽन्यत् ब्रह्मादिकंवस्तुतयास्वातंत्र्येणनैवास्ति किं
तुसर्वंसएवतदधीनमेव सकीदृशःपरमार्थरूपःनित्याप्रतिहतस्वरूपइतिवुध्यध्वमिति ४३

निरूप्यप्रज्वाल्यवास्तून्गृहद्वारिदेहल्यादिषुवास्तुदेवताःमार्जनालेपनाक्षतादिभिः सभ्यगभ्यर्च्यअमंथन्ममंथुः ४४ मथनरज्ज्वाविकर्षतः उल्लिखंतःकरकंकणायासांताः यद्वामथनरज्ज्वाऽवि
कर्षतः चलद्भिर्नितंबादिभिस्त्विषंतिकपोलादीनिअरुणकुंकुमानिआननानियासांतथाअरुणानिकुंकुमानियेषुतानितथावा ४५ येनध्वनिनादिशाममंगलमित्यनेनादिगंतर्वासिनांजनानामशुभं
नश्यतीत्युच्यते ४६ शातकौंभंशातकुंभेनसुवर्णेनविरचितम् ४७ ४८ प्रेतस्यमृतस्यभर्तुःकंसस्यानिष्कृतिमानृण्यमस्माभिःकरिष्यति अस्मदंडेनकर्तुमिच्छतिकिमित्यर्थः इतिवदंतीनांकृता
ह्निकः अनुष्ठितप्रातःकालक्रियः ॥ ४९ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेविजयध्वजकृतटीकायांचतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥ गोपस्त्रीणांव्यामोहोक्तिभंग्यापिश्रीकृष्णैकभक्तिनिरूपयत्य
स्मिन्नध्याये तत्रगोपीनामुद्धवसंदर्शनात् हृष्टमनसांतत्त्वप्रश्नप्रकारंवक्तुमाह तंवीक्ष्येति परिमृष्टकुंडलं शाणोल्लीढवत्द्योतमानकर्णाभरणम् १ अतीवप्रशस्ततमंदर्शनमवलोकनंयस्यसतथा अयंकइतिसा
मान्यप्रश्नः कुतोदेशादागतइतिचविशेषप्रश्नः अच्युतस्येववेषभूषणानियस्यसतथा वैष्णवलक्षणेनेतरव्यावृत्तोऽसौकः वैष्णवेषुकिंनामधेयइतिततोऽपिविशेषप्रश्नइतिमिथोनुव्रज्यसामान्यतोऽस्मत्प्रे

श्रीशुकउवाच ॥ एवंनिशासाब्रुवतोर्व्यतीतानंदस्यकृष्णानुचरस्यराजन् ॥ गोप्यःसमुत्थायनिरूप्यदीपान्वास्तून्समभ्यर्च्यदधीन्यमंथन् ४४ तादीप
दीप्तैर्मणिभिर्विरेजूरज्ज्वाविकर्षत्करकंकणाःस्त्रियः ॥ चलन्नितंबस्तनहारकुंडलत्विषत्कपोलारुणकुंकुमाननाः ४५ उद्गायतीनामरविंदलोचनंव्रजांगनानां
दिवमस्पृशद्ध्वनिः ॥ दध्नश्चनिर्मंथनशब्दमिश्रितोनिरस्यतेयेनदिशाममंगलम् ४६ भगवत्युदितेसूर्येव्रजद्वारिव्रजौकसः ॥ दृष्ट्वारथंशातकौंभंकस्याय
मितिचाब्रुवन्४७अक्रूरआगतःकिंवायःकंसस्यार्थसाधकः ॥ येननीतोमधुपुरींकृष्णःकमललोचनः४८किंसाधयिष्यत्यस्माभिर्भर्तुःप्रेतस्यनिष्कृतिम् ॥ इ
तिस्त्रीणांवदंतीनामुद्धवोऽगात्कृताह्निकः ॥ ४९ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेचतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥ श्रीशुकउवाच ॥ तंवीक्ष्य
कृष्णानुचरंव्रजस्त्रियःप्रलंबबाहुंनवकंजलोचनम् ॥ पीतांबरंपुष्करमालिनंलसन्मुखारविंदंपरिमृष्टकुंडलम् १ सुविस्मिताःकोयमतीवदर्शनःकुतश्चकश्चा
च्युतवेषभूषणः ॥ इतिस्मसर्वाःपरिवव्रुरुत्सुकास्तमुत्तमश्लोकपदांबुजाश्रयम् २ तंप्रश्रयेणावनताःसुसत्कृतंसव्रीडहासेक्षणसूनृतादिभिः ॥ रहस्यपृच्छ
न्परिविष्टमासनेविज्ञायसंदेशहरंरमापतेः ३ जानीमस्त्वांयदुपतेःपार्षदार्यमनुव्रतम् ॥ भर्त्रेहप्रेषितःपित्रोर्भवान्प्रियचिकीर्षया ४ अन्यथागोव्रजेतस्य
स्मरणीयंनचक्ष्महे ॥ स्नेहानुबंधोबंधूनांमुनेरपिसुदुस्त्यजः ५ अन्येष्वर्थकृतामैत्रीयावदर्थाविडंबना ॥ पुंभिःस्त्रीषुकृतायद्वत्सुमनास्त्रिवषट्पदैः ६

ष्टइतिस्मृत्वातंपरिवव्रुः आवेष्टितवत्यइत्यन्वयः २ पुनस्ताभिःकिंकृतमत्राह तमिति अनेनसामान्यज्ञानंविशिष्टज्ञानपर्यवसायीतिनिरणायि प्रश्रयेणोपचारेण प्रियंसत्यंचसूनृतमितिच ३ पार्षदार्यंपा
र्षदानांसमीपवर्तिनांभृत्यानांश्रेष्ठंतैःपूज्यंवा अनुव्रतंभगवन्मनोनुकूलव्रतम् ४ अन्यथायशोदानंदगोपयोःप्रियकरणेच्छामंतरेणस्मरणीयंस्मरणकारणयोग्यंनचक्ष्महेनपश्यामः गोव्रजेभुविगोष्ठं सुर
भिलोकव्यावृत्त्यर्थोगोशब्दः गवांव्रजःसमूहोयस्मिन्स्थानेतत्तथातस्मिन्वा पशुजातियुक्तगोष्ठेवा ५ इतोपिस्नेहलक्षणानुग्रहंविनाऽन्यन्नास्तीतिभावेनाह अन्येष्विति अन्येषुपितृव्यातिरिक्तेषुबंधु
षुमैत्रीस्नेहानुवृत्तिलक्षणामित्रभावोक्तिः अर्थकृताप्रयोजननिबद्धाइत्यन्वयः कथमिवेतित्राहुः यावदर्थेति यद्वत्त्यथापुंभिःस्त्रीषुकृतामैत्री यावदर्थयावत्प्रयोजनसमाप्तिपर्यंतंविडंबनमनुकरणमात्रंय
स्याःसातथा यावदर्थविडंबयत्यनुकरोतीतियावदर्थविडंबनावा इममर्थंदृष्टांतांतरेणद्रढयति सुमनःस्विति षट्पदैःभृंगैः ६

निःस्वंवित्तहीनं अकल्पंरक्षणादावसमर्थं दत्तदक्षिणंयजमानंवा ७ वीतफलंरहितंप्रणयकोपातिरेकदर्शनार्थबहुदृष्टांतकथनं जारउपपतिः ८ उत्तरकथाप्रसंगःकथितमाह ददर्शेति गोविंद गतमनआदिभिस्त्यक्तलौकिकाः त्यक्ताःलोकाचाराःपुरुषाग्रतःस्थितवसनादिदृढीकरणादिलक्षणाक्रियायाभिस्तास्तथा ९ गायंत्यः गायंतीःरुदंत्यःरुदंतीःकैशोरशैशवावस्थायां गताहियइतिलो काचारविरुद्धाचरणंगानादिकम् १० तथाचकृष्णसंगमध्यानेनमुग्धाकाचिन्मधुकरंदृष्ट्वाप्रियेणकृष्णेनमस्थापितंप्रेषितंदूतंकल्पयित्वा इदंवक्ष्यमाणमब्रवीदित्यन्वयः ११ हेमधुरसपत्न्याः मथुरायांस्थितायाःसमानभार्यायाः अधरमधुपानलोलोद्धव तस्याआलिंगनकालेदृढपीडितकुचाभ्यांविलुलितायाइतस्ततोविक्षिप्तायामालायामनुषक्तकुचकुंकुमेनरूषितश्मश्रुभिरंचितस्त्वमस्मान् मास्पृश प्रणयकोपात्कितवबंधोइतिसंबोधयतिकितवस्यनवनीतादिपरद्रव्यचोरस्यकृष्णस्यबंधोनकेवलंत्वमेवमास्पृशाकिंतुसाकितवोनस्पृशात्वितिभावेनवक्ति वहत्विति समधुपतिःश्रीकृष्णःतस्यांमथुरा यांविद्यमानानांमानिनीनांमानधराणांस्त्रीणांप्रसादंप्रणयकोपशांतिलक्षणमनुग्रहंप्रसादंवहतु नतमूर्ध्वंतिशेषः कीदृशंयदुसदसिविदंभ्यंअनुकरणयोग्यंसोत्प्रासपूर्ववक्तव्यं सोत्प्रासःसमनाकस्मितमिति स्व कैतवंपरस्मिन्नपिसंक्रामयितुंपटुतमइतिभावेनाह यस्येति यस्यकृष्णस्यदूतस्त्वमपीदृग्धूर्तइत्यर्थः हेभ्रमरकितववंधोउन्मत्तपुष्पवंधोसपत्न्याःभृंग्याःकुचस्पर्शनेनविलुलितमालउद्बुद्धकाम आसमंता

निःस्वंत्यजंतिगणिकाअकल्पंनृपतिंप्रजाः ॥ अधीतविद्याआचार्यमृत्विजोदत्तदक्षिणम् ७ खगावीतफलंवृक्षंभुक्त्वाचातिथयोगृहम् ॥ दग्धंमृगास्तथाऽर ण्यंजारोभुक्त्वापरस्त्रियम् ८ ददर्शगोपीर्गोविंदमनोवाग्देहचेष्टितैः ॥ कृष्णदूतोव्रजंप्राप्तउद्धवस्त्यक्तलौकिकाः ९ गायंत्यःप्रियकर्माणिरुदंत्यश्चगताह्रि यः ॥ तस्यसंस्मृत्यसंस्मृत्ययानिकैशोरबाल्ययोः १० काचिन्मधुकरंदृष्ट्वाध्यायंतीकृष्णसंगमम् ॥ प्रियप्रस्थापितंदूतंकल्पयित्वेदमब्रवीत् ११ गोप्यु वाच ॥ मधुपकितवबंधोमास्पृशास्मान्सपत्न्याःकुचविलुलितमालाकुंकुमश्मश्रुभिस्त्वम् ॥ वहतुमधुपतिस्तन्मानिनीनांप्रसादंयदुसदसिविडंभ्यंयस्यदू तस्त्वमीदृक् १२ सकृदधरसुधांस्वांमोहनीपायायित्वासुमनसइवसद्यःकस्त्यजेन्मांभवादृक् ॥ परिचरतिकथंतत्पद्मकिंजल्कपादमपिबतहृतचित्ताउ त्तमश्लोकजल्पैः १३

त्कुंकुमपुष्परसमिश्रमुत्करोमभिरस्मान्मास्पृश ईदृक्त्वंयस्यवसंतस्यदूतस्समधुश्चायंपतिश्चेतिमधुपतिःवसंतनामापरिवृढःयत्सदसिपुण्यसमूहेविडंभ्यंस्थिरीकर्तव्यमेतन्मानिनीनांभृंगीणांप्रसादंप्रसन्नभावंव हतुकरोतु कृष्णवद्वैलक्षण्यंनकरोत्विति वा उन्मत्तःकितवोधूर्तइत्यमरः १२ कृष्णस्यकितवत्वंकथमापाद्यतेइत्यतएवमितिव्यनक्ति सकृदिति भवादृक्भवानिव पूज्यइवास्थितःकःपुरुषः मांत्यजेन्नत्यजति मत्त्यागेहत्यादोषोभवति ब्राह्मणंस्वयमाहूययाचमानमकिंचनम् पश्चान्नास्तीतियोब्रूयात्तमाहुर्ब्रह्मघातकमितिस्मृतिर्वदतीतिभावेनकथितः स्वामधरसुधांअधरोष्ठामृतंपाययित्वेतिनि षेधवचनाभावादुक्तदोषःकथंस्यादित्याशंक्यसकृत्पानेनास्यबहुतृष्णाजननहेतुत्वात्ततोप्यधिकइवेतिभावेनोक्तं सकृदिति तृष्णाजनकत्वंचकथमित्यतउक्तंमोहनीमिति बुद्धिमोहकरीम् मोहिनी मितिपाठेमोहकत्वशक्तिरस्यास्तीत्यर्थः अत्रनिदर्शनमाह सुमनसइति यथासुमनसःपुष्पस्यगंधमाघ्रायपुनस्तदानीमेवतत्त्यागोदृष्टचरस्तथेति तस्यसत्वतृष्णानास्तिचेत्तवापिमाभूदितिमाशंकीतिभावग र्भमाह परिचरतीति अत्रलक्ष्मीपदममरश्रीपदंचाध्याहृत्यव्याख्येयं लक्ष्मीः मथुरांगनावा तस्यकृष्णस्यपद्मकिंजल्कवत्कोमलंपादंकथंकेनप्रकारेणपरिचराति शुश्रूषतइति शंकित्वाहेतुमाह अपीति

---

१ यद्वातस्मिन् भ्रमरएवप्रियप्रस्थापितोद्धवदृष्टिंकृत्वामधुकरापदेशेनोद्धवमेवाब्रवीदित्यर्थः ।

सापिउत्तमश्लोकजल्पैःउत्तमश्लोकस्यहरेःजल्पैःमधुरवचनविशेषैर्हृतचित्तामुग्धचित्तत्वात्तृष्णयापरिचरतीत्येवंनिश्चेयं बतहर्षे चित्ताउत्तमेतिसंध्यकरणेनाप्रियत्वातिरेकदर्शनार्थमेवंकथनं नतुदोषापादकत्वेन निर्दोषकत्वात्तस्यसर्ववैलक्षण्यप्रदर्शनार्थंचेतिज्ञाप्यतइति सुमनसइवसद्यइत्यनेनशरीरदौर्गंध्यंकितवपांडित्यंप्रदर्शितंवप्रवयसस्त्वंचेतित्यागनिमित्तानिनसंतीतिसूचयति सुमनसइवपुष्पस्य सदृशीयथापुष्पंसौरभ्येणघ्राणेंद्रियतर्पकत्वेनचसेव्यंस्यात्तथाहंसद्यःसद्यस्कायथाप्रत्यग्रवयसिवर्त्तमानातरुणीतरुणैःपरिहर्तुंनशक्यांतथेति किंचसुमनसःमालत्यालतायाःतनुत्वंयथातथाममध्येमुष्टिग्राह्यत्वमनेनालिंगनेसुखोद्रेकंलक्षयति यथासुमनसोदेवाःस्वसेवकंनत्यजंतितथामामपि यथाबुधाःकामकलाज्ञास्तरुणींनमुंचंतीतितथावा अतोभवादृगेवश्रीकृष्णएवनृशंसत्वेनत्यक्तवानितिवा सुमनाःपुष्पमालत्योःस्त्रीदेवबुधयोःपुमानितियादवः इतरत्समंपरिहरतीतिकेचित्पठंति १३ स्वपुरतोवर्ण्यमानयाप्रियवार्तयोद्बुद्धमदनकलिकापुनरपिश्रोतुकामाअसहमानेवाधिक्षिप्तंकोपनार्थमधिकंवक्तीतिकृत्वातमुद्धवमाक्षिपतीवबक्ति किमिहेति षट्सुदर्शनेषुसंध्यादिषुचांघ्रिरवक्रगतिर्यस्यसतथा षट्सुविषयेषुभगवद्भक्तिपरिपंथिषुअंघ्रिःपादोयस्यसतथेतिवा तस्यसंबुद्धिःहेषडंघ्रे उद्धव अधिरधिलधिगत्यर्थाइतिधातुःत्वंअगृहाणांगृहाश्रमरहितानांवनचारिणामित्यर्थः नोस्माकमिहाग्रतःपुराणंपुरेवर्तमानं यदूनामधिपतिंकिंबहुकर्णबिलपूरंगायसिनशब्दयेत्यन्वयःकैगैशब्दइतिधातुः तस्यगृहांतर्वर्तित्वेनवनमध्यवासिपुरतोगायनमनन्वितमित्यर्थः तर्हीदंकस्याग्रतोयुक्तमितितत्राह विजयेति विजयोर्जुनस्तस्यसखाकृष्णःतस्यसखीनांमथुरांगनानांअग्रतस्तस्यकृष्णस्यप्रसंगःगायतांगायितांत्वयेतिशेषः तत्रगातुस्तवफलसिद्धिरप्यस्तीत्याह क्षपितेति तत्प्रसंगेनक्षपितानिरस्ताकुचानांरुक्संतापलक्षणायासांतास्तथा इष्टाःकृष्णप्रियाःमथुरांगनाउद्धात्रेतेतुभ्यंमिष्टमभीष्टंधनादिकंकल्पयंतीत्यन्वयः त

किमिहबहुषडंघ्रेगायसित्वंयदूनामधिपतिमगृहाणामग्रतोनःपुराणम् ॥ विजयसखसखीनांगायतांतत्प्रसंगःक्षपितकुचरुजस्तेकल्पयंतीष्टामिष्टाः १४ दिविभुविचरसायांकास्त्रियस्तदुरापाःकपटरुचिरहासभ्रूविजृंभस्ययाःस्युः ॥ चरणरजउपास्तेयस्यभूतिर्वयंकाअपिचकृपणपक्षेउत्तमश्लोकशब्दः १५ विसृजशिरसिपादंवेद्म्यहंचाटुकारैरलमनुनयसारैर्यार्हिदौत्येमुकुंदम् ॥ स्वकृतइहविसृष्टापत्यपत्याप्तलोकाव्यसृजदकृतचेताःकिंनुसंधेयमस्य १६

स्मात्तेऽयंधनसमयइतिश्रुतेःतत्प्रसंगमितिपाठेभवान्गायतामित्यात्मनेपदेलोट् तत्प्रसगंक्षपितेतिपाठेयायदुपतिविषयागीतिस्तांत्वंगायेतिपरस्मैपदेलोट् तस्यप्रसंगेनप्रकृष्टालिंगनलक्षणेनेति विजयसखसखीनामग्रतोयदुपतिंगायतांपुंसांतेकृष्णेष्टाःस्त्रीजनाअभीष्टंकल्पयंतीतिवा १४ ननुप्रगल्भाचेत्त्वेमंवप्रलपनंविनामत्तकाशिन्यालज्जाभावात्कृष्णआगमिष्यतीतिशंकामाभूदित्याह दिवीति स्वर्गादिषुविचरमानादेवस्त्रियःतस्यकृष्णस्यदुरापाःदुष्प्रापाःस्युःकिंतुसुप्रापाएव कर्षणमंत्रमाह कपटेति याःस्त्रियःकपटश्चरुचिरश्चहासयुक्तोयोभ्रूविजृंभःभ्रूभंगस्तस्यविषयालक्षीभूताःस्युःअध्यात्मकमानंदंपटयतिगमयतीतिकपटांरुचिंस्पृहांरातिददातीतिकपटरुचिरःहेकपटेतिवा तत्रहेतुमाह चरणेति भूतिर्लक्ष्मीर्यस्यहरेश्चरणरजउपास्तेतदनुग्रहार्थमितिशेषः ननुभवंत्योपितथाकुर्वंत्वित्यत्राह वयमिति तत्रवयंवनचारिण्यःकाःस्याम अपिचपुनरपिशृणु कृपणस्याकिंपचानस्यास्मद्विधस्यजनस्यपक्षे अंतिकेउत्तमश्लोकशब्दएवकर्णविषयोनतुवाच्योर्थश्चक्षुर्विषयइत्यर्थः यद्वा उत्तमश्लोकशब्दःकृपणपक्षेदीनपक्षपातीश्रुतःसोप्यस्मद्विषयोनाभूदित्यर्थः १५ प्रणतकृष्णशिरस्थितस्वपादस्मरणातिरेकविवशास्वपादमुद्धवशिरासिस्थितंमत्वावाक्ति विसृजेति तवशिरासिस्थितंममपादंविसृजमुंच अहंत्वांवेद्मि अनुनयसारैःसांत्वविषयैश्चाटुकारैरापातरमणीयैःप्रियवचनैःअलंपर्याप्तं किंचदौत्येस्थितःत्वंमुकुंदंयाहि किमित्येवंकोपगर्भवचनंवदसीतितत्राह स्वकृतइति स्वकृतेस्वनिमित्तंकृष्णार्थमित्यर्थः विसृष्टापत्यपत्याप्तलोकाःत्यक्तपुत्रभर्तृबंधुजनाः अस्मानिहवनेव्यसृजदितियदतोऽकृतचेताः अकृतज्ञःकृतघ्नइत्यर्थः इतोहंत्वांसंदधामीतितत्राह किंन्विति अस्यकृष्णस्यानुसंधेयंकिंनुनकिमपीत्यन्वयः अनुनयसारैःश्रेष्ठैःवा उत्तमश्लोकशब्दोयमसंकांबचरणामलक्तकःशशी संध्यारुणइवाभातियस्यपायात्सवःशिवइतिवचनात् ईश्वरोऽप्यज्ञजनमोहनार्थमेवंविधलीलाजयतीति १६

मणपकोपातिरेकेणासंधेयत्वेदोषानुत्पादयति मृगपुरिति घोरामनामाभूत्वाकपींद्रंवालिनंविव्यधोहिंसितवान् कइव मृगपुर्लुब्धकइव यथालुब्धकःउपाशयेस्थित्वाविध्यतिमृगंतथायमपीत्याक्षेपार्थः क पेःसुग्रीवस्यइंद्रियंद्रावितवानित्यपराधंदृष्ट्वेतिस्तुत्यर्थः किंच किरातःनिषादइव स्त्रियंविरूपांछिन्ननासिकाकर्णत्वेनसौंदर्यहीनामवृत परामृष्टायाःशूर्पणख्यामेपतिर्भवेतिविरूपंविपरीतशब्दंश्रुत्वाविरूपामकरोत् नतुशुद्धस्त्रियमितिनिष्कृष्टोर्थः किनःपरमानंदिनोमुक्ताःरातंमित्रंयस्यसाकिरातः स्त्रीजितःस्त्रैणः स्त्रीजितापराभूतायेनसतथा कामयानांपतिमिच्छंतीं कामएवयानंयस्याःसातथा स्मरना मरथाधिरूढत्वादुष्टामित्यर्थः किंचवामनावतारेमहावहपर्वयज्ञेसबहुमानंबलेःत्रिपदपरिमितंभूम्युपहारमादायकृतघ्नइवायंबलिनामानंदैत्यंबिल्वासंपातालवासिनंअकृत पूजायांहेतुमाह वेदेति वेदवि दामृषीणांवर्गेणसमूहेनवंद्यइतियत्तस्मान्मुग्धाद्बलेःपूजामवाप्यापितंबद्धापातालनिवासिनमकरोदित्यर्थः बलपरिवर्तनइतिधातोः बलिमिंद्ररयविद्यमानेत्रैलोक्येपरिवर्तमानंपरकीयंस्वीयवत्वशंकृत्वाचर णलक्षणंचौर्याख्यापराधंदृष्ट्वादुष्टशिक्षणंकृतवानित्याध्यात्मार्थः वकारवकारयोःअन्योन्यात्मकमनुशासनसिद्धं कृष्णःकीदृशः वेदविदांवैदिकानांवर्गोवर्जनंयेषुतेवेदाविद्वर्गाबंधादयःतैःवंद्यइत्यनेनाविद्य मानकथननिपुणत्वेनास्मन्मनोमोहनंकृत्वाहृतवानितिसूचितं निंदास्तुतीउपसंहरति तदिति यतोऽयंकृष्णोस्मासुशोकाधानमकरोत्तस्मादसितेनमालिनेनकृष्णेनसहसख्यैःसहासनशयनादिलक्षणैरलंवा रितं असितस्यमेघश्यामस्यनित्यमुक्तस्यवा पित्रबंधनइतिधातुः हरेःसरूपशब्देनार्चनादिकमुपलक्ष्यते अर्चनादिभिरलंभूषणमात्मनइतिशेषः निर्विण्णाचेत्किमितितत्प्रसंगंकरोषीतितत्राह दुस्त्यजइति तस्यकृष्णस्यकथार्थः चरितविषयव्यवहारोदुस्त्यजस्त्यक्तुमशक्यःपारवश्यादितिशेषः किंचदुःखंत्यजतीति यद्वातस्यकथानिवृत्तिः अशोभनंददातीति १७ गुणाअप्यनेनसूचिताइतिप्रकटनायोत्तर

मृगयुरिवकपींद्रंविव्यधेयःकिरातःस्त्रियमकृतविरूपांस्त्रीजितःकामयानाम् बलिमपिबिलवासंवेदविद्वर्गवंद्यस्तदलमसितसख्यैर्दुस्त्यजस्तत्कथार्थः १७
यदनुचरितलीलाकर्णपीयूषविप्रुट्सकृददनविधूतद्वंद्वधर्माविनष्टाः ॥ सपदिगृहकुटुंबंदीनमुत्सृज्यदीनाबहवइहविहंगाभैक्षचर्यांचरंति १८ वयमृतामिव
जिह्मंव्याहृतंश्रद्दधानाःकुलिकरुतमिवाज्ञाःकृष्णवध्वोहरिण्यः ॥ ददृशिमसकृदेतत्तन्नखस्पर्शतीव्रस्तनरुजपरमार्तिंभण्यतामस्यवार्ता १९

बंधेनगुणानेववक्ति यदनुचरितेति यस्यकृष्णस्यानुवचनमनुयुगंवान्ववतारंवाचरितालीलैवकर्णपीयूषंकर्णामृतंतस्यविप्रुट्बिंदुस्तस्यसकृददनेनएकवारश्रवणलक्षणेनविधूताद्वंद्वधर्मारागादिलक्षणायेषां ते तेचाविनष्टाअनुच्छिन्नज्ञानधर्माश्च अनुच्छित्तिधर्मेतिश्रुतेः विनष्टाइतिपृथक्पदंवा विगतंनष्टंनाशनंयेभ्यस्तेतथा मुक्तावपिस्वरूपभेदधर्मरहितानभवंतीत्यर्थः सवाअयमात्माब्रह्मविज्ञानमयोमनोमयइ त्यादिश्रुतेः सपदिवैराग्यज्ञानानंतरंदीनंदारिद्र्यापादकंकुटुंबंविसृज्यदीनाः दक्षिक्षयइतिधातोः दीनानिर्दोषाइत्यर्थः बहवोविहंगाःविहायसनाम्नाकाशेनहरिणाधारेणगच्छंतीतिविहंगाः संन्यासिनइहजी वराशौभैक्षचर्याज्ञानलक्षणामुद्दिश्यचरंति देहयात्रांकुर्वंति ज्ञानार्थमेवतेषांदेहधारणंनोदरपूरणार्थमित्यर्थः प्रव्रजंत्येतद्धस्मवैतेपूर्वेविद्वांसःप्रजांनकामयंतेकिंप्रजाकरिष्यामोयेषांनोयमात्मायंलोकइतिते हस्मपुत्रेषणायाश्चवित्तैषणायाश्चलोकैषणायाश्चव्युत्थायाथभिक्षाचर्याचरंतीतिश्रुतेः १८ कृष्णवध्वोवर्णयस्यजिह्मंकुटिलंव्याहृतंवचनमृतंसत्यमितिश्रद्दधानाः यथाअज्ञाःकृष्णमृगवध्वोहरिण्यःकुलिकस्य मृगविश्वासकर्तुःरुतंगीतंनानाप्रकारंश्रद्दधते आस्तिक्यबुद्धिंकुर्वंति तथात्स्यैतस्यसकृन्नखस्पर्शनेननखस्पर्शार्पितापनोत्पन्नेनतद्विगेस्तनानांरुजेनक्षतेनजातायातांपरमांअत्युत्कटांतिसुखलक्षणांपीडांदद र्शिमअनुबभूविमेतियत्ततोस्यवार्ताभण्यतां श्रुतयातयाप्यानंदमाशास्महइति जिह्मंमंदमल्पमपिव्याहृतमितियदतःश्रद्धानाःईश्वराणांवचःसत्यंतथैवाचरितंक्वचिदितिवचनात् जिह्मंमंदेभवक्रयोरिति स्वध्वनिसादृश्याद्धरिणीनांकुलिकरुतवशत्वंनत्वसत्यंतदित्यध्यात्मंयोज्यंअन्यवार्तेतिकेचित् अन्यविषयंवचनंनत्वेतद्विषयं सर्वस्मादन्यस्यविलक्षणस्यभिन्नस्येतिवा १९

आत्मनःकृष्णैकचित्तत्वंदर्शयंतीत्रहाविष्टेववाक्ति प्रियेति हेप्रियसख प्रियस्यकृष्णस्यसखे पुनरागाः पश्चाद्व्यावृत्यागतोऽसि पुनरग्रथमेप्रश्नेष्वावृत्तावधारणइति त्वंप्रेयसाकृष्णेनपुनःप्रेषितःअसि किमनुरुंधेकमर्थमस्मत्तःस्वीकर्तुमिच्छतितंवरय प्रेष्ठबंधुत्वात्त्वमस्माकंमाननीयोसि आत्मनोनेतुमागतइतिभ्रांतबुद्धिराह अंगेति अंगभोउद्धव इहस्थितानस्मान्दुस्त्यजंबंधोःकृष्णस्यपार्श्वंसमीपंनय सिकिंदौर्घट्यमित्यतःसपत्नीवुद्ध्यानशक्यमित्याहसततामिति श्रीनामवधूस्तस्योरसिसततमास्ते सततशब्दःआपेक्षिकइतितत्राह साकमिति अर्धांगित्वेनआस्तइति सपत्न्याःलक्ष्म्याःकदापिवि योगाभावात् त्वन्नीतानांतदर्शनमपिदुर्लभं किंपुनःसंभाषणंकिनितरांतच्चार्वितादानंकुतस्तमांसुरतलालितुभवइत्यास्तामयंप्रसंगइति २० इदंचोन्मत्तप्रलपितसममित्याह अपीति अधुनाआर्यस्यपूज्य स्यवसुदेवस्यपुत्रः श्रीकृष्णःमधुपुर्यांबतलोकस्यमनःसंतोषंविधायआस्तेअपिकिं किंचसकृष्णःपितुर्नंदस्यगेहंभार्यायशोदांतंचपितरंस्मरत्यपि किंचबंधुभूतान्गोपांश्चस्मराति अपिचसकृष्णःक्वचित्कं चनकालमादायाकिंकरीणांनोस्माकंगृहीतोपिअनुग्रहंकरोतिकिंवद कोयमनुग्रहइतितत्राह भुजमिति कदानुअगुरुवत्सुगंधंभुजमस्मन्मूर्ध्निअधास्यत्धारयिष्यति तदपिवक्तव्यमित्यर्थः यद्यागमिष्य

प्रियसखपुनरागाःप्रेयसाप्रेषितस्त्वंवरयकिमनुरुंधेमाननीयोसिमेंऽग ॥ नयसिकथमिहास्मान्दुस्त्यजंबंधुपार्श्वंसततमुरसिसौम्यश्रीवधूःसाकमास्ते २० अपिबतमधुपुर्यामार्यपुत्रोऽधुनास्तेस्मरतिसपितृगेहंसौम्यबंधूंश्चगोपान् ॥ क्वचिदपिसकथंनःकिंकरीणांगृहीतोभुजमगुरुसुगंधंमूर्ध्न्यधास्यत्कदानु २१ श्रीशुकउवाच ॥ अथोद्धवोनिशम्यैवंकृष्णदर्शनलालसाः ॥ सांत्वयन्प्रियसंदेशैर्गोपीरिदमभाषत २२ अहोयूयंस्मपूर्णार्थाभवंत्योलोकपूजिताः ॥ वासुदेवेभगवतियासामित्यर्पितामतिः २३ दानव्रततपोहोमजपस्वाध्यायसंयमैः ॥ श्रेयोविधिभिरन्यैश्चकृष्णेभक्तिर्हिसाध्यते २४ भगवत्युत्तमश्लो केभवतीभिरनुत्तमा ॥ भक्तिःप्रवर्तितादिष्ट्यामुनीनामापिदुर्लभा २५ दिष्ट्यापुत्रान्पतीन्देहान्स्वजनान्भवनानिच ॥ हित्वावृणीतयूयंयत्कृष्णाख्यंपु रुषंपरम् २६ सर्वात्मभावोऽधिगतोभवतीनामधोक्षजे ॥ विरहेणमहाभागामहान्वोऽनुग्रहःकृतः २७ श्रूयतांप्रियसंदेशोभवतीनांसुखावहः ॥ यमा दायागतोभद्राअहंभर्तुर्हिकिंकरः २८ श्रीभगवानुवाच ॥ भवतीनांवियोगोमेनहिसर्वात्मनाक्वचित् ॥ यथाभूतानिभूतेषुखंवाय्वग्निर्जलंमही २९ तथा हंचमनःप्राणबुद्धींद्रियगुणाश्रयः ॥ आत्मन्येवात्मनात्मानंसृजेहन्म्यनुपालये ३०

त्तर्ह्यधास्यन्नसंदेहः तदागमनंकदान्वितिपृच्छामीतिवा २१ २२ पूर्णार्थाःकृतकृत्याःइतिशब्दोहेत्वर्थः २३ शास्त्रतोनियमकरणंव्रतं संयमइंद्रियनिग्रहः हितसाधनानुष्ठानंश्रेयोविधिः २४ दुर्लभे तिवचनंभक्तैःकर्तव्यत्वपरं नतुमुनीनांतादृशीभक्तिर्नास्तीति २५ यूयंकृष्णाख्यंपरमपुरुषंवृणीतेतियत्तद्दिष्ट्यासदैवानुग्रहः २६ भवतीनांसर्वात्मनाअखंडस्वामिनाहरिणासहभावोलीलाधिगतः प्राप्तइतियदतोविरहेणमहाननुग्रहःकृतइतिमन्ये २७ इदानींकृष्णसंदेशंवक्तुमुपक्रमते श्रूयतामिति २८ सर्वात्मनासर्वप्रकारेणनिरूप्यमाणेसति एतमर्थंदृष्टांतेनोपपादयति यथेति यथापंचभूतानि भूतेषुचराचरशरीरेषुकारणत्वेनानुगतानि तथाहं कानितानिभूतानीत्यतआह स्वमित्यादिना वाय्वग्निरितिछांदसःप्रयोगः २९ सामान्यतउक्तंविशिनष्टि मनइति नन्वत्रमुरुयकारणत्वंकस्येति तत्राह आत्मनापरप्रेरणामंतरेणात्मानंदेहादिसर्वंसृजेहन्म्यसंहरामि अनुपालयेरक्षामीति ननुतर्हिभूतवत्त्वंतदभिन्नःकिमित्यतउक्तं आत्मनीति ३०

स्वाधारत्वेनातत्त्वेनआत्मनेत्युक्तंविवृणोति आत्मेति आत्ममायानुभावेनस्वरूपेच्छानिश्चयेन निश्चयंविशिनष्टि भूतेति भूतादीन्व्याप्यवर्तमानेन अनेनभूतादीनामवांतरकारणत्वेननतत्कारणत्वोक्तिविरोधः भूतेंद्रियगुणात्मनेत्यनेनजडरूपत्वंपरमात्मनःप्राप्तंनिवारयति आत्मेति ज्ञानमयःपूर्णज्ञानःगुणानांसत्त्वादीनामन्वयोयस्यसतथा नकेवलंज्ञानमेवगुणोस्यांकित्वन्येप्यानंदादयःसंतीत्यतोवोक्तं गुणान्वयइति आनंदादिगुणानामन्वयोयास्मिन्सतथा ३१ उक्तार्थोंकप्रमाणमितितत्राह सुषुप्तीति मायया हेरिरिच्छयावृत्तिःस्वरूपलाभोयासांतास्तथाताभिः स्वापादिकंसकर्तृकंकार्यत्वात्घटवदित्याद्यनुमानंपक्षधर्मताबलेनेयतेज्ञायतइत्यर्थः ३२ उपजीव्यप्रमाणाभावेनानुमानस्यदुर्बलत्वंस्यादितितत्राह एतदंतइति समाम्नायःनिर्दोषआगमःएतस्यानुमानार्थस्यांतोनिर्णयोयस्मात्सतथा अंतोरूयवसितेमृत्याविति च नकेवलमनुमानेनायमर्थःसंपद्यतेवेदादिनापीतिभावेनचाह एतदंतइति हरितत्त्वनिर्णायकःएतज्ज्ञानपर्यवसायीत्यर्थः वासुदेवपरावेदावासुदेवपरामखाः वासुदेव

आत्ममायानुभावेनभूतेंद्रियगुणात्मना ॥ आत्माज्ञानमयःशुद्धोव्यतिरिक्तोगुणान्वयः ३१ सुषुप्तिस्वप्नजाग्द्भिर्मायावृत्तिमिरीयते ३२ एतदंतःसमाम्नायोयोगःसांख्यंमनीषिणाम् ॥ त्यागस्तपोदमःसत्यंसमुद्रांताइवापगाः ३३ यत्त्वहंभवतानिंवैदूरेवर्त्यापियोदृशाम् ॥ मनसःसन्निकर्षार्थंमदनुध्यान काम्यया ३४ यथादूरतरेप्रेष्ठमनआविश्यवर्तते ॥ स्त्रीणांचनतथाचेतःसन्निकृष्टेऽक्षगोचरे ३५ मय्यावेश्यमनःकृत्स्नंविमुक्ताशेषवृत्तियत् ॥ अनुस्मरंत्योमांनित्यमचिरान्मामुपेष्यथ ३६ यन्मयाक्रीडितारात्रीर्वनेऽस्मिन्व्रजआस्थिताः ॥ अलब्धावासकल्याणाआपुर्मांमद्विचिंतया ३७ श्रीशुकउवाच एवंप्रियतमादेशमाकर्ण्यव्रजयोषितः ॥ ताऊचुरुद्धवंप्रीतास्तत्संदेशागतस्मृतीः ३८ गोप्यऊचुः ॥ दिष्ट्याऽहितोहतःकंसोयदूनांसानुगोऽघकृत् ॥ दिष्ट्याप्तैर्लब्धसर्वार्थैःकुशल्यास्तेऽच्युतोऽधुना ३९ कच्चिद्गदाग्रजःसौम्यकरोतिपुरयोषिताम् ॥ प्रीतिंसुस्निग्धसव्रीडहासोदारेक्षणार्चितः ४० कथंरतिविशेषज्ञःप्रियश्चपुरयोषिताम् ॥ नानुबध्येततद्वाक्यैर्विभ्रमैश्चानुभाजितः ४१ अपिस्मरतिनःसाधोगोविंदःप्रस्तुतेक्वचित् ॥ गोष्ठीमध्येपुरस्त्रीणांग्राम्यैरकथांतरे ४२ ताःकिंनिशाःस्मरतियासुतदाप्रियाभिर्वृंदावनेकुमुदकुंदशशांकरम्ये ॥ रेमेक्वणच्चरणनूपुररासगोष्ठ्यामस्माभिरीडितमनोज्ञकथः कदाचिद् ४३ अप्येष्यतीहदाशार्हस्तप्तंस्वकृतयाशुचा ॥ संजीवयन्व्रजंगात्रैर्यथेंद्रोवनमंबुदैः ४४

परायोगाइत्यादेःत्यागोदुर्दर्शनाभ्यासवर्जनम् सत्यंसत्यभूतंवाक्यम् अत्रदृष्टांतमाह समुद्रांताइति ३३ कस्त्यजेन्मांभवादृगित्युक्तिपरिहारमिवाह यस्त्विति योहमंतिकेवर्तमानोपिभवतीनांदृशां दूरेवर्तीतिप्रतीयतइतियत्तन्मदनुध्यानकाम्ययानिरंतरमदुपासनेच्छया मनःसन्निकर्षार्थंकृतमित्यन्वयः ३४ निदर्शनेनैतमर्थमुपपादयति यथेति चशब्दात्पुरुषाणामितिग्राह्यम् प्रेष्ठप्रियतमपदार्थेपूर्वानुभूतइतिशेषः अक्षगोचरेइंद्रियविषये ३५ लोकेप्रियतमस्मरणेफलसंदेहोनतथामत्स्मरणंफलनिश्चयादितिभावेनाह मयीति यद्विमुक्ताअशेषावृत्तयोयस्यतत्तथा तन्मनःमय्यावेश्यनित्यंमामनुस्मरंत्योयूयंशीघ्रंमांतथाउपेष्यथेत्यन्वयः ३६ अस्मिन्नर्थेस्वानुभूतमर्थंप्रमाणयति यन्मयेति यद्यथाव्रजेआस्थिताअस्मिन्वनेअलब्धवासकल्याणाःअप्राप्तगृहसुखाःयूयंमयारात्रीःक्रीडिताःमद्विचिंतयामामापुःएवमितिशेषः ३७ तत्संदेशेनागतभगवद्विशेषस्मरणाः ३८ यदूनामहितः आप्तैर्जनैः ३९ ४० तासांवाक्यैःकथंनानुबध्येतविभ्रमैःशृंगारचेष्टाभिःअनुभाजितःसभाजितः ४१ ग्राम्याणांशब्दादिविषयलालसानांस्वैरकथांतरेस्वच्छंदविषयस्यव्यवहारविशेषेप्रस्तुतेप्रसक्ते ४२ यासुनिशासु ४३ गात्रैरवयवैः ४४

अदीर्घणकालेनागष्यामीतियदुक्तंतत्स्तोभनमात्रम् आगमनेनिमित्ताभावादित्याह कस्मादिति ४५ कृतात्मनःपूर्णरूपस्यअर्थोविषयःकिंक्रियेतकिंसुखंकुर्यात् ४६ कृष्णस्यपूर्णकामत्वात्तत्तथास्तुयुष्माकंसुखनिमित्तंकिंतत्राह परमितिआशाअतितृष्णा ४७ नकेवलमस्माकमेवकृष्णाशादुस्त्यजा अन्यस्यापीत्याहुः कइति ४८ आक्रीडिताःक्रीडारंगीकृताः इमेसरिदादयः ४९ नंदगोपसुतंपुनःपुनःस्मारयंतिबतआश्चर्यं ननुसरिदादिदर्शनएवश्रीकृष्णस्मरणंअन्यदानास्तीत्यायातमितितत्राह श्रीनिकेतइति तस्यश्रीकृष्णस्यपदकेप्रशस्तपदे प्रशस्तत्वंकुतइत्यतउक्तम् श्रीनिकेतइति ५० उक्तमेवद्रढयति गत्येति ५१ नित्यंस्वजाप्यांविज्ञापयंति हेनाथेति ऐश्वर्यमूर्ते रमायाअपिआशीःप्रद व्रजनाथानांगोपानांआर्तिनाशन मग्नंदुःखार्णवेइतिशेषः गवांविंदोलाभोयस्मात्सतथा गोविंद इति ५२ ॥ इतिश्रीभागवतेम०दशमस्कंधेविजयध्वजकृतटीकायांपंचचत्वारिंशोऽध्यायः ॥ ४५ ॥ भक्तिमेवनिरूपयत्यस्मिन्नध्याये तत्रादौगोप्यःउद्धवंकृष्णबुद्ध्यापूजयंतिस्मेत्याह शुकइति १ वि

कस्मात्कृष्णइहायातिप्राप्तराज्योहताहितः ॥ विहृत्यनगरस्त्रीभिःप्रीतःसर्वसुहृद्वृतः४५किमस्माभिर्वनोकोभिरन्याभिर्वामहात्मनः॥श्रीपतेराप्तकामस्यक्रियेतार्थःकृतात्मनः४६परंसुखंहिनैराश्यंस्वैरिण्यप्याहपिंगला॥तज्जानतीनांनःकृष्णेतथाप्याशादुरत्ययया४७कउत्सहेतसंत्यक्तुमुत्तमश्लोकसंविदम् ॥ अनिच्छतोपियस्यश्रीरंगान्नच्यवतेक्वचित्४८सरिच्छैलवनोद्देशागावोवेणुरवाइमे ॥ संकर्षणसहायेनकृष्णेनाक्रीडितावियो४९पुनःपुनःस्मारयंतिनंदगोपसुतं बत ॥ श्रीनिकेतेतत्पदकेविस्मर्तुंनैवशक्नुमः ५० गत्याललितयोदारहासलीलावलोकनैः ॥ माध्व्यागिराहृतधियःकथंतद्विस्मरामहे ५१ हेनाथहेरमानाथव्रजनाथार्तिनाशन ॥ मग्नमुद्धरगोविंदगोकुलंवृजिनार्णवात्५२ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेपंचचत्वारिंशोऽध्यायः ४५ श्रीशुकउवाच ॥ ततस्ताःकृष्णसंदेशैर्व्यपेतविरहामयाः ॥ उद्धवंपूजयांचक्रुर्ज्ञात्वास्निग्धमधोक्षजे१उवासकतिचिन्मासान्गोपीनांविनुदन्शुचः॥ कृष्णलीलाकथागायन्रमयामासगोकुलम् २ यावंत्यहानिनंदस्यव्रजेऽवात्सीत्सउद्धवः ॥ व्रजौकसांक्षणप्रायाण्यासन्कृष्णस्यवार्तया ३ सरिद्वनगिरिद्रोणीर्वीक्षन्कुसुमितान्द्रुमान् कृष्णक्रीडासमंरेमेहरिदासोव्रजौकसाम् ४ दृष्ट्वैवमादिगोपीनांकृष्णावेशात्मविक्लवम् ॥ उद्धवःपरमप्रीतस्तानमस्यन्निदंजगौ ५ उद्धवउवाच ॥ एताःपरंतनुभृतांभुविगोपवध्वोगोविंदएवमखिलात्मनिरूढभावाः ॥ वांछंतियद्भवभियोमुनयोवयंचकिंब्रह्मजन्मभिरनंतकथानयत्र ६

नुदन्परिहरन् कृष्णस्यलीलाःयासुतास्तथा २ अवात्सीत्उवास क्षणप्रायाणिक्षणकल्पानि ३ पार्श्वद्वयोन्नतनिम्नानिम्नकुसुमितवृक्षनिविष्टास्थलीद्रोणीसानुविशेषः व्रजौकसांकृष्णक्रीडास्मरणंयथाभवतितथेतिक्रियाविशेषणम् सुखंकृत्वारेमे हरिदासउद्धवः ४ गोपीनामेवमादिकृष्णावेशात्मविक्लवंदृष्ट्वानमस्यन्प्रावण्यंकुर्वन् ५ अखिलात्मनिपूर्णात्मनिगोविंदेदृढभावाः एवंनित्यमातिवर्धमानभक्त्याएतागोपवध्वस्तनुभृतांमध्येपरमुत्तमंशरीरभरणफलभाजइत्यन्वयः मुन्यादिषुसत्सुकींवीशिष्योच्यतइतितत्राह वांछंतीति भवधियःभद्रबुद्धयोपिमुनयःयद्भक्तिलक्षणंमुक्तिसाधनंवांछंति वयंचवांछामःनात्वित्थंप्रभवाम तत्रकोहेतुरित्यतोवोक्तंभवधियइति संसारोद्विग्नबुद्धित्वादित्यर्थः भवभयादितिपाठेसंसारभयंसंदृश्येतिल्यब्लोपेपंचमी मुनीनांब्रह्मकुलोत्पन्नोत्तमत्वार्तिकानिनींदिषुरिवबबीषीतितत्राह किंब्रह्मेति यत्रेयेषुब्राह्मणजनेनेषुअनंतस्यहरेःकथानास्तितैःकिं नकिमपिप्रयोजनम् जीवन्मृतत्वादित्यर्थः ६

इमाःस्त्रियःक कृष्णेऽपरूढभावःक अन्वयानुपपत्तेःकथमितितत्राह वनचराइति तेऽपार्थवनचरत्वंकिंनस्यादित्यतउक्तं व्यभिचारेति व्यभिचारशीलाः अनैकांतिकस्वभावाः अनियतभर्तृभिःरति तृप्ताइत्यर्थः शीलंवृत्तस्वभावयोरितिकृष्णेपिकश्चिद्दोषःकिंनस्यादित्यतउक्तं परमात्मनीति अनन्वयेकिमर्थंश्रेयःप्रयच्छतीत्यतोभक्तिरेवप्रयोजिकेत्याशयेनाह नन्विति अविदुषोपिशास्त्रोक्तिमजान तोपिअनुभजतःस्वयोग्यतानुरोधेनभक्तिकुर्वतःपुंसःईश्वरःसाक्षाच्छ्रेयस्तनोति नन्वित्यनेन भक्त्यात्वनन्ययाशक्यअहमेवंविधोर्जुनत्यैतिह्यंदर्शयति प्रश्नावधारणेतिह्यसमीहानुमतेनन्विति उपयुक्तः से वितोऽगदराजःऔषधश्रेष्ठरोगिकर्मानुकूलंफलंददातियथातथात्रापीति ७ यःप्रसादःव्रजबल्लवीनांगोष्ठस्थानांगोपीनांउदगात् उदितः अयंभक्त्यानितांतरतेःश्रियःस्वर्योषितांचनास्ति नन्वस्माभि रनुज्ञातंनतुशास्त्रेणेत्यर्थः कीदृशीनांस्वर्गांगनानांललितांगरुचांअखिलविलासोपेतशरीरकांतीनां कथंभूतानांगोपीनांरासक्रीडोत्सवेअस्यकृष्णस्यभुजदंडेनगृहीतकंठाश्चलब्धाशिषश्चपुरतसुखोद्बोध कशुभवाक्यप्रबंधाश्चयास्तासांअन्याःअन्यासांस्त्रीणां बहुलंछंदसीतिविभक्तिव्यत्ययविधानात् अन्यस्त्रियईदृशप्रसादंनापुरिति कुतइतिचा ८ अहंआसांगोपीनांचरणरेणुजुषांवृंदावनेप्ररूढा

केमाःस्त्रियोवनचराव्यभिचारशीलाःकृष्णेकचैवपरमात्मनिरूढभावः ॥ नन्वीश्वरोनुभजतोविदुषोपिसाक्षाच्छ्रेयस्तनोत्यगदराजइवोपयुक्तः ७ नायंश्रि योननुनितांतरतेःप्रसादःस्वर्योषितांचललितांगरुचांकुतोन्यः ॥ रासोत्सवेऽस्यभुजदंडगृहीतकंठलब्धाशिषांयउदगाद्व्रजबल्लवीनाम् ८ आसामहोचर णरेणुजुषामहंस्यांवृंदावनेकिमपिगुल्मलतौषधीनाम् ॥ यादुस्त्यजंस्वजनमार्यपथंचहित्वाभेजुर्मुकुंदपदवींश्रुतिभिर्विमृग्याम् ९ यावैश्रियार्चितमजा दिभिराप्तकामैर्योगेश्वरैरपियदात्मनिरासगोष्ठ्याम् ॥ कृष्णस्यतद्भगवतश्चरणारविंदंन्यस्यस्तनेषुविजहुःपरिरभ्यतापम् १० वंदेनंदव्रजस्त्रीणांपादरेणुम भीक्ष्णशः ॥ यासांहरिकथोद्गीतंपुनातिभुवनत्रयम् ११ श्रीशुकउवाच ॥ अथगोपैरनुज्ञाप्ययशोदानंदमेवच ॥ गोपानामंत्र्यदाशार्होयास्यन्नारुरुहेर थम् १२ तंनिर्गतंसमासाद्यनानोपायनपाणयः ॥ नंदादयोनुरागेणप्रावोचन्नश्रुलोचनाः १३ मनसोवृत्तयोनःस्युःकृष्णपादांबुजाश्रयाः ॥ वाचोभिधा यिनीर्नाम्नांकायस्तत्प्रवणादिषु १४ कर्मभिर्भ्राम्यमाणानांयत्रक्वापीश्वरेच्छया ॥ मंगलाचरितैर्दानैरतिर्नःकृष्णईश्वरे १५ एवंसभाजितोगोपैःकृष्णभ क्त्यानराधिप ॥ उद्धवःपुनरागच्छन्मथुरांकृष्णपालिताम् १६ कृष्णायप्रणिपत्याहभक्त्युद्रेकंव्रजौकसाम् ॥ वासुदेवायरामायराज्ञेचोपायनान्यदात् १७ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेषट्चत्वारिंशोऽध्यायः ॥ ४६ ॥ ॥ ॥ ॥ ७ ॥

नांगुल्मलतौषधीनांमध्येगुल्मादिकंकिमपिस्यांउद्भवेयं अहोअमीषांपूर्वजन्मार्जितपुण्यराशिः यागोप्यःत्यक्तुमशक्यंस्वजनंभर्त्रादिकंआर्यपथंस्मार्तमार्गंनियतस्वभर्तृसंगविषयंहित्वा वेदशिरोभिरपि मार्गणीयांमुकुंदपदवींभेजुरित्यन्वयः ९ श्रियाऽजादिभिःब्रह्मादिभिराप्तकामैःसत्यसंकल्पैः योगेश्वरैःसनकादिभिरपिआत्मनिहृदयेनिधाय यदर्चितंयागोप्यःकृष्णस्यभगवतश्चरणारविंदंस्तने षुन्यस्यपरिरभ्य कामनिमित्तसंतापंविजहुः आसामितिपूर्वेणान्वयः १० वंदेस्तौमि ११ १२ १३ नोस्माकंमनसोवृत्तयोऽपापाराःकृष्णपादपद्माश्रयाःस्युःअस्माकंवाचोनाम्नामभिधायिनीर्विदंत्यः स्युः अस्माकंकायस्तस्यप्रवणादिषुनमस्कारादिषुस्यादित्यन्वयः १४ यत्रक्वापिदेवयोनिषु अचेतनस्यकर्मणःप्रवर्तकत्वंकथंघटतइत्यतउक्तं ईश्वरेच्छयेति रतिर्भक्तिलक्षणा १५ १६ ॥ १७ ॥ इतिश्री भागवतेमहापुराणेदशमस्कंधेविजयध्वजकृतटीकायांषट्चत्वारिंशोध्यायः ॥ ४६ ॥

भक्तभक्तिरमालिंगितगात्र :श्रीनारायण:सत्सन्नतवांछितार्थसाधनार्थअवतीर्णइत्येतमर्थमभिप्रैत्यस्मिन्नध्याये तत्रादौसैरंध्याअभीष्टसाधनार्थतद्गृहगमनंवक्ति अथेत्यादिना अथकथांतरारंभः सैरंध्याःगंधकारिकाया:कृष्णागमनकामेनतृप्राया:यच्छन्ददन् १ महार्हैःमहतांयोग्यैरुपस्करैःउपकरणैरुपेतं कामोपायैःकामभोगसाधनैःउपबृंहितंपूर्णं एतानेवदर्शयति मुक्तेति वितानमुपरिप
ट्टिका २ ३ येनप्रकारेणोपगमनंकार्यं यथोपसंगम्यसदासनादिभिः ४ साधुतयाऽचिततयाऽभिमृश्यपरिमृज्यस्पृष्ट्वेत्यर्थः दांतंगजदंतरचितं महताधनेनविक्रीयतेआपाद्यतेचेतिमहाधनम् ५
सुधाकल्पासवादिभिःप्रसाधितात्माअलंकृतदेहा सव्रीडलीलादिभिर्युक्ता ६ रतौनिमित्तमाह अनुलेपेति अनुलेपार्पणेनहरेःगंधसमर्पणेनलब्धःपुण्यलेशःपुण्यैकदेशोययासातथातया ७ रुजःकाम

बादरायणिरुवाच ॥ अथविज्ञायभगवान्सर्वात्मासर्वदर्शनः ॥ सैरंध्याःकामतप्तायाःप्रीतियच्छन्गृहंययौ १ महार्होपस्करोपेतंकामोपायोपबृंहितम् ॥
मुक्तादामपताकाभिर्वितानशयनासनैः २ धूपैःसुरभिभिर्दीपैःस्रग्गंधैरपिमंडितम् ३ गृहंतमायांतमवेक्ष्यसासनात्सद्यःसमुत्थायहिजातसंभ्रमा ॥
अथोपसंगम्यसखीभिरच्युतंसभाजयामाससहासनादिभिः ४ तथोद्धवःसाधुतयाभिपूजितोन्यषीददुर्व्यामभिमृश्यचासनम् ॥ कृष्णोपिदांतंशयनंमहा
धनंविवेशलोकाचरितान्यनुव्रतः ५ सामज्जनालेपदुकूलभूषणस्रग्गंधतांबूलसुधासवादिभिः ॥ प्रसाधितात्मोपससारमाधवंसव्रीडलीलोत्स्मितविभ्र
मेक्षितैः ६ आहूयकांतांनवसंगमह्रियाविशंकितांकंकणभूषितेकरे ॥ प्रगृह्यशय्यामधिवेश्यरामयारेमेऽनुलेपार्पणपुण्यलेशया ७ साऽनंगतप्तकुचयो
रुरसस्तथाऽक्ष्णोर्जिघ्रंत्यनंतचरणेनरुजोमृजंती ॥ दोर्भ्यांस्तनांतरगतंपरिरभ्यकांतमानंदमूर्तिमजहादतिदीर्घतापम् ८ सैवंकैवल्यनाथंतंप्राप्यदुष्प्राप
मश्वरम् ॥ अंगरागार्पणेनाहोदुर्भगेदमयाचत ९ आहोष्यतामिहप्रेष्ठदिनानिकतिचिन्मया ॥ रमस्वनोत्सहेत्यक्तुंसंगंतेऽब्जुरुहेक्षण १० तस्यैकामव
रंदत्त्वामानयित्वाचमानदः ॥ सहोद्धवेनसर्वेशःस्वधामागमदद्भिमत् ११ दुराराध्यंसमाराध्यविष्णुंसर्वेश्वरेश्वरम् ॥ यावृणीतमनोग्राह्यमसत्त्वात्कु
मतिर्ह्यसौ १२ अक्रूरभवनंकृष्णःसहरामोद्धवःप्रभुः ॥ किंचिच्चिकीर्षन्सप्रागादक्रूरप्रियकाम्यया १३ सतान्नरवरश्रेष्ठानाराद्वीक्ष्यस्वबांधवान् ॥ प्रत्यु
त्थायप्रमुदितःपरिष्वज्याभ्यनंदत १४ पादावनेजनीरापोधारयञ्छिरसानृप ॥ अर्हणेनांबरैर्दिव्यैर्गंधस्रग्भूषणोत्तमैः १५ अर्चित्वाशिरसानम्यपादावं
कगतोमृजन् ॥ प्रश्रयाऽवनतोऽक्रूरःकृष्णरामावभाषत १६ दिष्ट्यापापोहतःकंसःसानुगःपावितंकुलम् ॥ भवद्भ्यामुद्धृतंकृच्छ्राद्दुरंताच्चसमेधितम् १७
युवांप्रधानपुरुषौजगद्धेतूजगन्मयौ ॥ भवद्भ्यांनविनाकिंचित्परमस्तिनचापरम् १८

ज्वरान् संसारज्वरान्वा सास्तनांतरगतंवक्षस्थलगतम् ८ ९ १० ११ मनोग्राह्यंशब्दाद्यविषयंमनसाप्यग्राह्यं असत्त्वाद्रागदुष्टत्वात् तत्त्वनिश्चयाभावाद्वा अतएवकुमतिःकुत्सितेऽशब्दादौम
तिर्यस्याःसातथा १२ मद्गृहमागंतव्यामितिप्रागुक्तंसत्यंकर्तुअक्रूरगृहगमनंकृष्णस्यवक्ति अक्रूरेति किंपांडववृत्तांतज्ञानायाक्रूरप्रेषणकार्यंकर्तुमिच्छन् १३ आरात्दूरात्तान्वीक्ष्य १४
पादावनेजनीःपादप्रक्षालिनीःआअपइतिपदच्छेदःआइत्यास्वाद्य अपोधारयन्अर्हणेनयोग्यपूजासाधनेन १५ मृजन्परिमृजन् मृदुपीडयन्नित्यर्थः १६ १७ जगन्मयौजगद्व्याप्तिनौ
एतदेवविशिनष्टि भवद्भ्यामिति १८

अन्वावेश्यपदार्थानामणुत्वमहत्त्वानुकूलतयाप्रविश्य स्वशक्तिभिःइच्छादिस्वरूपशक्तिभिः श्रुतेःप्रत्यक्षस्यचविषयः अनृतेनहिप्रत्यूढाः वाचारंभणंविकारइत्यादिश्रुतिः अपंचद्रोपंचटइत्यादिनि र्दोषार्थेंद्रियसंनिकर्षलक्षणंप्रत्यक्षं तत्मृष्टांतदेवानुप्राविशदितिश्रुतेः ऋतस्पतंतुंवितंतंविवृत्यतदपश्यदित्यादिश्रुतेः ब्रह्मादिज्ञानिप्रत्यक्षस्यचविषयोवा १९ इममेवार्थंसदृष्टांतंदर्शयति यथेति योनि षुभोगस्थानेषुउत्पतिमत्त्वात् भूतशब्दवाच्येषुचराचरेषुपूर्वादृष्टवशात्गमागमेषुवस्तुषुपृथिव्यादयोनानाशुक्लनीलपीताद्यात्मनाभांति आत्मास्वयंयोनिःकारणंयेषांतानितथातेषु आत्मापरमात्मा केवलआत्मतंत्रइतिविशेषणद्वयेनमहान्विशेषोस्तिमच्चादिभ्यइतिसूचयति २० विश्वस्यात्मयोनित्वंस्पष्टयति सृजसीति केवलत्वंस्पष्टयति नेति गुणैःसत्त्वादिभिः उत्पत्तिहेत्वभावादिति युक्तमितिभावेनाह तइति शून्यस्त्वमितिनेत्याह ज्ञानात्मनइति क्वचकस्मिंश्चिद्देशेकालेच २१ जनितोतविष्णुरितिजन्मप्रतीतेः जातस्याहिध्रुवोमृत्युरितिमरणस्यअवश्यंभावात्कथंनैवहेतुरित्युच्यतइ तिवत्राह देहेति देहादिरेवोपाधिःदेहाद्युपाधिःतस्योत्पत्तौकारणभूतगुणकर्मणामनिरूपितत्वादसंभावित्वात्साक्षाद्भवःशुक्रशोणितसंपर्कलक्षणंजन्मनस्यात् हियस्मादतस्तवदेहबंधोनस्यात् देहवि योगलक्षणोमोक्षश्चनैवस्याद्यावदन्यत्रस्यातामतोनोनिकामंयावद्योग्यंत्वयिविवेकःतत्त्वनिश्चायकंज्ञानंस्यादित्यन्वयः २२ साक्षाद्भवोनास्तिचेत्तर्हिकीदृशोस्तीतितत्राह त्वयेति त्वयोदितःप्रकाशितः

आत्ममृष्टमिदंविश्वमन्वावेश्यस्वशक्तिभिः ॥ ईयतेबहुधाब्रह्मन्श्रुतिप्रत्यक्षगोचरः १९ यथाहिभूतेषुचराचरेषुमह्यादयोयोनिषुभांतिनाना ॥ एवंभवा न्केवलआत्मयोनिष्वात्मात्मतंत्रोबहुधाविभाति२०सृजस्यथोलुंपसिपासिविश्वंरजस्तमःसत्त्वगुणैःस्वशक्तिभिः ॥ नबध्यसेत्वंगुणकर्मभिर्वाज्ञानात्मनस्ते क्वचनैवहेतुः २१ देहाद्युपाधेरनिरूपितत्वाद्भवोहिसाक्षान्नचिदात्मनःस्याद् ॥ अतोनबंधस्तवनैवमोक्षःस्यातांनिकामंत्वयिनोविवेकः २२ त्वयोदितो यंजगतोहितायदायदावेदपथःपुराणः ॥ बाध्येतपाखंडपथैरसद्भिस्तदाभवान्सत्त्वगुणंबिभर्ति २३ सत्वंप्रभोद्यवसुदेवगृहेवतीर्णःस्वांशेनभारमपनेतु मिहासिभूमेः ॥ अक्षौहिणीशतवधेनसुरेतराणांराज्ञामुष्यचकुलस्ययशोवितन्वन् २४ अद्येशनोवसतयःखलुभूरिभागायत्सर्वदेवपितृभूतनृदेवमूर्तिः ॥ यत्पादशौचसलिलंत्रिजगत्पुनातिसत्वंजगद्गुरुरधोक्षजयाःप्रविष्टः २५ कःपंडितस्त्वदपरंशरणंसमीयाद्भक्तप्रियादृतगिरःसुहृदःकृतज्ञाद् ॥ सर्वान्ददातिसुहृदोभजतोपिकामानात्मानमप्युपचयापचयौनयस्य २६ दिष्ट्याजनार्दनभवानिहनःप्रतीतोयोगेश्वरैरपिदुरापगतिःसुरेशैः ७ छिंध्याशुनःसुतकलत्रधनाप्तगेहदेहाभिमोहरशनांभवदीयमायाम् २७ इत्यर्चितःसंस्तुतश्चभक्तेनभगवानहरिः ॥ अक्रूरंसस्मितंप्राहगीर्भिःसंमोहयन्निव २८

अयंभवोदेहयोगलक्षणोजगतोहितायज्ञानलक्षणायभवति कथमितितत्राह यदोति २३ एतदेवाविशिनष्टि सत्वमिति अमुष्यकुलस्ययदूपपदस्य २४ हेअधोक्षज सर्वेदेवादयोमूर्तयःप्रतिमायस्यसतथा जगद्गुरुःसत्वंयावसतीःप्रविष्टः हेईश अद्यतावसतयोनोस्माकं गृहाःभूरिभागाःपूर्णभाग्याःअभवन्खलु नैतच्चित्रमित्याह यत्पादेति २५ एकमेवाद्वितीयमितिश्रुत्यर्थंगुरुमुखात्सम्यग्ज्ञातवानहंत्वामतःस्तौ मीत्याशयेनाह कइति भक्तप्रियात्ऋतगिरइतिपदच्छेदःभक्तप्रियाहतगीश्चेतिवा तस्माद्भजतःसेवमानस्यसुहृदःफलापेक्षारहितस्यआत्मानमपिसायुज्यलक्षणंमोक्षमपिस्वात्मानमपिसारूप्यंवा यस्योपच यापचयौवृद्धिक्षयौनस्तइत्यनेनकृष्णस्यबालवार्धकादिकंनस्वाभाविकमितिदर्शितम् २६ योगेश्वरादिभिरपिदुरापगतिःदुष्प्रापस्वरूपोभवान्नःप्रतीतःप्रतीतिविषयंगतइत्यतइदंकर्तव्यमितिप्रार्थयते किंतदितितत्राह छिंधीति भवदीयमायांभवदाज्ञाकरींबंधकशक्तिंछिंद्धीत्यन्वयः किंविधामत्राह सुतेति मोहलक्षणांरशनांरज्जुम् २७ लोकविषयाभिर्गीर्भिःसंमोहयन् तत्त्वज्ञानंअन्यथाकुर्वन्निव नत्वक्रूरस्येत्यन्वयः २८

२९ अर्हणांपूज्यानांमध्येश्रेष्ठाःदेवाःस्वार्थाःस्वप्रयोजननिरताः आत्मार्थकेभ्योऽर्चनादिवृत्तिलक्षणंप्रयोजनंप्राप्यफलानांदातारःनतुसर्वसमाइत्यर्थः साधवःसर्वतुल्याः नस्वार्थपरायणाः परार्थैकनिष्ठाइत्यर्थः समास्त्रीवत्सरेधातुसर्वतुल्येषुवाच्यवदितियादवः ३० देवाअपिहिअम्मयादिशब्दवाच्यानभवंति तत्रसंनिहितत्वात् तासांदेवशब्दवाच्यत्वमितिभावेनाह नहीति अम्मयानिजलमयानितीर्थशब्दवाच्यानिनभवंति किंतुतत्संहितानिदैवतानि किमतइतितत्राह तइति तेउरुकालेनकृतयासेवया ३१ पांडवानांवृत्तिंजिज्ञासार्थंकिंचिच्छ्रेयश्चिकीर्षयेत्यस्याविवरणमेतत् गजेनसमआह्वयोयस्यसतथा हस्तिनापुरमित्यर्थः ३२ शतशृंगगिरिनिवासिभिःऋषिभिरानीताराज्ञासहवसंतेवसंति स्वमाहिमानमाच्छाद्येतिशेषइत्यतआत्मनेपदम् ३३ तत्रहेतुर्ह्यधइतिगति तत्त्वज्ञानशून्यत्वात् ३४ तद्विधास्यामःतथाकारिष्यामःशंसुखम् ३५ ३६ इतिश्रीभागवतेमहापुराणेदशमस्कंधेविजयध्वजकृतटीकायांसप्तचत्वारिंशोऽध्यायः ४७ योग्यानांभगवातिहरौस्वतएवभक्तिःप्रका

श्रीभगवानुवाच ॥ त्वंनोगुरुःपितृव्यश्चश्लाघ्योबंधुश्चनित्यदा ॥ वयंतुरक्ष्याःपोष्याश्चअनुकंप्याःप्रजाहिवः २९ भवद्विधामहाभागनिषेव्याअर्हसत्तमाः॥ श्रेयस्कामैर्नृभिर्नित्यंदेवाःस्वार्थानसाधवः ३० नह्यम्मयानितीर्थानिनदेवामृच्छिलामयाः ॥ तेपुनंत्युरुकालेनदर्शनादेवसाधवः ३१ सभवान्सुहृदां वैनःकिंचिच्छ्रेयश्चिकीर्षया ॥ जिज्ञासार्थंपांडवानांगच्छस्वगजसाह्वयम् ३२ पितुर्युपरतेबालाःसहमात्रासुदुःखिताः ॥ आनीताःस्वपुरंराज्ञावसंतइतिशुश्रुम ३३ तेषुराजांबिकापुत्रोभ्रातृपुत्रेषुदीनधीः ॥ समोनवर्ततेनूनंदुष्पुत्रवशगोंधदृक् ३४ गच्छजानीहितद्वृत्तमधुनासाध्वसाधुवा ॥ विचार्यतद्विधास्यामोयथाशंसुहृदांभवेत् ३५ इत्यक्रूरंसमादिश्यभगवान्हरिरीश्वरः ॥ संकर्षणोद्धवाभ्यांवैततःस्वभवनंययौ ३६ इतिश्रीभागवतेमहापुराणेदशमस्कंधेपूर्वार्धेसप्तचत्वारिंशोऽध्यायः ४७ श्रीशुकउवाच ॥ सगत्वाहास्तिनपुरंपौरवेंद्रयशोंकितम् ॥ ददर्शतत्रांबिकेयंसभीष्मांविदुरंपृथाम् १ सहपुत्रंचबाह्लीकंभारद्वाजंसगौतमम् ॥ कर्णंसुयोधनंद्रौणिंपांडवान्सुहृदोऽपरान् २ यथावदुपसंगम्यबंधुभिर्गौदिनीसुतः ॥ संपृष्टस्तैःसुहृद्वार्तांस्वयंचापृच्छदव्ययम् ३ उवासकतिचिन्मासान्राज्ञोवृत्तविवित्सया ॥ दुष्प्रज्ञस्याल्पसारस्यखलच्छंदानुवर्तिनः ४ तेजओजोबलंवीर्यंप्रश्रयादींश्चसद्गुणान् ॥ प्रजानुरागंपार्थेषुनसहद्भिश्चिकीर्षितम् ५ कृतंचधार्तराष्ट्रैर्यद्ददानाद्यकौशलम् ॥ आचख्यौसर्वमेतस्मैपृथाविदुरएवच ६ पृथातुभ्रातरंप्राप्तमक्रूरमुपसृत्यतम् ॥ उवाचजन्मनिलयंमरंत्यश्रुकलेक्षणम् ७ अपिस्मरंतिनःसौम्यपितरौभ्रातरश्चमे ॥ भगिन्योभ्रातृपुत्राश्चजामयःसख्यएवच ८ भ्रात्रीयोभगवान्कृष्णःशरण्यो भक्तवत्सलः ॥ पैतृष्वस्रेयान्स्मरतिरामश्चांबुरुहेक्षणः ९ सपत्नमध्येशोचंतींवृकाणांहरिणीमिव ॥ सांत्वयिष्यतिमांवाक्यैःपितृहीनांश्चबालकान् १०

श्यतइतिव्यनक्तयस्मिन्नध्याये तत्रादावक्रूरस्यधृतराष्ट्रादिदर्शनंवक्ति सगत्वेति १ बाह्लीकंकुरुवंशेकंचनवृद्धंराजानंशंतनोर्भ्रातरम् भारद्वाजंभरद्वाजस्यापत्यंद्रोणम् सगौतमंसकृपम् २ तैर्भीष्मादिभिःसुहृद्वार्तांप्रतिसंपृष्टःअभूदितिशेषः अक्रूरःस्वयंचतेषामव्ययंअनामयंपृष्टवान् ३ वृत्तविवित्सयास्वपुत्रेषुवृत्तंवर्तनंसमंविषमंचेतिज्ञातुमिच्छया अल्पमन्याय्यंसारंयस्यसतथातस्य तत्रहेतुः खलच्छंदानुवर्तिनइति खलानांपुत्राणांछंदमिच्छामनुवर्तितुंशीलमस्यास्तीतितस्य ४ तेजोज्योतिर्लक्षणादीप्तिः ओजःपराभिभवलक्षणंसामर्थ्यं बलंशारीरंरूपंवावीर्यंपराक्रमः ५ ६ जन्मनिलयंजन्मगृहम् ७ जामयःभ्रातृवर्गभार्याः ८ पितृष्वसुःपुत्रान्पांडवान् ९ सपत्नमध्येशत्रुमध्ये वृकाणांमध्येस्थिताम् १०

युमपेरुदपादुत्फुल्लपानलिन्यापयातथाअक्रूरस्यदर्शनादुद्वेचितयामक्तपाविवशाविशेषप्रबुद्धभगवद्गुणानित्यंतत्पराकुंतीमनस्याविर्भूतंकृष्णंस्तौति कृष्णेति महानपरिच्छिन्नोयोगोज्ञानमुपायोवास्तीति तत्संबुद्धिःमहायोगिन् महत्पूज्यविशालपोरितियादवः सर्वमाप्नोतिधारयतीतिसर्वात्मा हेसर्वात्मन् गोविंदगवामिंद्र ११ मृत्युवत्भयहेतोःसंसारात् आपवर्गिकात् अपवर्गरूपक्रियासाध्यफलप्राप्तेः साधकात् वदापादकाद्वा अपवर्गःक्रियासाध्यफलाप्तौत्यागमोक्षयोरितिवैजयंती १२ कृष्णसीसाचलोहेपुइत्यतःकृष्णशब्दस्यसीसाद्योपिवृत्तेस्तान्निरासार्थं शुद्धायेति किंतत्शुद्धमत्राह ब्रह्मणइति अस्याप्यनेकार्थवृत्तेर्नानिर्णयइत्यतः परमात्मनइति दुर्भगशरीरेवसतोहरेः कर्दमवशुद्धत्वंकथंयुज्यतइतिचत्राह योगेश्वरायेति योगैश्वर्याद्धटतइत्यर्थः ननुतर्हियोगैश्वर्यनिमित्तंशुद्धत्वंचेत्स्वतोनास्ती त्यायातमित्यतउक्तं योगायेति ज्ञानसंहताय ज्ञानात्मत्वेनाप्राकृतत्वात्स्वाभाविकमित्यर्थः ततःकिमत्राह त्वामिति १३ इतिएवमादिगुणपूर्ण १४ तस्याःपुत्राणांयुधिष्ठिरादीनांउत्पत्तेर्हेतुभिः दुर्वा ससोऽनुग्रहेणधर्मानिर्भेदसंयोगादिलक्षणैः १५ यास्यन्गंतुमिच्छन् पुत्रलालसं पुत्रस्नेहकातरं बंधुभिःसाहितं सौहृदोदितंसुहृद्भावेनकथितं १६ १७ १८ तमोघंदुःखमित्यर्थः पुत्रनाशेनेति

कृष्णकृष्णहायोगिन्सर्वात्मन्विश्वपालक ॥ प्रपन्नांपाहिगोविंदशिशुभिश्चावसीदतीम् ११ नान्यत्तवपदांभोजात्पश्यामःशरणंनृणाम् ॥ बिभ्यतांमृत्युसंसारादीश्वरस्यापवर्गिकात् १२ नमःकृष्णायशुद्धायब्रह्मणेपरमात्मने ॥ योगेश्वराययोगायत्वामहंशरणागता १३ इत्यनुस्मृत्यस्वजनंकृष्णंचजगदीश्वरम् ॥ प्रारुदद्दुःखितराजन्प्रभवतांप्रपितामही १४ समदुःखसुखोऽक्रूरोविदुरश्चमहायशाः ॥ सांत्वयामासतुःकुंतीतत्पुत्रोत्पत्तिहेतुभिः १५ यास्यन्राजानमभ्येत्यविषमंपुत्रलालसम् ॥ प्रावदत्सुहृदांमध्येबंधुभिःसौहृदोदितम् १६ भोभोवैचित्रवीर्यत्वंकुरूणांकीर्तिवर्धन ॥ भ्रातर्युपरतेपांडौबंधूनांसममास्थितः १७ धर्मेणपालयन्नुर्वींप्रजाःशीलेनरंजयन् ॥ वर्तमानःसमःस्वेषुश्रेयःकीर्तिमवाप्स्यसि १८ अन्यथात्वाचरन्लोकेगर्हितोयास्यसेतमः ॥ तस्मात्समस्त्वंवर्तस्वपांडवेष्वात्मजेषुच १९ नेहचात्यंतसंवासःकस्यचित्केनचित्सह ॥ राजन्स्वेनापिदेहेनकिमुजायात्मजादिभिः २० एकःप्रसूयतेजंतुरेकएवप्रलीयते ॥ एकोनुभुंक्तेसुकृतमेकएवचदुष्कृतम् २१ अधर्मोपचितंवित्तंहरंत्यन्येल्पचेतसः ॥ संभोजनीयापदेशैर्जलानीवजलौकसः २२ पुष्णातियानधर्मेणस्वबुद्ध्यातमपंडितम् ॥ अंतेऽकृतार्थाहिन्वंतिप्राणारायःसुतादयः २३ स्वयंकिल्बिषमादायतैस्त्यक्तोनार्थकोविदः ॥ असिद्धार्थोविशत्यंधंस्वधर्मविमुखस्तमः २४

शेषः तमोराहुस्तमोघंचेतिच दुःखैनोव्यसनेष्वघमितिच १९ सर्वस्यानित्यत्वात्कचित्कस्मिंश्चिदपिविशेषस्नेहोनकार्यः योग्यतामंतरेणेतिभावेनाह नेहेति इहलोककस्यचित्केनचित्सहात्यंतसंवासोनास्त्येव जायात्मजादिभिःसहसंवासनिदर्शनात्तिकविशेष्यनिष्ठ्यतइत्यत्रकेमुत्यमाह स्वेनापीति २० इतोपिवैषम्यबुद्धिर्नकार्येत्याह एकइति २१ अन्येअल्पचेतसःदुर्बुद्धेरधर्मेणउपचितंअर्जितंहरंतिसंभोजनीयापदेशैःसंभोजनीयाःसहभोजनयोग्याःबंधवःअपदेशैःकपटवचनैः ममैतेऽपेक्षणीयाइतिमिथ्याहेतुभिरित्यर्थः जलानिहरंतोजलसंबंधितयाजलौकसःप्राणिनोयथाहरंति षद्वा जलौकसोयादोगणस्यविद्यमानानिजलानियथान्येहरंति २२ यःस्वबुद्ध्याममत्वभ्रांतबुद्ध्याअधर्मेणान्योयेनयान्पुष्णातिस्वत्वेनाभिमतास्तेप्राणादयस्त्वंतेमरणसमयेतमपंडितंअज्ञंहिन्वंतित्यजंतिअग्निवागप्येतिवातंप्राणइतिश्रुतेः कीदृशाःअकृतार्थाःअपूर्णस्वप्रयोजनाःयथायोयोऽधर्मेणयान्स्वीयबुद्ध्यापुष्णातितेप्राणादयः तमपंडितंहिन्वंतीतितंचमरणंविदुरिति २३ पुनःस्वयंकिंकरोतीतितत्राह स्वयमिति नार्थकोविदः स्वप्रयोजनकुशलोनभवति २४

किमन्येनबहूपन्यासेनप्रकृतेकिमागतमितितत्राह तस्मादिति लोकंशरीरंस्वप्नेतिलुप्तोपमा स्वप्नवत्मायावत्इंद्रजालवत् मनोराज्यविजृंभितवदन्यत्रस्वनिमित्तंस्वप्नस्यस्वाधीनत्वप्रतीतिस्तदर्थमापा मनोरथमित्युक्तं आत्मनामनसाआत्मानंपरमात्मानंभजन्शांतोभगवदेकनिष्ठःस्वपरबुद्धिंविहायात्मजेषुपांडुपुत्रेषुचसमोभवेन्यन्वयः २५ अनयावाचानतृप्यामि अलंबुद्धिर्नप्राप्नोमि अमृतंदेवान्नं अमृतंन्योम्निदेवान्नेयज्ञशेषेरसायने अयाचितेजलेह्यग्नौमोक्षणेहेम्निगोरसे क्लीबेनास्वमरस्त्रीतुगुडूच्यामघभिक्षयोरितिच २६ सूनृतावाक् सुदान्नःपर्वताद्वज्यमानासौदामनीविद्युत्विद्युल्लता यद्वा

तस्माल्लोकमिमंराजन्स्वप्नमायामनोरथम् ॥ संभजन्नात्मनात्मानंसमःशांतोभवप्रभो २५ धृतराष्ट्रउवाच ॥ यथावदतिकल्याणीवाचंदानपतेर्भवान् ॥ तथाऽनयानतृप्यामिमर्त्यःप्राप्ययथामृतम् २६ तथापिसूनृतासौम्यहृदिनस्थीयतेचले ॥ पुत्रानुरागविषमेविद्युत्सौदामनीयथा २७ ईश्वरस्यविधिं कोनुविधुनोत्यन्यथापुमान् ॥ भूमेर्भारावतारायययोवतीर्णोयदोःकुले २८ योदुर्विमर्शपथयानिजमाययेदंसृष्ट्वागुणान्विभजते तदनुप्रविष्टः ॥ तस्मैनमोदुर वबोधविहारतंत्रसंसारचक्रगतयेपरमेश्वराय २९ श्रीशुकउवाच ॥ इत्यभिप्रेत्यनृपतेरभिप्रायंसयादवः ॥ सुहृद्भिःसमनुज्ञातःपुनर्यदुपुरीमगात् ३० शशंसरामकृष्णाभ्यांधृतराष्ट्रविचेष्टितम् ॥ पांडवान्प्रतिकौरव्ययदर्थंप्रेषितःस्वयम् ३१ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेपूर्वार्धेअष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥ ॥ ७ ॥ ॥ दशमस्कंधपूर्वार्धःसमाप्तोऽयम् ॥

विशेषेणद्यौतिप्रकाशतइतिविद्युत्तादृशीसौदामनीक्षणप्रभायथाअस्थिरातथेति विधिमाज्ञांविधुनोति अन्यथाकरोति अनेकार्थत्वाद्धातूनांदुर्विमर्शपथयादुर्विज्ञेयमार्गपादुरवबोधः दुर्ज्ञेयः विहारः सृष्ट्यादिव्यापारलक्षणाक्रिया तस्यतंत्राधीनसंसारचक्रगतिः संसारवृत्तिःप्रकारोयस्यसतथातस्मै इत्यभिप्रेत्येतिज्ञात्वा २७ २८ २९ ३० ३१ इतिश्रीभागवतेमहापुराणेदशमस्कंधेविजयध्वज कृतटीकायामष्टचत्वारिंशोऽध्यायः ४८

॥ इति श्रीमद्भागवते दशमस्कंधे पूर्वार्धः समाप्तः ॥